UNIVERSAL
LIBRARY
OU_184448
UNIVERSAL
LIBRARY

Call No. S181.48 M64BL Accession No. S1705

Author मित्र, वाचस्पति

Title भामती; ब्रह्मसूत्रशाङ्कर [illegible]

1935.

This book should be returned on or before the date last marked below.

THE
KASHI SANSKRIT SERIES
(*HARIDĀS SANSKRIT GRANTHAMĀLĀ*)
NO. 116.
(Vedânta Section, No. 11)

THE

BHÂMATÎ

A GLOSS ON SHÂNKARA BHÂSHYA

by

VÂCHASPATI MIS'RA

Edited with full notes

By

Pandit Dhundhirâj S'âstri Nyâyopâdhyâya
Principal, Nityânanda Veda Vidyālâyā, Benares.

(PART-I)

PUBLISHED & SOLD BY
JAYA KRISHNA DÂS HARIDÂS GUPTA
The Chowkhamba Sanskrit Series Office.
Benâres City.

1935.

(*All Rights Reserved by the Publisher.*)

PUBLISHED BY

JAYA KRISHNA DAS HARI DAS GUPTA

The Chowkhamba Sanskrit Series Office.

BENARES.

Printed at the Vidya Vilas Press, Benares.

1935.

हरिदास संस्कृत ग्रन्थमाला समाख्य-

काशीसंस्कृतसीरिज़पुस्तकमालायाः—

११६

वेदान्तविभागे (११) एकादशं पुष्पम् ।

ब्रह्मसूत्रशाङ्करभाष्यव्याख्या

भामती

सर्वतन्त्रस्वतन्त्रश्रीमद्वाचस्पतिमिश्रविरचिता ।

वाराणसेयनित्यानन्दवेदविद्यालयीय-

प्रधानाध्यापकेन न्यायोपाध्यायेन

पं० ढुण्ढिराजशास्त्रिणा

सङ्कलितया विषमस्थलटिप्पण्या समलङ्कृता तेनैव संस्कृता च ।

(प्रथमो भागः ।)

प्रकाशकः—

जयकृष्णदास हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस

बनारस सिटी ।

१९९२

राजशासनानुरोधेन सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः ।

भूमिका।

इह खलु प्रथितेष्वास्तिकनास्तिकदर्शनेषु परमवैराग्योत्पादनद्वारा निःश्रेयसजनकत्वेन विख्यातमद्वैतदर्शनमेव सिद्धान्तभूतमिति सुप्रसिद्धं विवेचकानाम्। यत्किल महर्षिप्रवरेण भगवदवतारूपेण व्यासेन सूत्रितं जगद्गुरुभिराद्यशङ्करभगवत्पादैः प्रणीतेन भाष्येण यथावद्विवृततात्पर्यं शमदमादिसाधनसम्पन्नैर्दीर्घकालादरनैरन्तर्येणासेव्यमानं निःश्रयसाय कल्पत इति श्रद्दधतेऽधुनापि सर्वे साम्प्रदायिकाः। तदेतद्भाष्यं गूढगभीरार्थतयाऽनायासेन नार्थबोधायालमित्यालोच्य चतुःसूत्रीपर्यन्तया पूर्णानन्दीयव्याख्यया समलङ्कृतेन रत्नप्राभाख्यव्याख्यानेन समन्वितं चौखम्बासंस्कृतसीरिजाध्यक्षप्रार्थनया संस्कृत्य प्रकाशितमपि समस्तदर्शनेष्वप्रतिमप्रतिभेन वाचस्पतिमिश्रकृतेन भामतीव्याख्यानेन विनाऽनेकविश्वविद्यालयीयपरीक्षार्थिनां छात्राणां विदुषां च प्रमोदाय नालमिति विभाव्योक्तमुद्रितभाष्यपुस्तकस्थपृष्ठपङ्क्त्यङ्कप्रदर्शनपूर्वकं विषमस्थलटिप्पणीसमेतं भामतीव्याख्यानमप्यस्माभिः प्रकाश्यते। यद्यपीयं भामती पूर्वमन्यत्रानेकवारं प्रकाशिता तथापि विषमस्थलानां दुरूहाणामर्थबोधस्य तात्पर्यज्ञानस्य च मूलमात्रभामतीपठनेनाशक्यत्वात्कल्पतरुपरिमलादिसाहाय्येन छात्राणामुपकारार्थं चौखम्बासंस्कृतसीरिजपुस्तकालयाध्यक्षश्रेष्ठिकुलावतंसजयकृष्णदासगुप्तमहोदयप्रार्थनावशंवदोऽहमेतच्छोधनेऽपि प्रवृत्तोऽभूवम्। एतच्छोधनसाहाय्ये मुख्यतया काशीस्थभूतपूर्वसुप्रसिद्धपण्डितप्रवर बालिरामशास्त्रिभिः संस्कृतं पुस्तकं, द्वितीयतया जीवानन्दभट्टाचार्यसंशोधितमाश्रितम्। यद्यपि मोहमय्यादावप्येतत्संस्करणान्यनेकानि मुद्रितानि, तथापि तेषामुक्तपुस्तकद्वयापेक्षया स्थलविशेषेष्वशुद्धप्रायत्वमिति दृष्ट्वा तेषामालम्बनं न विहितमस्माभिः। विद्यार्थिनां सौलभ्यार्थमस्यापि भाष्यपुस्तकवत् भागद्वयं कल्पितम्। यस्य द्वितीयाध्यायतृतीयपादमारभ्य समाप्तिपर्यन्तो द्वितीयभागोप्याशास्यते सत्वरमेव पाठकानां करकमलेषु समर्पयिष्यत इति। भामतीकारविषयमैतिह्यं द्वितीयभागे पर्यालोचयिष्यतेऽन्यत्रानेकैर्विद्वद्भिः प्रकाशितमपि। एवं महता श्रमेण कृतश्रमेऽप्यस्मिन्भामतीसंस्करणे शीसकाक्षरयोजकदोषेणास्मदीयमतिमान्द्याच्च सुलभानि स्खलितानि क्षान्त्वा सफलयन्तु मामकीनं परिश्रमं, प्रसीदन्तु चानेन प्रयत्नेन श्रीभाष्यकारादिचरणा इति मुहुरभ्यर्थयते—

दीपावली १९९२
अगस्त्याश्रम काशी।

ढुण्ढिराजशास्त्री।

अथ भामतीस्थविषयाणामनुक्रमणिका ।

विषयः ।	पृ०	पं०
भामतीकर्तुर्मङ्गलाचरणम् ।	१	१
अहमनुभवगोचरस्यात्मनोऽसन्दिग्धत्वेनाविचार्यत्वाक्षेपः ।	२	१
अहम्प्रत्ययस्याध्यस्तात्मपरत्वेन सन्दिग्धत्वशङ्कयाऽविचार्यत्वाक्षेपाक्षेपः ।	,,	६
धर्मितादात्म्याध्यासं विनापि बिम्बप्रतिबिम्बभावेनान्तःकरणधर्माणामात्मनि प्रतिभासशङ्का ।	३	७
रूपवत एव प्रतिबिम्ब इति नियमेनोक्तशङ्कानिरासः ।	,,	१४
अध्यासकारणभेदाग्रहाभावान्नान्तःकरणशबलितस्यैवात्मनोऽहमनुभवे भानमिति असन्दिग्धत्वान्न विचार्यत्वमिति पूर्वपक्षः ।	,,	२०
अहमनुभवे समस्तोपाध्यनवच्छिन्नश्रुतिस्मृत्यवगतात्मतत्त्वप्रकाशेनात्मस्वरूपसन्दिग्धत्वम् ।	,,	२३
अहमनुभवस्य तद्विषयान्तःकरणादिविवेकाग्रहेणाध्यासासमर्थनम् ।	४	१६
भेदप्रत्ययपूर्वको गौणप्रत्यय इत्यत्र दृष्टान्तः ।	,,	२०
अहमनुभवस्य गौणत्वनिरासः ।	५	८
अहमनुभवे शरीराभेदग्रहनिबन्धनाध्यासनिबन्धनमेव प्रादेशिकत्वम् ।	,,	१३
अहमनुभवप्रामाण्यादात्मप्रादेशिकत्वशङ्कया अणुमध्यमपरिमाणत्वायसम्भवस्य प्रतीत्यनुसारेण समाधिः ।	,,	१५
अहम्प्रत्ययस्यात्मन्यसामर्थ्येन श्रुतेरेव तत्र प्रामाण्येनात्मनः सन्दिग्धत्वोपसंहारः ।	६	१
आरोप्यस्य वस्तुसत्तां विनापि प्रतीतिमात्रेणारोपसम्भवः ।	,,	२१
सत्यानृतमिथुनीकरणरूपाध्यासो न सम्भवति प्रतीयमानस्यापि सर्वस्य देहादेः सत्यत्वादिति प्रत्यवस्थानम् ।	७	६
प्रत्यभिज्ञादावतिव्याप्तिनिरासार्थं स्मृतिरूपपदमिति विवक्षणम् ।	,,	२२
स्वप्नेऽनुभूयमानपित्रादीनामधिष्ठानाभावेनाव्याप्तिशङ्का, स्मर्यमाण एव पित्रादौ सन्निहितदेशकालत्वस्य समारोपेण तत्परिहारश्च ।	८	३
प्रकाशमानतामात्रस्य रज्ज्वादीनां सर्पादिभावापत्त्या सत्त्वनिराकरणेन सत्यानृतमिथुनीकरणसम्भवोपपादनम् ।	,,	१५
मरीचीनां भावात्मनोपाख्येयतया तोयरूपेणानुभवगोचरत्वेपि प्रपञ्चस्य न तत्त्वमिति सत्ख्यातिवादिनः शङ्का ।	,,	२२
असत एव विषयस्य क्षणिकविज्ञानेन प्रकाश इत्यसत्ख्यातिवाद्याशङ्कापरिहाराभ्यां सत्ख्यातिसमर्थनपूर्वकमनिर्वचनीयख्यात्यनुपपत्तिशङ्का ।	९	१
अबाधितस्वप्रकाशत्वं सत्त्वमिति सत्त्वनिर्वचनम् ।	१०	१४
अनिर्वचनीयतादार्ढ्याय मतान्तरोपन्यासः ।	,,	१६
तं केचिदितिभाष्यस्य ज्ञानाकाररजतस्य वस्तुसति अलीके वा बाधे नेदं रजतमिति बाधस्य रजतगोचरताया एवौचित्येन समारोप इत्यात्मख्यातिनिरूपणम् ।	११	१
रजतमित्यनुभवेन नेदं रजतमिति बाधकप्रत्ययेन पुरोवर्तित्वप्रतिषेधेनानुमानेन वा रजतस्य ज्ञानाकारतायाः पुरोवर्तित्वेन कारणत्वेन वा शुक्तेस्य रजतालम्बनत्वस्य चासम्भवेन स्वरूपतो विषयतश्चागृहीतभेदग्रहणस्मरणात्मकज्ञानद्वयमेव प्रकृतिबाधाद्भ्रमशब्देन व्यवह्रियत इत्यख्यातिवर्णनम् ।		
इदङ्कारामिमुखरजतार्थिप्रवृत्त्यनुपपत्त्येदं रजतमिति सामानाधिकरण्यव्यपदेशानुपपत्त्या सादृश्यनिब-		

विषयः ।	पृ०	पं०
ष्वनभेदाग्रहमात्रस्य प्रवर्तकत्वानुपपत्त्या द्रव्यमात्रस्य पुरोवस्थितस्यालम्बनत्वोपपत्त्या दुष्टेन्द्रियैर्भ्रमज्ञानोत्पत्त्युपपत्त्या च भ्रान्तिज्ञानासिद्ध्याऽनिर्वचनीयख्यातिसमर्थनम् ।	१२	२२
विवादास्पदं रजतज्ञानं पुरोवर्तिवस्तुविषयकं रजतार्थिनस्तत्र नियमेन प्रवर्तकत्वादित्यनुमानविरोधोऽख्यातिवादे ।	१३	२२
एकस्यानेकात्मतावभासे उदाहरणान्तरम् ।	१४	२०
आत्मस्वप्रकाशत्वोपपादनम् ।	१५	३
संविदाश्रयत्वेनात्मनो जडत्वशङ्का ।	,,	९
अर्थानां संविदध्यासिकसम्बन्धातिरिक्तसम्बन्धाभावेन तेषां तदध्यस्तत्वनिरूपणम् ।	,,	१८
स्वप्रकाशे निरंशे चात्मन्यन्तःकरणाद्यध्यासासम्भवशङ्कोपसंहारः ।	१६	१९
औपाधिकरूपेणात्मनः साक्षात्वाद्विषयत्वाच्चाध्यासासम्भवनिरूपणम् ।	१७	४
बीजाङ्कुरन्यायेनान्योन्याश्रयपरिहारः ।	,,	२२
नभःपरोक्षत्वादिदृष्टान्तसमर्थनम् ।	१८	७
श्रवणादिजन्यवृत्त्यभिव्यक्तचैतन्यस्याज्ञानेन विरोधोपपादनम् ।	,,	१९
शास्त्रीयकर्मणामपि वेदान्तानामपि अविद्यावद्विषयत्वोपपादनम् ।	१९	१५

जिज्ञासाधिकरणे

समस्तदुःखोपशमरूपानन्दैकरसपरमप्रयोजनत्वं ब्रह्मज्ञानस्य संशयो ब्रह्मणि च जिज्ञासया सूच्यत इति जिज्ञासासूत्रस्य शास्त्रादित्वस्थापनम् ।	२४	१२
जिज्ञासाया अभिमांसात्वात् योगानुशासनवदनधिकार्यत्वम् ।	२५	११
मङ्गलस्यावाच्यस्यालक्ष्यस्य च ज्ञाप्यस्य च न वाक्यार्थेऽन्वय इति नाथशब्दार्थत्वम् ।	२६	४
ब्रह्मजिज्ञासाहेतुपूर्वप्रकृतापेक्षत्वेऽथशब्दस्येष्टापत्तिपक्षः, विकल्पापत्तिभानेनाथशब्दस्य पूर्वप्रकृतापेक्षपरत्वनिरासश्च ।	,,	२२
वेदाध्ययनानन्तर्यस्य वेदान्ताध्ययनानन्तर्यस्य वाऽथशब्दार्थत्वनिरासः ।	२७	७
विविदिषन्तिवाक्यावगतस्य कर्मणां ब्रह्मज्ञाने विनियोगस्य वाक्यादेव न्यायादिसमवेतयोग्यतावगमपूर्वस्मरणादवगमसम्भवेन ज्ञानोत्पत्तावनुपयोगेन कल्मषानिबर्हणद्वारा पुरुषसंस्कारद्वारा ऋणापाकरणद्वारा संयोगपृथक्त्वेन साक्षादेव वा साक्षात्कारफलाया ब्रह्मभावनायाः सर्वापेक्षासूत्रासिद्धत्वेन तदनुष्ठानार्थमपेक्षितकर्मानन्तर्यस्याथशब्दार्थत्वाशङ्का ।	,,	११
ब्रह्मस्वरूपे साक्षात्कारे उत्पत्तिविकारादीनामसम्भवात् तत्र ब्रह्मोपासनाया कर्मानपेक्षत्वोपपादनम् ।	२९	५
अविद्यापिधाननिरसनरूपे ब्रह्मसंस्कारे उपासनायाः शाब्दज्ञानसन्ततिरूपाया निर्विचिकित्सशाब्दज्ञानसन्ततिरूपाया वा अपरोक्षभ्रमस्यापरोक्षज्ञानेनैव निवृत्त्या शब्दस्यापरोक्षज्ञानाजनकत्वेन च कर्मानपेक्षोपपादनम् ।	,,	२०
ब्रह्मणो वेदान्तजन्यवृत्तिविषयत्वेऽपि स्वप्रकाशत्वविरोधात् उपहितस्यैव वृत्तिविषयत्वमिति निरूपणम् ।	३०	१६
उपहितब्रह्मसाक्षात्कारे उपासनायाः कर्मसहभावाभावेन तदनपेक्षोपपादनम् ।	३१	६
अविद्यासंस्कारानुवृत्त्याऽनुवर्तमानस्य कर्मण आविद्यकस्यापि अविद्योच्छेदकत्वशङ्का ।	,,	१२
निर्विचिकित्ससाक्षात्कारवतोऽनुवर्तमानाविद्यासंस्कारस्यापि शरीरधर्मब्राह्मणत्वाभिमानेन कर्माधिकारनिरासः ।	,,	३१
विहित इव निषिद्धेऽप्यनधिकारेण भिन्नकर्मतापातशङ्का, निषेधेभिमानिनोऽप्यधिकारेण तत्परिहारश्च ।	३२	८
उपात्तदुरितानिबर्हणेन कल्पतेनैव कर्मणाप्युपयोगो, न तु संयोगपृथक्त्वेन साक्षादङ्गभावः ।	३३	१३
जायमानो वै ब्राह्मण इत्यस्याविरक्तगृहस्थाविषयत्वोपपादनम् ।	३४	३

विषयः ।	पृ०	पं०
कर्मब्रह्मावबोधयोः शेषशेषिणोः प्राप्तोऽर्थक्रमनिरासः ।	,,	१९
ब्रह्मणः आत्मा द्रष्टव्य इत्यादिविधिविषयत्वनिरासेन धर्मवैलक्षण्यसमर्थनम् ।	३६	९
नित्यानित्यवस्तुविवेकपदार्थः, तेषु पूर्वपूर्वस्योत्तरानिमित्तत्वोपादनम् ।	३७	७
शमदमादिस्वरूपविवेचनम् ।	३८	२
ऐहिकेषु दुःखमिश्रितेष्वपि सुखेषु दुःखानुषङ्गमात्रेण वैराग्यासम्भवः, आमुष्मिकेषु नित्येषु कथमपि न तत्सम्भव इति साधनचतुष्टयसम्पत्त्यसम्भवशङ्कापरिहारार्थत्वेनातःशब्दयोजनम् ।	,,	१८
जिज्ञासेत्यत्र ज्ञानं ब्रह्मावगतिः, सा च निःशेषसंसारनिबर्हणेन पुरुषार्थो विवक्षित इति पाशङ्कानिरासपूर्वकनिरूपणम् ।	४१	२
वेदान्ताध्ययनस्याध्ययनविधिना वेदान्तार्थविवक्षया धर्मजिज्ञासासूत्रेण च सिद्धत्वात्साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्मविचारप्रतिज्ञानार्थत्वेनाथातोब्रह्मजिज्ञासेतिसूत्रसार्थक्यम् ।	४२	१

अथ जन्माद्यधिकरणे

जगत् जगत्कारणत्वं वाऽशुद्धं न शुद्धब्रह्मणो लक्षणम्, नित्यत्वादिकं त्वप्रसिद्धत्वान्न तल्लक्षणमिति पूर्वपक्षः ॥	४५	१५
जन्मादि इति निर्देशस्य लिङ्गसामान्यविवक्षया तद्गुणातद्गुणसंविज्ञानबहुव्रीह्याश्रयणाविशेषशङ्का, श्रुतिसिद्धजन्मस्थितिभङ्गत्रयकारणत्वोपपत्त्यर्थं तद्गुणसंविज्ञानबहुव्रीहेरेवाश्रयणेऽपि जन्मादय इति निर्देशप्रयुक्तगौरवनिरासार्थं लिङ्गसामान्यविवक्षोपपादनं च ।	४६	४
प्रधानकालब्रह्मलोकपालादीनामेव कारणत्वेन ब्रह्मणोऽकारणत्वमिति पूर्वपक्षः ।	,,	७
पुरुषकारणत्वप्रतिषेधार्थप्रवृत्तानेककर्तृभोक्तृसंयुक्तेत्यस्य विवरणम् ।	,,	१६
षड्भावविकाराग्रहणेन जन्मादिग्रहणे प्रयोजनं तत्स्वरूपविवेचनं च	४७	५
पुरुषस्वातन्त्र्येऽपि धर्मे विध्यादिसार्थक्योपपादनम् ।	४९	१
ब्रह्मणो भूतवस्तुत्वे प्रमाणान्तरविषयत्वाक्षेपः, तत्र पराञ्चि खानीति श्रुत्यादिविरोधेन प्रत्यक्षाविषयत्वाद्धेत्वायसम्भवेनानुमानाद्यविषयत्वाच्च तत्परिहारश्च ।	,,	२०

शास्त्रयोनित्वाधिकरणे—

ऋग्वेदादिमहत्त्वस्य पुराणादिमहत्त्वस्य चोपपादनम् ।	५१	४
आनुपूर्वीरूपवाक्यानित्यत्वस्य मीमांसकानामपि सम्मतत्वेन पुरुषास्वातन्त्र्यनिबन्धन एवापौरुषेयत्ववादः ।	५२	२
तत्र जैमिनीयवैयासिकादिमतभेदविचारः ।	,,	१६
पुंवाक्यवत्पौरुषेयत्वाभावेन वेदान्तानां निरपेक्षप्रामाण्यसमर्थनम् । भूतार्थत्वस्य कार्यार्थत्वस्येव पौरुषेयत्वासाधकत्वं च ।	५६	८
हेयोपादेयरहितत्वेन वेदान्ताप्रामाण्यशङ्का, सिद्धब्रह्मावगममात्रेण पुरुषार्थसिद्ध्या तत्परिहारश्च ।	५६	१०
स्तुतिरूपार्थवादानां वेदान्तानां च परस्परवैलक्षण्यशङ्कापरिहारौ ।	५७	७
वेदानां स्वतःप्रामाण्योपपादनम् ।	,,	२१
अज्ञातसङ्गतित्वेन शास्त्रत्वेनार्थवत्तया मननादिप्रतीत्या च कार्यार्थाद्ब्रह्मनिश्चयः इति सङ्गतिश्लोकव्याख्यानपूर्वकं कार्यपरवाक्यमात्रप्रामाण्यपक्षेण वेदान्तानां सिद्धब्रह्मण्यप्रामाण्येन प्रतिपत्तिविधिविषयतयैव ब्रह्मसमर्पकत्वनिरूपणम् ।	५८	५
ब्रह्मज्ञानस्य रात्रिसत्रन्यायेन स्वर्गफलत्वनिरूपणम् ।	५९	२०
पिण्डोपासनयज्ञन्यायेन प्रवृत्तिः, तत्स्वरूपविवेचनं च ।	६०	१
नित्यप्राप्तस्याप्यानन्दस्य फलत्वसम्भवादात्यन्तिकाशरीरत्वरूपमोक्षसाधनब्रह्मावगमपर्यन्ता वेदान्ता इति निरूपणम् ।	,,	१२
ब्रह्मज्ञानस्य स्वर्गादिफलत्वनिरासेन तत्र विधिनिरासेन च नित्यफलोपयोगित्वनिरूपणम् ।	६१	७

विषयः ।	पृ०	पं०
परिणामिपरिणामयोः कार्यकारणात्मना भेदाभेदादिनिरूपणेन परिणामिनित्यतासाधनम् ।	६१	१८
एकत्वज्ञानस्य सम्पदादिरूपत्वशङ्कातन्निरासाभ्यां स्थितवस्तुविषयत्वव्यवस्थापनम् ।	६४	२४
पुरुषतन्त्रक्रियासाध्यत्वे एवानित्यत्वं न तु वस्तुतन्त्रक्रियारूपज्ञानतन्त्रत्वे इति तत्परिहारः ।	६८	१
ज्ञानस्य वस्तुतन्त्रत्वोपपादनम् ।	६९	८
श्रोतव्यादिवाक्यानिधित्वसमर्थनम् ।	,,	१३
कार्यबोधे यथा चेष्टा लिङ्गं हर्षादयस्तथा । सिद्धबोधेऽर्थवत्त्वेवं शास्त्रत्वं हितशासनात् । इति सङ्ग्रह-श्लोकविवरणेन वेदान्तानां सिद्धब्रह्मबोधनेन प्रामाण्यसमर्थनम् । विध्याद्यविषयस्यात्मनोऽविनश्वरस्य प्राधान्येन वेदान्तप्रतिपाद्यत्वोपपादनम् ।	७२	१४
दृष्टो हि तस्यार्थः कर्मावबोधनम् नामेत्यनुक्रमणस्य धर्मजिज्ञासाविषयत्वम् ।	७३	१६
भावार्थविषय एव विधिः दध्ना जुहोतीत्यादावपि विशिष्टविधिरेवेति निरूपणम् ।	७५	१३
हन्यच्चेत्यनेन रागप्राप्तहननानुवादेन नञाऽभावबोधनमेव न हन्यादित्यत्र वाक्यार्थ इति निरूपणम् ।	७७	१६
कर्तव्यतैतत्कार्यसमवेतेष्टानिष्टसाधनत्वं लिङर्थः, तत्र कर्तव्यतासमवेतेष्टसाधनत्वस्य लोकतोऽवगतौ शास्त्रेणानिष्टसाधनत्वबोधनम्, तेनेष्टसाधनत्वाभावबोधः, अनिष्टसाधनत्वस्यावगताविष्टसाधनत्वस्येत्यादिविवेचनम् ।	७८	१२
देहात्मप्रत्ययादिगौणत्वनिरासेन तान्मिथ्यात्वसमर्थनम् ।	७९	३

ईक्षत्यधिकरणे

प्रधानपरमाण्वनिर्वचनीयाविद्याजगत्कारणत्वमतैर्विप्रतिपत्तिप्रदर्शनम् ।	८४	१
ब्रह्मणो ज्ञानक्रियाशक्त्यभावात् प्रधानस्य च तत्सम्भवात् प्रधानमेव कारणमिति निरूपणम् ।	,,	८
प्रधानकारणवादे ईक्षणकर्तृत्वात्वशब्दस्वाप्ययकारणत्वश्रुतीनामुपपत्तिप्रदर्शनम् ।	८५	१
पौर्वापर्यपरामर्शाद्यदाम्नायोऽसौ वदेत्, जगद्बीजं तदवेष्टं चेतने च स ओजस इति सिद्धान्तसङ्ग्रह-श्लोकस्य ब्रह्मण एव सर्वज्ञत्वाद्युपपादनेन विवरणम् ।	,,	२४

अथानन्दमयाधिकरणे

ब्रह्मलक्षणप्रमाणसमन्वयैः पर्यवसितस्यापि शास्त्रस्योपहितविषयस्यापि क्वचिदुपाधिविवक्षा क्वचिन्नेत्यादिनिरूपणार्थत्वेनोत्तरसंदर्भप्रवृत्तिरिति निरूपणम् ।	९०	१३
गौणप्रवाहपातेऽपि मुख्यते मुख्यपक्षिणम् । मुख्यत्वे तूभयोस्तुल्ये प्रायदृष्टिर्विशेषिका इति पूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे ।	९१	१५
चतुष्कोशान्तरत्वे तु न सर्वान्तरतोच्यते । प्रियादिभागी शारीरो जीवो न ब्रह्म युज्यते ॥ इति श्लोकतद्विवरणे ।	,,	२१
आनन्दमयस्य प्रधानस्य सर्वान्तरत्वेन प्रतिपादितस्य स्थूलारुन्धतीन्यायेन प्रतिपादिपादयिषितपरमात्मपरत्वोपपादनम् ।	९३	१५
ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्मशब्दात्प्रतीयते । विशुद्धं विकृतं त्वानन्दमयशब्दप्रतीतिः—इति स्वसिद्धान्तसङ्ग्रहश्लोकतद्विवरणे ।	९	
प्रायपाठपरित्यागः मुख्यत्रितयलङ्घनम् । पूर्वस्मिन्नुत्तरे पक्षे प्रायपाठस्य बाधनमिति सिद्धान्तसङ्ग्रह-श्लोकतद्विवरणे ।	,,	१३

अथान्तरधिकरणे

पूर्वाधिकरणेन सङ्गतिनिरूपणपूर्वकं मर्यादाधाररूपाणि संसारिणि परे न तु, तस्मादुपास्यः संसारिकर्मानधिकृतो रविरिति पूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे ।	९७	२
सार्वात्म्यसर्वदुरितावरेहाभ्यामिहोच्यते । ब्रह्मैवाव्यभिचारिभ्यां सर्वहेतुर्विकारवत् । इति सिद्धान्तसङ्ग्रह-श्लोकतद्विवरणे ।	,,	१६

विषयः । पृ० पं०

अथाकाशाधिकरणे

पूर्वाधिकरणदृष्टान्तेन सङ्गतिनिरूपणेन संशयप्रदर्शनेन "प्रथमत्वात् प्रधानत्वादाकाश मुख्यमेव नः । तदानुगुण्येनान्यानि नेयानीति विनिश्चय" इति पूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे । ९८ २४

सामानाधिकरण्येन प्रशस्ततत्पति वाक्ययोः । पौर्वापर्यपरामर्शात् प्रधानत्वेऽपि गौणतेति सिद्धान्तसङ्ग्रहश्लोकतद्विवरणे । ९९ १३

प्राणाधिकरणे

उद्गीथप्रतीहारयोः कार्यकरणसङ्गतदेवतापरत्वेन तत्प्रायपाठात् प्राणोऽपि देवता भवितुमर्हतीति पूर्वपक्षः । १०१ २२

छन्दोभिधानादिति सूत्रतद्भाष्ये । १०५ १०

आकाशाधिकरणेन गतार्थत्वशङ्का, अधिकाशंका तत्परिहारश्च । ,, १४

गायत्रीशब्दस्य तदनुगतब्रह्मपरत्वपक्षोपपादनम् । १०६ ६

पुंवाक्यस्य बलीयस्त्वं मानान्तरसमागमात् । अपौरुषेये वेदे तत्सङ्गतिः किं करिष्यतीति सिद्धान्तसङ्ग्रहश्लोकतद्विवरणे । १०१ १६

ज्योतिरधिकरणे

विषयविशयनिर्देशपूर्वकं औत्सर्गिकत्वाद्वाक्यस्य तेजोलिङ्गोपलम्भानदिति पूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे । १०२ १४

इन्द्रप्रतर्दनाधिकरणे

उपासनाविषयपूर्वपक्षेणोक्ताधिकरणगतार्थताशङ्कानिरासः । १०८ २४

अथ प्रथमाध्यायस्य द्वितीयः पादः ।

सर्वत्रप्रसिद्धाधिकरणे

सर्वं खल्वित्यादिविषयवाक्यार्थसङ्ग्रहः । १११ ७

स क्रतुं कुर्वीतेति विहितध्यानाङ्गतया शमविधिहेतुमात्मिगदार्थवादस्योपास्यब्रह्मसमपर्कत्वासम्भवेन मनोमयादिशब्दबोधितजीवोपासनापूर्वपक्षः । ,, १०

समासः सर्वनामार्थः सन्निकृष्टमपेक्षते । तद्धितार्थेऽपि सामान्ये नापेक्षाया निवर्तक इति सिद्धान्तसङ्ग्रहश्लोकतद्विवरणे । ११२ १०

जीवलिङ्गानाम् ब्रह्माण समन्वयः, न तु ब्रह्मलिङ्गानाम् जीव इति समारोप्यस्य रूपेण विषयो रूपवान् भवेत् इति सङ्ग्रहश्लोकतद्विवरणाभ्यां निरूपणम् । ,, २१

शारीरपरमात्माभेदेऽपि परमात्मसंसारित्वादेः अनुपपत्तेस्तु न शारीर इति सूत्रनिर्देशस्य चोपपत्तिः । ११३ २१

अन्नधिकरणे

ब्रह्मसूत्रेषु ओदनत्वनिर्देशस्य गौणस्य भोग्यत्वेन नाश्यत्वेन वा विवक्षणीयत्वेन तत्सिद्धस्यात्तृत्वस्य भोक्तृत्वरूपस्य संहर्तृत्वस्य वाऽनभ्युपगमे अविक्रिये च परमात्मन्यसम्भवेन जीवाग्निपरत्वमिति पूर्वपक्षः । ११५ ९

मृत्युपसेचनसूचित-सकलजगद्भोक्तृत्वस्य तत्संहर्तृत्वरूपस्य वा परात्मनोऽन्यत्रासम्भवात् ब्रह्मक्षत्रपदयोर्लक्षणया सर्वोपलक्षणत्वाच्च परमात्मैवात्तेति सिद्धान्तनिरूपणम् । ,, २०

गुहाधिकरणे

ऋतं पिबन्तावित्यत्र पिबन्तावित्यस्य बुद्धिजीवपरत्वं जीवपरमात्मपरत्वं वा सृष्टयसृष्टिमत्त्वोपधेयेष्टकानां सृष्टिशब्देनैव लाभात् संशयसमर्थनम् । ११६ १८

नियताधारता बुद्धिजीवसम्भविनी नहीति पूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे । ११७ ७

विषयः । पृ० पं०

अथान्तराधिकरणे

एष दृश्यत इत्येतत्प्रत्यक्षेऽर्थे प्रयुज्यते । परोक्षं ब्रह्म न तथा प्रतिबिम्बे तु युज्यते, इति अन्तराधिकरणगतार्थताशङ्कापरिहारीयुक्तिसङ्ग्रहश्लोकतद्विवरणे । ११९ ४

अमृतत्वाभयत्वात्मत्वब्रह्मत्ववामनीत्वादीनां प्रतिबिम्बे योजनेन कं च खं चेत्याग्निवाक्यस्याचार्यवाक्यनियन्तृत्वाभावेन च प्रतिबिम्बपूर्वपक्षोपन्यासः । ,, ११

अनिष्पन्नाभिधाने द्वे सर्वनामपदे सति । प्राप्य सन्निहितस्यार्थं भवेतां अभिधातृणी, इति सिद्धान्तसङ्ग्रहश्लोकतद्विवरणे । ,, १९

संयद्वामत्वादीनां ब्रह्मणि समन्वयः । १२० ४

पूर्वापरसन्दर्भनिरूपणपूर्वकं कं ब्रह्म खं ब्रह्मेति वाक्यार्थविवेचनम् । १२१ ३

अन्तर्याम्यधिकरणे

स्वकर्मोपार्जितं देहं तेनान्यच्च नियच्छति, तदादिरशरीरस्तु नात्मान्तर्यामितां भजेदिति पूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे । १२३ १२

अदृश्यत्वाधिकरणे

परिणामो विवर्तो वा सरूपस्योपलभ्यते । चिदात्मना तु सारूप्यं जडानां नोपपद्यते । जडं प्रधानमेवातो जगद्योनिः प्रतीयतां । येषिछन्दो निमित्तं चेत्कुतो जीवनिराक्रियेति पूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे । १२५ १५

वैश्वानराधिकरणे

पूर्वोत्तरसन्दर्भवाक्यार्थादिवर्णनपूर्वकं विषयवाक्यसङ्ग्रहः । १२८ १३

अथ प्रथमाध्यायस्य तृतीयः पादः ।

तत्र द्युभ्वाद्यधिकरणे

पारवत्वेन सेतुत्वाद्भेदे षष्ठ्याः प्रयोगतः । इति पूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे । १३१ २६

बन्धनहेतुत्वमात्रस्य पारावारमध्यवर्तित्वविशिष्टस्य तस्य वा सेतुशब्दार्थत्वनिरासः, अमृतस्यैवसे तुरित्यत्रामृतस्येति षष्ठ्या एषपदार्थेनान्वयनिरूपणं च । १३२ १

द्युभ्वाद्यायतनस्य परमात्मत्वं इति सिद्धान्तोपपादनम् । सेतुशब्दगौणत्वस्य पदद्वयसाधारण्योपपादनं च । ,, २१

भूमाधिकरणे

यत्र नान्यत् पश्यति इति भूमवाक्यपूर्वसन्दर्भादिविवेचनम् । १३५ २

एतस्मिन्ग्रन्थसन्दर्भे यदुक्तात् भूयसोऽन्यतः । उच्यमानं तु तद्भूय उच्यते प्रश्नपूर्वकम्, इति पूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे । १३५ १७

परमात्मपरत्वसिद्धान्तोपपादनम् । १३७ ३

ईक्षतिकर्माधिकरणे

कार्यब्रह्मजनप्राप्तिफलत्वादर्थभेदतः । इतिपूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे । १३९ २१

ईक्षणध्यानयोरैक्यं कार्यकारणभूतयोः । इतिसिद्धान्तसङ्ग्रहश्लोकतद्विवरणे । १४० ९

दहराधिकरणे

आधेयत्वाद्विशेषाच्चेति पूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे । १४१ ११

एकस्यैवोपमानोपमेयभावानुपपत्त्या दहरशब्दस्य तेन तस्योपमेयत्वमिति सङ्ग्रहश्लोकतद्विवरणाभ्यां भूताकाशपरत्वनिरासेन परमात्मपरत्वोपपादनम् । १४२ ६

विषयः ।	पृ०	पं०
ब्रह्मपुरशब्दस्य सिद्धान्तानुगुण्यसमर्थनम् ।	„	१४
दहराकाश प्रकृत्याम्नातोपाख्याननिरूपणम् ।	१४६	१
एष सम्प्रसाद इति वाक्यशेषानुसारेण जीवपरत्वशङ्कातत्परिहारौ ।	१४७	२६
जीवब्रह्मणोरभेदासम्भवशङ्कातत्परिहारौ ।	१५०	४
अनुकृत्यधिकरणे		
अभानं तेजसो दृष्टं सति तेजोऽन्तरे यत इतिपूर्वपक्षसङ्ग्रहश्लोकतद्विवरणे ।	„	२३
ब्रह्मण्येव तु तल्लिण्ये न तु तेजस्यलौकिके इति सिद्धान्तसङ्ग्रहश्लोकतद्विवरणे ।	१५१	१३
प्रमिताधिकरणे		
नाङ्गुष्ठा मानमेदोऽस्ति परस्मिन्मानवर्जिते, इति सांशयिकसामग्रीसङ्ग्रहश्लोकतद्विवरणे	१५३	१
अंगुष्ठश्रुत्यनुसारेणेशानश्रुत्यन्यथानयनेन जीवपरत्वपूर्वपक्षाविवेचनम् ।	„	६
प्रश्नोत्तरत्वादीशानश्रवणस्याविशेषतः । जीवस्य ब्रह्मरूपत्वप्रत्यायनपरं वचः ॥ इति सिद्धान्त-सङ्ग्रहश्लोकतद्विवरणे ।	„	२३
देवताधिकरणे		
देवताविग्रहस्य सोपपत्तिकं समर्थनम् ।	१५५	१५
प्रत्येकं मिलितानां वा वर्णानामवाचकत्वात्स्फोटवादोपपादनम् ।	१५८	७
गौरित्येकं पदमित्यनुभवस्य स्फोटे प्रामाण्यसमर्थनम् ।	१५९	७
वर्णानामेव वाचकत्वादौपाधिकत्वादिना गौरित्येकं पदमित्यनुभवस्याप्युपपत्तेः स्फोटवादनिरासः ।	„	९
सृष्टिप्रलयाभ्युपगमेन वेदनित्यत्वविरोधशङ्कातत्परिहारौ ।	१६२	२०
प्रमानान्तराविरुद्धे आर्थवादिकेऽप्यर्थे वेदप्रामाण्यविवेचनम् ।	१६९	११
अपशूद्राधिकरणे		
कर्मस्वन्यभावादनधिकारेऽपि विद्यायाममनाधिकारः शूद्राणां न सम्भवतीति पूर्वतन्त्राधिकारणेना-गतार्थतोपपादनम् ।	१७४	१
स्वाध्यायविधेः स्वतन्त्रफलार्थत्वेन ब्रह्मविद्यायां शूद्रेत्यामन्त्रणलिङ्गेन संवर्गविद्यामात्रे वाऽधिकार इति पूर्वपक्षसमर्थनम् ।	„	५
अध्ययनस्य फलवत्कर्मब्रह्मावबोधफलत्वेन तद्वतत्रैवर्णिकस्यैवाधिकारः न तु शूद्रस्येति सिद्धान्तः ।	१७५	८
विध्यभावान्न्यायबाधाच्चार्थवादिकलिङ्गेन संवर्गविद्यायां शूद्राधिकारनिरासः ।	१७६	१
कम्पनाधिकरणे		
यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतमिति वाक्ये वायुपरत्वपूर्वपक्षतन्निरासपूर्वकब्रह्मपरत्व-सिद्धान्तौ ।	१७९	७
ज्योतिरधिकरणे		
ज्योतिःशब्दस्य तेजःपरत्वपूर्वपक्षतन्निरासपूर्वकपरमात्मपरत्वसिद्धान्तौ ।	१८०	७
अर्थान्तरत्वाधिकरणे		
आकाशशब्दस्य भूताकाशपरत्वपूर्वपक्षः, परमात्मपरत्वसिद्धान्तश्च ।	१८२	८
सुषुप्त्युत्क्रान्त्यधिकरणे		
आत्मविद्याप्रस्थानेषु संसारिप्रतिपादनात् । तत्परे ग्रन्थसन्दर्भे सर्वं तत्रैव योज्यते इति पूर्वपक्षसङ्ग्रह-श्लोकतद्विवरणे ।	१८२	२६
योऽयं विज्ञानमय इति वाक्यस्य परमात्मोपदेशपरत्वसिद्धान्तः ।		
इति प्रथमाध्यायस्य तृतीयःपादः ।		

विषयः । पृ० पं०

अथ प्रथमाध्यायस्य चतुर्थः पादः ।

अथानुमानिकाधिकरणे

उत्तरसन्दर्भवैयर्थ्यशंकातन्निरासौ । १८४ १३
महतः परमव्यक्तमित्यादीनां साङ्ख्यसम्मतप्रधानादिपरत्वोपपादनम् ,, २६
अव्यक्तपदस्य शरीरगोचरत्वोपन्यासः । १८६ १८
शरीरं चात्र सूक्ष्ममेव विवक्षितमित्यव्यक्तत्वोपपत्तिः । ,, १९
अविद्यावादस्य प्रधानवादात् भेदनिरूपणम् । १८७ २
अविद्याजगद्बीजत्वेऽप्युपादानतया निमित्ततया चेश्वरापेक्षानिरूपणम् । ,, १८

न संख्योपसंग्रहाधिकरणे

पञ्चजनशब्दस्य मनुजपरत्वे श्रुतेर्निस्तात्पर्यापत्त्या यौगिकत्वेन साङ्ख्यसम्मतपञ्चविंशतितत्वप्रतिपादन एव तात्पर्यमिति श्रुतिमत्वशङ्का, नानाभावात्तत्परिहारश्च । १९२ १८

कारणत्वाधिकरणे

वाक्यानां कारणे कार्ये परस्परविरोधतः । समन्वयो जगद्योनौ न सिद्ध्यति परमात्मनि इति पूर्वपक्षसंग्रहश्लोकतद्विवरणे । १९६ १९
सर्गक्रमविशेषेऽपि न स स्रष्टरि विद्यते । सतस्त्वसदृचो भक्त्या निराकार्यतया क्वचिदिति सिद्धान्तसंग्रहश्लोकतद्विवरणे । १९७ ३

वाक्यान्वयाधिकरणे

मैत्रायणीब्राह्मणार्थसङ्ग्रहः । २०२ १८
ईक्षापूर्वककर्तृत्व प्रभुत्वमसरूपता । निमित्तकारणेष्वेव नोपादानेषु कदाचिदपि इति पूर्वपक्षसंग्रहश्लोकविवरणम् । २१०

इति प्रथमाध्यस्य चतुर्थः पादः ।

अथ द्वितीयाध्याये प्रथमः पादः ।

स्मृत्यधिकरणे

वृत्तवार्तेष्यमाणयोरध्याययोः सङ्गतिप्रदर्शनाय सङ्क्षेपतस्तात्पर्यार्थकथनम् । २१२ १
कपिलादिस्मृतीनां मोक्षसाधनत्वप्रकाशकत्वाभावे आनर्थक्यापातात्तदविरोधेन वेदान्ता व्याख्यातव्या इति पूर्वपक्षसमर्थनम् । ,, २
पूर्वपक्षायुक्तत्वाशङ्कापरिहारौ । २१३
नानास्मृतीत्यादिसूत्रशेषव्याख्यया स्मृतीनामविगानाच्छ्रौतार्थस्यास्थेयत्वप्रतिपादनम् । ,, १
कपिलादेस्मृतीनां प्रत्यक्षमूलत्वाशङ्कानिराकरणे । ,, १
श्रुतेः कपिलादिज्ञानातिशयबोधकत्वात्कथं तद्वचनानामप्रामाण्यमिति शङ्कानिराकरणम् । २१४
मन्वादीनां श्रौतत्वप्रदर्शनम् । ,,
महदादीनामलोकवेदप्रसिद्धत्वात् साङ्ख्यस्मृतेरनवकल्पनम् । ,, २

योगप्रत्युक्तयधिकरणे

औपनिषदेन तत्त्वज्ञानेनापेक्षणात्तदबाहुल्याच्च वेदेन योगस्मृतिः प्रमाणमिति पूर्वपक्षः । २१५
येनाशेनाविरोधस्तत्रेष्टं प्रामाण्यमिति सिद्धान्तः । २१६

विषयः ।	पृ०	पं०
विलक्षणत्वाधिकरणे		
पूर्वपक्षेऽनवकाशत्वाक्षेपसमाधी	२१७	२
जगच्चैतन्यवादनिरासः ।	,,	१९
अचेतनत्वेनाभिमतानां भूतेन्द्रियाणां चैतन्यप्रदर्शनभ्रत्युपन्यासेनोत्तरसूत्रावतारणम् ।	२१८	४
जगतोऽब्रह्मप्रकृतित्वाक्षेपोपसंहारः ।	,,	२४
विलक्षणत्वादिति हेतोर्व्यभिचारेद्भावनम्, पूर्वपक्षासंभवप्रदर्शनं च ।	२१९	१
विभागश्रुतिविरोधपरिहारः ।	,,	२२
जगद्ब्रह्मणोः कार्यकारणविषयकोपनिषद्दर्शने चतुर्विधसूत्रव्याख्यानेनासामञ्जस्यप्रदर्शनम् ।	२२०	२
उक्तासामञ्जस्यपरिहारः ।	,,	२१
वैलक्षण्यादीनां सङ्ख्यपक्षसाधारणत्वकथनम् ।	२२१	१०
निरागमानां तर्काणामप्रतिष्ठितत्वोपपादनम् ।	,,	१५
शिष्टापरिग्रहाधिकरणे		
मन्वादिशिष्टपरिगृहीतार्थवादपदार्थानामतिदेशेन प्रधानकारणतानिरासवानिरासः ।	२२२	१४
भोक्त्रापत्त्यधिकरणे		
प्रमाणान्तरासिद्धभोक्तृभोग्यविभागबोधकत्वं श्रुतेर्युक्तमित्याक्षिप्य परिणामदृष्टान्तेन तन्निरासः ।	२२३	१८
आरम्भणाधिकरणे		
तदनन्यत्वेत्यादिसूत्रं व्याख्याय पूर्वाधिकरणपक्षस्य विवर्ताश्रयेण समाधानम् ।	२२४	६
अनेकान्तवादतन्निरासौ ।	२२५	२०
एकान्तिकत्वाभ्युपगमे लौकिकप्रमाणव्याघातोपपादनम्, मोक्षशास्त्रस्यानृतत्वेन तद्बोधितात्मैकत्वस्यासत्यत्वापत्तितत्परिहारौ	२२७	७
अनेकत्वस्य श्रौतत्वात्तात्त्विकत्वाशङ्का, निरासश्च ।	२२९	१
सूत्रस्य श्रुतिप्रतिज्ञाभ्यां विरोधाशङ्का तत्परिहारश्च :	२३०	१४
कारणसत्त्वे एव कार्यस्योपलम्भात्तस्य कारणानन्यत्वप्रतिपादनम् ।	२३१	२
उत्पत्तेः प्राक्कारणात्मना कार्यसत्त्वश्रवणात्तदनन्यत्वकथनम् ।	,,	१९
असदेवेदमित्यादिश्रवणात्प्रागुक्तकार्यसत्त्वमाशंक्य खंडनम्, कार्यकारणभेदे युक्तिकथनं च ।	२३२	१२
समवायखण्डनम् ।	२३३	१
असत्कार्यवादे उत्पत्तेरकर्तृकत्वनिरात्मकत्वयोरापत्तिः ।	२३४	१
इतरव्यपदेशाधिकरणे		
शारीरस्य ब्रह्मात्मत्वव्यपदेशाद्धितक्रियायदर्शनाच्च चेतनकारणवादाक्षेपतन्निरासौ ।	२३५	४
उपसंहारदर्शनाधिकरणे		
अद्वितीयब्रह्मणो जगद्धेतुत्वानुपपत्तिशङ्का, क्षीरादिवद्विचित्रपरिणामोपपत्तिदृष्टान्तेन तन्निरासश्च ।	२३५	२२
कृत्स्नप्रसक्त्यधिकरणे		
ब्रह्मणो निरवयत्वात्क्षीरादिवत्कृत्स्नस्य परिणामः स्यादित्यभिप्रायेण परिणामाक्षेपाक्षेपनिरासः ।	२३६	२३
ब्रह्मणि स्वरूपानुपमर्देनानेकाकारा सृष्टिरिति प्रतिपाद्य मायावादस्फुटीकरणम् ।	२३७	१५
कृत्स्नप्रसक्त्यादिदोषाणां परपक्षेऽपि समानत्वकथनम् ।	,,	१८
सर्वोपेताधिकरण		
अकरणमश्रोत्रमित्यादिशास्त्रेण परस्या देवतायाः विकरणत्वशासनात्सर्वशक्तियोगासम्भवोपपादनम्, तत्परिहारश्च ।	२३८	४

विषयः ।	पृ०	पं०
प्रयोजनवत्त्वाधिकरणे		
परमात्मन आत्मप्रयोजनाभावाज्जगत्कर्तृत्वानर्हतया जगतो ब्रह्मोपादानत्वप्रतिक्षेपः ।	,,	२०
प्रेक्षावत्प्रवृत्तेः श्वासप्रश्वासक्रियासु प्रयोजनव्यभिचारात् ब्रह्मणोऽपि जगत्सर्जनप्रवृत्तेरुपपत्तिप्रतिपादनम् ।	,,	२९
वैषम्यनैर्घृण्याधिकरणे		
वैषम्यनैर्घृण्यप्रसङ्गेनेश्वरस्य जगज्जन्मादिहेतुत्वनिरासः ।	२३९	१८
सृष्टेः प्राक्कर्मणोऽभावादायसृष्टेस्तुल्यत्वापत्तेः संसारानादित्वेन निरासस्तत्र प्रमाणं च ।	१४०	२२
सर्वधर्मोपपत्त्यधिकरणे		
स्वपक्षपरिग्रहप्रधानप्रकरणोपसंहारः ।	२४१	१५

द्वितीयाध्याये द्वितीयपादः ।

रचनानुपपत्त्यधिकरणे

द्वितीयपादस्य साङ्ख्यादिदर्शननिराकरणरूपप्रयोजनम् ।	२४२	२
साङ्ख्यादिपक्षप्रतिक्षेपस्य पौनरुक्त्यापादनसमाधिः ।	,,	१८
कार्यकारणयोरभेदद्वारा प्रधानकारणतानुमानखण्डनम् ।	२४३	७
अन्यथादिति हेतावधिदूष्युद्भावनम्, परिमाणादिहेतुषु दोषदर्शनं च ।	,,	२१
प्रवृत्त्यनुपपत्तेरपि जगद्धेतुत्वेनाचेतनानुमानखण्डनम् ।	२४४	२४
क्षीरादिवदचेतनस्यापि स्वत एव प्रवृत्तिरिति साङ्ख्यमतस्य खण्डनम् ।	२४३	१७
प्रवर्तकत्वाभावात्प्रधानप्रवृत्त्यनुपपत्तिकथनम् ।	,,	२५
तृणादिवत्स्वाभाविकप्रधानपरिणामवादखण्डनम् ।	२४७	६
केवलचेतनस्य प्रवृत्तिमाक्षिप्याचेतने तदुपपादनम् ।	१४५	२
प्रवृत्तिरहितत्वेऽपीश्वरस्य प्रवर्तकत्वोपपादनम्, प्रवर्त्याभावप्रयुक्तप्रवृत्त्यनुपपत्तिनिरसनं च ।	,,	१८
प्रधानस्य स्वाभाविकप्रवृत्तिमभ्युपगम्य तस्याः पुरुषार्थत्वनिरासः ।	२४७	१३
दृष्टान्तबलेन पुरुषस्य प्रवर्तकत्वाशङ्कानिरासः ।	२४८	१४
गुणानां साम्यावस्थायां परस्परमङ्गाङ्गिभावानुपपत्त्या प्रधानप्रवृत्त्यनुपपत्तेः ।	,,	२०
गुणानां वैषम्योपगमयोग्यत्वानुमानदूषणम् ।	,,	२७
श्रुतिविरोधाद्विप्रतिषेधाच्च साङ्ख्यमतस्यासमंजस्यप्रतिपादनम् ।	२४९	४
तप्यतापकभावस्यैकश्रानुपपत्त्यौपनिषदस्याप्यसामञ्जस्यमिति साङ्ख्यप्रतिवन्दिः ।	,,	७
उक्तप्रतिवन्दिनिरासः ।	२५०	५
परमाणुकरणवादिमतानुवादेनोत्तरसूत्रावतरणम् ।	२५१	१
महद्दीर्घाधिकरणे		
परमाणुकरणवादिप्राक्रियापदर्शनम् ।	२५२	११
उक्तप्रक्रियायां व्यभिचारप्रदर्शनद्वारा चेतनाद्ब्रह्मणोऽचेतनजगत उत्पत्तौ अनौचित्याभावकथनम् ।	,,	२६

विषयः ।	पृ०	पं०
परमाणुजगदकारणत्वाधिकरणे		
परमाणुकारणवादिमते तत्सद्भावे युक्तिः, परमाणूनां जगद्धेतुत्वप्रक्रिया च ।	२५३	१३
समवायाभ्युपगमादणुवादस्यायुक्तत्वम् ।	२५४	१९
परमाणूनां प्रवृत्तिस्वभावत्वादिचतुर्विधविकल्पासहत्वम् ।	२५९	२०
रूपादिमत्त्वात्परमाणूनां सावयवत्वानित्यत्वापत्तिः ।	„	१३
पृथिव्यादिभूतपरमाणूनामुपचितापचितगुणवत्त्वदर्शनादपरमाणुत्वापादनम् ।	२५७	२०
शिष्टापरिगृहीतत्वात्परमाणुकारणवादस्यानादरणीयत्वम् ।	२५९	१
वैशेषिकाभ्युपगतपदार्थानां मिथो भेदे द्रव्याधीनत्वानुपपत्तिः ।	„	३
अयुतसिद्धत्वपदार्थखण्डनम् ।	„	११
सम्बन्धिव्यतिरेकेण सम्बन्धाप्रामाणिकत्वम् ।	२६१	११
परमाणूनां निरवयवत्वखण्डनम् ।	२६२	८
समुदायाधिकरणे		
वैनाशिकैकदेशिनोः सर्वास्तित्ववादिनोर्मतं, तत्र समुदायानुपपत्तिश्च ।	„	२३
संहन्तुरभावेपि अविद्यादिषु परस्परप्रत्ययत्वेनानिशमावर्तमानेषु समुदायस्यार्थात्सिद्धिः ।	२६५	५
अविद्यादीनामितरेतरोत्पत्तिमात्रनिमित्तत्वम् ।	२६७	११
भोक्तृभावात्सङ्घातसिद्धिकथनम् ।	२६९	१७
सौगताभ्युपगतस्यांविद्यादीनामितरेतरोत्पत्तिनिमित्तत्वस्य निरासः ।	„	१९
चित्तचैत्योत्पत्तिप्रतिज्ञाया उपरोधः, क्षणिकत्वप्रतिज्ञोपरोधश्च ।	२७०	१६
प्रतिसंख्याप्रतिसंख्यानिरोधप्रत्याख्यानम् ।	२७१	२
अविद्यादिनिरोधप्रत्याख्यानम् ।	२७२	९
आकाशस्य निरुपाख्यत्वनिरासः ।	„	१३
अनुस्मृतेरुपलब्धृक्षणिकताखण्डनम् ।	„	२३
भाष्योक्तस्य बाह्यार्थानिश्चितत्वापादनस्य विवरणम् ।	२७४	५
अभावाद्भावोत्पत्तिनिरसनम् ।	२७५	१७
कूटस्थस्यापि निपतशक्तिकत्वा'त्सर्वं सर्वत उत्पद्यत' इति भाष्यासङ्गतेः सर्वावस्थात्तज्जन्यसर्वोत्पत्तिरित्यभिप्रायेण खण्डनम् ।	२७६	४
अभावाधिकरणे		
विज्ञानवादिमतन्तत्कृतबाह्यार्थाभावोपपादनं च ।	२७७	१३
सौत्रान्तिकमतताश्निरासौ ।	२८१	२
बाह्यार्थाभावखण्डनम् ।	२८२	१४
उपलब्धिव्यतिरेकेण बाह्यार्थाभावशङ्का, तन्निरासश्च ।	„	१९
धर्मकीर्तिमतखण्डनम् ।	२८३	३
जागरितप्रत्ययानां स्वाप्नप्रत्ययवैधर्म्यम् ।	२८६	२०
वासनानुपपत्त्या तद्वैचित्र्यानुपपत्तिः ।	२८७	१४
आलयविज्ञानस्य वासनानाश्रयत्वम् ।	„	२१
शून्यवादस्य प्रमाणविप्रतिषिद्धत्वात्तन्निरासे सूत्रकृतामनादरश्च ।	२८८	६
वैनाशिकसमयस्य सर्वथानुपपत्तिप्रदर्शनम् ।	२८९	६

विषयः ।	पृ० पं०
एकस्मिन्नसम्भवाधिकरणे	
जैनसमयप्रदर्शनम् ।	२८९ १३
सप्तभङ्गिनयस्तत्खण्डनञ्च ।	२९० २०
जीवस्य शरीरपरिमाणत्वखण्डनञ्च ।	२९२ ९
पर्यायेण जीवस्याचयोपगमापगमनिरासः ।	,, २४
स्यात् सन्तानानित्यतान्यायेन जीवस्य नित्यतावादखण्डनपरं सूत्रार्थव्याख्यानम् ।	२९३ २
मोक्षावस्थाभाविजीवपरिणामस्य नित्यत्वनिरासः ।	,, ८
केवलाधिष्ठातृईश्वरकारणतावादः ।	,, १६
तस्यासामञ्जस्यप्रदर्शनम् ।	२९४ ६
ईश्वरस्य प्रधानादिना सम्बन्धानुपपत्तिकथनम् ।	२९५ १०
प्रधानस्याधिष्ठेयत्वानुपपत्तिः ।	,, २३
पुरुषस्य करणवदीश्वरस्य प्रधानाधिष्ठातृत्वे भोगादिप्रसङ्गः ।	२९६ ६
ईश्वरस्याप्तवत्त्वात्सर्वज्ञत्वापत्तिः ।	,, ९
उत्पत्त्यसम्भवाधिकरणे	
भागवतपाञ्चरात्रमतम् ।	,, १७
मनसो जीवप्रभवत्वनिराकरणम् ।	,, २२
सङ्कर्षणादीनां वासुदेवानिर्विशेषत्वम् ।	२९७ ४
उक्तमते बहुविधविप्रतिषेधोपलम्भः ।	,, १४

इति द्वितीयाध्यायस्य द्वितीयः पादः ।



भामती ।

शाङ्करब्रह्मसूत्रभाष्यव्याख्या

सर्वतन्त्रस्वतन्त्रश्रीमहामहोपाध्यायवाचस्पतिमिश्रविरचिता ।

(उपोद्घातः)

श्रीगणेशाय नमः ।

अनिर्वाच्याविद्या(१)द्वितयसचिवस्य (२)प्रभवतो (३)विवर्तो यस्यैते वियदनिलतेजोऽबवनयः ॥
यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम् ॥ १ ॥

निश्श्वसितमस्य वेदा (४)वीक्षितमेतस्य पञ्च भूतानि ।
स्मितमेतस्य चराचरमस्य च सृष्टं महाप्रलयः ॥ २ ॥
षड्भिरङ्गै(५)रुपेताय विविधैरव्ययै(६)रपि ।
शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥ ३ ॥
मार्तण्डतिलकस्वामिमहागणपतीन् वयम् ।
विश्ववन्द्यान् नमस्यामः सर्वसिद्धिविधायिनः(७) ॥ ४ ॥
ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे ।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥ ५ ॥
नत्वा विशुद्धविज्ञानं शङ्करं करुणाकरम् ।
भाष्यं प्रसन्नगम्भीरं तत्प्रणीतं विभज्यते ॥ ३ ॥
आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् ।
रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥ ७ ॥

---

(१) अनादिर्भावरूपैका मूलाविद्या पूर्वपूर्वविभ्रमसंस्काररूपा तूलाविद्याप्येति द्वितयमविद्याया बोध्यम् ।

(२) अविद्यासाचिव्येपि स्वतन्त्रस्येत्यर्थः ।

(३) अतत्त्वतोऽन्यथाभावो विवर्त इति कल्पतरुः ।

(४) वीक्षणमात्रेण सृष्टृत्वाद्भूतानि वीक्षितम् ।

(५) "सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥" इतीश्वराङ्गानि, वेदाङ्गानि प्रसिद्धानि ।

(६) "ज्ञानं विरागतैश्वर्यं तपः सत्यं क्षमा धृतिः । सृष्टृत्वमात्मसम्बोधो ह्यधिष्ठातृत्वमेव च । अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ॥" इतीश्वराव्ययानि, वेदाव्ययानि चादीनि ।

(७) "आदित्यस्य सदा पूजां तिलकस्वामिनस्तथा । महागणपतेश्चैव कुर्वन् सिद्धिमवाप्नुयात् ॥" इति स्मृतिः ॥

अथ यदसन्दिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरो, यथा समनस्केन्द्रियसन्निकृष्टः स्फीतालोकमध्यवर्ती घटः (१)करटदन्ता वा, तथा चेदं ब्रह्मेति (२)व्यापकविरुद्धोपलब्धिः। तथाहि "बृहत्त्वाद्बृंह(३)णत्वाद्ब्राऽऽत्मैव ब्रह्मेति गीयते", स चायमाकीटपतङ्गेभ्य आ च देवर्षिभ्यः प्राणभृन्मात्रस्येदङ्कारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो विवेकेना'हमि'त्यसन्दिग्धाविपर्यस्तापरोक्षानुभवसिद्ध इति न जिज्ञासास्पदम्, नहि जातु कश्चिदत्र संदिग्धे'ऽहं वा नाहं वे'ति, न च विपर्यस्यति 'नाहमेवे'ति। न चाहं कृशः स्थूलो गच्छामीत्यादिदेहधर्मसामानाधिकरण्यदर्शनात् देहालम्बनोऽयमहङ्कार इति साम्प्रतम्। तदालम्बनत्वे हि योऽहं बाल्ये पितरावन्वभवं स एव स्थविरे प्रणप्तॄननुभवामीति प्रतिसन्धानं न भवेत्। नहि बालस्थविरयोः शरीरयोरस्ति मनागपि प्रत्यभिज्ञानगन्धो येनैकत्वमध्यवसीयेत। तस्माद्येषु व्यावर्तमानेषु यदनुवर्तते तत्तेभ्यो भिन्नं, यथा कुसुमेभ्यः सूत्रम्। तथा च बालादिशरीरेषु व्यावर्तमानेष्वपि परस्परमहङ्कारास्पदमनुवर्तमानं तेभ्यो भिद्यते। (४)अपि च स्वप्नान्ते दिव्यं शरीरभेदमास्थाय तदुचितान् भोगान् भुञ्जान एव प्रतिबुद्धो मनुष्यशरीरमात्मानं पश्यन् 'नाहं देवो मनुष्य एवे'ति देवशरीरे बाध्यमानेऽप्यहमास्पदमबाध्यमानं शरीराद्भिन्नं प्रतिपद्यते। अपि च योगव्याघ्रः(५) शरीरभेदेऽपि आत्मानमभिन्नमनुभवतीति नाहङ्कारालम्बनं देहः। अत एव नेन्द्रियाण्यप्यस्यालम्बनम्, इन्द्रियभेदेऽपि 'योऽहमद्राक्षं स एवैतर्हि स्पृशामी'त्यहमालम्बनस्य प्रत्यभिज्ञानात्। विषयेभ्यस्त्वस्य विवेकः स्थवीयानेव। बुद्धिमनसोश्च करणयो'रहमिति'कर्तृप्रतिभास(६)प्रत्ययानालम्बनत्वायोगः। कृशोहमन्धोहमित्यादयश्च प्रयोगा असत्यप्यभेदे कथञ्चि'न्मञ्चाः क्रोशन्ती'त्यादिवदौपचारिका इति युक्तमुत्पश्यामः। तस्मादिदङ्कारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो व्यावृत्तः स्फुटतराहमनुभवगम्य आत्मा संशयाभावादजिज्ञास्य इति सिद्धम्। अप्रयोजनत्वाच्च। तथाहि संसारनिवृत्तिरपवर्ग इह प्रयोजनं विवक्षितम्। संसारश्चात्मयाथात्म्याननुभवनिमित्त आत्मयाथात्म्यज्ञानेन निवर्तनीयः। स चेदयमनादिरनादिनाऽऽत्मयाथात्म्यज्ञानेन सहानुवर्तते कुतोऽस्य निवृत्तिरविरोधात्। कुतश्चात्मयाथात्म्याननुभवो? नह्यहमित्यनुभवादन्यदात्मयाथात्म्यज्ञानमास्ति, न चाहमिति सर्वजनीनस्फुटतरानुभवसमर्थितं आत्मादेहेन्द्रियादिव्यतिरिक्तः शक्य उपनिषदां सहस्रैरप्यन्यथयितुमनुभवाविरोधात्। नह्यागमाः सहस्रमपि घटं पटयितुमीशते। तस्मादनुभवविरोधादुपचरितार्था एवोपनिषद इति युक्तमुत्पश्याम इत्याशयवानाशङ्क्य परिहरति—**युष्मदस्मत्प्रत्ययगोचरयोरिति** (पृ० १५ पं० १)।

---

(१) करटः काकः।

(२) व्यापकेति। जिज्ञास्यत्वव्यापके संदिग्धत्वसप्रयोजनत्वे तद्विरुद्धे चासन्दिग्धत्वानिष्प्रयोजनत्वे तयोरुपलब्धिस्ततश्च व्यापकाभावे व्याप्यजिज्ञास्यत्वाभावस्तथाच मुमुक्षुणा ब्रह्म न जिज्ञास्यं तं प्रत्यसन्दिग्धत्वाच्चटवत्, अप्रयोजनत्वात्काकदन्तवदित्यनुमानप्रयोगौ। एतदेव स्फुटयति तथा हीत्यादिना।

(३) बृंहणत्वाद्देवादीनां परिणमयितृत्वात्।

(४) परिमाणभेदेपि देहैक्याङ्गीकर्तारं प्रत्याह अपिचेति।

(५) मनुष्यः सन् कृत्रिमं व्याघ्रशरीरमभिमन्यमानो योगव्याघ्रः।

(६) प्रत्ययानं शब्दः।

अत्र च युष्मदस्मदित्यादिर्मिथ्याभवितुं युक्तमित्यन्तः शङ्काग्रन्थः । तथापीत्यादिपरिहारग्रन्थः । तथापीत्यभिसम्बन्धाच्छङ्कायां यद्यपीति पठितव्यम् । (१)इदमस्मत्प्रत्ययगोचरयोरिति वक्तव्ये युष्मद्ग्रहणमत्यन्तभेदोपलक्षणार्थम् । यथा ह्यहंकारप्रतियोगी त्वंकारो नैव मिदंकारः, 'एते वयमिमे वयमास्मह' इति बहुलं प्रयोगदर्शनादिति । चित्स्वभाव आत्मा विषयी, जडस्वभावा बुद्धीन्द्रियदेहविषया विषयाः । एते हि चिदात्मानं विसिन्वन्ति अवबध्नन्ति, स्वेन रूपेण निरूपणीयं कुर्वन्तीति यावत् । (२)परस्परानध्यासहेतावत्यन्तवैलक्षण्ये दृष्टान्त· 'स्तमःप्रकाशवदि'ति । नहि जातु कश्चित्समुदाचरद्वृत्तिनी(३) प्रकाशतमसी परस्परात्मतया प्रतिपत्तुमर्हति । तदिदमुक्तमितरेतरभावानुपपत्ताविति । इतरेतरभाव (४)इतरेतरत्वं, तादात्म्यमिति यावत् । तस्यानुपपत्ताविति ।

स्यादेतत् । मा भूद्धर्मिणोः परस्परभावस्तद्धर्माणां तु जाड्यचैतन्यनित्यत्वानित्यत्वादीनामितरेतराध्यासो भविष्यति, दृश्यते हि धर्मिणोर्विवेकग्रहेऽपि तद्धर्माणामध्यासो, यथा कुसुमाद्भेदेन गृह्यमाणेऽपि स्फटिकमणावतिस्वच्छतया जपाकुसुमप्रतिबिम्बोद्ग्राह्यरुणः स्फटिक इत्यारुण्यविभ्रम इत्यत उक्तम्—**तद्धर्माणामपीति** । इतरेतरत्र धर्मिणि धर्माणां भावो (५)विनिमयस्तस्यानुपपत्तिः । अयमभिसन्धिः । रूपवद्धि द्रव्यमतिस्वच्छतया रूपवतो द्रव्यान्तरस्य तद्विवेकेन गृह्यमाणस्यापि छायां गृह्णीयात्, चिदात्मा त्वरूपो विषयी न विषयच्छायामुद्ग्राहयितुमर्हति । यथाहुः—"शब्दगन्धरसानां च कीदृशी प्रतिबिम्बता" इति । तदिह पारिशेष्याद्विषयविषयिणोरन्योन्यात्मसम्भेदेनैव तद्धर्माणामपि परस्परसम्भेदेन विनिमयात्मना भवितव्यम्, तौ चेद्धर्मिणावत्यन्तविवेकेन गृह्यमाणावसंभिन्नौ, असम्भिन्नाः सुतरां तयोर्धर्माः, स्वाश्रयाभ्यां व्यवधानेन दूरापेतत्वात्, तदिदमुक्तं **सुतरामिति** । **तद्विपर्ययेणेति** । विषयविपर्ययेणेत्यर्थः । मिथ्याशब्दोऽपह्नववचनः । एतदुक्तं भवति । अध्यासो भेदाग्रहेण व्याप्तस्तद्विरुद्धश्चेहास्ति भेदग्रहः, स भेदाग्रहं निवर्तयंस्तद्व्याप्तमध्यासमपि निवर्तयतीति । **मिथ्येति भवितुं युक्तं यद्यपि तथापीति योजना** (पृ० २९ पं० १) । इदमत्राकूतम् । भवेदेतदेव यद्यहमित्यनुभवे आत्मतत्त्वं प्रकाशेत, नत्वेतदस्ति । तथाहि—समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसमुदासीनमेकमद्वितीयमात्मतत्त्वं श्रुतिस्मृतीतिहासपुराणेषु गीयते । न चैतान्युपक्रमपरामर्शोपसंहारैः(६) क्रियासमभिहारेणैदमात्मतत्त्वमभिदधति तत्पराणि सन्ति शक्यानि शक्तेणाप्युपचरितार्थानि(७) कर्तुम् । अभ्यासे हि भूयस्त्वमर्थस्य भवति, यथाऽहो

---

(१) ननु पुरुषान्तरवचनो युष्मच्छब्दः कथमचेतने देहादौ प्रयुक्तोऽत आह इदमस्मदिति ।

(२) अत्र परस्परानध्यासोऽन्योन्यात्मनाऽस्फुरणं न तु सहानवस्थानं दार्ष्टान्तिकेऽसत्त्वादिति बोध्यम् ।

(३) समुदाचरन्त्यौ, भेदेन भासमाने, वृत्ती. वर्तने, ययोस्ते तथा ।

(४) इतरस्येतरस्य भाव इति योजने धर्मिणोरपि संसर्गाध्यासनिषेध इति सिद्धसाधनं स्यात्तादात्म्याध्यासाभ्युपगमात् तद्व्यावृत्त्यर्थमाहेतरेतरत्वमिति । (५) विनिमयो व्यत्याप्तः ।

(६) उपक्रम आरम्भवाक्यं, परामर्शो मध्यनिर्देशः, उपसंहारोऽन्तिमनिर्देश इति भेदः । पौनःपुन्यं क्रियासमभिहारः ।

(७) लाक्षणिकार्थबोधकानि । तेजोवन्नादिसृष्टिक्रमस्यैव श्रुतिवाक्येषु मुख्यतया प्रतिपादनेनात्मतत्त्वप्रतिपादनं लक्षणयैवेति उपचारितार्थानि श्रुतिवचनानि नैव सम्भवन्ति 'सदेव सोम्येदमग्र आसीदि'त्यादयुपक्रमादिलिङ्गसद्भावेनाखण्डात्मतत्त्वप्रतिपादनस्यैव मुख्यार्थत्वादिति भावः ।

दर्शनीयाऽहो दर्शनीयेति, न न्यूनत्वं प्रागेवोपचरितत्वमिति । अहमनुभवस्तु प्रादेशिकमनेकविधशोकदुःखादिप्रपञ्चोपप्लुतमात्मानमादर्शयन् कथमात्मतत्त्वगोचरः कथं वाऽनुपप्लवः(१) । न च ज्येष्ठप्रमाणप्रत्यक्षविरोधादाम्नायस्यैव तदपेक्षस्याप्रामाण्यमुपचरितार्थत्वं चेति युक्तम् । तस्यापौरुषेयतया (२)निरस्तसमस्तदोषाशङ्कस्य बोधकतया स्वतःसिद्धप्रमाणभावस्य स्वकार्ये प्रमितावनपेक्षत्वात् । (३)प्रमितावनपेक्षत्वेऽप्युत्पत्तौ प्रत्यक्षापेक्षत्वात्तद्विरोधादनुत्पत्तिलक्षणमप्रामाण्यमिति चेन्न । उत्पादकाप्रतिद्वन्द्वित्वात् । न ह्यागमज्ञानं सांव्यवहारिकं प्रत्यक्षस्य प्रामाण्यमुपहन्ति, येन (४)कारणाभावान्न भवेदपि तु तात्त्विकम् । न च ततस्योत्पादकम्, अतात्त्विकप्रमाणभावेभ्योऽपि सांव्यवहारिकप्रमाणेभ्यस्तत्त्वज्ञानोत्पत्तिदर्शनात् । तथा च वर्णे ह्रस्वदीर्घत्वादयोऽन्यधर्मा अपि समारोपितास्तत्त्वप्रतिपतिहेतवो, नहि लौकिका नाग इति वा नग इति वा पदात् कुञ्जरं वा तरुं वा प्रतिपद्यमाना भवन्ति भ्रान्ताः । (५)न चानन्यपरं वाक्यं स्वार्थ उपचरितार्थं युक्तम् । उक्तं हि "न विधौ परः शब्दार्थः" इति । (६)ज्येष्ठत्वं चानपेक्षितस्य बाध्यत्वे हेतुर्न बाधकत्वे, रजतज्ञानस्य ज्यायसः शुक्तिज्ञानेन कनीयसा बाधदर्शनात् । तदनपबाधने तदपबाधात्मनस्तस्योत्पत्तेरनुत्पत्तेः । दर्शितं च तात्त्विकप्रमाणभावस्यानपेक्षितत्वम् । तथा च पारमर्षं सूत्रं (७)"पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्" (अ० ६ पा० ५ सू० ५४) इति । तथा "पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम् । अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत् ॥" इति । (८)अपि च येऽप्यहंकारास्पदमात्मानमास्थिषत तैरप्यस्य न तात्त्विकत्वमभ्युपेतव्यम्, 'अहमिहैवास्मि सदने जानान' इति सर्वव्यापिनः प्रादेशिकत्वेन प्रहात्, उच्चतरगिरिशिखरवर्तिषु महातरुषु भूयिष्ठस्य दूर्वाप्रवालनिर्भासप्रत्ययवत् । न चेदं देहस्य प्रादेशिकत्वमनुभूयते न त्वात्मन इति साम्प्रतम् । (९)नहि तदेवं भवत्यहमिति, गौणत्वे वा न जानामीति । अपि च परशब्दः परत्र लक्ष्यमाणगुणयोगेन वर्तत इति

---

(१) विपर्यासशून्यः ॥

(२) निरस्तेति विशेषणेनाऽऽगमस्य स्वजन्यज्ञानप्रमितित्वे प्रत्यक्षापेक्षायां विपर्यासशङ्कायाः, स्वतःसिद्धेतिविशेषणेन च तत्र सम्वादापेक्षायाश्च निरासो बोध्यः ।

(३) आगमस्योत्पत्तौ प्रत्यक्षापेक्षामाशङ्क्य प्रमितावितिं ।

(४) प्रत्यक्षाभासात्मकप्रतिबन्धकाभावरूपकारणाभावादित्यर्थः ।

(५) अप्रामाण्यं निरस्योपचरितार्थत्वं निरस्यति न चेति ।

(६) एवमुपजीव्यत्वं प्रत्यक्षस्य निराकृत्य मुख्यत्वमात्रस्य प्राबल्यहेतुत्वं निरस्यति ज्येष्ठत्वं चेति ।

(७) पौर्वापर्येति । पौर्वापर्ये सति निमित्तयोः पूर्वस्य नैमित्तिकस्य दौर्बल्यमुत्तरस्य निरपेक्षस्य तद्बाधकतयोदितत्वात्पूर्वोदयकाले उत्तरस्याप्राप्तत्वेन तेन बाध्यत्वायोगात् इत्यर्थः । इदं च ज्योतिष्टोमे सह निर्गच्छतामृत्विजां विच्छेदेनिमित्तं प्रायश्चित्तमुक्तम् । तत्र क्रमेण विच्छेदे विरुद्धप्रायश्चित्तासंभवात् किं पूर्वं कार्यमुतापरमिति संशयेऽनुपजातविरोधित्वात्पूर्वमिति पूर्वपक्षे, सिद्धान्तसूत्रं षष्ठाध्यायस्य द्रष्टव्यम् । प्रकृतिवदिति । यथा प्रकृतौ कल्पितोपकाराः कुशाः 'प्रकृतिवद्विकृतिः कर्तव्या' इत्यतिदेशेन प्रथमं प्राप्ताः पश्चादुत्कैर्निरपेक्षैः शरैर्बाध्यन्ते तद्वदित्यर्थः ।

(८) एवंश्रुत्यादिगम्यात्मतत्त्वस्याहंप्रत्ययेऽनवभासादविविक्ताविषयत्वमुक्तमधुना वाद्युक्तस्यात्मनोऽनवभासादपि तदेवाहापिचेति ।

(९) नहि तदेवमिति । त्वन्मतेऽहंप्रत्ययस्य विविक्तात्माविषयत्वादित्यर्थः । गौणत्वे वेति । उपचरितात्मभावस्य देहस्य ज्ञातृत्वानुपपत्त्या जानान इति प्रतीतिर्नहि भवतीत्यर्थः ।

यत्र प्रयोक्तृप्रतिपत्त्रोः संप्रतिपत्तिः स गौणः, स च भेदप्रत्ययपुरःसरः । तद्यथा (१)नैयमिकाग्निहोत्रवचनोऽग्निहोत्रशब्दः (अ० १पा० ४सू० ४) प्रकरणान्तरावधृतभेदे कौण्डपायिनामयनगते कर्मणि 'मासमग्निहोत्रं जुहोती'(अ० ७ पा० ३ सू १)त्यत्र साध्यसादृश्येन गौणः, माणवके चानुभवसिद्धभेदे सिंहार्त्तिसहशब्दः । न त्वहङ्कारस्य मुख्योर्थो निर्लुठितगर्भतया(२) देहादिभ्यो भिन्नो ऽनुभूयते येन परशब्दः शरीरादौ गौणो भवेत् । न चात्यन्तनिरूढतया गौणेपि न गौणत्वाभिमानः सार्षपादिषु तैलशब्दवदिति वेदितव्यम् । तत्रापि स्नेहात्तिलभवाद्भेदे सिद्ध एव सार्षपादीनां तैलशब्दवाच्यत्वाभिमानो, न त्वर्थयोस्तैलसार्षपयोरभेदाध्यवसायः । तस्मिंश्च गौणत्वमुभयदर्शिनो गौणमुख्यविवेकावज्ञानेन व्याप्तम्, तदिह व्यापकं विवेकज्ञानं निवर्तमानं गौणतामपि निवर्तयतीति । न च बालस्थविरशरीरभेदेऽपि सोऽहमित्येकस्यात्मनः प्रतिसंधानादेहादिभ्यो भेदेनास्त्यात्मानुभव इति वाच्यम् । परीक्षकाणां खल्वियं कथा न लौकिकानाम् । परीक्षका अपि हि व्यवहारसमये न लोकसामान्यमतिवर्तन्ते(३) । वक्ष्यत्यनन्तरमेव हि भगवान् भाष्यकारः—"पश्वादिभिश्चाविशेषादि"ति । बाह्या अप्याहुः—"शास्त्रचिन्तकाः खल्वेवं विवेचयन्ति न प्रतिपत्तार" इति । तत्पारिशेष्याच्चिदात्मगोचरमहंकार-'महमिहास्मि सदन' इति प्रयुञ्जानो लौकिकः शरीराद्यभेदप्रहादात्मनः प्रादेशिकत्वमभिमन्यते, नभस इव घटमणिकमल्लिकाद्युपाध्यवच्छेदादिति युक्तमुत्पश्यामः । न चाहंकारप्रामाण्याय देहादिभेदात्मापि प्रादेशिक इति युक्तम् । तदा खल्वयमणुपरिमाणो वा स्याद्देहपरिमाणो वा? अणुपरिमाणत्वे स्थूलोऽहं दीर्घ इति च न स्यात् । देहपरिमाणत्वे तु सावयवतया देहवदनित्यत्वप्रसङ्गः(४) । किं चास्मिन् पक्षे ऽवयवसमुदायो वा चेतयत्प्रत्येकं वाऽवयवाः? प्रत्येकं चेतनत्वपक्षे बहूनां चेतनानां स्वतन्त्राणामेकवाक्यताभावादपर्यायं विरुद्धदिक्किकयतया शरीरमुन्मथ्येत, अक्रियं वा प्रसज्येत । समुदायस्य तु चैतन्ययोगे वृक्ष एकस्मिन्नवयवे चिदात्मनोऽप्यवयवेऽवृक्ष इति न चेतयेत् । (५)न च बहूनामवयवानामविनाभावनियमो दृष्टो, य एवावयवो विशीर्णस्तदा तदभावे न चेतयेत् । (६)विज्ञानालम्बनत्वेऽप्यहंप्रत्ययस्य भ्रान्तत्वं तदवस्थमेव, तस्य स्थिरवस्तुनिर्भासत्वादस्थिरत्वाच्च विज्ञानानाम् । एतेन 'स्थूलो-

---

(१) नैयमिकेति । 'अग्निहोत्रं जुहोती'त्यत्र किमग्निहोत्रशब्दोऽग्निदेवतागुणविधिरुत कर्मनामेति संशयेऽग्नये होत्रं हावरीस्मान्निति समासान्तर्गतचतुर्थ्याऽग्नेर्होमदेवतात्वप्रतीतेर्गुणविधिरिति पूर्वपक्षे, 'यदग्नये च प्रजापतये च स्रायं जुहोती'त्यग्नेर्होमे देवतात्वप्रख्यापनादग्निहोत्रकर्मनामधेयार्थोऽग्निहोत्रशब्दः प्रकरणभेदेन सिद्धभेदे 'मासमग्निहोत्रं जुहोती'त्यादिनोक्ते कौण्डपायिनामयनगते कर्मणि जुहोतीतिसाध्यसादृश्येन लाक्षणिकोऽनेकार्थस्यान्याय्यत्वादिति भावः ।

(२) निष्कृष्य लुठितः प्रतिभासितो गर्भोऽसाधारणाकारो यस्य स तथा, तस्य भावस्तत्ता तयेत्यर्थः ।

(३) अपरोक्षभ्रमस्य यौक्तिकबाधादुच्छेदो नेत्यर्थः ।

(४) प्रसङ्गेनानेनावयवारब्धावयविपक्षो देहपरिमाणपक्षे निरस्तो बोध्यः ।

(५) आत्मावयवानां चैतन्यं निरस्य समुदायपक्षे शरीरोपाधिकी समुदायापत्तिः स्वतएव वा काकतालीयन वेति विकल्पत्रयाभिप्रायेणाद्या 'समुदायस्ये'त्यादिना निरस्ताऽधुना द्वितीयां तृतीयां चाक्षिपति नच बहूनामिति । य एवेति । काकतालीयन्यायेन यस्यावयवस्य विशीर्णता जाता तदभावे न चेतयेदित्यर्थः । स्वस्थानामप्यकस्मादचैतन्यं स्यादिति भावः ।

(६) क्षणिकविज्ञानात्मपक्षेप्यहंप्रत्ययस्य भ्रान्तत्वं समर्थयति विज्ञानेति ।

ऽहमन्धोहं गच्छामी'त्यादयोऽप्यध्यासतया व्याख्याताः । (१)तदेवमुक्तक्रमेणाहंप्रत्ययेन पूतिकूष्माण्डीकृते भगवती श्रुतिरप्रत्यूहं कर्तृत्वभोक्तृत्वसुखदुःखशोकाद्यात्मत्वमहमनुभवप्रसञ्जितमात्मनो निषेद्धुमर्हतीति । तदेवं सर्वप्रवादिश्रुतिस्मृतीतिहासपुराणप्रथितमिथ्याभावस्याहंप्रत्ययस्य (२)स्वरूपनिमित्तफलैरुपव्याख्यानमन्योन्यस्मिन्नित्यादि ।

अत्र चान्योन्यस्मिन् धर्मिणि आत्मशरीरादावन्योन्यात्मकतामध्यस्याहमिदं शरीरादीति । इदमिति च (३)वस्तुतो न प्रतीतितः । लोकव्यवहारो लोकानां व्यवहारः, स चायमहमिति व्यपदेशः । इतिशब्दसूचितश्च शरीराद्यनुकूलं प्रतिकूलं च प्रमेयजातं प्रमाणेन प्रमाय तदुपादानपरिवर्जनादिः(४) । अन्योन्यधर्मांश्चाध्यस्यान्योन्यस्मिन् धर्मिणि देहादिधर्मान् जन्ममरणजराव्याध्यादीनात्मनि धर्मिणि अध्यस्तदेहात्मभावे समारोप्य, तथा चैतन्यादीनात्मधर्मान् देहादावध्यस्तात्मभावे समारोप्य, ममेदं जरामरणपुत्रपशुस्वाम्यादीति व्यवहारो व्यपदेशः, इतिशब्दसूचितश्च तदनुरूपः प्रवृत्त्यादिः । (५)अत्र चाध्यासव्यवहारक्रियाभ्यां यः कर्तोन्नीतः स समान इति समानकर्तृकत्वेनाध्यस्य व्यवहार इत्युपपन्नम् । पूर्वकालत्वसूचितमध्यासस्य व्यवहारकारणत्वं सूचयति—**मिथ्याज्ञाननिमित्तो** व्यवहारः । मिथ्याज्ञानमध्यासस्तन्निमित्तस्तद्भावाभावानुविधानाद्व्यवहारभावाभावयोरित्यर्थः । तदेवमध्यासस्वरूपं फलं च व्यवहारमुक्त्वा तस्य निमित्तमाह—**इतरेतराविवेकेन**, विवेकाग्रहेणेत्यर्थः । अथाविवेक एव कस्मान्न भवति, तथा च नाध्यास इत्यत आह—**अत्यन्तविविक्तयोर्धर्मधर्मिणोः** । परमार्थतो धर्मिणोरतादात्म्यं विवेको धर्माणां चासंकीर्णता विवेकः ।

स्यादेतत् । विविक्तयोर्वस्तुसतोर्भेदाग्रहनिबन्धनस्तादात्म्यविभ्रमो युज्यते शुक्तेरिव रजताद्भेदाग्रहे रजततादात्म्यविभ्रमः, इह तु (६)परमार्थसतश्चिदात्मनो न भिन्नं देहाद्यस्ति वस्तुसत्तत्कुतश्चिदात्मनो भेदाग्रहः कुतश्च तादात्म्यविभ्रम इत्यत आह-(७)**सत्यानृते मिथुनीकृत्य** (पृ० ३४पं० १) । विवेकाग्रहादध्यस्येति योजना । सत्यं चिदात्मा,ऽनृतं बुद्धीन्द्रियदेहादि, ते द्वे धर्मिणी मिथुनीकृत्य, युगलीकृत्येत्यर्थः । न च सम्वृतिपरमार्थसतोः पारमार्थिकं मिथुनमस्तीत्यभूततद्भावार्थस्य च्वेः प्रयोगः । एतदुक्तं भवति । अप्रतीतस्यारोपायोगादारोप्यस्य

---

(१) अहंप्रत्ययस्याविविक्तविषयत्वे शास्त्रीयविषयसिद्धिं प्रदर्श्य प्रयोजनसिद्धिं प्रदर्शयति तदेवमिति ।

(२) स्वरूपेति । अन्योन्यात्मकताऽन्योन्यधर्माध्यासश्च स्वरूपम् । इतरेतराविवेको निमित्तम् । व्यवहारः फलम् ।

(३) वस्तुत इति । अहमितिप्रतीतेपि वास्तवमनात्मत्वमस्तीति इदंशब्दप्रयोग इत्यर्थः । अनेनाहमिदं शरीरमिति प्रतीत्यभावाद्भाष्यासङ्गतिरित्याशङ्का निरस्ता ।

(४) परिवर्जनादिरिति । व्यवहार इति शेषः ।

(५) नन्वध्यस्य व्यवहार इत्यनुपपन्नं 'भुक्त्वा व्रजतीति'वदेकस्य क्रियाद्वये कर्तृत्वानभिधानादत आह अत्रेति । व्यवहारक्रियाश्लिष्टस्य कर्तुरध्यासेपि कर्तृत्वात् क्त्वाप्रत्यय इत्यर्थः ।

(६) अयमेव पाठः [क] [ख] चिह्नित पुस्तके दृश्यते किन्तु 'परमार्थत' इत्येव युक्तः । 'परमार्थसतः' इति पक्षे तु 'चिदात्मनो' इति पंचम्यन्तपाठस्यैव युक्तत्वादिति बोध्यम् ।

(७) सत्यानृते इति । मिथुनीकरणाद्विवेकाग्रहस्ततोऽध्यास इत्यर्थः । युगलीकरणमधिष्ठानारोप्ययोः स्वरूपेण बुद्धौ भानम् । अत्र च्वेःप्रयोगस्य फलमाह नचेति । अभूततद्भावे च्वेः प्रयोगान्मिथुनीभावोप्यवास्तव इत्यर्थः ।

प्रतीतिरुपयुज्यते न वस्तुसत्तेति । स्यादेतत् । आरोप्यस्य प्रतीतौ सत्यां पूर्वदृष्टस्य समारोपः, समारोपनिबन्धना च प्रतीतिरिति दुर्वारं परस्पराश्रयत्वमित्यत आह **नैसर्गिक इति**। स्वाभाविकोऽनादिरयं व्यवहारः । व्यवहारानादितया तत्कारणस्याप्यध्यासस्यानादितोक्ता । ततश्च पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरादेरुत्तरोत्तराध्यासोपयोग इत्यनादित्वाद्बीजाङ्कुरवन्न परस्पराश्रयत्वमित्यर्थः ।

(१)स्यादेतत् । अद्धा पूर्वप्रतीतिमात्रमुपयुज्यते आरोपे, न तु प्रतीयमानस्य परमार्थसत्ता । प्रतीतिरेव त्वत्यन्तासतो गगनकमलिनीकल्पस्य देहेन्द्रियादेर्नोपपद्यते । (२)प्रकाशमानत्वमेव हि चिदात्मनोऽपि सत्त्वं, न तु तदतिरिक्तं सत्तासामान्यसमवायोऽर्थक्रियाकारिता वा, द्वैतापत्तेः । सत्तायाश्चार्थक्रियाकारितायाश्च सत्तान्तरार्थक्रियाकारितान्तरकल्पनेऽनवस्थापातात्, प्रकाशमानतैव सत्ताऽभ्युपेतव्या । तथा च देहादयः प्रकाशमानत्वान्नासन्तश्चिदात्मवद्, असत्त्वे वा न प्रकाशमानास्तत् कथं सत्यानृतयोर्मिथुनीभावस्तदभावे वा कस्य कुतो भेदाग्रहस्तदसम्भवे कुतोऽध्यास इत्याशयवानाह—**आह आक्षेप्ता—कोयमध्यासो नाम** (पृ० ४० पं० १) । क इत्याक्षेपे । समाधाता लोकसिद्धमध्यासलक्षणमाचक्षाण एवाक्षेपं प्रतिक्षिपति—**उच्यते स्मृतिरूपः परत्र पूर्वदृष्टावभासः** (पृ० ४५ पं० १) । (३)अवसन्नोऽवमतो वा भासोऽवभासः । प्रत्ययान्तरबाधश्चास्यावसादोऽवमानो वा । एतावता मिथ्याज्ञानमित्युक्तं भवति । (४)तस्येदमुपव्याख्यानं 'पूर्वदृष्टे'त्यादि । पूर्वदृष्टस्यावभासः पूर्वदृष्टावभासः । मिथ्याप्रत्ययश्चारोपविषयारोपणीयस्य मिथुनमन्तरेण न भवतीति पूर्वदृष्टग्रहणेनानृतमारोपणीयमुपस्थापयति, तस्य च दृष्टत्वमात्रमुपयुज्यते न वस्तुसत्तेति दृष्टग्रहणम् । तथापि वर्तमानं दृष्टं दर्शनं नारोपोपयोगीति पूर्वेत्युक्तम् । तत्र पूर्वदृष्टं स्वरूपेण सदप्यारोपणीयतयाऽनिर्वाच्यमित्यनृतम् । आरोपविषयं सत्यमाह—**परत्रेति**(५) । परत्र शुक्तिकादौ परमार्थसति, तदनेन सत्यानृतमिथुनमुक्तम् । (६)स्यादेतत्, परत्र पूर्वदृष्टावभास इत्यलक्षणमतिव्यापकत्वात् । अस्ति हि स्वास्तिमत्यां गवि पूर्वदृष्टस्य गोत्वस्य परत्र कालाक्ष्यामवभासः । (७)अस्ति च पाटलिपुत्रे पूर्वदृष्टस्य देवदत्तस्य परत्र माहिष्मत्यामवभासः समीचीनः । (८)अवभासपदं च समीचीनेऽपि

---

(१) आरोप्यशरीरादेः प्रतीतिमात्रमुपयोगि न सत्तेति उक्तं, तन्नानृतस्य प्रतीतिरेवायुक्तेत्याभिप्रायकमुत्तरभाष्यमवतारयन्नाह स्यादेतदित्यादिना । युष्मदस्मादित्यादिस्तु विवेकग्रहादाक्षेपः पूर्वमुक्त इत्यनयोर्भेदो बोध्यः ।

(२) प्रकाशमानत्वेन हेतुना देहादीनां सत्त्वसाधनाय भूमिकामारचयति प्रकाशमानत्वमिति ।

(३) अवभासपदस्यावयवार्थव्युत्पत्तिद्वारा संक्षिप्तमध्यासलक्षणमाह अवसन्न इति । अवसाद उच्छेदः । अवमानो युक्त्या तिरस्कारः ।

(४) अवभासपदस्य रूढार्थकथनद्वारा भाष्यवाक्यार्थेन विस्तृतं लक्षणं प्रदर्शयन्नाह तस्येति ।

(५) अनेनासत्ख्यातिर्निरासो बोध्यः ।

(६) स्मृतिरूप इति पदस्य कृत्यं वक्तुमवतारयति स्यादेतदिति ।

(७) पूर्वदृष्टस्य परत्राभेदावभासरूपधर्म्यध्यासस्यातिव्याप्तिं प्रदर्श्य, परत्राभेदे परधर्मावभासरूपस्य धर्माध्यासस्यापि तां प्रदर्शयति अस्ति च पाटलीति ।

(८) ननु संक्षिप्ताध्यासलक्षणप्रदर्शितावभासपदार्थस्य नयोरुदाहरणयोरसम्भवात्कथमतिव्याप्तिरत आह अवभासपदं चेति ।

प्रत्यये प्रसिद्धं, यथा नीलस्यावभासः पीतस्यावभास इत्यत आह--**स्मृतिरूप इति**। स्मृते रूपमिव रूपमस्येति स्मृतिरूपः। असन्निहितविषयत्वं च स्मृतिरूपत्वं, सन्निहितविषयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः। (१)नाप्यव्याप्तिः--स्वप्नज्ञानस्यापि स्मृतिविभ्रमरूपस्यैवंरूपत्वात्तत्रापि हि स्मर्यमाणे पित्रादौ निद्रोपप्लववशादसन्निधानपरामर्शे तत्रतत्र पूर्वदृष्टस्यैव सन्निहितदेशकालत्वस्य समारोपः। एवं पीतः शङ्खस्तिक्तो गुड इत्यत्राप्येतल्लक्षणं योजनीयम्। तथाहि—बहिर्विनिर्गच्छदत्यच्छनयनरश्मिसम्पृक्तपित्तद्रव्यवर्तिनीं पीततां पित्तरहितामनुभवन् शङ्खं च दोषाच्छादितशुक्लिमानमनुभवन् पीततायाश्च शङ्खासम्बन्धमननुभवन्नसम्बन्धाग्रहणसारूप्येण 'पीतं तपनीयपिण्डं पीतं बिल्वफलमि'त्यादौ पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशङ्खत्वयोरारोप्याह 'पीतः शङ्ख' इति। एतेन तिक्तो गुड इति प्रत्ययो व्याख्यातः। (२)एवं विज्ञातृपुरुषाभिमुखेष्वादर्शोदकादिषु स्वच्छेषु चाक्षुषं तेजो लग्नमपि बलीयसा सौर्येण तेजसा प्रतिस्रोतःप्रवर्त्तितं मुखसंयुक्तं मुखं ग्राहयद्दोषवशात्तद्देशतामनभिमुखतां च मुखस्याग्राहयत्पूर्व(३)दृष्टाभिमुखादर्शोदकदेशतामाभिमुख्यं च मुखस्यारोपयतीति प्रतिबिम्बविभ्रमोऽपि लक्षितो भवति। एतेन द्विचन्द्रदिङ्मोहालातचक्रगन्धर्वनगरवंशोरगादिविभ्रमेष्वपि यथासम्भवं लक्षणं योजनीयम्।

एतदुक्तं भवति। न प्रकाशमानतामात्रं सत्त्वं येन देहेन्द्रियादेः प्रकाशमानतया सद्भावो भवेत्। नहि सर्पादिभावेन रज्ज्वादयो वा स्फटिकादयो वा रक्तादिगुणयोगिनो न प्रतिभासन्ते, प्रतिभासमाना वा भवन्ति तदात्मानस्तद्धर्माणो वा। (४)तथासति मरुषु मरीचिचयमुच्चावचमुच्चलत्तुङ्गतरङ्गभङ्गमालेयमभ्यर्णमवतीर्णा मन्दाकिनीत्यभिसंधाय प्रवृत्तः स्यात्, तोयमपीय पिपासामुपशमयेत्। तस्मादकामेनापि आरोपितस्य प्रकाशमानस्यापि न वस्तुसत्त्वमभ्युपगमनीयम्। न च मरीचिरूपेण सलिलमवस्तुसत् स्वरूपेण तु परमार्थसदेव, देहेन्द्रियादयस्तु स्वरूपेणापि असन्त इत्यनुभवागोचरत्वात्कथमारोप्यत इति सांप्रतम्। यतो यद्यसन्तो नानुभवगोचराः, कथं तर्हि मरीच्यादीनामसतां तोयतयाऽनुभवगोचरत्वम्, न च स्वरूपसत्त्वेन तोयात्मनापि सन्तो भवन्ति।

(५)यद्युच्येत नाभावो नाम भावादन्यः कश्चिदस्ति, अपि तु भाव एव भावान्तरात्मनाऽभावः स्वरूपेण तु भावः, यथाहुः—'भावान्तरमभावो हि कयाचित्तु व्यपेक्षये'ति, ततश्च भावात्मनोपाख्येयतयाऽस्य युज्येतानुभवगोचरता, प्रपञ्चस्य पुनरत्यन्तासतो निरस्तसमस्त-

---

(१) स्वप्नज्ञाने प्रमाणयोग्यशुक्त्याद्यधिष्ठानाभावात्परत्रेतिविशेषणासत्त्वनिबन्धनाव्याप्तिमाशंक्याह नापीति। स्मृतौ विभ्रमः स्मृतिविभ्रमः, स्मर्यमाणे स्मर्यमाणरूपान्तरारोप इति यावत्।

(२) आदर्शादिष्वारोप्यमुखस्य स्वचक्षुषा पूर्वदृष्टत्वाभावेनाव्याप्तिमाशंक्याह एवमिति।

(३) पूर्वदृष्टेति। पूर्वदृष्टयोरभिमुखयोरादर्शोदकयोर्देश एव देशो यस्य तस्य भावस्तत्ता, तयोरेवाभिमुख्यं च, तथाच मुखादौ तदारोप इत्यर्थः।

(४) तथासति—प्रतिभासमात्रेण रज्ज्वादीनां सर्पात्मत्वादेः सत्त्वे सतीत्यर्थः। मरुष्विति। मरीचिचयमभ्यर्णमवतीर्णेति चलत्तुङ्गतरङ्गमाला मन्दाकिनीत्यन्वयः।

(५) मरीचीनां तोयात्मत्वं न सदित्युक्ते यन्मरीचीनां जलरूपेणासत्त्वं तन्मरीचय एवातो नाऽसत्ख्यातिरिति शंकते सद्भावो यद्युच्येतेति।

सामर्थ्यस्य निस्तत्त्वस्य कुतोनुभवविषयभावः कुतो वा चिदात्मन्यारोपः ? । (१)न च विषयस्य समस्तसामर्थ्यस्य विरहेऽपि ज्ञानमेव तत्तादृशं स्वप्रत्ययसामर्थ्यासादितादृष्टान्तासिद्धस्वभावभेदमुपजातमसतः प्रकाशनं, तस्मादसत्प्रकाशनशक्तिरेवाविद्येति सांप्रतम् । यतो येयमसत्प्रकाशनशक्तिर्विज्ञानस्य किं पुनरस्याः शक्यम् ? असदिति चेत् । किं तत्कार्यमाहोस्विदस्य ज्ञाप्यम् ? न तावत्कार्यम्, असतस्तत्त्वानुपपत्तेः । नापि ज्ञाप्यम्, ज्ञानान्तरानुपलब्धेः, (२)अनवस्थापाताच्च । विज्ञानस्वरूपमेवासतः प्रकाश इति चेत् । कः पुनरेष सदसतोः सम्बन्धः ? असदधीननिरूपणत्वं सतो ज्ञानस्यासता सम्बन्ध इति चेत् । अहो बतायमतिनिर्वृत्तः प्रत्ययतपस्वी(३) यस्यासत्यपि निरूपणमायतते, न च प्रत्ययस्तत्राधत्ते किंचित्, असत आधारत्वायोगात् । (४)असदन्तरेण प्रत्ययो न प्रथते इति प्रत्ययस्यैवैष स्वभावो न त्वसदधीनमस्य किंचिदिति चेत् । अहो(५) बतास्यासत्पक्षपातो यदयमतदुत्पत्तिरतदात्मा च तदविनाभावनियतः प्रत्यय इति । तस्मादत्यन्तासन्तः शरीरेन्द्रियादयो निस्तत्त्वा नानुभवविषया भवितुमर्हन्तीति ।

(६)अत्र ब्रूमः । निस्तत्त्वं चेन्नानुभवगोचरस्तत्किमिदानीं मरीचयोऽपि तोयात्मना सतत्त्वा यदनुभवगोचराः स्युः । न (७)सतत्त्वास्तदात्मना मरीचीनामसत्त्वात् । (८)द्विविधं च वस्तूनां तत्त्वं सत्त्वमसत्त्वं च । तत्र पूर्वं स्वतः, परं तु परतः । यथाहुः—

स्वरूपपररूपाभ्यां नित्यं सदसदात्मके ।
वस्तुनि ज्ञायते किंचिद्रूपं कौश्चित्कदा च न ॥ इति ।

(९)तत्किं मरीचिषु तोयनिर्भासप्रत्ययस्तत्त्वगोचरः, तथा च समीचीन इति न भ्रान्तो नापि बाध्येत । (१०)अद्धा न बाध्येत यदि मरीचीनतोयात्मतत्त्वान्

---

(१) एवं सद्वादी शङ्कितोऽनिर्वचनीय(वेदान्ति)मतं निरस्य शून्यवादनिरासाय तन्मतं दर्शयति नचेति । स्वप्रत्ययः स्वसमानाकारः पूर्वप्रत्ययस्तत्सामर्थ्येनासादितासाधारणस्वभावभेदं ज्ञानमेव शून्यमपि वस्तु प्रकाशयतीत्यर्थः । नच तन्मते ज्ञानस्यापि शून्यत्वात्सर्वत्रानाश्वासप्रसङ्गः, यतस्तन्मते ज्ञानस्यापि पूर्वज्ञानार्थे नसत्त्वाङ्गीकारेण स्वरूपसत्त्वस्य क्वचिदप्यसत्त्वात् ।

(२) शक्त्याश्रयत्वेनाभिमताज्ज्ञानाज्ज्ञानान्तरानुपलब्धेरित्यर्थः । उपलब्धौ वा तस्यापि ज्ञापकत्वेन ज्ञानान्तरापेक्षायामनवस्थापाताच्चेत्यर्थः ।

(३) प्रत्ययतपस्वीति । तपस्विपदमुपहासार्थम्, यतः सति कस्मिंश्चित्कस्यचिदुपकारो जायते, प्रत्ययस्य निरूपणं तु शून्यवादेऽसत्यप्यायतम्, न च स्वोपकारिण्यसति पत्युपकारं काश्चित्करोतीति ।

(४) असतः प्रत्ययप्रथनस्य चाविनाभावसम्बन्ध एव सदसतोः सम्बन्ध इत्याक्षिपति शून्यवादी असदन्तरेणेति ।

(५) सद्वादी समाधत्ते अहो बतेति । एवंचेत् कार्यकारणभावः स्वभावश्च बौद्धैरभिमतोऽविनाभावमूलं विहतं स्यादित्यर्थः । (६) सद्वादिमतं निरस्यति सिद्धान्ती अत्र ब्रूम इति ।

(७) पूर्वपक्ष्याह न सतत्त्वा इति । तोयात्मनेत्यनुषङ्गः ।

(८) ननु तोयात्मना मरीचीनामसत्त्वे सद्वादेनाप्यसत्ख्यातिः स्वीकृता स्यादत आह द्विविधं चेति । तोयमपेक्ष्य ज्ञातं मरीचिरूपमेव तोयरूपेणासत् तच्च भावरूपमिति नासत्ख्यातिरित्यर्थः ।

(९) सिद्धान्त्याह तत्किमिति ।

(१०) पूर्वपक्ष्याह अद्धेति। मरीचीनामतोयात्मत्वं भ्रमे न भासते किन्तु भावान्तरतोयात्मत्वमिति उपपद्यते तद्बाधः ।

अतोयात्मना गृह्णीयात्, तोयात्मना तु गृह्णन् कथमभ्रान्तः कथं वाऽबाध्यः ? (१)हन्त तोयाभावात्मनां मरीचीनां तोयभावात्मत्वं तावन्न सत् । तेषां तोयाभावादभेदेन तोयभावात्मतानुपपत्तेः । नाप्यसत्, वस्त्वन्तरमेव हि वस्त्वन्तरस्यासत्त्वमास्थीयते 'भावान्तरमभावोऽन्यो न कश्चिदनिरूपणदि'ति वदद्भिः । न चारोपितं रूपं वस्त्वन्तरं, तद्धि मरीचयो वा भवेद् गङ्गादिगतं तोयं वा । (२)पूर्वस्मिन् कल्पे मरीचय इति प्रत्ययः स्यात्, न तोयमिति। उत्तरस्मिंस्तु गङ्गायां तोयमिति स्यात्, न पुनरिहेति। देशभेदात् स्मरणे तोयमिति स्यान्न पुनरिहेति । (३)न चेदमत्यन्तमसन्निरस्तसमस्तस्वरूपमलीकमेवास्त्विति साम्प्रतम् । तस्यानुभवगोचरत्वानुपपत्तेरित्युक्तमधस्तात् । तस्मान्न सत्, नापि सदसत्, परस्परविरोधादिति अनिर्वाच्यमेवारोपणीयं मरीचिषु तोयमास्थेयम् । (४)तदनेन क्रमेणाध्यस्तं तोयं परमार्थतोयमिव, (५)अत एव पूर्वदृष्टमिव, तत्त्वतस्तु न तोयं न च पूर्वदृष्टं, किंत्वनृतमनिर्वाच्यम् । एवं च देहेन्द्रियादिप्रपञ्चोऽप्यनिर्वाच्योऽपूर्वोऽपि पूर्वमिथ्याप्रत्ययोपदर्शित इव परत्र चिदात्मन्यध्यस्यत इति उपपन्नमध्यासलक्षणयोगात् । (६)देहेन्द्रियादिप्रपञ्चबाधनं चोपपादयिष्यते । (७)चिदात्मा तु श्रुतिस्मृतीतिहासपुराणगोचरस्तन्मूलतदविरुद्धन्यायनिर्णीतशुद्धबुद्धमुक्तस्वभावः सत्त्वेनैव निर्वाच्योऽबाधिता स्वयंप्रकाशतैवाऽस्य सत्ता, सा च (८)स्वरूपमेव चिदात्मनो न तु तदतिरिक्तं सत्तासामान्यसमवायोऽर्थक्रियाकारिता वा इति सर्वमवदातम् ।

(९)स चायमेवंलक्षणकोऽध्यासोऽनिर्वचनीयः सर्वेषामेव सम्मतः परीक्षकाणम्, तद्भेदे परं विप्रतिपत्तिरित्यनिर्वचनीयतां द्रढयितुमाह **तं केचिदन्यत्राऽन्यधर्माध्यास इति वदन्ति(पृ०४६)**। अन्यधर्मस्य ज्ञानधर्मस्य रजतस्य, ज्ञानाकारस्येति यावत्, अध्यासोऽन्यत्र बाह्ये ।

---

(१) तोयाभावात्मकमरीचिरूपे आरोपितं तोयत्वं सदसद्वेति विकल्प्य निरस्यति सिद्धान्ती हंतेति ।

(२) अत्र भ्रमे मरीचयस्तोयं चेति वस्तुद्वय भासते । तत्र मरीचितोयतादात्म्यं वस्तु चेत्तोयाद्वस्त्वन्तरभूता मरीचयो वा स्युर्मरीचिभ्यो वस्त्वन्तरं तोयं वा स्यान्नान्यत् अन्यस्यात्र भ्रमेऽनवभासादुभयत्र दूषणमाह पूर्वस्मिन्निति ।

(३) सिंहावलोकनन्यायेन निरस्तामसतख्यातिं स्मारयन्नुपसंहरति नचेदमिति ।

(४) स्वरूपेणानिर्वाच्यमपि तोयं भ्रमे ऽवभासेतेत्यमुष्य देशान्तरे सत्त्वकल्पना व्यर्थेत्याभिप्रेत्याह तदनेनेति । परमार्थतोयमिवेति । नतु परमार्थमेवेत्यर्थः ।

(५) पूर्वदृष्टमिवेति । नन्वभिनवतोयाभासस्वीकारे कथं पूर्वदृष्टत्वं भाष्योक्तं संगच्छेतेति चेन्न । अभिनवत्वेपि आरोपस्य पूर्वदृष्टप्रहणमुपयुज्यते आरोपणीयसमानमिथ्यावस्त्वन्तरोपदर्शकस्य पूर्वदर्शनसंस्कारद्वारेणोपयोगादिति ।

(६) देहेति । एतेन देहादिः सन् भासमानत्वादात्मवदित्यनुमानेऽबाधितत्वमुपाधिः प्रदर्शितः । न च साधनव्यापत्तिर्देहादिबाधस्य तत्र तत्र वक्ष्यमाणत्वादिति भावः ।

(७) ननु प्रत्यक्षसिद्धदेहादेर्यदि मिथ्यात्वं तदाऽऽत्मनि कथं सत्त्वमत आह चिदात्मेति । तत्त्वावेदकप्रमाणप्रमितत्वादात्मनः सत्त्वं न व्यावहारिकप्रमाणसिद्धदेहादेरिति च वक्ष्यते इत्यर्थः ।

(८) स्वरूपमेवेति । अन्यथा सत्तातद्वतोर्भेदादद्वैतहानिरित्यर्थः ।

(९) नन्वध्यासलक्षणे मतान्तरप्रदर्शनं मतिसंवादाय दूषणाय वा । नाद्यो विप्रतिपत्तेः, नापरो दूषणानभिधानादत आह स चायमिति । तथा च परत्र परावभास इति लक्षणे मतिसंवाद एव । विप्रतिपत्तिस्त्वधिष्ठानारोप्यविशेषविषयैवैवंलक्षणकत्वं चाध्यासस्यानिर्वाच्यतयैवेति मरुमरीचिकोदके दर्शितमिति भावः ।

(१)सौत्रान्तिकनये तावद्बाह्यमस्ति वस्तु सत्तत्र ज्ञानाकारस्यारोपः । विज्ञानवादिनामपि यद्यपि न बाह्यं वस्तु सत्तथाप्यनाद्यविद्यावासनारोपितमलीकं बाह्यं, तत्र ज्ञानाकारस्यारोपः । उपपत्तिश्च यद्यादृशमनुभवसिद्धं रूपं तत्तादृशमेवाभ्युपेतव्यमित्युत्सर्गोऽन्यथात्वं पुनरस्य बलवद्बाधकप्रत्ययवशात्, नेदं रजतमिति च बाधस्येदन्तामात्रबाधेनोपपत्तौ न रजतगोचरतोचिता । रजतस्य धर्मिणो बाधे हि रजतं च तस्य च धर्म इदन्ता बाधिते भवेताम्, तद्बरमिदन्तैवास्य धर्मो बाध्यतां न पुना रजतमपि धर्मि, (२)तथा च रजतं बहिर्बाधितमर्थादन्तरे ज्ञाने व्यवतिष्ठत इति ज्ञानाकारस्य बहिरध्यासः सिध्यति ।

केचित्तु ज्ञानाकारख्यातावपरितुष्यन्तो वदन्ति "**यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम**"इति (पृ०४६पं० १) । अपरितोषकारणं चाहुः-विज्ञानाकारता रजतादेरनुभवाद्वा व्यवस्थाप्येतानुमानाद्वा ? (३)तत्रानुमानमुपरिष्टान्निराकरिष्यते । अनुभवोऽपि रजतप्रत्ययो वा स्याद् बाधकप्रत्ययो वा ? न तावद्रजतानुभवः । स हीदंकारास्पदं रजतमावेदयति न त्वान्तरम्, अहमिति हि तदा स्यात् प्रतिपत्तुः(४) प्रत्ययादव्यतिरेकात् । (५)भ्रान्तं विज्ञानं स्वाकारमेव बाह्यतयाऽध्यवस्यति, तथा च नाहङ्कारास्पदमस्य गोचरो, ज्ञानाकारता पुनरस्य बाधकप्रत्ययप्रवेदनीयेति चेत् । हन्त बाधकप्रत्ययमालोचयत्वायुष्मान् । किं पुरोवर्त्ति द्रव्यं रजताद्विवेचयत्याहो ज्ञानाकारतामप्यस्य दर्शयति । तत्र ज्ञानाकारतोपदर्शनव्यापारं बाधकप्रत्ययस्य ब्रुवाणः श्लाघनीयप्रज्ञो देवानांप्रियः । (६)पुरोवर्तित्वप्रतिषेधादर्थादस्य ज्ञानाकारतेति चेत्, न, (७)असन्निधानाग्रहनिषेधाद् असन्निहितो भवति प्रतिपत्तुरत्यन्तसन्निधानं त्वस्य प्रतिपन्नात्मकं कुतस्त्यम् । (८)नचैष रजतस्य निषेधो न चेदन्तायाः, किन्तु विवेकाग्रहप्रसञ्जितस्य रजतव्यहारस्य । (९)न च रजतमेव शुक्तिकायां प्रसञ्जितं रजतज्ञानेन, नहि रजतनिर्भासस्य शुक्तिकालम्बनं युक्तमनुभवविरोधात् । न खलु सत्तामात्रेणालम्बनम्, अतिप्रसङ्गात् । सर्वेषामर्थानां सत्त्वाविशेषादालम्बनत्वप्रसङ्गात् । नापि कारणत्वेन, इन्द्रियादीनामपि कारणत्वात्, तथा च भासमानतैवालम्बनार्थः । न च रजतज्ञाने शुक्तिका भासत इति कथमालम्बनं, भासमानताभ्युपगमे वा कथं

---

(१) बौद्धनयविशेषेण भ्रमाधिष्ठानमाह सौत्रान्तिकेति ।

(२) तथाचेति । इदमत्र तात्पर्यम् । इदं रजतमित्यत्र रजतानुयोगिकइदन्त्वप्रतियोगिकतादात्म्यस्यैव भानात् नेदं रजतमित्यत्र तदेव बाधितं भवति 'प्रतियोग्यभावौ तुल्ययोगक्षेमावि'ति न्यायात्, नतु रजतस्य, तथासति उभयबाधस्वीकारापत्तेः । एवं चात्मख्यातिवादिमते बाह्यशुक्त्यादौ बुद्धिरूपात्मनो धर्मस्य रजतस्याध्यासः आन्तरस्य रजतस्य बहिर्वदवभासोऽन्यथाख्यातिवादिमतेऽन्यत्र शुक्त्यादावन्यधर्मस्य देशान्तरस्थरूप्यादेरध्यास इति ।

(३) सहोपलम्भहेतुकं मितिमेययोरभेदसाधकमनुमानमित्यर्थः ।

(४) ज्ञानरूपात्प्रतिपत्तुरभेदादित्यर्थः, समानाधिकरणपंचमीप्रयोगात् ।

(५) अहमुल्लेखयोग्यस्यापि रजतस्य भ्रमादिदन्तया प्रतीतिरित्यभिप्रायेणाशङ्कते भ्रान्तमिति ।

(६) एवं बाधकप्रत्ययस्य साक्षाज्ज्ञानाकारपदर्शकत्वं निरस्यार्थादपि तन्निरस्यति पुरोवर्त्तित्वेति ।

(७) अनिदंतागमकस्येदन्तानिषेधस्य देशान्तरसत्तयाप्युपपत्तिरित्याह असंनिधानेति । रजतस्याऽसंनिधानाग्रहः संनिहितत्वेन व्यवहारहेतुत्वाद्भ्रमः, तन्निषेधोऽसंनिधानग्रहरूपो बोधः, प्रागभावनिवृत्त्यात्मकत्वाद्भावस्य, तस्मादख्यातिमते आरोप्योऽर्थः प्रतिपत्तुरसंनिहितो जायते इति भावः ।

(८) रजतबाधोक्तगौरवं निरस्यन्नाह नचैष इति ।

(९) व्यवहारनिषेधेपि शुक्तौ रजतप्रतीत्याऽन्यथाख्यातिरित्याशङ्क्य निरस्यति नचेति ।

नानुभवविरोधः । (१)अपि चेन्द्रियादीनां समीचीनज्ञानोपजनने सामर्थ्यमुपलब्धामिति कथमेभ्यो मिथ्याज्ञानसम्भवः । दोषसहितानां तेषां मिथ्याप्रत्ययेऽपि सामर्थ्यमिति चेत्, न, दोषाणां कार्योपजननसामर्थ्यविघातमात्रे हेतुत्वात्, अन्यथा दुष्टादपि कुटजबीजाद् वटाङ्कुरोत्पत्तिप्रसङ्गात् । अपि च स्वगोचरव्यभिचारे विज्ञानानां सर्वत्रानाश्वासप्रसङ्गः । तस्मात् सर्वं ज्ञानं समीचीनमास्थेयम् । (२)तथा च रजतमिदमिति च द्वे विज्ञाने स्मृत्यनुभवरूपे, तत्रेदमिति पुरोवर्तिद्रव्यमात्रग्रहणं दोषवशात् तदूतशुक्तित्वसामान्यविशेषस्याग्रहात्, तन्मात्रं च गृहीतं सदृशतया संस्कारोद्बोधक्रमेण रजते स्मृतिं जनयति । सा च (३)गृहीतग्रहणस्वभावापि दोषवशाद्गृहीतत्वांशप्रमोषाद् ग्रहणमात्रमवतिष्ठते । तथा च रजतस्मृतेः पुरोवर्तिद्रव्यमात्रग्रहणस्य च मिथः स्वरूपतो विषयतश्च भेदाग्रहात् (४)सन्निहितरजतगोचरज्ञानसारूप्येणेदं रजतमिति भिन्न अपि स्मरणग्रहणे अभेदव्यवहारं च सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः । क्वचित्पुनर्ग्रहण एव मिथो गृहीतभेदे, यथा पीतः शङ्ख इति । अत्र हि विनिर्गच्छन्नयनरश्मिवर्तिनः पित्तद्रव्यस्य काचस्येव स्वच्छस्य पीतत्वं गृह्यते पित्तं तु न गृह्यते । शङ्खोपि दोषवशात् शुक्लगुणरहितः स्वरूपमात्रेण गृह्यते । तदनयोर्गुणगुणिनोरसंसर्गाग्रहसारूप्यात् पीततपनीयपिण्डप्रत्ययाविशेषेणाभेदव्यवहारः समानाधिकरणव्यपदेशश्च । (५)भेदाग्रहप्रसञ्जिताभेदव्यवहारबाधनाच्च नेदमिति विवेकप्रत्ययस्य बाधकत्वमप्युपपद्यते, तदुपपत्तौ च प्राक्तनस्य प्रत्ययस्य भ्रान्तत्वमपि लोकसिद्धं सिद्धं भवति । तस्माद्यथार्थाः सर्वे विप्रतिपन्नाः संदहविभ्रमाः प्रत्ययत्वात्, घटादिप्रत्ययवत् । तदिदमुक्तं **यत्र यदध्यास इति** । यस्मिन् शुक्तिकादौ यस्य रजतादेरध्यास इति लोकप्रसिद्धिः नासावन्यथाख्यातिनिबन्धना, किन्तु गृहीतस्य रजतादेस्तत्स्मरणस्य च गृहीततांशप्रमोषेण गृहीतमात्रस्य य इदमिति पुरोवस्थितादद्रव्यमात्रात्तत्प्रज्ञानाच्च विवेकस्तदग्रहणनिबन्धनो भ्रमः । भ्रान्तत्वं च ग्रहणस्मरणयोरितरेतरसामानाधिकरण्यव्यपदेशो रजतादिव्यवहारश्चेति ।

अन्ये तु अत्राप्यपरितुष्यन्तो **यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते** (पृ० ४७ पं० १) । अत्रेदमाकूतम्–अस्ति तावद्रजतार्थिनो रजतमिदमिति प्रत्ययात्पुरोवर्तिनि द्रव्ये प्रवृत्तिः, सामानाधिकरण्यव्यपदेशश्चेति सर्वजनीनम् । तदतन्न तावद्ग्रहणस्मरणयोस्तद्गोचरयोश्च मिथो भेदाग्रहमात्राद्भवितुमर्हति(६) । ग्रहणनिबन्धनौ हि चेत-

---

(१) एवमारोपितमर्थं निरस्य मिथ्याज्ञानमपि प्रतिषिध्यति अपिचेति ।

(२) ननु तथापि मिथ्याज्ञाननिषिध्यर्थं विपर्ययो वाच्य अत आह तथाचेति । इदमात्मकसामान्यार्थं शुक्तिस्वरूपविशेषस्याग्रहादिदमिति द्रव्यमात्रग्रहणं भवतीत्यर्थः ।

(३) गृहीतेति । गृहीतमिदमिति प्रकाशनस्वभावेत्यर्थः ।

(४) संनिहितेति । संनिहितरजतविषयं ज्ञानं यथा इदमो रजतस्य चासंसर्गं न गृह्णाति संसृष्टत्वात्तथा ग्रहणस्मरणे अपि परस्परं भिन्ने स्वगतभेदं स्वविषयासंसृष्टत्वं न गृह्णाति इत्यत्र सारूप्यं बोध्यम् ।

(५) निषेध्यभ्रमाभावे निषेधानुपपत्तिमाशंक्याह भेदाग्रहेति । इतरेतराभावबोधादितरेतराभावाग्रहनिवृत्तौ तद्धेतुकव्यवहारानिवृत्तिरूपं बाधस्य फलं भवतीत्यर्थः ।

(६) अर्हतीति । किन्तु रजतमित्येवंरूपात्सामानाधिकरण्यप्रत्ययाद्भवतीत्यर्थः ।

नस्य व्यवहारव्यपदेशौ कथमग्रहणमात्राद्भवेताम् । (१)ननूक्तं—नाग्रहणमात्रात्किन्तु ग्रहणस्मरणे एव मिथः स्वरूपतो विषयतश्चागृहीतभेदे समीचीनपुरःस्थितरजतविज्ञानसादृश्येन अभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः । (२)अथ समीचीनज्ञानसारूप्यमनयोर्गृह्यमाणं वा व्यवहारप्रवृत्तिहेतुरगृह्यमाणं वा ? सत्तामात्रेण गृह्यमाणेऽपि समीचीनज्ञानसारूप्यमनयोरिदमिति रजतमिति च ज्ञानयोरिति ग्रहणम् , अथ वा तयोरेव स्वरूपतो विषयतश्च मिथो भेदाग्रह इति ग्रहणम् । तत्र न तावत्समीचीनज्ञानसदृशी इति ज्ञानं समीचीनज्ञानव्यवहारप्रवर्तकम्, नहि गोसदृशो गवय इति ज्ञानं गवार्थिनं गवये प्रवर्तयति । अनयोरेव भेदाग्रह इति तु ज्ञानं पराहतं, नहि भेदाग्रहेऽनयोरिति भवति, अनयोरिति ग्रहे भेदाग्रहणमिति च (३)भवति। तस्मात्सत्तामात्रेण भेदाग्रहोऽगृहीत एव व्यवहारहेतुरिति(४)वक्तव्यम् । तत्र किमयमारोपोत्पादकक्रमेण व्यवहारहेतुराहो अनुत्पादितारोप एव स्वत इति । वयं तु(५) पश्यामः चेतनव्यवहारस्याज्ञानपूर्वकत्वानुपपतेरारोपज्ञानोत्पादक्रमेणैवेति । (६) ननु सत्यं चेतनव्यवहारो नाऽज्ञानपूर्वकः किन्त्वविदितविवेकग्रहणस्मरणपूर्वक इति । मैवम्(७) । नहि रजतप्रातिपदिकार्थमात्रस्मरणं प्रवृत्तावुपयुज्यते । इदंकारास्पदाभिमुखी खलु रजतार्थिनां प्रवृत्तिरित्यविवादम् । कथं चायमिदङ्कारास्पदे प्रवर्तेत, यदि तु न तदिच्छेत् । अन्यदिच्छत्यन्यत्करोतीति व्याहतम् । न चेददङ्कारास्पदं रजतमिति जानीयात्कथं रजतार्थी तदिच्छेत् । यद्यत्थात्वेनाग्रहणादिति ब्रूयात्स च प्रतिवक्तव्योऽथ तथात्वेनाग्रहणात्कस्मान्नोपेक्षेतेति । सोऽयमुपादानोपेक्षाभ्यामभिमत आकृष्यमाणश्चेतनोऽव्यवस्थित इदङ्कारास्पदे रजतसमारोपेणोपादान एव व्यवस्थाप्यत इति भेदाग्रहः समारोपोत्पादक्रमेण चेतनप्रवृत्तिहेतुः । तथाहि—भेदाग्रहादिदङ्कारास्पदे रजतत्वं समारोप्य तज्जातीयस्योपकारहेतुभावमनुचिन्त्य तज्जातीयतयेदङ्कारास्पदे रजते तमनुमाय तदर्थी प्रवर्तते इत्यानुपूर्व्यं सिद्धम् । न च तटस्थरजतस्मृतिरिदङ्कारास्पदस्योपकारहेतुभावमनुमापयितुमर्हति, रजतत्वस्य हेतोरपक्षधर्मत्वात् । एकदेशदर्शनं खल्वनुमापकं न त्वनेकदेशदर्शनम् । यथाहुः(८)—'ज्ञातसम्बन्धस्यैकदेशदर्शनादि'ति । समारोपे त्वेकदेशदर्शनमस्ति । तत्सिद्धमेतद्विवादाध्यासितं रजतादिज्ञानं पुरोवर्तिवस्तुविषयं रजतार्थिनस्तत्र नियमेन प्रवर्तकत्वात् , यद्यदर्थिनं यत्र (९)नियमेन

---

(१) अग्रहणहेतुवादी शंकते ननूक्तमिति ।

(२) तत्र पृच्छति सामानाधिकरणवादी अथेति ।

(३) भवतीत्यपि नञोऽनुषङ्गः ।

(४) वक्तव्यमिति । अग्रहणवादिना भवतेति भावः ।

(५) तत्र स्वमतं प्रदर्शयति वयन्त्वित्यादिना । (६) अग्रहणवादी शङ्कते नन्विति ।

(७) समाधत्ते नैवमिति । यद्यपि अविदितविवेकस्य स्मरणस्य ग्रहणस्य च ज्ञानयोर्यौगपद्याभावान्नायथाव्यवहारहेतुत्वमेकदा सम्भवति, तथापि प्रत्येकं स्यादत आह नहीति । ग्रहणपक्षेपि तुल्यमेतत् यदि तदिच्छेत्तर्ह्येव प्रवर्तेतेत्यर्थः ।

(८) यथाहुः शबरस्वामिन इत्यर्थः । ज्ञाताविनाभावसम्बन्धस्य पुंसः लिङ्गविशिष्टधर्म्यैकदेशदर्शनाद्विशिष्टधर्म्यैकदर्शने लिङ्गे बुद्धिरनुमानमिति ।

(९) नियमेनेति । अनेन साधनप्रवर्तके फलज्ञाने व्यभिचाराभावः प्रदर्शितः, तस्योपायान्तरसाध्यत्वेन तज्ज्ञानस्य नियमेनाप्रवर्तकत्वात् ।

प्रवर्तयति तज्ज्ञानं तद्विषयं यथोभयसिद्धसमीचीनरजतज्ञानं, तथा चेदं, तस्मात्तथेति । यच्चोक्तमनवभासमानतया न शुक्तिरालम्बनमिति, तत्र भवान् पृष्टो व्याचष्टां किं शुक्तिकात्वस्येदं रजतमिति ज्ञानं प्रत्यनालम्बनत्वमाहोस्विद् द्रव्यमात्रस्य पुरःस्थितस्य सितभास्वरस्य ? यदि शुक्तिकात्वस्यानालम्बनत्वम् , अद्धा । उत्तरस्यानालम्बनत्वं ब्रुवाणस्य तवैवानुभवविरोधः । तथाहि--रजतमिदमित्यनुभवन्ननुभविता पुरोवर्ति वस्त्वङ्गुल्यादिना निर्दिशति । (१)दृष्टं च दुष्टानां कारणानामौत्सर्गिककार्यप्रतिबन्धेन कार्यान्तरोपजननसामर्थ्यम् , यथा दावाग्निदग्धानां वेत्रबीजानां कदलीकाण्डजनकत्वम्, भस्मकदुष्टस्य चौदर्यस्य तेजसो बह्वन्नपचनमिति । प्रत्यक्षबाधापहृतविषयं च विभ्रमाणां यथार्थत्वानुमानमाभासो (२)हुतवहानुष्णत्वानुमानवत् । यच्चोक्तं--मिथ्याप्रत्ययस्य व्यभिचारे सर्वप्रमाणेष्वनाश्वास-इति । तद् बोधकत्वेन स्वतः प्रामाण्यं नाव्यभिचारेणेति व्युत्पादयद्भिरस्माभिः परिहृतं न्यायकणिका(३)यामिति नेह प्रतन्यते । दिङ्मात्रं चास्य स्मृति(४)प्रमोषभङ्गस्योक्तम् । विस्तरस्तु ब्रह्मतत्त्वसमीक्षायामवगन्तव्य इति, तदिदमुक्तम्—"अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मकल्पनमाचक्षत" इति । यत्र शुक्तिकादौ यस्य रजतादेरध्यासस्तस्यैव शुक्तिकादेर्विपरीतधर्मकल्पनं रजतत्वधर्मकल्पनमिति योजना । ननु सन्तु नाम परीक्षकाणां विप्रतिपत्तयः प्रकृते तु किमायातमित्यत आह-**"सर्वथापि त्वन्यस्याऽन्यधर्मकल्पनां न व्यभिचरात"** (पृ० ४७) । (५)अन्यस्यान्यधर्मकल्पनाऽनृतता, सा चानिर्वचनीयतेत्यधस्तादुपपादितम् । तेन सर्वेषामेव परीक्षकाणां मतेऽन्यस्यान्यधर्मकल्पनानिर्वचनीयताऽवश्यम्भाविनीत्यनिर्वचनीयता सर्वतन्त्रसिद्धान्त इत्यर्थः । अख्यातिवादिभिरकामैरपि सामानाधिकरण्यव्यपदेशप्रवृत्तिनियमस्नेहादिदमभ्युपेयमिति भावः । न केवलमियमनृतता परीक्षकाणां सिद्धाऽपि तु [illegible]नामप्यिाह--**"तथा च लोकेऽनुभवः शुक्तिका हि रजतवदवभासत"** इति । न पुना रजतमिदमिति शेषः । स्यादेतत् । अन्यस्यान्यात्मताविभ्रमो लोकसिद्धः, एकस्य त्वभिन्नस्य भेदभ्रमो न दृष्ट इति कुतश्चिदात्मनोऽभिन्नानां जीवानां भेदविभ्रम इत्यत आह--**"एकश्चन्द्रः सद्वितीयवदिति"** । (पृ० ४८ पं० १) ।

---

(१) समीचीनज्ञानान्मिथ्याज्ञानं न जन्यत इति यदुक्तं तन्निराचष्टे दृष्टञ्चेति ।

(२) 'सर्वे विप्रतिपन्ना'इत्यादिनोक्तमनुमानं प्रत्यक्षबाधितविषयत्वाद्धुतवहानुष्णो द्रव्यत्व दित्यनुमानवद्बाधितमित्यर्थः ।

(३) "किमव्यभिचारितैवाप्रामाण्यमुत तद्धेतुरथ तद्व्यापिका, येन क्वचिद्व्यभिचारदर्शनाज्ज्ञानानामप्रामाण्यमापतेत् । सर्वथाप्यसम्भव., व्यभिचारिणामपि सितनीलादिषु चक्षुरादीनां बोधकत्वेन प्रामाण्यादव्यभिचारिणामपि दहनादौ धूमादीनां कुतश्चित्तिमित्तादनुपजायितदहनादिज्ञानानामप्रामाण्यादि"त्यादिना न्यायकणिकायां व्युत्पादितं तत्रैव द्रष्टव्यम् ।

(४) स्मृतीति । 'गृहीतत्वाशप्रमोषादि'त्यादिनोक्तस्य स्मृतिप्रमोषस्य भंगो दिमात्रेणायं कृतो विस्तरतो ब्रह्मतत्त्वसमीक्षाख्ये निबन्धे द्रष्टव्य इत्यर्थः ।

(५) ननु भाष्यकारेणापि किं तर्हि भ्रमोक्तिकृत इत्याशंकानिरासाय व्याचष्टे अन्यस्येति । कल्पनाऽवभासपदार्थः ।

(१)पुनरपि चिदात्मन्यध्यासमाक्षिपति—"**कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम्**" (पृ० ४८ पं० २) । अयमर्थः । चिदात्मा प्रकाशते न वा ? न चेत् प्रकाशते, कथमस्मिन्नध्यासो विषयतद्धर्माणाम् । न खल्वप्रतिभासमाने पुरोवर्तिनि द्रव्ये रजतस्य वा तद्धर्माणां वा समारोपः सम्भवतीति । प्रतिभासे वा न तावदयमात्मा जडो घटादिवत् पराधीनप्रकाश इति युक्तम् । न खलु स एव कर्ता च कर्म च भवति, विरोधात् , परसमवेतक्रियाफलशालि हि कर्म, न च ज्ञानक्रिया परसमवायिनीति कथमस्यां कर्म, न च तदेव स्वं च परं च, विरोधात् । (२)आत्मान्तरसमवायाभ्युपगमे तु ज्ञेयस्यात्मनोऽनात्मत्वप्रसङ्गः । एवं तस्यतस्येत्यनवस्थाप्रसङ्गः ।

स्यादेतत्(३) । आत्मा जडोपि सर्वार्थज्ञानेषु भासमानोपि कर्तैव न कर्म, परसमवेतक्रियाफलशालित्वाभावात् चैत्रवत् । यथा हि चैत्रसमवेतक्रियया चैत्रनगरप्राप्तावुभयसमवेतायामपि क्रियमाणायां नगरस्यैव कर्मता परसमवेतक्रियाफलशालित्वात् , न तु चैत्रस्य क्रियाफलशालिनोऽपि चैत्रसमवायादूमनक्रियाया इति । तन्न । श्रुतिविरोधात् । श्रूयते हि 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति । उपपद्यते च, (४)तथाहि—योयमर्थप्रकाशः फलं यस्मिन्नर्थश्च आत्मा च प्रथते स किं जडः स्वयंप्रकाशो वा ? जडश्चेद्विषयात्मानावपि जडाविति कस्मिन् किं प्रकाशेताविशेषात् , इति प्राप्तमान्ध्यमशेषस्य जगतः । तथा चाभाणकः—'अन्धस्येवान्धलग्नस्य विनिपातः पदेपदे' । न च निलीनमेव विज्ञानमर्थात्मानौ ज्ञापयति चक्षुरादिवदिति वाच्यम् । ज्ञापनं हि ज्ञानजननं, जनितं च ज्ञानं जडं सन्नोक्त(५)दूषणमतिवर्तेतेति । एवमुत्तरोत्तराण्यपि ज्ञानानि जडानीत्यनवस्था । तस्मादपराधीनप्रकाशा संविदुपेतव्या । (६)तथापि किमायातं विषयात्मनोः स्वभावजडयोः ? एतदायातं यत्तयोः संविदजडेति । (७)तर्हि पुत्रः पण्डित इति पितापि पण्डितोऽस्तु, स्वभाव एष संविदः स्वयंप्रकाशाया यदर्थात्मसम्बन्धितेति चेद् । (८)हन्त पुत्रस्यापि पण्डितस्य स्वभाव एष यत् पितृसम्बन्धितेति समानम् । (९)सहार्थात्मप्रकाशेन संवित्प्रकाशो न त्वर्थात्मप्रकाश विनेति तस्याः स्वभाव

---

(१) एवमारोप्यसिध्यसम्भवप्रयुक्ते आक्षेपे निरस्ते पुनरात्मनोऽधिष्ठानत्वानुपपत्त्या तमाक्षिपति पुनरपीति ।

(२) एवमात्मनः स्वग्राह्यत्वं निरस्य परग्राह्यत्वं निरस्यन्नाह आत्मान्तरेति ।

(३) बौद्धनैयायिकः शंकते स्यादेतदिति । संविदाश्रयत्वेनात्मसिद्धिः स्यादित्यर्थः ।

(४) स्वप्रकाशफलस्य जन्मादिनिषेधेनात्मत्वमुपपादयति तथाहीत्यादिना ।

[५] उक्तदूषणमिति । जगदान्ध्यमित्यर्थः ।

[६] संविदोऽपराधीनप्रकाशत्वेपि आत्मा कुतो न जड इति वादिनं प्रत्यात्मस्वप्रकाशत्ववाद्याह तथापीति ।

[७] पुत्रे पंडितेपि पितुरपांडित्यमर्थात्मसम्बन्धिन्यामजडायामपि संविदि नार्थात्मनोः प्रकाशमानतासिद्धिरित्याभिप्रायेणाक्षिपति तर्हीमिति । आश्रयविषययोः पारतन्त्र्यनियमात्स्वभावसम्बद्धा संवित् , न पुत्रः पित्रभावेपि तदभावादिति आक्षेपार्थः ।

[८] समाधत्ते हन्तेति । पुत्रपित्रोरपि जन्यजनकत्वे स्वभावसम्बद्ध इति समाधानार्थः ।

[९] सहेति । अर्थात्मनोः प्रकाशेन सहेत्यर्थः ।

इति चेत्, तर्किं संविदो भिन्नौ संविदर्थात्मप्रकाशौ ? (१)तथा च न स्वयंप्रकाशा संविन्न च संविदर्थात्मप्रकाश इति । अथ संविदर्थात्मप्रकाशौ न संविदो भिद्येते, संविदेव तौ । एवं चेत्, यावदुक्तं भवति संविदात्मार्थौ सहेति तावदुक्तं भवति संविदर्थात्मप्रकाशौ सहेति, तथा च न (२) विवक्षितार्थसिद्धिः । (३)नचातीतानागतार्थगोचरायाः संविदोऽर्थसहभावोऽपि । तद्विषयहानोपादानोपेक्षाबुद्धिजननादर्थसहभाव इति चेन्न । अर्थसंविद इव हानादिबुद्धीनामपि तद्विषयत्वानुपपत्तेः । हानादिजननाद्धानादिबुद्धीनामर्थविषयत्वम्, अर्थविषयहानादिबुद्धिजननाच्चार्थसंविदस्तद्विषयत्वमिति चेत्, तत् किं देहस्य प्रयत्नवदात्मसंयोगो देहप्रवृत्तिनिवृत्तिहेतुरर्थे इत्यर्थप्रकाशोस्तु । जाड्यादेहात्मसंयोगो नार्थप्रकाश इति चेत्, नन्वयं स्वयंप्रकाशोऽपि स्वात्मन्येव खद्योतवत्प्रकाशः, अर्थे तु जड इत्युपपादितम् । न च प्रकाशस्यात्मानो विषयाः । ते हि विच्छिन्नदीर्घस्थूलतयाऽनुभूयन्ते, प्रकाशश्चायमान्तरोऽस्थूलोऽनणुरह्रस्वोऽदीर्घश्चेति प्रकाशते, (४)तस्माच्चन्द्रेऽनुभूयमान इव द्वितीयश्चन्द्रमाः स्वप्रकाशादन्योऽर्थोऽनिर्वचनीय एवेति युक्तमुत्पश्यामः । न चास्य प्रकाशस्या(५)जानतः स्वलक्षणभेदोऽनुभूयते । न चानिर्वाच्यार्थभेदः प्रकाशं निर्वाच्यं भेत्तुमर्हति, अतिप्रसङ्गात् । न चार्थानामपि परस्परं भेदः समीचीनज्ञानपद्धतिमध्यास्ते इत्युपरिष्टादुपपादयिष्यते । (६)तदयं प्रकाश एव स्वयंप्रकाश एकः कूटस्थो नित्यो निरंशः प्रत्यगात्माऽ(७)शक्यनिर्वचनीयेभ्यो देहेन्द्रियादिभ्य आत्मानं प्रतीपं निर्वचनीयमञ्चति जानातीति प्रत्यङ् स चात्मेति प्रत्यगात्मा, स चापराधीनप्रकाशत्वादनंशत्वाच्चाविषयस्तस्मिन्नध्यासो विषयधर्माणां देहेन्द्रियादिधर्माणां; कथम् ? किमाक्षेपे, अयुक्तोऽयमध्यास इत्याक्षेपः । कस्मादयमयुक्त इत्यत आह **"सर्वो हि पुरोवस्थिते विषये विषयान्तरमध्यस्यति"** (पृ० ४८ पं० ३) । एतदुक्तं भवति यत्पराधीनप्रकाशमंशवच्च तत्सामान्यांशग्रहे, कारणदोषवशाच्च विशेषाग्रहेऽन्यथा प्रकाशते । प्रत्यगात्मा त्वपराधीनप्रकाशतया न स्वज्ञाने कारणान्यपेक्षते येन तदाश्रयदोषैर्दूष्येत । न चांशवान्, येन कश्चिदस्यांशो गृह्येत कश्चिन्न गृह्येत, नहि तदेव तदानीमेव तेनैव गृहीतमगृहीतं च सम्भवतीति न स्वयंप्रकाशपक्षेऽध्यासः । सदातनेऽप्यप्रकाशे पुरोवस्थितत्वस्यापरोक्षत्वस्याभावान्नाध्यासः । नहि शुक्तावपुरःस्थितायां रजतमध्यस्यतीदं रजतमिति । तस्मादत्यन्तग्रहेऽत्यन्ताग्रहे च नाध्यास इति सिद्धम् ॥ स्यादेतत् । अविषयत्वे हि चिदात्मनो नाध्यासो, विषय एव तु चिदात्माऽस्मत्प्रत्ययस्य, तत्कथं नाध्यास इत्यत आह—**"युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवी-**

---

[१] तथाचेति । संविदर्थात्मप्रकाशानां संविदो भेदे संविदः स्वयंप्रकाशत्वमर्थात्मप्रकाशत्वं चानुपपन्नमिति तस्या घटवदप्रकाशत्वमर्थात्मज्ञापकत्वेनानवस्था च स्यादित्यर्थः ।

[२] नेति । संविद्भिन्नप्रकाशानङ्गीकारे संविदर्थात्मनां साहित्यमिति पुष्पपाडित्यतुल्यतेति भावः ।

(३) एवमर्थसंविदोः सहभावानुपयोगं प्रदर्श्य क्वचित्तस्यासिद्धिमाह नचेति ।

(४) एवं बौद्धमतं निरस्य स्वमतमुपसंहारव्याज तस्मादिति ।

(५) आजानतः—स्वभावतः, अनेन संविद आत्मत्वसिद्धिरुक्ता ।

(६) एवं स्वप्रकाश आत्मेति स्थिते वेदान्तिनां पक्षेऽध्यासाक्षेपकतया भाष्यं योजयन्नाह तदयमिति ।

(७) प्रत्यक्शब्दार्थं प्रदर्शयन्नाह अशक्येति ।

षि" ॥ विषयत्वे हि चिदात्मनोऽन्यो विषयी भवेत्, तथा च यो विषयी स एव चिदात्मा, विषयस्तु ततोऽन्यो युष्मत्प्रत्ययगोचरोऽभ्युपेयः । तस्मादनात्मत्वप्रसङ्गादनवस्थापरिहाराय युष्मत्प्रत्ययापेतत्वम् अत एवाविषयत्वमात्मनो वक्तव्यं, तथा च नाध्यास इत्यर्थः ।

परिहरति—**"उच्यते न तावदयमेकान्तेनाविषयः"** कुतः ? **"अस्मत्प्रत्ययविषयत्वात्"** (पृ० ४९ पं० १) अयमर्थः । (१)सत्यं प्रत्यगात्मा स्वयंप्रकाशत्वादविषयोऽनंशश्च, तथाप्यनिर्वचनीयानाद्यविद्यापरिकल्पितबुद्धिमनःसूक्ष्मस्थूलशरीरेन्द्रियावच्छेदेनानवच्छिन्नोपि **वस्तुतोऽवच्छिन्न इवाभिन्नोपि भिन्न इवाकर्तापि कर्तेवाभोक्तापि भोक्तेवाविषयोप्यस्मत्प्रत्ययविषय इव जीवभावमापन्नोऽवभासते, नभ इव घटमणिकमल्लिकाद्यवच्छेदभेदेन भिन्नमिवानेकविधधर्मकमिवेति** । (२)नहि चिदेकरसस्यात्मनश्चिदंशे गृहीतेऽगृहीतं किंचिदस्ति, न खल्वानन्दनित्यत्वविभुत्वादयोऽस्य चिद्रूपाद्वस्तुतो भिद्यन्ते, येन तद्ग्रहे न गृह्येरन् । गृहीता एव तु कल्पितेन भेदेन न विवेचिता इत्यगृहीता इवाभान्ति । (३)न चात्मनो बुद्ध्यादिभ्यो भेदस्तात्त्विको, येन चिदात्मनि गृह्यमाणे सोऽपि गृहीतो भवेत्, बुद्ध्यादीनामनिर्वाच्यत्वेन तद्भेदस्याप्यनिर्वचनीयत्वात् । तस्माच्चिदात्मनः स्वयंप्रकाशस्यैवानवच्छिन्नस्यावच्छिन्नेभ्यो बुद्ध्यादिभ्यो भेदाग्रहात् तदध्यासेन जीवभाव इति । (४)तस्य चानिदमिदमात्मनोऽस्मत्प्रत्ययविषयत्वमुपपद्यते । तथाहि कर्ता भोक्ता चिदात्माऽहंप्रत्यये प्रत्यवभासते । न चोदासीनस्य तस्य क्रियाशक्तिर्भोगशक्तिर्वा सम्भवति । यस्य च बुद्ध्यादेः कार्यकरणसङ्घातस्य क्रियाभोगशक्ती न तस्य चैतन्यम् । तस्माच्चिदात्मैव कार्यकरणसङ्घातेन ग्रथितो लब्धक्रियाभोगशक्तिः स्वयंप्रकाशोऽपि बुद्ध्यादिविषयविच्छुरणात् कथंचिदस्मत्प्रत्ययविषयोऽहंकारास्पदं जीव इति च जन्तुरिति च क्षेत्रज्ञ इति चाख्यायते । (५)न खलु जीवश्चिदात्मनो भिद्यते । तथा च श्रुतिः "अनेन जीवेनात्मने"ति । तस्माच्चिदात्मनोऽव्यतिरेकाज्जीवः स्वयंप्रकाशोऽप्यहंप्रत्ययेन कर्तृभोक्तृतया (६)व्यवहारयोग्यः क्रियत इत्यहंप्रत्ययालम्बनमुच्यते । न चाध्यासे सति विषयत्वं विषयत्वे चाध्यास इत्यन्योन्याश्रयमिति साम्प्रतम् । बीजाङ्कुरवदनादित्वात्, पूर्वपूर्वाध्यासतद्वासनाविषयीकृतस्योत्तरोत्तराध्यासविषयत्वाविरोधादित्युक्तं **'नैसर्गिकोऽयं लोकव्यवहार'** इति भाष्यग्रन्थेन । तस्मात् सुष्ठूक्तं **'न तावदयमेकान्तेनाविषय'** इति । जीवो हि चिदात्मतया स्वयंप्रकाशतयाऽविषयोप्यौपाधिकेन रूपेण विषय इति भावः ।

---

(१) स्वप्रकाशस्य विषयत्वासंभवाद्भाष्यकाराक्तमस्मत्प्रत्ययविषयत्वेनात्मनो विषयत्वमसम्भवीत्याशङ्क्या औपाधिकविषयतांगीकारद्वारा समाधानमाह सत्यमित्यादिना ।

(२) नहीति । अनेनात्मनो निरंशत्वप्रतिपादनेन स्वतोऽविषयत्वमौपाधिकं विषयत्वं चेति कुतः ? शुक्तिग्रहणाग्रहणे एवात्मनो किमिति नांगीक्रियते इत्याशङ्क्य परास्ता बोध्या ।

(३) यदि चिद्भाने तदात्मकतया आनंदादयो भान्ति तदा तेभ्यश्चिदात्मनो भेदोपि प्रतीयात् इत्याशंक्याह नचेति । तथाचानन्दादीनां वास्तवत्वाच्चैतन्यैकरसता न भेदस्यापीत्यभानमित्यर्थः ।

(४) तस्येति । इदमात्मकतया विषयत्वमनिदमात्मकतयाऽस्मदुल्लेखश्चात्मन उपपद्यत इत्यर्थः । एतेन विषयत्वे युष्मत्प्रत्ययविषयत्वापत्तिस्तत्तज्ज्ञानात्मत्वमात्मन इत्याक्षेपः परिहृतः ।

(५) ननूपाधिपरिच्छेदमन्तरेणाभ्य एव परमात्मनो जीवोऽहंप्रत्ययविषयोस्तु, तत्राह न खल्विति ।

(६) अनेनौपाधिकविषयत्वात्पूर्वोक्तकर्मकर्तृत्वविरोधोप्यपहतो बोद्धव्यः ।

(१)स्यादेतत् । न वयमपराधीनप्रकाशतयाऽविषयत्वेनाध्यासमपाकुर्मः, किन्तु प्रत्यगात्मा न स्वतो नापि परतः प्रथत इत्यविषय इति ब्रूमः । तथा च सर्वथाऽप्रथमाने प्रत्यगात्मनि कुतोऽध्यास इत्यत आह **"अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः"** (पृ० ५० पं० १) । प्रतीच आत्मनः प्रसिद्धिः प्रथा तस्या अपरोक्षत्वात् । यद्यपि प्रत्यगात्मनि नान्या प्रथाऽस्ति, तथापि भेदोपचारः यथा पुरुषस्य चैतन्यामिति । एतदुक्तं भवति । अवश्यं चिदात्माऽपरोक्षोऽभ्युपेतव्यस्तदप्रथायां सर्वस्याप्रथनेन जगदान्ध्यप्रसङ्गादित्युक्तम् । श्रुतिश्चात्र भवति 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती'ति । तदेवं परमार्थपरिहारमुक्त्वाऽभ्युपेत्यापि चिदात्मनः परोक्षतां प्रौढवादितया परिहारान्तरमाह **"न चायमस्ति नियमः पुरोवस्थित एव** अपरोक्ष एव, **विषये विषयान्तरमध्यसितव्यम्"** । कस्मादयं न नियम इत्यत आह **"अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति"** । हिर्यस्मादर्थे । नभो हि द्रव्यं सद् (२)रूपस्पर्शविरहान्न बाह्येन्द्रियप्रत्यक्षम् । नापि मानसं, मनसोऽसहायस्य बाह्येऽप्रवृत्तेः । तस्मादप्रत्यक्षम् । अथ च तत्र बाला अविवेकिनः परदर्शीतदर्शिनः कदाचित्पार्थिवच्छायां श्यामतामारोप्य, कदाचित्तैजसं शुक्लत्वमारोप्य नीलोत्पलपलाशश्यामामिति वा राजहंसमालाधवलमिति वा निर्वर्णयन्ति, तत्रापि पूर्वदृष्टस्य तैजसस्य वा तामसस्य रूपस्य परत्र नभसि स्मृतिरूपोऽवभास इति । एवं तदेव तलमध्यस्यन्ति अवाङ्मुखीभूतं महेन्द्रनीलमणिमयमकटाहकल्पमित्यर्थः । उपसंहरति **"एवम्—"**उक्तेन प्रकारेण सर्वाक्षेपपरिहारात्, **अविरुद्धः प्रत्यगात्मन्यप्यनात्मनां**—बुद्ध्यादीनाम्, **अध्यासः"** । ननु सन्ति च सहस्रमध्यासास्तत्किमर्थमयमेवाध्यास आक्षेपसमाधानाभ्यां व्युत्पादितः, नाध्यासमात्रमित्यत आह **"तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते"** (पृ० ५२ पं० १) । अविद्या हि सर्वानर्थबीजमिति श्रुतिस्मृतीतिहासपुराणादिषु प्रसिद्धम्, तदुच्छेदाय वेदान्ताः प्रवृत्ता इति वक्ष्यति । प्रत्यगात्मन्यनात्माध्यास एव सर्वानर्थहेतुर्न पुना रजतादिविभ्रमा इति स एवाविद्या, तत्स्वरूपं चाविज्ञातं न शक्यमुच्छेत्तुमिति तदेव व्युत्पाद्यं नाध्यासमात्रम् । अत्र च 'एवंलक्षणमित्ये'वंरूपतयाऽनर्थहेतुतोक्ता । यस्मात्प्रत्यगात्मन्यशनायादिरहितेऽशनायाद्युपेतान्तःकरणाद्यहितारोपेण प्रत्यगात्मानमदुःखं दुःखाकरोति,(३) तस्मादनर्थहेतुः । न चैवं पृथग्जना अपि मन्यन्तेऽध्यासं, येन न व्युत्पाद्येतेत्यत उक्तम् **पण्डिता मन्यन्ते** । नन्वियमनादिरतिनिरूढनिबिडवासनानुबद्धाऽविद्या न शक्या निरोद्धुमुपायाभावादिति यो मन्यते तं प्रति तन्निरोधोपायमाह— **"तद्विवेकेन च वस्तुस्वरूपावधारणं**–निर्विचिकित्सं ज्ञानं, **विद्यामाहुः"** (पृ० ५२–पं० २) पण्डिताः प्रत्यगात्मनि खल्वत्यन्तविविक्ते बुद्ध्या;

---

(१) एवं पूर्वपूर्वाध्यासवशादप्रकाशसमर्थनेन स्वप्रकाशे यावत्सत्त्वं प्रकाशनात्कथमारोप इति पक्षं निराकृत्याऽप्रथमाने कथमारोप इति पक्षनिरासाभिप्रायकं भाष्यमवतारयन्नाह स्यादेतदिति ।

(२) तथाचाकाशं न बाह्येन्द्रियप्रत्यक्षविषयं द्रव्यत्वे सति रूपरहितत्वात् स्पर्शरहितत्वाद्वेति हेतुद्वयोक्तिरियम्, तत्र वायोः स्पार्शनमंगीकुर्वतां प्राचीननैयायिकानां मतेन द्वितीय एव हेतुर्बोध्यः ।

(३) वस्तुतोऽदुःखिनमप्यात्मानं दुःखिनं करोतीत्यर्थः ।

दिभ्यो बुद्ध्यादिभेदाग्रहनिमित्तो बुद्ध्याद्यात्मत्वतद्धर्माध्यासः । तत्र श्रवणमननादिभिर्यद्विवेकविज्ञानं तेन विवेकाग्रहे निवर्तितेऽध्यासापबाधात्मकं वस्तुस्वरूपावधारणं विद्या (१)चिदात्मरूपं स्वरूपे व्यवतिष्ठत इत्यर्थः । स्यादेतत् । अतिनिरूढनिबिडवासनानुविद्धाऽविद्या विद्ययाऽपबाधिताऽपि स्ववासनावशात्पुनरुद्भविष्यति, प्रवर्तयिष्यति च वासनादि कार्यं स्वोचितमित्यत आह— **"तत्रैवं सति**–एवंभूतवस्तुतत्त्वावधारणे सति, **यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वाऽणुपात्रेणापि स न सम्बध्यते"**–ऽन्तःकरणादिदोषेणाशनायादिना चिदात्मा, चिदात्मनो गुणेन चैतन्यानन्दादिनाऽन्तःकरणादि न सम्बध्यते । एतदुक्तं भवति । तत्त्वावधारणाभ्यासस्य हि स्वभाव एव स तादृशो यदनादिमपि निरूढनिबिडवासनमपि मिथ्याप्रत्ययमपनयति । तत्त्वपक्षपातो हि स्वभावो धियाम् । यथाऽऽहुर्बार्ह्या अपि—(२)'निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः । न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥"इति । विशेषतस्तु चिदात्मस्वभावस्य तत्त्वज्ञानस्यात्यन्तान्तरङ्गस्य कुतोऽनिर्वाच्ययाऽविद्यया बाध इति । यदुक्तं 'सत्यानृते मिथुनीकृत्य विवेकाग्रहादध्यस्याहमिदं ममेदमिति लोकव्यवहार' इति, तत्र व्यपदेशलक्षणो व्यवहारः कण्ठोक्त; । इतिशब्दसूचितं लोकव्यवहारमादर्शयति—**"तमेतमविद्याख्य"मिति** । निगदव्याख्यातम् ॥

आक्षिपति—**"कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि"** (पृ० ५३ पं० २) तत्त्वपरिच्छेदो हि प्रमा विद्या, तत्साधनानि प्रमाणानि कथमविद्यावद्विषयाणि । नाविद्यावन्तं प्रमाण्यान्याश्रयन्ति, तत्कार्यस्य विद्याया अविद्याविरोधित्वादिति भावः । सन्तु वा प्रत्यक्षादीनि संवृत्त्यापि यथा तथा, शास्त्राणि तु पुरुषहितानुशासनपराण्यविद्याप्रतिपक्षतया नाविद्यावद्विषयाणि भवितुमर्हन्तीत्याह—**"शास्त्राणि चेति"** ॥

समाधत्ते—**"उच्यते देहेन्द्रियादिष्वहंममाभिमानहीनस्य**–(३)तादात्म्यतद्धर्माध्यासहीनस्य, **प्रमातृत्वानुपपत्तौ** सत्यां, **प्रमाणप्रवृत्त्यनुपपत्तेः"** (पृ० ५६ पं० १) । अयमर्थः । प्रमातृत्वं हि प्रमां प्रति कर्तृत्वं तच्च स्वातन्त्र्यं, स्वातन्त्र्यं च प्रमातुरितरकारकाप्रयोज्यस्य समस्तकारकप्रयोक्तृत्वम् । तदनेन प्रमाकरणं प्रमाणं प्रयोजनीयम् । न च स्वव्यापारमन्तरेण करणं प्रयोक्तुमर्हति । न च कूटस्थनित्यश्चिदात्माऽपरिणामी स्वतो व्यापारवान् । तस्माद्व्यापारवद्बुद्ध्यादितादात्म्याध्यासाद् व्यापारवत्तया प्रमाणमधिष्ठातुमर्हतीति भवत्यविद्यावत्पुरुषविषयत्वमविद्यावत्पुरुषाश्रयत्वं प्रमाणानामिति(४) । अथ मा प्रवर्तिषत प्रमाणानि किं नश्छिन्नमित्यत आह–**"नहीन्द्रियाण्यनुपादाय प्रत्यक्षा-**

---

(१) वस्तुस्वरूपं च तदवधारणं चेति कर्मधारयाभिप्रायेणाभिव्यक्तं स्वरूपज्ञानमाह चिदात्मरूपमिति ।

(२) भावनाबलोत्पन्नेनाऽमलामेन सर्वविषयेण ज्ञानेन विषयीकृतस्य निरुपद्रवपरमार्थस्वभावस्य संस्कारवशादनुवर्तमानैः विपर्ययैः बाधो न भवति, यतः परमार्थभावनोत्पन्नायाः बुद्धेर्वस्तुपक्षपातात्मकः स्वभावोऽनपह्नवनीयत्वेन प्रबलोऽधिकप्रयत्नानपेक्षत्वेपीति कारिकार्थः ।

(३) तादात्म्येति । तादात्म्याध्यासः—देहादिधर्मैक्याभासः, एतद्वाक्योक्तस्याहमभिमानस्य, तद्धर्माध्यास इति च ममाभिमानस्य व्याख्यानं बोध्यम् ।

(४) प्रमाणानामितीति । तथाचाध्यासं विना प्रमातृत्वमेवानुपपन्नं स्यादिति निर्व्यापारे चिदात्मनि प्रमाणप्रेरणं व्यापारः परोपाधिरध्यस्त इति प्रमाणानामविद्यावत्प्रेर्यत्वमिति भावः ।

दिव्यवहारः संभवति"। व्यवह्रियतेऽनेनेति व्यवहारः फलं, प्रत्यक्षादीनां प्रमाणानां फलमित्यर्थः। इन्द्रियाणीति इन्द्रियलिङ्गादीनिति द्रष्टव्यम्, दण्डिनो गच्छन्तीति(१)वत्। एवं हि प्रत्यक्षादीत्युपपद्यते। (२)व्यवहारक्रियया च व्यवहार्याक्षेपात्समानकर्तृकता।(३)अनुपादाय यो व्यवहार इति योजना। किमिति पुनः प्रमातोपादत्ते प्रमाणानि, अथ स्वयमेव कस्मान्न प्रवर्तते इत्यत आह-"**न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यापारः**-प्रमाणानां व्यापारः, **संभवति**"। न जातु करणान्यनधिष्ठितानि कर्त्रा स्वकार्ये व्याप्रियन्ते। मा भूत्कुविन्दरहितेभ्यो वेमादिभ्यः पटोत्पत्तिरिति। अथ देह एवाधिष्ठाता कस्मान्न भवति, कृतमत्रात्माध्यासेनेत्यत आह—"(४)**न चानध्यस्तात्मभावेन देहेन कश्चिदुव्यापियते**"। सुषुप्तेऽपि व्यापारप्रसङ्गादिति भावः। स्यादेतत्। यथाऽनध्यस्तात्मभावं वेमादिकं कुविन्दो व्यापारयन् पटस्य कर्तैवमनध्यस्तात्मभावं देहेन्द्रियादि व्यापारयन् भविष्यति तदभिज्ञः प्रमातेत्यत आह-"**न चैतस्मिन् सर्वस्मिन्**-इतरेतराध्यासे इतरेतरधर्माध्यासे **चासति, आत्मनोऽसङ्गस्य** सर्वथा सर्वदा सर्वधर्मधर्मिवियुक्तस्य **प्रमातृत्वमुपपद्यते**। (पृ० ५७ पं० १) व्यापारवन्तो हि कुविन्दादयो वेमादीनधिष्ठाय व्यापारयन्ति, अनध्यस्तात्मभावस्य तु देहादिष्वात्मनो न व्यापारयोगोऽसङ्गत्वादित्यर्थः। अतश्चाध्यासाश्रयाणि प्रमाणानीत्याह-"**न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति**" (५)प्रमायां खलु फले स्वतन्त्रः प्रमाता भवति। अन्तःकरणपरिणामभेदश्च प्रमेयप्रवणः कर्तृस्थश्चित्स्वभावः प्रमा। कथं च जडस्यान्तःकरणस्य परिणामश्चिद्रूपो भवेत्, यदि चिदात्मा तत्र नाध्यस्येत। कथं चैष चिदात्मकर्तृको भवेत्, यद्यन्तःकरणं व्यापारवच्चिदात्मनि नाध्यस्येत्। तस्मादितरेतराध्यासाच्चिदात्मकर्तृस्थं प्रमाफलं सिध्यति। तत्सिद्धौ च प्रमातृत्वं, (६)तामेव च प्रमामुररीकृत्य प्रमाणस्य प्रवृत्तिः। प्रमातृत्वेन च प्रमोपलक्ष्यते। प्रमायाः फलस्याभावे प्रमाणं न प्रवर्तेत। तथा च प्रमाणमप्रमाणं स्यादित्यर्थः। उपसंहरति "**तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि**"। स्यादेतत्। भवतु पृथग्जनानामेवम्, आगमोपपत्तिप्रतिपन्नप्रत्यगात्मतत्त्वानां व्युत्पन्नानामपि पुंसां प्रमाणप्रमेयव्यवहारा दृश्यन्त इति कथमविद्यावद्विषयाण्येव प्रमाणानीत्यत आह-"**पञ्चादिभि-**

(१) यथात्र दण्डिशब्दो दण्डद्यदण्डिसमूहपरस्तथेन्द्रियशब्दो इन्द्रियानिन्द्रियप्रमाणपर इत्यर्थः।

(२) व्यवहार इति क्रियामात्रोपादानात्समानकर्तृकक्रियापेक्षः क्त्वाप्रत्ययः कथमित्याशङ्क्य परिहर्तुं कर्तुराक्षेपमाह व्यवहारक्रिययेति।

(३) अनुपादायेति। नैवमत्र संबन्धोऽनुपादाय न सम्भवतीति किन्तु अनुपादाय यो व्यवहारः स न सम्भवतीति।

(४) 'किमिति पुनरिति' ग्रन्थेन सांख्यस्वभाववादिनोराक्षेपं प्रदर्श्य तस्य 'नहे'त्यादिभाष्येण समाधानं कृत्वाऽथेत्यादिनोक्तस्य लौकायतिकस्य समाधानायाह नचेति।

(५) ननु प्रमातृत्वं विना प्रमाणप्रवृत्तेरसम्भवेपि प्रमाणानामध्यासाश्रितत्वं कथमिति चेन्न। चिदचिद्रूपसम्बलितप्रमाया आश्रयः प्रमातापि तत्स्वभाव एव स्यात्, चिदचित्सम्बलनञ्चाध्यासमन्तरेण न सम्भवतीति प्रमाणानामध्यासाश्रयत्वमिदमेवाह प्रमायामित्यादिना।

(६) तामेव चेति। अनेन 'तत्त्वपरिच्छेदो ही'त्यादिग्रन्थस्य 'परिहारः','तत्सिद्धौ' चेत्यनेन च 'अविद्यावन्तमि'त्यादिग्रन्थस्य परिहारः प्रदर्शितः।

श्राविशेषादि"ति (पृ० ५८ पं० १)। विदन्तु नामागमोपपत्तिभ्यां देहेन्द्रियादिभ्यो भिन्नं प्रत्यगात्मानं, प्रमाणप्रमेयव्यवहारे तु प्रमाणभूतमात्रधर्मान्नातिवर्तन्ते । यादृशो हि पशुशकुन्तादीनामविप्रतिपन्नमुग्धभावानां व्यवहारस्तादृशो व्युत्पन्नानामपि पुंसां दृश्यते । तेन तत्सामान्यात्तेषामपि व्यवहारसमयेऽविद्यावत्त्व(१)मनुमेयम् । चशब्दः समुच्चये । उक्तशङ्कानिर्वतनसहितपूर्वोक्तोपपत्तिरविद्यावित्पुरुषविषयत्वं प्रमाणानां साधयतीत्यर्थः । एतदेव(२) विभजते "**यथा हि पश्वादय**" इति । अत्र च "**शब्दादिभिः श्रोत्रादीनां संबन्धे सती**"ति प्रत्यक्षं प्रमाणं दर्शितम् । "**शब्दादिविज्ञान**" इति तत्फलमुक्तम् । "**प्रतिकूल**" इति चानुमानफलम् । तथाहि शब्दादिस्वरूपमुपलभ्य तज्जातीयस्य प्रतिकूलतामनुस्मृत्य तज्जातीयतयोपलभ्यमानस्य प्रतिकूलतामनुमिमीत(३) इति । उदाहरति—"**यथा दण्डेति**" । शेषमतिरोहितार्थम् । स्यादेतत् । भवन्तु प्रत्यक्षादीन्यविद्यावद्विषयाणि, शास्त्रं तु 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यादि न देहात्माध्यासेन प्रवर्तितुमर्हति । अत्र खल्वामुष्मिकफलोपभोगयोग्योऽधिकारी प्रतीयते । तथा च पारमर्ष सूत्रम्-'(४)शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्स्वयं प्रयोगे स्यादि'ति (अ० ३ पा० ७ सू० १८) । न च देहादि भस्मीभूतं पारलौकिकाय फलाय कल्पत इति देहाद्यतिरिक्तं कंचिदधिकारिणमाक्षिपति शास्त्रं, तदवगमश्च विद्येति कथमविद्यावद्विषयं शास्त्रमित्याशङ्क्याह—"**शास्त्रार्थे त्विति**" (पृ० ६०-पं० ११)। तुशब्दः प्रत्यक्षादिव्यवहाराद्विनक्ति शास्त्रीयम् । अधिकारशास्त्रं हि स्वर्गकामस्य पुंसः परलोकसम्बन्धं विना न निवर्हतीति तावन्मात्रमाक्षिपेत्, न त्वस्यासंसारित्वमपि तस्याधिकारेऽनुपयोगात् । प्रत्युतौपनिषदस्य पुरुषस्याकर्तुरभोक्तुराधिकारविरोधात् । (५)प्रयोक्ता हि कर्मणः कर्मजनितफलभोगभागी कर्मण्यधिकारी स्वामी भवति । तत्र कथमकर्ता प्रयोक्ता, कथं वाऽभोक्ता कर्मजनितफलभागभोगी । तस्मादनाद्यविद्यालब्धकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरमधिकृत्य विधिनिषेधशास्त्रं प्रवर्तते । एवं वेदान्ता अप्यविद्यावत्पुरुषविषया एव । नहि प्रमात्रादिविभागादृते तदर्थाधिगमः । ते त्वविद्यावन्तमनुशासन्तो निर्मृष्टनिखिलाविद्यमनुशिष्टं स्वरूपे व्यवस्थापयन्तीत्येतावानेषां विशेषः । तस्मादविद्यावत्पुरुषविषयाण्येव शास्त्राणीति सिद्धम् ।

स्यादेतत् । यद्यपि विरोधानुपयोगाभ्यामौपनीषदः पुरुषोऽधिकारे नापेक्ष्यते, तथाप्युपलि-

---

(१) अत्रायं प्रयोगः—विवेकिनोऽप्यध्यासवन्तः व्यवहारवत्त्वात् पश्वादिवदिति ।

(२) एतदेवेति । पश्वादिभिश्चाविशेषादिति वाक्यं विवृणोतीत्यर्थः ।

(३) अयं शब्दो मदिष्टसाधनमिष्टसाधनजातीयत्वात्, अयं चानिष्टसाधनं तत एवेति दार्ष्टान्ते, अयं दण्डो मदिष्टसाधनं दण्डत्वात् अनुभूतदण्डवत्, इदं तृणं मदनिष्टसाधनं अनुभूततृणजातीयत्वात् अनुभूततृणवदिति च दृष्टान्तेऽनुमानाकारो बोध्यः ।

(४) यस्मात्तल्लक्षणत्वाच्छब्दप्रमाणत्वाच्छास्त्रगम्यं फलं प्रयोक्तरि कर्तरि प्रतीयते तस्मात् साङ्गप्रधानकर्मणोनुष्ठाने यजमानः स्वयं प्रयोक्ता स्यादिति सूत्रार्थः ।

(५) प्रयोक्ता हीति । विशेषणसमर्पणेन भाष्योक्तानामज्ञानायायतीत्यादिपदसूचितानामकर्तृत्वाभोक्तृत्वानधिकारित्वानां वैपरीत्यं सूचितम् ।

षङ्योऽवगम्यमानः शक्नोत्यधिकारं(१) निरोद्धुम् । तथा च परस्परापहतार्थत्वेन कृत्स्न एव वेदः प्रामाण्यमपजह्यादित्यत आह **"प्राक् च तथाभूतात्मेति"** (पृ० ६१ पं० २)। सत्यमौपनिषदपुरुषाधिगमोऽधिकारविरोधी, तस्मात्तु पुरस्तात् कर्मविधयः स्वोचितं व्यवहारं निर्वर्तयन्तो नानुपजातेन ब्रह्मज्ञानेन शक्या निरोद्धुम् । न च (२)परस्परापहतिः, विद्याविद्यावत्पुरुषभेदेन व्यवस्थोपपत्तेः । यथा 'न हिंस्यात् सर्वा भूतानी'ति साध्यांशनिषेधेऽपि 'श्येनेनाभिचरन् यजेते'ति शास्त्रं प्रवर्तमानं न हिंस्यादित्यनेन न विरुध्यते, तत् कस्य हेतोः ? पुरुषभेदादिति । अवजितक्रोधारातयः पुरुषा निषेधेऽधिक्रियन्ते, क्रोधारातिवशीकृतास्तु श्येनादिशास्त्र इति । अविद्यावत्पुरुषविषयत्वं नातिवर्तत इति यदुक्तं तदेव स्फारयति **"तथाही"ति** । (३)वर्णाध्यासः राजा राजसूयेन यजेतेत्यादिः । आश्रमाध्यासः गृहस्थः सदृशीं भार्यां विन्देदित्यादिः । वयोध्यासः कृष्णकेशोऽग्नीनादधीतेत्यादिः । अवस्थाध्यासः अप्रतिसमाधेयव्याधीनां जलादिप्रवेशेन प्राणत्याग इति । आदिग्रहणं (४)महापातकोपपातकसङ्करीकरणापात्रीकरणमलिनीकरणाद्यध्यासोपसंग्रहार्थम् । तदेवमात्मानात्मनोः परस्पराध्यासमशेषानर्थनिदानमनुद्घाट्य प्रमाणप्रमेयव्यवहारप्रवर्तनेन च दृढीकृत्य तस्यानर्थहेतुतामुदाहरणप्रपञ्चेन प्रतिपादयितुं तत्स्वरूपमुक्तं स्मारयति **"अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचाम"** पृ० ६२ पं० १) । 'स्मृतिरूपः परत्र पूर्वदृष्टावभास' इत्यस्य संक्षेपाभिधानेमत्त् । (५)तत्र 'इमिति धर्मितादात्म्याध्यासमात्रं ममेत्यनुत्पादितधर्माध्यासं नानर्थहेतुरिति धर्माध्यासमेव ममकारं साक्षादशेषानर्थसंसारकारणमुदाहरणप्रपञ्चेनाह **"तद्यथा पुत्रभार्यादिष्वि"ति** । (६)देहतादात्म्यमात्मन्यध्यस्य देहधर्मं पुत्रकलत्रादिस्वाम्यं च कृशत्वादिवदारोप्याह **अहमेव विकलः सकल** इति । स्वस्य खलु साकल्येन स्वाम्यसाकल्यात् स्वामीश्वरः सकलः सम्पूर्णो भवति । तथा स्वस्य वैकल्येन स्वाम्यवैकल्यात् स्वामीश्वरः विकलोऽसम्पूर्णो भवति । बाह्यधर्मा ये वैकल्यादयः स्वाम्यप्रणालिकया संचारिताः शरीरे तानात्मन्यध्यस्यतीत्यर्थः । यदा च परोपाध्यपेक्षे देहधर्मे स्वाम्ये इयं गतिस्तदा कैव कथाऽनौपाधिकेषु देहधर्मेषु कृशत्वादिष्वित्याशयवानाह **"तथा देहधर्मानि"ति** । देहादेरप्यन्तरङ्गाणामिन्द्रियाणामभ्यस्तात्मभावानां धर्मान्मूकत्वादींस्ततोऽप्यन्तरङ्गस्यान्तःकरणस्याभ्यस्तात्मभावस्य धर्मान् कामसङ्कल्पादीन् आत्मन्यध्यस्यतीति योजना । तदनेन प्रपञ्चेन धर्मा-

---

(१) अधिकारमिति । कर्मणीति शेषः ।

(२) नन्वग्रे ब्रह्मज्ञानेन कर्मविधीना यदि बाधस्तदपि तेषामप्रामाण्य दुष्परिहरमेवेत्याशङ्क्यायामाह नच परस्परेति ।

(३) वर्णेति । तथाच 'राजा यजेत' इत्याद्यागमः राजन्यैरधिकरिणं वर्णाद्यभिमानिनमनुवदन्नध्यासं गमयतीति भावः ।

(४) महापातकेति । ब्रह्महत्यादि महापातकं, गोवधाद्युपपातकं, खराश्वादिवधो मंकरीकरणम्, निन्दितधनादानवाणिज्यशूद्रसेवाऽसत्यभाषणान्यपात्रीकरणं, कृम्यादिहत्या-मद्यपान-कलैधःपुष्पादिस्तेयाधैर्याणि मलिनीकरणं, विज्ञेयम् । अत्रादिपदेन जातिभ्रंशकरादिकं ग्राह्यम् ।

(५) धर्म्यध्यासस्याभ्यर्हितत्वात्प्रथमं वक्तव्यत्वेपि धर्माध्यासस्य पूर्वमभिधाने हेतुमाह तत्राहमित्यादिना ।

(६) गृहीतविवेकत्वात्पुत्रादीनामात्मनि तद्धर्माध्यासः कथमित्याशङ्क्याह देहतादात्म्यमिति ।

ध्यासमुत्क्त्वा तस्य मूलं धर्म्यध्यासमाह "**एवमहम्प्रत्ययिनम्**-अहंप्रत्ययो वृत्तिर्यस्मिन्नन्तःकरणादौ सोयमहंप्रत्ययी तं, **स्वप्रचारसाक्षिणि**-अन्तःकरणप्रचारसाक्षिणि (१)चैतन्योदासीनताभ्यां, **प्रत्यगात्मन्यध्यस्य**, तदनेन कर्तृत्वभोक्तृत्वे (२)उपपादिते । चैतन्यमुपपादयति **तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेण**-अन्तःकरणादिविपर्ययेण, अन्तःकरणाद्यचेतनं तस्य विपर्ययः चैतन्यं तेन, इत्थंभूतलक्षणे तृतीया । **अन्तःकरणादिष्वध्यस्यति**"(पृ० ६३ पं० ३) । (३)तदनेनान्तःकरणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदंरूपश्चेतनः कर्ता भोक्ता कार्यकरणाविद्याद्याधारोऽहंकारास्पदं संसारी सर्वानर्थसम्भारभाजनं जीवात्मा इतरेतराध्यासोपादानस्तदुपादानश्चाध्यास इत्यनादित्वाद्बीजाङ्कुरवन्नेतरेतराश्रयत्वमित्युक्तं भवति । प्रमाणप्रमेयव्यवहारदृढीकृतमपि शिष्यहिताय स्वरूपाभिधानपूर्वकं सर्वलोकप्रत्यक्षतयाऽध्यासं सुदृढीकरोति-"**एवमयमनादिरनन्तः**-तत्त्वज्ञानमन्तरेणाशक्यसमुच्छेदः । अनाद्यनन्तत्वे हेतुरुक्तो **नैसर्गिक**-इति । **मिथ्याप्रत्ययरूपः**" मिथ्याप्रत्ययानां रूपमनिर्वचनीयत्वं तद्यस्य स तथोक्तः, अनिर्वचनीय इत्यर्थः । (४)प्रकृतमुपसंहरति-"**अस्यानर्थहेतोः प्रहाणाय** (पृ० ६४ पं० १) विरोधिप्रत्ययं विना कुतोऽस्य प्रहाणमित्यत उक्तम्—**आत्मैकत्वविद्याप्रतिपत्तये**" । प्रतिपत्तिः प्राप्तिः तस्यै, न तु जपमात्राय, नापि कर्मसु प्रवृत्तये, आत्मैकत्वं विगलितनिखिलप्रपञ्चत्वमानन्दरूपस्य सतस्तत्प्रतिपत्तिं निर्विचिकित्सां भावयन्तो वेदान्ताः समूलघातमध्यासमुपघ्नन्ति । (५)एतदुक्तं भवति । अस्मत्प्रत्ययस्यात्मविषयस्य समीचीनत्वे सति ब्रह्मणो ज्ञातत्वान्निष्प्रयोजनत्वाच्च न जिज्ञासा स्यात् । तदभावे च न ब्रह्मज्ञानाय वेदान्ताः पठ्येरन् । अपि त्ववक्षितार्था जपमात्रे उपयुज्येरन् । नहि तदौपनिषदात्मप्रत्ययः प्रमाणतामश्नुते । न चासावप्रमाणमभ्यस्तोऽपि वास्तवं कर्तृत्वभोक्तृत्वाद्यात्मनोऽपनेतुमर्हति । आरोपितं हि रूपं तत्त्वज्ञानेनापनीयते, न तु वास्तवमतत्त्वज्ञानेन । नहि रज्ज्वा रज्जुत्वं सहस्रमपि सर्पधाराप्रत्यया अपनयितुं समुत्सहन्ते । मिथ्याज्ञानप्रसञ्जितं च स्वरूपं शक्यं तत्त्वज्ञानेनापनयितुम् । मिथ्याज्ञानसंस्कारश्च सुदृढोऽपि तत्त्वज्ञानसंस्कारेणादरनैरन्तर्यदीर्घकालतत्त्वज्ञानाभ्यासजन्मनेति । स्यादेतत् । प्राणाद्युपासना अपि वेदान्तेषु बहुलमुपलभ्यन्ते तत्कथं सर्वेषां वेदान्तानामात्मैकत्वप्रतिपादनमर्थ इयत आह—"**यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः**" (पृ० ६४ पं० २) । शरीरमेव शरीरकं तत्र निवासी शारीरको जीवात्मा, तस्य त्वंपदाभिधेयस्य तत्पदाभिधेयप-

---

(१) चैतन्योदासीनताभ्यामिति साक्षित्वे हेतूक्तिः ।

(२) उपपादिते इति । सक्रियोपाधेरात्मन्यारोपादात्मनि कर्तृत्वभोक्तृत्वे उपपादिते इत्यर्थः ।

(३) साक्षिणीति निर्देशात् शुद्धेऽध्यास इति भ्रमं निरस्यति तदनेनेति ।

(४) अध्यासं वर्णयतो भाष्यकारस्य बुद्धिस्थतया प्रकृतं विषयप्रयोजनमित्यर्थः ।

(५) एवमध्यासमाधनात् आक्षेपावसरोक्तस्य ब्रह्मणः प्रसिद्धत्वादजिज्ञास्यत्वस्य निरासो जात इत्याह एतदुक्तं भवतीत्यादिना ।

रमात्मरूपतामीमांसा या सा तथोक्ता । (१)एतावानत्रार्थसंक्षेपः । (२)यद्यपि च स्वाध्यायाध्ययनविधिना स्वाध्यायपदवाच्यस्य वेदराशेः फलवदर्थावबोधपरतामापादयता कर्मविधिनिषेधानामिव वेदान्तानामपि स्वाध्यायशब्दवाच्यानां फलवदर्थावबोधपरत्वमापादितं, यद्यपि च 'अविशिष्टस्तु वाक्यार्थ' इतिन्यायान्मन्त्राणामिव वेदान्तानामर्थपरत्वमौत्सर्गिकं, यद्यपि च वेदान्तेभ्यश्चैतन्यानन्दघनः कर्तृत्वभोक्तृत्वरहितो निष्प्रपञ्च एकः प्रत्यगात्माऽवगम्यते, (३)तथापि कर्तृत्वभोक्तृत्वदुःखशोकमोहमयमात्मानमवगाहमानेनाहंप्रत्ययेन सन्देहबाधविरहिणा विरुध्यमाना वेदान्ताः स्वार्थात्प्रच्युता उपचरितार्था वा जपमात्रोपयोगिनो वेत्यविवक्षितस्वार्थाः । तथा च तदर्थविचारात्मिका चतुर्लक्षणी शारीरकमीमांसा नारब्धव्या । न च सर्वजनीनाहमनुभवसिद्ध आत्मा सन्दिग्धो वा सप्रयोजनो वा, येन जिज्ञास्यः सन् विचारं प्रयुञ्जीतेति पूर्वः पक्षः ॥

(४)सिद्धान्तस्तु भवेदेतदेवं यद्यहंप्रत्ययः प्रमाणं, तस्य तूक्तेन क्रमेण श्रुत्यादिबाधकत्वानुपपत्तेः । श्रुत्यादिभिश्च समस्ततीर्थकरैश्च प्रामाण्यानभ्युपगमादध्यासत्वम् । एवं वेदान्ता नाविवक्षितार्था, नाप्युपचरितार्थाः, किन्तूक्तलक्षणाः । प्रत्यगात्मैव तेषां मुख्योऽर्थः । तस्य च वक्ष्यमाणेन क्रमेण संदिग्धत्वात्प्रयोजनवत्त्वाच्च युक्ता जिज्ञासा, इत्याशयवान्सूत्रकारः तज्जिज्ञासासूत्रमसूत्रयत्—

(सू०) अथातो ब्रह्मजिज्ञासा ॥ १ ॥

इति । जिज्ञासया संदेहप्रयोजने सूचयति । तत्र साक्षादिच्छाव्याप्यत्वाद्ब्रह्मज्ञानं कण्ठोक्तं प्रयोजनम् । न च कर्मज्ञानात्परांचीनमनुष्ठानमिव ब्रह्मज्ञानात्परांचीनं किञ्चिदस्ति, येनैतदवान्तरप्रयोजनं भवेत् । किंतु ब्रह्ममीमांसाख्यतर्केतिकर्तव्यतानुज्ञातविषयैर्वेदान्तैराहितं निर्विचिकित्सं(५) ब्रह्मज्ञानमेव समस्तदुःखोपशमरूपमानन्दैकरसं परमं प्रयोजनम्] तमर्थमधिकृत्य हि प्रेक्षावन्तः प्रवर्तन्तेतराम् । तच्च प्राप्तमप्यनाद्यविद्यावशादप्राप्तमिवेति प्रेप्सितं भवति । यथा स्वग्रीवागतमपि(६) ग्रैवेयकं कुतश्चिद्भ्रमान्नास्तीति मन्यमानः परेण प्रतिपादितमप्राप्तमिव प्राप्नोति । (७)जिज्ञासा तु संशयस्य कार्यमिति स्वकारणं संशयं सूचयति ।

---

(१) ब्रह्मजिज्ञासाख्यप्रथमाधिकरणस्य स्वरूपं प्रदर्शयन्नाह एतावानिति । अत्र च वेदान्तशास्त्रमनारभ्यमारभ्यं वेति विषयप्रयोजनासम्भवसम्भवाभ्यां संशयः । अध्ययनविधिना सामान्यतः प्रयोजनवदर्थबोधपरत्वं नीतैः विशेषतश्च संदिह्यमानार्थतया विचाराकाङ्क्षैर्वेदान्तैराक्षेपादस्याधिकरणस्य श्रुतिसङ्गतिः । समन्वयादिविचारहेतुत्वाच्छास्त्रप्रथमाध्यायप्रथमपादसङ्गतयः ।

(२) पूर्वपक्षे सिद्धान्त्याशङ्कानयमाह यद्यपीति । अध्ययनविधेर्दृष्टार्थत्वस्य तुल्यत्वात्[१]लोकवेदयोर्वाक्यार्थस्याविशेषात् सिद्धरूपे ब्रह्मण्यपि देवतादौ मन्त्राणामिव प्रामाण्यसम्भवात्[२] ब्रह्मात्मैक्यबोधकत्वादनुत्पत्तिलक्षणाप्रामाण्यस्यासम्भवाच्च[३] आरभ्यमेव वेदान्तशास्त्रमित्याशङ्कार्थः ।

(३) शङ्कां निराकृत्यानारभ्यत्वपूर्वपक्षं स्थापयति तथापीति । प्रमाणप्रमेयस्वरूपपर्यालोचनया मीमांसाऽनारभ्येति पूर्वपक्षतात्पर्यम् ।

(४) सिद्धान्तमाह सिद्धान्तस्त्विति । वक्ष्यमाणेन—तत्पुनर्ब्रह्मेत्यत्र ग्रन्थे इत्यर्थः ।

(५) निर्विचिकित्सं—सन्देहरहितम् ।

(६) ग्रैवेयकं कण्ठभूषणम् , प्रतिपादितं बोधितम् ।

(७) इष्यमाणत्वेन ज्ञानस्य प्रयोजनसूचनमुपपाद्य संशयसूचनमुपपादयति जिज्ञासा त्विति ।

संशयश्च मीमांसारम्भं प्रयोजयति । तथा च शास्त्रे प्रेक्षावत्प्रवृत्तिहेतुसंशयप्रयोजनसूचनाद् युक्तमस्य सूत्रस्य शास्त्रादित्वमित्याह भगवान् भाष्यकारः—**"वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्य"** अस्माभिः **"इदमादिमं सूत्रम्"** (पृ०६५पं३) पूजितविचारवचनो मीमांसाशब्दः । परमपुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफलता विचारस्य पूजितता । तस्या मीमांसायाः शास्त्रम् , सा ह्यनेन शिष्यते शिष्येभ्यो यथावत्प्रतिपाद्यत इति । सूत्रं च (१)बह्वर्थसूचनाद्भवति । यथाहुः—

(२)लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च ।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥ इति ।

तदेवं सूत्रतात्पर्यं व्याख्याय तस्य प्रथमपदमथेति व्याचष्टे **"तत्राथशब्द आनन्तर्यार्थः परिगृह्यते"** (पृ० ६६ पं० १) । तेषु सूत्रपदेषु मध्ये योऽयमथशब्दः स आनन्तर्यार्थ इति योजना । नन्वधिकारार्थोऽप्यथशब्दो दृश्यते, यथा 'अथैष ज्योति'रिति वेदे, यथा वा लोके 'अथ शब्दानुशासनम्' 'अथ योगानुशासनम्' इति । तत्किमत्राधिकारार्थो न गृह्यत इत्यत आह **"नाधिकारार्थः"** । कुतः ? **"ब्रह्मजिज्ञासाया अनधिकार्यत्वात्"** । जिज्ञासा तावदिह सूत्रे ब्रह्मणश्च तत्प्रज्ञानाच्च शब्दतः प्रधानं(३) प्रतीयते । (४)न च यथा 'दण्डी प्रैषानन्वाहे'त्यत्राप्रधानमपि दण्डशब्दार्थो विवक्ष्यते, एवमिहापि ब्रह्मतज्ज्ञाने इति युक्तम् , ब्रह्ममीमांसाशास्त्रप्रवृत्त्यङ्गसंशयप्रयोजनसूचनार्थत्वेन जिज्ञासाया एव विवक्षितत्वात् । तदविवक्षायां तदसूचनेन काकदन्तपरीक्षायामिव ब्रह्ममीमांसायां न प्रेक्षावन्तः प्रवर्तेरन् । नहि तदानीं ब्रह्म वा तज्ज्ञानं वाऽभिधेयप्रयोजने भवितुमर्हतः, अनध्यस्ताहंप्रत्ययविरोधेन वेदान्तानामेवंविधेऽर्थे प्रामाण्यानुपपत्तेः । कर्मप्रवृत्त्युपयोगितयोपचरितार्थानां वा जपोपयोगिनां वा 'हुमि'त्येवमादीनामविवक्षितार्थानामपि स्वाध्यायाध्ययनविध्यधीनग्रहणत्वस्य संभवात् । तस्मात्सन्देहप्रयोजनसूचनी जिज्ञासा इह पदतो वाक्यतश्च प्रधानं विवक्षितव्या । न च तस्या अधिकार्यत्वम्, अप्रस्तूयमानत्वात्(५), येन तत्समभिव्याहृतोऽथशब्दोऽधिकारार्थः स्यात् । जिज्ञासाविशेषणं तु ब्रह्म तज्ज्ञानमधिकार्यं भवेत् । न च तदप्यथशब्देन संबध्यते, प्राधान्याभावात् । न च जिज्ञासा मीमांसा, येन योगानुशासनवदधिक्रियेत । नान्तत्वं निपात्य 'माङ् मान' इत्यस्माद्वा 'मान पूजायामि'त्यस्माद्वा धातो 'र्मानूबधे'त्या-

---

(१) विषयप्रयोजनब्रह्मस्वरूपप्रमाणयुक्तिसाधनफलविचाराणां प्रतिज्ञानाद्बह्वर्थसूचनता सूत्राणां बोध्या ।

(२) अत्रासंदिग्धार्थत्वं लघुत्वम् , शास्त्रियस्य नानार्थस्फोरकत्वेन गुरुत्वात् ।

(३) प्रधानमिति । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधजनकत्वनियमात् ब्रह्मज्ञानविषयिणोच्चैव प्रधानमित्यर्थः ।

(४) ननु जिज्ञासायाः शास्त्रेणाप्रतिपाद्यमानत्वात्तत्प्रतिपादनप्रारम्भार्थो माभूत् ब्रह्मतज्ज्ञानप्रारम्भार्थस्तु स्यादित्याशङ्क्याह नचेति । 'दण्डी प्रैषानन्वाह' इत्यत्र 'मैत्रावरुणः प्रैष्यति चान्वाह' इति मन्त्रेण प्रैषानुवचने मैत्रावरुणस्य प्राप्तत्वेन दण्डस्याप्रधानस्यापि विवक्षा युक्ता, अत्र तु जिज्ञासाया अविवक्षायां विषयप्रयोजनसूचनं न स्यादित्यविवक्षाकारणाभावात्तदर्थ एवारम्भो युक्त इति परिहारार्थः ।

(५) प्रत्यधिकरणमप्रतिपाद्यमानत्वात् ।

दिनाऽनिच्छार्थे सनि व्युत्पादितस्य मीमांसाशब्दस्य पूजितविचारवचनत्वात्(१)। ज्ञानेच्छावाचकत्वाज्जिज्ञासापदस्य प्रवर्तिका हि मीमांसायां जिज्ञासा स्यात्। न च प्रवर्त्यप्रवर्त्तकयोरैक्यम्, एकत्वे तद्भावानुपपत्तेः। (२)न च स्वार्थपरत्वस्योपपत्तौ सत्यामन्यार्थपरत्वकल्पना युक्ता, अतिप्रसङ्गात्। तस्मात्सुष्ठूक्तं जिज्ञासाया अनधिकार्यत्वादिति॥ अथ मङ्गलार्थोऽथशब्दः कस्मान्न भवति? तथा च मङ्गलहेतुत्वात्प्रत्यहं ब्रह्मजिज्ञासा कर्तव्येति सूत्रार्थः संपद्यत इत्यत आह **"मङ्गलस्य च वाक्यार्थे समन्वयाभावात्"**। पदार्थ एव हि वाक्यार्थे समन्वीयते, स च वाच्यो वा लक्ष्यो वा। न चेह मङ्गलमथशब्दस्य वाच्यं वा लक्ष्यं वा, किन्तु मृदङ्गशङ्खध्वनिवदथशब्दश्रवणमात्रकार्यम्। न च कार्यज्ञाप्ययोर्वाक्यार्थे समन्वयः शब्दव्यवहारे दृष्ट इत्यर्थः॥ तत्किमिदानीं मङ्गलार्थोऽथशब्दस्तेषु तेषु न प्रयोक्तव्यः। तथा च

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥

इति स्मृतिव्याकोप इत्यत आह **"अर्थान्तरप्रयुक्त एवह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति"**। अर्थान्तरेषु आनन्तर्यादिषु प्रयुक्तोऽथशब्दः श्रुत्या श्रवणमात्रेण वेणुवीणाध्वनिवद् मङ्गलं कुर्वन्मङ्गलप्रयोजनो भवति, अन्यार्थमानीयमानोदकुम्भदर्शनवत्। तेन न स्मृतिव्याकोपः। न चेहानन्तर्यार्थस्य सतो न श्रवणमात्रेण मङ्गलार्थतेत्यर्थः। स्यादेतत् पूर्वप्रकृतापेक्षोऽथशब्दो भविष्यति विनैवानन्तर्यार्थत्वम्, तद्यथेममेवाथशब्दं प्रकृत्य विमृश्यते–किमयमथशब्द आनन्तर्येऽधिकारे–इति, अत्र विमर्शवाक्येऽथशब्दः पूर्वप्रकृतमथशब्दमपेक्ष्य प्रथमपक्षोपन्यासपूर्वकं पक्षान्तरोपन्यासे, न चास्यानन्तर्यमर्थः, पूर्वप्रकृतस्य प्रथमपक्षोपन्यासेन व्यवायात्, न च प्रकृतानपेक्षा, तदनपेक्षस्य तद्विषयत्वाभावेनासमानविषयतया विकल्पानुपपत्तेः, नहि जातु भवति किं नित्य आत्मा, अथानित्या बुद्धिरिति, तस्मादानन्तर्यं विना पूर्वप्रकृतापेक्ष इहाथशब्दः कस्मान्न भवतीत्यत आह– **"पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात्"** (पृ०६८पं० १)। (३)अस्यार्थः न वयमानन्तर्यार्थतां व्यसनितया रोचयामहे, किन्तु ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धये। सा च पूर्वप्रकृतार्थापेक्षत्वेऽप्यथशब्दस्य सिध्यतीति व्यर्थं आनन्तर्यार्थत्वावधारणाग्रहोऽस्माकमिति। तदिदमुक्तं "फलत" इति। (४)परमार्थतस्तु कल्पान्तरोपन्यासे पूर्वप्रकृतापेक्षा, न चेह कल्पान्तरोपन्यास इति पारिशेष्यादानन्तर्यार्थ एवेति युक्तम्। भवत्वानन्तर्यार्थः किमेवं सतीत्यत आह–**"सति चानन्तर्यार्थत्व"** इति (पृ० ७० पं०१) न तावदस्य कस्यचिदत्रानन्तर्यमिति वक्तव्यं, तस्याभिधानमन्तरेणापि प्राप्तत्वात्। अवश्यं

---

(१) 'मानबधदानज्ञानक्ष्नो दीर्घश्चाभ्यासस्य' (पा० ३।१।६) सूत्रेणाऽनुबन्धस्य मान्धातोर्नान्तत्वं निपातितम्, तस्य च पूजितविचारार्थकत्वं प्रसिद्धिबलादास्थेयम् इति भावः।

(२) लक्षितविचारप्रारम्भार्थोऽथशब्दो भवत्वित्याशङ्कायामाह—न च स्वार्थेति।

(३) अनेन भाष्येण पूर्वप्रकृतापेक्षाया आनन्तर्यरूपत्वं नोच्यते, आनन्तर्यरूपत्वपक्षे विकल्पाप्रतिभानात्, किन्तूभयत्रापि ब्रह्मजिज्ञासाहेतुभूतप्रकृतसिद्धिरस्ति प्रयोजनमतः फलद्वारेणाव्यतिरेक इत्युच्यत इत्याह अस्यार्थ इति।

(४) ननूभयथा फलाभेदो यदि तर्हि आनन्तर्याग्रहो व्यर्थ इत्यत आह परमार्थतस्त्विति।

हि पुरुषः किंचित्कृत्वा किंचित्करोति । न चानन्तर्यमात्रस्य दृष्टमदृष्टं वा प्रयोजनं पश्यामः तस्मात्तस्यात्रानन्तर्यं वक्तव्यं यद्विना ब्रह्मजिज्ञासा न भवति, यस्मिन् सति तु भवन्ती भवत्येव, तदिदमुक्तम् "यत्पूर्ववृत्तं नियमेनापेक्षत" इति । स्यादेतत् । धर्मजिज्ञासाया इव ब्रह्मजिज्ञासाया अपि योग्यत्वात्स्वाध्यायानन्तर्यं(१), धर्मवद्ब्रह्मणोऽप्याम्नायैकप्रमाणगम्यत्वात्, तस्य चागृहीतस्य स्वविषये विज्ञानाजननाद्, ग्रहणस्य च स्वाध्यायोऽध्येतव्य इत्यध्ययनेनैव नियतत्वात्, तस्माद् वेदाध्ययनानन्तर्यमेव ब्रह्मजिज्ञासाया अप्यर्थशब्दार्थ इत्यत आह "स्वाध्यायानन्तर्यं तु समानं" धर्मब्रह्मजिज्ञासयोः । अत्र च स्वाध्यायेन विषयेण तद्विषयमध्ययनं लक्षयति, तथा चा'थातो धर्मजिज्ञासे'त्यनेनैव गतमिति नेदं सूत्रमारब्धव्यम् । धर्मशब्दस्य वेदार्थमात्रोपलक्षणतया धर्मवद्ब्रह्मणोपि वेदार्थत्वाविशेषेण वेदाध्ययनानन्तर्योपदेशसाम्यादित्यर्थः(२) ॥

चोदयति "नन्विह कर्मावबोधानन्तर्यं विशेषो" धर्मजिज्ञासातो ब्रह्मजिज्ञासायाः । अस्यार्थः 'विविदिषन्ति यज्ञेने'ति तृतीयाश्रुत्या यज्ञादीनामङ्गत्वेन ब्रह्मज्ञाने विनियोगात्, (३)ज्ञानस्यैव कर्मतयेच्छां प्रति प्राधान्यात्, प्रधानसंबन्धाच्चाप्रधानानां पदार्थान्तराणाम् । तत्रापि च न वाक्यार्थज्ञानोत्पत्तावङ्गभावो यज्ञादीनां, वाक्यार्थज्ञानस्य वाक्यादेवोत्पत्तेः । न च वाक्यं सहकारितया कर्माण्यपेक्षत इति युक्तम् । अकृतकर्मणामपि विदितपदतदर्थसंगतीनां (४)समधिगतशाब्दन्यायतत्त्वानां गुणप्रधानभूतपूर्वापरपदार्थाकाङ्क्षासंनिधियोग्यतानुसन्धानवतामप्रत्यूहं वाक्यार्थप्रत्ययोत्पत्तेः । (५)अनुत्पत्तौ वा विधिनिषेधवाक्यार्थप्रत्ययाभावेन तदर्थानुष्ठानपरिवर्जनाभावप्रसङ्गः । (६)तद्बोधतस्तु तदर्थानुष्ठानपरिवर्जने परस्पराश्रयः–तस्मिन् सति तदर्थानुष्ठानपरिवर्जनं ततश्च तद्बोध–इति । न च वेदान्तवाक्यानामेव स्वार्थप्रत्यायने कर्मापेक्षा, न वाक्यान्तराणामिति सांप्रतम् । विशेषहेतोरभावात् । (७)'तत्त्वमसी'तिवाक्यात् त्वंपदार्थस्य कर्तृभोक्तृरूपस्य जीवात्मनो नित्यशुद्धबुद्धोदासीनस्वभावेन तत्पदार्थेन परमात्मनैक्यमशक्यं द्रागित्येव प्रतिपत्तुम्, आपाततोऽशुद्धसत्त्वैर्योग्यताविरहनिश्चयात् । यज्ञतपोदानतनूकृतान्तर्मलास्तु विशुद्धसत्त्वाः श्रद्दधाना योग्यतावगमपुरःसरं तादात्म्यमवगमिष्यन्तीति चेत् । (८)तत्किमिदानीं प्रमाणकारणं योग्यतावधारणमप्रमाणात्कर्मणो

(१) अत्र स्वाध्यायशब्देन लक्षणया स्वाध्यायाध्ययनं ग्राह्यं स्वाध्यायस्य नित्यत्वात्तथाच स्वाध्यायाध्ययनानन्तरं ब्रह्मजिज्ञासाया भवितुं शक्यत्वात्तदानन्तर्यमथशब्देनाभिधानार्हमिति भावः ।

(२) अनेन धर्मजिज्ञासासूत्रे ब्रह्मानुपादानात्कथं तेन गतार्थतेति शङ्का परास्ता ।

(३) ननु यज्ञादीनामङ्गत्वेन ब्रह्मजिज्ञासायां विनियोगो न ज्ञाने इत्यत्राह ज्ञानस्यैवेति । अर्थः प्राधान्यात् ज्ञानस्य तत्रैव विनियोग इत्यर्थः ।

(४) ज्ञातव्याकरणशास्त्राणाम् ।

(५) अकृतकर्मणां वाक्यार्थप्रतीत्यनुत्पादे ।

(६) तद्बोधतः– विधिविहितकर्मादिबोधतः ।

(७) विशेषहेतुस्वभावोऽसिद्ध इत्याशंकते तत्त्वमसीति ।

(८) अभेदज्ञानहेतुभूतयोग्यतावधारणे किं कर्मप्रमाणं सदुपयुज्यते प्रमाणरूपं वेति विकल्प्य निरस्यति तत्किमिति । प्रमाणं कारणं यस्य तादृशं योग्यतावधारणमप्रमाणात्कर्मणो प्रमाणकार्योत्पादकव्यापाराभ्यां संभवतीत्यर्थः ।

वक्तुमध्यवसितोऽसि, (१)प्रत्यक्षाद्यतिरिक्तं वा कर्मापि प्रमाणम्। वेदान्ताविरुद्धतन्मूलन्यायबलेन तु योग्यतावधारणे कृतं कर्मभिः। तस्मात् 'तत्त्वमसी'त्यादेः श्रुतमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा तन्मूलया चोपपत्त्या व्यवस्थाप्य तदुपासनायां भावनापराभिधानायां दीर्घकालनैरन्तर्यवत्यां ब्रह्मसाक्षात्कारफलायां यज्ञादीनामुपयोगः(२)। यथाहुः—'स (३)तु दीर्घकालादरनैरन्तर्यसत्कारासेवितो दृढभूमि'रिति। ब्रह्मचर्यतपःश्रद्धायज्ञादयश्च सत्कारः। अत एव श्रुतिः 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण' इति। विज्ञाय तर्कोपकरणेन शब्देन प्रज्ञां भावनां कुर्वीतेत्यर्थः। अत्र च यज्ञादीनां श्रेयःपरिपन्थिकल्मषनिबर्हणद्वारेणोपयोग इति केचित्। पुरुषसंस्कारद्वारेणेत्यन्ये। यज्ञादिसंस्कृतो हि पुरुष आदरनैरन्तर्यदीर्घकालैरासेवमानो (४)ब्रह्मभावनामनाद्यविद्यावासनां समूलकाषं कषति। ततोऽस्य प्रत्यगात्मा सुप्रसन्नः केवलो विशदीभवति। अत एव स्मृतिः—

'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः'।
'यस्यैते ऽष्टाचत्वारिंशत्संस्कारा' इति च॥

अपरे तु ऋणत्रयापाकरणेन ब्रह्मज्ञानोपयोगं कर्मणामाहुः। अस्ति हि स्मृतिः—

'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेदि'ति॥

(५)अन्ये तु 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेने'त्यादिश्रुतिभ्यस्तत्तत्फलाय चोदितानामपि कर्मणां सयोगपृथक्त्वेन ब्रह्मभावनां प्रत्यङ्गभावमाचक्षते, (६)कृत्वर्थस्येव खादिरत्वस्य वीर्यार्थताम्, 'एकस्य तूभयार्थत्वे सयोगपृथक्त्व'मिति न्यायात्। अत एव पारमर्षं सूत्रम् 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदि'ति (ब्र० अ० ३ पा० ४ सू० २६)। यज्ञतपोदानादि सर्वं, तदपेक्षा ब्रह्मभावनेत्यर्थः। तस्माद्यदि श्रुत्यादयः प्रमाणं यदि वा पारमर्षं सूत्रं सर्वथा यज्ञादिकर्मसमुच्चिता ब्रह्मोपासना (७)विशेषणत्रयवत्यनाद्यविद्यातद्वासनासमुच्छेदक्रमेण ब्रह्मसाक्षात्काराय मोक्षापरनाम्ने कल्पत इति तदर्थं कर्माण्यनुष्ठेयानि। (८)न चैतानि

---

(१) द्वितीयं निरस्यन्नाह प्रत्यक्षादीति। प्रमाणं वक्तुमध्यवसितोसीत्यनुषङ्गः। कर्मणः प्रमाणत्वाप्रसिध्या तत्र युक्तमित्यर्थः।

(२) एतेन कर्मावबोधस्य ब्रह्मज्ञाने साक्षात् उपयोग इति वदन्तः परास्ताः।

(३) सः चित्तवृत्तिनिरोधः दीर्घकालादिभिरासेवितो तत्त्वप्रतिपत्तौ दृढ उपाय इति सूत्रार्थः।

(४) ब्रह्मभावनामासेवमानोऽनाद्यविद्यावासनां समूलकाषं कषतीत्यन्वयः। समूलमुच्छिनत्तीत्यर्थः।

(५) विनियोगवचनबलेन सर्वकर्मणामुत्पत्तिविधिविहितरूपमुपादाय भावनाङ्गतेति वादिनां मतमाह अन्ये त्विति।

(६) 'खादिरे पशुं बध्नाति' 'खादिरं वीर्यकामस्य यूपं कुर्वीत' इति श्रुतस्य खादिरत्वस्यैकस्यैव कृत्वर्थत्वं पुरुषार्थत्वं च यथा पूर्वमीमांसायामवधारितं, तथैकस्यैव कर्मणः तत्तत्फलार्थत्वं ब्रह्मभावनाङ्गत्वं चेत्युभयार्थत्वं स्यादित्यर्थः।

(७) विशेषणेति। आदरनैरन्तर्यदीर्घकालत्वरूपविशेषणत्रयवतीत्यर्थः।

(८) कर्मापेक्षत्वेन ब्रह्मभावनायास्तदवबोधापेक्षामुपपादयन् कर्मावबोधानन्तर्यमिति भाष्यं संगमयति नचेति। दृष्टस्तुषविमोकादिरदृष्टः प्रोक्षणादिजः यः सामवायिकः क्रतुरूपसमवायी आरादूरे फलापूर्वसिद्ध्युपकारश्च तस्य हेतुभूतान्यौपदेशिकानि प्रत्यक्षविहितानि आतिदेशिकानि प्रकृतेर्विकृतावतिदेशप्राप्तानि क्रमपर्यन्तानि क्रमिकाणि यान्यङ्गानि तेषां ग्रामः समूहस्तत्सहितं यत्परस्परावाभिन्नं कर्मस्वरूपं तदधिकारिविशेषश्च तयोर्ज्ञानं विना कर्माण्यनुष्ठातुं न शक्यानीत्यन्वयः।

दृष्टादृष्टसामवायिकारादुपकारहेतुभूतौपदेशिकातिदेशिककमपर्यन्ताङ्गग्रामसहितपरस्परविभिन्नकर्मस्वरूपतदधिकारिभेदपरिज्ञानं विना शक्यान्यनुष्ठातुम् । न च धर्ममीमांसापरिशीलनं विना तत्परिज्ञानम् । तस्मात्साधूक्तं 'कर्मावबोधानन्तर्यं विशेष' इति । कर्मावबोधेन हि कर्मानुष्ठानसाहित्यं भवति ब्रह्मोपासनाया इत्यर्थः । तदेतन्निराकरोति "न" । कुतः ? "**कर्मावबोधात्प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः**" (पृ० ७१ पं० १) । इदमत्राकूतम् । ब्रह्मोपासनया भावनापराभिधानया कर्माण्यपेक्ष्यन्त इत्युक्त, तत्र ब्रूमः-क्व पुनरस्याः कर्मापेक्षा ? किं कार्ये यथाऽऽग्नेयादीनां परमापूर्वे चरमभाविफलानुकूले जनयितव्ये समिदाद्यपेक्षा, स्वरूपे वा यथा तेषामेव (१)द्विरवत्तपुरोडाशादिद्रव्याग्नेयदेवताद्यपेक्षा । न तावत्कार्ये, तस्य विकल्पासहत्वात् । तथाहि ब्रह्मोपासनाया ब्रह्मस्वरूपसाक्षात्कारः कार्यमभ्युपेयः, स चोत्पाद्यो वा स्याद्, यथा संयवनस्य पिण्डः । विकार्यो वा, यथाऽवघातस्य व्रीहयः । संस्कार्यो वा, यथा प्रोक्षणस्योलूखलादयः । प्राप्यो वा, यथा दोहनस्य पयः । न तावदुत्पाद्यः, न खलु घटादिसाक्षात्कार इव जडस्वभावेभ्यो घटादिभ्यो भिन्न इन्द्रियाद्याधेयो ब्रह्मसाक्षात्कारो भावनाधेयः संभवति, ब्रह्मणोऽपरोक्षनिप्रकाशतया तत्साक्षात्कारस्य तत्स्वभाव्येन नित्यतयोत्पाद्यत्वा(२)नुपपत्तेः । ततो भिन्नस्य वा भावनाधेयस्य साक्षात्कारस्य प्रतिभाप्रत्ययवत्संशयाक्रान्ततया प्रामाण्यायोगात्(३), तद्विधस्य तत्सामग्रीकस्यैव बहुलं व्यभिचारोपलब्धेः । न खल्वनुमानविबुद्धं वह्निं भावयतः शीतातुरस्य शिशिरभरमन्थरतरकायकाण्डस्य स्फुरज्ज्वालाजटिलानलसाक्षात्कारः प्रमाणान्तरेण संवाद्यते, विसंवादस्य बहुलमुपलम्भात्, तस्मात्प्रामाणिकसाक्षात्कारलक्षणकार्याभावान्नोपासनाया उत्पाद्ये कर्मापेक्षा । (४)न च कूटस्थनित्यस्य सर्वव्यापिनो ब्रह्मण उपासनातो विकारसंस्कारप्राप्तयः संभवन्ति ।

(५)स्यादेतत् । मा भूद्ब्रह्मसाक्षात्कार उत्पाद्याद्यरूप उपासनायाः, संस्कार्यस्त्वनिर्वचनीयानाद्यविद्यात्रयपिधानापनयनेन भविष्यति, (६)प्रतिसीरापिहिता नर्तकीव प्रतिसीरापनयद्वारा रङ्गव्यापृतेन(७) । तत्र च कर्मणामुपयोगः । एतावांस्तु विशेषः-प्रतिसीरापनये पारिषदानां नर्तकीविषयसाक्षात्कारो भवति, इह तु अविद्यापिधानापनयमात्रमेव नापरमुत्पाद्यमस्ति, ब्रह्मसाक्षात्कारस्य ब्रह्मस्वभावस्य नित्यत्वेनानुत्पाद्यत्वात् ।

अत्रोच्यते । का पुनरियं ब्रह्मोपासना ? किं शाब्दज्ञानमात्रसन्ततिराहो निर्विचिकित्स

---

(१) द्विरवत्तेति । यथा आग्नेययागः स्वोत्पत्तये द्रव्यदानं जुहातीति वाक्याद्द्विर्हविषोऽवद्यतीति विहितं द्विरवत्तपुरोडाशमपेक्षते, तथा ब्रह्मोपासना स्वोत्पत्तये कर्माण्यपेक्षते किमिति प्रश्नार्थः ।

(२) तथाच भावनासाध्ये साक्षात्कारे यदि कर्मापेक्षा स्यात्तर्हि तस्य ब्रह्मस्वरूपता न स्यात् ब्रह्मणो नित्यत्वादिति भावः ।

(३) साक्षात्कारस्य ब्रह्मस्वरूपाद्भेदे ब्रह्म जडं भवेत्, तच्च नेन्द्रियगोचरं शब्दश्चापत्यक्षप्रमाहेतुरिति केवलभावनाजन्यः साक्षात्कारो प्रमा न भवेदिति भावः ।

(४) पक्षत्रयं युगपन्निरस्यन्नाह न च कूटस्थेति । कूटस्थनित्यतया पूर्वरूपापायलक्षणो विकारोऽभिनवगुणोदयरूपसंस्कारश्च न सम्भवतः, सर्वव्यापितया प्राप्तिपक्षोपि न सम्भवतीति भावः ।

(५) ब्रह्मसाक्षात्कारस्य संस्कार्यत्ववादी आक्षिपति स्यादेतदिति । अत्र कूटस्थनित्यत्वाविरुद्धोऽविद्यात्रयरूपदोषविघात एव संस्कारो ग्राह्यः ।

(६) प्रतिसीरा जवनिका तिरस्करिणीत्यर्थः । (७) नटेनेत्यर्थः ।

शाब्दज्ञानसन्ततिः ? यदि शाब्दज्ञानमात्रसन्ततिः, किमियमभ्यस्यमानाप्यविद्यां समुच्छेत्तुमर्हति । तत्त्वविनिश्चयस्तदभ्यासो वा सवासनं विपर्यासमुन्मूलयेत्, न संशयाभ्यासः, सामान्यमात्रदर्शनाभ्यासो वा । नहि स्थाणुर्वा पुरुषो वेति वाऽऽरोहपरिणाहवद् द्रव्यमिति वा शतशोऽपि ज्ञानमभ्यस्यमानं पुरुष एवेति निश्चयाय पर्याप्तमृते विशेषदर्शनात् । (१)ननूक्तं-श्रुतमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा युक्तिमयेन च व्यवस्थाप्यत इति । तस्मान्निर्विचिकित्सशाब्दज्ञानसन्ततिरूपोपासना कर्मसहकारिण्यविद्याद्वयोच्छेदहेतुः । (२)न चासावनुत्पादितब्रह्मानुभवा तदुच्छेदाय पर्याप्ता । साक्षात्काररूपो हि विपर्यासः साक्षात्काररूपेणैव तत्त्वज्ञानेनोच्छिद्यते न तु परोक्षावभासेन,(३)दिङ्मोहालातचक्रचलद्वृक्षमरुमरीचिसलिलादिविभ्रमेष्वपरोक्षावभासिषु अपरोक्षावभासिभिरेव दिगादितत्त्वप्रत्ययैर्निवृत्तिदर्शनात्, नो खल्वाप्तवचनलिङ्गादिनिश्चितदिगादितत्त्वानां दिङ्मोहादयो निवर्तन्ते । तस्मात् त्वम्पदार्थस्य तत्पदार्थत्वेन साक्षात्कार एषितव्यः । एतावता हि त्वम्पदार्थस्य दुःखिशोकित्वादिसाक्षात्कारनिवृत्तिर्नान्यथा । (४)न चैष साक्षात्कारो मीमांसासहितस्यापि शब्दस्य प्रमाणस्य फलम्, अपि तु प्रत्यक्षस्य तस्यैव तत्फलत्वनियमात्, अन्यथा कुटजबीजादपि वटाङ्कुरोत्पत्तिप्रसङ्गात् । तस्मान्निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितमन्तःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतामनुभावयतीति युक्तम् । (५)न चायमनुभवो ब्रह्मस्वभावो येन न जन्येत, अपि त्वन्तःकरणस्यैव वृत्तिभेदो ब्रह्मविषयः । (६)न चैतावता ब्रह्मणो नापराधीनप्रकाशता । नहि शाब्दज्ञानप्रकाश्यं ब्रह्म स्वयंप्रकाशं न भवति । सर्वोपाधिरहितं हि स्वयंज्योतिरिति गीयते, न तूपहितमपि । यथाह स्म भगवान् भाष्यकारः-'नायमेकान्तेनाविषय' इति । (७)न चान्तःकरणवृत्तावप्यस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः, तस्यैव तदुपाधेर्विनश्यदवस्थस्य स्वपरोपाधिविरोधिनो विद्यमानत्वात्, (८)अन्यथा चैतन्यच्छायापत्तिं विना-

---

(१) आपातज्ञानाभ्यासरूपोपासनापक्षं निराकृत्य निश्चयाभ्यासरूपोपासनापक्षमाशङ्कते नन्विति ।

(२) ननूपासनैवाविद्याविरोधिनी भवतु किं कर्मोपयोगिना साक्षात्कारेणाकिंचित्करेणेत्यत्राह नचेति ।

(३) प्रत्यक्षप्रमाया एव प्रत्यक्षभ्रमनिवर्तकत्वे दृष्टान्तमाह दिङ्मोहेति ।

(४) नचैष इति । इदमत्र तात्पर्यम् । स्वतोऽपरोक्षस्यापि ब्रह्मणः पारोक्ष्यं भ्रमेण गृह्यते तत्रापरोक्षकरणादेव तत्साक्षात्कारः, अन्तःकरणं च सोपाधिके आत्मनि अहं वृत्तिं जनयतीति सिद्धमस्यात्मन्यपरोक्षधीकारणत्वम् । तच्च शब्दजनितब्रह्मात्मैक्यधीसंततिवासितं तत्पदलक्ष्यब्रह्मात्मतां जीवस्य साक्षात्कारयति अक्षमिव पूर्वानुभवसंस्कारवासितं तत्तेदन्तोपलक्षितैक्यविषयप्रत्यभिज्ञाहेतुरिति ।

(५) स्वरूपप्रकाशस्याभिव्यक्तिसंस्कारमुपपाद्य व्यङ्ग्यकान्तःकरणवृत्तेरुत्पाद्यतामाह नचेति ।

(६) नचैतावता—उक्तानुभवस्य ब्रह्मविषयत्वेऽपि, स्वप्रकाशस्यैव शाब्दज्ञानविषयत्वं त्वयाप्यभिमतमित्यर्थः ।

(७) ननु निरुपाधिब्रह्मणः साक्षात्कारविषयत्वात्कथमुपहिततेत्यत्राह न चान्तःकरणेति । ब्रह्म निरुपाधीति विषयिणी वृत्तिः स्वस्वेतरोपाधिनिवृत्तिहेतुरुदेति स्वस्या अप्युपाधित्वाविशेषात्, ततः स्वसत्तायां विनाशहेतुसन्निधानेनश्यदवस्थत्वम् । एवं च नानुपहितस्य विषयता, न चोपाधेर्निवर्तकान्तरापेक्षेति भावः ।

(८) नन्वेवं तर्हि उपाधिसम्बन्धाद्विषयत्वं विषयत्वे चोपाधिसम्बन्धो विषयविषयित्वलक्षण इत्यन्योन्याश्रय इत्यत आह अन्यथेति । ब्रह्मसाक्षात्कारस्य ब्रह्मविषयत्वप्रयुक्तं न चैतन्यप्रतिबिम्बितत्वं, किन्तु स्वतः घटादिवृत्तिषु साम्यात्, चैतन्यं च ब्रह्मेति स्वाभाविको वृत्तेस्तत्सम्बध इति नान्योन्याश्रयो दोष इत्यर्थः ।

ऽन्तःकरणवृत्तेः स्वयमचेतनायाः स्वप्रकाशत्वानुपपत्तौ साक्षात्कारत्वायोगात् । न चानुमित-भावितवह्निसाक्षात्कारवत्प्रतिभात्वेनास्याप्रामाण्यं, तत्र वह्निस्वलक्षणस्य परोक्षत्वात् । इह तु ब्रह्मस्वरूपस्योपाधिकलुषितस्य जीवस्य प्रागप्यपरोक्षत्वात् । (१)नहि शुद्धबुद्धत्वादयो वस्तु-तस्ततोऽतिरिच्यन्ते, जीव एव तु तत्तदुपाधिरहितः शुद्धबुद्धादिस्वभावो ब्रह्मेति गीयते । न च तत्तदुपाधिविरहोऽपि ततोऽतिरिच्यते । (२)तस्माद्यथा गान्धर्वशास्त्रार्थज्ञानाभ्यासाहितसंस्का-रसचिवश्रोत्रेन्द्रियेण षड्जादिस्वरग्राममूर्च्छनाभेदमध्यक्षमनुभवति, एवं वेदान्तार्थज्ञानाभ्या-साहितसंस्कारो जीवस्य ब्रह्मभावमन्तःकरणेनेति । (३)अन्तःकरणवृत्तौ ब्रह्मसाक्षात्कारे जन-यितव्येऽस्ति तदुपासनायाः कर्मापेक्षेति चेत् । (४)न । तस्याः कर्मानुष्ठानेन सहभावाभावेन तत्सहकारित्वानुपपत्तेः । न खलु: 'तत्त्वमसी'त्यादेर्वाक्यान्निर्विचिकित्सं शुद्धबुद्धोदासीनस्वभा-वमकर्तृत्वाद्युपेतमेपतब्राह्मणत्वादिजातिं देहाद्यतिरिक्तमेकमात्मानं प्रतिपद्यमानः कर्मस्वधिका-रमवबोद्धुमर्हति । अनर्हश्च कथं कर्ता वाऽधिकृतो वा ।

(५)यद्युच्येत–निश्चितेऽपि तत्त्वे विपर्यासनिबन्धनो व्यवहारोऽनुवर्तमानो दृश्यत, यथा गुडस्य माधुर्यविनिश्चयेऽपि पित्तोपहतेन्द्रियाणां तिक्तावभासानुवृत्तिरास्वाद्य थूत्कृत्य त्यागात् । तस्मादविद्यासंस्कारानुवृत्त्या कर्मानुष्ठानं, तेन च विद्यासहकारिणा त-त्समुच्छेद उपपत्स्यते । न च कर्माविद्यात्मकं कथमविद्यामुच्छिनत्ति, कर्मणो वा तदुच्छेदकस्य कुत उच्छेद इति वाच्यम् । सजातीयस्वपरविरोधिनां भावानां बहुल-मुपलब्धेः, यथा पयः पयोन्तरं जरयति, स्वयं च जीर्यति । यथा विषं विषान्तरं शमयति, स्वयं च शाम्यति । यथा वा कतकरजो रजोन्तराविले पाथसि प्रक्षिप्तं रजोन्त-राणि भिन्दत् स्वयमपि भिद्यमानमनाविलं पाथः करोति । एवं कर्माविद्यात्मकमपि अविद्या-न्तराणि अपगमयत्स्वयमप्यपगच्छति—इति ॥

(६)अत्रोच्यते । सत्यं 'सदेव सोम्येदमि'त्युपक्रमा'त्तत्त्वमसी'त्यन्तात् शब्दाद् ब्रह्ममीमांसोपकरणादसकृदभ्यस्ताद् निर्विचिकित्सेऽनाद्यविद्योपादानदेहाद्यतिरिक्तप्रत्यगात्म-तत्त्वावबोधे जातेऽपि अविद्यासंस्कारानुवृत्तावनुवर्तन्ते सांसारिकाः प्रत्ययास्तद्व्यवहाराश्च, तथापि तानप्ययं व्यवहारप्रत्ययान् मिथ्येति मन्यमानो विद्वान्न श्रद्धत्ते पित्तोप-हतेन्द्रिय इव गुडं थूत्कृत्य त्यजन्नपि तस्य तिक्तताम् । तथा चायं क्रियाकरणेतिकर्तव्यताफ-लप्रपञ्चमतात्त्विकं विनिश्चिन्वन् कथमधिकृतो नाम, (७)विदुषो ह्यधिकारोऽन्यथा पशुशूद्रा-

---

(१) जीवस्य प्रागपरोक्षत्वेपि शुद्धबुद्धत्वादेः परोक्ष्याज्ज तत्साक्षात्कारो यथार्थ इत्याशंक्याह नहीति ।

(२) उपसंहरतीत्यस्मादिति । (३) समुच्चयवादी शंकते अन्तःकरणेति ।

(४) निराकरोति नेति । किमुपासनाकार्ये साक्षात्कारे कर्मणामुपयोग उतोपासनास्वरूपे समुच्चयवा-दिनाङ्गीक्रियते ? तत्र न कार्य इत्याह तस्या इति ।

(५) समुच्चयवादिनोऽविद्यात्मककर्मणोऽनुष्ठानं तत्त्वावगतावपि विपर्यासदर्शनात्सम्भवतीति पक्षमु-पस्थापयति यद्युच्येतेति ।

(६) तत्त्वज्ञानिनोऽनधिकारात्रैवमित्यभिप्रायेण समुच्चयवादिपक्षं खण्डयति अत्रोच्यत इत्यादिना ।

(७) क्रियाकर्त्रादिर्वास्तव इति निश्चयवत इत्यर्थः ।

दीनामप्यधिकारो दुर्वारः स्यात् । (१)क्रियाकर्त्रादिस्वरूपविभागं च विद्वस्यमान इह विद्वानभिमतः कर्मकाण्डे । (२)अत एव भगवानविद्वद्विषयत्वं शास्त्रस्य वर्णयाम्बभूव भाष्यकारः । तस्मात्यथा राजजातीयाभिमानकर्तृके राजसूये न विप्रवैश्यजातीयाभिमानिनोरधिकारः, एवं द्विजातिकर्तृक्रियाकरणादिविभागाभिमानिकर्तृके कर्मणि न तदनभिमानिनोऽधिकारः । न चानधिकृतेन समर्थेनापि कृतं वैदिकं कर्म फलाय कल्पते वैश्यस्तोमं इव ब्राह्मणराजन्याभ्याम् । तेन दृष्टार्थेषु कर्मसु शक्तः प्रवर्तमानः प्राप्नोतु फलं दृष्टत्वात् । अदृष्टार्थेषु तु शास्त्रैकसमधिगम्यं फलमनधिकारिणि न युज्यत इति नोपासनाकार्ये कर्मापेक्षा ।

(३)स्यादेतत् मनुष्याभिमानवदधिकारिके कर्मणि विहिते यथा तदभिमानरहित स्यानधिकारः, एवं निषेधविधयोपि मनुष्याधिकारा इति तदभिमानरहितस्तेष्वपि नाधिक्रियेत पश्वादिवत् । तथा चायं निषिद्धमनुतिष्ठन् न प्रत्यवेयात् तिर्यगादिवदितिभिन्नकर्मतापातः ।

मैवम्(४) । न खल्वयं सर्वथा मनुष्याभिमानरहितः, किन्त्वविद्यासंस्कारानुवृत्त्याऽस्य मात्रया तदभिमानोऽनुवर्तते अनुवर्तमानं च मिथ्येति मन्यमानो न श्रद्दत्त इत्युक्तम् । किमतः ? यद्येवम् एतदतो भवति–विधिषु श्राद्धोऽधिकारी नाश्राद्धः । ततश्च मनुष्याद्यभिमानेन श्रद्दधानो न विधिशास्त्रेणाधिक्रियते । तथा च स्मृतिः–'अश्रद्धया हुतं दत्तमि'त्यादिका । निषेधशास्त्रं तु न श्रद्धामपेक्षते, अपि तु निषिध्यमानक्रियोन्मुखो नर इत्येव प्रवर्तते । तथा च सांसारिक इव श्रद्धावगतब्रह्मतत्त्वोऽपि निषेधमतिक्रम्य प्रवर्तमानः प्रत्यवैतीति न भिन्नकर्मदर्शनाभ्युपगमः । तस्मान्नोपासनायाः कार्ये कर्मापेक्षा । (५)अत एव नोपासनोत्पत्तावपि, निर्विचिकित्सशाब्दज्ञानोत्पत्त्युत्तरकालमनधिकारः कर्मणीत्युक्तम् । तथा च श्रुतिः–

न कर्मणा न प्रजया धनेन (६)त्यागेनैके अमृतत्वमानशुः ।

(७)तत्किमिदानीमनुपयोग एव सर्वथेह कर्मणाम् , तथा च 'विविदिषन्ति यज्ञेने'त्याद्याः श्रुतयो विरुध्येरन् । न । (८)आरादुपकारकत्वात् कर्मणां यज्ञादीनाम् । तथाहि–'तमेतमात्मानं

---

(१) ननु विदुषश्चेत्कर्मस्वधिकारस्तर्हि क्रियाकर्त्रादेर्वास्तवत्वं स्यादित्यत्राह क्रियाकर्त्रादीति । विद्वस्यमानोऽविद्वानपि विद्वान् भवन्विद्वदाभास इत्यर्थः ।

(२) अत एव—विद्वदाभासोऽविद्वानेव कर्मकाण्डेऽधिकार्यभिमत इत्यस्माद्धेतोः ।

(३) शङ्कते स्यादेतदिति । यदि प्रतीयमानाधिकारनिमित्तस्य ब्राह्मण्यादेः शास्त्रनिमित्तामिथ्यात्वमित्यादश्रद्धधानो विध्यनधिकारी तदोल्लंघितशास्त्रनिषिद्धकर्मतापात इत्याशङ्काभिप्रायः ।

(४) समाधत्ते मैवमिति । अवगतमिथ्याभावस्याप्याधिकारनिमित्तस्य प्रतीयमानत्वान्निषेधाधिकारहेतुता । न च श्रद्धधानता इहाधिकारहेतुः, अतत्त्वज्ञस्यापि नास्तिकत्वेनाश्रद्दधतो निषेधाधिकारात् , इतरथा निषेधलंघिनस्तस्य प्रत्यवायाभावाद्विधिषु तु श्रद्धाप्यधिकारहेतुरिति ब्रह्मविद्वो नाधिकार इति समाधानार्थसंक्षेपः ।

(५) अत एव—यत एवावगतब्रह्मभावस्य विधिषु नाधिकारस्तत एव ज्ञानानन्तरं कर्मानुष्ठानस्यासम्भवान्नोपासनोत्पत्तौ कर्मापेक्षेति न द्वितीयकल्पस्यावकाश इति भावः ।

(६) त्यागेन—त्यागसाध्यज्ञानेनामृतत्वं प्रापुर्न पितृलोकाद्यातिहेतुभिः कर्मप्रजाधनशब्दवाच्यापरविद्याभिरिति श्रुत्यर्थः । (७) शङ्कते तत्किमिति ।

(८) समाधत्ते आरादिति । इह भवान्तरे वाऽनुष्ठितं कर्म चित्तशुद्धिद्वारा ज्ञानोत्पत्तिहेतुरिति समाधा-

वेदानुवचनेन' नित्यस्वाध्यायेन 'ब्राह्मणा विविदिषन्ति' वेदितुमिच्छन्ति, न तु विदन्ति । वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वादिच्छायाश्च प्रत्ययार्थतया प्राधान्यात्, (१)प्रधानेन च कार्यसम्प्रत्ययात् । नहि राजपुरुषमानयेत्युक्ते वस्तुतः प्रधानमपि राजा पुरुषविशेषणतया शब्दत उपसर्जनमानीयतेऽपि तु पुरुष एव, शब्दतस्तस्य प्राधान्यात् । एवं वेदानुवचनस्येव यज्ञस्यापीच्छासाधनतया विधानम् । एवं तपसोऽनाशकस्य । कामानशनमेव तपः । हितमितमेध्याशिनो हि ब्रह्मणि विविदिषा भवति, न तु सर्वथाऽनश्नतो, मरणात् । नापि चान्द्रायणादितपःशीलस्य, धातुवैषम्यापत्तेः । एतानि च नित्यान्युपात्तदुरितनिबर्हणेन पुरुषं संस्कुर्वन्ति । तथा च श्रुतिः—'स ह वा आत्मयाजी यो वेद इदं मेऽनेनाङ्गं संस्क्रियत इदं मेऽनेनाङ्गमुपधीयते'(२) इति । अनेनेति प्रकृतं यज्ञादि परामृशति । स्मृतिश्च 'यस्यैतेऽष्टाचत्वारिंशत्संस्कारा' इति । नित्यनैमित्तिकानुष्ठानप्रक्षीणकल्मषस्य च विशुद्धसत्त्वस्याविदुष एव उत्पन्नविविदिषस्य ज्ञानोत्पत्तिं दर्शयत्याथर्वणी श्रुतिः—'विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान' इति । स्मृतिश्च—'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इत्यादिका । (३)कल्पनैव च नित्यानां कर्मणां नित्येहितेनोपात्तदुरितनिबर्हणेन पुरुषसंस्कारेण ज्ञानोत्पत्तावङ्गभावोपपत्तौ न संयोगपृथक्त्वेन साक्षादङ्गभावो युक्तः(४), कल्पनागौरवापत्तेः । । तथाहि नित्यकर्मानुष्ठानाद्धर्मोत्पादः ततः पाप्मा निवर्तते, स ह्यनित्याशुचिदुःखरूपे संसारे नित्यशुचिसुखख्यातिलक्षणेन विपर्यासेन चित्तसत्त्वं मलिनयति, अतः पापनिवृत्तौ (५)प्रत्यक्षोपपत्तिद्वारापावरणे सति प्रत्यक्षोपपत्तिभ्यां संसारस्यानित्याशुचिदुःखरूपतामप्रत्यूहमवबुध्यते, ततोऽस्यास्मिन्ननभिरतिसंज्ञं वैराग्यमुपजायते, ततस्तज्जिहासोपावर्तते, ततो हानोपायं पर्येषते, पर्येषमाणश्चात्मतत्त्वज्ञानमस्योपाय इत्युपश्रुत्य तज्जिज्ञासते, ततः श्रवणादिक्रमेण तज्जानातीत्यारादुपकारकत्वं तत्त्वज्ञानोत्पदं प्रति चित्तसत्त्वशुद्ध्या कर्मणां युक्तम् । इमं चार्थमनुवदति भगवद्गीता—

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥

एवं चाननुष्ठितकर्मापि प्राग्भवीयकर्मवशाद्यो विशुद्धसत्त्वः संसारासारतादर्शनेन निष्प-

---

नाभिप्रायमुपपादयन्नाह तथाहीति ।

(१) प्रधानेनेति । प्रधानेन सम्प्रत्ययार्थेनेच्छयाऽख्यातोपात्तभावनायाः कार्यस्य सम्प्रत्ययात्सम्बन्धादित्यर्थः ।

(२) अनेन कर्मणा इदं ममाङ्गमन्तःकरणं संस्क्रियते पुण्येन चोपधीयते उपचीयत इति यो विदित्वाऽऽचरति कर्म स आत्मशुध्यर्थं यजमानात्मयाजी, स च देवयाजिनः काम्यकर्तुः श्रेयानिति शतपथश्रुत्यर्थो बोध्यः ।

(३) एवं नित्यानां संस्कारद्वारा ज्ञानोत्पादकत्वमुक्त्वाऽधुना सर्वेषां कर्मणां ज्ञानकार्ये मोक्षे समुच्चय इति समुच्चयवादयुक्तं निरस्यन्नाह कल्पनैवेति । नित्यानां पापक्षयरूपं फलं ज्ञानमपेक्षते न स्वर्गादि, तत्र यथा प्रकृतौ कल्पितोपकाराणामङ्गानामतिदेशे न प्रकृतोपकारातिरिक्तप्रकारकल्पनमेवं ज्ञाने विनियुक्तयज्ञानां कल्पितनित्यफलपापक्षयातिरेकेण न नित्यकाम्यकर्मसाधारणमोक्षोपयोग्युपकारकल्पनमिति भावः ।

(४) युक्त इति । अनेन साक्षादङ्गत्वं निषिध्यते न संयोगपृथक्त्वम्, सर्वापेक्षाधिकरणे संयोगभेदस्य वक्ष्यमाणत्वात् । आरादङ्गभावेन संयोगपृथक्त्वस्योपपद्यमानत्वेन न साक्षादङ्गत्वसिद्धिरित्यभिप्रायः ।

(५) प्रत्यक्षेति । दृष्टविषये प्रत्यक्षेणादृष्टविषये चोपपत्त्या पापकपाटनिवृत्त्यपावरणे उद्घाटने सतीत्यर्थः ।

अवैराग्यः कृतं तस्य कर्मानुष्ठानेन वैराग्योत्पादोपयोगिना, प्राग्भवीयकर्मानुष्ठानादेव तत्सिद्धेः। इममेव च पुरुषधौरेयभेदमधिकृत्य प्रवृत्ते श्रुतिः—'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदि'ति। तदिदमुक्तम्—कर्मावबोधा "**त्प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्ते**"रिति। अत एव न ब्रह्मचारिण ऋणानि सन्ति, येन तदपाकरणार्थं कर्मानुतिष्ठेत्। एतदनुरोधाच्च 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते' इति गृहस्थः संपद्यमान इति व्याख्येयम्। अन्यथा 'यदि वेतरथा ब्रह्मचर्यादेवे'ति श्रुतिर्विरुध्येत। गृहस्थस्यापि च ऋणापाकरणं सत्त्वशुद्ध्यर्थमेव। जरामर्यवादो भस्मान्ततावादोन्त्येष्टयश्च कर्मजडानविदुषः प्रति, न त्वात्मतत्त्वपण्डितान्। तस्मात्तस्यानन्तर्यमथशब्दार्थो यद्विना ब्रह्मजिज्ञासा न भवति यस्मिंस्तु सति भवन्ती भवत्येव। न चेत्थं कर्मावबोधानन्तर्यं, तस्मान्न कर्मावबोधानन्तर्यमथशब्दार्थ इति सर्वमवदातम्।

(१)स्यादेतत्। मा भूदग्निहोत्रयवागूपाकवदार्थः क्रमः श्रौतस्तु भविष्यति, 'गृही भूत्वा वनी भवेत्' 'वनी भूत्वा प्रव्रजे'दिति जाबालश्रुतिर्गार्हस्थ्येन हि यज्ञाद्यनुष्ठानं सूचयति। स्मरन्ति च—

अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्॥

निन्दति च—

अनधीत्य द्विजो वेदाननुत्पाद्य तथात्मजान्।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः॥

इति, अत आह—"**यथा च हृदयाद्यवदानानामानन्तर्यनियमः**"। कुतः? 'हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षस' इत्यथाप्रशब्दाभ्यां **क्रमस्य विवक्षितत्वात्, न तथेह क्रमो विवक्षितः**। श्रुत्या तयैवानियमप्रदर्शनात्। 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वे'ति। एतावता हि वैराग्यमुपलक्षयति। अत एव 'यदहरेव विरजेत्तदहरेव प्रव्रजदे'ति श्रुतिः। निन्दावचनं चाविशुद्धसत्त्वपुरुषाभिप्रायम्। अविशुद्धसत्त्वो हि मोक्षमिच्छन्नालस्यात्तदुपायेऽप्रवर्तमानो गृहस्थधर्ममपि नित्यनैमित्तिकमनाचरन् प्रतिक्षणमुपचीयमानपाप्माऽधोगतिं गच्छतीत्यर्थः।

स्यादेतत्। मा भूच्छ्रौत आर्थो वा क्रमः, (२)पाठस्थानमुख्यप्रवृत्तिप्रमाणकस्तु कस्मान्न

---

(१) धर्मब्रह्मावबोधयोर्हेतुहेतुमद्भावाभावेऽपि क्त्वाप्रत्ययश्रुत्या पौर्वापर्यं स्यादित्यभिप्रायेणाशङ्कते स्यादेतदिति। यथा 'अग्निहोत्रं जुहोति, यवागूं पचती'ति श्रूयते। तत्र क्रमसंशये द्रव्यमन्तरा यागानिष्पत्तेरन्यद्रव्यानयने श्रुतवैयर्थ्यात् दृष्टप्रयोजने आराद्युपकारकत्वस्यान्याय्यत्वाच्च यथा यवागूं पक्त्वा जुहोतीति क्रमस्तथेह न सम्भवतीति भावः।

(२) 'समिधो यजती'त्यादयः पञ्च प्रयाजा दर्शपौर्णमासाङ्गत्वेनाम्नाताः, तेषां पाठतः क्रमः। तथा ज्योतिष्टोमविकारे सायस्कयागेऽतिदेशप्राप्ताश्चत्वारः पशवः अग्नीषोमीयः सवनीयः अनुबन्ध्यश्च। विकृतौ 'सह पशुनालभेत' इति श्रवणात्प्राकृतः क्रमो निवर्तते। सहत्वं चेदं सवनीयस्थाने। तथासति इतरयोस्तुल्यं स्थानं चलनं भवति। तत्रैककालत्वलक्षणसहत्वस्यासम्भवात्स्थानात्सवनीयप्राथम्यं नियम्यत इत्ययं स्थानक्रमः। तथा 'सारस्वतौ भवत एतद्वै दैव्यं मिथुनं यत्सरस्वती सरस्वांश्च' इति युगपत्कर्मद्वयं श्रूयते। तत्र प्रथमं सरस्वतीदैवतस्य याज्यानुवाक्ययोर्युगलं पठ्यते ततो सारस्वदैवतस्य। तस्मादेतत्क्रमेण कर्मद्वयक्रम इति ज्ञा-

भवतीत्यत आह–**"शेषशेषित्वे प्रमाणाभावात्"** (पृ० ७१ प० १)। शेषाणां समिदादीनां शेषिणां चाग्नेयादीना(१)मेकफलवदुपकारोपनिबद्धानामेकफलावच्छिन्नानामेकप्रयोगवचनोपगृहीतानामेकाधिकारिकर्तृकाणामेकपौर्णमास्यमावस्याकालसंबद्धानां युगपदनुष्ठानाशक्तेः सामर्थ्यात्क्रमप्राप्तौ तद्विशेषापेक्षायां पाठादयस्तद्भेदनियमाय प्रभवन्ति । यत्र तु न शेषशेषिभावो नाप्येकाधिकारावच्छेदो यथा (२)सौर्यार्यम्णप्राजापत्यादीनां, तत्र क्रमभेदापेक्षाभावान्न पाठादिः क्रमविशेषनियमे प्रमाणम्, अवर्जनीयतया तस्य तत्रागतत्वात् । न चेह धर्मब्रह्मजिज्ञासयोः शेषशेषिभावे श्रुत्यादीनामन्यतमं प्रमाणमस्तीति । ननु शेषशेषिभावाभावेपि क्रमनियमो दृष्टो, यथा गोदोहनस्य पुरुषार्थस्य दर्शपौर्णमासिकैरङ्गैः सह, यथा वा दर्शपौर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति दर्शपौर्णमाससोमयोरशेषशेषिणोरित्यत आह—**"अधिकृताधिकारे च प्रमाणाभावात्"**इति योजना । स्वर्गकामस्य हि दर्शपौर्णमासाधिकृतस्य पशुकामस्य सतो दर्शपौर्णमासक्रत्वर्थाप्प्रणयनाश्रिते गोदोहनेऽधिकारः । नो खलु गोदोहनद्रव्यमव्याप्रियमाणं साक्षात् पशून् भावयितुमर्हति । न च व्यापारान्तराविष्टं श्रूयते यतस्तदङ्गक्रममातिपतेत् । अप्प्रणयनाश्रितं तु प्रतीयते 'चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्ये'ति समभिव्याहारात् । योग्यत्वाच्चास्यापां प्रणयनं प्रति । तस्मात् क्रत्वर्थाप्प्रणयनाश्रितत्वाद्गोदोहनस्य तत्क्रमेण पुरुषार्थमपि गोदोहनं क्रमवदिति सिद्धम्(३) । श्रुतिनिराकरणेनैवेष्टिसोमक्रमवदपि क्रमोप्यपास्तो वेदितव्यः ।

शेषशेषित्वाधिकृताधिकाराभावेपि क्रमो विवक्ष्येत, यद्येकफलावच्छेदो भवेत्, यथाग्नेयादीनां षण्णामेकस्वर्गफलावच्छिन्नानां, यदि वा जिज्ञास्यब्रह्मणोंशो धर्मः स्यात्, यथा चतुर्लक्षणीव्युत्पाद्यं ब्रह्म केनचित्केनचिदंशेनैकैकेन लक्षणेन व्युत्पाद्यते, तत्र चतुर्णां लक्षणानां जिज्ञास्याभेदेन परस्परसम्बन्धे सति क्रमो विवक्षितस्तथेहाप्येकजिज्ञास्यतया धर्मब्रह्मजिज्ञासयोः क्रमो विवक्ष्येत, न चैतदुभयमप्यस्तीत्याह—**"फलजिज्ञास्यभेदाच्च"** । फलभेदं विभजते **"अभ्युदयफलं धर्मज्ञान"मिति** ।

यते मन्त्राणां प्रयोगशेषत्वात् । अङ्गविशेषनिर्वापादीनां क्रमाकांक्षायां मुख्यक्रमेणैव क्रम इति नियम्यते सोऽयं मुख्यक्रमः । इदं च प्रवृत्तिक्रमस्याप्युदाहरणं बोध्यम् । याज्यानुवाक्याप्रवृत्तिक्रमेण निर्वापादीनां क्रमस्य सिद्धत्वादित्यलं विस्तरस्तु कल्पतरौ द्रष्टव्यः ।

(१) एकप्रयोगवचनपरिग्रहे हेतुमाह एकफलवदिति । एकश्चासौ फलवतः प्रधानस्य दर्शपौर्णमासादेरुपकारस्तस्मिन्सम्बुच्चित्य साधनत्वेनोपनिबद्धाः शेषाः शेषिणश्चात एकवचनोपगृहीतानामित्यर्थः । एकाधिकारिकाणामित्यनेन कर्तृभेदाभावात्क्रमापेक्षाऽऽवश्यकीति प्रदर्शितम् ।

(२) 'सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः' 'आर्यमणं चरुं निर्वपेत्स्वर्गकामः' 'प्राजापत्यं चरुं निर्वपेत् शतकृष्णलकामः' इत्यादिभिन्नफलकयागानान्त्वसम्बन्धात् न क्रमः युगपत्पाठासम्भवादवर्जनीयतया प्राप्तः पाठक्रमोऽध्ययनार्थ इति भावः ।

(३) इदमत्र तात्पर्यम् । अपां प्रणयनं दर्शपूर्णमासाङ्गमाश्रित्य 'गोदोहनेन पशुकामस्य' इति विहितस्य गोदोहनस्य, 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति दर्शाद्युत्तरकाले विहितस्य सोमयागस्य च शेषशेषिभावाभावेपि दर्शाद्यधिकृताधिकारत्वादेकवचनगृहीतानां तेषां युगपदनुष्ठानासम्भवात्क्रमाकांक्षायां श्रुत्यादिभिः क्रमो बोध्यत इति स सम्भवति, अत्र तु जिज्ञासयोरधिकृताधिकारत्वाभावान्न क्रमसम्भव इति ।

(१)जिज्ञासाया वस्तुतो ज्ञानतन्त्रत्वाज्ज्ञानफलं जिज्ञासाफलमिति भावः । (२)न केवलं स्वरूपतः फलभेदः, तदुत्पादनप्रकारभेदादपि तद्भेद इत्याह—**"तच्चानुष्ठानापेक्षं ब्रह्मज्ञानं च नानुष्ठानान्तरापेक्षम्"** (पृ० ७५ पं०) । शाब्दज्ञानाभ्यासाज्ञानुष्ठानान्तरमपेक्षते, नित्यनैमित्तिककर्मानुष्ठानसहभावस्यापास्तत्वादिति भावः । जिज्ञास्यभेदमात्यन्तिकमाह—**"भव्यश्च धर्म" इति** । भविता भव्यः, कर्तरि कृत्यः । (३)भविता च भावकव्यापारनिर्वर्त्यतया तत्तन्त्र इति ततः प्राग् ज्ञानकाले नास्तीत्यर्थः । भूतं सत्यं(४), सदेकान्ततो न कदाचिदसदित्यर्थः । न केवलं स्वरूपतो जिज्ञास्ययोर्भेदो ज्ञापकप्रमाणप्रवृत्तिभेदादपि भेद इत्याह—**"चोदनाप्रवृत्तिभेदाच्च"** । चोदनेति वैदिकं शब्दमाह, विशेषेण सामान्यस्य लक्षणात् । प्रवृत्तिभेदं विभजते—**"या हि चोदना धर्मस्ये"ति** । (५)आज्ञादीनां पुरुषाभिप्रायभेदानामसम्भवादपौरुषेये वेदे चोदनोपदेशः । अत एवोक्तं '(६)तस्य ज्ञानमुपदेश' इति । सा च स्वसाध्ये पुरुषव्यापारे भावनायां, तद्विषये च यागादौ, स हि भावनाविषयः, तदधीननिरूपणत्वात् प्रयत्नस्य भावनायाः । 'षिञ् बन्धन'इत्यस्य धातोर्विषयपदव्युत्पत्तेः । (७)भावनायास्तद्द्वारेण च यागादेरपेक्षितोपायतामवगमयन्ती तत्रेच्छोपहारमुखेन पुरुषं नियुञ्जानैव यागादिधर्ममवबोधयति नान्यथा । ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलं न तु प्रवर्तयन्त्यवबोधयति । कुतः ? अवबोधस्य प्रवृत्तिरहितस्य चोदनाजन्यत्वात् । नन्वात्मा ज्ञातव्य इत्येतद्विधिपरैर्वेदान्तैस्तदेकवाक्यतयाऽवबोधे प्रवर्तयद्भिरेव पुरुषो ब्रह्मावबोध्यत इति समानत्वं धर्मचोदनाभिर्ब्रह्मचोदनानामित्यत आह—**"न पुरुषोऽवबोधे नियुज्यते"** । अयमभिसन्धिः । न तावद् ब्रह्मसाक्षात्कारे पुरुषो नियोक्तव्यः, तस्य ब्रह्मस्वाभाव्येन नित्यत्वादकार्यत्वात् । नाप्युपासनायां, तस्या अपि ज्ञानप्रकर्षे हेतुभावस्यान्वयव्यतिरेकसिद्धतया प्राप्तत्वेनाविधेयत्वात् । नापि शाब्दबोधे, तस्याप्यधीतवेदस्य पुरुषस्य विदितपदतदर्थस्य समधिगतशाब्द-

---

(१) संग्रहे जिज्ञास्ययोः फलादिभेदमभिधाय विभजने ज्ञानयोस्तत्कथनमयुक्तमित्याशंक्याह जिज्ञासाया इति । इच्छाया ज्ञानपारतन्त्र्याज्ज्ञानफलमेव जिज्ञासाफलमिति भावः ।

(२) फलभेदे वक्तव्ये कारणभेदकथनं भाष्येऽनुपयोगीत्याशंक्याह न केवलमिति । विधेयाविधेयक्रियाज्ञानफलयोरुत्पाद्यता व्यङ्ग्यता च वैलक्षण्यमित्यर्थः ।

(३) ननु भवितुः कथं ज्ञानकाले सत्त्वाभाव इत्याशंक्य ज्ञानोत्तरभाविप्रयोजकव्यापारापेक्षणादित्याह भविता चेति । भवतिरसिद्धक्रियाकर्तृवाची न पच्यादिवत्सिद्धकर्तृकक्रियस्ततो भविता स्वतोऽसिद्धस्सन् भावकव्यापारापेक्षनिष्पत्तिरर्थात् साध्यो भवति इत्यर्थः ।

(४) अनेनातीतत्वाच्चित्वभ्रमोऽपास्तः ।

(५) आज्ञादीनामिति । आदिनाऽभ्यर्थनानुज्ञे बोध्ये । तत्र उत्कृष्टपुंसः स्वाभिलषितोपायकार्यत्वाभिधानमाज्ञा यथा गामानयेति, हीनस्यैतदेवाभ्यर्थना यथा वटुमध्यापयेति, प्रवृत्तस्य प्रयोज्यस्य तद्धितोपायोक्तिरनुज्ञा यथा—तथा कुरु यथा हितमिति । नैतासां वेदे सम्भव इत्युपदेशश्चोदनेति भावः ।

(६) तस्य धर्मस्य ज्ञाने प्रमाणमुपदेशो विधिरिति जै० १ अ० ५ सूत्रैकदेशार्थो बोध्यः । स्वसाध्य इति । स्वस्याः प्रतिपाद्ये विषये भावनायामित्यर्थः ।

(७) ननु भावनाधात्वर्थयोर्विधिशब्देन पुरुषप्रवर्तनमशक्यं प्रमाणस्य वाक्यादेवत्प्रेरकत्वासम्भवादित्याशंक्याह भावनाया इति । साक्षाद्भावनायास्तदवच्छेदकत्वद्वारा धात्वर्थस्य चेष्टोपायतां बोधयित्वा तत्रेच्छामुपहरन् विधिः पुरुषं प्रवर्तयतीति चोदनाया धर्मबोधकत्वं सिध्यतीत्यर्थः ।

न्यायतत्त्वस्याप्रत्यूहमुत्पत्तेः । अत्रैव दृष्टान्तमाह–"**यथाक्षार्थे**"**ति** (पृ० ७६ पं० १)। दार्ष्टान्तिके योजयति "**तद्वत्**" **इति** । अपि चात्मज्ञानविधिपरेषु वेदान्तेषु नात्मतत्त्वविनिश्चयः शाब्दः स्याद् , नहि तदात्मतत्त्वपरास्ते, किन्तु तज्ज्ञानविधिपराः, यत्पराश्च ते त एव तेषामर्थाः । न च बोधस्य बोध्यनिष्ठत्वादपेक्षितत्वादन्यपरेभ्योपि बोध्यतत्त्वविनिश्चयः, (१)समारोपेणापि तदुपपत्तेः । तस्मान्न बोधविधिपरा वेदान्ता इति सिद्धम् । प्रकृतमुपसंहरति "**तस्मात्किमपि वक्तव्य**"**मिति** (पृ० ७७ पं० १) । यस्मिन्नसति ब्रह्मजिज्ञासा न भवति सति तु भवन्ती भवत्येवेत्यर्थः । तदाह–"**उच्यते नित्यानित्यवस्तुविवेक**" इत्यादि । नित्यः प्रत्यगात्मा, अनित्या देहेन्द्रियविषयादयः । (२)तद्विषयश्चेद्विवेको निश्चयः, कृतमस्य ब्रह्मजिज्ञासया, ज्ञातत्वाद् ब्रह्मणः । अथ विवेको ज्ञानमात्रं न निश्चयः, तथासत्येष विपर्यासादन्यः संशयः स्यात् , तथा च न वैराग्यं भावयेत् , अभावयन् कथं ब्रह्मजिज्ञासाहेतुः । (३)तस्मादेवं व्याख्येयम्–नित्यानित्ययोर्वसतीति नित्यानित्यवस्तु तद्धर्मः, नित्यानित्ययोर्धर्मिणोस्तद्धर्माणां च विवेको नित्यानित्यवस्तुविवेकः । एतदुक्तं भवति–मा भूदिदं तदृतं नित्यमिदं तदनृतमनित्यमिति धर्मिविशेषयोर्विवेकः, धर्ममात्रयोर्नित्यानित्ययोस्तद्धर्मयोश्च विवेकं निश्चिनोत्येव । नित्यत्वं सत्यत्वं तद्यस्यास्ति तन्नित्यं सत्यं, तथा चाऽऽस्थागोचरः । अनित्यत्वमसत्यत्वं तद्यस्यास्ति तदनित्यमनृतं, तथा चानास्थागोचरः । (४)तदेतेष्वनुभूयमानेषु युष्मदस्मत्प्रत्ययगोचरेषु विषयविषयिषु यदृतं नित्यं सुखं व्यवस्थास्यते तदास्थागोचरो भविष्यति, यत्त्वनित्यमनृतं भविष्यति तापत्रयपरीतं तत त्यक्ष्यत इति । सोयं नित्यानित्यवस्तुविवेकः प्राग्भवीयादैहिकाद्वा कर्मणो विशुद्धसत्त्वस्य भवत्यनुभवोपपत्तिभ्याम्(५) । न खलु सत्यं नाम न किंचिदस्तीति वाच्यम् , तदभावे तदधिष्ठानस्यानृतस्याप्यनुपपत्तेः, शून्यवादिनामपि शून्यताया एव सत्यत्वात् । (६)अथास्य पुरुषधौरेयस्यानुभवोपपत्तिभ्यामेवं सुनिपुणं निरूपयत आ च सत्यलोकाद् आ चावीचे'र्जायस्व म्रियस्वे'ति विपरिवर्तमानं क्षणमुहूर्तयामाहोरात्रार्धमासमासर्त्वयनवत्सरयुगचतुर्युगमन्वन्तरप्रलयमहाप्रलयमहासर्गावान्तरसर्गसंसारसागरोर्मिभिरनिशमुह्यमानं तापत्रयपरीतमात्मानं च जीवलोकं चावलोक्यास्मिन् संसारमण्डले-

---

(१) यथा विशिष्टविधौ विशेषणाविधिस्तथा विषयविशिष्टप्रतिपत्तिविधिसामर्थ्यात् ब्रह्मनिश्चयः स्यादित्याशंक्य समाधत्ते समारोपेणापीति । 'वाचं धेनुमुपासीत' इत्यादावारोप्यस्यापि विधेयज्ञानविषयत्वात्प्रतिपत्तिविधिर्न विशेषणसत्तामाक्षिपतीति भावः ।

(२) नित्यानित्यवस्तुविवेक इति भाष्यमाक्षिपति तद्विषयश्चेति ।

(३) समाधत्ते तस्मादिति । तथाच निश्चय एव विवेकः । न चैवंसति शास्त्रानारम्भः शंक्यः, इदं नित्यमिदमनित्यमित्यनिश्चयात् तदर्थं शास्त्रारम्भस्यावश्यकत्वादिति भावः ।

(४) सत्यासत्यौरुपादेयानुपादेयत्वे हेतुमाह तदेतेष्विति । सुखत्वान्नित्यमुपादेयं दुःखत्वान्नित्यं त्याज्यमित्यर्थः ।

(५) दृष्टेऽनुभव, उपपत्तिस्त्वदृष्टे ग्राह्या ।

(६) न नित्यादिविवेकमात्रं वैराग्यजनकमपितु तदभ्यास इत्याह अथास्येति । अस्य पुरुषधौरेयस्य संसारमण्डलेऽनित्यत्वादिविषयं प्रसंख्यानं ज्ञानमुपावर्तत इत्यन्वयः । अवीचिः—नरकविशेषः । जायस्व म्रियस्वेति 'क्रियासमभिहारे लोडि'ति पौनःपुन्ये सर्वलकारापवादेन लोडुविधानाज्जननमरणाभ्यामावर्तमानक्षणादिकालैः संसारसागरोर्मिरूपैरनिशमुह्यमानं जीवगणं वीक्ष्येति योजना ।

ऽनित्याशुचिदुःखात्मकं प्रसंख्यानमुपावर्तते, ततोऽस्यैतादृशान्नित्यानित्यवस्तुविवेकलक्षणात् प्रसंख्यानाद् **"इहामुत्रार्थभोगविरागो"** भवति। अर्थ्यते प्रार्थ्यत इत्यर्थः, फलमिति यावत्, तस्मिन् विरागोऽनाभोगात्मिकोपेक्षाबुद्धिः(१), ततः **"शमदमादिसाधनसंपत्"**। रागादिकषायमदिरामत्तं हि मनस्तेषु तेषु विषयेषूच्चावचमिन्द्रियाणि प्रवर्तयद्विविधाश्च प्रवृत्तीः पुण्यापुण्यफला भावयत् पुरुषमतिघोरे विविधदुःखज्वालाजटिले संसारहुतभुजि जुहोति। प्रसंख्यानाभ्यासलब्धवैराग्यपरिपाकभग्नरागादिकषायमदिरामदं तु मनः पुरुषेणावजीयते वशीक्रियते। सोऽयमस्य वैराग्यहेतुको मनोविजयः शम इति वशीकारसंज्ञ इति चाख्यायते। विजितं च मनस्तत्त्वविषयविनियोगयोग्यतां नीयते, सेयमस्य योग्यता दमः। यथा दान्तोऽयं वृषभयुवा हलशकटादिवहनयोग्यः कृत इति गम्यते। आदिग्रहणेन च विषयतितिक्षातदुपरमतत्त्वश्रद्धाः संगृह्यन्ते। अत एव श्रुतिः 'तस्मात् शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वाऽऽत्मन्येवात्मानं पश्येत् सर्वमात्मनि पश्यती'ति। तदेतस्य शमदमादिरूपसाधनस्य संपत्प्रकर्षः शमदमादिसाधनसंपत्। ततोऽस्य संसारबन्धनामुमुक्षा भवतीत्याह-**"मुमुक्षुत्वं च"**। (२)तस्य च नित्यशुद्धमुक्तसत्यस्वभावब्रह्मज्ञानं मोक्षस्य कारणमित्युपश्रुत्य तज्जिज्ञासा भवति धर्मजिज्ञासायाः प्रागूर्ध्वं च, तस्मात्तेषामेवानन्तर्यं न धर्मजिज्ञासाया इत्याह **"तेषु ही"**ति। न केवलं जिज्ञासामात्रमपि तु ज्ञानमपीत्याह **"ज्ञातुं च"**। उपसंहरति **"तस्मा"**दिति। (पृ० ७८ पं० २)

क्रमप्राप्तमतःशब्दं व्याचष्टे **"अतः शब्दो हेत्वर्थः"**। तमेवातःशब्दस्य हेतुरूपमर्थमाह **"यस्माद्वेद एवे"**ति। (३)अत्रैवं परिचोद्यते-सत्यं यथोक्तसाधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा भवति, सैव त्वनुपपन्ना, इहामुत्रफलोपभोगविरागस्यानुपपत्तेः। अनुकूलवेदनीयं हि फलम्, इष्टलक्षणत्वात् फलस्य। न चानुरागहेतावस्य वैराग्यं भवितुमर्हति। दुःखानुषङ्गदर्शनात् सुखेऽपि वैराग्यमिति चेत्, हन्त भोः सुखानुषङ्गाद्दुःखेष्वनुरागो न कस्माद्भवति। तस्मात्सुख उपादीयमाने दुःखपरिहारे प्रयतितव्यम्। अवर्जनीयतया दुःखमागतमपि परिहृत्य सुखमात्रं भोक्ष्यते। तद्यथा मत्स्यार्थी सशल्कान्(४) सकण्टकान् मत्स्यानुपादत्ते, स यावदादेयं तावदादाय विनिवर्तते। यथा वा धान्यार्थी सपलालानि धान्यान्याहरति, स यावदादेयं तावदुपादाय निवर्तते। तस्माद्दुःखभयान्नानुकूलवेदनीयमैहिकं वाऽऽमुष्मिकं वा सुखं परित्यक्तुमुचितम्। नहि मृगाः सन्तीति शालयो नोप्यन्ते, भिक्षुकाः सन्तीति स्थाल्या नाधिश्रीयन्ते। अपि च दृष्टं सुखं चन्दनवनितादिसङ्गजन्म क्षयितालक्षणेन दुःखेनाघातत्वादतिभीरुणा त्यज्येतापि, न त्वामुष्मिकं स्वर्गादि, तस्याविनाशित्वात्। श्रूयते हि 'अपाम सोममभूता अभूमे'ति। तथाच 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति'। न

---

(१) आभोगो मनस्कारः, आदर इति यावत्, तथाचानादरात्मिकोपेक्षाबुद्धिर्विराग इत्यर्थः।

(२) ननूक्तसम्पत्त्या मोक्षेच्छा भवतु तावता ब्रह्मजिज्ञासा कथं स्यादित्यत्राह तस्य चेति।

(३) अत्राथशब्देनैव जिज्ञासाहेतुप्रतिपादनात्किमतःशब्देनेत्याशंक्य, नानेन जिज्ञासां प्रति साधनकलापस्य हेतुतोच्यते, किन्तु पूर्वोक्तहेतुस्वरूपाभिव्यक्तिद्वारेत्याह अत्रैवमित्यादिना।

(४) शल्कं-शकलम्।

च कृतकत्वहेतुकं विनाशित्वानुमानमत्र संभवति(१), नराशिरःकपालशौचानुमानवदागमबाधितविषयत्वात्(२)। तस्माद्यथोक्तसाधनसंपत्त्यभावान्न ब्रह्मजिज्ञासेति प्राप्तम्। एवं प्राप्ते आह भगवान् सूत्रकारः "अत"इति। तस्यार्थं व्याचष्टे भाष्यकारः "यस्माद्वेद एवे"ति। अयमभिसन्धिः। सत्यं मृगभिक्षुकादयः शक्याः परिहर्तुं पाचककृषीवलादिभिः, दुःखं त्वनेकविधानेककारणसंपातजमशक्यपरिहारम्, अन्ततः साधनपारतन्त्र्यक्षयितालक्षणयोर्दुःखयोः समस्तकृतकसुखाविनाभावनियमात्। नहि मधुविषसंपृक्तमन्नं विषं परित्यज्य समधु शक्यं शिल्पिवरेणापि भोक्तुम्। (३)क्षयितानुमानोपोद्बलितं च "तद्यथेह कर्मचित'इत्यादि वचनं क्षयितामतिपादकम् 'अपाम सोमामि'त्यादिकं वचनं मुख्यासंभवे (४)जघन्यवृत्तितामापादयति। यथाहुः पौराणिकाः—'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते' इति।

(५)अत्र च ब्रह्मपदेन तत्प्रमाणं वेद उपस्थापितः। स च योग्यत्वात् 'तद्यथेह कर्मचित' इत्यादिरत इति सर्वनाम्ना परामृश्य हेतुपञ्चम्या निर्दिश्यते। स्यादेतत्, यथा स्वर्गादेः कृतकस्य सुखस्य दुःखानुषङ्गस्तथा ब्रह्मणोऽपीत्यत आह-"तथा ब्रह्मविज्ञानादपी"ति (पृ० ७९-पं० १)। तेनायमर्थः-अतः स्वर्गादीनां क्षयितामतिपादकाद् ब्रह्मज्ञानस्य च परमपुरुषार्थतामतिपादकादागमाद् यथोक्तसाधनसंपत् ततश्च जिज्ञासेति सिद्धम्। ब्रह्मजिज्ञासापदव्याख्यानमाह "ब्रह्मण"इति। षष्ठीसमासप्रदर्शनेन प्राचां वृत्तिकृतां ब्रह्मणे जिज्ञासा ब्रह्मजिज्ञासेति चतुर्थीसमासः परास्तो वेदितव्यः। (६)'तादर्थ्यसमासे प्रकृतिविकृतिग्रहणं कर्त्तव्यमि'ति कात्यायनीयवचनेन यूपदार्वादिष्वेव प्रकृतिविकारभूतेषु चतुर्थीसमासनियमात्, अप्रकृतिविकारभूत इत्येवमादौ तन्निषेधात्, 'अश्वघासादयः षष्ठीसमासा भविष्यन्ती'त्यश्वघासादिषु षष्ठीसमासप्रतिविधानात्, षष्ठीसमासेऽपि च ब्रह्मणो वास्तवप्राधान्योपपत्तेरिति। स्यादेतत्, ब्रह्मणो जिज्ञासेत्युक्ते तत्रानेकार्थत्वाद् ब्रह्मशब्दस्य संशयः-'कस्य ब्रह्मणो जिज्ञासे'ति। अस्ति ब्रह्मशब्दो विप्रत्वजातौ यथा ब्रह्महत्येति, अस्ति च वेद यथा (७)ब्रह्मोज्झामिति,

---

(१) स्वर्गादि विनश्वरं कृतकत्वाद् घटवदित्यनुमानं न सम्भवतीत्यर्थः।

(२) नरेति। नराशिरःकपालं शुचि प्राण्यङ्गत्वाच्छङ्खवदित्यनुमानस्य यथा 'नारं स्पृष्ट्वाऽस्थि सस्नेहं सवासा जलमाविशेत्' इत्यागमेन विरोधस्तथोक्तागमेनास्यानुमानस्य बाधितत्वादित्यर्थः।

(३) कृतकत्वानुमानानुगृहीतात् 'तद्यथेति'वाक्यात् न्यायहीनम् 'अपाम' इत्यादिवाक्यमापेक्षिकामृतत्वादिपरतया व्याख्येयमित्याह क्षयितेति।

(४) जघन्यवृत्तिर्लक्षणा, तथाचात्र लक्षणायाऽमृतत्वपदेन चिरस्थायित्वं ग्राह्यमिति भावः।

(५) नित्यानित्यविवेकादेरप्रस्तुतत्वात्तदानन्तर्यमथशब्दार्थो न युक्तोऽत एव कर्मणां क्षयिष्णुफलत्वं ब्रह्मज्ञानस्य मोक्षहेतुत्वं चातःशब्देन न परामर्शार्हमिति भास्करमतं भाष्यव्याख्ययाऽनुकम्पयन्नाह अथ चेति। तर्हि सकलवेदान्ताः परामृश्येरन्नत आह योग्यत्वादिति। अथशब्दोक्तहेतुत्वसमर्थनं योग्यत्वादित्यर्थः।

(६) प्राचीनोक्तचतुर्थीसमासाभावे हेतुमाह तादर्थ्येति। पाणिनिना 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः'इति (२।१।३६) सूत्रेण तादर्थ्यचतुर्थी विहिता, तत्र च कात्यायनेन प्रकृतिविकृतिभावस्यावश्यकत्वं प्रदर्शितम्। अत एव 'यूपाय दारु' इति चतुर्थीसमासो युक्तो न तु अश्वाय घास इति, तथाचात्र ब्रह्मजिज्ञासयोः प्रकृति विकाराभावान्न चतुर्थीसमास इति भावः।

(७) ब्रह्मोऽज्झ-वेदत्यागः।

अस्ति च परमात्मनि यथा ब्रह्म वेद ब्रह्मैव भवतीति, तमिमं संशयमपाकरोति—"**ब्रह्म च वक्ष्यमाणलक्षण**"मिति (पृ० ८० पं १) यतो ब्रह्मजिज्ञासां प्रतिज्ञाय तज्ज्ञाप-नाय परमात्मलक्षणं प्रणयति ततोऽवगच्छामः परमात्मजिज्ञासैवेयं न विप्रत्वजात्यादिजिज्ञासे-त्यर्थः । 'षष्ठीसमासपरिग्रहेऽपि नेयं कर्मषष्ठी, किन्तु शेषलक्षणा, संबन्धमात्रं च शेष इति ब्रह्मणो जिज्ञासेत्युक्ते ब्रह्मसंबन्धिनी जिज्ञासेत्युक्तं भवति, तथा च ब्रह्मस्वरूपप्रमाणयुक्ति-साधनप्रयोजनजिज्ञासाः सर्वा ब्रह्मजिज्ञासार्था ब्रह्मजिज्ञासयाऽवरुद्धा भवन्ति, साक्षात्पारम्प-र्येण च ब्रह्मसंबन्धात्, कर्मषष्ठ्यां तु ब्रह्मशब्दार्थः कर्म, स च स्वरूपमेवेति तत्प्रमाणादयो नावरुध्येरन्, तथा चाप्रतिज्ञातार्थचिन्ता प्रमाणादिषु भवेदि'ति ये मन्यन्ते तान्प्रत्याह "**ब्रह्म-ण**" **इति** । "**कर्मणी**"**ति** । अत्र हेतुमाह "**जिज्ञास्येति**" (पृ० ८१ पं० १) । इच्छायाः प्रतिपत्त्यनुबन्धो ज्ञानं, ज्ञानस्य च ज्ञेयं ब्रह्म, न खलु ज्ञानं ज्ञेयं बिना निरूप्यते, न च जिज्ञासा ज्ञानं विनेति प्रतिपत्त्यनुबन्धत्वात् प्रथमं जिज्ञासा कर्मैवापेक्षते, न तु संबन्धि-मात्रम्, तदन्तरेणापि सति कर्मणि तन्निरूपणात्(१), नहि (२)चन्द्रमसमादित्यं चोपलभ्य कस्यायमिति सम्बन्ध्यन्वेषणा भवति, भवति तु ज्ञानमित्युक्ते विषयान्वेषणा किंविषयमिति, तस्मात्प्रथममपेक्षितत्वात् कर्मतयैव ब्रह्म संबध्यते, न संबन्धितामात्रेण तस्य जघन्यत्वात्, तथा च कर्मणि षष्ठीत्यर्थः। (३)ननु सत्यं न जिज्ञास्यमन्तरेण जिज्ञासा निरूप्यते, जिज्ञास्यान्तरं त्वस्या भविष्यति ब्रह्म तु शेषतया संभन्त्स्यते इत्यत आह–"**जिज्ञास्यन्तरे**"**ति** । (४)निगू-ढाभिप्रायश्चोदयति–"**ननु शेषषष्ठीपरिग्रहेऽपी**"**ति** । सामान्यसम्बन्धस्य विशेषसम्ब-न्धाविरोधेन कर्मताया अविघातेन जिज्ञासानिरूपणोपपत्तेरित्यर्थः । निगूढाभिप्राय एव दूषयति– "**एवमपि प्रत्यक्षं ब्रह्मण**" **इति** । (५)वाच्यस्य कर्मत्वस्य जिज्ञासया प्रथममपेक्षितस्य,प्रथ-मसम्बन्धार्हस्य चान्वयपरित्यागेन पश्चात्कथंचिदपेक्षितस्य सम्बन्धिमात्रस्य सम्बन्धो जघन्यः प्रथमः प्रथमश्च जघन्य इति सुव्याहृतं न्यायतत्त्वम् । (६)प्रत्यक्षपरोक्षाभिधानं च प्राथम्याप्रा-थम्यस्फुटत्वास्फुटत्वाभिप्रायम् । चोदकः स्वाभिप्रायमुद्घाटयति–"**न व्यर्थो ब्रह्माश्रि-ताशेषे**"**ति** (पृ० ८२ पं० १) । व्याख्यातमेतदधस्तात् । समाधाता स्वाभिसन्धिमुद्घाट-टयति–"**न प्रधानपरिग्रह**" **इति** । वास्तवं प्राधान्यं ब्रह्मणः । शेषं सनिदर्शनमतिरो-

---

(१) तन्निरूपणादिति । अयं भावः । स्वरूपतो जिज्ञासायां निरूपितायां पश्चात्सम्बंध्यपेक्षा जायते, ब्रह्म च ज्ञानद्वारा जिज्ञासारूपनिरूपकमिति प्रथमोदिताकाङ्क्षावशाद् ब्रह्म जिज्ञासायाः कर्मत्वेन सम्बध्यते न तु सम्बन्धिमात्रतयेति ।

(२) जिज्ञासाज्ञानयोर्विषयाधीननिरूपणं वैधर्म्यदृष्टान्तेन प्रपञ्चयन्नाह नहीति ।

(३) प्रमाणयुक्त्यादिकमेव जिज्ञासायाः कर्म स्यात् ब्रह्म तु सम्बन्धित्वेनैव निर्दिश्यतामित्यभिप्राये-णाशंकते नन्विति ।

(४) ननु श्रुतकर्मत्यागायोगे स्थिते कथं शेषषष्ठी शंक्यत इत्यत आह निगूढाभिप्राय इति । प्रमाणा-दिबहुत्वे तत्वसिद्धिरित्यभिप्रायस्यात्र निगूढता बोध्या ।

(५) वाच्यस्येति । शब्दोपात्तत्वेन साक्षात्संनिधेः, प्रथमापेक्षितस्येत्याकाङ्क्षा, प्रथमसम्बन्धार्हस्येति योग्यता, एतैर्युक्तस्य कर्मत्वस्य सम्बन्धः प्रथमः सन्नपि जघन्यः. एतैर्वियुक्तस्य सम्बन्धिमात्रस्य सम्बन्धो जघन्योऽपि प्रथम इति कल्पनं न युक्तमित्यर्थः ।

(६) ननु 'एवमपि प्रत्यक्षं' इति भाष्ये प्रत्यक्षनिर्देशो न युक्तः कर्मत्वस्य शाब्दत्वादत आह प्रत्यक्षेति।

हितार्थम्, श्रुत्यनुगमश्चातिरोहितः । तदेवमभिमतं समासं व्यवस्थाप्य जिज्ञासापदार्थमाह—**"ज्ञातु"मिति** (पृ० ८३ पं० ८) । स्यादेतत्, न ज्ञानमिच्छाविषयः, सुखदुःखावाप्तिपरिहारौ वा तदुपायौ वा तद्द्वारेणेच्छागोचरः, न चैवं ब्रह्मविज्ञानम्, न खल्वेतदनुकूलमिति वा प्रतिकूलनिवृत्तिरिति वाऽनुभूयते, नापि तयोरुपायः, तस्मिन् सत्यपि सुखभेदस्यादर्शनात्, अनुवर्तमानस्य च दुःखस्यानिवृत्तेः, तस्मान्न सूत्रकारवचनमात्रादिषिकर्मता ज्ञानस्येत्यत आह—**"अवगतिपर्यन्त"मिति** । न केवलं ज्ञानमिष्यते किन्त्ववगतिं साक्षात्कारं कुर्वदवगतिपर्यन्तं सनूवाच्यायाः इच्छायाः कर्म । कस्मात् ? **फलविषयत्वादिच्छायाः,** (१)तदुपायं फलपर्यन्तं गोचरयतीच्छेति शेषः । ननु भवत्ववगतिपर्यन्तं ज्ञानं, किमेतावतापीष्टं भवति, नह्यपेक्षणीयविषयमवगतिपर्यन्तमपि ज्ञानमिष्यत इत्यत आह—**"ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म"** (पृ० ८४ पं० १) । (२)भवतु ब्रह्मविषयावगतिः, एवमपि कथमिष्टेत्यत आह—**"(३)ब्रह्मावगतिर्हि पुरुषार्थः"** । किमभ्युदयः ? न, किन्तु निःश्रेयसं विगलितनिखिलदुःखानुषङ्गपरमानन्दघनब्रह्मावगतिर्ब्रह्मणः स्वभाव इति सैव निःश्रेयसं पुरुषार्थ इति । स्यादेतत्, न ब्रह्मावगतिः पुरुषार्थः, पुरुषव्यापारव्याप्यो हि पुरुषार्थः, न चास्या ब्रह्मस्वभावभूताया उत्पत्तिविकारसंस्कारप्राप्तयः संभवन्ति, तथासत्यनित्यत्वेन तत्स्वाभाव्यानुपपत्तेः, न चोत्पत्त्याद्यभावे व्यापारव्याप्यता, तस्मान्न ब्रह्मावगतिः पुरुषार्थ इत्यत आह—**"निशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्"** । सत्यं, ब्रह्मावगतौ ब्रह्मस्वभावे नोत्पत्त्यादयः सम्भवन्ति, तथाप्यनिर्वचनीयानाद्यविद्यावशाद् ब्रह्मस्वभावोऽपराधीनप्रकाशोपि प्रतिभानपि(४) न प्रतिभातीव पराधीनप्रकाश इव देहेन्द्रियादिभ्यो भिन्नोप्यभिन्न इव भासत इति संसारबीजाविद्याद्यनर्थनिबर्हणात्, प्रागप्राप्त इव तस्मिन्सति प्राप्त इव भवतीति पुरुषेणार्थ्यमानत्वात्पुरुषार्थ इति युक्तम् । अविद्यादित्या देग्रहणेन तत्संस्कारोऽवरुध्यते । अविद्यादिनिवृत्तिस्तूपासनाकार्यादन्तःकरणवृत्तिभेदात् साक्षात्कारादिति द्रष्टव्यम्(५) । उपसंहरति—**"(६)तस्माद् ब्रह्म जिज्ञासितव्यम्"** उक्तलक्षणेन मुमुक्षुणा । न खलु तज्ज्ञानं विना सवासनाविविधदुःखनिदानमविद्योच्छिद्यते । न च तदुच्छेदमन्तरेण विगलितनिखिलदुःखानुषङ्गानन्दघनब्रह्मात्मतासाक्षात्कारविर्भावो जीवस्य । तस्मादानन्दघनब्रह्मात्मतामिच्छता तदुपायो ज्ञानमेषितव्यम् । (७)तच्च न केवलेभ्यो वेदान्तेभ्योऽपि तु ब्रह्ममी-

---

(१) ननु साक्षात्कारसाधन ज्ञानमिच्छाविषय इति प्रतिज्ञाय फलविषयत्वादिच्छाया इति हेतुर्व्यधिकरणत्वादयुक्त इत्याशंक्याह तदुपायमिति । फलेच्छाया एवोपायपर्यन्तं प्रसरान्न विरोध इति भावः ।

(२) ब्रह्मणोपि धर्मवदसुखत्वान्न तदवगतिरित्याशङ्क्यार्थः भवत्वित्यादिग्रन्थस्य बोध्यः ।

(३) श्रुतिस्त्वानुभवावगतनिर्दुःखानन्दमभिप्रेत्य परिहारमाह ब्रह्मावगतिर्हीति ।

(४) प्रतिभान—प्रतिभासमानः ।

(५) द्रष्टव्यमिति । अनेनाविद्यानिवृत्तिर्न स्वरूपावगत्या नित्यनिवृत्त्यापातादपि तु वृत्तित इत्युक्तम् ।

(६) पदार्थाभ्याख्याय सूत्रतात्पर्यार्थमाह तस्मादित्यादिना ।

(७) ननु वेदान्तेभ्य एव तत्सिद्धेः किमिति ज्ञानमन्वेषितव्यमित्याशंक्याह तच्चेति । संदेहादिना

मांसोपकरणेभ्य इति (१)इच्छानिभेन ब्रह्ममीमांसायां प्रवर्त्यते, न तु वेदान्तेषु तदर्थविवक्षायां वा। तत्र फलवदर्थावबोधपरतां स्वाध्यायाध्ययनविधेः सूत्रयताऽऽथातो धर्मजिज्ञासे'त्यनेनैव प्रवर्त्तितत्वात्, धर्मग्रहणस्य च वेदार्थोपलक्षणत्वेनाधर्मवद् ब्रह्मणोऽप्युपलक्षणाच्च यद्यपि धर्ममीमांसावद् वेदार्थमीमांसया ब्रह्ममीमांसाप्याक्षेप्तुं शक्यते,(२)तथापि प्राच्या मीमांसया न तद्बुत्पाद्यते, (३)नापि ब्रह्ममीमांसाया अध्ययनमात्रानन्तर्यमिति ब्रह्ममीमांसारम्भाय नित्यानित्यविवेकाद्यानन्तर्यप्रदर्शनाय चेदं सूत्रमारम्भणीयमित्यपौनरुक्त्यम्।

स्यादेतत्, एतेन सूत्रेण ब्रह्मज्ञानं प्रत्युपायता मीमांसायाः प्रतिपाद्यत इत्युक्तम्, तदयुक्तं, विकल्पासहत्वादिति चोदयति–"**तत्पुनर्ब्रह्मे**"ति (पृ०८५पं० १)। (४)वेदान्तेभ्योऽपौरुषेयतया स्वतःसिद्धप्रामाण्येभ्यः प्रसिद्धमप्रसिद्धं वा स्यात्। यदि प्रसिद्धं, वेदान्तवाक्यसमुत्थेन निश्चयज्ञानेन विषयीकृतं ततो न जिज्ञासितव्यम्, निष्पादितक्रिये कर्मणि अविशेषाधायिनः साधनस्य साधनन्यायातिपातात्। अथाप्रसिद्धं वेदान्तेभ्यः, तर्हि न तद्वेदान्ताः प्रतिपादयन्तीति सर्वथाऽप्रसिद्धं नैव शक्यं जिज्ञासितुम्। अनुभूते हि प्रिये भवतीच्छा न तु सर्वथाऽननुभूतपूर्वे। न चेष्यमाणमपि शक्यं ज्ञातुं, प्रमाणाभावात्। शब्दो हि तस्य प्रमाणं वक्तव्यम्। यथा वक्ष्यति 'शास्त्रयोनित्वा'दिति। स चेत्तन्नावबोधयति, कुतस्तस्य तत्र प्रामाण्यम्। न च प्रमाणान्तरं ब्रह्मणि प्रक्रमते। तस्मात्प्रसिद्धस्य ज्ञातुं शक्यस्याप्यजिज्ञासनाद्, अप्रसिद्धस्येच्छाया अविषयत्वाद्, अशक्यज्ञानत्वाच्च न ब्रह्म जिज्ञास्यमित्याक्षेपः। परिहरति–"**उच्यते अस्ति तावद् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावम**"। अयमर्थः। (५)प्रागपि ब्रह्ममीमांसाया अधीतवेदस्य निगमनिरुक्तव्याकरणादिपरिशीलनविदितपदतदर्थसम्बन्धस्य 'सदेव सोम्येदमग्र आसीदि'त्युपक्रमात् 'तत्त्वमसी'त्यन्तात् सन्दर्भान्नित्यत्वाद्युपेतब्रह्मस्वरूपावगमस्तावदापाततो विचाराद्विनाऽप्यस्ति। (६)अत्र च ब्रह्मेत्यादिनावगम्येन तद्विषयमवगमं लक्षयति, तदस्तित्वस्य सति विमर्शे विचारात्प्रागनिर्णयात्। **नित्ये**ति क्षयितालक्षण दुःखमुपक्षिपति। **शुद्धे**ति देहाद्युपाधिकमपि दुःखमपाकरोति। **बुद्धे**त्यपराधीनप्रका-

---

(१) नन्विच्छाया विषयसौन्दर्यलभ्यत्वात्किं तत्कर्तव्यतोपदेशेनेत्यत आह इच्छानिभेनेति। ज्ञातुमिच्छा हि संदिग्धे विषये निर्णयावहा, स च विचारसाध्य इति तत्कर्तव्यतार्थाद्गम्यते, आर्थिके चात्रार्थे कर्तव्यपदाध्याहारः। औत्तस्तु मुमुक्षानन्तरं ब्रह्मज्ञानेच्छा भवितुं युक्तेत्येष एव। तथा चाधिकारार्थत्वमर्थशब्दस्य निषेद्धुं ज्ञानेच्छा जिज्ञासाशब्दार्थ इत्युपपादनान्न विरोध इति भावः।

(२) वेदान्तानामुपलक्षणतयाऽर्थविवक्षाप्रतिज्ञावद्विचारप्रतिज्ञापि तत्रैवास्त्वित्याशंक्य, तस्य तत्राप्रतिपादनादिति समाधत्ते तथापीति।

(३) पूर्वं ब्रह्मविचारप्रतिज्ञासम्भवं मत्वा परिहार उक्तः, इदानीमविरक्तस्य ब्रह्मविचारे प्रवृत्त्यनर्हत्वात्सम्भव एव नास्तीत्याह नापीति।

(४) 'युष्मदस्मदि'त्यादि उपोद्घातभाष्ये ह्यहंप्रत्यये जीवस्य प्रसिद्धेरसंसारिब्रह्मात्मभावस्याभावाद्विषयाक्षेपः कृतोऽत्र तूपेत्य ब्रह्मात्मभावं वेदान्तेभ्यस्तत्सिद्ध्यसिद्धिभ्यामाक्षेप इति विभागमाह वेदान्तेभ्य इति।

(५) यद्यपि वेदो निर्दोषस्तथापि सामान्यतो दृष्टानिबन्धनवचनव्यक्त्याभास प्रतिबद्धः संदिग्धार्थः स्यादतो विचारात्प्रागापातप्रसिद्धं दर्शयन्नप्रसिद्धत्वपक्षोक्तं दोषमुद्धरति प्रागपीति।

(६) ननु भाष्ये 'अस्ति तावद्ब्रह्म' इति प्रतिज्ञा, तत्कथं 'ब्रह्मस्वरूपावगम' इत्यत्र व्याख्यानमत आह अत्र चेति। प्रत्याख्येन ब्रह्मणा प्रत्यये लक्षणयाऽवगमव्याख्यानमिति भावः। तत्र हेतुमाह तदस्तित्वस्येति।

शमानन्दात्मानं दर्शयति, आनन्दप्रकाशयोरभेदात् । स्यादेतत , मुक्तौ(१) सत्यामस्यैते शुद्धत्वादयः प्रथन्ते, ततस्तु प्राग् देहाद्यभेदेन तद्धर्मजन्मजरामरणादिदुःखयोगादित्यत **उक्तम् "मुक्ते"**'ति । सदैव मुक्तः सदैव केवलोऽनाद्यविद्यावशात्तु भ्रान्त्या तथाऽवभासत इत्यर्थः । तदेवमनौपाधिकं ब्रह्मणो रूपं दर्शयित्वाऽविद्योपाधिकं रूपमाह **"सर्वज्ञं सर्वशक्तिसमन्वितम्"** । तदनेन जगत्कारणत्वमस्य दर्शितं, शक्तिज्ञानभावाभावानुविधानात्(२) कारणत्वभावाभावयोः । कुतः पुनरेवम्भूतब्रह्मस्वरूपावगतिरित्यत आह–**"ब्रह्मशब्दस्य ही"**'ति(पृ० ८६ पं० १)। न केवलं 'सदेव सोम्येदमि'त्यादीनां वाक्यानां पौर्वापर्यालोचनया इत्थम्भूतब्रह्मावगतिः, अपि तु ब्रह्मपदमपि निर्वचनसामर्थ्यादिममेवार्थं स्वहस्तयति । निर्वचनमाह **"बृहतेर्धातोरर्थानुगमात्"** (पृ० ८७ पं० १) । वृद्धिकर्मा हि बृहितिरतिशायने वर्तते । तच्चेदमतिशायनमनवच्छिन्नं(३) पदान्तरावगमितं नित्यशुद्धबुद्धत्वाद्यस्याभ्यनुजानातीत्यर्थः । तदेवं तत्पदार्थस्य शुद्धत्वादेः प्रसिद्धिमभिधाय त्वंपदार्थस्याप्याह **"सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः"** । सर्वस्य पांसुलपादकस्य हालिकस्यापि ब्रह्मास्तित्वप्रसिद्धिः । कुतः ? आत्मत्वात् । एतदेव स्फुटयति **"सर्वो ही"**ति (पृ० ८८ पं० १) (४)प्रतीतिमेवाप्रतीतिनिराकरणेन द्रढयति **"न ने"**ति । न न प्रत्येत्यहमस्मीति, किन्तु प्रत्येत्येवेति योजना । नन्वहमस्मीति च ज्ञास्यति मा च ज्ञासीदात्मानमित्यत आह **"यदी"**ति । **"अहमस्मीति न प्रतीयात्"** । अहंकारास्पदं हि जीवात्मानं चेन्न प्रतीयादहमिति न प्रतीयादित्यर्थः । ननु प्रत्येतु सर्वो जन आत्मानमहंकारास्पदं ब्रह्मणि तु किमायातमित्यत आह **"आत्मा च ब्रह्म"** । (५)तदस्त्वमा सामानाधिकरण्यात्, तस्मात्तत्पदार्थस्य शुद्धबुद्धत्वादेः शब्दतस्त्वंपदार्थस्य च जीवात्मनः प्रत्यक्षतः प्रसिद्धेः, पदार्थज्ञानपूर्वकत्वाच्च वाक्यार्थज्ञानस्य त्वंपदार्थस्य ब्रह्मभावावगम'स्तत्त्वमसी'तिवाक्यादु उपपद्यत इति भावः । आक्षेपा (६)प्रथमकल्पाश्रयं दोषमाह **"यदि तर्हि लोक"**इति । अध्यापकाध्येतृपरम्परा लोकः । तत्र 'तत्त्वमसी'तिवाक्यादु यदि ब्रह्मात्मत्वेन प्रसिद्धमस्ति, आत्मा ब्रह्मत्वेनेति वक्तव्ये ब्रह्मात्मत्वेनेत्यभेदविवक्षया गमयितव्यम् । परिहरति "न" । **कुतः ? "तद्विशेषं**

---

(१) भेदाभेदवादी शङ्कते मुक्ताविति । समाधत्ते सदैवेति ।

(२) यो जानाति शक्नोति च स करोति नेतर इत्यनुविधानादित्यर्थः ।

(३) ननु बृहतिधातुरतिशायनार्थोऽतु, तच्च बृहत् कुम्भ इतिवत आपेक्षिकं स्यादत आहानवच्छिन्नमिति । पदान्तरैः साक्षान्नित्यत्वादिबोधकैर्नित्यादिपदैरवगमितम् । उक्तविशेषणानामन्यतमेन रहितस्य न महत्त्वसिद्धिरतो ब्रह्मपदादुक्तवस्तुसिद्धिरिति प्रकरणादिसंकोचकाभावात् नापेक्षिकं बृहत्वमिति भावः ।

(४) सर्वस्य ब्रह्मास्तित्वप्रसिद्धिः सर्वो हि तत्प्रत्येतीति साध्यहेत्वोरविशेषमाशंक्याह प्रतीतिमेवेति । अत्र अहं न नास्मीति प्रत्येतीति योजनायामस्तित्वं न सिध्येत् असत्त्वनिषेधेऽप्यनिर्वाच्यत्वस्यानिवारणात्, अतोऽहमस्मीति न प्रत्येतीति नेति योजनैव साध्वीति भावः ।

(५) तदस्त्वमेति । 'तत्त्वमसी'ति वाक्ये तत्पदस्य प्रकृतसच्छब्दवाच्यब्रह्मपरामर्शिनस्त्वंपदेन सामानाधिकरण्याच्छब्दतस्तत्पदार्थस्य प्रत्यक्षतस्त्वंपदार्थस्य च प्रसिद्ध्याऽवधृतयोः पदार्थयोर्गृहीतसम्बन्धपदद्वयसमभिव्याहारादपूर्वो ब्रह्मात्मभावावगमरूपो वाक्यार्थ उपपद्यत इति भावः ।

(६) प्रथमेति । प्रसिद्धिपक्षाश्रयमित्यर्थः ।

प्रति विप्रतिपत्तेः" । (१)तदनेन विप्रतिपत्तिः साधकबाधकप्रमाणाभावे सति संशयबीजमुक्तम्, ततश्च संशयाज्जिज्ञासोपपद्यत इति भावः । (२)विवादाधिकरणं धर्मी सर्वतन्त्रसिद्धान्तसिद्धोऽभ्युपेयः । अन्यथाऽनाश्रया भिन्नाश्रया वा विप्रतिपत्तयो न स्युः । विरुद्धा हि प्रतिपत्तयो विप्रतिपत्तयः । न चानाश्रयाः प्रतिपत्तयो भवन्ति, अनालम्बनत्वापत्तेः । न च भिन्नाश्रया विरुद्धाः । न ह्यनित्या बुद्धिर्नित्य आत्मेति प्रतिपत्तिविप्रतिपत्ती । (३)तस्मात्तत्पदार्थस्य शुद्धत्वादेर्वेदान्तेभ्यः प्रतीतिस्त्वंपदार्थस्य च जीवात्मनो लोकतः सिद्धिः सर्वतन्त्रसिद्धान्तः । (४)तदाभासत्वानाभासत्वेन तत्तद्विशेषेषु परमत्र विप्रतिपत्तयः । तस्मात्सामान्यतः प्रसिद्धे धर्मिणि विशेषतो विप्रतिपत्तौ युक्तस्तद्विशेषेषु संशयः । तत्र त्वंपदार्थे तावद्विप्रतिपत्तीर्दर्शयति **"देहमात्र"** इत्यादिना, **"भोक्तैव केवलं न कर्ता"** इत्यन्तेन (पृ०८९ पं० २) । अत्र देहेन्द्रियमनःक्षणिकविज्ञानचैतन्यपक्षे न तत्पदार्थनित्यत्वादयस्त्वंपदार्थेन सम्बध्यन्ते, योग्यताविरहात् । शून्यपक्षेऽपि सर्वोपाख्यारहितमपदार्थः कथं तत्त्वमोर्गोचरः । कर्तृभोक्तृस्वभावस्यापि परिणामितया तत्पदार्थनित्यत्वाद्यसङ्गतिरेव । अकर्तृत्वेऽपि भोक्तृत्वपक्षे परिणामितया नित्यत्वाद्यसङ्गतिः। अभोक्तृत्वेऽपि नानात्वेनावच्छिन्नत्वाद् अनित्यत्वादिप्रसक्तावद्वैतहानाच्च तत्पदार्थासङ्गतिस्तदवस्थैव । (५)त्वंपदार्थविप्रतिपत्त्या च तत्पदार्थेऽपि विप्रतिपत्तिर्दर्शिता । वेदाप्रामाण्यवादिनो हि लौकायतिकादयस्ततपदार्थप्रत्ययं मिथ्येति मन्यन्ते । (६)वेदप्रामाण्यवादिनोऽप्यौपचारिकं तत्पदार्थमविवक्षितं वा मन्यन्त इति । तदेवं त्वंपदार्थविप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिप्रत्तिं सूचयित्वा साक्षात्तत्पदार्थे विप्रतिपत्तिमाह—**"अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित्"** (पृ०८९पं० १) । तदिति जीवात्मानं परामृशति । न केवलं शरीरादिभ्यो(७) जीवात्मभ्योऽपि व्यतिरिक्तः । स च सर्वस्यैव जगत ईष्टे । ऐश्वर्यसिद्ध्यर्थं स्वाभाविकमस्य(८) रूपद्वयमुक्तं-'सर्वज्ञः सर्वशक्तिरि'ति । तस्यापि जीवात्मभ्योऽपि व्यतिरेकान्न त्वंप-

---

(१) ननु विरुद्धज्ञानरूपविप्रतिपत्त्या वस्त्वभावः सिद्ध्येत्कथं विषयलाभ इत्यत आह तदनेनेति । न विरुद्धज्ञानमात्रेणाभावसिद्धिः किन्तु प्रमाणमूलतयाऽतः साधकबाधकमानाभावे विप्रतिपत्तिः संशयबीजमित्यर्थः ।

(२) ननु साधारणधर्मज्ञानं संशयहेतुर्न त्विह क्षणिकविज्ञानस्थिरभोक्त्रादावस्ति साधारणो धर्म इत्याशंक्य विप्रतिपत्त्यन्यथानुपपत्त्या तं साधयति विवादाधिकरणमिति । देह आत्मा इत्यादिविवादाश्रयो धर्मी परामृश्यावृत्तोऽहमास्पदं सर्वतन्त्रेष्वभ्युपगत इति मन्तव्यम् ।

(३) तस्मादिति । यस्माद्विप्रतिपत्तिरेकाश्रया यतश्चैकमालम्बने पूर्वधीविषयनिषेधेन विरुद्धधीरुदेति तस्मात्प्रतियोगितया विप्रतिपत्त्येकस्कन्धत्वेन तत्त्वम्पदार्थतदेकत्वप्रतीतिर्लोकशास्त्राभ्यां सर्वैरिष्टव्येति भावः ।

(४) तदाभासत्वेति । चार्वाकाणां सा प्रतीतिराभासः, आस्तिकानां तत्पदार्थप्रतीतेस्तत्त्वमर्थैकत्वप्रतीतेश्च गौणतायां त्वंपदार्थबुद्धेरसङ्गसाक्ष्यालम्बनतायां च विज्ञानाद्विप्रतिपत्तिरिति भावः । अत्र नाभासत्वतत्तद्दिशि ब. मु. पु. पाठः ।

(५) अत्र लौकायतिकादिनिरीश्वरमतानुभाषणेनैव तत्पदार्थे ईश्वरेऽपि विप्रतिपत्तिः सूचिताऽतस्तादृशब्रह्मात्मैकवाक्यार्थेऽपि विप्रतिरपत्तिर्थ्युक्तेत्याह त्वंपदार्थेति ।

(६) वेदप्रामाण्यवादिनो मीमांसकादयः । आम्नायस्य क्रियार्थत्वं मन्यमानैस्तैर्वेदान्तानामौपचारिकत्वमावश्यकमिति तदर्थत्वं वेति सिद्धान्ततमित्यर्थः ।

(७) शरीरादिशून्यपर्यन्तेभ्य इत्यर्थः । (८) स्वाभाविकमस्येति नैयायिकमतमाश्रित्य बोध्यम् ।

दार्थेन सामानाधिकरण्यमिति स्वमतमाह–"**आत्मा स भोक्तुरित्यपरे**" (पृ०९०पं० १) भोक्तुर्जीवात्मनोऽविद्योपाधिकस्य स ईश्वरस्तत्पदार्थ आत्मा, तत ईश्वरादभिन्नो जीवात्मा, परमाकाशादिव घटाकाशादय इत्यर्थः । विप्रतिपत्तीरुपसंहरन् विप्रतिपत्तिबीजमाह–"**एवं बहव**" इति । "**युक्ति**(१)**युक्त्याभास**[**वाक्य**]**वाक्याभास**[**समाश्रयाः स**]**न्त**" इति योजना । ननु सन्तु विप्रतिपत्तयस्तन्निमित्तश्च संशयस्तथापि किमर्थं ब्रह्ममीमांसाऽऽरभ्यत इत्यत आह––"**तत्राविचार्ये**"**ति** (पृ०९२पं०१) । तत्त्वज्ञानाच्च निःश्रेयसाधिगमो नातत्त्वज्ञानाद्भवितुमर्हति । (२)अपि च अतत्त्वज्ञानान्नास्तिक्ये सत्यनर्थप्राप्तिरित्यर्थः । सूत्रतात्पर्यमुपसंहरति–"**तस्मादि**"**ति** (पृ०९३पं०१) । (३)वेदान्तमीमांसा तावत्तर्क एव, तदविरोधिनश्च येऽन्येपि तर्का अध्वरमीमांसायां न्याये च वेदप्रत्यक्षादिप्रामाण्यपरिशोधनादिषूक्तास्त उपकरणं यस्याः सा तथोक्ता । तस्मात्परमनिःश्रेयससाधनब्रह्मज्ञानप्रयोजना ब्रह्ममीमांसाऽऽरब्धव्येति सिद्धम् ॥ १ ॥

(४)तदेवं प्रथमेन सूत्रेण मीमांसारम्भमुपपाद्य ब्रह्ममीमांसामारभते—

(सू०) जन्माद्यस्य यतः ॥ २ ॥

एतस्य सूत्रस्य पातनिकामाह भाष्यकारः––"**ब्रह्म जिज्ञासितव्यमित्युक्तं, किंलक्षणं पुनस्तद्ब्रह्म**" । अत्र यद्यपि ब्रह्मस्वरूपज्ञानस्य प्रधानस्य प्रतिज्ञया तदङ्गान्यपि प्रमाणादीनि प्रतिज्ञातानि, तथापि **स्वरूपस्य** प्राधान्यात् तदेवाक्षिप्य प्रथमं समर्थ्यते(५) । (६)तत्र यद्यावदनुभूयते तत्सर्वं परिमितम् अविशुद्धमबुद्धं विध्वंसि, न तेनोपलब्धेन तद्विपरीतस्य नित्यशुद्धबुद्धस्वभावस्य ब्रह्मणः स्वरूपं शक्यं लक्षयितुम् । नहि जातु कश्चित् कृतकत्वेन नित्यं लक्षयति । न च तद्धर्मेण नित्यत्वादिना तल्लक्ष्यते, तस्यानुपलब्धचरत्वात् । प्रसिद्धं हि लक्षणं भवति, नात्यन्ताप्रसिद्धम् । (७) एवं च न शब्दोऽप्यत्र प्रक्रमते, अत्यन्ताप्रसिद्धतया ब्रह्मणोऽपदार्थस्यावाक्यार्थत्वात् । तस्माल्लक्षणाभावाद् न ब्रह्म जिज्ञासितव्य-

---

(१) आत्मा स भोक्तुरिति पक्षे मूलं युक्तिवाक्येऽन्यत्र तदाभासौ ग्राह्यावित्यर्थः ।

(२) 'अनर्थं चेत्यादिति' भाष्यार्थमाह अपि चेति ।

(३) तर्कस्य पृथगुक्तत्वेपि वेदान्तमीमांसापि तर्क एवेत्यभिप्रेत्याह वेदान्तमीमांसेति । अत्रार्थापत्तिरनुमानं च तर्को ग्राह्यस्तदूना वेदान्तमीमांसा, तदविरोधिनो कर्ममीमांसायामुक्ताः श्रुतिलिङ्गादयो वेदप्रामाण्यपरिशोधकास्तथा वेदस्य प्रत्यक्षादीनां तदर्थादीनां च लक्षणादीनि न्यायशास्त्रे विचारितानीति तन्नोक्ताश्च सर्वे तर्का प्रमाणानुग्राहकतयोपकरणं यस्याः सेत्यर्थः ।

(४) एवं विषयाविशुद्धावात् समर्थिते विचारारम्भे तमुपजीव्योत्तरविचारप्रवृत्तेर्हेतुहेतुमद्भावलक्षणसंङ्गतिं प्रदर्शयन्नाह तदेवमिति ।

(५) समर्थ्यत इति । अनेन वेदान्तविचारो ब्रह्मज्ञानाय कर्तव्य इति प्रतिज्ञायां ब्रह्मस्वरूपविचारवत्प्रमाणयुक्तिसाधनफलाविचाराणामर्थात् प्रतिभाने कथं प्रथमं ब्रह्मैव विचार्यत इत्याक्षेपः परिहृतः ।

(६) अत्र 'यतो वा इमानि भूतानि जायन्ते' इत्यादिवाक्यं ब्रह्म लक्षयति नवेति लक्षणस्य लोकप्रसिद्ध्यप्रसिद्धिभ्यां संशय पूर्वपक्षमाह तत्रेति ।

(७) ननु लोकतोऽसिद्धमपि वेदेन ज्ञाप्यतामत आह एवञ्चेति ।

मित्याक्षेपाभिप्रायः । तमिममाक्षेपं भगवान् सूत्रकारः परिहरति--"**जन्माद्यस्य यत**" **इति** । मा भूदनुभूयमानं जगत्तद्धर्मतया तादात्म्येन वा ब्रह्मणो लक्षणं तदुत्पत्त्या तु भविष्यति, (१) देशान्तरप्राप्तिरिव सवितुर्व्रज्याया इति तात्पर्यार्थः । सूत्रावयवान् विभजते-- "**जन्मोत्पत्तिरादिरस्ये**"ति (पृ० ९७ पं०) । (२)लाघवाय सूत्रकृता जन्मादीति नपुंसकप्रयोगः कृतस्तदुपपादनाय समाहारमाह--**जन्मस्थितिभङ्गमिति** । "**जन्मनश्चे**"त्यादिः "**कारणनिर्देश**" इत्यन्तः सन्दर्भो निगदव्याख्यातः (पृ०९८पं०१) । स्यादेतत्, प्रधानकालप्रहलोकपालक्रियायदृच्छास्वभा(३)वाभावेषूपप्लवमानेषु सत्सु सर्वज्ञं सर्वशक्तिस्वभावं ब्रह्म जगज्जन्मादिकारणमिति कुतः सम्भावनेत्यत आह--"**अस्य जगत**" **इति** । अत्र "**नामरूपाभ्यां व्याकृतस्ये**"ति चेतनभावकर्तृकत्वसम्भावनया प्रधानाद्यचेतनकर्तृकत्वं निरुपाख्यकर्तृकत्वं च (४)व्यासेधति । यत् खलु नाम्ना रूपेण च व्याक्रियते तच्चेतनकर्तृकं दृष्टं, यथा घटादि, विवादाध्यासितं च जगन्नामरूपव्याकृतं तस्माच्चेतनकर्तृकं संभाव्यते । चेतनो हि बुद्धावालिख्य नामरूपे घट इति नाम्ना रूपेण च कम्बुग्रीवादिना बाह्यं घटं निष्पादयति । (५)अत एव घटस्य निर्वर्त्स्यस्याप्यन्तःसंकल्पात्मना सिद्धस्य कर्मकारकभावो-'घटं करोती'ति । यथाहुः--"**बुद्धिसिद्धं तु न तदसत्**" **इति** । तथा चाचेतनो बुद्धावनालिखितं करोतीति न शक्यं संभावयितुमिति भावः । स्यादेतत्, चेतना ब्रह्मा लोकपाला वा नामरूपे बुद्धावालिख्य जगज्जनयिष्यन्ति, कृतमुक्तस्वभावेन ब्रह्मणेत्यत आह-"**अनेककर्तृभोक्तृसंयुक्तस्ये**"ति । केचित् कर्तारो भवन्ति, यथा सूदर्त्विगादयो, न भोक्तारः । केचित्तु भोक्तारो यथा श्राद्ध(६)वैश्वानरीयेष्टयादिषु पितापुत्रादयो न कर्तारः । तस्मादुभयग्रहणम् । "**देशकालनिमित्तक्रियाफलानी**"(पृ० १० पं० १)तीतरेतरद्वन्द्वः । देशादीनि च तानि प्रतिनियतानि चेति विग्रहः । तदाश्रयो जगत् तस्य । केचित् खलु प्रतिनियतदेशोत्पादा यथा कृष्णमृगादयः । केचित् प्रतिनियतकालोत्पादाः यथा कोकिलारवादयः । केचित्प्रतिनियतनिमित्ताः यथा नवाम्बुद-

---

(१) देशान्तरेति । यथा देशान्तरप्राप्तिरूपकार्येणादित्यगतेरनुमानं तथा जगदुत्पत्त्यादिकार्येण ब्रह्मणोऽनुमानमित्यर्थः ।

(२) जन्म आदिर्ययोः स्थितिभङ्गयोस्तौ जन्मादी इत्यन्यपदार्थौ विशेषरूपेण विवक्ष्यते यदि तदा जन्मादी अस्येति निर्देशे गौरवापत्तिः स्यादिति सामान्यविवक्षया नपुंसकप्रयोगः सूत्रे कृतः । तत्र नपुंसकैकवचनप्रयोगयोर्य्यं समाहारमाह भाष्यकार इत्याह लाघवायेति ।

(३) स्वभाव एव नियन्तेति स्वभावपक्षः, न किञ्चित्कार्योत्पत्तौ नियामकमिति यदृच्छापक्षो बोध्यः ।

(४) व्यासेधति—प्रतिषेधति ।

(५) उत्पत्तेः प्रागसतः कथं बुद्धावालेखनमत आह अत एवेति ।

(६) 'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते' इत्युपक्रम्य 'पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवती'ति श्रूयते । तत्र पूतत्वादि पितुः फलमुत पुत्रस्येति संदेहे फलस्य कर्तृगामित्वनियमादितरथा प्रेरणानुपपत्तेः पितुरिति पूर्वपक्षे, यस्मिन्जाते निर्वपति स पूत इति जातगामित्वेन फलाम्नानात् पुत्रगामिफलमिति सिद्धान्तितम् । तथाच श्राद्धादौ पित्रादेरकर्तृत्वेऽपि केवलभोक्तृत्वादेव चानेककर्तृभोक्तृजीवानां ज्यत्वेन निर्देशात् जगत्कर्तृत्वायोग्यता प्रदर्शिता ।

ध्वानादिनिमित्ता बलाकागर्भादयः । केचित्प्रतिनियतक्रियाः यथा ब्राह्मणानां याजनादयो नेतरेषाम् । एवं प्रतिनियतफलाः यथा केचित्सुखिनः केचिद् दुःखिनः, एवं य एव सुखिनस्त एव कदाचिद् दुःखिनः । सर्वमेतदाकस्मिकापरनाम्नि यादृच्छिकत्वे च स्वाभाविकत्वे चासर्वशक्तिकर्तृकत्वे च न घटते, परिमितज्ञानशक्तिभिर्महलोकपालादिभिर्ज्ञातुं कर्तुं चाशक्यत्वात् । तदिदमुक्तम् **"मनसाप्यचिन्त्यरचनारूपस्ये"ति** । एकस्या अपि हि शरीररचनाया रूपं मनसा न शक्यं चिन्तयितुं कदाचित्, प्रागेव जगद्रचनायाः, किमङ्ग पुनः कर्तुमित्यर्थः । सूत्रवाक्यं पूरयति-**"तद्ब्रह्मेति वाक्यशेषः"** । स्यादेतत्, कस्मात् पुनर्जन्मस्थितिभङ्गमात्रमिहादिग्रहणेन गृह्यते, न तु वृद्धिपरिणामापक्षया अपत्यित आह—**"अन्येषामपि भावविकाराणां वृद्ध्यादीनां त्रिष्वेवान्तर्भाव इति"** । वृद्धिस्तावदवयवोपचयः । तेनाल्पावयवादवयविनो द्वितन्तुकादेरन्य एव महान् पटो जायत इति जन्मैव वृद्धिः । परिणामोऽपि त्रिविधो (१)धर्मलक्षणावस्थालक्षण उत्पत्तिरेव । (२)धर्मिणो हि हाटकादेर्धर्मलक्षणः परिणामः कटकमुकुटादिस्तस्योत्पत्तिः । (३)एवं कटकादेरपि प्रत्युत्पन्नत्वादिलक्षणः परिणाम उत्पत्तिः । (४)एवमवस्थापरिणामो नवपुराणत्वाद्युत्पत्तिः । (५)अपक्षयस्त्ववयवह्रासो नाश एव । तस्माज्जन्मादिषु यथास्वमन्तर्भावाद् वृद्ध्यादयः पृथङ्नोक्ता इत्यर्थः । अथैते वृद्ध्यादयो न जन्मादिष्वन्तर्भवन्ति तथाप्युत्पत्तिस्थितिभङ्गमेवोपादातव्यम्, तथासति हि तत्प्रतिपादके "यतो वा इमानि भूतानी"ति वेदवाक्ये बुद्धिस्थीकृते जगन्मूलकारणं ब्रह्म लक्षितं भवति, अन्यथा तु जायतेऽस्ति वर्धत इत्यादीनां ग्रहणे तत्प्रतिपादकं नैरुक्तवाक्यं बुद्धौ भवेत्, तच्च न मूलकारणप्रतिपादनपरम्, महासर्गादूर्ध्वं स्थितिकालेऽपि तद्वाक्योदितानां जन्मादीनां भावविकाराणामुपपत्तेः, इति शङ्कानिराकरणार्थं वेदोक्तोत्पत्तिस्थितिभङ्गग्रहणमित्याह **"यास्कपरिपाठितानां त्वि"ति** । नन्वेवमप्युत्पत्तिमात्रं सूच्यतां, तज्जान्तरीयकतया तु स्थितिभङ्गं गम्यत इत्यत आह **"योत्पत्तिर्ब्रह्मणः"** (पृ० १०२ पं० २) (६)कारणादिति । त्रिभिरस्योपादानत्वं सूच्यते । (७)उत्पत्तिमात्रं तु निमित्त-

---

(१) धर्मलक्षणेति । धर्म इति लक्षणमिति अवस्थेति त्रीणि लक्षणानि यस्य परिणामस्य स तथोक्तस्त्रिविधोऽप्युत्पत्तावन्तर्भवतीत्यर्थः ।

(२) धर्मपरिणामं विवृणोति धर्मिण इति । साङ्ख्यमते यः कनकादेर्धर्मिणो धर्मपरिणामो कटकमुकुटादिस्तस्यैव कनकात्कटकाद्युत्पत्तिरिति भावः ।

(३) लक्षणपरिणाममाह एवमिति । प्रत्युत्पन्नत्वं वर्तमानत्वं, कटकादिकार्यस्य वर्त्तमानत्वातीतत्वभविष्यत्वादिरूपः साङ्ख्यमतसिद्धः लक्षणपरिणामोऽप्युत्पत्तिरित्यर्थः ।

(४) अवस्थापरिणाममाह एवमिति । अतीतादेरेवातीतत्वातीततरत्वातीततमत्वादिरूपो नवपुराणत्वापत्तिरवस्थापरिणामो ऽपि स चोत्पत्तिरेवेत्यर्थः । (५) अपक्षयस्य विनाशेऽन्तर्भावमाह अपक्षयस्त्विति ।

(६) ब्रह्मण इति षष्ठ्यन्तशङ्कानिराकरणायाह कारणादिति ।

(७) उत्पत्तिमात्रादेव लक्षणस्यालक्ष्यव्यावृत्तिसिद्धौ स्थितिलयोपादानमाशङ्कानिवृत्त्यर्थमित्याह उत्पत्तिमात्रमिति । उत्पादकत्वं निमित्तेपि दृष्टमित्युपादानसिद्धये लयाश्रयत्वमुक्तमित्यर्थः । नन्वेवमपीतरवैयर्थ्यं लयाधारत्वादेवोपादानत्वसिद्धेर्नहि दण्डादिषु कुम्भादयो लीयन्त इति चेत् । नह्यत्रोपादानत्वसूचनायैव तदुक्तं किन्तु प्रकृतिविकाराभेदव्यायेनाद्वैतसिद्धये, एवं च ब्रह्मणो जगत उपादानत्वं स्यादधिष्ठाता तु तदन्य उत्पत्तिस्थित्योर्भवेत्कुम्भकार इव कुम्भस्योत्पत्तावित्याशङ्कानिरासायोत्पत्तिस्थितिग्रहणमिति भावः ।

कारणसाधारणमिति नोपादानं सूचयेत् । तदेदमुक्तं "तत्रैवे"ति । पूर्वोक्तानां कार्यकारणविशेषणानां प्रयोजनमाह "न यथोक्ते"ति । (१)तदनेन प्रबन्धेन प्रतिज्ञाविषयस्य ब्रह्मस्वरूपस्य लक्षणद्वारेण संभावनोक्ता । तत्र प्रमाणं वक्तव्यम् । यथाहुर्नैयायिकाः—

'संभावितः प्रतिज्ञायां पक्षः साध्येत हेतुना ।
न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः ॥ यथा च 'वन्ध्या जननीत्यादि'रिति ।

इत्थं नाम जन्मादिसंभावनाहेतुः, यदन्ये वैशेषिकादय इत एवानुमानादीश्वरविनिश्चयमिच्छन्तीति संभावनाहेतुतां द्रढयितुमाह "एतदेवे"ति (पृ० १०३ पं० ३) चोदयति–"नन्विहापी"ति । एतावतैवाधिकरणार्थे समाप्ते वक्ष्यमाणाधिकरणार्थमनुवदन् सुहृद्भावेन परिहरति–"ने"ति(२)। वेदान्तेति । वेदान्तवाक्यकुसुमग्रथनार्थतामेव दर्शयति–"वेदान्ते"ति । विचारस्याध्यवसानं सवासनाविद्याद्वयोच्छेदः । ततो हि ब्रह्मावगतेर्निर्वृत्तिराविर्भावः । तत्किं ब्रह्मणि शब्दादृते न मानान्तरमनुसरणीयम्, तथा च कुतो मननं, कुतश्च तदनुभवः साक्षात्कार इत्यत आह––"सत्सु तु वेदान्तवाक्येष्वि"ति (पृ० १०६ पं० ३) अनुमानं वेदान्तविरोधि तदुपजीवि चेत्यपि द्रष्टव्यम् । (३)शब्दाविरोधिन्या तदुपजीविन्या च युक्त्या विवेचन मननम् । युक्तिश्चार्थापत्तिरनुमानं वा । स्यादेतत्, यथा धर्मे न पुरुषबुद्धिरपेक्षाहार्यम्, एवं ब्रह्मण्यपि कस्मान्न भवतीत्यत आह–"न धर्मजिज्ञासायामिवे"ति (पृ० १०७ पं० ३) । "श्रुत्यादय"इति । श्रुतीतिहासपुराणस्मृतयः प्रमाणम् । अनुभवोऽन्तःकरणवृत्तिभेदो ब्रह्मसाक्षात्कारस्तस्याविद्यानिवृत्तिद्वारेण ब्रह्मस्वरूपाविर्भावः प्रमाणफलम् । तच्च फलमिव फलमिति गमयितव्यम् । (४)यद्यपि धर्मजिज्ञासायामपि सामग्र्यां प्रत्यक्षादीनां व्यापारस्तथापि साक्षान्नास्ति, ब्रह्मजिज्ञासायां तु साक्षादनुभवादीनां संभवोऽनुभवार्था च ब्रह्मजिज्ञासेत्याह—"अनुभवावसानत्वात्" । ब्रह्मानुभवो ब्रह्मसाक्षात्कारः परमपुरुषार्थो निर्मृष्टनिखिलदुःखपरमानन्दरूपत्वादिति । ननु भवतु ब्रह्मानुभवार्था जिज्ञासा, तदनुभव एव त्वशक्यो ब्रह्मणस्तद्विषयत्वायोग्यत्वादित्यत आह–"भूतवस्तुविषयत्वाच्च

---

(१) ननु लक्षणादेव ब्रह्मसिद्धौ शास्त्रयोनित्वसमन्वयाधिकरणयोर्वैयर्थ्यमित्याशङ्क्याह तदनेनेति । लक्षणं हि सिद्धस्य वस्तुनो भेदमवगमयति ईदृशं तादिति न सत्ताम् । कार्येण चात्र कारणं किंचिदस्तीति ज्ञातम्, तच्चैकमनेकं वेति संदिग्धं, तस्य यदैकत्वं सेत्स्यति तदा भवति तत्सर्वज्ञं सर्वशक्ति च नेतरथा, अयमेव संशयः कल्पनालाघवाख्यतर्केणोत्कटैककोटिकतां नीतः सम्भावना, प्रासादादीनां बहुकर्तृकत्वस्य दृष्टत्वान्न तत्र निर्णयोऽतो निर्णयार्थमग्रिमाधिकरणे आवश्यके इति भावः ।

(२) ब. भू. पुस्तके इति पदं नास्ति ।

(३) यदुक्तं ब्रह्मणो मानान्तराविषयत्वे कुतो मननम् इति, तत्राह शब्दाविरोधिन्येति । जगत्कारणस्य सर्वज्ञत्वादिसिद्धौ युक्तिः शब्दमुपजीवति न स्वतन्त्रा । कारणस्य तत्त्वं संभावयन्तीतिकर्तव्यता च न मानान्तरमित्यर्थः ।

(४) ननु धर्मजिज्ञासाया श्रुत्यादय एव प्रमाणमित्युक्तं वेदविषयश्रोत्रप्रत्यक्षाद्यपेक्षणादित्याशङ्क्य, ज्ञातव्ये धर्मे न साक्षात्कारतदुपयोगियुक्त्यादीनां सम्भवो, ब्रह्मजिज्ञासा तु साक्षात्कारपर्यन्तेत्याह यद्यपीत्यादिना । अनुभवार्था चेति । तत्त्वसाक्षात्कारं विनाऽपरोक्षसंसारभ्रमनिवृत्त्यसम्भवादपि ब्रह्मजिज्ञासाऽनुभवावसानेत्यर्थः ।

ब्रह्मविज्ञानस्य" । (१)व्यतिरेकसाक्षात्कारस्य विकल्परूपो विषयविषयिभावः, नत्वेवं धर्मज्ञानमनुभवावसानं, तदनुभवस्य स्वयमपुरुषार्थत्वात्, तदनुष्ठानसाध्यत्वात् पुरुषार्थस्य, अनुष्ठानस्य च विनाप्यनुभवं शाब्दज्ञानमात्रादेव सिद्धेरित्याह—"कर्त्तव्ये हीत्यादिना" । न चायं साक्षात्कारविषयतायोग्योऽप्यवर्तमानत्वात्, अवर्तमानश्चानवस्थितत्वादित्याह—"पुरुषाधीने"ति । पुरुषाधीनत्वमेव लौकिकवैदिककार्याणामाह—"कर्तुमकर्तु"मिति (पृ० १०८ प० १) । लौकिकं कार्यमनवस्थितमुदाहरति—"यथा ऽश्वेने"ति । लौकिकेनोदाहरणेन सह वैदिकमुदाहरणं समुच्चिनोति—"तथाऽनिराह" इति (पृ० १०९ पं० १) । कर्तुमकर्तुमित्यस्येदमुदाहरणमुक्तम् । कर्तुमन्यथा वा कर्तुमित्यस्योदाहरणमाह—"उदित इति" । स्यादेतत्, पुरुषस्वातन्त्र्यात् कर्तव्ये विधिप्रतिषेधानामानर्थक्यम्, अतदधीनत्वात् पुरुषप्रवृत्तिनिवृत्त्योरित्यत आह—"विधिप्रतिषेधाश्चार्थवन्तः स्युः" । (२)गृह्णातीति विधिः । न गृह्णातीति प्रतिषेधः । उदितानुदितहोमयोर्विधी । एवं (३)नारास्थिस्पर्शननिषेधो ब्रह्मघ्नश्च तद्धारणविधि(४)रित्येवंजातीयका विधिप्रतिषेधा अर्थवन्तः, कुत इत्यत आह—"विकल्पोत्सर्गापवादाश्च" (पृ० ११० पं० १) । चो हेतौ । यस्माद्ग्रहणाग्रहणयोरुदितानुदितहोमयोश्च विरोधात्समुच्चयासम्भवे तुल्यबलतया च बाध्यबाधकभावाभावे सत्यगत्या विकल्पः, नारास्थिस्पर्शननिषेधतद्धारणयोश्च विरुद्धयोरतुल्यबलतया न विकल्पः, किन्तु सामान्यशास्त्रस्य स्पर्शननिषेधस्य धारणविधिविषयेण विशेषशास्त्रेण बाधः । (५)एतदुक्तं भवति । विधिप्रतिषेधैरेव स तादृशो विषयोऽनागतोत्पाद्यरूप उपनीतो येन पुरुषस्य विधिनिषेधाधीनप्रवृत्तिनिवृत्त्योरपि स्वातन्त्र्यं भवतीति । भूते वस्तुनि तु नेयमस्ति विधेत्याह—"न तु वस्त्वेवं नैव"मिति । तदनेन प्रकारविकल्पो निरस्तः । प्रकारिविकल्पं निषेधति—"अस्ति नास्ती"ति । स्यादेतत्, भूतेऽपि वस्तुनि विकल्पो दृष्टः, यथा स्थाणुर्वा पुरुषो वेति, तत्कथं न वस्तु विकल्प्यत इत्यत आह—"विकल्पनास्तित्व"मिति । "पुरुषबुद्धि"रन्तःकरणं, तदपेक्षा विकल्पनाः संशयविपर्यासाः, (६)सवासनमनोमात्रयोनयो वा यथा स्वप्ने, सवासनेन्द्रियमनोयोनयो वा यथा स्थाणुर्वा पुरुषो वेति स्थाणौ संशयः, पुरुष एवेति वा विपर्यासः, अन्यशब्देन वस्तुतः स्थाणोर-

---

(१) व्यतिरेकः प्रपञ्चाभावोपलक्षितब्रह्मस्वरूपं, तद्विषयसाक्षात्कारस्य विकल्परूपो ब्रह्मणा सह विषयविषयिभावरूपः सम्बन्धोऽस्ति न तु तत्त्वत इति भावः ।

(२) भाष्यस्थविध्यादिशब्दानुदाहृतवाक्येषु योजयति गृह्णातीत्यादिना ।

(३) नारेति । 'नारं स्पृष्ट्वाऽस्थि सस्नेह सवासा जलमाविशेत्, इति नारास्थिस्पर्शनिषेधो बोध्यः ।

(४) "शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन् । ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥" (या० ३।२४३) इति ब्रह्मघ्नः शवशिरसो नारास्थनो ध्वजत्वेन धारणविधिर्द्रष्टव्यः ।

(५) अत्र भाष्ये प्रतिज्ञामात्रं भाति न हेतुरत आह एतदुक्तं भवतीत्यादिना । स्वातन्त्र्येण कर्तुं समर्थोऽपि हिताहितोपायत्वमजानन् तद्बोधकविधिनिषेधापेक्ष इति भावः ।

(६) अन्तःकरणजकल्पनाद्वैविध्यमाह सवासनेति । जाग्रद्वासनाभासितं मन एव स्वप्नकारणम्, अतः स्वप्ने मानोमात्रयोनित्वं संशयविपर्यासानाम् । जाग्रत्संशयविपर्यासास्तु संस्कारसहितान्तर्बहिःकरणा इति भावः ।

न्यस्य पुरुषस्याभिधानात्, "न तु पुरुषतत्त्वं वा स्थाणुतत्त्वं वाऽपेक्षन्ते समानधर्मधर्मिदर्शनमात्राधीनजन्मत्वात्। तस्मादयथावस्तवो(१) विकल्पना न वस्तु विकल्पयन्ति वाऽन्यथयन्ति वेत्यर्थः। तत्त्वज्ञानं तु न बुद्धितन्त्रं, किन्तु वस्तुतन्त्रमतस्ततो वस्तुविनिश्चयो युक्तो, न तु विकल्पनाभ्य इत्याह--**"न वस्तुयाथात्म्ये"ति**। एवमुक्तेन प्रकारेण भूतवस्तुविषयाणां ज्ञानानां प्रामाण्यस्य वस्तुतन्त्रतां प्रसाध्य ब्रह्मज्ञानस्य वस्तुतन्त्रतामाह--**"तत्रैवं सती"ति** (पृ० १११ पं० ४)। अत्र चोदयति-**"ननु भूते"ति** (पृ० ११२ पं० १)। यत् किल भूतार्थं वाक्यं तत्प्रमाणान्तरगोचरार्थतयाऽनुवादकं दृष्टम्, यथा नद्यास्तीरे फलानि सन्तीति, तथा च वेदान्ताः, तस्माद्भूतार्थतया प्रमाणान्तरदृष्टमेवार्थमनुवदेयुः। उक्तं च ब्रह्मणे जगज्जन्मादिहेतुकमनुमानं प्रमाणान्तरम्। एवं च मौलिकं तदेव परीक्षणीयं, न तु वेदान्तवाक्यानि तदधीनसत्यत्वानीति कथं वेदान्तवाक्यप्रथनार्थता सूत्राणामित्यर्थः। परिहरति-**"नेन्द्रियाविषयत्वे"ति**। कस्मात्पुनर्नेन्द्रियविषयत्वं प्रतीच इत्यत आह-**"स्वभावत" इति**। अत एव श्रुतिः--

(२)'पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्म'निति।

"सति हीन्द्रिये"ति। प्रत्यगात्मनस्त्वविषयत्वमुपपादितम्। यथा च सामान्यतो दृष्टमप्यनुमानं ब्रह्मणि न प्रवर्त्तते तथोपरिष्टान्निपुणतरमुपपादयिष्यामः।(३) उपपादितं चैतदस्माभिर्विस्तरेण न्यायकणिकायाम्। न च भूतार्थतामात्रेणानुवादेतत्युपरिष्टा(४)दुपपादयिष्यामः। तस्मात्सर्वमवदातम्। श्रुतिश्च 'यतो वे'ति जन्म दर्शयति, 'येन जातानि जीवन्ती'ति जीवनं स्थितिं, 'यत्प्रयन्ती'ति तत्रैव लयम्। **"तस्य च निर्णयवाक्यम्"** (पृ० १०४ पं०)। (५)अत्र च प्रधानादिसंशये निर्णयवाक्यम् 'आनन्दाद्ध्येवे'ति। (६)एतदुक्तं भवति। यथा रज्ज्वज्ञानसहितरज्जूपादाना धारा रज्ज्वां सत्यामस्ति रज्ज्वामेव च लीयते, एवमविद्यासहितब्रह्मोपादानं जगद् ब्रह्मण्येवास्ति तत्रैव च लीयते इति सिद्धम्॥ २॥

---

(१) अयथावस्तव इति। यथावस्तुत्वं वस्त्वनुसारित्वं यासां नास्ति तास्तथोक्ताः, संशया वस्तु न विकल्पयन्ति, विपर्यया नान्यथयन्तीति भावः।

(२) पराञ्चि इति। खानि इन्द्रियाणि, व्यतृणत्—हिंसितवान् पराङ् पश्यति लोकः। अत्र प्रत्यगात्मानवलोकनमेवेन्द्रियाणां हिंसा बोध्या।

(३) उपपादितं चेति। विमतं कार्यं बुद्धिमत्कर्तृकं कार्यत्वादित्यनुमानात्सामान्यतोदृष्टादीश्वरसिद्धिर्नैयायिकैः क्रियते। तत्र च जीवजन्यत्वेन सिद्धसाधनम्, उपकरणाद्यभिज्ञकर्तृकत्वसाधने कतिपयतदभिज्ञतायां सर्वज्ञासिद्धिः। सर्वतदभिज्ञकर्तृकत्वे सपक्षस्य साध्यहीनतेत्यादयो दोषा० न्यायकणिकायामुपादिता इति भावः।

(४) उपरिष्टात्-समन्वयसूत्रे।

(५) अत्र सूत्रस्य स्वरूपलक्षणपरत्वं दर्शयितुं तस्य चेति भाष्यं व्याचष्टे अत्र चेति। जगद्विशेषणैः पूर्वं निर्णयेपि श्रुतित इह निर्णीयते। कारणं ब्रह्मानूद्य वाक्येनानन्दत्वविधानात्स्वरूपलक्षणं सिद्धिरित्यर्थः। आनन्दस्य सत्यादेरुपलक्षणं बोध्यम्।

(६) नन्वेवंभूतब्रह्मणः कथं जगद्योनित्वमत आह एतदिति।

सूत्रान्तरमवतारयितुं पूर्वसूत्रसंगतिमाह--"जगत्कारणत्वप्रदर्शनेने"ति (पृ० ११५ पं० ६)।

(सू०) शास्त्रयोनित्वात् ॥ ३ ॥

न केवलं जगद्योनित्वादस्य भगवतः सर्वज्ञता, शास्त्रयोनित्वादपि बोद्धव्या । शास्त्रयोनित्वस्य सर्वज्ञतासाधनत्वं समर्थयते--(१)"महत ऋग्वेदादेः शास्त्रस्ये"ति (पृ० ११७ पं० २) चातुर्वर्ण्यस्य चातुराश्रम्यस्य च यथायथं निषेकादिश्मशानान्तासु ब्राह्ममुहूर्तोपक्रमप्रदोषपरिसमापनीयासु नित्यनैमित्तिककाम्यकर्मपद्धतिषु च ब्रह्मतत्त्वे च शिष्याणां शासनात् शास्त्रमृग्वेदादि, अत एव महाविषयत्वात् महत् । न केवलं महाविषयत्वेनास्य महत्त्वम् , अपि त्वनेकाङ्गोपाङ्गोपकरणतयापीत्याह--"अनेकविद्यास्थानोपबृंहितस्य" । पुराणन्यायमीमांसादयो दश(२) विद्यास्थानानि तैस्तया (३)तया द्वारोपकृतस्य । तदनेन समस्तशिष्टजनपरिग्रहेणाप्रामाण्यशङ्काऽप्यपाकृता । पुराणादिप्रणेतारो हि महर्षयः शिष्टास्तैस्तया तया द्वारा वेदान् व्याचक्षाणैस्तदर्थं चादरेणानुतिष्ठद्भिः परिगृहीतो वेद इति । न चायमनवबोधको नाप्यस्पष्टबोधको येनाप्रमाणं स्यादित्याह--"प्रदीपवत् सर्वार्थावद्योतिनः"। सर्वमर्थजातं सर्वथाऽवबोधयन् नानवबोधको नाप्यस्पष्टबोधक इत्यर्थः । अत एव "सर्वज्ञकल्पस्य" (पृ० ११८ पं० १) सर्वज्ञसदृशस्य । सर्वज्ञस्य हि ज्ञानं सर्वविषयं शास्त्रस्याप्यभिधानं सर्वविषयमिति सादृश्यम् । तदेवमन्वयमुक्त्वा व्यतिरेकमाह--(४)"न हीदृशस्ये"ति । सर्वज्ञस्य गुणः सर्वविषयता तदन्वितं शास्त्रम् , अस्यापि सर्वविषत्वात् । उक्तमर्थं प्रमाणयति--(५)"यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात् सम्भवति स पुरुषविशेषस्ततोऽपि शास्त्रादधिकतरविज्ञान" (पृ० ११९ पं० १) इति योजना । अद्यत्वेऽप्यस्मदादिभिर्यत्समीचीनार्थविषयं शास्त्रं विरच्यते तत्रास्माकं वक्तृणां वाक्याज्ज्ञानमधिकविषयम् । नहि ते तेऽसाधारणधर्मा अनुभूयमाना अपि शक्या वक्तुम् । न खल्विक्षुक्षीरगुडादीनां मधुररसभेदाः शक्याः सरस्वत्याप्याख्यातुम् । विस्तरार्थमपि वाक्यं न वक्तृज्ञानेन तुल्यविषयमिति कथयितुं विस्तरग्रहणम् । सोपनयं निगमनमाह--"किमु वक्तव्य"मिति । (६)वेदस्य यस्माद् महतो भूताद् योनेः सम्भवः तस्य महतो भूतस्य ब्रह्मणो निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं च किमु वक्तव्यमिति योजना । "अनेकशाखे"ति।

---

(१) अनेन ब्रह्मेत्यन्तेन भाष्येण निश्वसितश्रुत्या विभुत्वहेतूपकृतया ब्रह्मकार्यं वेद इत्युक्तम् ।

(२) पुराणन्यायमीमांसाधर्मशास्त्राणि शिक्षाकल्पव्याकरणनिरुक्तछन्दोज्योतिषाख्यानि षडङ्गानि चेति दश विद्यास्थानानि बोध्यानि ।

(३) तया तयाद्वारेति । तत्र सृष्टिवाक्यापेक्षितसर्गादिप्रपञ्चनद्वारा पुराणमद्वैतपरं, जातिभ्याक्लिलक्षणनिरूपणेन न्यायश्च वैदिकपदार्थशुद्ध्यर्थः । शेषोपयोगस्तु स्पष्ट एव ।

(४) 'नहीदृशस्ये'त्यारभ्या'स्ती'त्यन्तभाष्येण व्यतिरेकद्वारा ब्रह्मणः सर्वज्ञत्वप्रतिज्ञा प्रदर्शिता ।

(५) अनेन यदित्यादिना लोके इत्यन्तेन भाष्येण व्याप्तिः प्रदर्शिता ।

(६) अयमत्रानुमानाकारः--ब्रह्म वेदविषयादधिकविषयज्ञं तत्कर्तृकत्वात, यो यद्वाक्यप्रमाणकर्ता स तद्विषयादधिकविषयज्ञो यथा पाणिनिरिति । सर्वत्रभासकवेदकर्तृत्वेन च पक्षधर्मताबलात्सर्वज्ञत्वसिद्धिर्ब्रह्मणो द्रष्टव्या ।

अत्र चानेकशाखाभेदाभिन्नस्येत्यादिः सम्भव इत्यन्त उपनयः । तस्येत्यादि सर्वशक्तित्वं चेत्यन्तं निगमनम् । "अप्रयत्नेनैवे"ति । (पृ० १२० पं० १) । ईषत्प्रयत्नेन, यथाऽलवणा यवागूरिति । देवर्षयो हि महापरिश्रमेणापि यत्राशक्तास्तदयमीषत्प्रयत्नेन लीलयैव करोतीति निरतिशयमस्य सर्वज्ञत्वं सर्वशक्तित्वं चोक्तं भवति । अप्रयत्नेनास्य वेदकर्तृत्वे श्रुतिरुक्ता 'अस्य महतो भूतस्ये'ति । (१)येऽपि तावद् वर्णानां नित्यत्वमास्थिषत तैरपि पदवाक्यादीनामनित्यत्वमभ्युपेयम् । आनुपूर्वीभेदवन्तो हि वर्णाः पदम् । पदानि चानुपूर्वीभेदवन्ति वाक्यम् । व्यक्तिधर्मश्चानुपूर्वी न वर्णधर्मः, वर्णानां नित्यानां विभूनां च कालतो देशतो वा पौर्वापर्यायोगात् । व्यक्तिश्चानित्येति कथं तदुपगृहीतानां वर्णानां नित्यानामपि पदता नित्या । पदानित्यतया च वाक्यादीनामप्यनित्यता व्याख्याता । (२)तस्मान्नृत्यानुकरणवत् पदाद्यनुकरणम् । यथा हि यादृशं गात्रचलनादि नर्तकः करोति तादृशमेव शिक्ष्यमाणाऽनुकरोति नर्तकी, न तु तदेव व्यनक्ति । एवं यादृशीमानुपूर्वीं वैदिकानां वर्णपदादीनां करोत्यध्यापयिता तादृशीमेवानुकरोति माणवको, न तु तामेवोच्चारयति आचार्यव्यक्तिभ्यो माणवकव्यक्तीनामन्यत्वात् । तस्मान्नित्यानित्यवर्णवादिनां न लौकिकवैदिकपदवाक्यादिपौरुषेयत्वे विवादः, केवलं वेदवाक्येषु पुरुषस्वातन्त्र्यास्वातन्त्र्ये विप्रतिपत्तिः । यथाहुः—

यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता ।

तत्र सृष्टिप्रलयमनिच्छन्तो जैमिनीया वेदाध्ययनं प्रत्यस्मादृशगुरुशिष्यपरम्परामविच्छिन्नामनादिमाचक्षते । (३)वैयासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतीतिहासादिसिद्धसृष्टिप्रलयानुसारेणानाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि न तेषु स्वातन्त्र्यं, पूर्वपूर्वसर्गानुसारेण तादृशतादृशानुपूर्वीविरचनात् । (४)तथा हि यागादिब्रह्महत्यादयोऽर्थानर्थहेतवो ब्रह्मविवर्ता अपि न सर्गान्तरे विपरीयन्ते, नहि जातु क्वचित् सर्गे ब्रह्महत्याऽर्थहेतुरनर्थहेतुश्चाश्वमेधो भवति, अग्निर्वा क्लेदयति, आपो वा दहन्ति, तद्वत् । (५)यथाऽत्र सर्गे नियतानुपूर्व्यं वेदाध्ययनमभ्युदयनिःश्रेयसहेतुरन्यथा तदेव वाग्वज्रतयाऽनर्थहेतुः एवं सर्गान्तरेष्वपीति, तदनुरोधाद् सर्वज्ञोऽपि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारेण वेदान् विरचयन्न स्वतन्त्रः । पुरुषास्वातन्त्र्यमात्रं चापौरुषेयत्वं रोचयन्ते जैमिनीया अपि, तच्चा-

---

(१) अधुना वेदस्योक्तरीत्या कर्तृमत्त्वाङ्गीकारे सापेक्षतया स्वातन्त्र्यहानिरिति ये वदन्ति तेषां मतमपाकर्तुमुपोद्घातमाह येऽपीति । अयमाशयः । वेदस्य सापेक्षत्वं नाम किं पुरुषनिर्वर्त्यत्वमात्रा[१]त् , अभिनवानुपूर्वीविरचनाद्वा[२], मानान्तरोपलब्धार्थविषयवचनारचनाद्वा, [३]कतिपयकालविरचितसर्वसम्प्रदायस्य वेदस्यैकपुरुषान्निःस्मरणाद्वा[४] ? तत्र नाद्यस्तवापि सम्मतत्वादित्याह वर्णानां नित्यत्वमिति । व्यक्तिरभिव्यक्तिः ।

(२) द्वितीये क्रमान्यत्वमात्रमभिनवत्वं विसदृशक्रमत्वं वा ? आद्ये भवद्भिरप्यङ्गीकृतश्चरमस्तु नास्माभिरप्यङ्गीकृत इत्याह तस्मान्नृत्येति । नृत्तेतिपाठान्तरमत्र बोध्यम् ।

(३) तृतीयपक्षस्तु अनभ्युपगमनिरस्त इत्याह वैयासिकं त्विति । अनुवर्तमाना आचक्षते इत्यनुषज्यते।

(४) ननु विवर्तत्वे वेदान्तानां यादृच्छिकत्वापातान्न क्रमनियमः स्यात्तत्राह तथा हीति ।

(५) सर्वज्ञस्य सर्वशक्तेर्ब्रह्मणो नोपाध्यायवत् क्रमानुरोधो युक्त इति तत्राह यथाऽत्रेति । अत एव च 'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ इति श्रूयते श्रुतौ ।

स्माकमपि समानमन्यत्राभिनिवेशात् । न(१) चैकस्य प्रतिभानेऽनाश्वास इति युक्तम् । नहि बहूनामप्यज्ञानां विज्ञानां वाऽऽशयदोषवतां प्रतिभाने युक्त आश्वासः । तत्त्वज्ञानवतश्चापास्तसमस्तदोषस्यैकस्यापि प्रतिभाने युक्त एवाश्वासः । (२)सर्गादिभुवां प्रजापतिदेवर्षीणां धर्मज्ञानवैराग्यैश्वर्यसम्पन्नानामुपपद्यते तत्स्वरूपावधारणं, तत्प्रत्ययेन चार्वाचीनानामपि तत्र सम्प्रत्यय इत्युपपन्नं ब्रह्मणः शास्त्रयोनित्वं, शास्त्रस्य चापौरुषेयत्वं प्रामाण्यं चेति ॥

वर्णकान्तरमारभते—"**अथवे**"ति । (पृ० १२१ पं०) पूर्वेणाधिकरणेन ब्रह्मस्वरूपलक्षणासम्भवाशङ्कां व्युदस्य लक्षणसम्भव उक्तः । तस्यैव तु लक्षणस्यानेनानुमानत्वाशङ्कामपाकृत्यागमोपदर्शनेन ब्रह्मणि शास्त्रं प्रमाणमुक्तम् । अक्षरार्थस्त्वतिरोहितः ॥ ३ ॥

शास्त्रप्रमाणकत्वमुक्तं ब्रह्मणः प्रतिज्ञामात्रेण, तदनेन सूत्रेण प्रतिपादनीयमित्युत्सूत्रं पूर्वपक्षमारचयति भाष्यकारः—"**कथं पुनरि**"ति । (पृ० १२३ पं० २) । (३)किमाक्षेपे । शुद्धबुद्धोदासीनस्वभावतयोपेक्षणीयं ब्रह्म भूतमभिदधतां वेदान्तानामपुरुषार्थोपदर्शिनामप्रयोजनत्वापत्तेः, भूतार्थत्वेन च प्रत्यक्षादिभिः समानविषयतया लौकिकवाक्यवत् तदर्थानुवादकत्वेनाप्रामाण्यप्रसङ्गात् । न खलु लौकिकानि वाक्यानि प्रमाणान्तरविषयमर्थमवबोधयन्ति स्वतः प्रमाणम्, एवं वेदान्ता अपीत्यनपेक्षत्वलक्षणं प्रामाण्यमेषां व्याहन्येत । न च तैरप्रमाणैर्भवितुं युक्तम्, न चाप्रयोजनैः, स्वाध्यायाध्ययनविध्यापादितप्रयोजनवत्त्वनियमात् । तस्मात्तद्विहितकर्मापेक्षितकर्तृदेवतादिप्रतिपादनपरत्वेनैव क्रियार्थत्वम् । यदि त्वसंनिधानात्तत्परत्वं न रोचयन्ते, ततः सन्निहितोपासनादिक्रियापरत्वं वेदान्तानाम् । एवं हि प्रत्यक्षाद्यनधिगतगोचरत्वेनानपेक्षतया प्रामाण्यं च प्रयोजनवत्त्वं च सिध्यतीति तात्पर्यार्थः । पारमर्षसूत्रोपन्यासस्तु पूर्वपक्षदार्ढ्याय । (४)आनर्थक्यं चाप्रयोजनवत्त्वम्, सापेक्षतया प्रमानुत्पादकत्वं चानुवादकत्वादिति । (५)"**अत**" इत्यादि "**वा**"ऽन्तं(६)ग्रहणकवाक्यम् । (पृ० १२५ पं० १) अस्य विभागभाष्यं "**नही**"त्या"**द्युपपन्ना व**"त्यन्तम् । (पृ० १२६ पं० १) । स्यादेतत्, अक्रियार्थत्वेऽपि ब्रह्मस्वरूपविधिपरा वेदान्ता भविष्यन्ति, तथा च 'विधिना त्वेकवाक्यत्वादि'ति राद्धान्तसूत्रमनुप्रहीष्यते, न खलु प्रवृत्तप्रवर्तनमेव विधिः, (७)उत्पत्तिविधेरज्ञातज्ञापनार्थत्वात्, वेदान्तानां चाज्ञातं ब्रह्म ज्ञापयतां तथाभावादित्यत आह—"**न च परिनिष्ठित**" इति । (पृ० १२९ पं० २) । (८)अनागतोत्पाद्यभाव-

---

(१) चतुर्थपक्षं निराकरोति न चैकस्येति । सर्वदा सम्प्रदायाविच्छेदमिच्छद्भिरपि सम्प्रदायप्रवर्तकेष्वाश्वास आस्थेय एव, स वरमेकस्मिन्ब्रह्मण्यवगतसर्वज्ञेये कृत इति भावः ।

(२) नन्वीश्वरस्यादृष्टत्वात्कथं तत्कर्तृके वेदे विश्वास अत आह सर्गादिभुवामिति ।

(३) वेदान्ता ब्रह्मणि प्रमाणं न वेति सिद्धवस्तुबोधात्फलभावाभावाभ्यां, सिद्धं रूपादिहीनं वस्तु बोधयतो वाक्यस्य मानान्तरापेक्षत्वानपेक्षत्वाभ्यां वा संशये पूर्वाधिकरणद्वितीयवर्णकेनापेक्षिकीं सङ्गतिमुक्त्वा पूर्वपक्षभाष्यं व्याचष्टे किमाक्षेप इत्यादिना । कथमिति थमुप्रत्ययान्तः किंशब्द आक्षेपेऽत्र बोध्यः ।

(४) आनर्थक्यमिति भाष्यस्याभिधेयाभाव इत्यर्थोऽनुभवविरोधान्न युक्तो वक्तुमित्याहानर्थक्यं चेति ।

(५) भाष्ये पौनरुक्त्यमाशंक्य सङ्गतिविवरणत्वमाह अत इत्यादीति ।

(६) ग्रहणमिति । उपासनादिक्रियान्तरविधानार्थत्वं वेत्येतदन्तामित्यर्थः ।

(७) उत्पत्तिविधेरिति । अधिकारविधितः प्रवृत्तिलाभादुत्पत्तिविधिरज्ञातकर्मस्वरूपबोधपर इत्यर्थः ।

(८) अनागतेति । अनागतत्वादेवोत्पाद्यः भावो भावना तद्विषयः सर्वो विधिरित्यर्थः । अधिकारेति ।

विषय एव हि सर्वो विधिरुपेयोऽधिकारविनियोगप्रयोगोत्पत्तिरूपाणां परस्परविनाभावात्, (१)तद्वाक्यानां त्वैदम्पर्यं भिद्यते । यथाऽ'ग्निहोत्रं जुहुयात्स्वर्गकाम' इत्यादिभ्योऽधिकारविनियोगप्रयोगाणां प्रतिलम्भा'दग्निहोत्रं जुहोती'त्युत्पत्तिमात्रपरं वाक्यम् । न त्वत्र विनियोगादयो न सन्ति, सन्तोऽप्यन्यतो लब्धत्वात् केवलमविवक्षिताः । तस्माद् भावनाविषयो विधिर्न सिद्धे वस्तुनि भवितुमर्हतीति । उपसंहरति "तस्मा"दिति । अत्रारुचिकारणमुक्त्वा पक्षान्तरमुपसंक्रामति "अथे"ति । एवं च सत्युक्तरूपे ब्रह्मणि शब्दस्यातात्पर्यात् प्रमाणान्तरेण (२)यादृशमस्य रूपं व्यवस्थाप्यते न तच्छब्देन विरुध्यते, तस्योपासनापरत्वात्, समारोपेण चोपासनाया उपपत्तेरिति । प्रकृतमुपसंहरति "तस्मान्ने"ति । सूत्रेण सिद्धान्तयति "एवं प्राप्त उच्यते" (पृ० १३० पं० १)—

(सू०) तत्तु समन्वयात् ॥ ४ ॥

तदेतद् व्याचष्टे-"तुशब्द" इति । तदित्युत्तरपक्षप्रतिज्ञां विभजते-"तद्ब्रह्मे"ति । पूर्वपक्षवादी कर्कशाशयः पृच्छति—"कथम्" । कुतः प्रकारादित्यर्थः । सिद्धान्ती स्वपक्षे हेतुं प्रकारभेदमाह—"समन्वयात्" । सम्यगन्वयः (३)समन्वयस्तस्मात् । एतदेव विभजते-"सर्वेषु हि वेदान्तेष्वि"ति । वेदान्तानामात्यन्तिकीं ब्रह्मपरतामाचिख्यासुर्बहूनि वाक्यान्युदाहरति—"सदेवे"ति । (पृ० १३३ पं १) (४)'यतो वा इमानि भूतानी'ति तु वाक्यं पूर्वमुदाहृतं जगदुत्पत्तिस्थितिनाशकारणमिति चेह स्मारितमिति न पठितम् । (५)येन हि वाक्यमुपक्रम्यते येन चोपसंह्रियते तदेव वाक्यार्थ इति शाब्दाः । (६)यथोपा-

---

धिकारः फलसम्बन्धबोधनम्, विनियोगः क्रियायाः फलशेषत्वज्ञापनम्, प्रयोगोऽनुष्ठानम्, उत्पत्तिः कर्मस्वरूपज्ञानम्, फलसम्बन्धः क्रियायाः शेषत्वं विना न सम्भवति, तच्च नानुष्ठानं विनाऽनुष्ठानं च नाज्ञातं इति एतेषामविनाभावः । सिद्धं चेत्पुंव्यापारानपेक्षं फलमारभेत सदा चारभेतेति नाधिकारादिसम्भव इत्यर्थः ।

(१) सर्वेषामविनाभावेपि अवान्तरभेदप्रयोजकमाह तद्वाक्यानां त्विति । ऐदंपर्यन्तात्पर्यम् । तदेवाह यथेत्यादिना ।

(२) यादृशं जीवभिन्नम् ।

(३) सम्यगन्वय इति । तात्पर्यं सम्यक्त्वम् ।

(४) नन्विदमधिकरणं शास्त्रयोनित्वद्वितीयवर्णकाक्षेपसमाधानरूपं, तत्र च यतो वेत्यादिवाक्यमुदाहृतमिह तत्कुत उपेक्षितमत आह यतो वेति । 'तद्ब्रह्म सर्वज्ञमि'ति भाष्ये यत इत्यादिवाक्यप्रमेयकथनात्तत्प्रमाणं बुद्धिस्थमिति नोदाहृतमित्यर्थः ।

(५) वेदान्तानां ब्रह्मात्मैकत्वे उपक्रमोपसंहारैक्यं तात्पर्यलिङ्गं सदृष्टान्तमाह येनेति ।

(६) 'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ उपांशुयाजमन्तरा यजति विष्णुरुपांशु यष्टव्योऽजामित्वाय' इत्यादिमन्त्रेणाग्नेयाग्नीषोमयोः पुरोडाशयो निरन्तरयोः करणे जामि—आलस्यं भवेदिति उपांशुयागो विधीयते । तत्र किमिदमपूर्वयागविधानमुत 'विष्णुरुपांशु यष्टव्य' इति पठितयागत्रयस्यानुवाद इति संशये, द्रव्यदेवतयोरश्रवणात् विधिप्रत्ययाभावाच्चाग्ने पठितयागत्रयस्यानुवाद इति पूर्वपक्षः । एवंप्राप्ते एकवाक्यत्वभंगापत्त्या, मन्त्रकाण्डे उपांशुयाजस्थाने पठितवैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्याभिस्तुल्यार्थत्वेन विकल्पमानाभिर्विष्णवादिदेवताभ्रीषाज्यलाभात् 'यजेत' इति पंचमलकारस्य विधिप्रत्ययत्वात् अपूर्वयागविधिरेवायमिति भेदलक्षणचिन्तायां सिद्धान्तितम् । विष्णवादिवाक्यानि चार्थवादा इति संक्षेपः ।

शुयाजवाक्येऽनूचोः पुरोडाशयोर्जामितादोषसङ्कीर्तनपूर्वकोपांशुयाजविधाने तत्प्रतिसमाधानोपसंहारे चापूर्वोपांशुयाजकर्मविधिपरतैकवाक्यताबलादाश्रिता, एवमत्रापि 'सदेव सोम्येदमि'ति ब्रह्मोपक्रमात् 'तत्त्वमसी'ति च जीवस्य ब्रह्मात्मनोपसंहारात् तत्परतैव वाक्यस्य। (१)एवं वाक्यान्तराणामपि पौर्वापर्यालोचनया ब्रह्मपरत्वमवगन्तव्यम्। न च तत्परत्वस्य दृष्टस्य सति सम्भवेऽन्यपरताऽदृष्टा युक्ता कल्पयितुम्, अतिप्रसङ्गात्। न केवलं कर्तृपरता तेषामदृष्टाऽनुपपन्ना चेत्याह—**"न च तेषा"मिति**। (पृ० १३४ पं० ५) सापेक्षत्वेनाप्रामाण्यं पूर्वपक्षबीजं दूषयति– **'न च परिनिष्ठितवस्तुस्वरूपत्वेपी'ति**। (पृ० ११३ पं० १) (२)अयमभिसन्धिः। पुंवाक्यदृष्टान्तेन हि भूतार्थतया वेदान्तानां सापेक्षत्वमाशङ्क्यते। तत्रैवं भवान् पृष्टो व्याचष्टाम्, किं पुंवाक्यानां सापेक्षता भूतार्थत्वेनाहो पौरुषेयत्वेन। यदि भूतार्थत्वेन ततः प्रत्यक्षादीनामपि(३) परस्परापेक्षत्वेनाप्रामाण्यप्रसङ्गः, तान्यपि भूतार्थान्येव। अथ पुरुषबुद्धिप्रभवतया पुंवाक्यं सापेक्षम्, एवं तर्हि तदपूर्वकाणां वेदान्तानां भूतार्थानामपि नाप्रामाण्यं प्रत्यक्षादीनामिव नियतेन्द्रियलिङ्गादिजन्मनाम्। (४)यद्युच्येत सिद्धे किलापौरुषेयत्वे वेदान्तानामनपेक्षतया प्रामाण्यं सिद्ध्येत्, तदेव तु भूतार्थत्वेन न सिद्ध्यति, भूतार्थस्य शब्दानपेक्षेण पुरुषेण मानान्तरतः शक्यज्ञानत्वाद्बुद्धिपूर्वविरचनोपपत्तेः वाक्यत्वादिलिङ्गकस्य वेदपौरुषेयत्वानु(५)मानस्याप्रत्यूहमुत्पत्तेः। तस्मात्पौरुषेयत्वेन सापेक्षत्वं दुर्वारं, न तु भूतार्थत्वेन। (६)कार्यार्थत्वे तु कार्यस्यापूर्वस्य मानान्तरागोचरतयाऽत्यन्ताननुभूतपूर्वस्य तत्त्वेन समारोपेण वा पुरुषबुद्धावनारोहात् तदर्थानां वेदान्तानामशक्यरचनतया पौरुषेयत्वाभावादनपेक्षं प्रमाणत्वं सिध्यतीति प्रामाण्याय वेदान्तानां कार्यपरत्वमातिष्ठामहे। (७)अत्र ब्रूमः। (८)किं पुनरिदं कार्यमभिमतमायुष्मतः, यदशक्यं पुरुषेण ज्ञातुम्। (९)अपूर्वमिति चेत्, हन्त कुतस्त्यमस्य लिङाद्यर्थत्वं, तेनालौकिकेन सङ्गतिसंवेदनविरहात् लोकानुसारतः क्रियाया एव लौकिक्याः कार्याया लिङादेरवगमात्। (१०)'स्वर्गकामो यजेते'ति साध्यस्वर्गावि-

---

(१) ऐतरेयके 'आत्मा वा इदमेक एवाग्र आसीत्' इत्युपक्रम्य 'प्रज्ञानं ब्रह्मे'त्युपसंहृतम्। आथर्वणेऽपि 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती'ति सर्वात्मकं ब्रह्मोपक्रम्य 'ब्रह्मैवेदममृतं पुरस्तात्' इति तदेवोपसंहृतम् इत्यर्थः।

(२) अत्र वेदान्ताः मानान्तरसापेक्षाः सिद्धवस्तुपरत्वात् तीरे फलानि सन्तीति पुंवाक्यवदिति पूर्वपक्षिणः प्रसंगहेतौ पौरुषेयत्वमुपाधिरिति भाष्यस्थापिशब्देन द्योत्यत इत्याह अयमभिसन्धिरिति।

(३) हेतोरनैकान्तिकत्वमाह प्रत्यक्षादीनामपीति।

(४) वाक्यस्य सतः सिद्धवस्तुपरत्वे पौरुषेयत्वापत्तिसाधनव्यापकत्वमुपाधेः शंकते यद्युच्येतेति।

(५) वेदान्तवाक्यं पौरुषेयं वाक्यत्वाद्भटमानयेतिवाक्यत्वादित्यनुमानस्येत्यर्थः।

(६) कार्यपरतायां हि वेदान्तवाक्यानां न वाक्यत्वादिना सापेक्षत्वमनुमेयं पौरुषेयत्वस्योपाधित्वात्। एव न च साधनव्यापकेत्वमित्याह कार्यार्थत्व इति।

(७) अकार्ये मानान्तरायोग्यत्वस्यासिद्धत्वात्तत्परत्वेपि वेदान्तानां पौरुषेयत्वं सम्भवति इति समा साधनव्यापिः, ततश्च वाक्यत्वादिलिङ्गकानुमानसिद्धं पौरुषेयत्वं दुरपवादमित्याशयेनाह अत्र ब्रूम इत्यादिना।

(८) किं पुनरिति। कृतियोग्यस्य कार्यत्वे भावार्थस्यापि तत्त्वेन मानान्तरयोग्यत्वमित्यर्थः।

(९) अलौकिककार्यत्वाभिप्रायेणाशंकते अपूर्वमिति।

(१०) स्वर्गकामपदसमभिव्याहारसंशंकतर्कानुगृहीतवेदादेव क्रियाविलक्षणापूर्वे लिङादीनां सम्बन्धग्रह इत्याशयेनाशङ्कते स्वर्गकाम इति।

८।१।५४

शिष्टो नियोज्योऽवगम्यते, स च तदेव कार्यमवगच्छति यत् स्वर्गानुकूलं, न च क्रिया क्षणभङ्गुराऽऽमुष्मिकाय स्वर्गाय कल्पत इति पारिशेष्याद्वेदत एवापूर्वे कार्ये लिङादीनां सम्बन्धग्रह इति चेत्। हन्त (१)चैत्यवन्दनादिवाक्येष्वपि स्वर्गकामादिपदसम्बन्धादपूर्वकार्यत्वप्रसङ्गस्तथा च तेषामप्यशक्यरचनत्वेनापौरुषेयत्वापातः, स्पष्टदृष्टेन पौरुषेयत्वेन वा तेषामपूर्वार्थत्वप्रतिषेधे वाक्यत्वादिना लिङ्गेन वेदानामपि पौरुषेयत्वमनुमितमित्यपूर्वार्थता न स्यात्। (२)अन्यतस्तु वाक्यत्वादीनामनुमानाभासत्वोपपादने कृतमपूर्वार्थत्वेनात्र तदुपपादकेन। उपपादितं चापौरुषेयत्वमस्माभिर्न्यायकणिकायाम्(३), इह तु विस्तरभयान्नोक्तम्। तेनापौरुषेयत्वे सिद्धे भूतार्थानामपि वेदान्तानां न सापेक्षतया प्रामाण्यविघातो, न चानधिगतगन्तृता नास्ति येन प्रामाण्यं न स्याज्जीवस्य ब्रह्मताया अन्यतोऽनधिगमात्, तदिदमुक्तं-न च परिनिष्ठितवस्तुस्वरूपत्वेपीति। द्वितीयं पूर्वपक्षबीजं स्मारयित्वा दूषयति-**"यत्तु हेयोपादेयरहितत्वादि"**ति। विध्यर्थावगमात् खलु पारम्पर्येण पुरुषार्थप्रतिलम्भ, इह तु "तत्त्वमसी"त्यवगतिपर्यन्ताद्वाक्यार्थज्ञानाद् बाह्यानुष्ठानायासानपेक्षात्साक्षादेव पुरुषार्थप्रतिलम्भो नायं सर्पो रज्जुरियमिति ज्ञानादिवेति। (४)सोऽयमस्य विध्यर्थज्ञानात् प्रकर्षः (पृ० १३६ पं० १)। (५)एतदुक्तं भवति। द्विविधं हीप्सितं पुरुषस्य, किंचिदप्राप्तं प्रामादि, किंचित् पुनः प्राप्तमपि भ्रमवशादप्राप्तमित्यवगतं, यथा स्वग्रीवावनद्धं ग्रैवेयकम्(६)। एवं जिहासितमपि द्विविधं, किंचिदहीनं जिहासति, यथा वलयितचरणं फणिनं, किंचित्पुनर्हीनमेव जिहासति, यथा चरणाभरणे नूपुरे फणिनमारोपितम्। तत्राप्राप्तप्राप्तौ चात्यक्तत्यागे च बाह्योपायानुष्ठानसाध्यत्वात्तदुपायतत्त्वज्ञानादस्ति परांचीनानुष्ठानापेक्षा। न जातु ज्ञानमात्रं वस्त्वपनयति। नहि सहस्रमपि रज्जुप्रत्यया वस्तुसन्तं फणिनमन्यथयितुमीशते। समारोपिते तु प्रेप्सितजिहासिते तत्त्वसाक्षात्कारमात्रेण बाह्यानुष्ठानानपेक्षेण शक्येते प्राप्तुमिव हातुमिव। समारोपमात्रजीवितं हि ते, समारोपितं च तत्त्वसाक्षात्कारः समूलघातमुपहन्तीति। तथेहाप्यविद्यासमारोपितजीवभावे ब्रह्मण्यानन्दे वस्तुतः शोकदुःखादिरहिते समारोपितनिबन्धन(७)स्तद्भाव'स्तत्त्वमसी'तिवाक्यार्थतत्त्वज्ञानादवगतिपर्यन्तान्निवर्तते। तन्निवृत्तौ प्राप्तमप्यानन्दरूपमप्राप्तमिव प्राप्तं भवति, त्यक्तमपि शोकदुःखाद्यत्यक्तमिव त्यक्तं भवति, तदिदमुक्तं **"ब्रह्मात्मावगमादेव"** जीवस्य **सर्वक्लेशस्य** सवासनस्य विपर्यासस्य, स हि क्लिश्नाति जन्तूनतः क्लेशः, तस्य प्रकर्षेण हानात्

---

(१) उक्ततर्केऽतिप्रसङ्गमाह चैत्येति।

(२) ननु स्मर्यमाणकर्तृकत्वेन वाक्यत्वहेतुः सोपाधिक इत्याशंक्य, सिद्धार्थकेषु वेदान्तेष्वपि तत्समानमतः कार्यार्थत्वमनपेक्षतापयोजकं न भवतीत्याह अन्यतस्त्विति।

(३) वर्तमानसन्निकर्षजन्यप्रत्यक्षस्य कार्यरूपधर्मगोचरत्वानुपपत्तेर्योगसामर्थ्यस्यापीन्द्रियविषयेष्वेवातिशयजनकत्वान्न धर्मस्य प्रत्यक्षता, लिङ्गाद्यभावाच्च नानुमेयता, न चाज्ञाते पुंसां वाक्यरचना सम्भवतीति वेदो न पौरुषेय इति न्यायकणिकायां व्युत्पादितमिति भावः।

(४) सर्वक्लेशप्रहाणादिति भाष्यस्थप्रशब्दार्थमाह सोऽयमिति।

(५) ब्राह्मानुष्ठानानपेक्षमज्ञाननिवृत्त्यानन्दाविर्भावफलमन्वयव्यतिरेकिदृष्टान्तद्वयप्रदर्शनपूर्वकं ब्रह्मज्ञानस्य दर्शयति एतदुक्तमिति। (६) ग्रैवेयकं-ग्रीवालङ्कारः।

(७) समारोपिताऽविद्या निबन्धनं यस्य जीवभावस्य स तथोक्तः।

पुरुषार्थस्य दुःखनिवृत्तिसुखाप्तिलक्षणस्य सिद्धेरिति । यत्तु–आत्मेत्येवोपासीताऽऽत्मानमेव (१)लोकमुपासीतेत्युपासनावाक्यगतदेवतादिप्रतिपादनेनोपासनापरत्वं वेदान्तानामुक्तं, तद्दूषयति––"**देवतादिप्रतिपादनस्य तु** (२)आत्मेत्येतावन्मात्रस्य **स्ववाक्यगतोपासनार्थत्वेपि न कश्चिद्विरोधः**"। यदि न विरोधः, सन्तु तर्हि वेदान्ता देवताप्रतिपादनद्वारेणोपासनाविधिपरा एवेत्यत आह **"न तु तथा ब्रह्मण" इति** । उपास्योपासकोपासनादिभेदसिध्यधीनोपासना न निरस्तसमस्तभेदप्रपञ्चे वेदान्तवेद्ये ब्रह्मणि संभवतीति नोपासनाविधिशेषत्वं वेदान्तानां तद्विरोधित्वादित्यर्थः । (३)स्यादेतत् , यदि विधिविरहेऽपि वेदान्तानां प्रामाण्यं, हन्त तर्हि 'सोऽरोदीदि'त्यादीनामप्यस्तु स्वतन्त्राणामेवोपेक्षणीयार्थानां प्रामाण्यम् , नहि हानोपादानबुद्धौ एव प्रमाणस्य फले, उपेक्षाबुद्धेरपि तत्फलत्वेन प्रामाणिकैरभ्युपेतत्वादिति कृत (४)'बर्हिषि रजतं न देयमि'त्यादिनिषेधाविधिपरत्वेनैतेषामित्यत आह **"यद्यपी"ति** । (पृ० १३७ पं० १) (५)स्वाध्यायविध्यधीनग्रहणतया हि सर्वो वेदराशेः पुरुषार्थतन्त्र इत्यवगतम् , तत्रैकेनापि वर्णेन नापुरुषार्थेन भवितुं युक्तं, किं पुनरियता 'सोऽरोदी'दित्यादिना पदप्रबन्धेन । न च वेदान्तेभ्य इव तदर्थावगममात्रादेव कश्चित् पुरुषार्थ उपलभ्यते, तेनैष पदसन्दर्भः साकाङ्क्ष एवास्ते पुरुषार्थमुदीक्षमाणः । 'बर्हिषि रजतं न देयमि'त्ययमपि निषेधविधिः स्वनिषेध्यस्य निन्दामपेक्षते । नह्यन्यथा ततश्चेतनः शक्यो निवर्तयितुम् । (६)तथादि दूरतोऽपि न निन्दामवाप्स्यत्ततो निषेधविधिरेव रजतनिषेधे च निन्दायां च दर्विहोमवत् सामर्थ्यद्वयमकल्पयिष्यत् । तदेवमुक्तप्रयोः 'सोऽरोदीदि'ति च 'बर्हिषि रजतं न देयमि"ति च पदसन्दर्भयो(७)र्लक्ष्यमाणनिन्दाद्वारेण नष्टाश्वदग्धरथवत् परस्परं समन्वयः । न त्वेवं वेदान्तेषु पुरुषार्थापेक्षा, तदर्थावगमादेवानपेक्षात् परमपुरुषार्थलाभादित्युक्तम् । ननु विध्यसंस्पर्शिनो वेदस्यान्यस्य न प्रामाण्यं दृष्टमिति कथं वेदान्तानां तदस्पृशां तद्भविष्यतीत्यत आह––**"न चानुमानगम्य'मिति** । अबाधितानधिगतासंदिग्धबोधजनकत्वं हि प्रमाणत्वं प्रमाणानां, तच्च स्वत इत्युपपादितम्(८) । (९)यद्यपि चैषामदग्धबोधजनकत्वं का-

---

(१) आत्मानमेव लोकं चैतन्यमित्यर्थः । देवता–सगुणं ब्रह्म । आदिशब्दात् प्राणविशुध्यादि गृह्यते ।

(२) उपासनावाक्यैकदेशस्थमुपास्यसमर्थकं विविनक्ति आत्मेतीति ।

(३) यदि विध्यभावेऽपि वेदान्तवाक्यानां प्रामाण्यं तर्हि अर्थवादा अपि प्रमाणं स्युरिति पूर्वपक्षतात्पर्यम् ।

(४) बर्हिषीति । तत्राग्नि यागे रजतं न देयमिति निषेधविधिपरत्वाभावेऽपि प्रामाण्योपपादनस्य शक्यत्वादित्यर्थः ।

(५) अर्थवादानामुपेक्षाफलस्यासम्भवान्निषेधशेषपरतयैवोक्तार्थवादानां प्रामाण्यसम्भव । इत्याशयेन परिहरमाह स्वाध्यायेति ।

(६) ननु निषेध एव स्वनिषेधस्यानर्थहेतुत्वान्यथानुपपत्त्या निन्दां कल्पयिष्यतीत्याशङ्क्य, नैवमित्याह तथादीति । अर्थवादादेव निन्दालाभे निषेधकस्य निषेधे निन्दायां च तात्पर्यं न कल्प्यमिति भावः ।

(७)ननु 'सोऽरोदीदि'ति वाक्यं निन्दां न भाषते किन्तु भूतानुवाद इत्याशङ्क्य मुख्यार्थे प्रयोजनाभावान्निन्दा लक्ष्यत इत्याह लक्ष्यमाणेति । (८) न्यायकणिकायामित्यर्थः ।

(९) ननु प्रमायाः कार्येण प्रमाणानां तज्जनकत्वमनुमेयम् , तत्कथं नानुगम्यमिति भाष्यं सङ्कुच्छत इत्याशङ्क्याह यद्यपीति । कार्यार्थापत्त्यपरपर्यायानुमानेन मानान्तरेण वा प्रमा नोत्पद्यते किन्तूदितायां तस्यामनुमानं प्रवर्तत इत्यर्थः ।

र्थापत्तिसमधिगम्यं, तथापि तद्बोधोपजनने मानान्तरं नापेक्षन्ते, नापीमामेवार्थापत्तिं, (१)परस्पराश्रयप्रसङ्गादिति स्वत इत्युक्तम्। ईदृग्बोधजनकत्वं च कार्य इव विधीनां वेदान्तानां ब्रह्मण्यस्तीति दृष्टान्तानपेक्षं तेषां ब्रह्मणि प्रामाण्यं सिद्धं भवति, अन्यथा नेन्द्रियान्तराणां रूपप्रकाशनं दृष्टमिति चक्षुरपि न रूपं प्रकाशयेदिति। प्रकृतमुपसंहरति "तस्मादि"ति।

आचार्यदेशीयानां मतमुत्थापयति "अत्रापरे प्रत्यवतिष्ठन्त"इति (पृ० १३९ पं० १)। तथाहि—

(२)अज्ञातसंगतित्वेन शास्त्रत्वेनार्थवत्तया।
मननादिप्रतीत्या च कार्यार्थाद्ब्रह्मनिश्चयः॥

न खलु वेदान्ताः सिद्धब्रह्मरूपपरा भवितुमर्हन्ति, तत्राविदितसंगतित्वात्। यत्र हि शब्दा लोकेन न प्रयुज्यन्ते तत्र न तेषां संगतिग्रहः। न चाहेयमनुपादेयं रूपमात्रं कश्चिद्विवक्षति प्रेक्षावान्, तस्याबुभुत्सितत्वात्, अबुभुत्सितावबोधने च प्रेक्षावत्ताविघातात्। तस्मात् प्रतिपित्सितं प्रतिपिपादयिषितं वा लोकः प्रवृत्तिनिवृत्तिहेतुभूतमेवार्थं प्रतिपादयेत्, कार्यं चावगतं तद्धेतुरिति तदेव बोधयेत्। एवं च वृद्धव्यवहारप्रयोगात् पदानां कार्यपरतामवगच्छति। तत्र किञ्चित्साक्षात्कार्याभिधायकं, किञ्चित्कार्यार्थस्वार्थाभिधायकं, न तु भूतार्थपरता पदानाम्। अपि च नरान्तरस्य व्युत्पन्नस्यार्थप्रत्ययमनुमाय(३) तस्य च शब्दभावाभावानुविधानमवगम्य शब्दस्य तद्विषयबोधकत्वं निश्चेतव्यम्। न च भूतार्थरूपमात्रप्रत्यये परनरवर्तिनि किंचिल्लिङ्गमस्ति। कार्यप्रत्यये तु नरान्तरवर्तिनि प्रवृत्तिनिवृत्ती स्तो हेतू इत्य ज्ञातसंगतित्वान्न ब्रह्मरूपपरा वेदान्ताः। अपि च वेदान्तानां वेदत्वात् शास्त्रत्वप्रसिद्धिरस्ति, प्रवृत्तिनिवृत्तिपराणां च संदर्भाणां शास्त्रत्वम्। यथाहुः—

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥

इति। तस्माच्छास्त्रत्वप्रसिध्या व्याहतमेषां स्वरूपपरत्वम्। (४)अपि च न ब्रह्मरूपप्रतिपादनपराणामेषामर्थवत्त्वं पश्यामः। (५)न च रज्जुरियं न भुजङ्ग इति यथाकथंचिल्लक्षणया वाक्यार्थतत्त्वनिश्चये यथा भयकम्पादिनिवृत्तिः, एवं 'तत्त्वमसी'तिवाक्यार्थावगमाज्जिवृत्तिर्भवति सांसारिकाणां धर्माणाम्, श्रुतवाक्यार्थस्यापि पुंसस्तेषां तादवस्थ्यात्। अपि च यदि श्रुतब्रह्मणो भवति सांसारिकधर्मनिवृत्तिः कस्मात्पुनः श्रवणस्योपरि मननादयः

---

(१) परस्परेति। उत्पन्नायां प्रमायां प्रमाणानां प्रमाजनकत्वस्यानुमानं ततश्च प्रमोत्पत्तिरित्यन्योन्याश्रयप्रसङ्गो बोध्यः।

(२) कार्यान्वित एवार्थे पदशक्तिग्रहेण सिद्धं वस्तु न शब्दप्रमेयमिति वेदान्तानामुपासननियोगपरत्वं मन्यमानामेकदेशीयानां मतेन पूर्वपक्षमाह अज्ञातेति।

(३) अनुमायेति। अस्त्येवं घटानयने प्रवृत्तिः अर्थज्ञानपूर्विका प्रवृत्तित्वाऽस्मदीयप्रवृत्तिवत्, तच्चार्थज्ञानं घटमानयेति वाक्यजन्यं तद्वाक्यभावाभावानुविधायित्वादित्यादिरनुमानाकारोऽत्र द्रष्टव्यः।

(४) शास्त्रत्वेनेत्यादिहेतून् व्याचष्टे अपि चेत्यादिना।

(५) न चेति। सांसारिकाणां धर्माणां न च निवृत्तिरिति योजना। यथाकथञ्चिदिति। सिद्धसंसर्गस्य नियोगाविनाभावेनापि 'मा भैषीः' इति नियोगं कल्पयित्वाऽन्यपरादेव वाक्यादस्सिद्धार्थनिश्चयो जायत इत्यर्थः।

श्रूयन्ते । तस्मात्तेषां वैयर्थ्यप्रसङ्गादपि न ब्रह्मस्वरूपपरा वेदान्ताः, किन्त्वात्मप्रतिपत्तिविषय-कार्यपराः । तच्च कार्यं स्वात्मनि नियोज्यं नियुञ्जानं नियोग इति च मानान्तरापूर्वतयाऽपूर्वमिति चाख्यायते । (१)न च विषयानुष्ठानं विना तत्सिद्धिरिति स्वसिद्ध्यर्थं तदेव कार्यं स्वविषयस्य करणस्यात्मज्ञानस्यानुष्ठानमाक्षिपति । यथा च कार्यं स्वविषयाधीननिरूपणमिति ज्ञानेन विषयेण निरूप्यते, एवं ज्ञानमपि स्वविषयमात्मानमन्तरेणाशक्यनिरूपणमिति तन्निरूपणाय तादृशमात्मानमाक्षिपति, तदेव कार्यम् । (२)यथाहुः–'यत्तु तत्सिद्ध्यर्थमुपादीयते आक्षिप्यते तदपि विधेयमिति तन्त्रे व्यवहार' इति । (३)विधेयता च नियोगविषयस्य ज्ञानस्य भावार्थतयाऽनुष्ठेयता, तद्विषयस्य त्वात्मनः स्वरूपसत्ताविनिश्चितिः,(४)आरोपितत्तद्भावस्य त्वन्यस्य निरूपकत्वे तेन तन्निरूपितं न स्यात् । तस्मात्तादृगात्मप्रतिपत्तिविधिपरेभ्यो वेदान्तेभ्यस्तादृगात्मविनिश्चयः । तदेतत्सर्वमाह **"यद्यपी"ति** । विधिपरेभ्योऽपि वस्तुतत्त्वविनिश्चय इत्यत्र निदर्शनमुक्तं–**"यथा यूपे"ति** । 'यूपे पशुं बध्नाती'ति बन्धनाय विनियुक्ते यूपे तस्यालौकिकत्वात् कोऽसौ यूप इत्यपेक्षिते 'खादिरो यूपो भवति यूपं तक्षति यूपमष्टाश्रीकरोती'त्यादिभवाक्यैस्तक्षणादिविधिपरैरपि संस्कारविष्टं विशिष्टसंस्थानं दारु यूप इति गम्यते । (५)एवमाहवनीयादयोऽप्यवगन्तव्याः । प्रवृत्तिनिवृत्तिपरस्य शास्त्रत्वं न स्वरूपपरस्य, कार्यएव सम्बन्धो न स्वरूप, इति हेतुद्वयं भाष्यवाक्येनोपपादितम्–**"प्रवृत्तिनिवृत्तिप्रयोजनत्वादित्यादिना (पृ० १४१ पं० १) तत्सामान्याद्वेदान्तानामपि नथैवार्थवत्त्वं स्या"दित्यन्तेन** (पृ० १४२ पं० ४) । न च स्वतन्त्रं कार्यं नियोज्यमधिकारिणमनुष्ठातारमन्तरेणेति नियोज्यभेदमाह **"सति च विधिपरत्व"इति** । 'ब्रह्म वेद ब्रह्मैव भवती'ति सिद्धवदर्थवादावगतस्यापि ब्रह्मभवनस्य नियोज्यविशेषाकाङ्क्षायां ब्रह्मबुभूषोर्नियोज्यविशेषस्य (६)रात्रिसत्रन्यायेन प्रतिलम्भः । पिण्डपितृयज्ञन्यायेन

---

(१) ननु कार्यपरेभ्यो वेदान्तेभ्यस्तर्हि कथं वस्तुसिद्धिरित्याशंक्य, विध्याक्षेपलक्षणोपादानप्रमाणादित्युत्तरमाह नचेति ।

(२) ननु कार्यं स्वविषयज्ञाननिरूपणाय ज्ञायमानमात्मानमपेक्षते चेत्तर्हि तस्य श्रौतत्वं न स्यादित्याशंक्य, विध्याक्षिप्तस्य श्रुतिमूलत्वे गुरुसंमतिमाह यथाहुरिति ।

(३) ज्ञानस्य प्रमात्वात्प्रत्यक्षवन्न विधेयताऽऽत्मनश्च नित्यत्वात्तदसम्बन्ध इत्याशंक्याह विधेयतेति । ज्ञानमिहोपासनं तच्च क्रियेत्यनुष्ठानम् आत्मनस्तु स्वरूपसत्ताविनिश्चितिरज्ञातज्ञातिर्विधेयतेति न विरोध इति भावः ।

(४) ननु 'वाचं धेनुमुपासीत' इत्यादिवाग्धेनूपास्त्यादावविवारोप्यस्य विधेयबुद्धिविषयत्वं किं न स्यादत आह आरोपितेति । ब्रह्मास्मीति ज्ञाने यादृशार्थभानं तद्भाव आरोपितो यस्य स तथा, तस्यान्यस्य ज्ञाननिरूपकत्वे तेन प्रतिभासमानार्थेन 'तज्ज्ञानं निरूपितं न स्यात् , सत्यां गतौ आरोपो न युक्त इति तात्पर्यम् ।

(५) 'यदाहवनीये जुहोती'ति विहिते क आहवनीय इत्याकाङ्क्षायां 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादिविधिभिः संस्कारविशिष्टोऽग्निराहवनीय इति गम्यते, एवमपूर्वदेवताःस्वर्गादिकमपि विधिपरेण शास्त्रेणैव समर्थ्यत इति भावः ।

(६) 'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति' इति रात्रिशब्देन सोमविशेषाणां विधानम् । तत्र किमेतद्वाक्योक्तप्रतिष्ठा फलं स्वर्गो वेति संशये एवंकाम इत्यश्रवणात् विधिशक्तिलभ्यत्वात् स्वर्गस्य । नयतफलत्वेन वाक्यशेषावगतप्रतिष्ठानभ्युपगमात् स्वर्ग एव फलमिति पूर्वपक्षे, प्रतिष्ठाफलस्य साक्षान्निर्देशेनानुमा-

(१)तु स्वर्गकामस्य नियोज्यस्य कल्पनायामर्थवादस्यासमवेतार्थतयाऽत्यन्तपरोक्षा वृत्तिः स्यादिति । ब्रह्मभावश्चामृतत्वमिति "अमृतत्वकामस्ये"त्युक्तम् । अमृतत्वं चामृतत्वादेव न कृतकत्वेन शक्यमनित्यमनुमातुम्, आगमविरोधादिति भावः । उक्तेन धर्मब्रह्मज्ञानयोर्वैलक्षण्येन विध्यविषयत्वं चोदयति "नन्वि"ति । परिहरति "नार्हस्येव"मिति । अत्र चात्मदर्शनं न विधेयम् । तद्धि (२)दृशेरुपलब्धिवचनत्वात् श्रावणं वा स्यात् प्रत्यक्षं वा । प्रत्यक्षमपि लौकिकमहंप्रत्ययो वा, भावनाप्रकर्षपर्यन्तजं वा । तत्र श्रावणं न विधेयं, स्वाध्यायविधिनैवास्य प्रापितत्वात्, कर्मश्रावणवत् । नापि लौकिकं प्रत्यक्षं, तस्य नैसर्गिकत्वात् । न चौपनिषदात्मविषयं (३)भावनाधेयवैशद्यं विधेयं, तस्योपासनाविधानादेव (४)वाजिनवदनुनिष्पादितत्वात् । तस्मादौपनिषदात्मोपासनाऽमृतत्वकामं नियोज्यं प्रति विधीयते । 'द्रष्टव्य' इत्यादयस्तु विधिसरूपा न विधय इति । तदिदमुक्तं "तदुपासनाच्चे"ति । अर्थवत्तया मननादिप्रतीत्या चेत्यस्य शेषः प्रपञ्चो निगदव्याख्यातः ॥

तदेकदेशिमतं दूषयति--"अत्राभिधीयते" (०पृ १४५ पं० १) "न" एकदेशिमतम्, कुतः ? "कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्" । (५)पुण्यापुण्यकर्मफले सुखदुःखे । तत्र मनुष्यलोकमारभ्याब्रह्मलोकात्सुखस्य तारतम्यम् अधिकोत्कर्षः । एवं मनुष्यलोकमारभ्य दुःखतारतम्यमा चावीचिलोकात् । तच्च सर्वं कार्यं च विनाशि च । (६)आत्यन्तिकं त्वशरीरत्वमनतिशयं स्वभावसिद्धतया नित्यमकार्यमात्मज्ञानस्य फलम् । तद्धि फलमिव फलम्, अविद्यापनयमात्रेणाविर्भावात् । (७)एतदुक्तं भवति । (८)त्वयाप्युपासनाविधिपरत्वं वेदान्तानामभ्युपगच्छता नित्यशुद्धबुद्धत्वादिरूपब्रह्मात्मता जीवस्य स्वाभाविकी वेदान्तगम्याऽऽस्थीयते । सा चोपासनाविषयस्य विधेर्न फलं, नित्यत्वादकार्यत्वात् । नाप्य-

---

नित्यस्वर्गफलकल्पनाया अन्याय्यत्वात्प्रतिष्ठैव फलमिति सिद्धान्तितं, तदभिसन्धिमाश्रित्य तत्र नियोज्य इति लभ्यत इत्यर्थः ।

(१) 'अमावास्यायामपराण्हे पिण्डपितृयज्ञेन चरन्ति, इत्यनारभ्याधीतवाक्ये विहितः पिंडपितृयज्ञः क्रत्वर्थो वा पुरुषार्थो वेति संशये फलकल्पनापरिहारायामावास्याशब्दस्य कर्मार्थकत्वेन कल्पनीयत्वात्क्रत्वर्थत्वमिति पूर्वपक्षे, अपराण्हशब्दसामानाधिकरण्याद्दृढत्वाच्चामावास्याशब्दस्य कालपरत्वात्स्वर्गकामनियोज्यकल्पनया स्वर्गफलः पिण्डपितृयज्ञ इति पुरुषार्थत्व सिद्धान्तितम् । तद्वदत्र कल्पने तु स्वर्गोर्थः ब्रह्मभवनशब्देनासमवेतः स्यात्तथा च परोक्षवृत्तितापात इति भावः ।

(२) दृशेरिति । द्रष्टव्य इति वाक्योपात्तदृशिधातोरुपलब्धिवचनत्वेनोपासनानाभिधायकत्वादित्यर्थः ।

(३) भावनयाऽऽधेयं जन्यं वैशद्यं यस्य तत्प्रत्यक्षं तथा ।

(४) वाजिनवदिति । यथाऽऽमिक्षार्थविहितदध्यानयनाद्वाजिनमप्रयोजकमानुषङ्किकतया जायते एवममृतत्वाय विहितादुपासनात्साक्षात्कारो जायते इति तदुत्पादनं न विधेयमित्यर्थः ।

(५) वेदान्ता यद्युपासनाविधिपरास्तर्हि विहितोपासनायाः पञ्चमासादिकालपरिमितितया तत्साध्यफलमपि सातिशयमनित्यं च स्यादतो न विधिपरत्वं वेदान्तानामिति तात्पर्यम् 'अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तम्' इत्यन्तभाष्यस्य प्रदर्शयन्नाह पुण्यापुण्येत्यादिना ।

(६) आत्यन्तिकमिति । देवदत्तस्यात्यन्तिकमशरीरत्वं देवदत्तशरीरप्रागभावासमानकालीनो देवदत्तात्यन्तशरीरध्वंसः, सर्वोपाधिप्रत्यस्तमयोपलक्षितं स्वरूपमिति यावत् ।

(७) विधेयोपास्तिवादिनं प्रति तत्फलस्य मोक्षस्य नित्यत्वादिप्रसञ्जनमिष्टप्रसङ्ग इत्याशंक्याह एतदिति ।

(८) उपास्तिविधेः फलं ब्रह्मात्मत्वमुताविद्यानिवृत्तिर्विधीयत इति विकल्प्य क्रमेण निराकरोति त्वयेति ।

नाद्यविद्यापिधानापनयः, तस्य स्वविरोधिविद्योदयादेव भावात् । नापि विद्योदयः, तस्यापि श्रवणमननपूर्वकोपासनाजनितसंस्कारसचिवादेव चेतसो भावात् । उपासनासंस्कारवदुपासनाऽपूर्वमपि चेतःसहकारी(१)ति चेद्, दृष्टं च खलु नैयोगिकं फलमैहिकमपि, यथा (२)चित्राकारीर्यादिनियोगानामनियतनियतफलानाम्, न, गान्धर्वशास्त्रोपासनावासनाया इवापूर्वानपेक्षायाः षड्जादिसाक्षात्कारे वेदान्तार्थोपासनावासनाया जीवब्रह्मभावसाक्षात्कारेऽनपेक्षाया एव सामर्थ्यात् । तथा चामृतभावं प्रत्यहेतुत्वादुपासनापूर्वस्य नामृतत्वकामस्तत्कार्यमवबोद्धुमर्हति, अन्यदिच्छत्यन्यत् करोतीति हि विप्रतिषिद्धम् । (३)न च तत्कामः क्रियामेव कार्यमवगमिष्यति नापूर्वमिति साम्प्रतम्, तस्या मानान्तरादेव तत्साधनत्वप्रतीतेर्विधेर्वैयर्थ्यात् । न चावघातादिविधितुल्यता, तत्रापि नियमापूर्वस्यान्यतोऽनवगतेः । (४)न च ब्रह्मभूयादन्यदमृतत्वमार्थवादिकं किंचिदस्ति, येन तत्काम उपासनायामधिक्रियेत, विश्वजिन्न्यायेन(५) तु स्वर्गकल्पनायां तस्य सातिशयत्वं क्षयित्वं चेति न नित्यफलत्वमुपासनायाः । तस्माद्ब्रह्मभूयस्याविद्यापिधानापनयमात्रेणाविर्भावाद् अविद्यापनयस्य च वेदान्तार्थविज्ञानादवगतिपर्यन्तादेव सम्भवाद्, उपासनायाः संस्कारहेतुभावस्य संस्कारस्य च साक्षात्कारोपजनने मनःसाचिव्यस्य च मानान्तरसिद्धत्वाद्, 'आत्मेत्येवोपासीते'ति न विधिः, अपि तु विधिसरूपोऽयम्, यथांशुयाजवाक्ये 'विष्णुरांशुं यष्टव्य'इत्यादयो विधिसरूपा न विधय इति तात्पर्यार्थः । श्रुतिस्मृतिन्यायसिद्धमित्युक्तं, तत्र श्रुतिं दर्शयति **"तथा च श्रुति"रिति** । (पृ० १४८ पं० ६) न्यायमाह—**"अत एवेति"** (पृ० १५० पं० २)। (६)यत्किल स्वाभाविकं तन्नित्यं, यथा चैतन्यं, स्वाभाविकं चेदं, तस्मान्नित्यम् । (७)परे हि द्वयीं नित्यतामाहुः । कूटस्थनित्यतां परिणामिनित्यतां च, तत्र नित्यमित्युक्ते मा भूदस्य परिणा(८)मिनित्यतेत्यत आह—**"तत्र किंचिदि"ति** । परिणामिनित्यता हि न पारमार्थिकी । तथाहि—तत्सर्वात्मना वा परिणमेदेकदेशेन वा ? सर्वात्मना परिणामे कथं न तत्त्वव्याहतिः । एकदेशपरिणामे वा स एकदेशस्ततो भिन्नो वाऽभिन्नो वा ? (९)भिन्नश्चेत्, कथं तस्य परि-

---

(१) अतश्च विध्यवसर इति शेषः ।

(२) 'चित्रया पशुकामो यजेत' इति विहिताचित्रानियोगफलं पशवादि भुविभोग्यमपीह वा जन्मान्तरे वा भवतीत्यनियतम्, कारीर्यादिनियोगफलस्त्विहैव जन्मनि नियतसस्यर्ध्यादीति नियतमिति भावः ।

(३) यद्यपूर्वं न साक्षात्कारोपयोगि तर्हि उपासनक्रियैव तदर्थं विधीयतामित्याशंक्याह नचेति ।

(४) नन्ववघातवदुपास्तावप्यस्तु नियमापूर्वमित्याशंकायामाह नच ब्रह्मेति । इह परमापूर्ववन्नियमापूर्वसाध्यं नास्ति ब्रह्मभावस्य नित्यत्वादित्यर्थः ।

(५) इदमश्रुताधिकारमुदाहरणम् । तत्र 'स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात्' इति सर्वाभिलषितस्वर्गकामनावानधिकारी कल्पितः । एवमिहापि कल्पनेऽनित्यफलकत्वं स्यादिति भावः ।

(६) यत्किलेति । स्वाभाविकनित्यचैतन्यात्मकस्य ब्रह्मात्मत्वस्य साध्यत्वं व्याहतमित्यर्थः ।

(७) इदान्त्वित्यादि भाष्ये कूटस्थनित्यामिति विशेषणं न परिणामित्यवच्छेदार्थं सिद्धान्ते तन्नित्यत्वासङ्गतेरतो वैयर्थ्यमित्याशंक्याह परेहीति ।

(८) पूर्वरूपपरित्यागेन रूपान्तरापत्तिः परिणामः ।

(९) य एकदेशो नश्यति स धर्मिणो भिन्न इति पक्षे न धर्मिणः परिणामः किन्त्वेकदेशस्य स चानित्य इति न परिणामिनित्यत्वसिद्धिरित्याह भिन्नश्चेदिति ।

णामः । नह्यन्यस्मिन्परिणममानेऽन्यः परिणमतेऽतिप्रसङ्गात् । (१)अभेदे वा कथं न सर्वात्मना परिणामः ।

भिन्नाभिन्नं तदिति चेत्, तथाहि तदेव कारणात्मनाऽभिन्नं, भिन्नं च कार्यात्मना, कटकादय इवाभिन्ना हाटकात्मना, भिन्नाश्च कटकाद्यात्मना । न च भेदाभेदयोर्विरोधान्नैकत्र समवाय इति युक्तम् । (२) विरुद्धमिति नः क्व सम्प्रत्ययो यत्प्रमाणविपर्ययेण वर्तते । यत्तु यथा प्रमाणेनावगम्यते तस्य तथाभाव एव । (३) कुण्डलमिदं सुवर्णमिति सामानाधिकरण्यप्रत्यये व्यक्तं भेदाभेदौ चकास्तः । तथाह्यात्यन्तिकेऽभेदेऽन्यतरस्य द्विरवभासप्रसङ्गः । भेदे चात्यन्तिके न सामानाधिकरण्यं, गवाश्ववत् । (४)आधाराधेयभावे एकाश्रयत्वे वा न सामानाधिकरण्यं, नहि भवति कुण्डं बदरमिति । नाप्येकासनस्थयोश्चैत्रमैत्रयोश्चैत्रो मैत्र इति । सोऽयमबाधितोऽसंदिग्धः सर्वजनीनः सामानाधिकरण्यप्रत्यय एव कार्यकारणयोर्भेदाभेदौ व्यवस्थापयति । (५)तथा च कार्याणां कारणात्मत्वात् कारणस्य च सद्रूपस्य सर्वत्रानुगमात् सद्रूपेणाभेदः कार्यस्य जगतो, भेदः कार्यरूपेण गोघटादिनेति । यथाहुः—

कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा ॥ इति ।

अत्रोच्यते । कः पुनरयं भेदो नाम, यः सहाभेदेनैकत्र भवेत् । परस्परामाव इति चेत्, किमयं कार्यकारणयोः कटकहाटकयोरस्ति न वा ? न चेदेकत्वमेवास्ति न च भेदः । अस्ति चेद्भेद एव नाभेदः । न च भावाभावयोरविरोधः, सहावस्थानासम्भवात् । सम्भवे वा कटकवर्धमानकयोरपि (६)तत्त्वेनाभेदप्रसङ्गः भेदस्याभेदाविरोधात् । (७)अपि च कटकस्य हाटकादभेदे यथा हाटकात्मना कटकमुकुटकुण्डलादयो न भिद्यन्ते एवं कटकात्मनापि न भिद्येरन् कटकस्य हाटकादभेदात् । तथा च हाटकमेव वस्तु सन्न कटकादयो भेदस्याप्रतिभासनात् । (८)अथ हाटकत्वेनैवाभेदो न कटकत्वेन तेन तु भेद एव कुण्डलादेः । (९)यदि हाटकादभिन्नः कटकः,

---

(१) नश्यतश्चैकदेशस्य धर्म्यभेदे सर्वात्मना वस्त्वपगमान्न नित्यत्वमित्याहाभेदे इति ।

(२) यत्प्रमाणविपर्ययेण विरोधेन वर्तते तद्विरुद्धमिति क्व सम्प्रत्यय इत्यर्थः ।

(३) एकस्य कार्यकारणरूपेण द्व्यात्मकत्वे दृष्टान्तमाह कुण्डलमिति ।

(४) ननु हेमकुण्डलयोराधाराधेयभावोदेकाश्रयत्वाद्वा सामानाधिकरण्यं नाभेदादित्याशंक्य व्यभिचारमाह आधारेति ।

(५) भेदाभेदपक्षमुपसंहरति तथाचेति । लोके कार्यस्य कुण्डलादेः कारणात्मकत्वात्परमकारणस्य च सतः सर्वत्र हेमवदनुगतत्वात् सन् घट इत्यादिसामानाधिकरण्यबलेन जगतः कार्यस्य सत्ताकारणरूपेणाभेदो, व्यावृत्तकार्यरूपेण भेदश्च सिध्यतीत्यर्थः ।

(६) तत्त्वेनेति । कटकत्ववर्धमानकत्वरूपेण तयोरितरेतराभेदप्रसङ्ग इत्यर्थः ।

(७) कार्यस्य कारणादभेदे च सर्वकार्याणामेककार्यात्मकत्वप्रसङ्गः एककार्यस्य सर्वकार्याभिन्नेन कारणेनाभेदादित्याशयेनाह अपिचेति ।

(८) कटकस्य हे रूपे हाटकत्वं कटकत्वं च, तत्र हाटकरूपेणास्य कुण्डलादिभिरभेदोऽभिमत एव न कटकरूपेण व्यावृत्तत्वात्तस्येति स्वप्रक्रियया पुनः शङ्कते अथेति ।

(९) समाधत्ते यदीति । कटकहाटकयोरभेदाद्धाटकस्य कुण्डलादिष्वनुवृत्तेरभेदे कटकस्यापि तैरभेदः स्यादिति समाधानार्थः पूर्वोक्त एव स्मारित इति भावः ।

कथमयं कुण्डलादिषु नानुवर्तते, नानुवर्तते चेत् , कथं हाटकादभिन्नः कटकः । (१)ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते ते ततो भिन्ना एव, यथा सूत्रात् कुसुमभेदाः । नानुवर्तन्ते चानुवर्तमानेऽपि हाटकत्वे कुण्डलादयः, तस्मात्तेऽपि हाटकाद्भिन्ना एवेति । (२)सत्तानुवृत्त्या च सर्ववस्त्वनुगमे इदमिह नेदं, इदमस्मान्नेदम् , इदमिदानीं नेदम् , इदमेवं नेदमिति विभागो न स्यात् , कस्यचित् क्वचित् कदाचित् कथंचिद्विवेकहेतोरभावात् । (३)अपि च दूरात्कनकमित्यवगते न तस्य कुण्डलादयो विशेषा जिज्ञास्येरन् , कनकादभेदात्तेषां तस्य च ज्ञातत्वात् । अथ भेदोऽप्यस्ति कनकात् कुण्डलादीनामिति कनकावगमेऽप्यज्ञातास्ते । नन्वभेदोऽप्यस्तीति किं न ज्ञाताः ? प्रत्युत ज्ञानमेव तेषां(४) युक्तं, कारणाभावे हि कार्याभाव औत्सर्गिकः, स च कारणसत्तयाऽपोह्यते । अस्ति चाभेदे कारणसत्तेति कनके ज्ञाते ज्ञाता एव कुण्डलादय इति तज्जिज्ञासाज्ञानानि चानर्थकानि स्युः । तेन यस्मिन् गृह्यमाणे यन्न गृह्यते ततस्तो भिद्यते, यथा करभे गृह्यमाणेऽगृह्यमाणो रासभः करभात् । गृह्यमाणे च दूरतो हेम्नि न गृह्यन्ते तस्य भेदाः कुण्डलादयः, तस्मात्ते हेम्नो भिद्यन्ते । कथं तर्हि हेम कुण्डलमिति सामानाधिकरण्यमिति चेद्, (५)नह्याधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यमित्युक्तम् । अथानुवृत्तिव्यावृत्तिव्यवस्था च हेम्नि ज्ञाते कुण्डलादिजिज्ञासा च कथम् ? (६)न खल्वभेदे ऐकान्तिकेऽनैकान्तिके चैतदुभयमुपपद्यते 'यत' इत्युक्तम् । (७)तस्माद्भेदाभेदयोरन्यतरस्मिन्नवहेयेऽभेदोपादानेव भेदकल्पना न भेदोपादानाऽभेदकल्पनेति युक्तम् । भिद्यमानतन्त्रत्वाद्भेदस्य भिद्यमानानां च प्रत्येकमेकत्वाद्, एकाभावे चानाश्रयस्य भेदस्यायोगाद्, एकस्य च भेदानधीनत्वाद् , (८)नायमयमिति च भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वादेकत्वग्रहस्य चान्यानपेक्षत्वादभेदोपादानेवानिर्वचनीयभेदकल्पनेति सांप्रतम् । तथा च श्रुतिः 'मृत्तिकेत्येव सत्य'मिति। तस्मात् कूटस्थनित्यतैव पारमार्थिकी न परिणामिनित्यतेति सिद्धम् । "व्योमवदि"ति (पृ० १५१ पं० १) च दृष्टान्तः परसिद्धः, अस्मन्मते तस्यापि कार्यत्वेनानित्यत्वात् ।

---

(१) अनुवृत्तादव्यावृत्तस्य भेदे व्याप्तिमाह ये हीति ।

(२) सत्तानुवृत्त्येति । कुण्डलादिषु हेमानुवृत्त्या यदि तदभेदात्कटकादीनामनुगमस्तदा सत्तानुवृत्त्या तदभिन्नवस्तूनामितरेतराभेदापत्तेरिह क्षीरे दधि न तैलमिति संसर्गतदभावव्यवस्था, इदं पटादिकमस्मात्कुविन्दाद्भिन्नमिदं कुविन्द मस्मात्कुविन्दान्न भिन्नमित्यसंकरो, इदानीं वसन्ते इदं कोकिलकृतमिदमम्बुदध्वानं नेति व्यवस्था, इदं कुम्भाद्येवंकम्बुग्रीवाद्याकारं इदं पटादि नैवमिति प्रकाशासंकरश्च न स्यादिति भावः । विभागो न स्यादिति प्रत्येकमन्वयः ।

(३) कार्यकारणयोर्वास्तवाभेदेऽनुपपत्त्यन्तरमाह्यापिचेति ।

(४) तेषां कुण्डलादीनाम् । कारणस्याभेदस्याभावे कार्यस्य निर्णयस्याभाव औत्सर्गिकः प्राप्तः, स च कारणस्याभेदस्य सत्त्वादपाक्रियते घटसामग्रीत इव तत्त्यागभाव इत्यर्थः ।

(५) अत्यन्तभेदाभेदयोः सामानाधिकरण्यासम्भवाद्भेदाभेदानङ्गीकारे हेमकुण्डलमिति सामानाधिकरण्यानुपपत्तिमाशंक्योत्तरयति नहीति ।

(६) भेदाभेदानङ्गीकारेऽनुवृत्तिव्यावृत्तिव्यवस्था हेम्नि ज्ञाते कुण्डलादिजिज्ञासा च कथमित्याशंक्य समाधत्ते न खल्विति ।

(७) एवं समाहितेऽनेकान्तवादे स्वमतेन सामानाधिकरण्यमुपपादयति तस्मादिति ।

(८) भेदसंज्ञायामभेदसापेक्षत्वं प्रदर्श्य तत्प्रतीतावपि अभेदापेक्षामाह नायमिति ।

अत्र च "कूटस्थनित्य"मिति निर्वर्त्यकर्मतामपाकरोति । "सर्वव्यापी"ति प्राप्यकर्मताम् । "सर्वविक्रियारहित"मिति विकार्यकर्मताम् । "निरवयव"मिति संस्कार्यकर्मताम् । व्रीहीणां खलु प्रोक्षणेन संस्कारः क्रियाधेयोऽस्त्यनवयवत्वात्, अनंशत्वादित्यर्थः । पुरुषार्थतामाह-"नित्यतृप्त"मिति । तृप्त्या दुःखरहितं सुखमुपलक्षयति । क्षुद्दुःखनिवृत्तिसहितं हि सुखं तृप्तिः । सुखं चाप्रतीयमानं न पुरुषार्थ इत्यत आह "स्वयं ज्योति"रिति । (१)तदेवं स्वमतेन मोक्षाख्यं फलं नित्यं श्रुत्यादिभिरुपपाद्य क्रियानिष्पाद्यस्य तु मोक्षस्यानित्यत्वं प्रसञ्जयति—"तथदी"ति (पृ० १५३ पं० २)। न चागमबाधः, आगमस्योक्तेन प्रकारेणोपपत्तेः । अपि च ज्ञानजन्यापूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य सन्ति भूयस्यः श्रुतयो निवारिका इत्याह—"अपि च ब्रह्म वेदे"ति । (२)अविद्यादुयप्रतिबन्धापनयमात्रेण च विद्याया मोक्षसाधनत्वं न स्वतोऽपूर्वोत्पादेन चेत्यत्रापि श्रुतिमुदाहरति—"त्वं हि नः पिते"ति (पृ० १५५ पं० २) । न केवलमस्मिन्नर्थे श्रुत्यादयोऽपि त्वक्षपादाचार्यसूत्रमपि न्यायमूलमस्तीत्याह "तथा चाचार्यप्रणीत"मिति (पृ० १५६ पं० ३) आचार्यश्चोक्तलक्षणः पुराणे—

आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि ।
स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते(३) ॥ इति ।

तेन हि प्रणीतं सूत्रं "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावा(४)दपवर्गः" इति । पाठापेक्षया कारणमुत्तरं, कार्यं च पूर्वं, कारणापाये कार्यापायः, कफापाय इव कफोद्भवस्य ज्वरस्यापायः । जन्मापाये दुःखापायः, प्रवृत्त्यपाये जन्मापायः, दोषापाये प्रवृत्त्यपायः, मिथ्याज्ञानापाये दोषापायः । मिथ्याज्ञानं चाविद्या, रागाद्यपजनितक्रमेण दृष्टेनैव संसारस्य परमं निदानम् । सा च तत्त्वज्ञानेन ब्रह्मात्मैकत्वविज्ञानेनावगतिपर्यन्तेन विरोधिना निवर्त्यते । ततोऽविद्यानिवृत्त्या ब्रह्मरूपाविर्भावो मोक्षः, न तु विद्यकार्यस्तज्जनितापूर्वकार्यो वेति सूत्रार्थः । तत्त्वज्ञानान्मिथ्याज्ञानापाय इत्येतावन्मात्रेण सूत्रोपन्यासो, न त्वक्षपादसंमतं तत्त्वज्ञानमिह संमतम् । तदनेनाचार्यान्तरसंवादेनायमर्थो दृढीकृतः ॥

स्यादेतत्, नैकत्वविज्ञानं स्थितवस्तुविषयं, येन मिथ्याज्ञानं भेदावभासं निवर्तयन्न विधिविषयो भवेत्, अपि तु सम्पदा(५)दिरूपम्, तथा च विधेः प्रागप्राप्तं पुरुषेच्छया कर्त्तव्यं सद् विधिगोचरो भविष्यति, यथा वृत्त्यनन्तत्वेन मनसो विश्वदेवसाम्याद् विश्वान् देवान् मनसि सम्पाद्य मन आलम्बनमविद्यमानसमं कृत्वा प्राधान्येन सम्पाद्यानां विश्वेषामेव देवानामनुचिन्तनं तेन चानन्तलोकप्राप्तिः, एवं चिद्रूपसाम्याज्जीवस्य ब्रह्मरूपतां सम्पाद्य जीवमालम्बनमविद्यमानसमं कृत्वा प्राधान्येन ब्रह्मानुचिन्तनं तेन चामृतत्वफलप्राप्तिः । अध्यासे

---

(१) प्राग् विमोक्षनित्यत्वान्नियोगायोग उक्तः, साम्प्रतं तत्साधनज्ञानस्य केवलदृष्टार्थत्वाच्च स उच्यत इत्याह तदेवमित्यादिना ।

(२) एवं फलस्वभावेन नियोगाभावमभिधाय फलिज्ञानस्वभावेनाप्युच्यत इत्याहाविद्यादुयेति ।

(३) संस्कृत इति पाठान्तरम् । सोच्यत इत्यपि पाठ उपलभ्यते स चार्षत्वात्कथञ्चित्सङ्गमनीयः ।

(४) तदनन्तरापायादिति पाठान्तरम् ।

(५) आरोप्यप्रधाना सम्पदधिष्ठानप्रधानोऽध्यास इति आरोप्यत्वसाम्येऽप्यध्यासात्सम्पदो भेदो बोध्यः ।

त्वालम्बनस्यैव प्राधान्येनारोपिततद्भावस्या(१)नुचिन्तनं, यथा मनो 'ब्रह्मेत्युपासीत, आदित्यो ब्रह्मेत्यादेशः' । एवं जीवमब्रह्म 'ब्रह्मेत्युपासीते'ति । क्रियाविशेषयोगाद्वा, यथा 'वायुर्वाव संवर्गः,प्राणो वाव संवर्गः', बाह्या खलु वायुदेवता वन्ह्यादीन् संवृक्ते, महाप्रलयसमये हि वायुर्वन्ह्यादीन् संवृज्य संहृत्यात्मनि स्थापयति, यथाह द्रविडाचार्यः 'संहरणाद्वा संवरणाद्वा (२)सात्मीभावाद्वायुः संवर्ग' इति, अध्यात्मं च प्राणः संवर्ग इति, स हि सर्वाणि वागादीनि संवृङ्क्ते, प्रायणकाले हि स एव सर्वाणीन्द्रियाणि संगृह्योत्क्रामतीति, (३)सेयं संवर्गदृष्टिर्वायौ प्राणे च दशाशागतं जगद्दर्शयति यथा, (४)एवं जीवात्मनि बृंहणक्रियया ब्रह्मदृष्टिरमृतत्वाय फलाय कल्पत इति, तदेतेषु त्रिष्वपि पक्षेष्वात्मदर्शनोपासनादयः प्रधानकर्माण्यपूर्वविषयत्वात् (५)स्तुतशस्त्रवत् । आत्मा तु द्रव्यं कर्मणि गुण इति, संस्कारो वाऽऽत्मनो दर्शनं विधीयते, यथा दर्शपूर्णमासप्रकरणे 'पत्न्यवेक्षि(६)तमाज्यं भवती'ति समाम्नातं, प्रकरणिना च गृहीतमुपांशुयाजाङ्गभूताज्यद्रव्यसंस्कारतयाऽवेक्षणं गुणकर्म विधीयते, एवं कर्तृत्वेन क्रत्वङ्गभूते आत्मनि 'आत्मा वा अरे द्रष्टव्य'इति दर्शनं गुणकर्म विधीयते, (७)'यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयते' इति न्यायात्, अत आह-"न चेदं ब्रह्मात्मैकत्वविज्ञान"मिति । कुतः ? "सम्पदादिरूपे हि ब्रह्मात्मैकत्वविज्ञान"इति । (पृ० १५८ पं० ४) दर्शपूर्णमासप्रकरणे हि समाम्नातमाज्यावेक्षणं तदङ्गभूताज्यसंस्कार इति युज्यते । न च 'आत्मा वा अरे द्रष्टव्य' इत्यादि कस्यचित् प्रकरणे समाम्नातम् । (८)न चानारभ्याधीतमपि, 'यस्य पर्णमयी जुहूर्भवती'त्यव्यभिचरितक्रतुसम्बन्धजुहूद्वारेण जुहूपदं क्रतुं स्मारयद्वाक्येन यथा पर्णतायाः क्रतुशेषभावमापादयति, एवमात्मा नाव्यभिचरितक्रतुसम्बन्धो येन तद्दर्शनं क्रत्वङ्गं सदात्मानं क्रत्वर्थं संस्कुर्यात् । तेन यद्यपि विधिस्तथापि (९)'सुवर्णं भार्यमि'तिवद्

---

(१) आरोपितेति । आरोपितस्तद्भावो ब्रह्मादिभावो यस्य तन्मन आदि तथा ।

(२) सात्मीभावादिति । साम्येन कारणात्मत्वोपगमनादित्यर्थः ।

(३) सर्वाश्रयत्वाद्वायुप्राणयोरुपास्यत्वमाह सेयमिति । दशाशागतन्दशादिग्गतम् ।

(४) संवर्गदृष्टान्तं निगमय्य दार्ष्टान्तिकमाह एवमिति । बृंहणक्रियया-देहादिवारणमनाक्रियया ।

(५) स्तुतशस्त्रवदिति । 'आङ्ग्यैः स्तुवते प्रउगं शंसति' इति अत्र स्तुतशस्त्रे समाम्नाते । तत्र प्रगीतमन्त्रसाध्यं देवतागुणसम्बन्धाभिधानं स्तोत्रम्, अप्रगीतमन्त्रसाध्यं शस्त्रम् । अत्र 'मन्त्रैरेवार्थः स्मर्तव्य' इति नियमादेवताप्रकाशनसंस्कारार्थत्वेनैते गुणकर्मणी वाऽपूर्वार्थत्वेन प्रधानकर्मणी वेति संदेहे, क्रतूपयुक्तदेवतास्मरणस्य दृष्टत्वाद्गुणकर्मत्व इति पूर्वपक्षे, गुणाभिधानेन स्वरूपप्रकाशनरूपस्तुतिरत्र विहिता श्रूयते 'स्तुवते शंसती'ति । अभिधानाविवक्षायां स्तुतेरसम्भवात् स्तौतिशंसती अपूर्वोत्पत्तौ प्रति स्तोत्रशस्त्रे विदध्यातामिति सिद्धान्तः । एवमिहापि आत्मोपासनदर्शने प्रधानकर्मेत्यभिप्रायः ।

(६) अवेक्षितमिति निष्ठयाऽऽज्ये कर्मण्यवेक्षणं गुणीकृतं बोध्यम् । भाव्युपयोगमाज्यस्याह दर्शेति । पूषानुमन्त्रणवदुत्कर्षं वारयति प्रकरणिना चेति ।

(७) द्रव्यसंस्कारकस्य गुणकर्मत्वे जैमिनीयं (२।१।१८) सूत्रमुदाहरति यैरिति । यैरवघातादिभिर्द्रव्यं संस्कर्तुमिष्यते गुणस्तत्र प्रतीयेत द्रव्ये गुणभूतं कर्म प्रतीयेतेत्यर्थः ।

(८) आत्मोपास्त्यादेः संस्कारकर्मत्वं दर्शपूर्णमासप्रकरणोक्ताज्यावेक्षणवत्प्रकरणान्न सम्भवति इति दृष्टान्तवैषम्यप्रदर्शनपूर्वकमभिधाय वाक्यादपि तन्न सम्भवतीत्याहानारभ्याधीतमिति ।

(९) सुवर्णमिति । 'तस्मात्सुवर्णं हिरण्यं भार्यं दुर्वर्णोऽभ्रातृव्यो भवति' इत्यनारभ्याधीयते । तत्र किं शोभनहिरण्यधारणं क्रत्वङ्गमुत पुरुषार्थ इति संशये, दुर्वर्णकाम इत्यश्रवणात् स्वतन्त्रफलकल्पनाया क्र-

विनियोगभङ्गेन प्रधानकर्मैवापूर्वविषयत्वान्न गुणकर्मेति स्थवीयस्तयैतद्दूषणमनभिधाय सर्वपक्षसाधारणं दूषणमुक्तम्। तदतिरोहितार्थतया न व्याख्यातम्। किञ्च ज्ञानक्रियाविषयत्वविधानमस्य बहुश्रुतिविरुद्धमित्याह—**"न च विदिक्रिये"ति**। (पृ० १५९-पं० ३) शङ्कते **"अविषयत्व" इति**। (पृ० १६० पं० १) ततश्च शान्तिकर्मणि वेतालोदय इति भावः। निराकरोति **"न"** कुतः ? **"अविद्याकल्पितभेदनिवृत्तिविषयत्वादि"ति**। सर्वमेव हि वाक्यं नेदन्तया वस्तुभेदं बोधयितुमर्हति, नहीक्षुक्षीरगुडादीनां मधुररसभेदः शक्य आख्यातुम्। एवमन्यत्रापि सर्वत्र द्रष्टव्यम्। तेन प्रमाणान्तरसिद्धे (१)लौकिक एवार्थे यदा गतिरीदृशी शब्दस्य, तदा कैव कथा प्रत्यगात्मन्यलौकिके। अदूराविप्रकर्षेण तु कथंचित्प्रतिपादनमिहापि समानम्। (२)त्वंपदार्थो हि प्रमाता प्रमाणाधीनया प्रमित्या प्रमेयं घटादि व्याप्नोतीत्यविद्याविलसितम्। (३)तदस्याविषयीभूतोदासीनतत्पदार्थप्रत्यगात्मसामानाधिकरण्येन प्रमातृत्वाभावात् तन्निवृत्तौ प्रमाणादयस्तिस्रो विधा निवर्तन्ते। नहि पक्तुरवस्तुत्वे पाक्यपाकपचनानि वस्तुसन्ति भवितुमर्हन्तीति। तथाहि—

(४)विगलितपराग्वृत्त्यर्थत्वं पदस्य तदस्तदा त्वमिति हि पदेनैकार्थत्वे त्वमित्यपि यत्पदम्।
तदपि च तदा गत्वैकार्थ्यं विशुद्धचिदात्मतां त्यजति सकलान् कर्तृत्वादीन् पदार्थमलान्निजान्॥

इत्यान्तरश्लोकः। अत्रैवार्थे श्रुतीरुदाहरति—**"तथा च शास्त्रं यस्यामतमि"ति**। (पृ० १६१ पं० १) प्रकृतमुपसंहरति—**"अतोऽविद्याकल्पिते"ति**। (५)परपक्षे मोक्षस्यानित्यतामापादयति—**"यस्य त्वि"ति**। कार्यमपूर्वं यागादिव्यापारजन्यं तदपेक्षते मोक्षः स्वोत्पत्ताविति। **"तयोः पक्षयो"रिति**। (पृ० १६२ पं० १) निर्वर्त्यविकार्ययोः। क्षणिकं ज्ञानमात्मेति बौद्धाः। तथा च विशुद्धविज्ञानोत्पादो मोक्ष इति निर्वर्त्यो मोक्षः। अन्येषां तु संसारकपावस्थामपहाय या कैवल्यावस्थावाप्तिरात्मनः स मोक्ष इति विकार्यो मोक्षः। यथा पयसः पूर्वावस्थापहानेनावस्थान्तरप्राप्तिर्विकारो दधीति। तदेतयोः

त्वङ्कामिति पूर्वपक्षः। तत्र हिरण्यधारणस्य लोकेपि विद्यमानत्वेन पर्णमयीतावत्क्रत्वङ्गत्वव्यभिचाराभावात् हिरण्यसाधनकं धारणं वाक्यशेषगतफलाय विधीयते इति पुंरुषार्थत्वमिति सिद्धान्तितम् यथा, तथेहाप्यात्मसाधनकदर्शनेनामृतत्वं भावयेदिति विधानात् प्रधानकर्मतैवेत्यर्थः।

(१) गामानयेति लौकिकवाक्ये हि गवानयनकर्तव्यार्थः, सोपि अन्यवाक्यसाधारण इति न विवक्षितगवानयनं वक्ति वाक्यं, प्रकरणादिवशेन त्वर्थात्सिद्धिर्यदि तदाऽलौकिकवाक्येऽर्थात्प्रत्यगात्मसिद्धिरिति किमु वक्तव्यमिति भावः।

(२) वेदान्तानामदूरविप्रकर्षेण पदार्थबोधकत्वं प्रतिपादयति त्वंपदार्थ इति।

(३) तदिति। तत्र सतीत्यर्थः। अविषयीभूतोदासीनतत्पदार्थस्य प्रत्यगात्मनश्च तत्त्वमसीति सामानाधिकरण्येनास्य संसारिणः प्रमातृत्वाभाव तु तन्निवृत्तौ प्रमित्या प्रमेयं व्याप्नोतीत्येवंभावस्य निवृत्तौ त्रिपुटीप्रकारा निवर्तन्ते इति भावः।

(४) विगलितेति। त्वमिति पदेनैकार्थत्वे जाते तस्मिन् काले तदस्तत्पदस्य विगलिता पराक्त्वेन वृत्तिर्वर्तनं यस्य स विगलितपराग्वृत्तिस्तादृशः प्रत्यक्त्वमापन्नोऽर्थो यस्य तद्विगलितपराग्वृत्त्यर्थं तस्य भावस्तत्त्वं भवति, त्वमिति पदमपि तत्पदेनैकार्थ्यं विशुद्धचिदात्मत्वं प्राप्य कर्तृत्वादीन् दोषान् त्यजतीति श्लोकार्थः। तत्त्वंपदयोरुपाधिविगमाच्छुद्धचैतन्योदय इति तात्पर्यम्।

(५] मोक्षस्योत्पाद्यत्वविकार्यत्वोभयपक्षे नित्यत्वं प्रदर्शयन्भाष्यमवतारयति परपक्षे इति।

पक्षयोरनित्यता मोक्षस्य, कार्यत्वाद् दधिघटादिवत् । अथ 'यदतः परो दिवो ज्योतिर्दीप्यते' इति श्रुतेर्ब्रह्मणो विकृताविकृतदेशभेदावगमादविकृतदेशब्रह्मप्राप्तिरुपासनादिविधिकार्या भविष्यति, तथा च प्राप्यकर्मता ब्रह्मण इत्यत आह—"न चाप्यत्वेनापी"ति । अन्यदन्येन विकृतदेशपरिहाण्याऽविकृतदेशं प्राप्यते । तद्यथोपवेलं जलधिरतिबहुल(१)चपलकल्लोलमालापरस्परास्फालनसमुल्लसत्फेनपुञ्जस्तबकतया विकृतो, मध्ये तु प्रशान्तसकलकल्लोलोपसर्गः स्वस्थः स्थिरतयाऽविकृतस्तस्य मध्यमाविकृतं पौतिकः(२) पोतेन प्राप्नोति । जीवस्तु ब्रह्मैवेति किं केन प्राप्यतां, भेदाश्रयत्वात् प्राप्तेरित्यर्थः । अथ जीवो ब्रह्मणो भिन्नस्तथापि न तेन ब्रह्माप्यते, ब्रह्मणो विभुत्वेन नित्यप्राप्तत्वादित्याह—"स्वरूपव्यतिरिक्तत्वेपी"ति । संस्कार्यकर्मतामपाकरोति—"नापि संस्कार्य" इति । (पृ० १७३ पं० १) द्वयी हि संस्कार्यता, गुणाधानेन वा यथा बिजपूरकुसुमस्य लाक्षारसावसेकस्तेन हि तत् कुसुमं संस्कृतं लाक्षासवर्णं फलं प्रसूते । दोषापनयेन वा यथा मलिनमादर्शतलं निघृष्टभिष्टकाचूर्णोन्मृज्ञासितभास्वरत्वं संस्कृतं भवति । तत्र न तावद् ब्रह्मणि गुणाधानं सम्भवति । गुणो हि ब्रह्मणः स्वभावो वा भिन्नो वा ? स्वभावश्चेत् कथमाधेयस्तस्य नित्यत्वात् । भिन्नत्वे तु कार्यत्वेन मोक्षस्यानित्यत्वप्रसङ्गः । न च भेदे धर्मधर्मिभावो गवाश्ववत् । भेदाभेदश्च व्युदस्तो विरोधात् । तदनेनाभिसन्धिनोक्तम् "अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य" । द्वितीयं पक्षमपक्षिपति—"नापि दोषापनयनेने"ति । अशुद्धिः सती दर्पणे निवर्तत, (३)न तु ब्रह्मण्यसती निवर्तनीया, नित्यनिवृत्तत्वादित्यर्थः । शङ्कते(४)—"स्वात्मधर्म एवे"ति । ब्रह्मस्वभाव एव मोक्षोऽनाद्यविद्यामलावृत उपासनादिक्रियया ऽऽत्मनि संस्क्रियमाणेऽभिव्यज्यते, न तु क्रियते । एतदुक्तं भवति नित्यशुद्धत्वमात्मनोऽसिद्धं, संसारावस्थायामविद्यामलिनत्वादिति । शङ्कां निराकरोति—"न" । कुतः ? "क्रियाश्रयत्वानुपपत्तेः" । नाविद्या ब्रह्माश्रया, किं तु जीवे, सा त्वनिर्वचनीयेत्युक्तं, तेन नित्यशुद्धमेव ब्रह्म । अभ्युपेत्य त्वशुद्धिं क्रियासंस्कार्यत्वं दूष्यते । क्रिया हि ब्रह्मसमवेता वा ब्रह्म संस्कुर्याद्, यथा निघर्षणभिष्टकाचूर्णसंयोगविभागप्रचयो निरन्तर आदर्शतलसमवेतः । अन्यसमवेता वा । न तावद् ब्रह्मधर्मः क्रिया, तस्याः स्वाश्रयविकारहेतुत्वेन ब्रह्मणो नित्यत्वव्याघातात् । (५)अन्याश्रया तु कथमन्यस्योपकरोति, अतिप्रसङ्गात् । नहि दर्पणे निघृष्यमाणे मणिर्विशुद्धो दृष्टः । 'तच्चानिष्ट-" मिति । (६)तदा बाधनं परामृशति । अत्र व्यभिचारं चोदयति—"ननु देहाश्रयये"-

---

(१) वेलासमीपे विकृतत्वे हेतुरतिबहलेति ।

(२) पौतिकः पोतेन दीव्यति व्यवहरति यः स, पोतवणिगित्यर्थः ।

(३) अशुद्धिर्ब्रह्मणि सत्यसती वेति विकल्प्य भिन्नाभिन्नविकल्पाभ्यां प्रथमपक्षं निरस्तं मत्वा द्वितीयं निरस्यन्नाह नत्विति । (४) अविद्या वास्तविकीति मत्वा शंकत इत्यर्थः ।

(५) अन्याश्रयेति । यद्यपि स्पन्दरूपा भावना चैत्रस्थिता दर्पणस्योपकरोति, तथापि संयोगविभागाख्यधात्वर्थद्वारा तौ च नात्मनीत्यर्थः । संयोगविभागातिरिक्तधात्वर्थपक्षेप्येतत्तुल्यं, धात्वर्थस्य संयोगविभागद्वाराऽतिशयजनकत्वात्, न चात्मनि क्रियाजन्यातिशयसम्भव इति ।

(६) तदेति । तच्छब्देन 'बाध्येरन्' इत्युक्तबाधनस्याव्यवहितत्वात्परामर्शो न तु अनित्यत्वपक्षस्येत्यव्यवहितत्वादित्यर्थः ।

ति (पृ० १६४ पं० २) । परिहरति—"न, देहादिसंहतस्ये"ति । (१)अनाद्य-निर्वाच्याविद्योपधानमेव ब्रह्मणो जीव इति च क्षेत्रज्ञ इति चाचक्षते । स च स्थूलसूक्ष्मशरीरेन्द्रियादिसंहतस्तत्संघातमध्यपतितस्तदभेदेनाहमितिप्रत्ययविषयीभूतोऽतः शरीरादिसंस्कारः शरीरादिधर्मोप्यात्मनो भवति, तदभेदाध्यवसायात् । यथाऽङ्गरागधर्मः सुगन्धिता कामिनीनां व्यपदिश्यते । (२)तेनात्रापि यदाश्रिता क्रिया सांव्यवहारिकप्रमाणविषयीकृता तस्यैव संस्कारो नान्यस्येति न व्यभिचारः । तत्त्वतस्तु न क्रिया न संस्कार इति । सनिदर्शनं तु शेषमध्यासभाष्य एव कृतव्याख्यानमिति नेह व्याख्यातम् । "तयोरन्यः पिप्पल"मिति(पृ० १६५पं०२) । अन्यो जीवात्मा । पिप्पलं कर्मफलम् । "अनश्नन्नन्य" इति । परमात्मा । संहतस्यैव भोक्तृत्वमाह मन्त्रवर्णः—"आत्मेन्द्रिये"ति । अनुपहितशुद्धस्वभावब्रह्मप्रदर्शनपरौ मन्त्रौ पठति—"एको देव"इति । "शुक्रं" (पृं०१६६ पं०२) दीप्तिमत्, "अव्रणं"दुःखरहितम्, "अस्नाविरम्" (३)अविगलितम्, अविनाशीति यावत् । उपसंहरति—"तस्मादि"ति । ननु मा भून्निर्वर्त्यादिकर्मताचतुष्टयी(४), पञ्चमी तु काचिद् विधा भविष्यति यया मोक्षस्य कर्मता घटिष्यत इत्यत आह "अतोन्य"दिति । एभ्यः प्रकारेभ्यो न प्रकारान्तरमन्यदस्ति, यतो मोक्षस्य क्रियानुप्रवेशो भविष्यति । (५)एतदुक्तं भवति चतसृणां विधानां मध्येऽन्यतमतया क्रियाफलत्वं व्याप्तं, सा च मोक्षाद् व्यावर्तमाना व्यापकानुपलब्ध्या मोक्षस्य क्रियाफलत्वं व्यावर्तयतीति । तत् किं मोक्षे क्रियैव नास्त, तथा च तदर्थानि शास्त्राणि तदर्थाश्च प्रवृत्तयोऽनर्थकानीत्यत उपसंहारव्याजेनाह—"तस्माज्ज्ञानमेक"मिति । अथ ज्ञानं क्रिया मानसी कस्मान्न विधिगोचरः, कस्माच्च तस्याः फलं निर्वर्त्यादिष्वन्यतमं न मोक्ष इति चोदयति—"ननु ज्ञानमि"ति । परिहरति "न, वैलक्षण्यात्" । अयमर्थः—(६)सत्यं, ज्ञानं मानसी क्रिया, न त्वियं ब्रह्मणि फलं जनयितुमर्हति, तस्य स्वयंप्रकाशतया विदिक्रियाकर्मभावानुपपत्तेरित्युक्तम् । तदेतस्मिन्वैलक्षण्ये स्थिते एव (७)वैलक्षण्यान्तरमाह—"क्रिया हि नाम से"ति (पृ० १६७ पं० १) । "यत्र विषये, वस्तुस्वरूपनिरपेक्षैव चोद्यते" । यथा देवतासंप्रदानकहविर्ग्रहणे देवतावस्तुस्वरूपानपेक्षा देवताध्यानक्रिया, यथा वा योषिति अग्निवस्त्वनपेक्षाऽग्निबुद्धिर्या सा क्रिया हि नामेति योजना ।

---

(१) ननु देहादावहंविभ्रमवत इव संस्कार्यत्वमिति कुत: ? स्वत एव किं न संस्कार्यत्वमत आह अनाद्यनिर्वाच्येति ।

(२) निष्कृष्टार्थमाह तेनेति । देहादावैक्येनाध्यस्ते आत्मनि क्रियारोपस्तज्जन्यसंस्कारश्चातो नान्याश्रिताक्रियाफलभाक्त्वमन्यस्येति न व्यभिचार इत्यर्थः ।

(३) अविगलितमिति 'स्नुप्रस्रवणे इति धातुमभिप्रेत्यार्थो द्रष्टव्यः ।

(४) निर्वर्त्यादीति । उत्पाद्यविकार्याप्यसंस्कार्यकर्मताचतुष्टयीत्यर्थः ।

(५) क्रियानुप्रवेशस्य द्वारान्तरं भवत्वित्याशंकायामतोऽन्यदिति भाष्ये तदभावपतिज्ञामात्रमतस्तत्र हेतुप्रदर्शनायाह एतदुक्तमित्यादिना ।

(६) ज्ञानस्य मानसक्रियात्वमभ्युपेत्य विधेयत्वनिराकरणाभिप्रायेणाह सत्यमिति । वस्तुतो विदिक्रियायाः कर्मभावानुपपत्तेरित्यर्थः ।

(७) वैलक्षण्यान्तरमिति । ज्ञेयस्य वैलक्षण्यं पूर्वमुक्तमिदानीं ज्ञानस्याविधेयत्वं वैलक्षण्यमुच्यत इत्यर्थः ।

(१)नहि 'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्'त्यस्माद्विधेः प्राग्देवताध्यानं प्राप्तं, प्राप्तं त्वधीतवेदान्तस्य विदितपदतदर्थसंबन्धस्याधिगतशब्दन्यायतत्त्वस्य 'सदेव सौम्येदमि'त्यादे'स्तत्त्वमसी'त्यन्तात्संदर्भाद्ब्रह्मात्मभावज्ञानं शब्दप्रमाणसामर्थ्यात्, इन्द्रियार्थसंनिकर्षसामर्थ्यादिव प्रणिहितमनसः स्फीतालोकमध्यवर्तिकुम्भानुभवः। नह्यसौ स्वसामग्रीबललब्धजन्मा मनुजेच्छयाऽन्यथाकर्तुमकर्तुं वा शक्यो, देवताध्यानवद्, येनार्थवानत्र विधिः स्यात्। (२) न चोपसना वा ऽनुभवपर्यन्तता वा ऽस्य विधेर्गोचरस्तयोरन्वयव्यतिरेकावधृतसामर्थ्ययोः साक्षात्कारे वाऽनाद्यविद्यापनये वा विधिमन्तरेण प्राप्तत्वेन पुरुषेच्छयाऽन्यथाकर्तुमकर्तुं वाऽशक्यत्वात्। तस्माद्ब्रह्मज्ञानं मानसी क्रियाऽऽपि न विधिगोचरः। पुरुषचित्तव्यापाराधीनायास्तु क्रियाया वस्तुस्वरूपनिरपेक्षता क्वचिदविरोधिनी, यथा देवताध्यानक्रियायाः, नह्यत्र वस्तुस्वरूपेण कश्चिद्विरोधः। (३)क्वचिद्वस्तुस्वरूपाविरोधिनी, यथा योषित्पुरुषयोरभिबुद्धिरित्येतावता भेदेन निदर्शनमिथुनद्वयोपन्यासः। क्रियैवेत्येवकारेण वस्तुतन्त्रत्वमपाकरोति। नन्वा'त्मेत्येवोपासीते'त्यादयो विधयः श्रूयन्ते, न च प्रमत्तगीताः, तुल्यं हि (४)सांप्रदायिकं, तस्माद्विधेयेनात्र भवितव्यमित्यत आह—**"तद्विषया लिङादय"** इति (पृ० १६९ पं० १)। सत्यं श्रूयन्ते लिङादयो, न त्वमी (५)विधिविषयाः, तद्विषयत्वे ऽप्रामाण्यप्रसङ्गात्। हेयोपादेयविषयो हि विधिः। स एव च हेय उपादेयो वा यं पुरुषः कर्तुमकर्तुमन्यथा वा कर्तुं शक्नोति। तत्रैव च समर्थः कर्ताऽधिकृतो नियोज्यो भवति। न (६)चैवंभूतान्यात्मश्रवणमननोपासनदर्शनानीति विषयतदनुष्ठात्रोर्विधिव्यापकयोरभावाद् विधेरभाव इति प्रत्युक्ता अपि लिङादयः प्रवर्तनायामसमर्था उपल इव क्षुरतैक्ष्ण्यं कुण्ठमप्रमाणीभवन्तीति। **"अनियोज्यविषयत्वादि"ति**। समर्थो हि कर्ताऽधिकारी नियोज्य इत्यर्थः। असामर्थ्येतु न कर्तृता ततो नाधिकृतोऽतो न नियोज्य इत्यर्थः। यदि विधेरभावान्न विधिवचनानि, किमर्थानि तर्हि वचनान्येतानि विधिच्छायानीति पृच्छति—**"किमर्थानी"ति** (पृ० १७० पं० १)। न चानर्थकानि युक्तानि, स्वाध्यायविध्यधीनग्रहणत्वानुपपत्तेरिति भावः। उत्तरम्—**"स्वाभाविके"ति**। (७)अन्यतः प्राप्ता एव हि श्रवणादयो विधिसरूपैर्वाक्यैरनूद्यन्ते। न चानुवादोऽप्यप्रयोजनः, प्रवृत्तिविशेषकरत्वात्। तथाहि—तत्तदिष्टानिष्टविषयेप्साजिहासापहृतहृदयतया बहिर्मुखो न प्रत्यगात्मनि समाधातुमर्हति। आत्म-

---

(१) ध्यानस्य वस्त्वनपेक्षत्वमुक्त्वा पुरुषेच्छाधीनत्वमुपपादयति न हीति। वषट्करिष्यन् हेता। विध्यर्थानुष्ठानात्प्राक् प्रमाणवशाद्ध्यानं न सिध्यति ततः पुरुषेच्छावशवर्तीति भावः।

(२) शब्दज्ञानाभ्यासो वा तस्यैव साक्षात्कारपर्यन्तता वा पुरुषेच्छाधीनेत्याशंक्याह नचेति। उपासनायाः साक्षात्कारेऽनुभवपर्यन्तता शब्दोक्तसाक्षात्कारस्याविद्यापनये प्राप्तत्वादित्यर्थः।

(३) क्वचित्क्रियाया वस्तुस्वरूपाविरोधित्वं प्रमाणज्ञानाद्वैलक्षण्यमित्याह क्वचिदिति।

(४) सांप्रदायिकं—गुरुमुखाध्ययनादि। (५) विधिविषयाः—कार्यविषयाः।

(६) एवंभूतानीति। क्रियावत्कर्तव्यतावीधियुक्तानि कर्तुमकर्तुमन्यथा वा कर्तुं शक्यानि आत्मश्रवणादीनि न, श्रवणस्य तात्पर्यावगमरूपत्वात् मननस्य चालोचनरूपत्वादुपासनस्यापि प्रत्ययावृत्त्यात्मकत्वादित्यर्थः।

(७) अन्यत इति। आत्मदर्शनार्थं कर्तव्यत्वेनान्वयव्यतिरेकप्राप्ता एव श्रवणादयो विधिसमानरूपैरुक्तवाक्यैरनूद्य तत्रतप्राशस्त्यलक्षणया तेषु रुचिमुत्पाद्यानात्मचिन्तायामरुचिर्जन्यत इत्यर्थः। इदमेवाह तथाहीत्यादिना।

श्रवणादिविधिसरूपैस्तु वचनैर्मनसो विषयस्रोतः खिलीकृत्य प्रत्यगात्मस्रोत उद्घाट्यते इति प्रवृत्तिविशेषकरतानुवादानामस्तीति सप्रयोजनतया स्वाध्यायविध्यधीनग्रहणत्वमुपपद्यत इति। यच्च चोदितमात्मज्ञानमनुष्ठानानङ्गत्वादपुरुषार्थमिति। तदयुक्तम्, स्वतोऽस्य पुरुषार्थत्वे सिद्धे यदनुष्ठानानङ्गत्वं तद्भूषणं न दूषणमित्याह—"यद्पी"ति (पृ० १७१ पं० ५)। "अनुसंज्वरेत्" शरीरं परितप्यमानमनुतप्येत। सुगममन्यत्। प्रकृतमुपसंहरति। "तस्माच्च प्रतिपत्ती"ति। (१)प्रकृतसिद्ध्यर्थमेकदेशिमतं दूषयितुमनुभाषते "यद्पि केचिदाहु"रिति (पृ० १७२ पं० १)। दूषयति—"तच्चे"ति। इदमत्राकूतम्—

(२)कार्यबोधे यथा चेष्टा लिङ्गं हर्षादयस्तथा।
सिद्धबोधेऽर्थवत्त्वेवं शास्त्रत्वं हितशासनात्॥

(३)यदि हि पदानां कार्याभिधाने तदर्थस्वार्थाभिधाने वा नियमेन वृद्धव्यवहारे सामर्थ्यमवधृतं भवेत्, न भवेत् अहेयोपादेयभूतब्रह्मात्मतापरत्वमुपनिषदाम्, तत्राविदितसामर्थ्यत्वात्पदानां लोके तत्पूर्वऽकत्वाच्च वैदिकार्थप्रतीतेः। (४)अथ तु भूतेऽप्यर्थे पदानां लोके शक्यः संगतिग्रहस्तत उपनिषदां तत्परत्वं पौर्वापर्यपर्यालोचनयाऽवगम्यमानमपह्नुत्य न कार्यपरत्वं शक्यं कल्पयितुं, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। (५)तत्र तावदेवमकार्येऽर्थे न संगतिग्रहो, यदि तत्परः प्रयोगो न लोके दृश्येत, तत्प्रत्ययो वा व्युत्पन्नस्योन्नेतुं न शक्येत। न तावत्तत्पदः प्रयोगो न दृश्यते लोके। कुतूहलभयादिनिवृत्यर्थानामकार्यपराणां पदसन्दर्भाणां प्रयोगस्य लोके बहुलमुपलब्धेः। तद्यथाऽऽखण्डलादिलोकपालचक्रवालादिवसतिः सिद्धविद्याधरगन्धर्वाप्सरःपरिवारो ब्रह्मलोकावतीर्णमन्दाकिनीपयःप्रवाहपातधौतकलधौतमयशिलातलो नन्दनादिप्रमदवनविहारिमणिमयशकुन्तकमनीयनिनदमनोहरः पर्वतराजः सुमेरुरिति, नैष भुजङ्गो रज्जुरियमित्यादि(६)। नापि भूतार्थबुद्धिर्व्युत्पन्नपुरुषवर्तिना न शक्या समुन्नेतुं, हर्षादे-

---

(१) प्रकृतसिध्यर्थ—सिद्धे वस्तुनि वेदान्तप्रामाण्यसिध्यर्थम्। सिद्धे वस्तुनि संगतिग्रहाविरहादिकं दूषयितुमित्यर्थः।

(२) परपुरुषवर्तिशब्दार्थज्ञानलिङ्गरूपायाः प्रवृत्तेः सिद्धवस्तुन्यसम्भवात् वेदान्तवाक्यानां तत्र संगतिग्रहो न स्यादिति प्रभाकरमते न युक्तमित्याह कार्यबोध इति। अयमत्र तेषामाशयः—प्रवृत्तिनिवृत्तिलिङ्गभ्यः श्रोतुरन्तरेतुकार्यबोधमनुमाय वक्तृवाक्यस्य कार्यपरत्वं निश्चित्य वाक्यस्थपदानां कार्यान्विते शक्तिग्रहात्तां सिद्धस्यापदार्थवाक्यमिति न केवलवस्तुवादी वेदभाग इति। तत्र युक्तम्। यतः पुत्रस्ते जात इति वाक्यश्रोतुः पितुर्हर्षलिङ्गेनेष्टं पुत्रजन्मानुमाय पुत्रादिपदानां सिद्धेऽर्थे पुत्रादावपि संकेतग्रहात् कार्यान्वितापेक्षयाऽन्वितमात्रे शक्तिरित्यङ्गीकारे लाघवात्सिद्धस्यापि वाक्यार्थत्वसम्भवादिति संक्षेपः। यथा कार्यार्थज्ञाने चेष्टा तथा हर्षादयापि सिद्धबोधे लिङ्गं, तथाच कार्यबोध इव पुत्रजन्मरूपसिद्धार्थबोधेपि हर्षादिप्रयोजनसम्भवादर्थवत्ता, इत्थं हितशासनात् प्रयोजनबोधनात्सिद्धार्थबोधे वेदान्तानामपि शास्त्रत्वमिति कारिकार्थः।

(३) इदमेव विवृणोति यदि हीत्यादिना। भवेत्तर्हि न भवेदुपनिषदां ब्रह्मात्मपरत्वमित्यन्वयः। अत्र हेतुमाह तत्रेति। लोके पदानां सिद्धार्थेऽविहितसामर्थ्यादैदिकार्थप्रतीतेस्तत्पूर्वकत्वादिति योजना।

(४) लौकिकपदानामुक्तरीत्या सिद्धार्थबोधकत्वे सिद्धेपि तथैवेत्याह अथेति।

(५) लोकेपि भूतार्थपर्यवस्योदाहरणं प्रदर्शयितुमुपोद्घातमाह तत्रेति। आखण्डलादीति सुमेरुरित्यन्तमुदाहरणम्। तदर्थः सुगमः।

(६) इत्यादीति। इदं भयनिवृत्तिप्रयोजनं भूतार्थपरस्योदाहरणं, प्रथमन्तु तादृशसुमेरुभवत्वज्ञानकौतुकोत्पादप्रयोजनमुदाहरणं द्रष्टव्यम्।

रुनयनहेतोः संभवात्। (१) तथाह्यविदितार्यजनभाषार्थो द्रविडो नगरगमनोद्यतो राजमार्गाभ्यर्णं देवदत्तमन्दिरमध्यासीनः प्रतिपन्नजनकानन्दनिबन्धनपुत्रजन्मा वार्ताहारेण सह नगरस्थदेवदत्ताभ्याशमागतः पटवासोपायनार्पणपुरःसरं 'दिष्ट्या वर्धसे पुत्रस्ते जात'इति वार्ताहार्याहारश्रवणसमनन्तरमुपजातरोमाञ्चकञ्चुकं विकासितनयनोत्पलमतिस्मेरमुखमहोत्पलमवलोक्य देवदत्तमुत्पन्नप्रमोदमनुमिमीते, प्रमोदस्य च प्रागभूतस्य तद्वार्ताहारश्रवणसमनन्तरं भवतस्तद्धेतुताम् । न चायमप्रतिपादयन् हर्षहेतुमर्थं हर्षाय कल्पत इत्यनेन हर्षहेतुरर्थ उक्त इति प्रतिपद्यते । हर्षहेत्वन्तरस्य चाप्रतीतेः पुत्रजन्मनश्च तद्धेतोरवगमात्तदेव वार्ताहारेणाभ्यधायीति निश्चिनोति । एवं भयशोकादयोऽप्युदाहार्याः । (२) तथा च प्रयोजनवत्तया भूतार्थाभिधानस्य प्रेक्षावत्प्रयोगोप्युपपन्नः । (३)एवं च ब्रह्मस्वरूपज्ञानस्य परमपुरुषार्थहेतुभावादनुपदिशतामपि पुरुषप्रवृत्तिनिवृत्ती वेदान्तानां पुरुषहितानुशासनाच्छास्त्रत्वं सिद्धं भवति । तत्सिद्धमेतद्–विवादाध्यासितानि वचनानि भूतार्थविषयाणि, भूतार्थविषयप्रमाजनकत्वात्, यद्यद्विषयप्रमाजनकं तत्तद्विषयं, यथा रूपादिविषयं चक्षुरादि, तथा चैतानि, तस्मात्तथेति। तस्मात्सुष्ठूक्तं **"तत्रौपनिषदस्य पुरुषस्यानन्यशेषत्वादि"ति** । उपनिपूर्वात्सदेर्विशरणार्थात्क्विप्युपनिषत्पदं व्युत्पादितमुपनीयाद्वयं ब्रह्म (४)सवासनामविद्यां हिनस्तीति ब्रह्मविद्यामाह, तद्धेतुत्वाद्वेदान्ता अप्युपनिषदः, ततो विदित औपनिषदः पुरुषः। एतदेव विभजते–**"योसावुपनिषत्स्वि"ति** । अहम्प्रत्ययविषयाद्विनष्टि–**"असंसारी"ति** (पृ० १७३ पं० १) । अत एव क्रियारहितत्वाच्चतुर्विधद्रव्यविलक्षणः । अतश्च चतुर्विधद्रव्यविलक्षणो यदनन्यशेषः। अन्यशेषं हि भूतं द्रव्यं चिकीर्षितं सदुत्पत्त्याद्याप्यं सम्भवति, यथा यूपं तक्षतीत्यादि । यत्पुनरनन्यशेषं भूतमाप्युपयोगरहितं, यथा 'सुवर्णं भार्यं, सक्तून् जुहोती'त्यादि, न तस्योत्पत्त्याद्याप्यता । कस्मात्पुनरस्यानन्यशेषतेत्यत आह-यतः **"स्वप्रकरणस्थः"**। उपनिषदामनारभ्याधीतानां पौर्वापर्यपर्यालोचनया पुरुषप्रतिपादनपरत्वेन पुरुषस्यैव प्राधान्येनेदं प्रकरणम् । न च जुह्वादिद्रव्यभिचरितक्रतुसम्बन्धः पुरुष इत्युपपादितम् । अतः स्वप्रकरणस्थः सोऽयं तथाविध उप-

---

(१) पूर्वप्रदर्शितस्य हर्षहेतुकानुमानपूर्वकसिद्धार्थसंगतिग्रहस्योदाहरणमाह तथाहीति । अयमभिप्रायः–कश्चिद्द्रविडदेशीय आर्यभाषानभिज्ञोऽपि देवदत्तस्यानन्दकारणं पुत्रजन्म जानानो देशान्तराद्देवदत्तपुत्रवृत्तान्तकथनार्थमागताद्वार्ताहरात् उपायनसमर्पणपूर्वकं 'ते पुत्रो जात' इति वाक्यं श्रुत्वा जातरोमाञ्चादिसात्विकभावं देवदत्तमवलोक्यायं प्रमोदवान् रोमाञ्चादिहर्षलक्षणयुक्तत्वात् इत्यनुमायाऽस्य प्रमोदो वार्ताहरवाक्यहेतुकस्तच्छ्रवणान्त एव जायमानत्वादित्यनुमानेन वाक्यस्यैव प्रमोदहेतुत्वमवधारयति । वाक्यं च हर्षहेत्वर्थं प्रतिपादयदेव हर्षहेतु सम्भवतीति, कारणान्तरं च नास्तीति पुत्रजन्मनश्च हर्षहेतोः पूर्वं ज्ञात्वा तदेव वार्ताहारेण कथितमिति सिद्धे पुत्रजन्मन्येव सङ्गतिग्रह इति भावः ।

(२) अर्थवत्त्वेत्यादि श्लोकांशं व्याचष्टे तथाचेति । अनेन सिद्धार्थस्य सप्रयोजनत्वात् प्रतिपित्सितत्वं प्रतिपिपादयिषितत्वं च प्रेक्षावत्प्रवृत्यङ्गं दर्शितम् ।

(३) शास्त्रत्वमित्यंशं व्याचष्टे एवं चेति । शास्त्रे प्रवृत्त्याद्याश्रयणं पुरुषार्थमात्रार्थं भवति, स यदि पुरुषार्थो विनाऽऽद्यामं ज्ञानादेव भवति तदा किमिति वेदान्ता न शास्त्राणीति भावः ।

(४) सवासनामिति हिनस्त्यन्तो सदिधातोरर्थ इत्याह सवासनामिति । उपः सामीप्यमर्थः, निर्निश्चयार्थस्तथा चाद्वयं ब्रह्म समीपमानीय सवासनामविद्यामुच्छिनत्तीति उपनिपूर्वक्विबन्तसदिधात्वोर्निष्पन्नस्योपनिषच्छब्दस्यार्थ इत्यर्थः ।

निषद्वेद्यः प्रतीयमानो न नास्तीति शक्यो वक्तुमित्यर्थः । (१)स्यादेतत्, मानान्तरागोचरत्वेनागृहीतसंगतितयाऽपदार्थस्य ब्रह्मणो वाक्यार्थत्वानुपपत्तेः कथमुपनिषदर्थतेत्यत आह—"**स एष नेति नेत्यात्मेत्यात्मशब्दात्**"। यद्यपि गवादिवन्मानान्तगोचरत्वमात्मनो नास्ति, (२)तथापि प्रकाशात्मन एव सतस्तत्तदुपाधिपरिहाण्या शक्यं वाक्यार्थत्वेन निरूपणं, हाटकस्येव कटककुण्डलादिपरिहाण्या । नहि प्रकाशः स्वसम्वेदनो न भासते, नापि तदवच्छेदकः कार्यकारणसंघातः । तेन 'स एष नेति नेत्यात्मे'ति तत्तदवच्छेदपरिहाण्या बृहत्त्वादापनाच्च स्वयंप्रकाशः शक्यो वाक्याद्ब्रह्मेति चात्मेति च निरूपयितुमित्यर्थः । अथोपाधिनिरासवदुपहितमप्यात्मरूपं कस्मान्न निरस्यते इत्यत आह—"**आत्मनश्च प्रत्याख्यातुमशक्यत्वात्**" । प्रकाशो हि सर्वस्यात्मा तदधिष्ठानत्वाच्च प्रपञ्चविभ्रमस्य, न चाधिष्ठानाभावे विभ्रमो भवितुमर्हति । नहि जातु रज्ज्वभावे रज्ज्वां भुजङ्ग इति वा धारेति वा विभ्रमो दृष्टपूर्वः । (३)अपि चात्मनः प्रकाशस्य भासो प्रपञ्चस्य प्रथा । तथा च श्रुतिः—'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती'ति । न चात्मनः प्रकाशस्य प्रत्याख्याने प्रपञ्च प्रथा युक्ता । तस्मादात्मनः प्रत्याख्यानायोगाद्वेदान्तेभ्यः प्रमाणान्तरागोचरसर्वोपाधिरहितब्रह्मस्वरूपावगतिसिद्धिरित्यर्थः । उपनिषत्स्वेवावगत इत्यवधारणममृष्यमाण आक्षिपति—"**नन्वात्मे**"ति । सर्वजनीनाहंप्रत्ययविषयो ह्यात्मा कर्ता भोक्ता च संसारी, तत्रैव च लौकिकपरीक्षकाणामात्मपदप्रयोगात् "य एव लौकिकाः शब्दास्त एव वैदिकास्त एव च तेषामर्था" इत्यौपनिषदमप्यात्मपदं तत्रैव प्रवर्तितुमर्हति, नार्थान्तरे (४)तद्विपरीत इत्यर्थः । समाधत्ते—"**न**" (पृ० १८४ पं० १) अहम्प्रत्ययविषय औपनिषदः पुरुषः, कुतः ? "**तत्साक्षित्वेन**," अहम्प्रत्ययविषयो यः कर्ता कार्यकारणसंघातोपहितो जीवात्मा तत्साक्षित्वेन परमात्मनोऽहम्प्रत्ययविषयत्वस्य "**प्रत्युक्तत्वात्**"(५) । एतदुक्तं भवति यद्यप्यनेन जीवेनात्मने'ति जीवपरमात्मनोः पारमार्थिकमैक्यं, तथापि तस्योपहितं रूपं जीवः शुद्धं तु रूपं तस्य साक्षि, तच्च मानान्तरानधिगतमुपनिषद्गोचर इति । एतदेव प्रपञ्चयति—"**नह्यहं प्रत्ययविषये**"ति । "**विधिशेषत्वं वा नेतुं न शक्यः**" । कुतः ? "**आत्मत्वादेव**" । नह्यात्माऽन्यार्थोऽन्यत्तु सर्वमात्मार्थम् । तथा च श्रुतिः—'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवती'ति । अपि चातः सर्वेषामात्मत्वादेव न हेयो नाप्युपादेयः, सर्वस्य हि प्रपञ्चजातस्य ब्रह्मैव तत्त्वमात्मा । न च स्वभावो हेयो, अशक्यहानत्वात् । न चोपादेयो, उपात्तत्वात् । तस्माद्धेयोपादेयविषयौ विधिनिषेधौ न तद्विपरी-

---

(१) सिद्धार्थे कथितदिशा सङ्गतिग्रहेऽपि प्रकृते ब्रह्मणि तदसम्भवस्तस्याविषयत्वादतो न तत्रोपनिषदां प्रामाण्यमित्याशङ्कापरिहारपरं भाष्यमवतारयति स्यादेतदिति ।

(२) स्वयंप्रकाशत्वेन स्फुरत्यात्मनि समारोपितदृश्यनिषेधेन लक्षणया शास्त्रेणात्मनिरूपणम् शक्यमिति भावः ।

(३) न केवलमधिष्ठानत्वेन प्रपञ्चसत्तापदत्वादात्मनस्सत्यत्वमपितु तत्स्फुरणप्रदत्वादपीत्याह अपिचेति ।

(४) परमात्मनीत्यर्थः ।

(५) प्रत्युक्तत्वादिति । संस्कार्यत्वनिरासे 'साक्षी चेता' इति मन्त्रेणात्मनः सर्वसाक्षित्वमुक्तं, तेनाहंभावविषयस्य प्रत्युक्तत्वादविरुद्धमौपनिषदत्वमित्यर्थः । एतदेवाह एतदुक्तमित्यादिना ।

तमात्मतत्त्वं विषयीकुरुत इति सर्वस्य प्रपञ्चजातस्यात्मैव तत्त्वमिति । एतदुपपादयति—**"सर्वं हि विनश्यदवस्थं प्रकारजातं पुरुषान्तं विनश्यति"** । अयमर्थः-(१)पुरुषो हि श्रुतिस्मृतीतिहासपुराणतर्कविरुद्धन्यायव्यवस्थापितत्वात् परमार्थसन्, प्रपञ्चस्त्वनाद्यविद्योपदर्शितोऽपरमार्थसन्, यश्च परमार्थसन्नसौ प्रकृतौ रज्जुतत्त्वमिव सर्पविभ्रमस्य विकारस्य । अत एवास्यानिर्वाच्यत्वेनादृढस्वभावस्य विनाशः, (२)पुरुषस्तु परमार्थसन्, नाऽसौ कारणसहस्रैरप्यसन् शक्यः कर्तुम् । नहि सहस्रमपि शिल्पिनो घटं पटयितुमीशत इत्युक्तम् । तस्मादविनाशिपुरुषान्तो विकारविनाशः शुक्तिरज्जुतत्त्वान्त इव रजतभुजङ्गविनाशः । पुरुष एव हि सर्वस्य प्रपञ्चविकारजातस्य तत्त्वम् । न च पुरुषस्यास्ति विनाशो यतोऽनन्तो विनाशः स्यादित्यत आह—**"पुरुषो हि विनाशहेत्वभावादि"ति** । नहि कारणानि सहस्रमप्यन्यदन्यथयितुमीशत इत्युक्तम् । अथ मा भूत्स्वरूपेण पुरुषो हेय उपादेयो वा, तदीयस्तु कश्चिद्धर्मो ह्यस्यते कश्चिच्चोपादास्यत इत्यत आह—**"विक्रियाहेत्वभावाच्च कूटस्थनित्यः"** । त्रिविधेऽपि धर्मलक्षणावस्थापरिणामलक्षणो विकारो नास्तीत्युक्तम् । (३)अपि चात्मनः परमार्थसतो धर्मोऽपि परमार्थसन्निति न तस्यात्मवदन्यथात्वं कारणैः शक्यं कर्तुम्, न च धर्मान्यथात्वादन्यो विकारः, तदिदमुक्तम्—विक्रियाहेत्वभावादिति । सुगमन्यत् । यत्पुनरेकदेशिना शास्त्रविद्वचनं साक्षित्वेनानुक्रान्तं तदन्यथोपपादयति—**"यद्यपि शास्त्रतात्पर्यविदामनुक्रमणमि"ति** (पृ० १७१ पं० ४) । 'दृष्टो हि तस्यार्थः प्रयोजनवदर्थावबोधनमि'ति वक्तव्ये धर्मजिज्ञासायाः प्रकृतत्वाद्धर्मस्य च कर्मत्वात् 'कर्मावबोधनमि'त्युक्तम्, न तु सिद्धरूपब्रह्मावबोधनं व्यापारं वेदस्य वारयति । न हि सोमशर्मणि प्रकृते तद्गुणाभिधानं परिसंचष्टे विष्णुशर्मणो गुणवत्ताम् । विधिशास्त्रं विधीयमानकर्मविषयं प्रतिषेधशास्त्रं च (४)प्रतिषिध्यमानकर्मविषयमित्युभयमपि कर्मावबोधनपरम् । (५)अपि च 'आम्नायस्य क्रियार्थत्वादि'ति शास्त्रकृद्वचनम् तत्रार्थग्रहणं यद्यभिधेयवाचि ततो भूतार्थानां द्रव्यगुणकर्मणामानर्थक्यमनभिधेयत्वं प्रसज्येत, नहि ते क्रियार्था इत्यत आह—**"अपि चाम्नायस्ये"ति** । (६)यद्युच्येत नहि क्रियार्थत्वं क्रियाभिधेयत्वमपि तु क्रियाप्रयोजनत्वम् द्रव्यगुणशब्दानां च क्रियार्थत्वेनैव भूतद्रव्यगुणाभिधानं न स्वनिष्ठतया, यथाहुः शास्त्रविदः—'चोदना हि भूतं भवन्तमि'त्यादि । एतदुक्तं भवति (७)कार्यमर्थमवगमयन्ती चोदना

---

(१) ननु घटादिविनाशस्य मृदादौ दर्शनात्कथं पुरुषावधिः सर्वस्य लयोऽत आह पुरुषो ह्रीति । कल्पितस्याधिष्ठानत्वायोगादात्मतत्त्वमेव तत्तदवच्छिन्नमनिर्वाच्यविभ्रमोदयाप्ययकारणमित्यर्थः ।

(२) ननु पुरुषोऽप्यनिर्वाच्योऽस्तु तत्राह पुरुषस्त्विति ।

(३) धर्मान्यथात्वविक्रियाया अभावमुक्त्वा तद्धेत्वभावमप्याह—अपि चेति ।

(४) ननु प्रतिषेधानामनुष्ठेयाबोधकत्वात्कथं कर्मावबोधप्रयोजनतोक्त आह प्रतिषिध्यमानेति । जैमिनिवचनवदाम्नायस्येति (जै० १ अ० २ पा० १) सूत्रे आम्नायशब्दो विधिनिषेधपरः सिध्यतीत्यर्थः ।

(५) 'आम्नायस्य क्रियार्थत्वात्' इति सूत्रोक्तार्थपदद्वयमभिधेयपरं प्रयोजनपरं वेति विकल्प्याद्यं निरस्यन्नाहापि चेति । (६) द्वितीयं दूषयन्नाह यद्युच्यतेति ।

(७) ननु चोदना हि भूतं भवन्तं भविष्यन्तमर्थमवगमयितुं समर्थेति शाबरवाक्ये विधिवाक्यं भूतादिबोधकं भवतु ननु द्रव्यादिशब्दानां क्रियाप्रयोजनतेत्यत्राह कार्यमिति ।

तदर्थं भूतादिकमप्यर्थं गमयतीति, तत्राह—**"प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतं वेदि"ति** (पृ० १७७ पं० १)। अयमभिसन्धिः—न तावत्कार्यार्थ एव स्वार्थे पदानां सङ्गतिग्रहो नान्यार्थ इत्युपपादितं भूतेऽप्यर्थे व्युत्पत्तिं दर्शयद्भिः। (१)नापि स्वार्थमात्रपरतैव पदानां, तथा सति न वाक्यार्थप्रत्ययः स्यात्। नहि प्रत्येकं स्वप्रधानतया गुणप्रधानभावरहितानामेकवाक्यता दृष्टा। (२)तस्मात्पदानां स्वार्थमभिदधतामेकप्रयोजनवत्पदार्थपरतयैकवाक्यता। तथा च तत्तदर्थान्तरविशिष्टैकवाक्यार्थप्रत्यय उपपन्नो भवति। (३)यथाहुः शास्त्रविदः—

साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।
वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले॥
वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेन काष्ठानां पदार्थप्रतिपादनम्॥ इति।

तथा चार्थान्तरसंसर्गपरतामात्रेण वाक्यार्थप्रत्ययोपपत्तौ न कार्यसंसर्गपरत्वनियमः पदानाम्। (४)एवं च सति कूटस्थनित्यब्रह्मरूपपरत्वेऽप्यदोष इति। **भव्यं**—कार्यम्। ननु यद्भव्यार्थं भूतमुपदिश्यते न तद्भूतं भव्यसंसर्गिणा रूपेण तस्यापि भव्यत्वादित्यत आह—**"नहि भूतमुपदिश्यमानमि"ति**। (५)न तादात्म्यलक्षणः संसर्गः, किन्तु कार्येण सह प्रयोज्यप्रयोजनिलक्षणोऽन्वयः, तद्विषयेण तु भावार्थेन भूतार्थानां क्रियाकारकलक्षण इति न भूतार्थानां क्रियार्थत्वमित्यर्थः। शङ्कते—**अक्रियात्वेऽपीति**। एवं चाक्रियार्थकूटस्थनित्यब्रह्मोपदेशानुपपत्तिरिति भावः। परिहरति—**"नैष दोषः, क्रियार्थत्वेऽपी"ति**। न हि क्रियार्थं भूतमुपदिश्यमानमभूतं भवति, अपि तु क्रियानिवर्तनयोग्यं भूतमेव तत्। तथा च भूतेऽर्थेऽवभूतशक्तयः शब्दाः क्वचित्स्वनिष्ठभूतविषया(६) दृश्यमाना भूत्वा शीर्त्वा वा न कथंचित् क्रियानिष्ठतां गमयितुमुचिताः। (७)नह्युपहितं शतशो दृष्टमप्यनुपहितं क-

---

(१) प्रथमं वृद्धव्यवहारादिना कार्यान्विते घटादिपदशक्तिग्रहेपि पश्चात्तस्य परित्यागं कृत्वाऽन्विते एव पदानां शक्तिरिति यदि तदा लाघवादन्वितपरत्वमपि विहाय स्वार्थमात्रपरत्वं स्वीक्रियतामित्याशंक्याह नापीति।

(२) अन्विताभिधानमतेनोपसंहरन्नाह तस्मादिति। इदमत्रतात्पर्यम् एकप्रयोजनसिध्युपयोगित्वं पदार्थानामितरेतरविशिष्टत्वं विना न सम्भवतीति तत्सिद्धये एकवाक्यत्वाय च लक्षणयाऽन्वितपरत्वं कल्प्यते, तादृग्प्रयोजनाभावे तु स्वार्थमात्राभिधेयत्वं पदानामिति।

(३) अन्विताभिधानस्य युक्तियुक्तत्वे भट्टसम्मतिमाह यथाहुरिति।

(४) यदा लक्षणया योग्येतरान्वितपरत्वं पदानां, पदार्थानां च लक्षणायां द्वारत्वेन तत्परत्वं, तदा वेदान्तानां कार्यानन्वितब्रह्मपरत्वोपपत्तिरित्याह एवं चेति।

(५) भव्यसंसर्गिणा रूपेण भूतमपि भव्यमित्यत्र किं भव्यं कार्यमुत क्रिया, उभाभ्यामपि भूतार्थस्य नैक्यमित्याह न तादात्म्येति। (६) कार्यानन्वितभूतविषया इत्यर्थः।

(७) ननु कार्यान्विते गृहीतसंगतेः पदस्य कथं शुद्धसिद्धाभिधेयता, नहि गोत्वे गृहीतशक्ति गोपदमश्वत्वे वक्ति इत्याशंक्याह नहीति। कार्यान्वयो हि न शब्दार्थः किन्तूपाधिः, तथाहि प्रवृत्तिनिवृत्त्योः कार्यातादभावावगमाधीनत्वात्, प्रयोजनस्य प्रवृत्तिनिवृत्तिसाध्यत्वात्, विवक्षाप्रयोगयोस्तदधीनत्वात्, वाक्यार्थप्रतिपत्तिव्युत्पत्त्योः प्रयोगाधीनत्वाच्च, विवक्षादिवत्कार्यान्वयस्यापि शब्दावगत्युपायताऽवगम्यतेऽतो विरहेऽप्यपि कार्यान्वयं प्रयोगभेदे भवति भूतं वस्तु पदवाच्यम्, कथमन्यथा भवता प्रमाणान्तरगृहीतकार्यो-

चिद्दृष्टमदृष्टं भवति । तथा च वर्तमानापदेशा अस्तिक्रियोपहिता अकार्यार्था अप्यतद्वीवर्णकादयो(१) लोके बहुलमुपलभ्यन्ते । एवं क्रियाऽनिष्ठा अपि सम्बन्धमात्रपर्यवसायिनो, यथा कस्यैष पुरुष इति प्रश्नोत्तरं राज्ञ इति । तथा प्रातिपदिकार्थमात्रनिष्ठाः, यथा कीदृशास्तरव इति प्रश्नोत्तरं फलिन इति । नहि पृच्छता पुरुषस्य वा तरूणां वाऽस्तित्वनास्तित्वे प्रतिपित्सिते, किन्तु पुरुषस्य स्वामिभेदस्तरूणां च प्रकारभेदः । प्रष्टुरपेक्षितं चावक्षाणः स्वामिभेदमेव च प्रकारभेदरूपमेव च प्रतिवक्ति, न पुनरस्तित्वं, तस्य तेनाप्रतिपित्सितत्वात् । (२)उपपादिता च भूतेऽप्यर्थे व्युत्पत्तिः प्रयोजनवति पदानाम् । चोदयति–"**यदि नामोपादेष्टं भूतं, किं तवोपदष्टुः श्रोतुर्वा प्रयोजनं स्यात्**" (पृ० ९७८ पं० १)। तस्माद् भूतमपि प्रयोजनवदेवोपदेष्टव्यं नाप्रयोजनम्, अप्रयोजनं च ब्रह्म, तस्योदासीनस्य सवाक्यैयारहेतत्वनानुरक्कारकत्वादिति भावः । परिहरति–"**अनवगतात्मोपदेशश्च तथैव प्रयोजनवानेव, भवितुमर्हति**" (पृ०१७९ पं० १) । अप्यर्थश्चकारः । एतदुक्तं भवति । यद्यपि ब्रह्मोदासीनं (३)तथापि तद्विषयं शाब्दज्ञानमवगतिपर्यन्तं विद्या स्वविरोधिनीं संसारमूलनिदानमविद्यामुच्छिन्दत् प्रयोजनवदित्यर्थः । (४)अपि च येऽपि कार्यपरत्वं सर्वेषां पदानामास्थिषत, तैरपि 'ब्राह्मणो न हन्तव्यो, न सुरा पातव्ये'त्यादीनां न कार्यपरता शक्याऽऽस्थातुम् । कृत्युपहितमर्यादं हि कार्यं कृत्या व्याप्तं तन्निवृत्तौ निवर्तते शिंशपात्वमिव वृक्षत्वनिवृत्तौ । कृतिर्हि पुरुषप्रयत्नः, स च विषयाधीननिरूपणः । (५)विषयश्चास्य साध्यस्वभावतया भावार्थ एव पूर्वापरीभूतोऽन्योत्पादानुकूलो भवितुमर्हति, न द्रव्यगुणौ । साक्षात्कृतिव्याप्यो हि कृतेर्विषयो, न च द्रव्यगुणयोः सिद्धयोरस्ति कृतिव्याप्यता । अत एव शास्त्रकृद्वचः–'भावार्थाः (६)कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत'इति । द्रव्यगुणशब्दानां नैमित्तिकावस्थायां कार्यावमर्शेऽपि भावस्य स्वतो द्रव्यगुणशब्दानां तु भावयोगात् कार्यावमर्श इति भावार्थेभ्य एवापूर्वावगतिर्न द्रव्यगुणशब्देभ्य इति । (७)न च 'दध्ना जुहोति' 'सन्ततमाघारयती'त्यादिषु द्रव्यादीनां

ञ्चितगृहीतसङ्कृतिकपदवृन्दस्य वेदाऽपूर्वान्वितामिधायित्वमिति । एतदेवाह उपहितमिति । अदृष्टं न भवति किन्तु दृष्टमेव भवतीति योजना ।

(१) अस्ति किल ब्रह्मगिरिनामा गिरिवरो यत्र गोदावरी त्र्यम्बकजटाजूटकलनय निर्मिता श्वेतपटीव भातीत्यादिवनवर्णनादय इत्यर्थः ।

(२) कार्यान्वयनियमाङ्गीकारपूर्वकं परिहृत्येदानीन्तन्निरस्यन्नाहोपपादिता चेति ।

(३) अप्यर्थचकारसूचितशङ्कां दर्शयित्वा परिहरति तथापीति ।

(४) निषेधवाक्यवदपि वेदान्तानां सिद्धार्थपरत्वमित्याह अपि चेति ।

(५) विषय इति । उक्तस्य प्रयत्नस्य न घटवत्प्रतिक्षणं समप्तः किन्तु पचतीतिवत् पूर्वापरीभूतोऽन्यस्यौदनादेरुत्पादानुकूलो साध्यस्वभावतया भावार्थो व्यापार एव साक्षाद्विषय इति भावः ।

(६) भावार्था इति गुरुमतेनाऽत्र विषये प्रमाणं प्रदर्शितम् । भावार्थाः–धात्वर्थोपरक्तभावना येषु भाति तादृशा ये कर्मशब्दाः क्रियावाचका यजत्यादयस्तेभ्यः क्रियाऽपूर्वं प्रतीयते न द्रव्यगुणशब्देनेति तदर्थः । इममेवार्थमाह द्रव्येति । यद्यपि द्रव्यादिशब्दाः क्रियायोगद्वारा साध्यतया द्रव्यादिविधकास्तथापि भावशब्दः स्वत एव साध्यरूपक्रियाबोधक इति भावार्थेभ्य एवापूर्वावगतिर्न द्रव्यादिशब्देभ्य इति भावः ।

(७) नन्वु 'दध्ना जुहोती'त्यत्र द्रव्यगुणौ विधीयते दधिसान्तत्ये, तच्च तयोरेव कार्यावच्छेदकतेत्याशङ्क्याह नचेति । आधारः धारणम् । सान्तत्यमविच्छिन्नत्वम् ।

कार्यविषयता । तत्रापि हि होमाधारभावार्थविषयमेव कार्यम् । (१)न चैतावता 'सोमेन यजेते'तिवद्, दधिसन्ततादिविशिष्टहोमाधारावेधानाद्'अग्निहोत्रं जुहोति' 'आधारमभिधारयती'ति तदनुवादः । यद्यप्यत्रापि भावार्थविषयमेव कार्यम्, तथापि भावार्थानुबन्धतया द्रव्यगुणावविषयावपि विधीयेते । (२)भावार्थो हि कारकव्यापारमात्रतयाऽवशिष्टः कारकविशेषेण द्रव्यादिना विशेष्यत इति द्रव्यादिस्तदनुबन्धः । तथा च भावार्थे विधीयमाने स एव सानुबन्धो विधीयत इति द्रव्यगुणावविषयावपि तदनुबन्धतया विहितौ भवतः । (३)एवं च भावार्थप्रणालिकया द्रव्यादिसङ्क्रान्तो विधिर्गौरवाद् बिभ्यत् स्वविषयस्य चान्यतः प्राप्ततया तदनुवादेन तदनुबन्धीभूतद्रव्यादिपरो भवतीति सर्वत्र भावार्थविषय एव विधिः । (४)एतेन 'यदाग्नेयोऽष्टाकपालो भवती'त्यत्र सम्बन्धविषयो विधिरिति परास्तम् । (५)ननु न भवत्यर्थो विधेयः, सिद्धे भवितरि लब्धरूपस्य भवनं प्रत्यकर्तृत्वात् । न खलु गगनं भवति । नाप्यसिद्धे, असिद्धस्यानियोज्यत्वात् गगनकुसुमवत् । तस्माद् भवनेन प्रयोज्यव्यापारेणाक्षिप्तः प्रयोजकस्य भावयितुर्व्यापारो विधेयः । स च व्यापारो भावना कृतिः प्रयत्न इति । निर्विषयश्चासावशक्यप्रतिपत्तिरतो विषयापेक्षायामाग्नेयशब्दोपस्थापितो द्रव्यदेवतासम्बन्ध एवास्य विषयः । (६)ननु व्यापारविषयः पुरुषप्रयत्नः कथमव्यापाररूपं सम्बन्धं गोचरयेत् ? नहि घटं कुर्वित्यत्रापि साक्षान्नामार्थं घटं पुरुषप्रयत्नो गोचरयत्यपि तु

(१) ज्योतिष्टोमे श्रूयते—सोमेन यजेत, ऐन्द्रवायवं गृह्णती'त्यादि । तत्र संशयः किमैन्द्रवायवादिवाक्ये विहितानां सोमरसानां यागानां च यथाक्रमं सोमयागादिशब्दावनुवदितारावुत द्रव्ययुक्तस्य कर्मणो विधायकाविति । तत्रैन्द्रवायवादिवाक्येषु द्रव्यदेवताख्ययागरूपप्रतीतेर्यागानुमानादितरत्र रूपाप्रतीतेः समुदायानुवाद इति पूर्वपक्षे, द्वितीये सिद्धान्तितं—नानुवादत्वमप्रत्यभिज्ञानात्, नन्वैन्द्रवाक्ये यागरूपमवगम्यते तस्मात्सोमवाक्ये यागविधिरितरत्र रसानामिन्द्रादिदेवताभ्यो ग्रहणाप्युपकल्पनानि विधीयन्ते । एवं यथा सोमेनेति वाक्ये विशिष्टविधिरेवं दधिसान्तत्यादिवाक्यानि यदि द्रव्यगुणविशिष्टहोमाधारविधायीनि तर्हि अग्निहोत्राधारवाक्ये तद्विहितहोमानाधाराणां च समुदायावनुवदेत्, तथाच सति अधिकरणान्तरविरोध इति न चैतावतेति ग्रन्थशङ्कार्थः । एवं शङ्कयाऽनुवादत्वे प्राप्ते समाधानम्—विधी इमौ स्यातामाधारयतिजुहोतिशब्दाभ्यामनुष्ठयार्थप्रतीतेस्तत्संनिधौ श्रुतस्य सान्तत्यस्य दध्यादिवाक्यस्य विशिष्टविधित्वे गौरवप्रसंगेन तद्विहितभावार्थानुवादेन गुणविधानार्थत्वात्, नैतावता दध्यादिपदवाक्ये भावार्थविषयं कार्यं विरुध्यते इत्युपगमः । तत्र हेतुमाह यद्यपीति । द्रव्यगुणयोः कार्यं प्रति साक्षादविषयत्वेऽपि भावार्थं प्रत्यनुबन्धतया तौ विधीयेते इत्यर्थः । (२) तत्रापि हेतुमाह भावार्थो हीति ।

(३) तर्हि सन्ततादिवाक्यानि विशिष्टविधयः स्युः, स्याच्चाग्निहोत्रादिवाक्यमनुवाद इत्यत्राहैवं चेति । यद्यप्यत्र विशिष्टविधिरवगम्यते, तथापि भावार्थद्वारा द्रव्यादिकमपि विषयीकरोति, तत्र संक्रान्तो यदि भावार्थमन्यतो विहितं न लभेत तर्हि गौरवमप्यङ्गीकृत्य विशिष्टं विदधीत, अथ लभेत तत उपपदाकृष्टशक्तिर्द्रव्यादिपरो भवत्यनुवदति च भावार्थम् । तदिहाग्निहोत्रादिवाक्यत एव भावार्थलाभात् द्रव्यादिपरत्वमुन्नेयमिति तात्पर्यम् ।

(४) सिद्धस्य न विधेयत्वमित्युक्तमतिदिशति एतेनेति ।

(५) सम्बन्धस्य भावनावच्छेदकत्वेन विधेयत्वं शङ्कते नन्वित्यादिना । भवत्यर्थस्य कर्तुः सिद्धस्यासिद्धस्य वा विधेयत्वे विधिवैयर्थ्यात्प्रवर्तनव्यापारो यत्न एव विधेयैः, स च निर्विषयो न सम्भवतीति सम्बन्ध एवास्य विषय इति मीमांसकैकदेशिशङ्कार्थः ।

(६) सिद्धान्तं दूषयति नन्विति । भवतु लक्षितभावनाया एव विधानं, सम्बन्धस्य साक्षात्कृत्यविषयत्वान्न स तस्या विषय इति समाधानार्थः ।

दण्डादि हस्तादिना व्यापारयति । तस्माद् घटार्था कृतिं व्यापारविषयामेव प्रतिपद्यते, न तु रूपतो घटविषयाम्, उद्देश्यतया त्वस्यामस्ति घटो न तु विषयतया, विषयतया तु हस्तादि-व्यापार एव । (१)अत एवाग्नेय इत्यत्रापि द्रव्यदेवतासम्बन्धाक्षिप्तो यजिरेव कार्यविषयो विधेयः । किमुक्तं भवति ? आग्नेयो भवतीति, आग्नेयेन यागेन भावयेदिति । अत एव 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजते' इत्यनुवादो भवति 'यदाग्नेय' इत्यादिविहितस्य यागषट्कस्य । (२)अत एव च विहितानूदितस्य तस्यैव 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'त्यधिकारसम्बन्धः । तस्मात् सर्वत्र कृतिप्रणालिकया भावार्थविषय(३) एव विधिरित्येकान्तः । (४)तथा च 'न हन्यान्न पिबेदि'त्यादिषु यदि कार्यमभ्युपेयेत ततस्तद्व्यापिका कृतिरभ्युपेतव्या । तद्व्यापकश्च भावार्थो विषयः । एवं च प्रजापतिव्रतन्यायेन पर्युदासवृत्त्याऽहननापानसङ्कल्पलक्षणया तद्विषयो विधिः स्यात् । तथा च प्रसज्यप्रतिषेधो दत्तजलाञ्जलिः प्रसज्येत(५) । न च सति सम्भवे लक्षणा न्याय्या । (६)'नेक्षेतोद्यन्तमि'त्यादौ तु 'तस्य व्रतमि'त्यधिकारात् प्रसज्यप्रतिषेधासम्भवेन पर्युदासवृत्त्याऽनीक्षणसङ्कल्पलक्षणा युक्ता । (७)तस्माद् 'न हन्याद् न पिबेदि'त्यादिषु प्रसज्यप्रतिषेधेषु भावार्थाभावाद् तद्व्याप्तायाः कृतेरभावस्तदभावे च तद्व्याप्तस्य कार्यस्याभाव इति न कार्यपरत्वनियमः सर्वत्र वाक्ये इत्याह—"ब्राह्मणो न हन्तव्य इत्येवमाद्ये"ति (पृ. ९८० पं १) । ननु कस्मान्निवृत्तिरेव कार्यं न भवति, तत्साधनं वेत्यत आह—"न च सा क्रिये"ति । (८)क्रियाशब्दः कार्यवचनः । एतदेव विभजते—"अक्रियार्थानामि"ति । (९)स्यादेतत्, विधिविभक्तिश्रवणात् कार्यं तावदत्र प्रतीयते, तच्च न भावार्थमन्तरेण, न च रागतः प्रवृत्तस्य हननपानादावकस्मा-

---

(१) यदि सम्बन्धो न विधेयस्तर्हि आग्नेयवाक्ये किं विधेयमतआहातएवेति । यतः 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इत्यादिवाक्येन यागो विधीयते तस्मात् 'य एवं विद्वान् पौर्णमासीं यजेत' इत्यनुवादे यजते इति श्रुतं न सम्बन्धस्तस्मात् न कुत्रापि सम्बन्धविधिरिति भावः ।

(२) उत्पत्त्यधिकारयोरविसंवादार्थमप्याग्नेयादिवाक्ये यागविधिरवश्यमभ्युपेय इत्याहातएवेति । अत्राप्यधिकारविधौ यजेत इति दर्शनाद्यागविधिरित्यर्थः ।

(३) भावार्थविषयः —धात्वर्थविषयः ।

(४) एवं नियोगकृतिभावार्थानां व्याप्यव्यापकतामुक्त्वा व्यापकनिदृश्या व्याप्यनिवृत्तिं निषेधेष्याह तथा चेति ।

(५) प्रसज्येतेति । अयं भावः नामधात्वर्थयोगे नञः पर्युदासता, न हन्यादित्यादौ चाख्यातयोगात् प्रतिषेधः प्रधानो भाति तत्राधीक्षणवल्लक्ष्यः पर्युदासः स्यादित्येकं दूषणं परं च विधिनिषेधविभागलोप इति ।

(६) निषेधेषु पर्युदासाभावप्रदर्शनाय प्रजापतिव्रतन्यायं स्फुटीकरोति नेक्षेतेति । तत्र च 'तस्य ब्रह्मचारिणो व्रतम्' इति व्रतशब्दोपक्रमात् एकत्र वाक्ये उपसंहारस्य प्रक्रमाधीनत्वात् आख्यातसम्बन्धेनापि नञा प्रतीतो निषेधोऽननुष्ठेयत्वादुपेक्ष्यतेऽतोऽवीक्षणसंकल्पलक्षणा संगता, न चैवं निषेधेषु सम्भवतीति भावः ।

(७) उपसंहरन् भाष्यमवतारयति तस्मादिति ।

(८) भाष्येऽक्रियार्थानामानर्थक्याभिधानादत्र क्रियाशब्दः कार्यवचन इत्यर्थः ।

(९) निषेधस्थले धात्वर्थाभावान्न कार्यमित्युक्तं तत्र हेत्वसिद्धिं शङ्कते स्यादेतदिति । तथा च न हन्यादित्यादौ लक्षणया हननविरोधी यत्न एव विधेयः, रागतःप्राप्तहननौदासीन्यरूपप्रयोजनसत्त्वाल्लक्षणा न दोषायेति क्रियापरमेव सर्वं वाक्यमिति शङ्काग्रन्थार्थः ।

दौदासीन्यमुपपद्यते विना विधारकप्रयत्नम्, तस्मात् स एव प्रवृत्त्युन्मुखानां मनोवाग्देहानां विधारकः प्रयत्नो निषेधविधिगोचरः क्रियेति नाक्रियापरमस्ति वाक्यं किंचिदपीत्याह—"**न च हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुम्**" (पृ० १८१ पं०)। केन हेतुना न शक्यमित्यत आह—"**स्वभावप्राप्त-हन्त्यर्थानुरोधेन**" नञः। (१)अयमर्थः। हननपानपरो हि विधिप्रत्ययः प्रतीयमानस्ते एव विधत्त इत्युत्सर्गः। नचैते शक्ये विधातुम्, रागतः प्राप्तत्वात्। न च नञः प्रसज्यप्रतिषेधो विधेयः, तस्याप्यौदासीन्यरूपस्य सिद्धतया प्राप्तत्वात्। न च विधारकः प्रयत्नः, तस्याश्रुतत्वेन लक्ष्यमाणत्वात्, सति सम्भवे च लक्षणाया अन्याय्यत्वात्, विधिविभक्तेश्च रागतः प्राप्तप्रवृत्त्यनुवादकत्वेन विधिविषयत्वायोगात्। तस्माद् यत् पिबेद् हन्याद्वेत्यनूद्य तन्नेति निषिध्यते, तदभावो ज्ञाप्यते, न तु नञर्थो विधीयते। (२)अभावश्च स्वविरोधिभावनिरूपणतया भावच्छायानुपातीति सिद्धे सिद्धवत् साध्ये च साध्यवत् भासत इति साध्यविषयो नञर्थः साध्यवद् भासत इति नञर्थः कार्य इति भ्रमस्तदिदमाह—"**नञश्चैष स्वभाव**" **इति** (पृ० १८२ पं० १)। ननु बोधयतु सम्बन्धिनोऽभावं नञ्, प्रवृत्त्युन्मुखानां तु मनोवाग्देहानां कुतोऽकस्मान्निवृत्तिरित्यत आह—"**अभावबुद्धिश्चौदासीन्य(३)पालन-कारणम्**" (पृ० १८३ पं०)। (४)अयमभिप्रायः—'ज्वरितः पथ्यमश्नीयाद्' 'न सर्पायाङ्गुलिं दद्यादि'त्यादिवचनश्रवणसमनन्तरं प्रयोज्यवृद्धस्य पथ्याशने प्रवृत्तिं भुजङ्गाङ्गुलिदानोन्मुखस्य च ततो निवृत्तिमुपलभ्य बालो व्युत्पित्सुः प्रयोज्यवृद्धस्य प्रवृत्तिनिवृत्तिहेतू इच्छाद्वेषावनुमिमीते। तथाहीच्छाद्वेषहेतुके वृद्धस्य प्रवृत्तिनिवृत्ती स्वतन्त्रप्रवृत्तिनिवृत्तित्वात् मदीयस्वतन्त्रप्रवृत्तिनिवृत्तिवत्। (५)कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधनभावावगमपूर्वकौ चास्येच्छाद्वेषौ प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्वेषत्वात् मत्प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्वेषवत्। (६)न जातु मम शब्दतद्व्यापारपुरुषाशयब्रह्मकाल्यानवच्छिन्नभावनापूर्वप्रत्ययपूर्वाविच्छाद्वेषावभूताम्, अपि तु भूयोभूयः स्वगतमालोचयत उक्तकारणपूर्वावेव प्रत्यवभासेते। तस्माद्वृद्धस्य स्वतन्त्रप्रवृत्तिनिवृत्ती इच्छाद्वेषभेदौ च कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधनभावावगमपूर्वावित्यानुपूर्व्या सिद्धः

---

(१) उक्ताशङ्कासमाधानभाष्यार्थमाह अयमर्थ इत्यादिना। रागतःप्राप्तत्वाद्धननं, औदासीन्यरूपस्य नञर्थस्य स्वतःसिद्धत्वान्नञर्थोऽश्रुतत्वेन लक्ष्यमाणत्वान्नयत्नश्च न विधेय इत्यर्थः।

(२) ननु नञर्थावश्यभाव हननं नास्ति इत्यादाविव सिद्धतया प्रतीयेतेत्याशंक्याह अभावश्चेति। रागप्राप्तहननस्वभावप्रतियोगिनिष्ठं साध्यत्वमारोप्यत इत्यर्थः।

(३) औदासीन्यस्य भावभावतया कारणानपेक्षत्वादध्याहरति पालनेति।

(४) विधिनिषेधयोरिष्टानिष्टोपायत्वबोधकत्वं व्युत्पत्तिबलेन दर्शयति अयमभिप्राय इत्यादिना प्रवर्तकेषु वाक्येषु इत्यतः प्राक्तनग्रन्थेन।

(५) चन्द्रोदयगतहितसाधनतायां न प्रवृत्तिहेतुता, तथा प्राक्कृतभुजङ्गाङ्गुलिदाने च नाधुना निवृत्तिहेतुत्वमतः साध्यं विशिनष्टि कर्तव्यतैकार्थेति। कर्तव्यतया सहैकार्थसम्बन्धार्थं या समवेताविष्टानिष्टसाधनभावौ तज्ज्ञानपूर्वकाविति तदर्थः। फलेच्छाद्वेषयोरनैकान्तिकत्ववारणाय प्रवृत्तिनिवृत्तिहेतुभूतेति हेतुविशेषणम्।

(६) दृष्टान्ते साध्यवैकल्यमाशंक्याह न जातिवति। शब्दादीनामपूर्वपर्यन्तानां ये प्रत्ययास्तत्पूर्वौ बालस्य मे नाधुनामिच्छाद्वेषौ प्रत्यक्षव्यवहारे सर्वेषामभावादित्यर्थः।

कार्यकारणभाव इतीष्टानिष्टसाधनतावगमात्प्रयोज्यवृद्धप्रवृत्तिनिवृत्ती इति सिद्धम् । स चावगमः प्रागभूतः शब्दश्रवणानन्तरमुपजायमानः शब्दश्रवणहेतुक इति प्रवर्तकेषु वाक्येषु 'यजेत'त्यादिषु शब्द एव कर्तव्यमिष्टसाधनं व्यापारमवगमयंस्तस्येष्टसाधनतां कर्तव्यतां चावगमयति, अनन्यलभ्यत्वादुभयोः, अनन्यलभ्यस्य च शब्दार्थत्वात् । यत्र तु कर्तव्यताऽन्यत एव लभ्यते, यथा 'न हन्याच्च पिबेदि'त्यादिषु हननपानप्रवृत्तयो रागतः प्रतिलम्भात्तत्र तदनुवादेन नञ्समभिव्याहृता लिङादिविभक्तिरन्यतोऽप्राप्तमनयोरनर्थहेतुभावमात्रमवगमयति । प्रत्यक्षं हि तयोरिष्टसाधनभावोऽवगम्यतेऽन्यथा रागविषयत्वायोगात् । तस्माद्रागादिकर्तव्यतानुवादेनानर्थसाधनताप्रज्ञापनपरं 'न हन्यान्न पिबेदि'त्यादिवाक्यं, न तु कर्तव्यतापरमिति सुष्ठूक्तमकार्यानिष्टत्वं निषेधानाम् । (१)निषेध्यानां चानर्थसाधनताबुद्धिरेव निषेध्याभावबुद्धिस्तया खल्वयं चेतन आपाततो रमणीयतां पश्यन्नप्यायतिमालोच्य प्रवृत्त्यभावं निवृत्तिमवबुध्य निवर्तते, औदासीन्यमात्मनोऽवस्थापयतीति यावत् । (२)स्यादेतत्, अभावबुद्धिश्चेदौदासीन्यस्थापनकारणं यावदौदासीन्यमनुवर्तेत, न चानुवर्तते, नह्युदासीनोऽपि विषयान्तरव्यासक्तचित्तस्तदभावबुद्धिमान्, न चावस्थापककारणाभावे कार्यावस्थानं दृष्टम्, नहि स्तम्भाभावपाते प्रासादोऽवतिष्ठतेऽत आह— **"सा च दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति"** । (३)तावदेव खल्वयं प्रवृत्त्युन्मुखो न यावदस्यानर्थहेतुभावमाधिगच्छति । अनर्थहेतुत्वाधिगमोऽस्य समूलोद्धारं प्रवृत्तिमुद्धृत्य दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति । (४)एतदुक्तं भवति यथा प्रासादावस्थानकारणं स्तम्भो नैवमौदासीन्यावस्थानकारणमभावबुद्धिः, अपि त्वागन्तुकाद्विनाशहेतोस्त्राणेनावस्थानकारणम् । यथा कमठपृष्ठनिष्ठुरः कवचः शस्त्रप्रहारत्राणेन राजन्यजीवावस्थानहेतुः । न च कवचापगमे चासति च शस्त्रप्रहारे राजन्यजीवनाश इति । उपसंहरति—**"तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेवे"ति** (पृ० १८४ पं० १) । औदासीन्यमजानतोऽप्यस्तीति प्रसक्तक्रियानिवृत्त्योपलक्ष्य विशिनष्टि । तात्त्विकमक्रियार्थत्वेनानर्थक्यमाशङ्क्य क्रियार्थत्वोपवर्णनं जैमिनीयमसमञ्जसमेवेत्युपसंहारव्याजेन परिहरति—**"तस्मात्पुरुषार्थे"ति** । पुरुषार्थानुपयोग्युपाख्यानादिषयाक्रियार्थतया क्रियार्थतया च पूर्वोत्तरपक्षौ, न तूपनिषद्विषयौ, उपनिषदां स्वयंपुरुषार्थब्रह्मैकत्वावगमपर्यवसानादित्यर्थः । (५)यदप्यौपनिषदात्मज्ञा-

---

(१) ननु हननादिषु प्रत्यक्षदृष्टेष्टसाधनत्वकर्तव्यत्वयोर्निषेद्धुमशक्यत्वात् कथं 'अभावबुद्धेश्चे'त्यादिभाष्यं सङ्गच्छते इत्यत आह निषेध्यानां चेति । दृश्यमानमपीष्टं बहुदृष्टानिष्टोदयावहत्वादनिष्टमित्यर्थहेतुत्वज्ञापनपरत्वाद्वाक्यस्येति नामङ्गतिरित्यर्थः ।

(२) उक्ताभावबुद्धेरौदासीन्यस्थापकत्वेऽपि क्षणिकत्वात्तद्ध्वंसे पुनर्हननोद्यममवृत्तिः स्यादध्वंसे च तदनुवृत्तेर्विषयान्तरज्ञानानुदय इति अभिप्रायेण शङ्कते स्यादेतदिति ।

(३) सा चेत्यादि समाधानभाष्यार्थमाह तावदेवेति । यथाग्निः पुनर्ज्वालाजननसिद्धमिन्धनं दहन्नुपशान्तो भवति भाविनीनां ज्वालानामुदयविरोधी, तथाऽभावबुद्धिः क्षणिकतया स्वयं शाम्यन्त्यपि हननाद्यहितोपायताऽनवबोधं दग्ध्वा तावदानां उपरितनाः प्रवृत्तीः रुणद्धीति समाधानार्थः ।

(४) न ह्यभावबुद्धेरनादेर औदासीन्यस्य स्थापिका येन तदभावे कारणाभावादिदं न भवेदपि तु अपवादनिरासिकेत्याह एतदुक्तं भवति इत्यादिना ।

(५) स्वयं पुरुषार्थब्रह्मावगमपरत्वमुपनिषदामसिद्धमित्याशङ्क्य भाष्यभ्याख्यया परिहरति यदपीत्यादिना ।

नमपुरुषार्थं मन्यमानेनोक्तं 'कर्तव्यविध्यनुप्रवेशमन्तरेणे'ति, अत्र निगूढाभिसन्धिः पूर्वोक्तं परिहारं स्मारयति—"तत् परिहृत"मिति (पृ० १८७ पं ३)। अत्राक्षेप्ता स्वोक्तमर्थं स्मारयति—"ननु श्रुतब्रह्मणोऽपी"ति । निगूढमभिसन्धिं समाधातोद्घाटयति—"अत्रोच्यते, नावगतब्रह्मात्मभावस्ये"ति । (१)सत्यं, न ब्रह्मज्ञानमात्रं सांसारिकधर्मनिवृत्तिकारणमपि तु साक्षात्कारपर्यन्तम् । ब्रह्मसाक्षात्कारश्चान्तःकरणवृत्तिभेदः श्रवणमननादिजनितसंस्कारसचिवमनोजन्मा षड्जादिभेदसाक्षात्कार इव गान्धर्वशास्त्रश्रवणाभ्याससंस्कृतमनोयोनिः । स च निखिलप्रपञ्चमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन्नात्मानमपि प्रपञ्चत्वाविशेषादुन्मूलयतीत्युपपादितमधस्तात् । तस्माद्ऋज्वस्वरूपकथनतुल्यतैवात्रेति सिद्धम् । (२) अत्र च वेदप्रमाणमूलतया वेदप्रमाणजनितेत्युक्तम् । अत्रैव सुखदुःखानुत्पादभेदेन निदर्शनद्वयमाह—"नहि धनिन" इति । श्रुतिमत्रोदाहरति—"तदुक्त"मिति (पृ० १८८ पं० १)। चोदयति—"शरीरे पतित" इति। परिहरति—"न सशरीरत्वस्ये"ति । (३)यदि वास्तवं सशरीरत्वं भवेन्न जीवतस्तन्निवर्तेत, मिथ्याज्ञाननिमित्तं तु तत् । तच्चोत्पन्नतत्त्वज्ञानेन जीवतापि शक्यं निवर्तयितुम् । (४)यत्पुनरशरीरत्वं तदस्य स्वभाव इति न शक्यं निवर्तयितुं, स्वभावहानेन भावविनाशप्रसङ्गादित्याह—"नित्यमशरीरत्व"मिति (पृ० १८८ पं० ५) । स्यादेतत्, न मिथ्याज्ञाननिमित्तं सशरीरत्वमपि तु धर्माधर्मनिमित्तं, तच्च स्वकारणधर्माधर्मनिवृत्तिमन्तरेण न निवर्तते, तन्निवृत्तौ च प्रायणमेवेति न जीवतोऽशरीरत्वमिति शङ्कते—"तत्कृते"ति । तदित्यात्मानं परामृशति । निराकरोति—"न, शरीरसम्बन्धस्ये"ति । न तावदात्मा साक्षाद्धर्माधर्मौ कर्तुमर्हति, वाग्बुद्धिशरीरारम्भजनितौ हि तौ नासति शरीरसम्बन्धे भवतः, ताभ्यां तु शरीरसम्बन्धे रोचयमानो व्यक्तं परस्पराश्रयं दोषमावहति, तदिदमाह—"शरीरसम्बन्धस्ये"ति । (५)यद्युच्येत सत्यमस्ति परस्पराश्रयो, न त्वेष दोषोऽनादित्वाद्बीजाङ्कुरवादित्यत आह—"अन्धपरम्परैषाऽनादित्वकल्पना" । (६)यस्तु मन्यते—नेयमन्धपरम्परातुल्याऽनादिता, नहि यतो धर्माधर्मभेदादात्मशरीरसम्बन्धभेदस्तत एव स धर्माधर्मभेदः, किन्त्वेष पूर्वस्मादात्मशरीरसम्बन्धात्पूर्वधर्माधर्मभेदजन्मनः, एष त्वात्मशरीरसम्बन्धोऽस्माद्धर्माधर्मभेदादिति' तं प्रत्याह—"क्रियासमवायाभावाद्"ति । शङ्कते—"सन्निधान-

---

(१) अवगतब्रह्मात्मभावस्येति भाष्येऽवगतिशब्दाभिप्रायमाह सत्यमिति ।

(२) श्रवणादिसंस्कृतमनोजन्यश्चेत्साक्षात्कारः कथं तर्हि वेदप्रमाणजनितेति भाष्यमत आह अत्रचेति ।

(३) देहपातोत्तरकालमशरीरत्वमिति शङ्कायां सशरीरत्वस्य निमित्तवर्णनमयुक्तमित्याशंक्याह यदीति ।

(४) यदि सशरीरत्वं मिथ्यात्वाज्जीवित एव ज्ञानेन निवर्त्यं तर्ह्यशरीरत्वमप्यभावत्वात्तथा भवेदित्याशंक्य, न तत्त्वतः शरीरसम्बन्धोऽभावोपलक्षितस्यातथात्वादित्याह यत्पुनरिति ।

(५) धर्माधर्मव्यक्त्योः शरीरसम्बन्धव्यक्तेश्चेतरेतरहेतुकत्वं यद्यपीतरेतराश्रयस्तथाप्यनादित्वान्न दोष इत्याभिप्रायेण सत्कार्यवादी शङ्कते यद्युच्येतेति ।

(६) व्यक्तिभेदेनेतरेतराश्रयदोषं परिहरन्नाह सत्कार्यवादी यस्त्विति । किन्त्वेषो-इदानीन्तनशरीरसम्बन्धहेतुः, पूर्वाभ्यां धर्माधर्मविशेषाभ्यां जन्म यस्य तस्मात्पूर्वस्मादात्मशरीरसम्बन्धात् । एष तु वर्तमानस्तु, प्रत्याह—आत्मन्यध्यासकरणोक्तयुक्तिभिर्यदैकोपि क्रियासम्बन्धो न सम्भवति तदा कथमनन्तव्यक्तिसम्भव इति परिहरतीत्यर्थः ।

मात्रेणे"ति (पृ० १८९ पं० १) । परिहरति--**"ने"ति** । उपार्जनं स्वीकरणम् । न त्विय विधाऽऽत्मनीत्याह-**"न त्वात्मन" इति** । 'ये तु देहादावात्माभिमानो न मिथ्याऽपि तु गौणो माणवकादाविव सिंहाभिमान इति मन्यन्ते' तन्मतमुपन्यस्य दूषयति—**"अब्राहु"रिति** । प्रसिद्धो वस्तुभेदो यस्य पुरुषस्य स तथोक्तः । उपपादितं चैदस्माभिरध्यासभाष्ये इति नेहोपपाद्यते । यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे वस्तुनि पुरुषात्, सांशयिकौ पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, तत्र तु पुरुषत्वमनियतमपि समारोपितमेव । एवं संशये समारोपितमनिश्चितमुदाहृत्य विपर्ययज्ञाने निश्चितमुदाहरति—**"यथा वा शुक्तिकाया"मिति** (पृ० १९० पं० ४) । (१)शुक्लभास्वरस्य द्रव्यस्य पुरःस्थितस्य सति शुक्तिकारजतसाधारण्ये यावदत्र रजतविनिश्चयो भवति तावत्कस्माच्छुक्तिविनिश्चय एव न भवति । (२)संशयो वा द्वेधा युक्तः, समानधर्मधर्मिणोर्दर्शनात् उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषदृश्यस्मृतेश्च । संस्कारोन्मेषहेतोः सादृश्यस्य द्विष्ठत्वेनोभयत्र तुल्यमेतदिति अत उक्तम्-- **"अकस्मा"दिति** । (३)अनेन दृष्टस्य हेतोः समानत्वेऽप्यदृष्टं हेतुरुक्तः । तच्च कार्यदर्शनोन्नेयत्वेनासाधारणमिति भावः । **"आत्मानात्मविवेकिनामि"ति** । श्रवणमननकुशलतामात्रेण पण्डितानामनुत्पन्नतत्त्वसाक्षात्काराणामिति यावत् । तदुक्तम्-'पश्वादिमिश्राविशेषादि'ति । शेषमतिरोहितार्थम् । जीवतो विदुषोऽशरीरत्वे च श्रुतिस्मृती उदाहरति-**"तथाचे"ति** (पृ० १९१ पं० २) । सुबोधम् । प्रकृतमुपसंहरति-**"तस्मान्नावगतब्रह्मात्मभावस्ये"ति** । ननूक्तं-यदि जीवस्य ब्रह्मात्मत्वावगतिरेव सांसारिकधर्मनिवृत्तिहेतुः, हन्त मननादिविधानानर्थक्यं, तस्मात्प्रतिपत्तिविधिपरा वेदान्ता-इति, तदनुभाष्यं दूषयति-**"यत्पुनरुक्तं श्रवणात्परावीनयोरि"ति** । मनननिदिध्यासनयोरपि न विधिस्तयोरन्वयव्यतिरेकसिद्धसाक्षात्कारफलयोर्विधिसरूपैर्वचनैरनुवादात्, तदिदमुक्तम्-**"अवगत्यर्थत्वादि"ति** । ब्रह्मसाक्षात्कारोऽवगतिस्तदर्थत्वं मननिदिध्यासनयोरन्वयव्यतिरेकसिद्धमित्यर्थः । अथ कस्मान्मननादिविधिरेव न भवतीत्यत आह-**"यदि ह्यवगतामि"ति** (पृ० १९२ पं० १) । न तावन्मननिदिध्यासने प्रधानकर्मणी अपूर्वविषये अमृतत्वफले इत्युक्तमधस्तात्(४), अतोगुणकर्मत्वमनयोरवघातप्रोक्षणादिवत् परिशिष्यते, तदप्ययुक्तम् (५)अन्यत्रोपयुक्तोपयोक्ष्यमाणत्वाभावादात्मनः, विशेषतस्त्वौपनिषदस्य कर्मानुष्ठानविरोधा-

---

(१) 'तत्र तु' इत्यादिना संशयस्यापि समारोपत्वं प्रदर्श्य, भ्रान्तेरप्युचितनिमित्तापेक्षणादकस्मादित्ययुक्तं भाष्यमित्याशंक्याह शुक्लभास्वरस्येति ।

(२) साधारणधर्मिणि दृष्टे किं तन्मात्रं विपर्ययकारणमुत सादृश्यादिदोषसम्बलितमिति विकल्प्य तत्र धवलभास्वररूपस्य शुक्तिरजतसाधारण्ये सति व्यवहितरजतनिश्चयात्पागेव संनिहितशुक्तिनिश्चयप्रसंगादाद्यं निरस्य द्वितीयं दूषयन्नाह संशयो वेति । तथा च समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशय इति सूत्रेऽक्षपादवर्णितसंशयसामग्रीसत्त्वात्संशय एव युक्तो न विपर्यय इत्याभिप्रायकमकस्मादितिपदं भाष्ये प्रयुक्तमिति सन्दर्भार्थः ।

(३) कथं तर्हि दृश्यमानविपर्ययनियमस्तत्राहानेनेति । दृष्टं हेतुं प्रतिक्षिप्य कार्यनियमं प्रतिजानता भाष्यकारेणादृष्टं कर्म हेतुत्वेनार्थादुक्तमिति भावः ।

(४) इत्युक्तमधस्तादिति । गान्धर्वशास्त्राभ्यासवदपूर्वानपेक्षया साक्षात्कारहेतुत्वोक्तस्यर्थः ।

(५) गुणकर्म क्वचिदुपयोक्ष्यमाणशेषो यथा इवने उपयोक्ष्यमाणव्रीहीनामवघातः, क्वचिदुपयुक्तशेषो

दित्यर्थः । प्रकृतमुपसंहरति–"तस्मादि"ति । एवं सिद्धरूपब्रह्मपरत्वमुपनिषदाम् । ब्रह्मणः शास्त्रार्थस्य धर्मादन्यत्वाद्विज्ञविषयत्वेन शास्त्रभेदाद् 'अथातो ब्रह्मजिज्ञासे'त्यस्य शास्त्रारम्भत्वमुपपद्यत इत्याह–"एवं च सती"ति । इतरथा तु धर्मजिज्ञासैवेति न शास्त्रान्तरमिति न शास्त्रारम्भत्वं स्यादित्यत आह–"प्रतिपत्तिविधिपरत्व" इति (पृ० १९३ पं० १) । न केवलं सिद्धरूपत्वाद्ब्रह्मात्मैक्यस्य धर्मादन्यत्वमपि तु तद्विरोधादपीत्युपसंहारव्याजेनाह–"तस्मादहं ब्रह्मास्मीति" (पृ० १९४ पं० १) । (१)इतिकरणेन ज्ञानं परामृशति । (२)विधयो हि धर्मे प्रमाणं, ते च साध्यसाधनेतिकर्तव्यताभेदाधिष्ठाना धर्मोत्पादिनश्च तदधिष्ठाना न ब्रह्मात्मैक्ये सति प्रभवन्ति, विरोधादित्यर्थः । न केवलं धर्मप्रमाणस्य शास्त्रस्येयं गतिरपि तु सर्वेषां प्रमाणानामित्याह–"सर्वाणि चेतराणि प्रमाणानी"ति । कुतः ? "नही"ति । अद्वैते हि विषयविषयिभावो नास्ति । न च कर्तृत्वं, कार्याभावात् । न च करणत्वम्, अत एव । तदिदमुक्तम्—"अप्रमातृकाणि चे"ति चकारेण । अत्रैव ब्रह्मविदां गाथामुदाहरति–"अपि चाहु"रिति । पुत्रदारादिष्वात्माभिमानो गौणः । (३)यथा स्वदुःखेन दुःखी यथा स्वसुखेन सुखी तथा पुत्रादिगतेनापीति सोऽयं गुणः । न त्वेकत्वाभिमानो, भेदस्यानुभवसिद्धत्वात् । तस्माद्गौर्वाहीक इतिवद्गौणो, देहेन्द्रियादिषु त्वभेदानुभवान्न गौण आत्माभिमानः, किन्तु शुक्तौ रजतज्ञानवन्मिथ्या । तदेवं द्विविधोऽयमात्माभिमानो लोकयात्रां वहति । तदसत्त्वे तु न लोकयात्रा नापि ब्रह्मात्मैकत्वानुभवस्तदुपायस्य श्रवणमननादेरभावात् । तदिदमाह—"पुत्रदेहादिबाधनात्" । (४)गौणात्मनोऽसत्त्वे पुत्रकलत्रादिबाधनं, ममकाराभाव इति यावत् । मिथ्यात्मनोऽसत्त्वे देहेन्द्रियादिबाधनं श्रवणादिबाधनं च । तथा च (५)न केवलं लोकयात्रासमुच्छेदः सद्ब्रह्माहमित्येवंबोधशीलं यत्कार्यमद्वैतसाक्षात्कार इति यावत , तदपि कथं भवेत् । कुतस्तदसंभव इत्यत आह—

अन्वेष्टव्यात्मविज्ञानात्प्राक् प्रमातृत्वमात्मनः ।

उपलक्षणं चैतत् । प्रमाप्रमेयप्रमाणविभाग इत्यपि द्रष्टव्यम् । एतदुक्तं भवति एष हि विभागोऽद्वैतसाक्षात्कारकारणम् ततो नियमेन प्राग्भावात् । तेन तदभावे कार्यं नोत्प-

---

यथा प्रयाजोपयुक्ताज्यस्य हविष्षु कारणम् 'प्रयाजशेषेण हवींष्यभिघारयेदि'ति विहितम् । एतदुभयमध्यात्मनो न सम्भवति प्रधानत्वेनोपयुक्तोपयोक्ष्यमाणत्वाभावादतो न मननादिविध्यासने तद्विषये गुणकर्मणीति भावः ।

(१) अहं ब्रह्मास्मीति वाक्यस्य तदर्थस्य चेतरप्रमाणावसानवत्त्वमयुक्तं नित्यनिवृत्तिप्रसक्तादित्याशंक्य ज्ञानपर इतिशब्द इत्याह इतिकरणेनेति ।

(२) विधीनामद्वैतज्ञानविरोधं दर्शयति विधय इति । ध्यंश्च भावना हि धर्मः, तद्विषया विधयः साध्यादिभेदाधिष्ठानास्तद्विषयाः । अपि चेतऽनुष्ठेयं धर्ममुपदिशन्तस्तदुत्पादिनः पुरुषेण तमनुष्ठापयन्तीति साध्यधर्माधिष्ठानास्तत्प्रमाणानीति यावदतो नित्यसिद्धाद्वैतब्रह्मावगमे तेषां विरोध इत्याह धर्मोत्पादिन इति ।

(३) पुत्राद्यवहमित्यभिमानो गौणात्मा चेत्तर्हि मुख्यात्मना किं गुणसाम्यमत आह यथेति । तस्मादिति । वाह्लीको नाम देशविशेषस्तन्निवासी तच्छब्देनोक्तः ।

(४) पुत्रादिदुःखकारकत्वारोपाय आत्माभिमानस्तस्मिन्निवृत्ते ममत्वबाधनेत्याह गौणात्मक इति ।

(५) अध्यात्मादिप्रमाणबाधमुक्तमा प्रामित्यभावमाह न केवलमिति ।

यते इति । (१)न च प्रमातुरात्मनोऽन्वेष्टव्य आत्माऽन्य इत्याह--

अन्विष्टः स्यात्प्रमातैव पाप्मदोषादिवर्जितः ॥ (पृ० १९५ पं० १) ।

(२)उक्तं श्रीवास्थप्रैवेयकनिदर्शनम् । स्यादेतत्, अप्रमाणात्कथं पारमार्थिकाद्वैतानुभवोत्पत्तिरित्यत आह--

देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणं तु, अस्यावधिमाह--आऽऽत्मनिश्चयात् ॥

आ ब्रह्मस्वरूपसाक्षात्कारादित्यर्थः । एतदुक्तं भवति पारमार्थिकप्रपञ्चवादिभिरपि देहादिष्वात्माभिमानो मिथ्येति वक्तव्यं, प्रमाणबाधितत्वात्, तस्य च समस्तप्रमाणकारणत्वं भाविकलोकयात्रावाहित्वं चाभ्युपेयम् । सेयमस्माकमप्यद्वैतसाक्षात्कारे विधा भविष्यति । (३)न चायमद्वैतसाक्षात्कारोऽप्यन्तःकरणवृत्तिभेद एकान्ततः परमार्थः । यस्तु साक्षात्कारो भाविको, नासौ कार्यस्तस्य ब्रह्मस्वरूपत्वात् । अविद्या तु यथविद्यामुच्छिन्द्याज्जनयेद्वा, न तत्र कश्चिदनुपपत्तिः । तथा च श्रुतिः--

(४)विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ इति ।

तस्मात्सर्वमवदातम् ॥ ४ ॥ इति चतुःसूत्री ॥

(५)एवम्

कार्यान्वयं विना सिद्धरूपे ब्रह्मणि मानता ।
पुरुषार्थे स्वयं तावद्वेदान्तानां प्रसाधिता ॥

ब्रह्मजिज्ञासां प्रतिज्ञाय 'जन्माद्यस्य' यत इत्यादिना 'तत्तु समन्वयादि'त्यन्तेन सूत्रसंदर्भेण सर्वज्ञे सर्वशक्तौ जगदुत्पत्तिस्थितिविनाशकारणे प्रामाण्यं वेदान्तानामुपपादितम् । तच्च ब्रह्मणीति परमार्थतो न त्वय्यपि ब्रह्मण्येवेति व्युत्पादितम् । तदत्र संदिह्यते-तज्जगदुपादान-

---

(१) नियतप्रादसत्त्वं हि कारणत्वं प्रमात्रादिश्च ज्ञानकरणं, तस्मिन्सकृदुदिततत्त्वसाक्षात्कारान्निवृत्ते नोर्ध्वं ज्ञानानुवृत्तिरित्यर्थकं प्रथमार्धं व्याख्याय प्रमातृलये कालेनोऽभावात् मोक्षस्य कथं पुमर्थत्वमित्याशङ्क्य परार्धव्याख्यया समाधत्ते न चेति । अन्वेष्टव्यः परमात्माऽन्वेष्टुः प्रमातृत्वोपलक्षिताच्चिदेकरसान्न भिन्नस्ततोऽप्यस्तप्रमातृत्वबोधऽप्युपलक्षित आत्मैव पापदोषादिरहितोऽन्विष्टो विहितः स्यादतो नोक्तदोष इत्यर्थः ।

(२) ननु यमन्वेष्टुरात्मभूतं ब्रह्म किमिति सर्वत्र न चकास्ति तत्राह उक्तमिति । प्रमात्रादेस्तत्त्वज्ञानहेतुता सिद्धवत्कृत्य ज्ञानात्तन्निवृत्तौ हेत्वभावात्फलाभाव उक्तः, स न बाध्यस्य प्रमात्रादेः प्रमानुत्पादकत्वापातादिति शङ्कोत्तरत्वेन तृतीयश्लोकं व्याख्यातिं स्यादेतादिति ।

(३) न चायमिति । तथाच य उत्पद्यतेऽनुभवो न स परमार्थिको, यश्च परमार्थिको न स उत्पद्यतेऽतश्चाप्रमाणात्कथं पारमार्थिकानुभवोत्पत्तिरित्यनिष्टापत्तिरेवेति भावः ।

(४) विद्या वृत्तिमविद्यां च कार्यकारणभावेन सहिते यो वेद सोऽविद्योपादानत्वेन तन्मय्या वृत्त्या तदुपादानं मृत्युमविद्यां तीर्त्वा स्वरूपभूतविद्योपलक्षितममृतत्वमश्नुते इति श्रुतेरर्थः ।

(५) एवं चतुःसूत्र्या शास्त्रार्थं संक्षिप्य वक्ष्यमाणाधिकरणार्थानां सङ्गतिं प्रदर्शयन्नाह एवमिति । यदि सर्वज्ञे वेदान्तानां प्रामाण्यं सिद्धं किमधिकरणान्तरेणात आह तत्रेति । सर्वज्ञे जगद्धेतौ समन्वयप्रदर्शनेन चेतनं तदित्युपक्षिप्तम्, तदाक्षिप्य समर्थ्यत इति आक्षेपलक्षणसंगत्याऽग्रिमाधिकरणमुत्थाप्यते । प्रयोजनं चास्य पूर्वपक्षे तत्त्वमसीतितच्छब्दवाच्यप्रधानैकपसंपत्तिः, सिद्धान्ते तु चेतनस्य ब्रह्मैक्यमिति ।

कारणं किं चेतनमुताचेतनमिति । अत्र च विप्रतिपत्तेः प्रतिवादिनां विशेषानुपलम्भे सति संशयः । तत्र च प्रधानमचेतनं जगदुपादानकारणमनुमानसिद्धमनुवदन्त्युपनिषद इति सांख्याः । (१)जीवाणुव्यतिरिक्तचेतनेश्वरनिमित्ताधिष्ठिताश्चतुर्विधाः परमाणवो जगदुपादानकारणमनुमितमनुवदन्तीति काणादाः । आदिग्रहणेनाभावोपादानत्वादि ग्रहीतव्यम् । अनिर्वचनीयानाद्यविद्याशक्तिमच्चेतनोपादानं जगदागमिकमिति ब्रह्मविदः । एतासां च विप्रतिपत्तीनामनुमानवाक्या(२)नुमानवाक्याभासा बीजम् । तदेवं विप्रतिपत्तेः संशये किं तावत्प्राप्तम् । (३)तत्र

ज्ञानक्रियाशक्त्यभावाद्ब्रह्मणोऽपरिणामिनः ।
न सर्वशक्तिविज्ञाने प्रधाने त्वस्ति संभवः ॥

ज्ञानक्रियाशक्ती खलु ज्ञानक्रियाकार्यदर्शनेनोपेयसद्भावे । न च ज्ञानक्रिये चिदात्मनि स्तः, तस्यापरिणामित्वादेकत्वाच्च(४) । त्रिगुणे च प्रधाने परिणामिनि संभवतः । यद्यपि च साम्यावस्थायां प्रधाने समुदाचरद्वृत्तिनी क्रियाज्ञाने न स्तः, तथाप्यव्यक्तेन शक्त्यात्मना रूपेण संभवत एव । तथा च प्रधानमेव सर्वज्ञं सर्वशक्ति च, न तु ब्रह्म । स्वरूपचैतन्यं त्वस्यावृत्तिकमनुपयोगि जीवात्मनामिवास्माकम् । न च स्वरूपचैतन्ये कर्तृत्वमकार्यत्वात्तस्य । कार्यत्वे वा न सर्वदा सर्वज्ञता(५) । (६) भोगापवर्गलक्षणपुरुषार्थद्वयप्रयुक्तानादिप्रधानपुरुषसंयोगनिमित्तस्तु महदहंकारादिक्रमेणाचेतनस्यापि चेतनानधिष्ठितस्य प्रधानस्य परिणामः सर्गः । दृष्टं चाचेतनं चेतनानधिष्ठितं पुरुषार्थे प्रवर्तमानम् । यथा वत्सविवृद्ध्यर्थमचेतनं क्षीरं प्रवर्तते । (७)'तदैक्षत बहुस्यां प्रजायेयेती'त्याद्याश्च श्रुतयोऽचेतनेऽपि चेतनवदुपचारात्स्वकार्योन्मुखत्वमादर्शयन्ति यथा कूलं पिपतिषतीति ।

यत्प्राये श्रूयते यच्च तत्तादृगवगम्यते ।
भाक्तप्राये श्रुतमिदमतो भाक्तं प्रतीयते ॥

अपि चाहुर्वृद्धाः(८)—'यथाऽम्यप्राये लिखितं दृष्ट्वा वदन्ति भवेदयमम्य' इति, तथे-

---

(१) जीवेति । जीवा एव स्वकर्मद्वारा कर्तार इति मतनिरासार्थं जीवव्यतिरिक्तत्वम् । अणुव्यतिरेकेण चाणुसङ्घातकारणत्वनिरासः । चेतनग्रहणेन प्रधानवादखण्डनं बोध्यम् ।

(२) अनुमानेति । सिद्धान्तेऽनुमानानि वाक्यानि च यथार्थान्यन्यत्र तु तदाभासा बीजं इति ध्येयम् ।

(३) प्रधानकारणवादिमतेन पूर्वपक्षं स्थापयन्नाह तत्रेति । ज्ञानेति । अपरिणामित्वाद्ब्रह्मणः सर्वजननशक्तिसर्वविषयज्ञाने न स्तः ज्ञानक्रियाशक्त्यभावात्, यस्य हि किञ्चिज्जननादिशक्तिर्न सम्भवति तस्य कुतः सर्वविषयजननादिशक्तिसंभवः, प्रधानस्य तु परिणामित्वादस्ति तत्सम्भव इत्यर्थः ।

(४) एकत्वाच्चेति । एकरूपत्वान्निर्गुणत्वादित्यर्थः । एतेनापरिणामित्वेऽपि ब्रह्मणि ज्ञानगुणः प्रयत्नगुणश्च किं न स्यातामित्याशङ्का परास्ता । अथवा निरवयत्वादपरिणामित्वसाधनमिदं मन्तव्यम् ।

(५) तथाचावृत्तिकस्य सर्वविषयपरिणामरहितस्याकार्यस्य च स्वरूपचैतन्यस्य सर्वज्ञत्वं न सम्भवति, कार्यत्वस्वीकारे च न सर्वज्ञतेति भावः ।

(६) ननु कथमचेतनं प्रधानं चेतनानधिष्ठितं प्रवर्तेताऽत आह भोगेति । पुरुषार्थप्रयुक्तो योऽनादिः प्रधानपुरुषसंयोगः प्रधानस्य पुरुषं प्रति पारार्थ्यलक्षणः सम्बन्धस्तन्निमित्तः सर्ग इत्यर्थः ।

(७) 'गौणश्चेन्नात्मशब्दात्' इत्यादिसूत्रनिरस्याः शङ्काः सौकर्यार्थमेकत्र संगृह्णाति तदैक्षतेत्यादिना ।

(८) शबरस्वामिनः ।

दमपि 'ता आप ऐक्षन्त' 'तत्तेज ऐक्षते'त्यादयुपचारप्राये श्रुतम्, 'तदैक्षते'त्यौपचारिकमेव वि-क्षेयम् । 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी'ति च प्रधानस्य जीवात्मत्वं जीवार्थकारितयाह । यथा हि भद्रसेनो राजार्थकारी राज्ञा भद्रसेनो ममात्मेत्युपचर्यते, एवं 'तत्त्वमसी'त्याद्याः श्रुतयो भाक्ताः संपरत्यर्था वा द्रष्टव्याः । 'स्वमपीतो भवती'ति च निरुक्तं जीवस्य प्रधाने स्वकीयेऽप्ययं सुषुप्तावस्थायां ब्रूते । (१)प्रधानांशतमःसमुद्रेके हि जीवो निद्रा णस्तमसीव मग्नो भवति । यथाहुः—'अभावप्रत्ययालम्बना वृत्तिर्निद्रे'ति । वृत्तीनामन्यासां प्रमा-णादीनामभावस्तस्य प्रत्ययः कारणं तमस्तदालम्बना निद्रा जीवस्य वृत्तिरित्यर्थः । तथा सर्वज्ञं प्रस्तुत्य श्वेताश्वतरमन्त्रोऽपि 'स कारणं करणाधिपाधिप' इति प्रधानाभिप्रायः । प्रधानस्यैव सर्वज्ञत्वं प्रतिपादितमधस्तात् । तस्मादचेतनं प्रधानं जगदुपादानमनुवदन्ति श्रुतय इति पूर्वः पक्षः । एवं काणादादिमतेऽपि कथंचिद्योजनीयाः श्रुतयः । अक्षरार्थस्तु **"प्रधान-कारणपक्षेऽपी"ति "प्रधानस्यापी"ति** (पृ० १७९ पं ८) अपिकारावेवकारार्थौ । स्यादेतत् सत्त्वसंपत्त्या चेदस्य सर्वज्ञताऽथ तमःसंपत्त्याऽसर्वज्ञतैवास्य कस्मान्न भवतीत्यत आह **"तेन च सत्त्वधर्मेण ज्ञानेने"ति** । सत्त्वं हि प्रकाशशीलं निरतिशयोत्कर्षे सर्वज्ञताबीजम् । यथाहुः (२)'निरतिशयं सर्वज्ञताबीज'मिति । (३)यत् खलु सातिशयं तत् क्व-चिन्निरतिशयं दृष्टं, यथा कुवलामलकबिल्वेषु सातिशयं महत्त्वं व्याम्नि परममहति निरति-शयम् । (४)एवं ज्ञानमप्येकद्विबहुविषयतया सातिशयमित्यनेनापि क्वचिन्निरतिशयेन भवि-तव्यम् । (५)इदमेव चास्य निरतिशयत्वं यद्विदितसमस्तवेदितव्यत्वम् । तदिदं सर्वज्ञत्वं सत्त्वस्य निरतिशयोत्कर्षत्वे सम्भवति । एतदुक्तं भवति यद्यपि रजस्तमसी अपि स्तः, तथापि पुरुषार्थप्रयुक्तगुणवैषम्यातिशयात् सत्त्वस्य निरतिशयोत्कर्षे सार्वज्ञ्यं कार्यमुत्पद्यत इति प्रधानावस्थायामपि तन्मात्रं विवक्षित्वाऽविवक्षित्वा च तमःकार्यं प्रधानं सर्वज्ञमुपच-र्यत इति । अपिभ्यामवधारणस्य व्यवच्छेद्यमाह—**"न केवलस्ये"ति** । न किंचिदेकं कार्यं जनयेदपि तु बहूनि, चिदात्मा चैकः, प्रधानं तु त्रिगुणमिति तत एव कार्यमुत्पत्तुम-र्हति, न चिदात्मन इत्यर्थः । तत्रापि च योग्यतामात्रेणैव चिदात्मनः सर्वज्ञताभ्युपगमो न कार्ययोगादित्याह—**"स्वयाऽपी"ति** । न केवलस्याकार्यकारणस्येत्येतत्सिंहावलोकितेन प्रपञ्चयति—**"प्राक्उत्पत्ते"रिति** । **"अपि च प्रधानस्ये"ति** (पृ० १९९ पं० १) । चस्त्वर्थः । एवं प्राप्त उच्यते—

---

(१) ननु नित्यस्य जीवस्य कथं प्रधाने लयोऽत आह प्रधानांशेति । प्रधानस्यांशस्तमोगुणस्तस्योद्रेके जीवो निद्रां कुर्वंस्तत्र मग्न इव भवत्यतश्च विवेकाभावाल्लयोपचार इत्यर्थः ।

(२) पतंजलिमहर्षयः । यदा योगैश्वर्यात्सत्त्वं निरतिशयोत्कृष्टं भवति तदा तत्सर्वज्ञत्वे बीजं भवतीति सूत्रार्थः ।

(३) निरतिशयतां सत्त्वस्य तत्कार्यज्ञानस्य निरतिशयसाधनेनोपपादयति यत् खल्विति ।

(४) एवमिति । ज्ञानत्वं निरतिशयकिंचिदाश्रितं सातिशयवृत्तिजातित्वात् परिणामत्ववदिति अनुमानाकारोऽत्र बोध्यः ।

(५) ननु निरतिशयत्वे कथं सर्वविषयत्वम्, नहि ननःपरिमाणं सर्वविषयमत आह इदमेवेति । ज्ञेयभूम्ना हि ज्ञानभूमा ततो निरतिशयत्वं सर्वविषयत्वमानयतीत्यर्थः ।

(सू०) ईक्षतेर्नाशब्दम् ॥ ५ ॥
गौणश्चेन्नात्मशब्दात् ॥ ६ ॥

(१)नामरूपप्रपञ्चलक्षणकार्यदर्शनादेतत्कारणमात्रवदिति सामान्यकल्पनायामस्ति प्रमाणं, न तु तदचेतनं चेतनमिति वा विशेषकल्पनायामस्त्यनुमानमित्युपरिष्टात्प्रवेदयिष्यते । तस्मा नामरूपप्रपञ्चकारणभेदप्रमायामाम्नाय एव भगवानुपासनीयः । तदेवमाम्नायैकसमधिगमनीये जगत्कारणे

(२)पौर्वापर्यपरामर्शाद् यदाम्नायोऽञ्जसा वदेत् ।
जगद्बीजं तदेवेष्टं चेतने च स आञ्जसः ॥

तेषु तेषु खल्वाम्नायप्रदेशेषु 'तदैक्षते'त्येवंजातीयकैर्वाक्यैरीक्षितुः कारणाज्जगज्जन्माख्यायत इति । न च प्रधानपरमाण्वादेरचेतनस्येक्षितृत्वमाञ्जसम् । सत्त्वांशेनेक्षितु प्रधानं तस्य प्रकाशकत्वादिति चेत् । न, तस्य जाड्येन तत्त्वानुपपत्तेः । कस्तर्हि रजस्तमोभ्यां सत्त्वस्य विशेषः ? स्वच्छता । स्वच्छं हि सत्त्वम् । अस्वच्छे च रजस्तमसी । स्वच्छस्य च चैतन्यबिम्बोद्ग्राहितया प्रकाशकत्वव्यपदेशो नेतरयोरस्वच्छतया तद्ग्राहित्वाभावात् । पार्थिवत्वे तुल्य इव मणेर्बिम्बोद्ग्राहिता न लोष्टादीनाम् । ब्रह्मणस्त्वीक्षितृत्वमाञ्जसम् , तस्याम्नायतो नित्यज्ञानस्वभावत्वविनिश्चयात् । (३)नन्वत एवास्य नेक्षितृत्वं, नित्यस्य ज्ञानस्वभावभूतस्येक्षणस्याक्रियात्वेन ब्रह्मणस्तत्प्रति निमित्तभावाभावात् , अक्रियानिमित्तस्य च कारकत्वनिवृत्तौ तद्व्यपाश्रय तद्विशेषस्य कर्तृत्वस्य निवृत्तेः । (४)सत्यम् , ब्रह्मस्वभावश्चैतन्यं नित्यतया न क्रिया, तस्य त्वनवच्छिन्नस्य तत्तद्विषयोपधानभेदावच्छेदेन कल्पितभेदस्यानित्यत्वं कार्यत्वं चोपपद्यते । तथाचैवंलक्षणे ईक्षणे सर्वविषये ब्रह्मणः स्वातन्त्र्यलक्षणं कर्तृत्वमुपपन्नम् । (५)यद्यपि च कूटस्थनित्यस्यापरिणामिन औदासीन्यमस्य वास्तवम् , तथाप्यनाद्यनिर्वचनीयाविद्यावच्छिन्नस्य व्यापारवत्त्वमवभासत इति कर्तृत्वोपपत्तिः । (६)परैरपि च चिच्छक्तेः कूटस्थनित्याया वृत्तीः प्रति कर्तृत्वमीदृशमेवाभ्युपेयम् , चैतन्यसामानाधिकरण्येन ज्ञातृत्वोपलब्धेः । (७)नहि प्राधानिकान्यन्तर्बहिष्करणानि त्रयोदश सत्त्वप्रधानान्यपि स्वयमेवाचेतनानि तदवृत्तयश्च स्वं वा परं वा वेदितुमुत्सहन्ते । नो खल्वन्धाः सहस्रमपि पान्थाः पन्थानं विदन्ति । चक्षुष्मता चैकेन चेद् वेद्यते, स एव तर्हि मार्गदर्शी स्वतन्त्रः कर्ता नेता तेषाम् । एवं बुद्धिसत्त्वस्य स्वयमचेतनस्य चितिबिम्बसंक्रान्त्या चेदापन्नं चैतन्यस्य ज्ञातृत्वम् , चितिरेव ज्ञात्री स्वतन्त्रा,

---

(१) नन्वनुमानसिद्धानुवादिषु वेदान्तेषु कथमीक्षातिश्रवणाद् ब्रह्मनिर्णयस्तत्राह नामरूपेति ।

(२) पौर्वापर्येति । पौर्वापर्यमुपक्रमोपसंहारौ, परामर्शो मध्ये निर्देशः, एभिर्यदाम्नायो मुख्यवृत्त्या वदेत्तदेव जगद्बीजं, स चाम्नायश्चेतने मुख्यो न प्रधान इति कारिकार्थः ।

(३) ननु भवतु ब्रह्मणीक्षणरूपप्रकृतिर्मुख्या, प्रत्ययस्तु कथं तत्र मुख्य इत्याशङ्क्याह नन्विति । अतएव नित्यज्ञानत्वादेव । (४) समाधत्ते सत्यमिति ।

(५) यच्चोक्तमपरिणामित्वान्न ज्ञानं ब्रह्मण इति तत्राह यद्यपि चेति ।

(६) पारमार्थिकेक्षितृत्वस्य साङ्ख्यमतेऽप्यसम्भवादौपाधिकमेव ज्ञातृत्वं मुख्यं वेदान्तिभिरपि स्वीक्रियते इत्याशयेनाह परैरिति ।

(७) ननु चितिशक्तेर्ज्ञातृत्वेन किं, प्रधानविकारा एव ज्ञास्यन्तीत्याशङ्क्याह नहीति ।

नान्तर्बहिष्करणान्यन्धसहस्रप्रतिमान्यस्वतन्त्राणि । न चास्याश्चितेः कूटस्थनित्याया अस्ति व्यापारयोगः । न च तदयोगेऽप्यज्ञातृत्वं, व्यापारवतामपि जडानामज्ञत्वात् । तस्मादन्तःकरणवर्तिनं व्यापारमारोप्य चितिशक्तौ कर्तृत्वाभिमानोऽन्तःकरणे वा चैतन्यमारोप्य तस्य ज्ञातृत्वाभिमानः । सर्वथा भवन्मतेऽपि नेदं स्वाभाविकं क्वचिदपि ज्ञातृत्वमपि तु सांव्यवहारिकमेवेति परमार्थः । (१)नित्यस्यात्मनो ज्ञानं परिणाम इति च भेदाभेदपक्षमपाकुर्वद्भिरपास्तम् । (२)कूटस्थस्य नित्यस्यात्मनोऽव्यापारवत एव भिन्नं ज्ञानं धर्म इति चोपरिष्टादपाकरिष्यते । तस्माद्वस्तुतोऽनवच्छिन्नं चैतन्यं तत्त्वान्यत्वानिर्वचनीयाव्याकृतव्याचिकीर्षितनामरूपविषयावच्छिन्नं सज्ज्ञानं कार्यं तस्य कर्ता ईश्वरो ज्ञाता सर्वज्ञः सर्वशक्तिरिति सिद्धम् । तथा च श्रुतिः—

(३)तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।
अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥
यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ।
तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते ॥ इति ॥

तपसा ज्ञानेन अव्याकृतनामरूपविषयेण, चीयते तद्व्याचिकीर्षावद्भवति, यथा कुविन्दादिरव्याकृतं पटादि बुद्धावालिख्य चिकीर्षति । एकधर्मवान् द्वितीयधर्मोपजननेन उपचित उच्यते । (४) व्याचिकीर्षायां चोपचये सति ततो नामरूपमन्नमदनीयं साधारणं संसारिणां व्याचिकीर्षितमभिजायते । तस्मादव्याकृताद्व्याचिकीर्षिताद् अन्नात्प्राणो हिरण्यगर्भो ब्रह्मणो ज्ञानक्रियाशक्त्यधिष्ठानं जगत्सूत्रात्मा साधारणो जायते, (५)यथाऽव्याकृताद् व्याचिकीर्षितात् पटाद् अवान्तरकार्यं द्वितन्तुकादि । तस्माच्च प्राणाद् मनआख्यं सङ्कल्पविकल्पादिव्याकरणात्मकं(६)जायते । ततो व्याकरणात्मकान् मनसः सत्यशब्दवाच्या(७)न्याकाशादीनि जायन्ते । तेभ्यश्च सत्याख्येभ्योऽनुक्रमेण लोका भूरादयः, तेषु मनुष्यादिप्राणिनो वर्णाश्रमक्रमेण कर्माणि धर्माधर्मरूपाणि जायन्ते। कर्मसु चामृतं फलं स्वर्गनरकादि। तच्च स्वनिमित्तयोर्धर्माधर्मयोः सतोर्न विनश्यतीत्यमृतं, यावद्धर्मावधर्मभावीति यावत्। यः सर्वज्ञः सामान्यतः, सर्वविद्विशेषतो, यस्य भगवतो ज्ञानमयं तपो धर्मो नायासमयम् ,(८)त-

---

(१) भवतु सांख्यमतेऽलीकं ज्ञातृत्वं भाट्टमत तु तात्त्विकं तदनभ्युपगच्छता वेदान्तिनो गौणं स्यादत आह नित्यस्येति ।

(२) तर्हि न्यायमत एवास्तु वास्तवमत आह कूटस्थस्येति । धर्मो-गुणः । उपरिष्टात्-'ज्ञात एव' इति सूत्रव्याख्यानावसरे ।

(३) औपाधिकमीक्षणकर्तृत्वमित्यत्र श्रुतिप्रमाणं दर्शयति तपसेति । दृष्टान्तप्रदर्शनपूर्वकं श्रुत्यर्थमाह तपसेति । ज्ञानेनोपलक्षितं तद्विषयनानारूपव्याचिकीर्षावद्भवति ।

(४) ततोऽन्नमभिजायत इत्येतद्व्याचष्टे व्याचिकीर्षायां चति । धर्मद्वयोग उपचयः । अन्नशब्दवाच्यनामरूपाभिव्यक्तिर्जायत इत्यर्थः ।

(५) समुदाये सिसृक्षिते प्रथममेकदेशाद्धिरण्यगर्भोत्पत्तौ निदर्शनमाह यथेति ।

(६) संकल्पादिवृत्तिव्यक्तीकरणात्मकं तत्कारणं व्यष्टिमन इत्यर्थः ।

(७) सत्यशब्दार्थमाह आकाशादीनीति । तेषु हि पृथिव्यादिक्रमपरोक्षत्वाद्व्याकाशौ च परोक्षत्वात्सत्यशब्दवाच्याविति द्रष्टव्यम् ।

(८) तस्मादेतदिति व्याचष्टे तस्मादिति । अन्नात्प्राण इत्यत्रैव क्रमार्थकपञ्चमीस्वीकारपक्षंगो मा भू-

स्माद्ब्रह्मणः पूर्वस्मादेतत्परं कार्यं ब्रह्म । किञ्च नामरूपमन्नं च व्रीहियवादि जायत इति । तस्मात्प्रधानस्य साम्यावस्थायामनीक्षितृत्वात्, क्षेत्रज्ञानां च सत्यपि चैतन्ये सर्गादौ विषयानीक्षणात्, मुख्यसम्भवे चोपचारस्यान्याय्यत्वात्, मुमुक्षोश्चायथार्थोपदेशानुपपत्तेः, मुक्तिविरोधित्वा(१)त्तेजःप्रभृतीनां च मुख्यासम्भवेनोपचाराश्रयणस्य युक्तिसिद्धत्वात्, संशये च तत्प्रायपाठस्य निश्चायकत्वात्, इह तु मुख्यस्यौत्सर्गिकत्वेन निश्चये सति संशयाभावात्, अन्यथा किरातशतसंकीर्णदेशनिवासिनो ब्राह्मणायनस्यापि किरातत्वापत्तेः, ब्रह्मवेक्षित्रनाथनिर्वाच्याविद्यासचिवं जगदुपादानं, शुक्तिरिव समारोपितस्य रजतस्य, मरीचय इव जलस्य, एकश्चन्द्रमा इव द्वितीयस्य चन्द्रमसः । न त्वचेतनं प्रधानपरमाण्वादि । अशब्दं हि तत् । (२)न च प्रधानं परमाणवो वा तदतिरिक्तसर्वज्ञेश्वराधिष्ठिता जगदुपादानमिति साम्प्रतम्, तेषां भेदेन कार्यत्वात् । कारणात्कार्याणां भेदाभावात्, कारणज्ञानेन समस्तकार्यपरिज्ञानस्य मृदादिनिदर्शनेनागमेन प्रसाधितत्वात्, भेदे च तदनुपपत्तेः । साक्षाच्च 'एकमेवाद्वितीयं, नेह नानास्ति किञ्चन, मृत्योः स मृत्युमाप्नोती'त्यादिभिर्बहुभिर्वचोभिर्ब्रह्मातिरिक्तस्य प्रपञ्चस्य प्रतिषेधाच्चेतनोपादानमेव जगद् भुजङ्ग इवारोपितो रज्जूपादान इति सिद्धान्तः । सदुपादानत्वे हि सिद्धे जगतस्तदुपादानं चेतनमचेतनं वेति संशय्य मीमांस्येत, अथापि तु सदुपादानत्वमसिद्धमित्यत आह—"तत्रेदं शब्दवाच्यमित्यादि दर्शयती"त्यन्तेन (पृ० १९९ पं० ११) । तथापीक्षिता पारमार्थिकप्रधानक्षेत्रज्ञातिरिक्त ईश्वरो भविष्यति, यथाहुर्हैरण्यगर्भा इत्यतः श्रुतिः पठिता 'एकमेवाद्वितीय'मिति । 'बहु स्या'मिति च चेतनं कारणमात्मन एव बहुभावमाह । (३)तेनापि कारणाच्चेतनादभिन्नं कार्यमवगम्यते । यद्यप्याकाशाद्या भूतसृष्टिस्तथापि तेजोबन्नानामेव (४)त्रिवृत्करणस्य विवक्षितत्वात् तत्र तेजसः प्राथम्यात् तेजः प्रथममुक्तम् । एकमद्वितीयं जगदुपादानमित्यत्र श्रुत्यन्तरमपि पठति—"तथाऽन्यत्रे"-ति । (५)ब्रह्म चतुष्पादष्टाशफं षोडशकलम् । तद्यथा प्राची प्रतीची दक्षिणोदीचीति चतस्रः कलाः ब्रह्मणः, प्रकाशवान् नाम प्रथमः पादः । तदर्धं शफः । तथा पृथिव्यन्तरिक्षं द्यौः समुद्र

दत आह पूर्वस्मादिति । नियतपूर्वकालवृत्तित्वरूपकारणत्वमेव तच्छब्दार्थ इत्यर्थः । नियतपूर्ववर्तिनः सर्वज्ञाज्जायमानस्य हिरण्यगर्भब्रह्मणः परकालवर्त्तित्वेन कार्यत्वमेतच्छब्दार्थ इत्याह एतदिति । नाम—देवदत्तादि । रूपं—शुक्लादि ।

(१) मुक्तिविरोधित्वात् इति । अयथाभूतप्रधानात्मत्वोपदेशस्य मुक्तिविरोधित्वादित्यर्थः ।

(२) साङ्ख्यमतेन प्रधानकारणवादं निरस्य पातञ्जलादिमतेनाप्याह न चेति । तन्मते कार्याणामधिष्ठातृरुपादानाच्च भेदात् श्रुतौ तु तदभावादित्यर्थः ।

(३) चेतनकारणेनात्मन एव बहुभवनकथनेनेत्यर्थः ।

(४) त्रिवृदिति । छान्दोग्ये हि 'तासां त्रिवृतं त्रिवृतमेकैकामकरोदि'ति तिसृणाम्देवतानां तेजोऽबन्नानामेव त्रिवृत्करणस्य वक्ष्यमाणत्वान्न गगनपवनयोस्तत्र च तेजसः प्राथम्यमित्यर्थः । त्रीणि भूतानि त्रिधा विदार्य प्रतिभूतमेकैकमर्धं त्रिधा प्रस्फोट्येतरभूतद्वये योजनमिति त्रिवृत्करणपदार्थः ।

(५) षोडशकलमिति भाष्यं व्याख्याति ब्रह्मेति । 'स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोकाः लोकेषु नाम च' इत्युक्ताः षोडशकला रत्नप्रभादिभूता प्रश्नोपनिषदुक्ता द्रष्टव्याः । वाचस्पतिप्रदर्शितास्तु छान्दोग्ये 'दिगाद्यवयवः षोडशकल उदास्यो पुरुष' इत्यादिनोक्ता द्रष्टव्याः ।

इत्यपराश्चतस्रः कलाः, द्वितीयः पादोऽनन्तवाजाम । तथाग्नेः सूर्यश्चन्द्रमाः विद्युदिति चतस्रः कलाः, स ज्योतिष्माजाम तृतीयः पादः । प्राणश्चक्षुः श्रोत्रं वागिति चतस्रः कलाः, स चतुर्थ आयतनवाजाम ब्रह्मणः पादः । तदेवं षोडशकलं षोडशावयवं ब्रह्मोपास्यमिति सिद्धम् । स्यादेतत्, ईक्षतेरिति क्षितपा धातुस्वरूपमुच्यते, न चाविवक्षितार्थस्य धातुस्वरूपस्य चेतनोपादानसाधनत्वसम्भव इत्यत आह—"**ईक्षतेरि**"ति (पृ० २०० पं० १) । धात्वर्थनिर्देशोऽभिमतो, विषयिणा विषयलक्षणात् । (१)प्रसिद्धा चेयं लक्षणेत्याह–"**यजतेरितिवदि**"ति । "**यः सर्वज्ञ**" इति सामान्यतः "**सर्वविदि**"ति विशेषतः । सांख्यीयं स्वमतसमाधानमुपन्यस्य दूषयति–"**यत्तूक्तं सत्त्वधर्मेणे**"ति । पुनः सांख्यमुपस्थापयति–"**ननूक**"मिति । दूषयति—"**तदपी**"ति । (२)समुदाचरद्वृत्ति तावन्न भवति सत्त्वं, गुणवैषम्यप्रसङ्गेन साम्यानुपपत्तेः । न चाव्यक्तेन रूपेण ज्ञानमुपयुज्यते, रजस्तमसोऽतत्प्रतिबन्धस्यापि सूक्ष्मेण रूपेण सद्भावादित्यर्थः । अपि च चैतन्यप्रधानवृत्तिवचनो जानातिर्न चाचेतने वृत्तिमात्रे दृष्टचरप्रयोग इत्याह—"**अपि च नासाक्षिके**"ति । कथं तर्हि योगिनां सत्त्वांशोत्कर्षहेतुकं सर्वज्ञत्वमित्यत आह—"**योगिनां त्वि**"ति । सत्त्वांशोत्कर्षो हि योगिनां चैतन्यचक्षुष्मतामुपकरोति, नान्धस्य प्रधानस्येत्यर्थः । यदि तु कापिलमतमपहाय (३)हैरण्यगर्भमास्थीयेत, तत्राप्याह—"**अथ पुनः साक्षिनिमित्तमि**"ति । (४)तेषामपि हि प्रकृष्टसत्त्वोपादानं पुरुषविशेषस्यैव क्लेशकर्मविपाकाशयापरामृष्टस्य सर्वज्ञत्वं, न तु प्रधानस्याचेतनस्य, (५)तदपि चाद्वैतश्रुतिभिरपास्तमिति भावः । पूर्वपक्षबीजमनुभाषते—"**यत्पुनरुक्तं ब्रह्मणोपी**"ति । चैतन्यस्य शुद्धस्य नित्यत्वेऽप्युपहितं सदनित्यं कार्यमाकाशमिव घटावच्छिन्नमित्यभिसन्धाय परिहरति—"**इदं तावद्भवानि**"ति । (पृ०२०१ पं०१) "**प्रततौष्ण्यप्रकाशो सवितरी**"त्येतदपि विषयावच्छिन्नप्रकाशः कार्यमित्येतदभिप्रायम् । वैषम्यं चोदयति–"**ननु साधु**"रिति । (६)किं वास्तवं कर्माभावमभिप्रेत्य वैषम्यमाह भवान्, उत तद्विवक्षाभावम्? तत्र यदि तद्विवक्षाभावं, तदा प्रकाशयतीत्यनेन मा भूत् साम्यं, प्रकाशत इत्यनेन त्वस्ति, नह्यत्र कर्म विवक्षितम्, अथ च प्रकाशस्वभावं प्रत्यास्ते स्वातन्त्र्यं सवितुरिति परिहरति–"**नासत्यपि कर्मणी**"ति । असत्यपीत्यविवक्षितेऽपीत्यर्थः । अथ वास्तवं कर्माभावमाश्रित्य वैषम्यमुच्यते, तन्न, असिद्धत्वात् कर्माभावस्य, (७)विवक्षितत्वाच्चात्र

---

(१) प्रसिद्धेति । लक्षणाया एव निरूढत्वार्थं प्रयोगानुगमो न वाचकत्वायेत्यर्थः ।

(२) समुदाचरद्वृत्ति–अभिव्यक्तिव्यापारकम् ।

(३) पातञ्जलमतमित्यर्थः ।

(४) तेषामिति । हैरण्यगर्भाणां मतेऽविद्याऽस्मितारागद्वेषाभिनिवेशाख्यैः पञ्चभिः क्लेशैर्धर्माधर्मकर्मणां विपाकेन तत्फलाशयेन फलभोगवासनयाऽस्पृष्टस्य पुरुषस्यैव प्रकृष्टसत्त्वोपादानं सर्वज्ञत्वं नाचेतनस्येत्यर्थः । अत एव 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष' इति पातञ्जलसूत्रम् ।

(५) न चैतदपि मतं श्रद्धेयं भेदवादग्रस्तत्वादित्याह तदपि चेति ।

(६) सवितृप्रकाशस्य रूपादेर्भावादसत्यपीति भाष्यासङ्गतिमाशंक्य विकल्पमुखेनावतारयति किमिति ।

(७) एवमेश्नतेरत्र कर्माविवक्षापक्षे प्रकाशत इतिवत्कर्तृत्वनिर्देश उपपादितोऽधुनाऽविवक्षाप्यसिद्धेरित्याह विवक्षितत्वाच्चेति । न खल्वस्माकं क्वचिद्वास्तवं दृश्यमस्त्यतोऽप्यस्ततयैव कर्मत्वस्य विवक्षेत्यर्थः ।

कर्मण इति परिहरति—"**कर्मापेक्षायां त्वि**"ति । यासां सति कर्मण्यविवक्षिते श्रुतीनामनुपपत्तिस्तासां सति कर्मणि विवक्षिते सुतरामित्यर्थः । "**यत्प्रसादा**"दिति (पृ० २०२ पं० २) । यस्य भगवत ईश्वरस्य प्रसादात्तस्य नित्यसिद्धस्येश्वरस्य नित्यं ज्ञानं भवतीति किमु वक्तव्यमिति योजना । यथाहुर्योगशास्त्रकाराः—(१)'ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्चे'ति । तद्भाष्यकाराश्च—'भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णाति ज्ञानवैराग्यादिने'ति । "**सवितृप्रकाशवदि**"ति । वस्तुतो नित्यस्य कारणानपेक्षां स्वरूपेणोक्त्वा व्यतिरेकमुखेनाप्याह—"**अपि चाविद्यादिमत**" इत्यादि । आदिग्रहणेन कामकर्मादयः संगृह्यन्ते । "**न ज्ञानप्रतिबन्धकारणरहितस्ये**"ति । संसारिणां वस्तुतो नित्यज्ञानत्वेऽप्यविद्यादयः प्रतिबन्धकारणानि सन्ति, न त्वीश्वरस्याविद्यारहितस्य ज्ञानप्रतिबन्धकारणसम्भव इति भावः । न तस्य कार्य(२)मावरणाद्यपगमो विद्यतेऽनावृतत्वादिति भावः । ज्ञानबलेन क्रिया । (३)प्रधानस्य त्वचेतनस्य ज्ञानबलाभावाज्जगतो न क्रियेत्यर्थः । अपाणिग्रहीताऽपादो जवनो वेगवान् विहरणवान् । अतिरोहितार्थमन्यत् । स्यादेतत् , अनात्मनि व्योम्नि घटाद्युपाधिकृतो भवत्ववच्छेदविभ्रमो, न त्वात्मनि स्वभावसिद्धप्रकाशे स घटत इत्यत आह—"**दृश्यते चात्मन एव सत**" इति (पृ० २०३ पं० ७) । "**अभिनिवेशो**" मिथ्याभिमानः । "**मिथ्याबुद्धिमात्रेण पूर्वेणेति**" । अनेनानादिता दर्शिता । मात्रग्रहणेन विचारासहत्वेन निर्वचनीयता निरस्ता । परिशिष्टं निगदव्याख्यातम् ॥ ५ ॥ ६ ॥

(सू०) तन्निष्ठस्य मोक्षोपदेशात् ॥ ७ ॥

इति शङ्कोत्तरत्वेन वा स्वातन्त्र्येण वा प्रधाननिराकरणार्थं सूत्रम् । शङ्का च भाष्ये उक्ता ॥ ७ ॥

स्यादेतत् ब्रह्मैव ज्ञीप्सितं, तच्च न प्रथमं सूक्ष्मतया शक्यं श्वेतकेतुं ग्राहयितुमिति तत्संबद्धं प्रधानमेव स्थूलतयाऽऽत्मत्वेन ग्राह्यते श्वेतकेतुरुन्धतीमिवातीव सूक्ष्मां दर्शयितुं तत्संनिहितां स्थूलतारकां दर्शयतीयमसावरुन्धतीति । अस्यां शङ्कायामुत्तरम्—

(सू०) हेयत्वावचनाच्च ॥ ८ ॥

इति सूत्रम् । चकारोऽनुक्त(४)समुच्चयार्थः । तच्चानुक्तं भाष्य उक्तम् ॥ ८ ॥

अपि च जगत्कारणं प्रकृत्य स्वपितीत्यस्य (५)निरुक्तं कुर्वती श्रुतिश्चेतनमेव जगत्कारणं ब्रूते । यदि स्वशब्द आत्मवचनस्तथापि चेतनस्य पुरुषस्याचेतनप्रधानत्वानुपपत्तिः । अथात्मीयवचनस्तथाप्यचेतने पुरुषार्थतयाऽऽत्मीयेपि चेतनस्य प्रलयानुपपत्तिः । नहि मृदात्मा घट

---

(१) तत इति । तत ईश्वरप्रणिधानात् प्रत्यगात्माधिगमोऽन्तरायाणां व्याधिस्त्यानादीनां चाभाव इति पातञ्जलसूत्रार्थः ।

(२) ईश्वरस्य ज्ञानाभिव्यक्तये कर्तव्यं नास्तीत्याह आवरणादीति ।

(३) ज्ञानमेव बलं सामर्थ्यमुपाध्यवच्छिन्नफलोत्पत्तौ, तेन बलेन फलभूतानुभवस्य कारणं क्रिया, सा च न प्रधानस्येत्याह प्रधानस्य त्विति ।

(४) अनुक्तप्रतिज्ञाविरोधसमुच्चयार्थश्चकार इत्यर्थः, स च भाष्य एव स्फुट इत्युपेक्षित इति भावः ।

(५) निरुक्तम्—स्वपितीत्यस्य निर्वचनम् ।

आत्मीयेऽपि पाथसि प्रलीयतेऽपि स्वात्मभूतायां मृद्येव। न च रजतमनात्मभूते हस्तिनि प्रलीयते, किं त्वात्मभूतायां शुक्तावेवेत्याह—

(सू०) स्वाप्ययात् ॥९॥ गतिसामान्यात् ॥१०॥

गतिरवगतिः। **"तार्किकसमय इवे"ति** (पृ० २११ पं० १६)। यथाहि तार्किकाणां समयभेदेषु परस्परपराहतार्थता, नैव वेदान्तेषु परस्परपराहतिः, अपि तु तेषु सर्वत्र जगत्कारणचैतन्यावगतिः समानेति। **"चक्षुरादीनामिव रूपादिष्वि"ति** । (पृ० २१२ पं० ८)। (१)यथा हि सर्वेषां चक्षू रूपमेव ग्राहयति, न पुना रसादिकं कस्यचिद्दर्शयति कस्यचिद्रूपम्। एवं रसनादिष्वपि गतिसामान्यं दर्शनीयम् ॥९॥ १०॥

(सू०) श्रुतत्वाच्च ॥ ११ ॥

'तदैक्षते'त्यत्र ईक्षणमात्रं जगत्कारणस्य श्रुतं न तु सर्वविषयम्। जगत्कारणसम्बन्धितया तु तदर्थात् सर्वविषयमवगतम्, श्वेताश्वतराणां तूपनिषदि सर्वज्ञ ईश्वरो जगत्कारणमिति साक्षादुक्तमिति विशेषः॥ ११ ॥

उत्तरसूत्रसन्दर्भमाक्षिपति—(२)**"जन्माद्यस्य यत इत्यारम्ये"ति** (पृ० २१३ पं० ३)। ब्रह्म जिज्ञासितव्यमिति प्रतिज्ञातं, तच्च शास्त्रैकसमधिगम्यं, शास्त्रं च सर्वज्ञे सर्वशक्तौ जगदुत्पत्तिस्थितिप्रलयकारणे ब्रह्मण्येव प्रमाणं न प्रधानादाविति न्यायतो व्युत्पादितम्। न चास्ति कश्चिद्वेदान्तभागो यस्तद्विपरीतमपि बोधयतीति च गतिसामान्यादित्युक्तम्। तत्किमपरमवशिष्यते यदर्थमुत्तरसूत्रसन्दर्भस्यावतारः स्यादिति, **"किमुत्थानमिति"** किमाक्षेपे। समाधत्ते—**"उच्यते, द्विरूपं ही"ति**। (३)यद्यपि तत्त्वतो निरस्तसमस्तोपाधिरूपं ब्रह्म, तथापि न तेन रूपेण शक्यमुपदेष्टुमित्युपाहितेन रूपेणोपदेष्टव्यमिति। तत्र च (४)क्वचिदुपाधिर्विवक्षितः। (५)तदुपासनानि **"कानिचदभ्युदयार्थानि"** मनोमात्रसाधनतयाऽत्र पठितानि। **"कानिचित् क्रममुक्त्यर्थानि कानिचित्कर्मसमृद्ध्यर्थानि"** (पृ० २१४ पं० ९)। क्वचित्पुनरुक्तोप्युपाधिरविवक्षितो, यथाऽत्रैवान्नमयादय आनन्दमयान्ताः पञ्चकोशाः। तदत्र कस्मिन्नुपाधिर्विवक्षितः कस्मिन्नेति नाद्यापि विवेचितम्। तथा गतिसामान्यमपि सिद्धवदुक्तं, न त्वद्यापि साधितमिति तदर्थमुत्तरग्रन्थसन्दर्भारम्भ इत्यर्थः। स्यादेतत् परस्यात्मनस्तत्तदुपाधिभेदविशिष्टस्याप्यभेदात् कथमुपासनाभेदः कथं

---

(१) यथाहीति। यथा सर्वेषां चक्षुषामेकरूपावगतिहेतुत्वं श्रवणानां शब्दावगतिहेतुत्वं घ्राणादीनां गन्धादिषु, तथा ब्रह्मणि सर्वेषां वेदान्तानां गतिसामान्यं प्रामाण्यदार्ढ्यहेतुरिति भावः।

(२) वृत्तानुवादेनोत्तरसूत्रसन्दर्भमाक्षिपति जन्मादीति। प्रथमसूत्रस्य शास्त्रोपोद्घातत्वाज्जन्मादिसूत्रमारभ्येत्युक्तम्। सर्ववेदान्तानां कार्ये प्रधानाद्यचेतने च समन्वयखण्डनेन ब्रह्मपरत्वं निवेदितमतः प्रथमाध्यायार्थस्य समाप्तत्वादुत्तरग्रन्थारम्भे किं कारणमित्याक्षेपार्थो द्रष्टव्यः।

(३) द्विरूपमिति भाष्यमयुक्तं निरुपाधिन एव ब्राह्मणो जिज्ञास्यत्वादित्याशङ्क्याह यद्यपीति।

(४) यदि सोपाधिकरूपस्य निरुपाधिकी देशशेषता कथं तर्हि उपास्तिरिति तत्राह क्वचिदिति। अवान्तरवाक्यभेदेनोपाधिविवक्षयोपासनविधिरित्यर्थः।

(५) उपास्तीनामपि मोक्षसाधनत्वव्यावृत्तये फलान्तराण्याह तदुपासनानीति। प्रतीकोपासनान्यभ्युदयार्थानि, दहरादीनि क्रममुक्त्यर्थानि, उद्गीथादीनि कर्मसमृध्यर्थानि, एतानि तु विधेयत्वाद्यद्यपि कर्मकाण्डे वक्तव्यानि तथापि मानसत्वेन साम्यादिहाधीतानीत्यर्थः।

च फलभेद इत्यत आह–"एक एव त्वि"ति । रूपभेदेप्युपाधिभेदादुपहितभेदादुपासनाभेददस्तथा च फलभेद इत्यर्थः । "क्रतुः" संकल्पः (पृ० २१५ पं० २) । ननु यद्येक आत्मा कूटस्थनित्यो निरतिशयः सर्वभूतेषु गूढः कथमेतस्मिन् भूताश्रये (१)तारतम्यश्रुतय इत्यत आह–"यद्यप्येक आत्मे"ति । (२)यद्यपि निरतिशयमेकमेव रूपमात्मन ऐश्वर्यं ज्ञानं चानन्दश्च, तथाप्यनाद्यविद्यातमःसमावृत्तं तेषुतेषु प्राणभृद्भेदेषु क्वचिदसदिव क्वचित्सदिव क्वचिदत्यन्तापकृष्टमिव क्वचिदपकृष्टमेव क्वचित्प्रकर्षवत् क्वचिदत्यन्तप्रकर्षवदिव भासते(३), तत्कस्य हेतोः ? अविद्यातमसः प्रकर्षनिकर्षतारतम्यादिति । यथोत्तमप्रकाशः सविता दिङ्मण्डलमेकरूपेणैव प्रकाशेनापूरयन्नपि वर्षासु निकृष्टप्रकाश इव शरदि तु प्रकृष्टप्रकाश इव प्रथते, तथेदमपीति । "अपेक्षितोपाधिसम्बन्धम् उपास्यत्वेन, निरस्तोपाधिसंबन्धं ज्ञेयत्वेने"ति (पृ० २१६ पं० ५) ॥

(सू०) आनन्दमयोऽभ्यासात् ॥ १२ ॥
विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १३ ॥
तद्धेतुव्यपदेशाच्च ॥ १४ ॥

तत्र तावत्प्रथममेकदेशिमतेनाधिकरणमारचयति–"तैत्तिरीयकेऽन्नमय"मित्यादि ।

(४)गौणप्रवाहपातेऽपि युज्यते मुख्यमीक्षणम् ।
मुख्यत्वे तूभयोस्तुल्ये प्रायदृष्टिर्विशेषिका ॥

आनन्दमय इति हि विकारे प्राचुर्ये च मयटस्तुल्यं मुख्यार्थत्वमिति विकारार्थान्नमयादिपदप्रायपाठादानन्दमयपदमपि विकारार्थमेवेति युक्तम् । ननु च प्राणमयादिषु विकारार्थत्वायोगात् स्वार्थिको मयडिति युक्तम् । प्राणाद्युपाध्यवच्छिन्नो ह्यात्मा भवति प्राणादिविकारो घटाकाशमिव घटविकारः । न च सत्यर्थे स्वार्थिकत्वमुचितम् ।

(५)चतुष्कोशान्तरत्वे तु न सर्वान्तरतोच्यते ।
प्रियादिभागी शारीरो जीवो न ब्रह्म युज्यते ॥

नच सर्वान्तरतया ब्रह्मैवानन्दमयं न जीव इति साम्प्रतम् , नह्ययं श्रुतिरानन्दमयस्य सर्वान्तरतां ब्रूतेऽपित्वन्नमयादिकोशचतुष्टयान्तरतामानन्दमयकोशस्य । न चास्मादन्यस्या-

---

(१) तारतम्येति । औपाधिकानां मध्ये एक उपासकोऽपकृष्टोऽपरमुपास्यमुत्कृष्टमिति तारतम्यं सूचयन्त्य उपासनाविधिश्रुतय इत्यर्थः ।

(२) वस्तुतः स्वतःसिद्धैश्वर्योपि उपासक उपाधिनिकर्षादनभिव्यक्तैश्वर्यस्तत्प्रत्याविर्भूतैश्वर्यं विशुद्धोपाधिमद्ब्रह्मोपास्यमिति परिहाराभिप्रायमाह यद्यपीति ।

(३) टीकानुरोधेनायमेव पाठो युक्त इति ध्येयम् ।

(४) ननु 'ता आप ऐक्षन्ते'त्याद्यब्रह्मसन्निधिमपबाध्य मुख्येक्षितृ ब्रह्म निर्णीतमिह कथमन्नमयाद्यब्रह्मसन्निधिपाठादानन्दमयस्याब्रह्मत्वशङ्कायां आह गौणेति । अनादिगौणेक्षणप्रवाहपातेपि जगत्कारणे मुख्यमीक्षणमिति युक्तम् मुख्यसम्भवे गौणस्यानवकाशात् । अतस्तत्र विषयानुदये प्रायपाठोऽकिञ्चित्करः । अत्र तु मयटो विकारप्राचुर्यार्थयोर्मुख्यत्वे तुल्ये सति विकारार्थग्रहणे प्रायदृष्टिर्विशेषिका प्राचुर्यार्थत्वाद्यावर्तिकेत्यर्थः ।

(५) विकारशब्देः सर्वान्तरत्वलिङ्गेन बाधमाशङ्क्याह चतुष्कोशेति । अन्नमयादिकोशचतुष्टयान्तरत्वेनानन्दमयस्य सर्वान्तरता न युक्ताऽतः प्रियशिरस्त्वादियुक्तो जीव एवानन्दमयो न ब्रह्मेति कारिकार्थः ।

न्तरस्याश्रवणादयमेव सर्वान्तर इति युक्तम्, यदपेक्षं यस्यान्तरत्वं श्रुतं तत्तस्मादेवान्तरं भवति । नहि देवदत्तो बलवानित्युक्ते सर्वान् सिंहशार्दूलादीनपि प्रति बलवान् प्रतीयतेऽपितु समानजातीयनरान्तरमपेक्ष्य । एवमानन्दमयोऽप्यन्नमयादिभ्योऽन्तरो न तु सर्वस्मात् ।(१)न च निष्कलस्य ब्रह्मणः प्रियाद्यवयवयोगो, नापि शारीरत्वं युज्यत इति संसार्येवानन्दमयः । तस्मादुपहितमेवात्रोपास्यत्वेन विवक्षितं, न तु ब्रह्मरूपं ज्ञेयत्वेनेति पूर्वः पक्षः । अपि च यदि प्राचुर्यार्थोऽपि मयट्, तथापि संसार्येवानन्दयो, न तु ब्रह्म । आनन्दप्राचुर्यं हि तद्विपरीतदुःखलवसंभवे भवति, न तु तदत्यन्तासंभवे । न च परमात्मनो मनागपि दुःखलवसंभवः, आनन्दैकरसत्वादित्याह–"**न च सशरीरस्य सत**" इति (पृ० २१७ पं० ६) । (२)अशरीरस्य पुनरप्रियसंबन्धो मनागपि नास्तीति प्राचुर्यार्थोऽपि मयड् नोपपद्यत इत्यर्थः ।

उच्यते । आनन्दमयावयवस्य तावद् ब्रह्मणः पुच्छस्याङ्गतया न प्राधान्यमपित्वङ्गिन आनन्दमयस्यैव ब्रह्मणः प्राधान्यम् । तथा च तदधिकारे पठितमभ्यस्यमानमानन्दपदं तद्बुद्धिमाधत्त इति तस्यैवानन्दमयस्याभ्यास इति युक्तम् । ज्योतिष्टोमाधिकारे 'वसन्ते वसन्ते ज्योतिषे'ति ज्योतिषपदमिव ज्योतिष्टोमाभ्यासः (३)कालविशेषविधिपरः । अपि च साक्षादानन्दमयात्माभ्यासः श्रूयते '**एतमानन्दमयमात्मानमुपसंक्रामती**'ति । पूर्वपक्षबीजमनुभाष्य दूषयति—"**यत्तूक्तमन्नमयादी**"ति । (पृ० ११८ पं० ६) (४)न हि मुख्यारुन्धतीदर्शनं तत्तदमुख्यारुन्धतीदर्शनप्रायपठितमप्यमुख्यारुन्धतीदर्शनं भवति । (५)तादर्थ्यात्पूर्वदर्शनानामन्त्यदर्शनानुगुण्यं न तु तद्विरोधितेति चेत् । इहाप्यानन्दमयादान्तरस्यान्यस्याश्रवणात् । तस्य त्वन्नमयादिसर्वान्तरत्वश्रुतेस्तत्पर्यवसानात्तादर्थ्यं तुल्यम् । प्रियाद्यवयवयोगशारीरत्वे च निगदव्याख्यातेन भाष्येण समाहिते । (६)प्रियाद्यवयवयोगाच्च दुःखलवयोगोऽपि परमात्मन औपाधिक उपपादितः । तथाऽऽनन्दमय इति प्राचुर्यार्थता मयट उपपादितेति ॥ १२ ॥ १३ ॥ १४ ॥

(७)अपि च मन्त्रब्राह्मणयोरुपेयोपायभूतयोः सम्प्रतिपत्तेर्ब्रह्मैवानन्दमयपदार्थो, मन्त्रे हि

---

(१) पूर्वं ब्रह्मत्वे लिङ्गाभासं निरस्य जीवत्वे लिङ्गमाह न चेति ।

(२) सशरीरस्य प्रियादि दुर्वारमित्येतावता कथं मयटः प्राचुर्यार्थत्वे ब्रह्मत्वानुपपत्तिरुक्ता, तत्राहाशरीरस्येति । एवमुक्ते सत्यशरीरे ब्रह्मणि नाप्रियमित्युक्तं भवति, तथाच दुःखगन्धयोगी प्राचुर्यार्थो मयड् न सम्भवतीत्यर्थः ।

(३) कालेति । वसन्तकालगुणसंक्रान्ततया कालविशेषविधिपरोऽभ्यासोऽयं न तु कर्मान्तरविधिरित्यर्थः ।

(४) देवदत्तादेरपि बलवत्त्वं सिंहादेर्मानान्तरासिद्धम्, आनन्दमयादान्तरे वस्तुनि न मानान्तरं नापि श्रुतिरित्यभिप्रेत्याह नहीति ।

(५) दृष्टान्ते वैषम्यं शङ्कते तादर्थ्यादिति । मुख्यारुन्धतीदर्शनाविरोधेनानुगुण्यं चेदत्रापि तुल्यमित्यर्थः ।

(६) योऽपि पूर्वपक्षे प्राचुर्यार्थेस्वीकृत्योपेय दुःखलवयोग आपादितः सोऽप्युपाधिवशादित्यर्थात्परिहृत इत्याह प्रियादीति ।

(७) मान्त्रवर्णिकमिति सूत्रं भाष्यकारैः 'सत्यं ज्ञानमनन्तमि'ति मन्त्रप्रस्तुतं ब्रह्मानन्दमयवाक्ये निर्दिश्यते प्रकृतत्वादसम्बद्धपदव्यवायाभावाच्चेति विवृतं, तत्रेतरेतरार्थप्रत्यभिज्ञानाभावान्मन्त्रब्राह्मणयोर्व्याख्यानव्याख्येयभावस्यार्विशदत्वात्प्रकारान्तरेण सूत्रं व्याचष्टे अपि चेति । प्रत्यभिज्ञानादिति । कोशवत्तुल्क

पुनःपुन'रन्योन्तर आत्मे'ति परब्रह्मण्यान्तरत्वश्रवणात्तस्यैव चा'न्योन्तर आत्माऽऽनन्दमय' इति ब्राह्मणे प्रत्यभिज्ञानात् परब्रह्मैवानन्दमयमित्याह सूत्रकारः--

(सू०) मान्त्रवर्णिकमेव च गीयते ॥ १५ ॥

मान्त्रवर्णिकमेव परं ब्रह्म ब्राह्मणेऽप्यानन्दमय इति गीयत इति ॥ १५ ॥

अपि चानन्दमयं प्रकृत्य शरीराद्युत्पत्तेः प्राक् स्रष्टृत्वश्रवणाद् 'बहु स्यामि'ति च सृज्यमानानां स्रष्टुरानन्दमयादभेदश्रवणादानन्दमयः पर एवेत्याह सूत्रम्--

(सू०) नेतरोऽनुपपत्तेः ॥ १६ ॥

नेतरो जीव आनन्दमयः, तस्यानुपपत्तेरिति ॥ १६ ॥

(सू०) भेदव्यपदेशाच्च ॥ १७ ॥

कामाच्च नानुमानापेक्षा ॥ १८ ॥

रसः सारो ह्ययमानन्दमय आत्मा 'रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती'ति । सोऽयं जीवात्मनो लब्धृभाव आनन्दमयस्य च लभ्यता नाभेद उपपद्यते । (१)तस्मादानन्दमयस्य जीवात्मनो भेदे परब्रह्मत्वं सिद्धं भवति । चोदयति-**"कथं तर्ही"ति** (पृ० २२१ पं० ४) । यदि लब्धा न लब्धव्यः, कथं तर्हि परमात्मनो वस्तुतोऽभिन्नेन जीवात्मना परमात्मा लभ्यत इत्यर्थः । परिहरति—**"बाढं तथापी"ति** । सत्यम्, परमार्थतोऽभेदेप्यविद्यारोपितं भेदमुपाश्रित्य लब्धृलब्धव्यभाव उपपद्यते । जीवो ह्यविद्यया परब्रह्मणो भिन्नो दर्शितः, (२)न तु जीवादपि । तथा चानन्दमयश्चेद् जीवो न जीवस्याविद्ययापि स्वतो भेदो दर्शित इति न लब्धृलब्धव्यभाव इत्यर्थः । भेदाभेदौ च न जीवपरब्रह्मणोरित्युक्तमधस्तात् । स्यादेतत् यथा परमेश्वराद् भिन्नो जीवात्मा द्रष्टा न भवत्येवं जीवात्मनोपि द्रष्टुर्न भिन्नः परमेश्वर इति जीवस्यानिर्वाच्यत्वे परमेश्वरोऽप्यनिर्वाच्यः स्यात्, तथा च न वस्तु सन्नित्यत आह-**"परमेश्वरस्त्वविद्याकल्पिता"ति** । रजतं हि समारोपितं न शुक्तितो भिद्यते । न हि तद्भेदेनाभेदेन वा शक्यं निर्वक्तुम्, शुक्तिस्तु परमार्थसती निर्वचनीयाऽनिर्वचनीयाद्रजताद्भिद्यत एव । (३)अत्रैव सरूपमात्रं दृष्टान्तमाह--**"यथा मायाविन"** इति । एतदपरितोषेण(४)त्यन्तसरूपं दृष्टान्तमाह--**"यथा वा घटाकाशादि"ति** । शेषमतिरोहितार्थम् ॥ १७ ॥ १८॥

वाक्यस्य देहादिव्यतिरिक्तानन्दमयब्रह्मप्रतिपत्त्युपायरूपत्वान्मन्त्रत्वम् आनन्दमयवाक्यस्योपेयब्रह्मप्रत्यायकत्वाद्ब्राह्मणत्वम्, तयोश्चेतरेतरार्थप्रत्यभिज्ञानमस्त्येवेति परब्रह्मैवानन्दमित्यर्थः ।

(१) ननु जीवादन्यत्वान्नानन्दमयस्य ब्रह्मत्वं घटादिष्वदर्शनादत आह तस्मादिति । आनन्दमयो ह्यात्मशब्दाच्चेतनस्तस्य च जीवत्वराहित्ये ब्रह्मत्वं सिद्धमित्यर्थः ।

(२) नत्विति । स्वतन्त्रोपाधिभेदे चेतनभेद इति जीवब्रह्मणोरविद्योपाधिभेदाद्भेदो युक्तो न तु स्वस्मादौपाधिको भेदो युक्त इत्यर्थः ।

(३) अत्रैवेति । कल्पितस्याधिष्ठानाभेदेप्यधिष्ठानस्य ततो भेद इत्यत्रेत्यर्थः ।

(४) सूत्रारूढं स्वतोपि मिथ्या, जीवे भेदमात्रं तथा न स्वरूपमित्यपरितोषेणेत्यर्थः ।

(सू०) तद्धेतुव्यपदेशाच्च ॥ १९ ॥

स्वमतपरिग्रहार्थमेकदेशिमतं दूषयति--"इदं त्विह वक्तव्य"मिति । (पृ० २२३ पं० ३) एष तावदुत्सर्गो यद्

(१)ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्मशब्दात्प्रतीयते ।
विशुद्धं ब्रह्म, विकृतं त्वानन्दमयशब्दतः ॥

(२) तत्र किं पुच्छपदसमभिव्याहारादन्नमयादिषु चास्यावयवपरत्वेन प्रयोगादिहाप्यवयवपरत्वात् पुच्छपदस्य तत्समानाधिकरणं ब्रह्मपदमपि स्वार्थत्यागेन कथंचिदवयवपरं व्याख्यायताम्, आनन्दमयपदं चान्नमयादिविकारवाचिप्रायपठितं विकारवाचि वा कथंचित्प्रचुरानन्दवाचि वा ब्रह्मण्यप्रसिद्धं(३)कयाचिद्वृत्त्या ब्रह्मणि व्याख्यायताम्, आनन्दपदाभ्यासेन च ज्योतिष्पदेनेव ज्योतिष्टोमे आनन्दमयो लक्ष्यताम् उतानन्दमयपदं विकारार्थमस्तु ब्रह्मपदं च ब्रह्मण्येव स्वार्थेऽस्तु 'आनन्दपदाभ्यासश्च स्वार्थे पुच्छपदमात्रमवयवप्रायलिखितमाधिकरणपरतया व्याक्रियतामिति कृतबुद्धय एव विदाङ्कुर्वन्तु । तत्र--

(४)प्रायपाठपरित्यागो मुख्यत्रितयलङ्घनम् ।
पूर्वस्मिन्नुत्तरे पक्षे प्रायपाठस्य बाधनम् ॥

(५)पुच्छपदं हि वालधौ मुख्यं सदानन्दमयावयवे गौणमेवेति मुख्यशब्दार्थलङ्घनम् अवयवपरतायामधिकरणपरतायां च तुल्यम् । अवयवप्रायलेखबाधश्च विकारप्रायलेखबाधेन तुल्यः । ब्रह्मपदमानन्दमयपदमानन्दपदमिति त्रितयलङ्घनं त्वधिकम् । तस्मान्मुख्यत्रितयलङ्घनादसाधीयान् पूर्वः पक्षः । मुख्यत्रयानुगुण्येन तूत्तर एव पक्षो युक्तः । अपि चानन्दमयपदस्य ब्रह्मार्थत्वे ब्रह्म पुच्छमिति न समञ्जसम् । न हि तदेवावयव्यवयवश्चेति युक्तम् । आधारपरत्वे च पुच्छशब्दस्य प्रतिष्ठेत्येतदप्युपपन्नतरं भवति । आनन्दमयस्य चान्तरत्वमन्नमयादिकोशापेक्षया । ब्रह्मणस्त्वान्तरत्वमानन्दमयादर्थाद्(६)गम्यत इति न श्रुत्योक्तम् । एव चान्नमयादिवदानन्दमयस्य प्रियाद्यवयवयोगो युक्तः । वाङ्मनसागोचरे तु परब्रह्मण्युपाधिमन्तर्भाव्य प्रियाद्यवयवयोगः प्राचुर्यं च क्लेशेन व्याख्यायेयाताम् । (७)तथा च मान्त्रवर्णिकस्य ब्रह्मण एव 'ब्रह्म पुच्छं प्रतिष्ठे'ति स्वप्रधानस्याभिधाननात् तस्यैवाधिकारो नानन्दमयस्येति ।

---

(१) यदुक्तमानन्दमयस्याङ्गं ब्रह्मेति, तत्र, श्रुतिबाधप्रसङ्गादिति वदन् सिद्धान्तबीजमावपति ब्रह्म पुच्छमिति । (२) बलाबलविवेकार्थं पूर्वोत्तरपक्षयुक्तीर्विभजते तत्र किमिति ।

(३) स्तोकंदुःखानुवृत्त्यापत्तेः कयाचिद्वृत्त्या अल्पत्वमिति वृत्तिलक्षणयेत्यर्थः ।

(४) उक्तकल्पेषु सिद्धान्तपक्षं स्वीकुर्वन्विवेकं स्फोरयति प्रायेति । मयड्विकारेऽमुख्यो ब्रह्मशब्दः परब्रह्मणि मुख्यः, अभ्यस्यमानानन्दशब्दश्च प्रकृत्यर्थ एव मुख्यो न मयडर्थे, पूर्वपक्षे एतत्रितयलङ्घनमानन्दमयपदस्यान्नमयादिविकारप्रायपाठपरित्यागश्च स्यात । उत्तरे पक्षे तु पुच्छशब्दस्यावयवप्रायपाठस्यैव बाधनम्, मुख्यत्रितयस्वानुगुणमेवेत्यर्थः ।

(५) ननु पूर्वपक्षे यथा मयट्श्रुतिबाध एवमुत्तरपक्षे पुच्छश्रुतिबाधस्तत्राह पुच्छपदं हीति । लांगूले मुख्यं पुच्छपदं नात्रावयवमात्रे आनन्दमयस्य चात्मनो न मुख्यलांगूलसम्भव इति गौणमेवेत्यर्थः ।

(६) अर्थात --प्रतिष्ठासामर्थ्यात् गम्यतेऽत आनन्दमयादाभ्यन्तरं ब्रह्मेति नोक्तमित्यर्थः ।

(७) सिद्धान्तसारमुपसंहरति तथा चेति ।

'सोऽकामयते'त्याद्या अपि श्रुतयो ब्रह्मविषया नानन्दमयविषया इत्यर्थसङ्क्षेपः । सुग. ममन्यत् ॥

"सूत्राणि त्वेवं व्याख्येयानि" इति । (पृ० २२७ पं० १६) वेदसूत्रयोर्विरोधे (१)'गुणे त्वन्याय्यकल्पने'ति सूत्राण्यन्यथा नेतव्यानि । आनन्दमयशब्देन तद्वाक्यस्थब्रह्मपुच्छं प्रतिष्ठेत्येतद्वयं ब्रह्म यदमुपलक्ष्यते । एतदुक्तं भवति आनन्दमय इत्यादिवाक्ये यद् 'ब्रह्म पुच्छं प्रतिष्ठे'ति ब्रह्मपदं तत्स्वप्रधानमेवेति । यत्तु ब्रह्माधिकरणमिति वक्तव्ये 'ब्रह्म पुच्छमि'त्याह श्रुतिः, तत्कस्य हेतोः, ? पूर्वमवयवप्रधानप्रयोगात् तत्प्रयोगस्यैव बुद्धौ संनिधानात्, तेनापि चाधिकरणलक्षणोपपत्तेरिति ॥ **'मान्त्रवर्णिकमेव च गीयते'** ॥ (२)य'त्सत्यं ज्ञानमि'त्यादिना मन्त्रवर्णेन ब्रह्मोक्तं तदेव तदुपायभूतेन ब्राह्मणेन स्वप्राधान्येन गीयते-'ब्रह्म पुच्छं प्रतिष्ठे'ति । अवयववचनत्वे त्वस्य मन्त्रे प्राधान्यं ब्राह्मणे त्वप्राधान्यमिति उपायोपेययोर्मन्त्रब्राह्मणयोर्विप्रतिपत्तिः स्यादिति ॥ **'नेतरोऽनुपपत्तेः'** ॥ अत्र 'इतश्च नन्दमय' इति भाष्यस्य स्थाने 'इतश्च ब्रह्म पुच्छ प्रतिष्ठे'ति पठितव्यम् ॥ **'भेदव्यपदेशाच्च'** ॥ अत्रापी'तश्चानन्दमय' इत्यस्य च 'आनन्दमयाधिकार' इत्यस्य च भाष्यस्य स्थाने 'ब्रह्म पुच्छं प्रतिष्ठ'ति 'ब्रह्मपुच्छाधिकार' इति च पठितव्यम् ॥ **'कामाच्च नानुमानापेक्षा'** ॥ **'आस्मिन्नस्य च तद्योगं शास्ति'** ॥ इत्यनयोरपि सूत्रयोर्भाष्ये आनन्दमयस्थाने 'ब्रह्म पुच्छं प्रातष्ठ'ति पाठो द्रष्टव्यः ॥ **'तद्धेतुव्यपदेशाच्च'** ॥ विकारस्यानन्दमयस्य ब्रह्म पुच्छमवयवश्चेत् कथं सर्वस्यास्य विकारजातस्य सानन्दमयस्य ब्रह्म पुच्छं कारणमुच्येत 'इदं सर्वमसृजत, यदिदं किं चे'ति श्रुत्या । (३)नह्यानन्दमयविकारावयवो ब्रह्म विकारः सन् सर्वस्य कारणमुपपद्यते । (४)तस्मादानन्दमयविकारावयवो ब्रह्मोते तदवयवयोग्यानन्दमयो विकार इह नोपास्यत्वेन विवक्षितः, किं तु स्वप्रधानमिह ब्रह्म पुच्छं ज्ञेयत्वेनेति सिद्धम् ॥ १९ ॥

(सू०) अन्तस्तद्धर्मोपदेशात् ॥२०॥

(५)पूर्वस्मिन्नधिकरणेऽपास्तसमस्तविशेषब्रह्मप्रतिपत्त्यर्थमुपायतामात्रेण पञ्च कोशा उपाधयः स्थिता, न तु विवक्षिताः । ब्रह्मैव तु प्रधानं 'ब्रह्म पुच्छं प्रतिष्ठे'ति ज्ञेयत्वेनोपक्षिप्तमिति निर्णीतम् । सम्प्रति तु ब्रह्म विवक्षितोपाधिभेदमुपास्यत्वेनोपक्षिप्यते, न तु विद्याकर्मातिशय-

---

(१) गुणे त्विति (जै० अ० ९ पा० ३ सू० २५) सूत्रे नवमे ग्रहणीमीये 'पाशान् प्रमुमोक्त्वेतानिति, पाशं प्रमुमुक्त्वेति मन्त्रौ श्रुतौ, तत्र बहुवचनान्मन्त्रः प्रकरणादुत्कृष्टो नवेति संशये बहुवचनस्यासमवेतार्थत्वादुत्कर्षे प्राप्ते, विशेष्यप्रधानभूतपाशवाचिप्रातिपदिकस्याग्नीषोमीये समवेतार्थत्वात्तदनुरोधेन लक्षणय पाशावयवं लक्षयतीति निर्धारितम् । गुणे प्रत्ययार्थे त्वन्याय्यकल्पना न तद्वलान्मन्त्रोत्कर्षः प्रत्ययस्य पदैकदेशत्वात्प्रातिपदिकाधीनात्वेनोत्कर्षकत्वायोगादिति तु सूत्रार्थः । एवमत्रापि प्रधानश्रुतिविरोधे गुणभूतसूत्राण्यन्याय्यादिभिर्नेयानीति भावः ।

(२) अपराण्यपीति भाष्यं येषु सूत्रेषु व्याख्यातिदिष्टा तान्यल्पवक्तव्यत्वात्पथमं योजयति यत्सत्यमिति ।

(३) कारणहेतुमाह नहीति । आनन्दमयस्तावद्विकारस्तदवयवो ब्रह्मापि परिच्छिन्नत्वाद्विकारः स्यात्तथाभूतं च कथं विश्वहेतुरित्यर्थः । (४) विचारप्रयोजनमाह तस्मादिति ।

(५) समन्वयस्य सविशेषपरत्वमपोद्यानन्दमयाधिकरण उत्सर्गः स्थापितः । इदानीमपवादचिन्तार्थत्वेनाधिकरणमवतारयन् प्रघट्टकसङ्गतिमाह पूर्वस्मिन्निति ।

लब्धोत्कर्षो जीवात्मादित्यपदवेदनयि इति निर्णीयते । तत्र

(१)मर्यादाधाररूपाणि संसारिणि परे न तु ।
तस्मादुपास्यः संसारी कर्मानधिकृतो रविः ॥

हिरण्यश्मश्रुरित्यादिरूपश्रवणाद् , 'य एषोऽन्तरादित्ये य एषोऽन्तरक्षिणीति' चाधारभेदश्रवणाद् । 'ये (२)चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चे'त्यैश्वर्यमर्यादाश्रुतेश्च संसार्येव कार्यकारणसङ्घातात्मको रूपादिसम्पन्न इहोपास्यो, न तु परमात्मा 'अशब्दमस्पर्श'मित्यादिश्रुतिभिरपास्तसमस्तरूपश्च 'स्वे महिम्नी'त्यादिश्रुतिभिरपाकृताधारश्च 'एष सर्वेश्वर' इत्यादिश्रुतिभिरधिगतनिर्मर्यादैश्वर्यश्च शक्य उपास्यत्वेनेह प्रतिपत्तुम् । सर्वपाप्मविरहश्चादित्यपुरुषे सम्भवति, शास्त्रस्य मनुष्याधिकारतया देवतायाः पुण्यपापयोरनधिकारात् । रूपादिमत्त्वान्यथानुपपत्त्या च कार्यकारणात्मके जीवे उपास्यत्वेन विवक्षिते यत्तावदगाद्यात्मकतयाऽस्य सर्वात्मकत्वं श्रूयते तत्कथंचिदादित्यपुरुषस्यैव स्तुतिरित्यादित्यपुरुष एवोपास्यो न परमात्मेत्येवं प्राप्तम् । अनाधारत्वे च नित्यत्वं सर्वगतत्वं च हेतुः, अनित्यं हि कार्यं कारणाधारमिति नानाधारम् । (३)नित्यमप्यसर्वगतं यत्तस्मादधरभावेनावस्थितं तदेव तस्योत्तरस्याधार इति नानाधारं तस्मादुभयमुक्तम् ।

एवं प्राप्तेऽभिधीयते–"अन्तरस्तद्धर्मोपदेशात्' (पृ० २२९ पं० ७) ।

(४)सावात्म्यसर्वदुरितविरहाभ्यामिहोच्यते ।
ब्रह्मैवाव्यभिचारिभ्यां सर्वहेतुर्विकारवत् ॥

(५)नामनिरुक्तेन हि सर्वपाप्मापादानतयास्योदय उच्यते । न चादित्यस्य देवतायाः कर्मानधिकारेऽपि सर्वपाप्मविरहः प्राग्भवीयधर्माधर्मरूपपाप्मसम्भवे सति । न चैतेषां प्राग्भवीयो धर्म एवास्ति न पाप्मेति साम्प्रतम् । विद्याकर्मातिशयसमुदाचारेऽप्यनादिभवपरम्परोपार्जितानां पाप्मनामपि प्रसुप्तानां(६) सम्भवात् । न च—श्रुतिप्रामाण्यादादित्यशरीराभिमानिनः सर्वपाप्मविरह–इति युक्तम् । ब्रह्मविषयत्वेनाप्यस्याः प्रामाण्योपपत्तेः । न च विनिगमनायां हेत्वभावः, तत्रतत्र सर्वपाप्मविरहस्य भूयोभूयो ब्रह्मण्येव श्रवणात् , तस्यैव चेह

---

(१) 'अथ य एषोऽन्तरादित्य' इत्यादिश्रुतौ रूपवत्त्वसर्वपापविरहाभ्यां संसारी ईश्वरो वा उपास्य इति संशये पूर्वत्र मुख्यत्रितयाख्यबहुप्रमाणानुसारात्त्रिविशेषानिश्चयवत् रूपवत्त्वादिप्रमाणवशात्संसारी हिरण्मयः पुरुष उपास्य इत्यवान्तरसंगतिमभिप्रेत्य पूर्वपक्षं संकलयति मर्यादेति । सर्वपाप्मविरहस्यान्यथासिद्धिमाह कर्मेति । (२) अमुष्मादादित्यादित्यर्थः ।

(३) तर्हि तत एवानाधारत्वसिद्धौ किं सर्वगतत्वेन हेतुनेत्यत आह नित्यमपीति । नित्यमप्यसर्वगतं तत्र भवत्यनाधारं, यतो यद्वस्तु तस्मान्नित्यादाधारभावेनावस्थितं तदेव तस्य नित्यस्योपरिस्थस्याधारो भवति तस्मात्सर्वगतत्वमपि नित्यत्वविशेषणमनाधारत्वे हेतुर्वाच्य इत्यर्थः ।

(४) सावात्म्येति । ब्रह्मणोऽन्यत्रासम्भवाद्व्यभिचारिभ्यां सावात्म्यसर्वदुरितरहित्याभ्यां ब्रह्मैवात्रोपास्यम्, तच्च ब्रह्म सर्वविकारहेतुर्विकारयुक्तं चातो रूपवत्त्वस्य हेतोर्ब्रह्मणि सम्भवाद्व्यभिचार इति भावः ।

(५) सर्वदुरितविरहमुदाहृतवाक्येनापि प्रमाणयति नामेति । 'सर्वेभ्यः पाप्मभ्य उदित' इति छान्दोग्यश्रुतिस्थपाप्मभ्य इति पञ्चम्यपि अपादाने, ततश्च सर्वे पाप्मानोऽपादानं यस्योदयस्य तस्य भावस्तत्ता तद्रूपेणोदय उद्गम उच्यत इत्यर्थः । (६) अव्यक्तानाम् ।

प्रत्यभिज्ञायमानस्य विनिगमनाहेतोर्विद्यमानत्वात् । अपि च सार्वात्म्यं जगत्कारणस्य ब्रह्मण एवोपपद्यते, कारणादभेदात्कार्यजातस्य, ब्रह्मणश्च जगत्कारणत्वात् । आदित्यशरीराभिमानिनस्तु जीवात्मनो न जगत्कारणत्वम् । न च मुख्यार्थसम्भवे प्राशस्त्यलक्षणया स्तुत्यर्थता युक्ता । रूपवत्त्वं चास्य परानुग्रहाय कार्यनिर्माणेन वा, तद्विकारतया वा सर्वस्य कार्यजातस्य, विकारस्य च विकारवतोऽनन्यत्वात्तादृशरूपभेदेनोपदिश्यते, यथा 'सर्वगन्धः सर्वरस' इति । (१)न च ब्रह्मनिर्मितं मायारूपमनुवदच्छास्त्रमशास्त्रं भवति, अपि तु तां कुर्वदिति नाशास्त्रत्वप्रसङ्गः । यत्र तु ब्रह्म निरस्तसमस्तोपाधिभेदं ज्ञेयत्वेनोपक्षिप्यते, तत्र शास्त्र'मशब्दमस्पर्शमरूपमव्ययमि'ति प्रवर्तते । तस्माद्रूपवत्त्वमपि परमात्मन्युपपद्यते । एतेनैव मर्यादाधारभेदावपि व्याख्यातौ । अपि चादित्यदेहाभिमानिनः संसारिणोऽन्तर्यामी भेदेनोक्तः स एवान्तरादित्य इत्यन्तःश्रुतिसाम्येन प्रत्यभिज्ञायमानो भवितुमर्हति । **"तस्मात्ते धनसनय" इति** । पृ० २३१ पं० १२) । धनवन्तो विभूतिमन्त इति यावत् । कस्मात्पुनर्विभूतिमत्त्वं परमेश्वरपरिग्रहे घटत इत्यत आह—**"यद्यद्विभूतिमदि"ति** (पृ० २३२ पं० १) । (२)सर्वात्मकत्वेऽपि विभूतिमत्त्वेव परमेश्वरस्वरूपाभिव्यक्तिः, न त्वविद्यातमःपिहितपरमेश्वरस्वरूपेष्वविभूतिमत्स्वित्यर्थः । **"लोककामेशितृत्वमपी"ति** । अतोऽन्तापारार्थ्यन्यायेन(३)निरङ्कुशमैश्वर्यमित्यर्थः ॥ २० ॥

सू० भेदव्यपदेशाच्चान्यः ॥ २१ ॥

आकाशस्तल्लिङ्गात् ॥ २२ ॥

(४)पूर्वस्मिन्नधिकरणे ब्रह्मणोऽसाधारणधर्मदर्शनाद्विवक्षितोपाधिनोस्यैवोपासना; न त्वादित्यशरीराभिमानिनो जीवात्मन इति निरूपितम् । इदानीं त्वसाधारणधर्मदर्शनात् तदेवोद्वीथे सम्पाद्योपास्यत्वेनोपदिश्यते, न भूताकाश इति निरूप्यते। (५)तत्र'आकाश इति होवाचे'ति किं मुख्याकाशपदानुरोधेन'अस्य लोकस्य का गति'रिति च 'सर्वाणि ह वा इमानि भूतानी'ति च 'ज्यायानि'ति च 'परायण'मिति च कथंचिद्व्याख्यायतामुतैतदनुरोधेनाकाशशब्दो भक्त्या परात्मनि व्याख्यायतामिति । तत्र—

(६)प्रथमत्वात्प्रधानत्वादाकाशं मुख्यमेव नः ।
तदानुगुण्येनान्यानि व्याख्येयानीति निश्चयः ॥

---

(१) नन्वविकारिब्रह्मणो मायामयं रूपं वक्तव्यं ततश्च मिथ्यार्थप्रकाशकतया शास्त्राप्रामाण्यमत आह नचेति । अपित्विति । तां-मायां मिथ्याबुद्धिं, कुर्वत् अशास्त्रं स्यान्तु तां करोति तस्याः प्रागेव सिद्धत्वादिति नाशास्त्रत्वप्रसङ्ग इत्यर्थः ।

(२) विभूतिमत्स्वेवेश्वरावस्थाने सार्वात्म्यविरोधमाशंक्याभिव्यक्तिमात्रं तत्र, सत्ता तु सर्वत्रेत्याह सर्वेति ।

(३) लोककामेशितृत्वश्रवणादेव मनुष्यैरीश्वराज्ञां विनाऽशितुमपि न शक्यमित्यन्तः पारार्थ्यन्यायः ।

(४) लिङ्गाद्ब्रह्मनिर्णयस्य तुल्यत्वात्पुनरुक्तिमाशंक्याह पूर्वस्मिन्निति । श्रुतिप्रातनभसो लिङ्गेन बाधार्थो न्यायोऽधिक इत्यर्थः । इदमेवाह न भूताकाश इत्यादिना । (५) संशयं प्रदर्शयति तत्रेति ।

(६) आकाशशब्दवाच्यमत्र भूताकाशं ब्रह्म वेति संशये पूर्वपक्षसंग्रहकारिकामाह प्रथमत्वादिति । प्रथमावगतत्वात्प्रधानत्वाच्चात्र मुख्यमाकाशमेव नोऽस्माकमिष्टं । अन्यान्यपि वाक्यानि भूताकाशानुरोधेनैव व्याख्येयानीति श्लोकार्थः ।

(१)'अस्य लोकस्य का गतिरि'ति प्रश्नोत्तरे 'आकाश इति होवाचे'त्याकाशस्य गतित्वेन प्रतिपाद्यतया प्राधान्यात्, (२)'सर्वाणि ह वे'त्यादीनां तु तद्विशेषणतया गुणत्वाद्, 'गुणे-त्वन्याय्यकल्पने'ति बहून्यप्यप्रधानानि प्रधानानुरोधेन नेतव्यानि। (३)अपि च 'आकाश इति होवाचे'त्युत्तरे प्रथमावगतमाकाशपदमनुजातविरोधित्वेन तदनुरक्तायां बुद्धौ यद्यदेव तदेकवाक्यगतमुपनिपतितं तत्तदुपजातविरोधि जघन्यतया तदानुगुण्येनैव व्यवस्थातुमर्हति(४)। (५)न च क्वचिदाकाशशब्दो भक्त्या ब्रह्मणि प्रयुक्त इति सर्वत्र तेन तत्परेण भवितव्यम्, नहि गङ्गायां घोष इत्यत्र गङ्गापदमनुपपत्त्या तीरपरमिति यादांसि गङ्गायामित्यप्याप्यनेन तत्परेण भवितव्यम्। (६)सम्भवश्चोभयत्र तुल्यः। न च ब्रह्मण्यप्याकाशशब्दो मुख्यः, अनेकार्थत्वस्यान्याय्यत्वात्, भक्त्या च ब्रह्मणि प्रयोगोपपत्तेः(७), लोके चास्य नभसि निरूढतरत्वात् तत्पूर्वकत्वाच्च वैदिकार्थप्रतीतेर्वैपरीत्यानुपपत्तेः। तदानुगुण्येन च 'सर्वाणि ह वे'त्यादीनि भाष्यकृता स्वयमेव नीतानि। तस्माद्भूताकाशमेवात्रोपास्यत्वेनोपदिश्यते, न परमात्मेति प्राप्तम्।

एवं प्राप्तेऽभिधीयते—आकाशशब्देन ब्रह्मणो ग्रहणम्, कुतः? तल्लिङ्गात्। तथाहि—

(८)सामानाधिकरण्येन प्रश्नतत्प्रतिवाक्ययोः।
पौर्वापर्यपरामर्शात् प्रधानत्वेऽपि गौणता॥

यद्यप्याकाशपदं प्रधानार्थं तथापि यत् पृष्टं तदेव प्रतिवक्तव्यम्, न खल्वनुन्मत्त आम्रान् पृष्टः कोविदारानाचष्टे। (९)तदि'दास्य लोकस्य का गतिरि'ति प्रश्नो दृश्यमानो नामरूपप्रपञ्चमात्रविषय इति तदनुरोधाद्य एव सर्वस्य लोकस्य गतिः स एवाकाशशब्देन प्रतिवक्तव्यः। न च भूताकाशः सर्वस्य लोकस्य गतिः, तस्यापि लोकमध्यपातित्वात्, तदेव तस्य गतिरित्यनुपपत्तेः। न चोत्तरे भूताकाशश्रवणाद्भूताकाशकार्यमेव पृष्टमिति युक्तम्। प्रश्नस्य प्रथमावगतस्यानुपजातविरोधिनो लोकसामान्यविषयस्योपजातविरोधिनोत्तरेण सङ्कोचानुपपत्तेः, तदनुरोधेनोत्तरव्याख्यानात्। (१०)न च प्रश्नेन पूर्वपक्षरूपेणावस्थितार्थेनोत्तरं व्यवस्थितार्थं न

---

(१) तत्र प्रधानत्वहेतुं व्याचष्टे अस्येति। (२) तदानुगुण्येनेति विवृणोति सर्वाणीति।

(३) प्रथमत्वे हेतुं व्याख्याति अपि चेति।

(४) विरोधि. तेन तदनुरक्तायां बुद्धौ यद्यदेव तदेकवाक्यगतमुपनिपतति तत्तज्जघन्यतया उपलक्षणविरोधि तदानुगुण्येनैव व्यवस्थानमर्हति इति मु. मु. पु. पाठः।

(५) 'यदेष आकाश आनन्द' इत्यादाविव गौण एवाकाशशब्दो ब्रह्मण्यास्ताम् इत्याशंक्याह नचेति। तत्परेण-लक्षणया तीरपरेण।

(६) ननु यादांसीति प्रयोगे गंगापदाभिधेयस्य वाक्यार्थान्वयसम्भवान्मुख्यत्वं नात्विह नभसो वाक्यार्थान्वय आनन्त्याद्ययोगादत आह सम्भवश्चेति। मुख्यानुगुण्येन गुणानां नयनस्योक्तत्वादित्यर्थः।

(७) प्रयोगदर्शनादपपत्तेरिति मु. मु. पु. पाठः।

(८) प्रश्नोत्तरयोरेकार्थपर्यवसानसामर्थ्यलक्षणं लिङ्गमुक्त्वा तल्लिङ्गशब्दार्थमाभिप्रेत्य सिद्धान्तयति सामानाधिकरण्येनेति। प्रश्नोत्तरयोरेकार्थवृत्तित्वेनार्थतः शब्दतश्च पूर्वापरत्वेनानुसन्धानादसङ्गतविरोधप्रश्नानुसारेणोत्तरं नेयम्। आकाशपदस्य प्रधानार्थत्वेऽपि गौणता, अपिशब्दान्न नभसः प्रधानत्वमपि तु पृष्टस्य सर्वकारणस्येत्यर्थः। (९) प्रश्नोत्तरयोरेकविषयत्वं नभस्येवास्त्वित्याशंक्याह तदिहेति।

(१०) ननु निर्णीतार्थं उपक्रम उपसंहारमन्यथयेन्न प्रश्नोपक्रमः सन्दिग्धार्थत्वादिति तत्राह नचेति। प्रश्नः स्वविषये व्यवस्थित एव न चेत् तत्र वक्तव्यं स निर्विषयः पृष्टादन्यविषयो वा? नाद्य इत्याह अनालम्बनत्वेति। न द्वितीय इत्याह वैयधिकरण्येति।

शक्यं नियन्तुमिति युक्तम्। तन्निमित्तानामज्ञानसंशयविपर्यासानामनवस्थानेऽपि तस्य स्वविषये व्यवस्थानात्, अन्यथोत्तरस्यानालम्बनत्वापत्तेर्वैयधिकरण्यापत्तेर्वा। (१)अपि चोत्तरेऽपि बहु समञ्जसम्। तथाहि—'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' इति सर्वशब्दः कथञ्चिदरूपविषयो व्याख्येयः। एवमेवकारोऽप्यसमञ्जसः। न खल्वपामाकाश एव कारणम् अपि तु तेजोऽपि। एवमन्नस्यापि नाकाशमेव कारणम् अपि तु पावकपार्थसी अपि। मूलकारणविवक्षायां तु ब्रह्मण्येवावधारणं समञ्जसम्। असमञ्जसं तु भूताकाशम्। एवं सर्वेषां भूतानां लयो ब्रह्मण्येव। एवं सर्वेभ्यो ज्यायस्त्वं ब्रह्मण एव। परमयनं ब्रह्मैव। तस्मात्सर्वेषां लोकानामिति प्रश्नेनोपक्रमाद् उत्तरे च तत्तदसाधारणब्रह्मगुणपरामर्शात् पृष्टायाश्च गतेः परमयनमित्यसाधारणब्रह्मगुणोपसंहाराद् भूयसीनां श्रुतीनामनुग्रहाय 'त्यजेदेकं कुलस्यार्थे' इतिवद्वरमाकाशपदमात्रमसमञ्जसमस्तु। एतावता हि बहु समञ्जसं स्यात्। (२)न चाकाशस्य प्राधान्यमुत्तरे, किन्तु पृष्टार्थत्वादुत्तरस्य लोकसामान्यगतेश्च पृष्टत्वात् 'परायणमि'ति च तस्यैवोपसंहाराद्ब्रह्मैव प्रधानम्। (३)तथा च तदर्थं सदाकाशपदं प्रधानार्थं भवति, नान्यथा। तस्माद्ब्रह्मैव प्रधानमाकाशपदेनेहोपास्यत्वेनोपक्षिप्तं, न भूताकाशमिति सिद्धम्। "अपि च अस्यैवोपक्रमेऽन्तवत्किल ते सामे (४)'त्यन्तवत्त्वदोषेण शालावत्यस्ये"ति (पृ० २३५ पं० ९)। न चाकाशशब्दो गौणोऽपि विलम्बितप्रतिपत्तिः, तत्रतत्र ब्रह्मण्याकाशशब्दस्य तत्पर्यायस्य च प्रयोगप्राचुर्यादत्यन्ताभ्यासेनास्यापि मुख्यवत्प्रतिपत्तेरविलम्बनादिति दर्शनार्थं ब्रह्मणि प्रयोगप्राचुर्यं वैदिकं निदर्शितं भाष्यकृता। (५)तत्रैव च प्रथमावगतानुगुण्यनोत्तरं नीयते, यत्र तदन्यथा कर्तुं शक्यम्, यत्र तु न शक्यं तत्रोत्तरानुगुण्येनैव प्रथमं नीयत इत्याह—'वाक्योपक्रमेपी'ति (पृ० २३६ पं० ८) ॥२१॥२२॥

(सू०) अत एव प्राणः ॥ २३ ॥

'उद्गीथे या देवता प्रस्तावमन्वायत्ते'त्युपक्रम्य श्रूयते—'कतमा सा देवतेति प्राण इति होवाचोषस्तिश्चाक्रायणः'। (६)उद्गीथोपासनप्रसङ्गेन प्रस्तावोपासनमप्युद्गीथ इत्युक्तं भाष्यकृता। प्रस्ताव इति साम्नो भक्तिविशेषस्तमन्वायत्ता अनुगता प्राणो देवता। अत्र प्राणशब्दस्य

---

(१) एवं तन्निमित्तादिति सौत्रहेतुवचनस्य प्रश्नप्रतिवचनवाक्यसामर्थ्यरूपमर्थं व्याख्याय वाक्यशेषस्थलिङ्गपरतया व्याख्यान्तरमाहापिचेत्यादिना।

(२) ननु साम्ये विरोधिनां भूयसां न्याय इह तु प्रधानमाकाशशब्दार्थो नाप्रधानैर्भूयोभिरपि बाध्येत, यदाह कश्चित्—'त्यजेदेकं कुलस्यार्थे' इति वाद्धान्तयन्ति ये। शेषिबाधे न तैर्दृष्टमात्मार्थे पृथिवीमिति॥ तत्राह न चाकाशस्येति।

(३) ननु शेष्यर्थत्वादाकाशपदं प्रधानार्थमत आह तथाचेति। उपक्रान्तं प्रधानं ब्रह्म विशिष्यनाकाशशब्दः प्रधानार्थो न तु गगनमभिदधदित्यर्थः।

(४) इयं शालावत्यप्रतिज्ञातस्यैतल्लोकस्यान्तवत्त्वप्रतिपादिका श्रुतिर्बोध्या।

(५) प्रतिवचनेपि वाक्यशेषगताऽनन्यथासिद्धब्रह्मलिङ्गादाकाशपदं गौणमिति भाष्यार्थमाह तत्रैव चेति।

(६) यद्यपि विषयप्रदर्शकभाष्ये उद्गीथ इत्येवोक्तं, तथापि तदुद्गीथप्रकरणे प्रासङ्गिकं प्रस्तावोपासनमिति कथयितुमित्याह उद्गीथेति। पुरस्ताद्धि परोवरीयांसमुद्गीथमुपास्ते इत्युक्तं, परस्ताच्चाथातः शौक्लयमुद्गीथ इति अतः प्रस्तावोपवाक्यं यद्यपि विषयस्तथापि प्रकरणशुद्ध्यर्थमुद्गीथग्रहणमित्यर्थः।

ब्रह्मणि वायुविकारे च दर्शनात्संशयः--किमयं ब्रह्मवचन उत वायुविकारवचन इति । तत्रात एव ब्रह्मलिङ्गादेव प्राणोपि ब्रह्मैव न वायुविकार इति युक्तम् । यद्येवं तेनैव गतार्थमेतदिति कोऽधिकरणान्तरारम्भार्थः ? तत्रोच्यते—

अर्थे श्रुत्यैकगम्ये हि श्रुतिमेवाद्रियामहे ।
मानान्तरावगम्ये तु तद्वशात्तद्व्यवस्थितिः ॥

(१)ब्रह्मणो वा सर्वभूतकारणत्वमाकाशस्य वा वाय्वादिभूतकारणत्वं प्रति नाऽऽगमादृते मानान्तरं प्रभवति । तत्र पौर्वापर्यपर्यालोचनया यत्रार्थे समञ्जस आगमः स एवार्थस्तस्य गृह्यते, त्यज्यते चेतरः । (२)इह तु संवेशनोद्गमने भूतानां प्राणं प्रत्युच्यमाने किं ब्रह्म प्रत्युच्येते, आहो वायुविकारं प्रतीति विशये 'यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति' इत्यादिकायाः श्रुतेः सर्वभूतसारेन्द्रियसंवेशनोद्गमनप्रतिपादनद्वारा सर्वभूतसंवेशनोद्गमनप्रतिपादिकाया मानान्तरानुग्रहलब्धसामर्थ्याया बलात्संवेशनोद्गमने वायुविकारस्यैव प्राणस्य, न ब्रह्मणः । अपि चात्रोद्गीथप्रतिहारयोः सामभक्त्योर्ब्रह्मणोऽन्ये आदित्यश्चाक्षं च देवते अभिहिते कार्यकरणसङ्घातरूपे(३), तत्साहचर्यात् प्राणोपि कार्यकारणसङ्घातरूप एव देवता भवितुमर्हति । निरस्तोप्ययमर्थ ईक्षत्यधिकरणे पूर्वोक्तपूर्वपक्षहेतूपोद्बलनाय पुनरुपन्यस्तः । तस्माद्वायुविकार एवात्र प्राणशब्दार्थ इति प्राप्तम् ।

एवं प्राप्तेऽभिधीयते—

(४)पुंवाक्यस्य बलीयस्त्वं मानान्तरसमागमात् ।
अपौरुषेये वाक्ये तत्सङ्गतिः किं करिष्यति ॥

नो खलु स्वतःसिद्धप्रमाणभावमपौरुषेयं वचः स्वविषयज्ञानोत्पादे वा तद्व्यवहारे वा मानान्तरमपेक्षते, तस्यापौरुषेयस्य निरस्तसमस्तदोषाशङ्कस्य (५)स्वत एव निश्चायकत्वात्, निश्चयपूर्वकत्वाद्व्यवहारप्रवृत्तेः। (६)तस्मादसंवादिनो वा चक्षुष इव रूपे त्वगिन्द्रियसंवादिनो वा तस्यैव द्रव्ये

---

(१) अर्थे इत्यादि पूर्वार्धं व्याचष्टे ब्रह्मण इति । न ह्याकाशाद्वायूदयः प्रत्यक्षयोग्योऽतो वाक्यशेषाद्ब्रह्मनिर्णयो व्यक्त इत्यर्थः ।

(२) उत्तरार्धं विवृणोति इह त्वित्यादिना । इह-'सर्वाणि ह वै'ति वाक्ये । सर्वेति । भोगप्रत्यासत्तेरिन्द्रियाणां भूतसारत्वम्, ततः प्रधानेन सर्वभूतलक्षणया भूतोत्पत्तिलयौ वायाविति प्रत्यक्षानुगृहीतया श्रुत्योक्तम्, तस्याः संवादलब्धबलाया बलात्सर्वाणीति वाक्यं वायुविकारपरं व्याख्येयमित्यर्थः ।

(३) शरीरिण्यौ । तत्साहचर्यादिति । तथा चात्रप्रसङ्गपाठाच्च प्राणो न ब्रह्मेति भावः ।

(४) प्राणशब्दस्य ब्रह्मपरत्वं सिद्धान्तयन् सिद्धान्तसारसङ्ग्रहकारिकामाह पुंवाक्यस्येति । पौरुषेयमेव वाक्यं प्रत्यक्षादिना प्राप्तबलं भवति, अपौरुषेये तु वाक्ये प्रत्यक्षादिकमकिंचित्करमिति श्लोकतात्पर्यम् । इदमेवाह नो खल्वित्यादिना ।

(५) स्वत इति । स्वत एव निश्चायकत्वात्स्वविषयज्ञानोत्पादे मानान्तरं नापेक्षते, तथा निश्चयपूर्वकत्वाद्व्यवहारस्य स्वविषयव्यवहारेऽपि मानान्तरं नापेक्षत इति योजना ।

(६) तस्मादिति । असंवादिनो वाक्यस्य स्वविषये नादार्ढ्यं रूप इव चक्षुषः, त्वगिन्द्रियसंवादिनो न दार्ढ्यं चक्षुष इव द्रव्ये इति योजनीयम् । तेन—येन प्रमाणानां संवादविसंवादावप्रयोजकौ तेन, 'यदा वै पुरुष' इति वाक्यादिन्द्रियमात्रस्य सुप्तिसमये वायुविकारे संवेशनोद्गमने भवेताम् न त्वेतावता सर्वभूतोत्पत्तिलयौ तदाश्रयौ योजयितुं शक्यौ तयोस्तत्र वाक्ये प्रतीत्यभावादित्यर्थः ।

नादार्ढ्यं दार्ढ्यं वा, तेन स्तामिन्द्रियमात्रसंवेशनोद्गमने वायुविकारे प्राणे, सर्वभूतसंवेशनोद्गमने तु न ततो वाक्यात्प्रतीयते । प्रतीतौ वा तत्रापि प्राणो ब्रह्मैव भवेन्न वायुविकारः । 'यदा सुप्तः स्वप्न न कं चन पश्यत्यथास्मिन्प्राण एवैकधा भवती'त्यत्र वाक्ये यथा प्राणशब्दो ब्रह्मवचनः । न चास्मिन् वायुविकारे सर्वेषां भूतानां संवेशनोद्गमने मानान्तरेण दृश्येते । न च मानान्तरसिद्धसंवादेन्द्रियसंवेशनोद्गमनवाक्यदार्ढ्यात् सर्वभूतसंवेशनोद्गमनवाक्यं कथंचिदिन्द्रियविषयतया व्याख्यानमर्हति, स्वतःसिद्धप्रमाणभावस्य स्वभावदृढस्य मानान्तरानुपयोगात् । न चास्य तेनैकवाक्यता(१), एकवाक्यतायां च तदपि ब्रह्मपरमेव स्यादित्युक्तम् । इन्द्रियसंवेशनोद्गमनं त्ववयुत्यवादेनापि(२) घटिष्यते, 'एकं वृणीते द्वौ वृणीत' इतिवत् , न तु सर्वशब्दार्थः सङ्कोचमर्हति । तस्मात्प्रस्तावभक्तिं प्राणशब्दाभिधेयब्रह्मदृष्ट्योपासीत, न वायुविकारदृष्ट्येति सिद्धम् । तथा चोपासकस्य प्राणप्राप्तिः कर्मसमृद्धिर्वा फलं भवतीति । **"वाक्यशेषबलेने"ति** (पृ० २३९पं० २) । (३)वाक्यात्सन्निधानं दुर्बलमित्यर्थः । उदाहरणान्तरं तु निगदव्याख्यानेन भाष्येण दूषितम् ॥ २३ ॥

(सू०) ज्योतिश्चरणाभिधानात् ॥ २४ ॥

इदमामनन्ति—'अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतःपृष्ठेषु सर्वतःपृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तःपुरुषे ज्योति'रिति । (४)यज्ज्योतिरतो दिवो द्युलोकात्परं दीप्यते प्रकाशते विश्वतःपृष्ठेषु विश्वेषामुपरि । असङ्कुचद्वृत्तिरयं विश्वशब्दोऽनवयवेन संसारमण्डलं ब्रूत इति दर्शयितुमाह—**'सर्वतःपृष्ठेषूत्तमेषु'** (पृ० २४० पं० १) । न चेदमुत्तममात्रमपि तु सर्वोत्तममित्याह—**'अनुत्तमेषु'** । नास्त्येभ्योऽन्य उत्तम इत्यर्थः । 'इदं वाव तद्यदिदमस्मिन्पुरुषेऽन्तर्ज्योति'(५)स्त्वग्ग्राह्येण शारीरेणोष्मणा श्रोत्रग्राह्येण च पिहितकर्णेन पुंसा घोषेण लिङ्गेनानुमीयते । तत्र शारीरस्योष्मणस्त्वचा दर्शनं दृष्टिः, घोषस्य च श्रवणं श्रुतिः, तयोश्च दृष्टश्रुती ज्योतिष एव, (६)तल्लिङ्गेन तदनुमानादिति। अत्र संशयः—किं ज्योतिःशब्दं तेज उत ब्रह्मेति । किं तावत् प्राप्तं, तेज इति । कुतः? (७)गौणमुख्यग्रहणविशये मुख्यग्रहणस्य

---

(१) 'यदा वै पुरुष' इत्यस्य सम्बर्गविद्यागतत्वात् 'सर्वाणि ह वे'त्यस्य चोद्गीथविद्यागतत्वान्नैकवाक्यतासम्भव इत्यर्थः ।

(२) अवयुत्यवादः—विभज्य कथनम् । अवयुत्यानुवादेनापीति पाठान्तरम् ।

(३) इह हि स्ववाक्ये ब्रह्मलिङ्गं दृश्यतेऽत्रादित्यसंनिधानं वाक्यान्तरसापेक्षमतः स्ववाक्यस्थलिङ्गं प्रबलमिति भाष्यार्थमाह वाक्यादिति ।

(४) अथेत्यादि छान्दोग्यस्थविषयश्रुतेरर्थमाह यज्ज्योतिरिति ।

(५) यदिदमित्यनुभूयमानत्वमुक्तं तद्व्याचष्टे त्वग्ग्राह्येणेति ।

(६) नन्वौष्ण्यघोषोपलब्ध्योः कथं तस्येति ज्योतिःसम्बन्धनिर्देशोऽत आह तल्लिङ्गेनेति । औष्ण्यघोषलिङ्गेनेत्यर्थः । गमकसम्बन्धिनोर्गम्यसम्बन्धोपचार इत्यर्थः ।

(७) गौणेत्यादि षष्ठ्यन्तस्य श्लोकेऽन्वयः । तथाच गौणमुख्योभयग्रहणविषये मुख्यार्थग्रहणस्य प्रायिकत्वाद्वाक्ये च तेजोलिङ्गस्यैवोपलब्धेर्वाक्यान्तरस्थलिङ्गेनानियमात्तदर्थाप्रतिसन्धानाच्च ज्योतिःशब्दोऽत्र तेजोग्राहक इति श्लोकार्थो बोध्यः ।

औत्सर्गिकत्वाद्वाक्यस्थतेजोलिङ्गोपलम्भनात् ।
वाक्यान्तरेणानियमात्तदर्थाप्रतिसंधितः ॥

(१)बलवद्बाधकोपनिपातेन खल्वाकाशप्राणशब्दौ मुख्यार्थत्वात् प्रत्याख्यान्यत्र प्रतिष्ठापितौ । तदिह ज्योतिष्पदस्य मुख्यतेजोवचनत्वे बाधकस्तावत्स्ववाक्यशेषो नास्ति । प्रत्युत तेजोलिङ्गमेव 'दीप्यते' इति, कौक्षेयज्योतिःसारूप्यं च चक्षुष्यो रूपवान् श्रुतो विश्रुतो भवतीत्यल्पफलत्वं च स्ववाक्ये श्रूयते । न जातु ज्वलनापरनामा दीप्तिर्विना तेजो ब्रह्मणि सम्भवति । न कौक्षेयज्योतिःसारूप्यमृते बाह्यात्तेजसो ब्रह्मण्यस्ति । न चौष्ण्यघोपलिङ्गदर्शनश्रवणमौदर्यात्तेजसोऽन्यत्र ब्रह्मण्युपपद्यते । न च महाफलं ब्रह्मोपासनमणीयसे फलाय कल्पते । औदर्ये तु तेजस्यध्यस्य बाह्यं तेज उपासनमेतत्फलानुरूपं युज्यते । तदेततेजोलिङ्गम् । एतदुपोद्बलनाय च निरस्तमपि मर्यादाधारवत्त्वमुपन्यस्तम्, (२)इह तन्निरासकारणाभावात् । न च मर्यादावत्त्वं तेजोरशेर्न सम्भवति, तस्य सौर्यादेः सावयवत्वेन तदेकदेशमर्यादासम्भवात्, (३)तस्य चोपास्यत्वेन विधानात्, ब्रह्मणस्त्वनवयवस्यावयवोपासनानुपपत्तेः, अवयवकल्पनायाश्च सत्यां गतावनवकल्पनात् । (४)न च

'पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि'

इति ब्रह्मप्रतिपादकं वाक्यान्तरं, 'यदतः परो दिवो ज्योतिरि'ति ज्योतिःशब्दं ब्रह्मणि व्यवस्थापयतीति युक्तम्, नहि सन्निधानमात्राद् वाक्यान्तरेण वाक्यान्तरगता श्रुतिः शक्या मुख्यार्थाच्च्यावयितुम् । (५)न च वाक्यान्तरेऽधिकरणत्वेन द्यौः श्रुता दिव इति मर्यादाश्रुतौ शक्या प्रत्यभिज्ञातुम् । (६)अपि च वाक्यान्तरस्यापि ब्रह्मार्थत्वं प्रसाध्यमेव नाद्यापि सिध्यति तत्कथं तेन नियन्तुं ब्रह्मपरतया 'यदतः पर' इति वाक्यं शक्यम् । तस्मात्तेज एव ज्योतिर्न ब्रह्मेति प्राप्तम् । (७)तेजःकथनप्रस्तावे तमःकथनं प्रतिपक्षोपन्यासेन प्रतिपक्षान्तरे दृढा प्रतीतिर्भवतीत्येतदर्थम् । चक्षुर्वृत्तेर्निरोधकमित्यर्थावरकत्वेन(८)। आक्षेपाऽऽह—"ननु कार्यस्यापी"ति । समाधातैकदेशी (९)ब्रूते—"अस्तु तर्ही"ति । यत्तेजोबन्नाभ्यामसंपृक्तं

---

(१) वाक्यस्थेति श्लोकोक्तहेतुं व्याचष्टे बलवदिति । तत्र हि वाक्यशेषस्थब्रह्मलिङ्गानौपनताऽत्र तु वाक्ये ब्रह्मलिङ्गं नोपलभ्यते प्रत्युत तेजोलिङ्गमेवेति उत्सर्गो आकाशप्राणशब्दवन्नापोदायितुं शक्य इत्यर्थः ।

(२) किमुपोद्बलनाय निरासार्थं वोपन्यस्तमत आह इहेति । निरासकारणं हि प्राप्तिः, न चान्तस्तद्धर्मोपदेशादिति निरस्तस्यात्र प्राप्तिरित्यर्थः ।

(३) भवत्वेकदेशस्य मर्यादा न समस्तस्येत्याशंक्याह तस्य चेति । न समस्तं तेज उपास्यं किन्त्ववयव इत्यर्थः ।

(४) वाक्यान्तरेणानियमादिति श्लोकोक्तहेतुं व्याचष्टे न च पादोऽस्येति ।

(५) तदर्थाप्रतिसंधित इति हेतुं व्याकुर्वन्नाह न चेति ।

(६) अस्यैव हेतोर्व्याख्यान्तरमाहापि चेति । तेन-वाक्यान्तरेण, यदतःपरमिति वाक्यं ब्रह्मपरतया नियन्तुं कथं शक्यमिति योजना ।

(७) तमोज्योतिरिति भाष्ये तमोग्रहणप्रयोजनमाह तेज इति ।

(८) अर्थावरकत्वेनेति । अनुद्भूतस्पर्शवत्त्वेन तमसो नयनरश्मिनिर्गमनप्रतिबन्धकत्वायोगादर्थप्रकाशनप्रतिबन्धकत्वेन निरोधकत्वं तमस इत्यर्थः । आक्षेपः—सिद्धान्ती ।

(९) एकदेशी—पूर्वपक्ष्येकदेशी ।

तदत्रिवृत्कृतमुच्यते । आक्षेप्ता दूषयति—"ने"ति । नहि तत् क्वचिदप्युपयुज्यते, सर्वास्वर्थक्रियासु त्रिवृत्कृतस्यैवोपयोगादित्यर्थः । एकदेशिनः शङ्कामाह—"इदमेवे"ति (पृ० २४१ पं० १) । आक्षेप्ता निराकरोति—"न, प्रयोजनान्तरे"ति । (१)'एकैकां त्रिवृतं त्रिवृतं करवाणी'ति तेजःप्रभृत्युपासनामात्रविषया श्रुतिर्न सङ्कोचयितुं युक्तेत्यर्थः । एवमेकदेशिनि दूषिते परमसमाधाता पूर्वपक्षी ब्रूते—"अस्तु तर्हि त्रिवृत्कृतमेवे"ति । "भागिनी" युक्ता । यद्यप्याधारबहुत्वश्रुतिर्ब्रह्मण्यपि कल्पितोपाधिनिबन्धना कथञ्चिदुपपद्यते, तथापि यथा कार्ये ज्योतिष्यतिशयेनोपपद्यते न तथाऽत्रेत्यत उक्तम् "उपपद्यतेतरामि"ति । "प्राकृतं" (पृ० २४२ पं० १०) प्रकृतेर्जातं, कार्यमिति यावत् ।

एवं प्राप्ते, उच्यते—

(२)सर्वनामप्रसिद्धार्थं प्रसाध्यार्थविघातकृत् ।
प्रसिद्ध्यपेक्षि सत्पूर्ववाक्यस्थमपकर्षति ॥
तद्बलात्तेन नेयानि तेजोलिङ्गान्यपि ध्रुवम् ।
ब्रह्मण्येव, प्रधानं हि ब्रह्म च्छन्दो न तत्र तु ॥

(३)औत्सर्गिक तावद्यदः प्रसिद्धार्थानुवादकत्वं यद्विधिविभक्तिमप्यपूर्वार्थावबोधनस्वभावात्प्रच्यावयति । यथा 'यस्याहिताग्नेरग्निर्गृहान्दहेत्' 'यस्योभयं हविरार्तिमार्च्छेद्' इति । (४)यत्र पुनस्तत्प्रसिद्धमन्यतो न कथंचिदाप्यते, तत्र वचनानि त्वपूर्वत्वादिति सर्वनाम्नः प्रसिद्धार्थत्वं बलादपनयिते । यथा 'यदाग्नेयोष्टाकपालो भवती'ति । (५)तदिह 'यदतः परो दिवो ज्योतिरि'ति यच्छब्दसामर्थ्याद् द्युमर्यादेनापि ज्योतिषा प्रसिद्धेन भवितव्यम् । न च तस्य प्रमाणान्तरतः प्रसिद्धिरस्ति । पूर्ववाक्ये च द्युसम्बन्धि त्रिपाद्ब्रह्म प्रसिद्धमिति प्रसिद्ध्यपेक्षायां तदेव सम्बध्यते । (६)न च प्रधानस्य प्रातिपदिकार्थस्य तत्त्वेन प्रत्यभिज्ञाने तद्विशेषणस्य विभक्त्यर्थ-

---

(१) त्रिवृतं त्रिवृतमिति भाष्यं व्याचष्टे एकैकामिति । तेजआदिभूतं प्रति सामान्यतः प्रवृत्ता त्रिवृत्करणश्रुतिरुपास्यमानतेजोविषयत्वेन संकोचयितुं न युक्ता, ततोऽन्यत्र नेतुमयुक्तेत्यर्थः । त्रिवृतं—त्रिबलितम् ।

(२) न वयं वाक्यान्तरस्थलिङ्गात्तेजःश्रुतिं बाधामहेऽपि तु तदुपबृंहितश्रुत्येत्याह सर्वनामेति । यदादिसर्वनामपदं प्रज्ञातार्थबोधकमज्ञातं सत् अर्थाबोधकमतो यच्छब्दः प्रज्ञातवचनः सन्गायत्रीवाक्यनिर्दिष्टं ब्रह्मैव परामृशतीत्यर्थः । तद्बलादिति । यतः पूर्ववाक्यस्थमपकर्षत्यतो यच्छब्दश्रुतिबलात्तेजोलिङ्गान्यपि वाक्यानि ब्रह्मण्येव नेयानि संगमनीयानि । तत्र गायत्रीवाक्ये प्रातिपदिकार्थो द्यौर्ब्रह्म प्रधानं न तु च्छन्द इति कारिकाद्वयार्थः ।

(३) सर्वनामेति व्याचष्टे औत्सर्गिकमिति । यथेति । अत्र दहेदिति च विधिविभक्तिः प्रसिद्धार्थयच्छब्दोपहता गृहदाहलक्षणनिमित्तपरा, आर्च्छेदिति च 'स ऐन्द्रं पंचशरावमोदनं निर्वपेदि'ति विधास्यमाननिर्वापनिमित्तं हविरार्तिमनुवदति । उभयं—दधिपयसी ।

(४) प्रसाध्यार्थेति व्याकुरुते यत्रेति । वचनानि त्विति । ज्योतिष्टोमगतसोमेषु शेषभक्षो विध्यभावाच्च विद्यते इति प्राप्ते 'सर्वतः परिहारमाश्विनं भक्षयति तस्मात्सर्वा दिशः शृणोति' इत्यार्थवादा अप्राप्तत्वाद्भक्षानुवादायोगाद्विधायकानि वचनानि इत्युक्तम् तृतीये । एवं प्राप्त्यभावे प्रसिद्धार्थत्वं सर्वनाम्नोऽपनीयत इति तुल्यन्यायत्वादुदाहृतम् ।

(५) प्रसिद्ध्यपेक्षीति व्याचष्टे तदिहेति ।

(६) नन्वु 'दिवि' 'दिव'इति च रूपभेदान्न पूर्ववाक्यस्थब्रह्मण इह प्रत्यभिज्ञानतः सर्वनाम तं न परामृशे-

स्यान्यतामात्रेणान्यता युक्ता । एवं च स्ववाक्यस्थानि तेजोलिङ्गान्यसमञ्जसानीति ब्रह्मण्येव गमयितव्यानि, गमितानि च भाष्यकृता । तत्र ज्योतिर्ब्रह्मविकार इति ज्योतिषा ब्रह्मैवोपलक्ष्यते । अथवा प्रकाशमात्रवचनो ज्योतिःशब्दः, प्रकाशश्च ब्रह्मेति ब्रह्मणि मुख्य इति ज्योतिर्ब्रह्मेति सिद्धम् । **"प्रकृतहानाप्रकृतप्रक्रिये"** इति (पृ० २४२ पं० ५) प्रसिद्ध्यपेक्षायां(१) प्रकृतं संनिहितप्रसिद्धं तु कल्प्यं न पूर्ववाक्यगतं प्रकृतम् । अत एवोक्तं कल्पयत इति । संदंशन्यायमाह—**"न केवल"**मिति । **"परस्यापि ब्रह्मणो नामादिप्रतीकत्ववदि"**ति (पृ० २२४ पं० १५) । कौक्षेयं हि ज्योतिर्जीवभावेनानुप्रविष्टस्य परमात्मनो विकारो, जीवाभावे देहस्य शैत्यात्, जीवतश्चौष्ण्याज्ज्ञायते । तस्मात्तत्प्रतीकस्योपासनमुपपन्नम् । शेषं निगदव्याख्यातं भाष्यम् ॥ २४ ॥

(सू०) छन्दोभिधानान्नेति चेन्न, तथा चेतोर्पणनिगदात्तथाहि दर्शनम् ॥ २५ ॥

(२)पूर्ववाक्यस्य हि ब्रह्मार्थत्वे सिद्धे स्यादेतदेवं, न तु तद्ब्रह्मार्थमपि तु गायत्र्यर्थम् । 'गायत्री वा इदं सर्वं भूतं यदिदं किं चे'ति गायत्रीं प्रकृत्येदं श्रूयते 'त्रिपादस्यामृतं दिवी'ति । (३)नन्वा'काशस्तल्लिङ्गादि'त्यनेनैव गतार्थमेतत् । तथाहि—'तावानस्य महिमे'त्यस्यामृचि ब्रह्म चतुष्पादुक्तम् । सैव च 'तदेतदृचाभ्यनूक्तमि'त्यनेन सङ्गमितार्था ब्रह्मलिङ्गम् । एवं 'गायत्री वा इदं सर्वमि'त्यक्षरसन्निवेशमात्रस्य गायत्र्या न सर्वत्वमुपपद्यते । (४) न च भूतपृथिवीशरीरहृदयवाक्प्राणात्मत्वं गायत्र्याः स्वरूपेण सम्भवति । न च ब्रह्मपुरुषसम्बन्धित्वमस्ति गायत्र्याः । तस्माद्गायत्रीद्वारा ब्रह्मण एवोपासना न गायत्र्या इति पूर्वेणैव गतार्थत्वादनारम्भणीयमेतत् । न च पूर्वन्यायस्मारणे सूत्रसन्दर्भ एतावान् युक्तः । (५)अत्रोच्यते । अस्त्यधिकाशङ्का । तथाहि—गायत्रीद्वारा ब्रह्मोपासनेति कोऽर्थः । गायत्रीविकारोपाधिनो ब्रह्मण उपासनेति । न च तदुपाधिनस्तदवच्छिन्नस्य सर्वात्मत्वम्, उपाधेरवच्छेदात् । नहि घटावच्छिन्नं नभोऽनवच्छिन्नं भवति । तस्मादस्य सर्वात्मत्वादिकं स्तुत्यर्थं, तद्वरं गायत्र्या एवास्तु स्तुतिः (६)कयाचित्प्रणाड्या । 'वाग्वै गायत्री वाग्वा इदं सर्वं भूतं

दित्याशंक्याह न चेति । प्रादिपदिकार्थौ यौस्तावदुभयत्र समा, सा हि प्रधानं गुणस्तु विभक्त्यर्थस्तस्माद्गुणे त्वन्याय्यकल्पनेति विभक्तिवैरूप्यं नेयमित्यर्थः ।

(१) ननु वाक्यस्थज्योतिर्लोभे प्रकृतहानं न दोषोऽत आह प्रसिद्ध्यपेक्षायामेति । यच्छ्रुतेर्विषयगवेषणायां प्रकरणाप्राप्तमपि प्रसिद्धं ग्राह्यम्, न स्ववाक्यगतमपि प्रस्तोष्यमाणमपूर्वमसिद्धेरित्यर्थः ।

(२) छन्दोभिधानादितिसूत्रैकदेशशङ्कावाचाह पूर्ववाक्यस्येति ।

(३) तत्र सिद्धान्त्याक्षिपति नन्वित्यादि युक्त इत्यन्तम् ।

(४) न च भूतपृथिवीति । 'गायत्री वाव इदं सर्वं भूतं यदिदं किं च वै' इत्यादिश्रुतौ भूतादिषड्भावभगायत्र्याः स्वरूपतो भूतात्मात्मकत्वं न सम्भवतीत्यर्थः ।

(५) एकदेशशङ्कावादी समाधत्ते अत्रोच्यते इत्यादिना ।

(६) ननु शब्दात्मिकायाश्छन्दोरूपाया गायत्र्याः कथं स्तुतिरत आह कयाचिदिति । तदभिमान्या देवतायाः सर्वभूतात्मकत्वमभिप्रेत्येत्यर्थः ।

गायति च त्रायति चे'त्यादि श्रुतिभ्यः । (१) तथा च 'गायत्री वा इदं सर्व'मित्युपक्रमे गायत्र्या एव हृदयादिभिर्व्याख्या, व्याख्याय च 'सैषा चतुष्पदा षड्विधा गायत्री'त्युपसंहारो गायत्र्यामेव समञ्जसो भवति । ब्रह्मणि तु सर्वमेतदसमञ्जसमिति । 'यद्वै तद्ब्रह्मे'ति च ब्रह्मशब्दश्छन्दोविषय एव, यथै'तां ब्रह्मोपनिषदमि'त्यत्र वेदोपनिषदुच्यते । तस्माद्गायत्रीछन्दोभिधानान्न ब्रह्मविषयमेतदिति प्राप्तम् ।

एवं प्राप्तेऽभिधीयते—"न, कुतः, ? तथा चेतोर्पणनिगदात्" । (पृ० २४६ पं० ८) गायत्र्याख्यच्छन्दोद्वारेण गायत्रीरूपविकारानुगते ब्रह्मणि चेतोर्पणं चित्तसमाधानमनेन ब्राह्मणवाक्येन निगद्यते । एतदुक्तं भवति । न गायत्री ब्रह्मणोऽवच्छेदिका, उत्पलस्येव नीलत्वं, येन तदवच्छिन्नत्वमन्यत्र न स्यादवच्छेदविरहात् । किन्तु यदेव तद्ब्रह्म सर्वात्मकं सर्वकारणं तत्स्वरूपेणाशक्योपदेशमिति तद्विकारगायत्रीद्वारेणोपलक्ष्यते, गायत्र्याः (२)सर्वच्छन्दोव्याप्त्या च सवनत्रयव्याप्त्या च द्विजातिद्वितीयजन्मजननीतया च श्रुतेर्विकारेषु मध्ये प्राधान्येन द्वारत्वोपपत्तेः । न चात्रोपलक्षणाभावेन नोपलक्ष्यं प्रतीयते, नहि कुण्डलेनोपलक्षितं कण्ठरूपं कुण्डलवियोगेऽपि पश्चात्प्रतीयमानमप्रतीयमानं भवति, तद्रूपप्रत्यायनमात्रोपयोगित्वादुपलक्षणानामनवच्छेदकत्वात् ।

तदेवं गायत्रीशब्दस्य मुख्यार्थत्वे गायत्र्या ब्रह्मोपलक्ष्यत इत्युक्तं, संप्रति तु गायत्रीशब्दः संख्यासामान्यादौण्या वृत्त्या ब्रह्मण्येव वर्तत इति दर्शयति–"अपर आहे"ति (पृ० २४७ पं० १) । तथाहि–षडक्षरैः पादैर्यथा गायत्री चतुष्पदा, एवं ब्रह्मापि चतुष्पाद् । सर्वाणि हि भूतानि स्थावरजङ्गमान्यस्यैकः पादः । दिवि—द्योतनवति चैतन्यरूपे, स्वात्मनीति यावत्, त्रयः पादाः(३) । (४)अथवा दिव्याकाशे त्रयः पादाः । तथाहि श्रुतिः—'इदं वाव तद्योऽयं बहिर्धा पुरुषादाकाश'स्तद्धि तस्य जागरितस्थानं, जाग्रत् खल्वयं बाह्यान् पदार्थान् वेद । तथा 'ऽयं वाव स योऽयमन्तःपुरुष आकाशः' । शरीरमध्य इत्यर्थः, तद्धि तस्य स्वप्नस्थानम् । तथा'ऽयं वाव स योऽयमन्तर्हृदय आकाशः' । हृदयपुण्डरीक इत्यर्थः, तद्धि तस्य सुषुप्तिस्थानम् । तदेत'त्त्रिपादस्यामृतं दिवी'त्युक्तम् । तदेवं चतुष्पात्त्वसामान्याद्गायत्रीशब्देन ब्रह्मोच्यते इति । "अस्मिन्पक्षे ब्रह्मैवाभिहित"मिति । ब्रह्मपरत्वादभिहितमित्युक्तम् ॥ २५ ॥

---

(१) उपक्रमोपसंहाराभ्यामपि गायत्रीस्तुतिरेव साधीयसीत्याह तथाचति ।

(२) सर्वच्छन्द इति । एवं हि श्रूयते 'चतुरक्षराणि छन्दांस्यग्रे समवन्, तेषु जगती सोमाहरणाय गता त्रीण्यक्षराणि हित्वाऽऽगच्छत् । एकं हित्वा त्रिष्टुबागता । गायत्री तु गत्वा तानि गालितानि चत्वार्यक्षराणि सोमं चाहृतवती, ततः साऽष्टाक्षराऽभवत्तयैव सवनत्रयमतन्वन्त याज्ञिकाः । एवं माध्यंदिनादिसवने त्रिष्टुबादिपार्थनया गायत्र्युपाख्याने एकादशाक्षरा द्वादशाक्षरा चाभवदित्युक्त्वोपसंहृतं–तस्मादाहुर्गायत्राणि वै सवनानि' इति, अतस्सर्वच्छन्दोव्याप्तिः । तथा 'गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं जगत्या वैश्यम्' इति श्रुतेश्च द्विजातिद्वितीयजन्मजननीत्वं बोध्यम् ।

(३) त्रयः पादा इति । अल्पं प्रपञ्चं पादमपेक्ष्य स्वरूपमपरिच्छिन्नत्वात् त्रयः पादा इति भावः ।

(४) दिवीति वाक्यशेषवशात् त्रिपादिति मन्त्रस्य व्याख्यान्तरमाह अथवेति । पद्यते ज्ञायते प्राप्यतेऽनेनेति विश्वतैजसप्राज्ञात्मकत्रयः पादा एते यस्य तत्त्रिपात्पुरुषं 'स्वपादद्वारा गगनेऽवस्थितमित्यर्थो मंत्रस्य तन्मते बोध्यः ।

(सू०) भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २६ ॥

"षड्विधे"ति (पृ० २४७ पं० ५) । भूतपृथिवीशरीरहृदयवाक्प्राणा इति षट् प्रकारा गायत्र्याख्यस्य ब्रह्मणः श्रूयन्ते । **"पञ्च ब्रह्मपुरुषा** (छा० ३।१३।६) **इति च हृदयसुषिषु ब्रह्मपुरुषश्रुतिर्ब्रह्मसम्बन्धितायां विवक्षितायां सम्भवति"** (पृ० २४९ पं १) । अस्यार्थः—(१)हृदयस्यास्य खलु पञ्च सुषयः, पञ्च छिद्राणि, तानि च देवैः प्राणादिभी रक्ष्यमाणानि स्वर्गप्राप्तिद्वाराणीति देवसुषयः । तथाहि—हृदयस्य यत्प्राङ्मुख छिद्रं तत्स्थो यो वायुः स प्राणस्तेन हि(२) प्रायणकाले सञ्चरते स्वर्गलोकं, स एव चक्षुः स एवादित्य इत्यर्थः, 'आदित्यो ह वै बाह्यः प्राण' इति श्रुतेः । अथ योऽस्य दक्षिणः सुषिस्तत्स्थो वायुविशेषो व्यानः । तत्सम्बद्धं श्रोत्रं तच्चन्द्रमाः, 'श्रोत्रेण सृष्टा दिशश्चन्द्रमाश्चे'ति श्रुतेः । अथ योऽस्य प्रत्यङ्मुखः सुषिस्तत्स्थो वायुविशेषोऽपानस्स च वाक् तत्सम्बन्धाद्, वाक् चाग्निरिति, 'वाग्वा अग्नि'रिति श्रुतेः । अथ योऽस्योदङ्मुखस्सुषिस्तत्स्थो वायुविशेषस्स समानः, तत्सम्बद्धं मनः, तत्पर्जन्यो देवता । अथ योऽस्योर्ध्वस्सुषिस्तत्स्थो वायुविशेषस्स उदानः, पादतलादारभ्योर्ध्वं नयनात्स वायुस्तदाधारश्चाकाशो(३) देवता । ते वा एते पञ्च सुषयः । तत्सम्बद्धाः पञ्च हार्दस्य ब्रह्मणः पुरुषा(४) न गायत्र्यामक्षर सन्निवेशमात्रे सम्भवन्ति, किन्तु ब्रह्मण्येवेति ॥ २६ ॥

(सू०) उपदेशभेदान्नेति चेत् नोभयस्मिन्नप्यविरोधात् ॥२७॥

"यथा लोके" इति (पृ० २४८ पं० १०) । (५)यदाऽऽधारत्वं मुख्यं दिवस्तदा कथंचिन्मर्यादा व्याख्येया । यो हि श्येनो वृक्षाग्रे वस्तुतोऽस्ति स च ततः परतोप्यस्त्येव, अर्वाग्भागातिरिक्तमध्यपरभागस्थस्य तस्यैव वृक्षात्परतोऽवस्थानात् । (६)एवं च बाह्यद्युभागातिरिक्तशरीरहार्द्यद्युभागस्थस्य ब्रह्मणो बाह्याद् द्युभागात् परतोऽवस्थानमुपपन्नम् ।

(७)यदा तु मर्यादैव मुख्यतया प्राधान्येन विवक्षिता तदा लक्षणयाऽऽधारत्वं व्याख्येयम् । यथा गङ्गायां घोष इत्यत्र सामीप्यादिति । तदिदमुक्तम् **"अपर आहे"**ति । (८)अत एव दिवः परमपीत्युक्तम् ॥ २७ ॥

---

(१) गायत्र्याख्यस्य ब्रह्मणो हृदि स्थितस्योपासनाङ्गत्वेन द्वारपालादिगुणविध्यर्थं तस्य हेत्यादिवाक्यं तदर्थतोऽनुक्रमति हृदयस्येत्यादिना । प्रागादिदिग्गता हृदयकमलसुषयो द्वाराणि तत्स्थाः प्राणादिपञ्चवायवो द्वारपालास्ते च चक्षुरादिकरणयुक्ता आदित्यादिदेवैराधिष्ठिता इति समुदायार्थः ।

(२) प्राणशब्दं निर्वक्ति प्रायणकाले इति ।

(३) आकाशः—परमेश्वरः । (४) पुरुषाः—प्राणादयः ।

(५) पदादावुक्तं प्रधानप्रकृत्यर्थप्रत्यभिज्ञानुरोधेन प्रत्ययार्थवैषम्यं नेयमिति तदुपदर्शकं भाष्यं व्याचष्टे यदाधारत्वमिति । यदा मुख्यमाधारत्वं वृक्षाग्रस्य विवक्षितं तदा वृक्षाग्रात्परतः श्येन इति प्रयोगे श्येनशब्दो वृक्षाग्रलग्नश्येनावयवादुपरितनावयवावच्छिन्नावयविलक्षक इत्यर्थः ।

(६) अस्मिन्पक्षे दार्ष्टान्तिके ब्रह्मणः श्येनवदवयवाभावादिव इति श्रुतिं लक्षणया व्याचष्टे एवं चेति । शक्यते च दृष्टान्तेपि वृक्षाग्रादित्यवधिश्रुतिर्लक्षणया नेतुम् अग्रभागादीषदर्वाग्भागपरत्वे तदा दार्ष्टान्तिकेन साम्यमित्यर्थः ।

(७) यदा त्वनौपाधिकं ब्रह्माकाशास्पृष्टं विवक्षित्वा पंचम्येव मुख्या तदा सप्तमी सामीप्यसम्बन्धं लक्षयतीत्याह यदा स्थिति । (८) अत एवेति । सर्वमर्यादाया मुख्यत्वादेवेत्यर्थः ।

(सू०) प्राणस्तथानुगमात् ॥ २८ ॥

(१)अनेकलिङ्गसन्देहे बलवत्कस्य किं भवेत् ।
लिङ्गिनो लिङ्गमित्यत्र चिन्त्यते प्रागचिन्तितम् ॥

मुख्यप्राणजीवदेवताब्रह्मणामनेकेषां लिङ्गानि बहूनि सम्प्लवन्ते, तत्कतमदत्र लिङ्गं, लिङ्गाभासं च कतमदित्यत्र विचार्यते । न चायमर्थोऽ'त एव प्राण' इत्यत्र विचारितः ।

(२)स्यादेतत् हिततमपुरुषार्थसिद्धिश्च निखिलभ्रूणहत्यादिपापापरामर्शश्च प्रज्ञात्मत्वं चानन्दादिश्च न मुख्ये प्राणे सम्भवन्ति । तथै'ष साधु कर्म कारयति, एष लोकाधिपतिरि'त्याद्यपि । जीवे तु प्रज्ञात्मत्वं कथंचिद्भवेदितरेषां त्वसम्भवः । वक्तृत्वं च वाक्करणव्यापारवत्त्वं यद्यपि परमात्मनि स्वरूपेण न सम्भवति, (३)तथाप्यनन्यथासिद्धबहुब्रह्मलिङ्गविरोधाज्जीवद्वारेण ब्रह्मण्येव कथंचिद्व्याख्येयम् , जीवस्य ब्रह्मणोऽभेदात् । तथा च श्रुतिः—'यद्वाचानभ्युदितं येन वागभ्युद्यते, तदेव ब्रह्म त्वं विद्धी'ति वाग्वदनस्य ब्रह्म कारणमित्याह । शरीरधारणमपि यद्यपि मुख्यप्राणस्यैव, तथापि प्राणव्यापारस्य परमात्मयत्तत्वात्परमात्मन एव । यद्यपि चात्रेन्द्रदेवताया विग्रहवत्या लिङ्गमस्ति, तथाहि इन्द्रधामगतं प्रतर्दनं प्रतीन्द्र उवाच 'मामेव विजानीही'त्युपक्रम्य, 'प्राणोऽस्मि प्रज्ञात्मे'त्यात्मनि प्राणशब्दमुच्चचार, प्रज्ञात्मत्वं चास्योपपद्यते, देवतानामप्रतिहतज्ञानशक्तित्वात् , सामर्थ्यातिशयाच्चेन्द्रस्य हिततमपुरुषार्थहेतुत्वमपि, मनुष्याधिकारत्वाच्छास्त्रस्य देवान्प्रत्यप्रवृत्तेर्भ्रूणहत्यादिपापापरामर्शस्योपपत्तेः, लोकाधिपत्यं चेन्द्रस्य लोकपालत्वात् , आनन्दादिरूपत्वं च स्वर्गस्यैवानन्दत्वात् , 'आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यत' इति स्मृतेश्चामृतत्वमिन्द्रस्य,'त्वाष्ट्रमहनमि'त्याद्या च विग्रहवत्त्वेन स्तुतिस्तत्रैवोपपद्यते । तथापि परमपुरुषार्थस्यापवर्गस्य परब्रह्मज्ञानादन्यतोऽनवाप्तेः, परमानन्दरूपस्य मुख्यस्यामृतत्वस्याजरत्वस्य च ब्रह्मरूपाव्यभिचारादध्यात्मसम्बन्धभूम्नश्च पराचीन्द्रेऽनुपपत्तेः, इन्द्रस्य देवताया आत्मनि प्रतिबुद्धस्य चरमदेहस्य वामदेवस्येव प्रारब्धविपाककर्माशयमात्रं भोगेन क्षयपतो ब्रह्मण एव सर्वमेतत्कल्पत इति विग्रहवदिन्द्रजीवप्राणवायुपरित्यागेन ब्रह्मैवात्र प्राणशब्दं प्रतीयत इति पूर्वपक्षाभावादनारभ्यमेतदिति ॥

(४)अत्रोच्यते—'यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः सह ह्येतावस्मिन् शरीरे वसतः

---

(१) अनेकेति । अनेकेषां लिङ्गान्यनेकानि च तानि लिङ्गानि वा प्रतिपदार्थमनेकानीति यावत्तेषामेकत्वेन प्रतिभासमानवाक्ये समावेशे किं बलवत् किममूनि सर्वाणि समबलानि उतैकमेव बलवद्यादृच्छिकमेव तदा कस्य लिंगिनो लिंगं बलवत् किं ब्रह्मण उत प्राणादेरित्येतदत्र चिन्त्यते, एतच्च प्राग् अत एव प्राण इत्यत्र न चिन्तितम् । तत्र हि ब्रह्मलिङ्गात्प्राणश्रुतिर्नीता न तु ब्रह्मलिङ्गानां बलाबलं विचारितम्, इति अग्रिमाधिकरणसङ्गतिकारिकार्थः । कारिकार्थमेवाह मुख्येति ।

(२) अनन्यथासिद्धब्रह्मलिङ्गानुसारेणेतरेषामन्यथासिद्धवदन्तस्तद्धर्मोपदेशादित्यनेन पुनरुक्तिं शंकते स्यादेतदिति ।

(३) देवतालिङ्गस्यान्यथासिद्धिमाह तथापीति ।

(४) वसत इति द्विवचनश्रुत्या सहोत्क्रमणादिलिङ्गानुगृहीतयोपास्यभेदप्रतीतेर्न वाक्यस्य ब्रह्ममात्रपरत्वनिर्णय इति वदन् पूर्वपक्षसंभवमाह अत्रोच्यत इति । तस्य प्राणस्य प्रज्ञात्मना जीवेन सहोपास्यत्वमुक्तमित्यर्थः ।

सहोत्क्रामत' इति यस्यैव प्राणस्य प्रज्ञात्मना उपास्यत्वमुक्तं तस्यैव प्राणस्य प्रज्ञात्मना सहोत्क्रमणमुच्यते । न च ब्रह्मण्यभेदे द्विवचनं, न सहभावो, न चोत्क्रमणम् । तस्माद्वायुरेव प्राणः । जीवश्च प्रज्ञात्मा । सह प्रवृत्तिनिवृत्त्या भक्तृत्वैकत्वमनयोरुपचरितं 'या वै प्राण'इत्यादिना । आनन्दामरजरापहतपाप्मत्वादयश्च ब्रह्मणि प्राणे(१) भविष्यन्ति । तस्माद्यथायोगं त्रयमपि त्वात्रोपास्याः । न चैष वाक्यभेदो दोषमावहति, वाक्यार्थावगमस्य पदार्थावगमपूर्वकत्वात् , (२)पदार्थानां चोक्तेन मार्गेण स्वातन्त्र्यात् । तस्मादुपास्यभेदादुपासात्रैविध्यमिति पूर्वपक्षः ।

सिद्धान्तस्तु(३) सत्यं पदार्थावगमोपायो वाक्यार्थावगमो, न तु पदार्थावगमपराण्येव पदानि, अपि त्वेकवाक्यार्थावगमपराणि । तमेव त्वेकं वाक्यार्थं पदार्थावगममन्तरेण न शक्नुवन्ति कर्तुमित्यन्तरा तदर्थमेव तमप्यवगमयन्ति, तेन पदानि विशिष्टैकार्थावबोधनस्वरसान्येव बलवद्बाधकोपनिपातान्नानार्थबोधपरतां नीयन्ते । यथाहुः—

सम्भवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते ।

इति । तेन यथोपांशुयाजवाक्ये जामितादोषोपक्रमे तत्प्रतिसमाधानोपसंहारे चैकवाक्यत्वाय 'प्रजापतिरुपांशु यष्टव्य' इत्यादयो न पृथग्विधयः किं त्वर्थवादा इति निर्णीतम् , तथेहापि 'मामेव विजानीही'त्युपक्रम्य 'प्राणोऽस्मि प्रज्ञात्मे'त्युक्त्वाऽन्ते 'स एष प्राण एव प्रज्ञात्मेत्यानन्दोऽजरोऽमृत' इत्युपसंहाराद्ब्रह्मण्येकवाक्यत्वावगतौ सत्यां जीवमुख्यप्राणलिङ्गान्यपि तदनुगुणतया नेतव्यानि, अन्यथा वाक्यभेदप्रसङ्गात् । यत्पुनर्भेददर्शनं 'सह ह्येतावि'ति, तज्ज्ञानक्रियाशक्तिभेदेन (४)बुद्धिप्राणयोः प्रत्यगात्मोपाधिभूतयोर्निर्देशः प्रत्यगात्मानमेवोपलक्षयितुम् । (५)अत एवोपलक्ष्यस्य प्रत्यगात्मस्वरूपस्याभेदमुपलक्षणाभेदेनोपलक्षयति—"प्राण एव प्रज्ञात्मे"ति ।

(६)तस्मादनन्यथासिद्धब्रह्मलिङ्गानुसारतः ।
एकवाक्यबलात्प्राणजीवलिङ्गोपपादनम् ॥

इति सङ्ग्रहः ॥ २८ ॥

(सू०) न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॥ २९ ॥

---

(१) ब्रह्मणि प्राण इति । 'स एष प्राण आनन्दोऽजर' इत्यत्र प्राणशब्दो ब्रह्मवाचीत्यर्थः ।

(२) भवतु पदार्थावगमपूर्वको वाक्यार्थावगमस्तथापि गामानयेत्यादावेकवाक्यता किं न स्यादत आह पदार्थानां चेति । गुणप्रधानयोरप्यपदार्थावगमे भवत्येकवाक्यता, इह तु सहोत्क्रमत इत्यादिभिः स्वातन्त्र्यावगतेर्वाक्यभेद इत्यर्थः ।

(३) पदार्थावबोधो हि वाक्यार्थबोधे हेतुरत एव स गुणः, उद्देश्यस्तु वाक्यार्थप्रत्ययः प्रधानमतो न प्रतीतैकवाक्यताभङ्गं हेतुं निरूढन्तयति सत्यमित्यादिना ।

(४) ज्ञानशक्तिमती बुद्धिः, क्रियाशक्तिमांश्च प्राणः ।

(५) यदि प्रत्यगात्मोपाधी भेदेन निर्दिष्टौ न तु जीवप्राणौ स्वातन्त्र्येण कथं तर्हि प्राण एव प्रज्ञात्मेत्युपक्रम्योक्तस्येति तयोरुपास्यत्वनिर्देशः, भेदेनोक्तयोर्वा कथमभेदनिर्देशोऽत आह अत एवेति ।

(६) उपसंहारार्थसंग्रहकारिकामाह तस्मादिति ।

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३० ॥
जीवमुख्यप्राणलिङ्गादिति चेन्नोपासात्रैविध्यादा-
श्रितत्वादिह तद्योगात् ॥ ३१ ॥

"न ब्रह्मवाक्यं भवितुमर्हती"ति (पृ० २५५ पं० ४) नैष सन्दर्भो (१)ब्रह्मवाक्यमेव भवितुमर्हतीति, किन्तु यथायोगं किंचिदत्र जीववाक्यं, किंचिन्मुख्यप्राणवाक्यं किंचिद्ब्रह्मवाक्यमित्यर्थः । **"प्रज्ञासाधनप्राणान्तराश्रयत्वादि"ति** । (२)प्राणान्तराणीन्द्रियाणि, तानि हि मुख्ये प्राणे प्रतिष्ठितानि । **जीवन्मुख्यप्राणयोरन्यतर** इत्युपक्रममात्रम् । **"उभा"**विति पूर्वपक्षतत्त्वम् । ब्रह्म तु ध्रुवम् । **"न ब्रह्मे"ति** (पृ०२५६ पं० १) । न ब्रह्मैवेत्यर्थः । **"दशानां भूतमात्राणामि"ति** । पञ्च शब्दादयः पञ्च पृथिव्यादय इति दश भूतमात्राः । पञ्च बुद्धीन्द्रियाणि पञ्च बुद्धय इति दश प्रज्ञामात्राः ।

तदेवं स्वमतेन व्याख्याय प्राचां वृत्तिकृतां मतेन व्याचष्टे—**"अथ वे"ति** (पृ० २५७ पं० १) (३)पूर्वं प्राणस्यैकमुपासनमपरं जीवस्यापरं ब्रह्मण इत्युपासनात्रैविध्येन वाक्यभेदप्रसङ्गो दूषणमुक्तम् , इह तु ब्रह्मण एकस्यैवोपासात्रयविशिष्टस्य विधानान्न वाक्यभेद इत्यभिमानः प्राचां वृत्तिकृताम् । तदेतदालोचनीयं—कथं न वाक्यभेद—इति । (४)युक्तं 'सोमेन यजेते'त्यादौ सोमादिगुणविशिष्टयागविधानं तद्गुणविशिष्टस्यापूर्वस्य कर्मणोऽप्राप्तस्य विधिविषयत्वात् , इह तु सिद्धरूपं ब्रह्म न विधिविषयो भवितुमर्हति, अभावार्थत्वात् , भावार्थस्य विधिविषयत्वनियमात् , वाक्यान्तरेभ्यश्च ब्रह्मावगतेः प्राप्तत्वात् , तदनूद्याप्राप्तोपासा भावार्थो विधेयस्तस्य च भेदाद्विध्यावृत्तिलक्षणो वाक्यभेदोऽतिस्फुट इति भाष्यकृता नोद्घाटितः, स्वव्याख्यानेनैवोक्तप्रायत्वादिति सर्वमवदातम् ॥ २९ ॥ ३० ॥ ३१ ॥

इति श्रीवाचस्पतिमिश्रविरचिते भाष्यविभागे भामत्यां प्रथमस्याध्यायस्य प्रथम पादः ॥

अथ द्वितीयं पादमारिप्सुः पूर्वोक्तमर्थं स्मारयति वक्ष्यमाणोपयोगितया—**"प्रथमे पाद"** इति (पृ० १५९ पं० ९) । उत्तरत्र हि ब्रह्मणो व्यापित्वनित्यत्वादयः सिद्धवद्धेतुतयोपदेक्ष्यन्ते । न चैते साक्षात्पूर्वमुपपादिता इति हेतुभावेन न शक्या उपदेष्टुमिति, अत उक्तम्—**"समस्तजगत्कारणस्ये"ति** (पृ० १६० पं० १) यद्यप्येते न पूर्वं कण्ठत उक्तास्त-

---

(१) ननु जीवप्राणब्रह्मणामुपास्यत्वेन यदि पूर्वपक्षः कथं तर्हि जीवमुख्यप्राणलिङ्गसूत्रावतारकपूर्वपक्षभाष्ये ब्रह्मपरत्वनिषेधोऽत आह ब्रह्मवाक्यमेवेति । ब्रह्मपरत्वनियमो निषिध्यत इत्यर्थः ।

(२) एतत्सूत्रपूर्वपक्षभाष्य एव प्राणस्य प्रज्ञात्मत्वमुपपादयितुं प्रज्ञेत्यादि भाष्यम् , तत्र प्राणान्तरशब्दार्थमाह प्राणान्तराणीति ।

(३) पूर्वोत्तरव्याख्ययोः सूत्रार्थं विभजते पूर्वमिति । उपासनात्रैविध्यप्रसङ्गादिति पूर्वस्य व्याख्यानमत्र तु एकस्या उपासनायाश्चिविधत्वान्न वाक्यभेद इति व्याख्यानमित्यर्थः ।

(४) अत्र तावत्किमुपासनात्रयविशिष्टब्रह्मविधिरुत ब्रह्मविशिष्टोपासनात्रयविधिरथवा तदनुवादेन तदाश्रित्योपासनत्रयविधिरिति विकल्प्य नाद्य इत्याह युक्तमिति । न द्वितीय इत्याह वाक्यान्तरेभ्यश्चेति । विशेषणीभूतब्रह्मणः सन्निधौ प्राप्तत्वात् न तद्विशिष्टोपासनविधिरित्यर्थः । ततस्तृतीयकल्पः परिशिष्यत इत्याह तदनुवादेति । तं दूषयति तस्य चेति । ब्रह्मानुवादेनोपासनविधावेकविशेष्यावशीकारादुपासनानां च परस्परप्रसङ्गास्मत्युपास्तिविध्यावृत्त्यापात इत्यर्थः ।

थापि ब्रह्मणो जगज्जन्मादिकारणत्वोपपादनेना(१)धिकरणसिद्धान्तन्यायेनोपक्षिप्ता इत्युपपन्नस्तेषामुत्तरत्र हेतुभावेनोपन्यास इत्यर्थः । "अर्थान्तरप्रसिद्धानां च"ति । यत्रार्थान्तरप्रसिद्धा एवाकाशप्राणज्योतिरादयो ब्रह्मणि व्याख्यायन्ते तदव्यभिचारालिङ्गश्रवणात् तत्र कैव कथा मनोमयादीनामर्थान्तरे प्रसिद्धानां पदानां ब्रह्मगोचरत्वनिर्णये प्रतीत्याभिप्रायः । (२)पूर्वपक्षाभिप्रायं त्वग्रे दर्शयिष्यामः ।

(सू०) सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

"इदमाम्नायते-सर्वं खल्विदं ब्रह्म,कुतः ? तज्जलानि"ति । यतस्तस्माद्ब्रह्मणो जायत इति तज्जम् , तस्मिंश्च लीयत इति तल्लम् , तस्मिंश्चानिति स्थितिकाले चेष्टत इति तदनं जगत्तस्मात्सर्वं खल्विदं जगद्ब्रह्म । अतः कः कस्मिन् रज्यते कश्च कं द्वेष्टीति रागद्वेषरहितः शान्तः सन्नुपासीत । "अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर"इत्यादि । (३)तत्र संशयः किमिह मनोमयत्वादिभिर्धर्मैः शारीर आत्मोपास्यत्वेनोपदिश्यते आहोस्विद्ब्रह्मेति । किं तावत्प्राप्तं "शारीरो" (पृ० २६१ पं० १) जीव इति । कुतः ? (४)क्रतुमित्यादिवाक्येन विहितां क्रतुभावनामनूद्य सर्वमित्यादिवाक्यं शमगुणे विधिः । (५)तथा च सर्वं खल्विदं ब्रह्मेति वाक्यं प्रथमपठितमप्यर्थालोचनया परमेव, तदर्थोपजीवित्वात् । (६)एवं च सङ्कल्पविधिः प्रथमो निर्विषयः सन्नपर्यवस्यन्विषयापेक्षः स्वयमनिर्वृत्तो न विध्यन्तरेणोपजीवितुं शक्योऽनुपपादकत्वात्, तस्माच्छान्ततागुणविधानात्पूर्वमेव 'मनोमयः प्राणशरीर' इत्यादिभिर्विषयोपनायकैः सम्बध्यते। (७)मनोमयत्वादि च कार्यकारणसङ्घातात्मनो जीवात्मन एव निरूढमिति जीवात्मनोपास्येनोपरक्तोपासना न पश्चाद्ब्रह्मणा सम्बद्धुमर्हति, उत्पत्तिशिष्टगुणावरोधात् । (८)न च 'सर्वं खल्विदमि'ति वाक्यं ब्रह्मपरमिति तु शमहेतुवन्निगदार्थवादः शान्तता-

---

(१) अधिकरणेति । यत्सिद्धावर्थादेर्न्यायसिद्धिः सोऽधिकरणसिद्धान्तः ।

(२) यद्यर्थान्तररूढा अपि शब्दा ब्रह्मलिङ्गात् ब्रह्मपरतया व्याख्याताः तर्हि कैव कथा मनोमयत्वादिलिङ्गेषु, अपि चेह ब्रह्मशब्द एवास्ति 'सर्वं खल्विदं ब्रह्मे'ति, अस्ति च वाक्यशेषे सर्वकर्मत्वादि ब्रह्मलिंगं तत्कथं जीवपरत्वशङ्का वाक्यस्यात आह पूर्वपक्षेति । क्रतुमित्यादिवाक्येनेत्यारभ्येत्यर्थः ।

(३) मनोमयत्वादीनां प्रकृतब्रह्मनैरपेक्ष्यसापेक्षत्वाभ्यां संशयमाह तत्रेति ।

(४) स्ववाक्योपात्तधर्मविशिष्टजीवोपासनानुवादेन शमविधिपरत्वान्न सर्वं खल्विति वाक्यमुपास्यसमर्थकमित्याह क्रतुमिति ।

(५) प्रागप्रतीतायाः क्रमप्रवृत्तेः कथमुपासीतेत्यनुवादस्तत्राह तथाचेति ।

(६) ननु सङ्कल्पविधेरुपास्यसापेक्षत्वाद्ब्रह्मण उपास्यत्वमत आहैवं चेति । सापेक्षस्य गुणविध्यर्थमाश्रयदानायोगान्मनोमयत्वादिभिरेवापेक्षापूरणमित्यर्थः ।

(७) स्यादेतन्मनोमयत्वादिमद्ब्रह्मैवास्त्वित्यत आह मनोमयत्वादि चेति । उत्पत्तिशिष्टत्वं कर्मस्वरूपप्रतीतिसमयागतत्वम् ।

(८) नन्वत्र ब्रह्मोपास्यं किमर्थं तर्हि तदभिधानमित्यत आह नचेति । हेतुवन्निगदवत इति तथोक्तः । शूर्पेणेति वाक्यान्न तेन हीति श्रुतम् । तत्र च हिशब्दश्रुतेः स्तुतौ च लक्षणापरत्वाऽन्नकरणत्वं हेतुरुपदिष्टस्तथाच यद्यदन्नकरणं तेन तेन होतव्यमिति पूर्वपक्षे तृतीयाश्रुत्या होमकरणं शूर्पे गम्यते विध्यर्थस्य च न हेत्वपेक्षाऽतः शूर्पस्तुतिवदत्रापि शान्तताविधिपरो ब्रह्मप्रशंसावाद इत्यर्थः ।

विधिपरः, 'शूर्पेण जुहोति, तेन व्रीन् क्रियते' इतिवत्। न चान्यपरादपि ब्रह्मापेक्षिततया स्वीक्रियत इति युक्तम्। मनोमयत्वादिभिर्धर्मैर्जीवे सुप्रसिद्धैर्जीवविषयसमर्पणेनानपेक्षितत्वात्। सर्वकर्मत्वादि च जीवस्य पर्यायेण भविष्यति। एवं चाणीयस्त्वमप्युपपन्नम्। परमात्मनस्त्वपरिमेयस्य तदनुपपत्तिः। प्रथमावगतेन चाणीयस्त्वेन ज्यायस्त्वं तदनुगुणतया व्याख्येयम्। व्याख्यातं च भाष्यकृता। एवं कर्मकर्तृव्यपदेशः सप्तमीप्रथमान्तता चाभेदेऽपि जीवात्मनि कथंचिद्भेदोपचारेण राहोः शिर इतिवद् द्रष्टव्या। 'एतद्ब्रह्मे'ति च जीवविषयं जीवस्यापि देहादिबृंहणत्वेन ब्रह्मत्वात्। एवं सत्यसङ्कल्पादयोऽपि परमात्मवर्तिनो जीवेऽपि सम्भवन्ति, तदव्यतिरेकात्। तस्माज्जीव एवोपास्यत्वेनाऽत्र विवक्षितो, न परमात्मेति प्राप्तम्।

एवं प्राप्तेऽभिधीयते—

(१)समासः सर्वनामार्थः सन्निकृष्टमपेक्षते।
तद्धितार्थोऽपि सामान्यं नापेक्षाया निवर्तकः॥
तस्मादपेक्षितं ब्रह्म प्राह्यमन्यपरादपि।
तथा च सत्यसङ्कल्पप्रभृतीनां यथार्थता॥

(२)भवेदेतदेवं यदि प्राणशरीर इत्यादीनां साक्षाज्जीववाचकत्वं भवेत्, न त्वेतदस्ति। तथाहिः—प्राणः शरीरमस्येति सर्वनामार्थो बहुव्रीहिः सन्निहितं च सर्वनामार्थं सम्प्राप्य तदभिधानं पर्यवस्येत्। (३)तत्र मनोमयपदं पर्यवसिताभिधानं तदभिधानपर्यवसानायालं, तदेव तु मनोविकारो वा मनःप्रचुर वा किमर्थमित्यद्यापि न विज्ञायते। तथैष(४)शब्दः समवेतार्थो भवति स समासार्थः।(५)न चैष जीव एव समवेतार्थो न ब्रह्मणीति, तस्य 'अप्राणो ह्यमना' इत्यादिभिस्तद्विरहप्रतिपादनादिति युक्तम्। तस्यापि सर्वविकारकारणतया विकाराणां च स्वकारणादभेदात्तेषां च मनोमयतया ब्रह्मणस्तत्कारणस्य मनोमयत्वोपपत्तेः॥

(६)स्यादेतत्। जीवस्य साक्षान्मनोमयत्वादयो ब्रह्मणस्तु तद्द्वारा, तत्र प्रथमं द्वारस्य बुद्धिस्थत्वात्तदेवोपास्यमस्तु, न पुनर्जघन्यं ब्रह्म, ब्रह्मलिङ्गानि च जीवस्य ब्रह्मणोऽभेदाज्जीवेष्युपपत्स्यन्ते। (७)तदेतदत्र सम्प्रधार्यम्—किं ब्रह्मलिङ्गैर्जीवानां तदभिन्नानामस्तु तद्वत्ता, तथा च

---

(१) समास इति। 'मनोमयः प्राणशरीर' इत्यत्र प्राणः शरीरमस्येति बहुव्रीहेः समासो विग्रहवशाद्देयत्यन्तर्गभितसर्वनामार्थवान्, सर्वनाम च सन्निकृष्टमपेक्षतेऽतः सर्वनामश्रुतिर्ब्रह्मोपास्यत्वे मानमित्यर्थः। ननु मनोमय इति स्ववाक्यस्थमयडर्थेन ब्रह्माकाङ्क्षा न सम्भवेदत आह तद्धितार्थ इति। सोऽपि विकारप्राचुर्यसाधारणतया सामान्यत्वान्न ब्रह्माकाङ्क्षाशमकः संदिग्धत्वादिति भावः। फलितमाह तस्मादिति। अतः शमविधिस्तुतिपरादपि वाक्याद्ब्रह्मैव ग्राह्यम्, एवं च ब्रह्मोपादाने सत्यसंकल्पादीनां यथार्थत्वसम्भवेन वाक्यशेषस्थलिङ्गसामञ्जस्यमित्यर्थः। (२) समासइतिकारिकांशं व्याचष्टे भवेदिति। तदभिधानं—समासाभिधानम्।

(३) तद्धितार्थ इत्यंशं व्याचष्टे तत्रेति। (४) तथैष इति मु० मु०पु० पाठः।

(५) नचैष इति। एष मनोमयशब्दो जीव एव निविष्टावयवार्थो न तु ब्रह्मणि तस्य मनआदिविरहप्रतिपादनादित्येतन्न युक्तम्, कुतो न युक्तमत आह तस्यापीति। विकाराणां—तद्विशेषाणां जीवानाम्।

(६) विकारत्वं जीवानामभेदापेक्षं यदि जीवद्वारा ब्रह्मणो मनोमयत्वं तर्हि जीव एव मनोमयपदं मुख्यमिति तदेव समासाकाङ्क्षायाः पूरकं स्यादित्यभिप्रायेणाशङ्कते स्यादेतदिति।

(७) उक्ताशंकासमाधानार्थं प्रथमं बलाबलविवेकाय पक्षविभागं करोति तदेतदिति। ब्रह्मलिङ्गैः—सर्वकर्मत्वादिभिः, तद्वत्ता—ब्रह्मलिङ्गवत्ता। अस्मिन्पक्षे फलितमाह तथाचेति।

जीवस्य मनोमयत्वादिभिः प्रथममवगमात्तस्यैवोपास्यत्वम्, (१)उत न जीवस्य ब्रह्मलिङ्गवत्ता तदभिज्ञस्यापि, जीवलिङ्गैस्तु ब्रह्म तद्वत्, तथा च ब्रह्मलिङ्गानां दर्शनात् तेषां च जीवेऽनुपपत्तेर्ब्रह्मैवोपास्यमिति । (२)वयं तु पश्यामः—

समारोप्यस्य रूपेण विषयो रूपवान् भवेत् ।
विषयस्य तु रूपेण समारोप्यं न रूपवत् ॥

समारोपितस्य हि रूपेण भुजङ्गस्य भीषणत्वादिना रज्जू रूपवती, न तु रज्जुरूपेणाभिगम्यत्वादिना भुजङ्गो रूपवान् । तदा भुजङ्गस्यैवाभावात्किं रूपवत् । भुजङ्गदशायां तु न नास्ति वास्तवी रज्जुः । तदिह समारोपितजीवरूपेण वस्तुसद्ब्रह्म रूपवद्युज्यते, न तु ब्रह्मरूपैर्नित्यत्वादिभिर्जीवस्तद्वान् भवितुमर्हति, तस्य तदानीमसम्भवात् । तस्मात् ब्रह्मलिङ्गदर्शनाज्जीवे च तदसम्भवाद्ब्रह्मैवोपास्यं न जीव इति सिद्धम् । (३)एतदुपलक्षणाय च 'सर्वं खल्विदं ब्रह्मे'ति वाक्यमुपन्यस्तमिति ॥ १ ॥

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

"यद्यप्यपौरुषेय" इति । (पृ० २६२ पं० १२) शास्त्रयोनित्वेऽपीश्वरस्य पूर्वपूर्वसृष्टिरचितसन्दर्भापेक्षरचनत्वेनास्वातन्त्र्यादपौरुषेयत्वाभिधानम्, तथा चाऽस्वातन्त्र्येण विवक्षा नास्तीत्युक्तम् । परिग्रहपरित्यागौ चोपादानानुपादाने उक्ते, न तूपादेयत्वमेव, (४)अन्यथोद्देश्यतयाऽनुपादेयस्य ग्रहादेरविवक्षितत्वेन चमसादावपि सम्मार्गप्रसङ्गात् । तस्मादनुपादेयत्वेऽपि ग्रह उद्देश्यतया परिगृहीतो विवक्षितः । (५)तद्गतं त्वेकत्वमवच्छेदकत्वेन वर्जितमविवक्षितम्, इच्छानिच्छे च भक्तितः । तदिदमुक्तं—**"वेदवाक्यतात्पर्याभ्यामवगम्येते"** (पृ० २६३ पं० १) इति । यत्परं वेदवाक्यं तत्तेनोपात्तं विवक्षितम्, अतत्परेण चानुपात्तमविवक्षितमित्यर्थः ॥ २ ॥

स्यादेतत्, यथा सत्यसङ्कल्पादयो ब्रह्मण्युपपद्यन्ते, एवं शारीरेऽप्युपपत्स्यन्ते, शारी-

---

(१) एवं जीवोपास्यत्वपक्षं प्रदर्श्य ब्रह्मोपास्यपक्षमाह उतेति । तथाच ब्रह्मामिन्नस्यापि जीवस्याविच्छिन्नतया न ब्रह्मधर्मवत्ता, ब्रह्मणस्तु सर्वात्मत्वाज्जीवलिङ्गैस्तद्वत्तेति पक्षे लाभमाह तथाचेति ।

(२) तत्र स्वमतमाह वयन्त्विति । समारोप्यस्येति । ज्ञायमानेन समारोप्यजीवरूपेणाधिष्ठानविषयो ब्रह्मरूपवद्भवेत् तस्याज्ञायमानत्वेन समारोपकालेपि सत्त्वात् । विषयस्य तु रूपेणासाधारणेन ज्ञायमानेन समारोप्य जीवो न रूपवानधिष्ठानासाधारणरूपज्ञाने सति समारोप्याभावादिति कारिकार्थः । कारिकार्थमिममेव दृष्टान्तेन दृढयन्नाह समारोपितस्येति ।

(३) एतदुपलक्षणाय—सर्वकामत्वाद्युपलक्षणाय, उपन्यस्तं भाष्यकारेणेति शेषः ।

(४) 'उपादानेन फलेन' इति भाष्ये उपदानं नाम परिग्रहो न तूपादेयत्वमुद्देश्यप्रतियोगित्वम्, विपक्षे बाधकमाह अन्यथेति । किञ्चित्कार्ये विधातुं सिद्धवन्निर्देश्यमुद्देश्यत्वमनुष्ठेयत्वेन निर्देश्यत्वमुपादेयत्वम् । उद्देश्याविवक्षायां 'ग्रहं सम्मार्ष्टी'त्यत्रोद्देश्यग्रहस्याविवक्षा स्यात्तथाच चमसादेरपि सम्मार्गप्रसङ्गः स चायुक्त इति भावः ।

(५) तद्गतं—ग्रहगतम्, एकप्रकरणतयैकपशुविशिष्टयागविधिसम्भवा'त्पशुना यजेते'त्यत्रोपादेयाविशेषणत्वादेकत्वविवक्षाया युक्तत्वेऽप्यत्र ग्रहत्वैकत्वोद्देशेन सम्मार्गविधावुद्दिश्यमानयोः परस्परमसम्बन्धाद्ग्रह एवोद्देश्येन पर्यवसानाच्च वाक्योपरिसमाप्तिसम्भवेन ग्रहं सम्मार्ष्टि तं चैकमिति वाक्यभेदापत्त्यैकत्वाविवक्षा न युक्तेति भावः ।

रस्य ब्रह्मणोऽभेदात्, शारीरगुणा इव मनोमयत्वादयो ब्रह्मणीत्यत आह सूत्रकारः—

(सू०) अनुपपत्तेस्तु न शारीरः ॥ ३ ॥
कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥
शब्दविशेषात् ॥ ५ ॥

यत्तदवोचाम 'समारोप्यधर्माः समारोपविषये सम्भवन्ति, न तु विषयधर्मास्समारोप्य' इति, तस्येत उत्थानम् ॥ ३ ॥ ४ ॥ ५ ॥

(सू०) स्मृतेश्च ॥ ६ ॥
अभ्रकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न,
निचाय्यत्वादेवं व्योमवत् ॥ ७ ॥

अत्राह चोदकः "कः पुनरयं शारीरो नामे"ति (पृ० २६५ पं० ९) । (१)न तावद्भेदप्रतिषेधाद्भेदव्यपदेशाच्च भेदाभेदावेकत्र तात्त्विकौ भवितुमर्हतो विरोधादित्युक्तम् । तस्मादेकमिह तात्त्विकमतात्त्विकं चेतरत् । (२)तत्र पौर्वापर्येणाद्वैतप्रतिपादनपरत्वाद्वेदान्तानां द्वैतग्राहिणश्च मानान्तरस्याभावात्तद्बाधनाच्च, तेनाद्वैतमेव परमार्थः । तथा चानुपपत्तेस्त्वित्याद्यसङ्गतार्थमित्यर्थः । परिहरति "सत्यमेवमेतत्, पर एवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिरवच्छिद्यमानो बालैः शारीर इत्युपचर्यते" । (३)अनाद्यविद्यावच्छेदलब्धजीवभावः पर एवात्मा स्वतो भेदेनावभासते । तादृशां च जीवानामविद्या, न तु निरुपाधिनो ब्रह्मणः । (४)न चाविद्यायां सत्यां जीवात्मविभागः, सति च जीवात्मविभागे तदाश्रयाऽविद्येत्यन्योन्याश्रयमिति साम्प्रतम् । (५)अनादित्वेन जीवाविद्ययोर्बीजाङ्कुरवदनवक्लृप्तरयोगात् । न च सर्वज्ञस्य सर्वशक्तेश्च स्वतः कुतोऽकस्मात्संसारता, यो हि परतन्त्रः सोऽन्येन बन्धनागारे प्रवेश्यत न तु स्वतन्त्र इति वाच्यम् । न हि तद्भागस्य जीवस्य सम्प्रतितनी बन्धनागारप्रवेशिता येनानुयुज्येत, किंत्विय मनादिः पूर्वपूर्वकर्माविद्यासंस्कारनिबन्धना नानुयोगमर्हति । न चैतावता ईश्वरस्यानीशता । नह्युपकरणाद्यपेक्षिता कर्तुः स्वातन्त्र्यं विहन्ति । तस्माद्यत्किंचेदतदपीति ॥ ६ ॥ ७ ॥

(सू०) सम्भोगप्राप्तिरिति चेन्न, वैशेष्यात् ॥ ८ ॥

---

(१) जीवस्य ब्रह्मणो भेदाभेदाभ्यामुभयश्रुत्युपपत्तेराक्षेपायोगमाशंक्याह न तावदिति ।

(२) विरोधादन्यतरबाधे स्थितेऽप्यभेदपक्षे विनिगमकमाह तत्रेति । तद्बाधनात —तर्वेदान्तैर्द्वैतग्राहिणो मानान्तरस्य प्रत्यक्षस्य विधिमात्रव्यापारत्वात्तत्पूर्वकत्वाच्चान्येषामपि बाधनादित्यर्थः ।

(३) औपाधिकभेदानुवादित्वेन भेदश्रुतीनां सूत्रस्य चोपपत्तिमाह अनाद्यविद्येति । तादृशाम्—अनाद्यविद्याविशिष्टानाम् ।

(४) शङ्कते नचेति ।

(५) समाधत्ते अनादित्वेनेति । जीवाविद्ययोर्बीजाङ्कुरवद्धेतुमत्त्वेऽनित्यत्वं स्यादतोऽन्योन्यरोत्तरजीवाभिव्यक्तीनां पूर्वपूर्वभ्रमनिमित्तकत्वमुक्तम् । अनाद्यविद्याविद्ययोश्चेतरेतराश्रयत्वमविद्यातत्सम्बन्धयोरिवाविरुद्धमिति भावः ।

विशेषादिति वक्तव्ये वैशेष्याभिधानमात्यन्तिकं विशेषं प्रतिपादयितुम् । (१)तथाह्यविद्याकल्पितः सुखादिसम्भोगो विद्यात्मन एव जीवस्य युज्यते, न तु निर्मृष्टनिखिलाविद्यातद्वासनस्य शुद्धबुद्धमुक्तस्वभावस्य परमात्मन इत्यर्थः । शेषमतिरोहितार्थम् ॥ ८ ॥

(सू०) अत्ता चराचरग्रहणात् ॥ ९ ॥

प्रकरणाच्च ॥ १० ॥

"कठवल्लीषु पठ्यते—

(२)यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः ।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥ इति ।

(३)अत्र चोदनौदनोपसेचनसूचितः कश्चिदत्ता प्रतीयते । अत्तृत्वं च भोक्तृता वा संहर्तृता वा स्यात् । न च प्रस्तुतस्य परमात्मनो भोक्तृतास्ति, 'अनश्नन्नन्योऽभिचाकशीति' इतिश्रुत्या भोक्तृताप्रतिषधात् । जीवात्मनश्च भोक्तृताविधानात् 'तयोरन्यः पिप्पलं स्वाद्वत्ती'ति । तद्यदि भोक्तृत्वमत्तृत्वं ततो मुक्तसंशयं जीवात्मैव प्रतिपत्तव्यः । (४)ब्रह्मक्षत्रादि चास्य कार्यकारणसङ्घातो भोगायतनतया वा साक्षाद्वा सम्भवति भोग्यम् । (५)अथ तु संहर्तृता भोक्तृता, ततस्त्रयाणामग्निजीवपरमात्मनां प्रश्नोपन्यासोपलब्धेः संहर्तृत्वस्याविशेषाद्भवति संशयः—किमत्ताऽग्निराहो जीव उताहो परमात्मेति । (६)अत्रौदनस्य भोग्यत्वेन लोके प्रसिद्धेर्भोक्तृत्वमेव प्रथमं बुद्धौ विपरिवर्तते, चरमं तु संहर्तृत्वमिति भोक्तैवात्ता । तथा च जीव एव(७) । 'न जायते म्रियते' इति च तस्यैव स्तुतिः, (८)संहारकालेऽपि संस्कारमात्रेण तस्यावस्थानात् । दुर्ज्ञानत्वं च तस्य सूक्ष्मत्वात् । तस्माज्जीव एवात्तेहोपास्यत इति प्राप्तम् । (९)यदि तु संहर्तृत्वमत्तृत्वं तथाप्यग्निरत्ता, 'अग्निरन्नाद' इति श्रुतेप्रासङ्गिभ्याम् ।

एवं प्राप्तेऽभिधीयते—अत्तात्र परमात्मा, कुतः, ? चराचरग्रहणात् । 'उभे यस्यौदन' इति 'मृत्युर्यस्योपसेचन'मिति च श्रूयते । तत्र यदि जीवस्य भोगायतनतया तत्साधनतया

---

(१) 'न वैशेष्यादि'ति सूत्रे प्रकृतिप्रयोगादेवेष्टसिद्धौ प्रत्ययप्रयोगोतिशयद्योतनाय, तमेवाह तथाहीति । अतिशयस्य भावः प्रत्ययार्थो न तु विशेषस्वरूपभाव इत्यर्थः ।

(२) यस्येति । यस्य ब्रह्मक्षत्रादिजगदोदनो, मृत्युः सर्वप्राणिमात्रकोपि यस्योपसेचनमोदनसंस्कारकघृतप्रायः सोऽत्ता यत्र शुद्धे चिन्मात्रेऽभेदकल्पनया वर्तते तच्छुद्धं ब्रह्म इत्था इत्थमीश्वराधिष्ठानभूतं को वेद चित्तशुद्ध्यादिकं विना कोपि न जानातीति कठवल्ल्यर्थो बोध्यः ।

(३) विषयवाक्येऽत्तुरश्रवणादत्तेति सूत्रासङ्गतिमाशङ्क्याहात्र चेति ।

(४) ननु जीवस्य कथं ब्रह्मक्षत्रादिभोक्तृत्वं पूर्वपक्षिणा साध्यमत आह ब्रह्मक्षत्रादीति ।

(५) एवमत्तृत्वस्य भोक्तृत्वपक्षे संशयेन पूर्वपक्षं प्रदर्श्य संहर्तृत्वपक्षे तं वक्तुं भूमिकामाह अथ त्विति ।

(६) वनितादिषु भोक्तृत्वेपि संहर्तृत्वाभावात् अत्तृत्वस्य भोक्तृत्वात्मप्रसाधनेन पूर्वपक्षमुपपादयति अत्रौदनस्येत्यादिना ।

(७) तथा स जीव एव इति, सर्वथा स जीव एवेति च पाठान्तरम् ।

(८) ननु प्रलये जीवनाशात्कथमजत्वमत आह संहारेति ।

(९) अविक्रियस्य परमात्मनः संहर्तृत्वायोगात् अग्निरेव संहर्तेत्याह यदीति । एवं चात्तृत्वस्य भोक्तृत्वपक्षे जीवो, संहर्तृत्वपक्षे चाग्निरेवात्ता न परमात्मेति पूर्वपक्षाभिप्रायः ।

च कार्यकारणसङ्घातः स्थितो, न तद्भोदनः । नह्योदनो भोगायतनं, नापि भोगसाधनमपि तु भोग्यः । (१)न च भोगायतनस्य भोगसाधनस्य वा भोग्यत्वं मुख्यम् । न चात्र मृत्युरुपसेचनतया कल्प्यते । न च जीवस्य कार्यकरणसङ्घातो ब्रह्मक्षत्रादिरूपो भक्ष्यः, कस्यचित् क्रूरसत्त्वस्य व्याघ्रादेः कश्चिद्भवेत्, न तु सर्वः सर्वस्य जीवस्य । तेन ब्रह्मक्षत्रविषयमपि जीवस्याप्तृत्वं न व्याप्नोति किमङ्ग पुनर्मृत्यूपसेचनव्याप्तं चराचरम् । (२)न चौदनपदात् प्रथमावगतभोग्यत्वानुरोधेन यथासम्भवमप्तृत्वं योज्यत इति युक्तम् । नह्योदनपदं श्रुत्या भोग्यत्वमाह, किन्तु लक्षणया । न च लाक्षणिकभोग्यत्वानुरोधेन 'मृत्युर्यस्योपसेचन'मिति च 'ब्रह्म क्षत्रं चे'ति च श्रुती सङ्कोचमर्हतः । न च ब्रह्मक्षत्रे एवात्र विवक्षिते, मृत्यूपसेचनेन प्राणमृन्मात्रोपस्थापनात , (३)प्राणिषु प्रधानत्वेन च ब्रह्मक्षत्रोपन्यासस्योपपत्तेः, अन्यनिवृत्तेरशाब्दत्वात , अनर्थत्वाच्च । (४)तथा च चराचरसंहर्तृत्वं परमात्मन एव, नाग्नेर्नापि जीवस्य, तथा च 'न जायते म्रियते वा विपश्चिदि'ति ब्रह्मणः प्रकृतस्य न हानं भविष्यति । 'क इत्था वेद यत्र स' इति च दुर्ज्ञानत्वमुपपत्स्यते । जीवस्य तु सर्वलोकप्रसिद्धस्य न दुर्ज्ञानता । तस्मादप्ता परमात्मैवेति सिद्धम् ॥ ९ ॥ १० ॥

(सू०) गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

संशयमाह—"तत्रे"ति (पृ० २७० पं० १२) पूर्वपक्षे प्रयोजनमाह—"यदि बुद्धिजीवावि"ति । सिद्धान्ते प्रयोजनमाह—**अथ जीवपरमात्मानावि**"ति । (५)औत्सर्गिकस्य मुख्यतावलात् पूर्वसिद्धान्तपक्षासम्भवेन पक्षान्तरं कल्पयिष्यत इति मन्वानः संशयमाक्षिपति—"**अत्राह आक्षेप्ते**"ति (पृ० २७१ पं० १) ऋतं सत्यमवश्यम्भावीति यावत् । समाधत्ते—"**अत्रोच्यत**" इति । (६)आध्यात्मिकाधिकारादन्यौ तावत्पारावशक्यौ कल्पयितुम् । तदिह बुद्धेरचैतन्येन परमात्मनश्च भोक्तृत्वनिषेधेन जीवात्मैवैक

---

(१) एवमोदनशब्दस्य भोक्तृत्वेनौदनपदार्थमुक्त्वौदनशब्दस्य लाक्षणिकस्य संनिहितमृत्यूपसेचनपदानुसारेणौदनगताविनाशित्वधर्मलक्षणार्थत्वाद् ब्रह्मक्षत्रोपलक्षितजगद्विनाशकर्तेश्वरः प्रतीयते न जीव इत्याह न चेत्यादिना ।

(२) ओदनपदात्प्रथमं भोक्तैव प्रतीयत इति यदुक्तं पूर्वपक्षिणा तत्राह न चौदनपदादित्यादिना। ओदनपदस्य भक्ष्यवाचिनो भोग्यमात्रपरत्वेन तवापि जघन्यवृत्त्याश्रयणात्तद्बलाद् ब्रह्मक्षत्रमृत्युश्रुतीनां संकोच इत्यर्थः ।

(३) मृत्युपदादिनाशिवस्तुमात्रविवक्षायां कथं ब्रह्मक्षत्रग्रहणमत आह प्राणिष्विति । ननु ब्रह्मक्षत्राभ्यामिरव्यावृत्तिः कुतो नात आह न्यानिवृत्तेरिति । यथा 'पञ्च पञ्चनखा भक्ष्या'इत्यत्र मनुष्यादिनिवृत्तिः परिसंख्याफलं, तथा चानर्थनिवृत्तिरेवमिहान्यानिवृत्तिरनर्थिका पुरुषार्थविशेषानवगमादित्यर्थः ।

(४) मायोपाधिद्वारा परस्यापि संहर्तृत्वमित्यभिप्रायेणोपसंहरति तथा चेति ।

(५) ननु लक्षणया पिबदपिबतोः पिबन्ताविति निर्देशोपपत्तेः पूर्वपक्षसिद्धान्तपक्षाक्षेपे च वाक्यस्य निर्विषयत्वप्रसङ्गादाक्षेपायोगमाशङ्क्याहौत्सर्गिकस्येति । अयं हि आक्षेप्ता पिबन्तावित्यस्य मुख्यमर्थमौत्सर्गिकमवाध्यं मन्यते प्राकृतसुपर्णविषयत्वं च वाक्यस्य पक्षान्तरं कल्पयिष्यत इति मन्यतेऽत आक्षेप इत्यर्थः ।

(६) लक्षणां वक्तुं 'मुख्यार्थासम्भवमाहाध्यात्मिकेति ।

पाता परिशिष्यते इति (१)'सृष्टीरुपदधाती'तिवद्विवचनानुरोधादपिबत्संसृष्टतां स्वार्थस्य पिबच्छब्दो लक्षयन् स्वार्थमजहन्नितरेतरयुक्तपिबदपिबत्परो भवतीत्यर्थः । अस्तु वा मुख्य एव, तथापि न दोष इत्याह-"यद्वे"ति । स्वातन्त्र्यलक्षणं हि कर्तृत्वं तच्च पातुरिव पाययितुरप्यस्तीति सोपि कर्ता । अत एव चाहुः--'यः कारयति स करोत्येवे'ति । एवं करणस्यापि स्वातन्त्र्यविवक्षया कथंचित्कर्तृत्वं, यथा काष्ठानि पचन्तीति । तस्मान्मुख्यत्वेऽप्यविरोध इति । तदेवं संशयं समाधाय पूर्वपक्षं गृह्णाति--"बुद्धिक्षेत्रज्ञावि"ति ।

(२)नियताधारता बुद्धिजीवसम्भविनी न हि ।
क्लेशात्कल्पयितुं युक्ता सर्वगे परमात्मनि ॥

न च पिबन्ताविति वत्प्रविष्टपदमपि लाक्षणिकं युक्तं, सति मुख्यार्थत्वे लाक्षणिकार्थत्वायोगात् , बुद्धिजीवयोश्च गुहाप्रवेशोपपत्तेः । अपि च 'सुकृतस्य लोक'इति सुकृतलोकव्यवस्थानेन कर्मगोचरानतिक्रम उक्तः । बुद्धिजीवौ च कर्मगोचरमनतिक्रान्तौ । जीवो हि भोक्तृतया बुद्धिश्च भोगसाधनतया धर्मस्य गोचरे स्थितौ, न तु ब्रह्म तस्यातदायत्तत्वात् । किं च छायातपाविति तमःप्रकाशावुक्तौ । न च जीवः परमात्मनोऽभिन्नस्तमः, प्रकाशरूपत्वात् । बुद्धिस्तु जडतया तम इति शक्योपदेष्टुम् । तस्माद्बुद्धिजीवावत्र कथ्येते । तत्रापि प्रेते विचिकित्सापनुत्तये बुद्धेर्भेदेन परलोकी जीवो दर्शनीय इति बुद्धिरुच्यते ।

एवं प्राप्तेऽभिधीयेत--

(३)ऋतपानेन जीवात्मा निश्चितोऽस्य द्वितीयता ।
ब्रह्मणैव सरूपेण न तु बुद्ध्या विरूपया ॥
प्रथमं सद्द्वितीयत्वे ब्रह्मणावगते सति ।
गुहाश्रयत्वं चरमं व्याख्येयमविरोधतः ॥

(४)गौः सद्द्वितीयेत्युक्ते सजातीयेनैव गवान्तरेणावगम्यते, न तु विजातीयेनाश्वादिना । तदिह चेतनो जीवः सरूपेण चेतनान्तरेणैव ब्रह्मणा सद्द्वितीयः प्रतीयते, न त्वचेतनया विरू

---

(१) सृष्टीरिति । 'सृष्टीरुपदधाती'ति समाम्नाय 'एकया स्तुवत' इत्यादिना सृष्ट्यसृष्टिमन्त्रा उक्तास्तत्र यथा सृष्टीरुपदधातीति यदि सृष्टिमन्त्रकेष्टकानामाधाने विधानं तर्हीष्टकासु सृष्ट्यसृष्टिमन्त्रत्वविशेषानवगमात्सर्वा एव सृष्टिमन्त्रका इति सृष्टिपदरहितमन्त्राणामानर्थक्यवारणाय सृष्टिशब्दः सृष्ट्यसृष्टिसमुदायं लक्षयित्वा तत्समुदायिनः सर्वान्मन्त्रान् लक्षयति, एवमिहापि पिबच्छब्दः स्वार्थस्यापिबत्संसृष्टता पिबदपिबत्समुदायमिति यावन्तं लक्षयन्स्वार्थं पिबन्तमजहदितरेतरयोगलक्षणं समुदायं प्रति समुदायीभूतापिबदपिबत्परो भवति न पिबत्येव वर्तते नापि लक्षयन् गंगाशब्दवत्स्वार्थं त्यजेदित्यर्थः ।

(२) पूर्वत्र यथा ब्रह्मक्षत्रपदस्य संनिहितमृत्युपदानुसारेणानित्यवस्तुपरत्वमेवमिहापि पिबच्छब्दस्य संनिहितगुहाप्राविष्टादिपदानुसारेण बुद्धिक्षेत्रज्ञपरत्वमित्याह नियतेति । कारिकार्धः सुगमः ।

(३) सिद्धान्तसंग्रहश्लोकावाह ऋतपानेनेति । ऋतं पिबन्ताविति ऋतपानेन जीवात्मा ऋतपानकर्तेति निर्णीतम् , अस्य जीवस्य या द्वितीयता द्विवचनाधारता सा ब्रह्मणैव तस्य चेतनत्वेन जीवसरूपत्वात् नतु बुद्ध्या तस्या जडत्वेन विसदृशत्वादित्यर्थः । ननु संनिहितगुहाप्राविष्टपदाद् बुद्धिर्द्वितीया किं न स्यादत आह प्रथममिति । उक्तरीत्या पूर्वं ब्रह्मणा सह जीवस्य सद्द्वितीयत्वे निश्चिते सति गुहाप्राविष्टपदमपि एतदविरोधेनैव पश्चाद्व्याख्येयमित्यर्थः ।

(४) ऋतपानेनेति दृष्टान्तप्रदर्शनपूर्वकं व्याचष्टे गौरिति ।

पया बुद्ध्या । (१)तदेव'मृतं पिबन्ताविति'त्यत्र प्रथममवगते ब्रह्मणि तदनुरोधेन चरमं गुहाश्रयत्वं शालग्रामे हरिरितिवद्व्याख्येयम् । बहुलं हि गुहाश्रयत्वं ब्रह्मणः श्रुतय आहुः । तदिदमुक्तं 'तद्दर्शनादि'ति । तस्य ब्रह्मणो गुहाश्रयत्वस्य श्रुतिषु दर्शनादिति । एवं च प्रथमावगतब्रह्मानुरोधेन सुकृतलोकवर्तित्वमपि तस्य लक्षणया छत्रिन्यायेन गमयितव्यम् । छायातपत्वमपि जीवस्याविद्याश्रयतया ब्रह्मणश्च शुद्धप्रकाशस्वभावस्य तदनाश्रयतया मन्तव्यम् ॥ ११ ॥

(सू०) विशेषणाच्च ॥ १२ ॥

इममेव न्यायं 'द्वा सुपर्णे'त्यत्राप्युदाहरणे कृत्वाचिन्तया योजयति **"एष एव न्याय"** इति (पृ० २७३ पं० १०) । अत्रापि किं बुद्धिजीवौ उत जीवपरमात्मानाविति संशय्य करणरूपाया बुद्धेरेवांसि पचन्तीतिवत् कर्तृत्वोपचाराद् बुद्धिजीवाविह पूर्वपक्षयित्वा सिद्धान्तयितव्यम् । सिद्धान्तश्च भाष्यकृता स्फोरितः । तद्दर्शनादिति च 'समान वृक्षे पुरुषो निमग्न' इत्यत्र मन्त्रे । न खलु मुख्ये कर्तृत्वे सम्भवति करणे कर्तृत्वोपचारो युक्त इति कृत्वाचिन्तामुद्घाटयति—**"अपर आह"** (पृ० २७४ पं० २) । **"सत्त्वं"** बुद्धिः । शङ्कते–**"सत्त्वशब्द"** इति । सिद्धान्तार्थं ब्राह्मणं व्याचष्टे इत्यर्थः । निराकरोति—**"तन्न"**ति । **"येन स्वप्नं पश्यती"**ति । येनेति करणमुपदिशति । ततश्च भिन्नं कर्तारं क्षेत्रज्ञम् । **"याऽयं शारीर उपद्रष्टे"**ति । अस्तु तर्ह्यस्याधिकरणस्य पूर्वपक्ष एव ब्राह्मणार्थः, (२)वचनविरोधे न्यायस्याभासत्वादित्यत आह—**"नाप्यस्याधिकरणस्य पूर्वपक्षं भजत"** इति । एवं हि पूर्वपक्षमस्य भजेत, यदि हि क्षेत्रज्ञे संसारिणि पर्यवस्येत् । तस्य तु ब्रह्मकर्तायां पर्यवस्यन्न पूर्वपक्षमपि स्वीकरोतीत्यर्थः । अपि च—**"तावेतौ सत्त्वक्षेत्रज्ञौ न ह वा एवंविदे किंचन रज (३)आध्वंसत"** इति । रजोऽविद्या नाध्वंसनं न संश्लेषमेवंविदि करोति । एतावतैव विद्योपसंहाराज्जीवस्य ब्रह्मात्मतापरतास्य लक्ष्यत इत्याह–**"तावता च"**ति । चोदयति—**"कथं पुन"**रिति । निराकरोति—**"उच्यते । नेयं श्रुति"**रिति । (४)अनश्नन् जीवो ब्रह्माभिचाकशीतित्युक्ते शङ्कते—यदि जीवो ब्रह्मात्मा नाश्नोति, कथं तर्ह्यस्मिन् भोक्तृत्वावगमः, चैतन्यसमानाधिकरणं हि भोक्तृत्वमवभासत इति । तन्निरासायाह श्रुतिः **"तयोरन्यः पिप्पलं स्वाद्वत्ती"**ति । एतदुक्तं भवति–नेदं भोक्तृत्वं जीवस्य तत्त्वतोऽपि तु बुद्धिसत्त्वं सुखादिरूपपरिणतं चितिच्छायापत्त्योपपन्नचैतन्यमिव भुङ्क्ते, न तु तत्त्वतो जीवः परमात्मा भुङ्क्ते । तदेतदध्यासभाष्ये कृतव्याख्यानम् । तदेनेन कृत्वाचिन्तोद्घाटिता ॥ १२ ॥

(सू०) अन्तर उपपत्तेः ॥ १३ ॥

---

(१) प्रथममिति श्लोकं सोदाहरणं व्याख्याति तदेवमिति ।

(२) वचनविरोध इति । अत्तीत्यस्य मुख्यकर्तृत्वसम्भवे करणे कर्तृत्वोपचारो न युक्त इति न्यायस्य बुद्धिजीवपरत्वेन मन्त्रव्यापकब्राह्मणविरोधे आभासत्वमित्यर्थः ।

(३) आध्वंसते—आगच्छति ।

(४) चेतनस्य क्षेत्रज्ञस्याभोक्तृतां ब्रह्मस्वभावं वक्ष्यामीति श्रुतिः प्रवृत्तेति भाष्यमुपादयन्मन्त्रार्थमाहानश्नन्निति । बुद्धेरन्यो यो जीवः सोऽनश्नन्नभोक्तृ ब्रह्म भवन्नभिपश्यतीत्यर्थः । अस्मिन्श्लोक एवार्थे स्वयमेव श्रुतिराहेत्याह तान्निरासायेति ।

नन्वन्तस्तद्धर्मोपदेशादि'त्यनेनैवैतद्गतार्थम्, सन्ति खल्वत्राप्यमृतत्वाभयत्वादयो ब्रह्मधर्मा प्रतिबिम्बजीवदेतास्वसम्भविनः, तस्माद्ब्रह्मधर्मोपदेशाद्ब्रह्मैवात्र विवक्षितम्, साक्षाच्च ब्रह्मशब्दोपादानात्। उच्यते—

(१)एष दृश्यत इत्येतत् प्रत्यक्षेऽर्थे प्रयुज्यते।
परोक्षं ब्रह्म न तथा प्रतिबिम्बे तु युज्यते॥
उपक्रमवशात्पूर्वमितरेषां हि वर्णनम्।
कृतं न्यायेन येनैव स खल्वत्रानुषज्यते॥

(२)'ऋतं पिबन्ताविं'त्यत्र हि जीवपरमात्मानौ प्रथमावगताविति तदनुरोधेन गुहाप्रवेशादयः पश्चादवगता व्याख्याताः, तद्वदिहापि 'य एषोऽक्षिणि पुरुषो दृश्यत' इति प्रत्यक्षाभिधानात् प्रथममवगते छायापुरुषे तदनुरोधेनामृतत्वाभयत्वादयः स्तुत्याः कथंचिद्व्याख्येयाः। तत्र चामृतत्वं कतिपयक्षणावस्थानाद्, अभयत्वमचेतनत्वात्, पुरुषत्वं पुरुषाकारत्वात्, आत्मत्वं कनीनिकाया(३) आपनात्, ब्रह्मरूपत्वमुक्तरूपामृतत्वादियोगात्। एवं वामनात्वादयोऽप्यस्य स्तुत्यैव कथंचिन्नेतव्याः। 'कं च खं चे'त्यादि तु वाक्यमन्त्रीनां नाचार्यवाक्यं नियन्तुमर्हति। '(४)आचार्यस्तु ते गतिं वक्ते'ति च गत्यन्तराभिप्रायं, न तूक्तपरिशिष्टाभिप्रायम्। तस्माच्छायापुरुष एवात्रोपास्य इति पूर्वः पक्षः। सम्भवमात्रेण तु जीवदेवते उपन्यस्ते, (५)बाधकान्तरोपदर्शनाय च। एष दृश्यते इत्यस्यात्राभावात्, (६)अन्तस्तद्धर्मोपदेशादित्यनेन निराकृतत्वात्।

एवं प्राप्त उच्यते—(७)'य' 'एष' इति

अनिष्पन्नाभिधाने द्वे सर्वनामपदे सती।
प्राप्य संनिहितस्यार्थं भवेतामभिधातृणी॥

संनिहिताश्च पुरुषात्मादिशब्दास्ते च न यावत्स्वार्थमभिदधति तावत्सर्वनामभ्यां नार्थतोऽप्यभिधीयत इति कुतस्तदर्थस्यापरोक्षता। पुरुषात्मशब्दौ च सर्वनामनिरपेक्षौ स्व-

---

(१) इयं च सुखविशिष्टब्रह्मप्रकरणं नास्तीति कृत्वाचिन्ताऽनश्च वक्ष्यमाणः सर्वनामार्थः, स च मनोमयतद्धितार्थवन्न संदिग्धो दृश्यत इत्यस्य निश्चायकत्वादित्याह एष इति। न तथा—न प्रत्यक्षम्। युज्यते प्रत्यक्षत्वादिति शेषः। उपक्रमवशादित्यनेन सङ्गतिरुक्ता।

(२) द्वितीयश्लोकं व्याचष्टे ऋतामिति।

(३) अक्षिपुत्तालिकायाः। कनीनिकायतनत्वादिति मु० मु० पाठः।

(४) भिन्नवक्तृत्वेन वाक्ययोर्न नियम्यनियामकत्वं चेत्कथं तर्ह्यग्निभिर्गतिं वक्ष्यतीति शेषोद्धारः कृतोऽत आहाचार्यस्त्विति। तथाच पञ्चदशसूत्रे प्रदर्शयिष्यमाणवाक्यैर्न ब्रह्मपरत्वसङ्गतिः कर्तुमर्हेति भावः।

(५) बाधकान्तरेति। अनवस्थितेतरसम्भवाचेति सूचितबाधकान्तरदर्शनाय चेत्यर्थः।

(६) नन्वक्षिणीत्याधारनिर्देशाज्जीवदेवते किं न स्यातामत आह अन्तस्तद्धर्मेति।

(७) 'य एष' इत्यादेः प्रथमश्रुतस्यापि सापेक्षत्वान्न चाक्षुषत्वसमर्पकत्वमित्याभिप्रायेण सिद्धान्तमाह य एष इति प्रपूर्यानिष्पन्नेति श्लोकेन। य इति एष इति च सर्वनामनी विशेषापेक्षत्वात्स्वतोऽपर्यवसिताभिधाने सन्निहितपुरुषादिपदस्यार्थं विशेष्यं प्राप्य वाचके भवेतामिति श्लोकार्थः।

(८) अर्थलेशः। अपरोक्षता—चाक्षुषत्वं सर्वनामार्थस्य पुरुषस्य कुतः। स्वरसत इत्यनेन छायात्मनि योजनावलेशो वारितः।

रसतो जीवे वा परमात्मनि वा वर्तते इति। न च तयोश्चक्षुषि प्रत्यक्षदर्शनमिति निरपेक्षपुरुषपदप्रत्यायितार्थानुरोधेन य एष इति दृश्यत इति च यथासम्भवं व्याख्येयम्। (१)व्याख्यातं च सिद्धवदुपादानं शास्त्राद्यपेक्षं विद्वद्विषयं प्रशंसनार्थम्। विदुषः शास्त्रेण उपलब्धिरेव दृढतया प्रत्यक्षवदुपचर्यते प्रशंसार्थमित्यर्थः। अपि च तदेव चरमं प्रथमानुगुणतया नीयते यत्नेतुं शक्यम्, अल्पं च, इह त्वमृतत्वादयो बहवश्चाशक्याश्च नेतुम्, नहि स्वसत्ताक्षणावस्थानमात्रममृतत्वं भवति, तथा सति किं नाम नामृतं स्यादिति व्यर्थममृतपदम्। भयाभये अपि चेतनधर्मौ नाचेतने सम्भवतः। एवं वामनीत्वादयोऽप्यन्यत्र ब्रह्मणा नेतुमशक्याः। प्रत्यक्षव्यपदेशश्चापपादितः। तदिदमुक्तं **'मुपपत्ते'**रिति। 'एतदमृतमभयमेतद्ब्रह्मे'त्युक्ते स्यादाशङ्का—ननु सर्वगतस्येश्वरस्य कस्माद्विशेषेण चक्षुरेव स्थानमुपदिश्यत—इति, तत्परिहरति श्रुतिः—**"तद्यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छती"**ति (पृ० २७६ पं० १३)। वर्त्मनी—पक्षस्थाने। एतदुक्तं भवति—निर्लेपस्येश्वरस्य निर्लेपं चक्षुरेव स्थानमनुरूपमिति। तदिदमुक्तं **"तथा परमेश्वरानुरूपमि"**ति। **"संयद्वामादिगुणोपदेशश्च तस्मिन् ब्रह्मणि, कल्पते"** घटते, समवेतार्थत्वात्। प्रतिबिम्बादिषु त्वसमवेतार्थः। (२)वननीयानि, सम्भजनीयानि शोभनीयानि पुण्यफलानि वामानि। संयन्ति सङ्गच्छमानानि वामान्यनेनेति संयद्वामः परमात्मा। तत्कारणकत्वात् पुण्यफलोत्पत्तेः, तेन पुण्यफलानि सङ्गच्छन्ते। (३)स एव पुण्यफलानि वामानि नयति लोकमिति वामनीः। एष एव भामनीः। भामानि भानानि, तानि नयति लोकमिति भामनीः। तदुक्त श्रुत्या—'तमेवं भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति ॥ १३ ॥

(सू०) स्थानादिव्यपदेशाच्च ॥ १४ ॥

आशङ्कोत्तरमिदं सूत्रम्। आशङ्कामाह—**कथं पुनरिति** (पृ० २७७ पं० २)। स्थानिनो हि स्थानं महद्दृष्टम्, यथा यादसामब्धिः। तत्कथमल्पं चक्षुरधिष्ठानं परमात्मनः परममहत इति शङ्कार्थः। परिहरति—**"अत्रोच्यत"**इति। स्थानान्यादयो येषां ते स्थानादयो नामरूपप्रकारास्तेषां व्यपदेशात्। सर्वगतस्यैकस्थाननियमो (४)नावकल्पते, न तु नानास्थानत्वं, नभस इव नानासूचीपाशादिस्थानत्वम्। विशेषतस्तु ब्रह्मणस्तानि तान्युपासनास्थानानीति तैरस्य युक्तो व्यपदेशः ॥ १४ ॥

---

(१) व्याख्यातं चेति। अधिकरणावसानभाष्य इत्यर्थः। तदुपादत्ते सिद्धवदिति। अस्यार्थमाह विदुष इति। विदुषो विषयस्तेन निष्पाद्या शास्त्राद्योपलब्धिः सा परोक्षापि प्रत्यक्षेति स्तूयते इत्यर्थः। उपचारे निमित्तम् दृढतयेति।

(२) 'एतं संयद्वाम इत्याचक्षते, एतं हि सर्वाणि वामान्यभिसंयन्ती'ति श्रुतिमीश्वरस्य फलभोक्तृत्वभ्रमव्यावर्तनेन व्याचष्ट वननीयानीति। जीवान्प्रति सङ्गच्छमानानि यानि वामानि तानि येन हेतुना संगच्छन्ते स संयद्वामः। एतं हीत्यस्यैतं निमित्तीकृत्येत्यर्थः।

(३) 'एष उ वामनी'रित्यस्यार्थमाह स एवेति। फलोत्पादकत्वमात्रं संयद्वामत्वम्, तुल्यप्रापकत्वं च वामनीत्वमित्यनयोर्भेदो बोध्यः।

(४) स्थानान्तरव्यापकत्वम्।

अपि च प्रकृतानुसारादपि ब्रह्मवात्र प्रत्येतव्यं, न तु प्रीतीबम्बजीवेदवतौ इत्याह सूत्रकारः—

(सू०) सुखविशिष्टाभिधानादेव च ॥ १५ ॥

एवं खल्वाख्यायते—'उपकोसलो ह वै कामलायनः(१) सत्यकामे जाबाले ब्रह्मचर्यमुवास, तस्याचार्यस्य द्वादश वर्षाण्यग्निनुपचार, स चाऽऽचार्योऽन्यान् ब्रह्मचारिणः स्वाध्यायं ग्राहयित्वा समावर्तयामास, तमेवैकमुपकोसलं न समावर्तयति स्म, जायया च तत्समावर्तनायार्थितोपि तद्वचनमवधीर्याचार्यः प्रोषितवान् , ततोऽतिदूनमानसम(२)ग्निपरिचरणकुशलमुपकोसलमुपेत्य त्रयोऽग्नयः करुणापराधीनचेतसः श्रद्दधानायाऽस्मै दृढभक्तये समेत्य ब्रह्मविद्यामूचिरे 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' इति । अथोपकोसल उवाच 'विजानाम्यहं प्राणो ब्रह्मेति, स हि सूत्रात्मा विभूतिमत्तया ब्रह्मरूपाविर्भावाद् ब्रह्मेति, किन्तु कं च खं च ब्रह्मेत्येतन्न विजानामि, नहि विषयेन्द्रियसम्पर्कजं सुखमनित्यं लोकसिद्धं, खं च भूताकाशमचेतनं ब्रह्म भवितुमर्हति । अथैनमग्नयः प्रत्यूचुः—यद्वाव कं तदेव खं यदेव खं तदेव कमिति । एवं सम्भूयोक्त्वा प्रत्येकं च स्वविषयां विद्यामूचुः—(३)'पृथिव्यग्निरन्नमादित्य' इत्यादिना । पुनस्त एनं सम्भूयोचुः—एषा सोम्य तेऽस्मद्विद्या प्रत्येकमुक्ता स्वविषया विद्या, आत्मविद्या चास्माभिः सम्भूय पूर्वमुक्ता—'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे'ति, आचार्यस्तु ते गतिं वक्ता, ब्रह्मविद्ययमुक्तास्माभिर्गतिमात्रं त्ववशिष्टं नोक्तम् , तत्तु विद्याफलप्राप्तये जाबालस्तवाचार्यो वक्ष्यतीत्युक्त्वाऽग्नय उपरेमिरे' । एवं व्यवस्थिते यद्वा व कं तदेव खं यदेव खं तदेव कमित्येतद्व्याचष्टे भाष्यकारः—**"तत्र खंशब्द"** इति (पृ० २७८ पं० ४) । **"प्रतीकाभिप्रायेणे"**ति । आश्रयान्तरप्रत्ययस्याश्रयान्तरे क्षेपः प्रतीकः । यथा ब्रह्मशब्दः परमात्मविषयो नामादिषु क्षिप्यते । इदमेव तद्ब्रह्म ज्ञेयं यन्नामेति । तथेदमेव तद्ब्रह्म यद्भूताकाशमिति प्रतीतिः स्यात् । (४)न चैतत्प्रतीकत्वमिष्टम् । लौकिकस्य सुखस्य साधनपारतन्त्र्यं क्षयिष्णुता चामयस्तेन सह वर्तत इति सामयं सुखम् । तदेवं व्यतिरेके दोषमुक्त्वोभयान्वये गुणमाह—**"इतरेतरविशेषितौ त्वि"**ति । (५)तदर्थयोर्विशेषितत्वाच्छब्दावपि विशेषितावुच्येते । सुखशब्दसमानाधिकरणो हि खंशब्दो भूताकाशमर्थं परित्यज्य ब्रह्मणि गुणयोगेन वर्तते । तादृशा च खेन सुखं विशिष्यमाणं सामयाद्व्यावृत्तं निरामयं भवति ।

---

(१) कमलस्य गोत्रं कामलस्तस्यापत्यं कामलायन इत्यर्थः ।

(२) गुरुप्रसादाभावात्परितप्तमानसम् ।

(३) पृथिव्यग्निरिति । उपकोशलं गार्हपत्योऽनुशशास 'पृथिव्यग्निरन्नमादित्य'इति इमामिश्चतस्रस्तनवो य एष आदित्ये पुरुषो दृश्यते सोहमस्मीति । तथाऽन्वाहार्यपचनोऽनुशशास आपो दिशो नक्षत्राणि चन्द्रमा इति मम तनवो य एष चन्द्रमसि पुरुषो दृश्यते सोहमस्मि इति । तथाऽऽहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति मम तनवो य एष विद्युति पुरुषो दृश्यते सोहमस्मीति । इत्येवं पृथगुपदेशोऽग्नित्रयस्य बोध्यः ।

(४) न चैतत्प्रतीकत्वमिष्टमिति । एषा सोम्य आत्मविद्येत्यग्निभिः कं खं ब्रह्मेति विद्याया विद्यात्वेन परामर्शादित्यर्थः ।

(५) ननु विशेषणविशेष्यभावोऽर्थयोः शब्दयोस्तु सामानाधिकरण्यं तथाचाग्नयुक्तिरितरेतरविशेषितौ कं खं शब्दावेति भाष्यस्येत्याशङ्क्याह तदर्थयोरिति । सुखस्य वाचकः शब्दः सुखशब्दः ।

तस्मादुपपन्नमुभयोपादानम् । ब्रह्मशब्दाभ्यासस्य प्रयोजनमाह "तत्र द्वितीय" इति । ब्रह्मपदं कम्पदस्योपरि प्रयुज्यमानं शिरः, एवं खम्पदस्यापि ब्रह्मपदं शिरो, ययोः कखम्पदयोस्ते ब्रह्मशिरसी, तयोर्भावो ब्रह्मशिरस्त्वम् । अस्तु प्रस्तुते किमायातमित्यत आह-"तदेवं वाक्योपक्रम" इति । नन्वग्निभिः पूर्वं निर्दिश्यतां ब्रह्म,'य एषोऽक्षिणी'त्यार्चायवाक्येऽपि तदेवानुवर्तनीयमिति तु कुत इत्याह—"आचार्यस्तु ते गतिं वक्तेति च गतिमात्राभिधान"मिति (पृ० २७९ पं० २) । यद्यप्येते भिन्नवक्तृणी वाक्ये तथापि पूर्वेण वक्त्रा एकवाक्यतां गमिते, गतिमात्राभिधानात् । किमुक्तं भवति ? तुभ्यं ब्रह्मविद्याऽस्माभिरुपदिष्टा, तद्विदस्तु गतिर्नोक्ता, तां च किंचिदधिकमाध्येयं(१) पूरयित्वाऽऽचार्यो वक्ष्यतीति, तदनेन पूर्वासंबद्धार्थान्तरविवक्षा वारितेति । (२)अथैवमाग्निभिरुपदिष्टे प्रोषित आचार्यः काले नाजगाम, आगतश्च वीक्ष्योपकोशलमुवाच,-'ब्रह्मविद इव ते सोम्य! मुखं प्रसन्नं भाति, को नु त्वामनुशशासे'ति । उपकोशलस्तु ह्रीणो भीतश्च को नु मामनुशिष्याद् भगवन्! प्रोषिते त्वयीत्यापाततोपज्ञाय(३) निर्बध्यमानो यथावदग्नीनामनुशासनमवोचत् । तदुपश्रुत्य चाचार्यः सुचिरं क्लिष्ट उपकोशले समुपजातदयार्द्रहृदयः प्रत्युवाच-सोम्य किल तुभ्यमग्नयो न ब्रह्म साकल्येनावोचन् तदहं तुभ्यं साकल्येन वक्ष्यामि, यदनुभवमाहात्म्याद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत-इति । एवमुक्तवत्याचार्य आहोपकोशलः—ब्रवीतु मे भगवानिति । तस्मै होवाचाचार्योर्चिरादिकां गतिं वक्तुमनाः, यदुक्तमग्निभिः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति तत्पूरणाय 'य एषोऽक्षिणि पुरुषो दृश्यते' इत्यादि । एतदुक्तं भवति(४)आचार्येण—ये यत् सुखं ब्रह्माक्षिस्थानं संयद्वामं वामनीभामनीत्येवंगुणकं प्राणसहितमुपासते ते सर्वेऽपहतपाप्मानोऽन्यत्कर्म कुर्वन्तु मा वा कार्षुः, अर्चिषमर्चिरभिमानिनीं देवतामभिसंभवन्ति प्रतिपद्यन्ते, अर्चिषोऽहरहर्देवताम् , अहः आपूर्यमाणपक्षम् शुक्लपक्षदेवताम् , ततः षण्मासान् येषु मासेषूत्तरां दिशमेति सविता, ते षण्मासा उत्तरायणं, तद्देवतां प्रतिपद्यन्ते, तेभ्यो मासेभ्यः संवत्सरदेवताम् , तत आदित्यम् , आदित्याच्चन्द्रमसं, चन्द्रमसो विद्युतं, तत्र स्थितानेतान् पुरुषः कश्चिद्ब्रह्मलोकादवतीर्यामानवोऽमानव्यां सृष्टौ भवो ब्रह्मलोकभव इति यावत् , स तादृशः पुरुष एतान् सत्यलोकस्थं कार्यं ब्रह्म गमयति, स एष देवपथो देवैरर्चिरादिभिर्नेतृभिरुपलक्षित इति देवपथः, स एव ब्रह्मणा गन्तव्येनोपलक्षित इति ब्रह्मपथः, एतेन पथा प्रतिपद्यमानाः सत्यलोकस्थं ब्रह्म इमं मानवं मनोः सर्गं किं भूतमावर्तं जन्मजरामरणपौनःपुन्यमावृत्तिस्तत्कर्ताऽऽवर्तो मानवो लोकस्तं नावर्तन्ते । तथा च स्मृतिः—

(५)ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥ १५ ॥

---

(१) अक्षिस्थानसंयद्वामादिगुणं च पूरयित्वेत्यर्थः ।

(२) अग्न्याचार्योपदेशयोरर्थान्तरत्ववारणाय पूर्वप्रदर्शिताग्न्युपदेशाख्यानपरवर्तिनीमाख्यायिकामाह अथेत्यादिना । (३) अपज्ञाय—अपहृत्य ।

(४) अग्निमसूत्रस्थभाष्योक्तगीतास्मृत्यर्थं छान्दोग्यार्थं चाचार्यगतिवचनेनैव स्फुटयति आचार्येणेति । अतएवाह वक्ष्यति तदनेन सूत्रं व्याख्यातम् । ये सुखमिति मु० मु० पु० पाठः ।

(५) उक्तछान्दोग्यस्थार्चिःशीघ्रगतिप्रादकेऽर्थे स्मृतिं प्रमाणयति ब्रह्मणेति ।

तदनेनोपाख्यानव्याख्यानेन

(सू०) श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १६ ॥

इत्यपि सूत्रं व्याख्यातम् ॥ १६ ॥

(सू०) अनवस्थितेरसंभवाच्च नेतरः ॥ १७ ॥

'य एषोक्षिणी'ति नित्यवत् श्रुतमनित्ये छायापुरुषे नावकल्पते । कल्पनागौरवं चास्मिन् पक्षे प्रसज्यत इत्याह—**"न चोपासनाकाल"** इति (पृ० २८० पं १२) । **"तथा विज्ञानात्मनोपी"**ति । (पृ० २८१ पं० ३) विज्ञानात्मनो हि न प्रदेशे उपासनाऽन्यत्र दृष्टचरी, ब्रह्मणस्तु तत्र श्रुतपूर्वेत्यर्थः । **"भीषा"** भिया । **"अस्मा"** ब्रह्मणः । शेषमतिरोहितार्थम् ॥ १८० ॥

(सू०) अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥
नच स्मार्तमतद्धर्माभिलापात् ॥ १९ ॥

(१)स्वकर्मोपार्जितं देहं तेनान्यच्च नियच्छति ।
तक्षादिरशरीरस्तु नात्मान्तर्यामितां भजेत् ॥

(२)प्रवृत्तिनियमलक्षणं हि कार्यं चेतनस्य शरीरिणः स्वशरीरेन्द्रियादौ वा शरीरेण वा वास्यादौ दृष्टं नाशरीरस्य ब्रह्मणो भवितुमर्हति । नहि जातु वटाङ्कुरः कुटजबीजाज्जायते । तदनेन 'जन्माद्यस्य यत' इत्येतदप्याक्षिप्तं वेदितव्यम्(३) । तस्मात्परमात्मनः शरीरेन्द्रियादिरहितस्यान्तर्यामित्वाभावात् प्रधानस्य वा पृथिव्याद्यभिमानवत्या देवताया वाऽणिमाद्यैश्वर्ययोगिनो योगिनो वा जीवात्मनो वाऽन्तर्यामिता स्यात् । तत्र यद्यपि प्रधानस्यादृष्टत्वाश्रुतत्वामतत्वाविज्ञातत्वानि सन्ति, तथापि तस्याचेतनस्य द्रष्टृत्वश्रोतृत्वमन्तृत्वविज्ञातृत्वानां श्रुतानामभावाद् अनात्मत्वा'दैष त आत्मे'ति श्रुतेरनुपपत्तेर्न प्रधानस्यान्तर्यामिता । यद्यपि पृथिव्याद्यभिमानिनो देवस्यात्मत्वमस्ति, अदृष्टत्वादयश्च सह द्रष्टृत्वादिभिरुपपद्यन्ते, शरीरेन्द्रियादियोगश्च, 'पृथिव्येव यस्यायतनमग्निर्लोको मनोज्योतिरि'त्यादिश्रुतेः, तथापि तस्य प्रतिनियतनियमनाद् 'यः सर्वान् लोकानन्तरो यमयति यः सर्वाणि भूतान्यन्तरो यमयति' इति श्रुतिविरोधादनुपपत्तेः । योगी तु यद्यपि लोकभूतवशितया सर्वान् लोकान् सर्वाणि च भूतानि नियन्तुमर्हति तत्रतत्रानेकविधदेहेन्द्रियादिनिर्माणेन 'स एकधा भवति त्रिधा भवती'त्यादि-

---

(१) पूर्वपक्षसङ्गृहश्लोकमाह स्वकर्मेति । तक्षादिः शिल्पी स्वकर्मजशरीरेण तं देहं तद्द्वाराऽन्यच्च वास्यादिकं नियच्छति, अशरीरस्तु परमात्मैवमन्तर्यामी न भवेदिति श्लोकार्थः । अन्तशरीरः परमात्मान्तर्यामी घटवदिति पूर्वपक्षिसूत्रेनानुमानं बोध्यम् । तत्र च स्वशरीरानियन्तरि शरीरान्तररहिते तक्षणि व्यभिचारवारणायोक्तं स्वकर्मेति । तथा च न नियम्यातिरिक्तशरीरराहित्यं हेतुः किन्तु शरीरेण भोक्तृत्वासम्बन्धः, एवं च तक्षा स्वकर्मजदेहेन भोगवानिव तं देहं तद्द्वारा वास्यादि च नियच्छतीति न व्यभिचारः ।

(२) उक्तानुमानेऽचेतनत्वमुपाधिमाशंक्य मुक्ते चेतने साध्यवत्यप्युपाध्यभावात्साध्याव्यापकत्वमभिप्रेत्याह प्रवृत्तीति । नियमनं शरीरिणो न चेतनमात्रस्य मुक्ते तदभावादित्यर्थः । विपक्षे बाधकमाह नहीति ।

(३) अनेन 'जन्मादिसूत्रे उभयकारणत्वोक्तेर्नियन्तृत्वं सिद्धमि'त्याशङ्का परास्ता ।

श्रुतिभ्यः, तथापि 'जगद्व्यापारवर्जं प्रकरणादि'ति वक्ष्यमाणेन न्यायेन विकारविषये विद्यासिद्धानां व्यापाराभावात्सोऽपि नान्तर्यामी । (१)तस्मात्पारिशेष्याज्जीव एव चेतनो देहेन्द्रियादिमान् द्रष्टृत्वादिसंपन्नः स्वयमदृश्यादिः स्वात्मनि वृत्तिविरोधात्, अमृतश्च देहनाशेऽप्यनाशात् । (२)अन्यथाऽऽमुष्मिकफलोपभोगाभावेन कृतविप्रणाशाकृताभ्यागमप्रसङ्गात् । 'य आत्मनि तिष्ठन्नि'ति चाभेदेऽपि कथंचिद्भेदोपचारात् 'स भगवः कस्मिन्प्रतिष्ठितः स्वे महिम्नी'तिवत् । 'यमात्मा न वेदे'ति च स्वात्मनि वृत्तिविरोधाभिप्रायम् । 'यस्यात्मा शरीरमि'त्यादि च सर्वं 'स्वे महिम्नी'तिवद्योजनीयम् । यदि पुनरात्मनोऽपि नियन्तुरन्यो नियन्ता भवेद् वेदिता वा ततस्तस्याप्यन्य इत्यनवस्था स्यात् । सर्वलोकभूतनियन्तृत्वं च जीवस्यादृष्टद्वारा । तदुपार्जितौ हि धर्माधर्मौ नियच्छत इत्यनया द्वारा जीवो नियच्छति । एकवचनं च जात्याभिप्रायम् । (३)तस्माज्जीवात्मैवान्तर्यामी, न परमात्मेति ।

एवं प्राप्ते ऽभिधीयते—

(४)देहेन्द्रियादिनियमे नास्य देहेन्द्रियान्तरम् ।
तत्कर्मोपार्जितं तच्चेत्तदविद्यार्जितं जगत् ॥

श्रुतिस्मृतीतिहासपुराणेषु तावदत्रभवतः सर्वज्ञस्य सर्वशक्तेः परमेश्वरस्य जगद्योनित्वमवगम्यते । न तत्पृथग्जनसाधारण्यानुमानाभासेनागमविरोधिना शक्यमपह्नोतुम् । तथा च सर्वं विकारजातं तदविद्याशक्तिपरिणामस्तस्य शरीरेन्द्रियस्थाने वर्तत इति यथायथं पृथिव्यादिदेवतादिकार्यकरणैस्तानेव पृथिव्यादिदेवतादीन् शक्नोति नियन्तुम् । (५)न चानवस्था, नहि नियन्त्रन्तरं तेन नियम्यते, किन्तु यो जीवो नियन्ता लोकसिद्धः स परमात्मैवोपाध्यवच्छेदकल्पितभेदस्तथा व्याख्यायत इत्यसकृदावेदितं, तत्कृतो नियन्त्रन्तरं, कुतश्चानवस्था । तथा च 'नान्योऽतोऽस्ति द्रष्टे'त्याद्या अपि श्रुतय उपपन्नार्थाः । परमार्थतोऽन्तर्यामिणोऽन्यस्य जीवात्मनो द्रष्टुरभावात् । (६)अविद्याकल्पितजीवपरमात्मभेदाश्रयास्तु-ज्ञातृज्ञेयभेदश्रुतयः प्रत्यक्षादीनि प्रमाणानि संसारानुभवो निधिनिषेधशास्त्राणि च । एवं चाधिदैवादिष्वेकस्यैवान्तर्यामिणः प्रत्यभिज्ञानं समञ्जसं भवति, 'य;सर्वान् लोकान् यः सर्वाणि भूतानी'त्यत्र य इत्येकवचनमुपपद्यते । अमृतत्वं च परमात्मनि सम्भवं नान्यत्र । 'य आत्मनि तिष्ठन्नि'त्यादौ चाभेदेऽपि(७)

---

(१) तस्मात्पारिशेष्याज्जीव एवेति । अन्तर्यामीति वक्ष्यमाणेन सम्बन्धः ।

(२) अन्यथा देहनाशाभ्याशे । (३) पूर्वपक्षमुपसंहरति तस्मादिति ।

(४) अशरीरत्वादीश्वरो नान्तर्यामीत्यत्र किमशरीरत्वं यतो नियन्तृत्वाभावः सिध्येत । नियम्यातिरिक्तदेहरहितत्वं वा देहसम्बन्धाभावो वा देहे भोक्तृत्वाभावो वा? नाद्य इत्याह सिद्धान्ती देहेति । अस्य तस्यादेर्जीवस्य वा स्वदेहादिनियमने न देहान्तरमतोऽनैकान्तिकतेत्यर्थः । द्वितीयं शङ्कते तदिति । परस्यापि देहादिसम्बन्धाभावोऽसिद्ध इत्याह तदविद्येति । तद्विषयत्वादविद्यायास्तदविद्यात्वम् । तृतीये तु सोपाधिकतैव, मुक्तस्य परामेदेन पञ्चत्वान्नोपाधेः साध्याव्यापकत्वम् । अतीतकालतां चाह श्रुतीति ।

(५) जीवस्य नियन्त्रणाभ्युपगमेऽनवस्थेति यदुक्तं तत्राह नचेति । औपाधिकस्य ह्यनौपाधिकेश्वरनियम्यत्वमभ्युपेतं नानुपहितेश्वरस्य नियन्त्रन्तरापादकमित्यर्थः ।

(६) वस्तुनो जीवपरभेदाभावे कथं लौकिकवैदिकव्यवहारोऽत आहाविद्याकल्पितेति । एवं चेति । बहुस्वाज्जीवानां नियम्याधिदेवादिषु प्रत्यभिज्ञा न स्यादित्यर्थः ।

(७) औपाधिकभेदाभावेऽपि ।

भेदोपचारक्लेशो न भविष्यति । तस्मात्परमात्मान्तर्यामी न जीवादिरिति सिद्धम् । (१)पृथिव्यादि स्तनयित्न्वन्तमधिदैवम् । 'यः सर्वेषु लोकेष्वि'त्यधिलोकम् । 'यः सर्वेषु वेदेष्वि'त्यधिवेदम् । 'यः सर्वेषु यज्ञेष्वि'त्यधियज्ञम् । 'यः सर्वेषु भूतेष्वि'त्यधिभूतम् । प्राणाद्यात्मान्तमध्यात्मम् । संज्ञाया अप्रसिद्धत्वादित्युपक्रममात्रम् ॥ १८ ॥ १९ ॥

(सू०) शारीरश्चोभयेपि हि भेदेनैनमधीयते ॥ २० ॥

पूर्वः पक्षः "दर्शनादिक्रियायाः कर्त्तरि प्रवृत्तिविरोधात्" (पृ० २८४ पं० १५) (२)कर्तरि आत्मनि प्रवृत्तिविरोधादित्यर्थः ॥ २० ॥

(सू०) अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥

"अथ परा यया तदक्षरमधिगम्यते" (पृ० २८६ पं० १०) "यत्तदद्रेश्यं" बुद्धीन्द्रियाविषयः । "अग्राह्यं" कर्मेन्द्रियागोचरः । "अगोत्रं" कारणरहितम् । "अवर्णं" ब्राह्मणत्वादिहीनम् । न केवलमिन्द्रियाणामविषयः, इन्द्रियाण्यप्यस्य न सन्तीत्याह "अचक्षुरश्रोत्र"मिति, बुद्धीन्द्रियाण्युपलक्षयति । "अपाणिपादमि"ति, कर्मेन्द्रियाणि । "नित्यं विभुं सर्वगतं सुसूक्ष्मं" दुर्विज्ञानत्वात् । स्यादेतत् नित्यं सत्किं परिणामि नित्यं, नेत्याह—"अव्ययम्" कूटस्थनित्यमित्यर्थः ।

(३)परिणामो विवर्तो वा सरूपस्योपलभ्यते ।
चिदात्मना तु सारूप्यं जडानां नोपपद्यते ॥
जडं प्रधानमेवातो जगद्योनिः प्रतीयताम् ।
योनिशब्दो निमित्तं चेत्, कुतो जीवनिराक्रिया ॥

(४)परिणममानसरूपा एव हि परिणामा दृष्टाः । यथोर्णनाभिलालापरिणामा लूतातन्तवस्तत्सरूपाः, तथा विवर्ता अपि विवर्तमानसरूपा एव, न विरूपाः । यथा रज्जुविवर्ता धारोरगादयो रज्जुसरूपाः । न जातु रज्ज्वां कुञ्जर इति विपर्यस्यन्ति, न च हेमपिण्डपरिणामो भवति लूतातन्तुः । तत्कस्य हेतोः ? अत्यन्तवैरूप्यात् । तस्मात्प्रधानमेव जडं जडस्य जगतो योनिरिति युज्यते । (५)स्वविकारानश्नुत इति तदक्षरम् । (६)'यः सर्वज्ञः सर्वविदि'ति चाक्षरात् परात्परस्याख्यानम् , 'अक्षरात्परतः पर' इति श्रुतेः । नहि परस्मादात्मनोऽर्वाग्विकारजातस्य च परस्तात् प्रधानादृतेऽन्यदक्षरं सम्भवति । अतो यः प्रधानात्परः परमात्मा स

---

(१) अधिकरणोपक्रमे विषयविवेचकमधिलोकमित्यादिभाष्य विभजते पृथिव्यादीति ।

(२) यथा देवदत्तकर्तृकगमनक्रियाया ग्रामः कर्म न देवदत्तः, तथात्मकर्तृकदर्शनक्रियाया अनात्मा विषय. नत्वात्मा क्रियायाः कर्तृविषत्वायोगादित्याह कर्तरीति । क्रियायां गुणः कर्ता प्रधानं कर्म तत्रैकस्या क्रियायामेकस्य गुणत्वप्रधानत्वयोर्विरोधान्न कर्तुः कर्मत्वमित्यर्थः । लौकिके कर्तरि ङित्थे कार्यकरणसंघाते दर्शनादिद्यृत्त्यविरोधादित्याह आत्मनीति ।

(३) पूर्वपक्षसंग्रहश्लोकमाह परिणाम इति । श्लोकद्वयार्थः सुगमः ।

(४) सार्धप्रथमश्लोकार्थमाह परिणममानेति ।

(५) ननु परिणामिनः प्रधानस्य कथमक्षरशब्दवाच्यतेत्यत्राह स्वविकारानिति ।

(६) अत्र पूर्वपक्षिप्रदर्शिते भूतयोनिर्जडः परिणममानत्वाद्विवर्तमानत्वादित्यनुमानद्वये बाधमाशंक्याह य इति । अक्षरात्परादिति सामानाधिकरण्यम् ।

सर्ववित्, भूतयोनिस्त्वक्षरं प्रधानमेव तच्च सांख्याभिमतमेवास्तु। अथ तस्याप्रामाणिकत्वान्न तत्र परितुष्यति, अस्तु तर्हि नामरूपबीजशक्तिभूतमव्याकृतं भूतसूक्ष्मं, प्रधीयते हि तेन विकारजातमिति प्रधानं, तत्खलु जडमनिर्वाच्यमनिर्वाच्यस्य जडस्य नामरूपप्रपञ्चस्योपादानं युज्यते, सारूप्यात्। नतु चिदात्मा निर्वाच्यो, विरूपो हि सः। **अचेतनानामिति** भाष्यं (१)सारूप्यप्रतिपादनपरम्। (२)स्यादेतत् स्मार्तप्रधाननिराकरणेनैवैतदपि निराकृतप्रायं तत्कुतोऽस्य शङ्कितमत आह—"**अपि च पूर्वत्राद्दष्टत्वादी**"ति (पृ० २८७पं० ४)। सति बाधके स्यानाश्रयणमिह तु बाधकं नास्तीत्यर्थः। (३)तेन 'तदैक्षत'त्यादावुपचर्यतां ब्रह्मणो जगद्योनिता(४)ऽविद्याशक्त्याश्रयत्वेन, इह त्वविद्याशक्तेरेव जगद्योनित्वसम्भवे न द्वारद्वारिभावो युक्त इति प्रधानमेवात्र वाक्ये जगद्योनिरुच्यत इति पूर्वः पक्षः। (५)अथ योनिशब्दो निमित्तकारणपरस्तथापि ब्रह्मैव निमित्तं न तु जीवात्मेति विनिगमनायां न हेतुरस्तीति संशयेन पूर्वः पक्षः।

अत्रोच्यते—

(६)अक्षरस्य जगद्योनिभावमुक्त्वा ह्यनन्तरम्।
यः सर्वज्ञ इति श्रुत्या सर्वज्ञस्य स उच्यते॥
तेन निर्देशसामान्यात्प्रत्यभिधानतः स्फुटम्।
अक्षरं सर्वविद्विश्वयोनिर्नाचेतनं भवेत्॥
अक्षरात्परत इति श्रुतिस्त्वव्याकृते मता।
अश्नुते यत्स्वकार्याणि ततोऽव्याकृतमक्षरम्॥

नेह तिरोहितमिवास्ति किंचित्। यत्तु—सारूप्याभावान्न चिदात्मनः परिणामः प्रपञ्च—इति। अद्धा,

विवर्तस्तु प्रपञ्चोऽयं ब्रह्मणोऽपरिणामिनः।
अनादिवासनोद्भूतो न सारूप्यमपेक्षते॥

न खलु बाह्यसारूप्यनिबन्धन एव सर्वो विभ्रम इति नियमनिमित्तमस्ति, आन्तरादपि कामक्रोधभयोन्मादस्वप्नादेर्मानसादपराधात्सारूप्यानपेक्षात्तस्य तस्य विभ्रमस्य दर्शनात्।

---

(१) अचेतनानामिति भाष्यं न प्रायदर्शनपरमित्याह सारूप्येति।

(२) ननु 'न च स्मार्त'मिति प्राच्याधिकरणे प्रधानं दूषितं दृष्टत्वाद्यसम्भवन्यायेनाचेतनमव्याकृतमपि दूषितप्रायमिति तच्छङ्का न युक्ता, प्रधानं त्वप्रमाणिकमधिकमिति शङ्कते स्यादेतदिति। बाधकं दृष्टत्वादि।

(३) ईक्षित्यादिचिन्तयाप्यपुनरुक्तिमाह तेनेति।

(४) उपचर्यतां ब्रह्मणो जगद्योनित्वमित्युक्तम्, उपचारं निमित्तमाहाविद्येति। अविद्याशक्त्या विषयीकृतत्वेन तदाश्रय इति तथोक्तमित्यर्थः।

(५) द्वितीयश्लोकापरार्धं व्याचष्टे अथेति।

(६) सिद्धान्तसङ्गृहश्लोकत्रयमाहाक्षरस्येत्यादिना। 'यद्भूतयोनिम्' इत्यादिनाक्षरस्य जगद्योनिभावमुक्त्वा पश्चात् 'यः सर्वज्ञः सर्ववित्' इति उपक्रम्य तस्मान्नामरूपादीति श्रुतौ सर्वज्ञस्यैवाक्षरस्य जगद्योनित्वं सिद्धान्तितम् १। तत उपादानत्वप्रत्यभिज्ञालिङ्गैकवाक्यत्वे सति वाक्यप्रमाणात् सर्वज्ञ एव विश्वयोनिः 'यदक्षरं तत्सर्वविद्भवेदि'ति विधानाद्भवत इत्यर्थः२। अक्षरशब्दवाच्यभूतयोनेः सर्वज्ञत्वे कथं सर्वज्ञस्य अक्षरात्परत्वमतआहाक्षरादिति। उक्तश्रुतौ त्वक्षरशब्दवाच्यमव्याकृतमेवोक्तं स्वकार्यैर्व्यापनादित्यर्थः ३॥

(१)अपि च हेतुमति विभ्रमे तदभावादनुयोगो युज्यते, अनाद्यविद्यावासनाप्रवाहपतितस्तु नानुयोगमर्हति । (२)तस्मात्परमात्मविवर्ततया प्रपञ्चस्तद्योनिर्भुजङ्ग इव रज्जुविवर्ततया तद्योनिर्न तु तत्परिणामतया । तस्मात्तद्धर्मसर्वविस्वोक्तेर्लिङ्गाद् 'यत्तदद्रेश्यमि'त्यत्र ब्रह्मैवोपदिश्यते ज्ञेयत्वेन, न तु प्रधानं जीवात्मा वोपास्यत्वेनेति सिद्धम् । न केवलं लिङ्गादपि तु 'परा विद्ये'ति समाख्यानादप्येतदेव प्रतिपत्तव्यमित्याह—**"अपि च द्वे विद्ये"** इति । (पृ०२८८ पं० १२) लिङ्गान्तरमाह–**"कस्मिन्नु भगव"**इति (पृ० २८९पं० ४) । (३)भोगा भोग्यास्तेभ्यो व्यतिरिक्ते भोक्तरि । अवच्छिन्नो हि जीवात्मा भोग्येभ्यो विषयेभ्यो व्यतिरिक्त इति तज्ज्ञानेन न सर्वं ज्ञातं भवति । समाख्यान्तरमाह–**"अपि च स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठा"**मिति । **"प्लवा ह्येतेऽदृढा यज्ञरूपा अष्टादशो"**क्ति । प्लवन्ते गच्छन्ति अस्थायिन इति प्लवाः, अत एवादृढाः । के ते ? यज्ञरूपाः । रूप्यन्तेऽनेनेति रूपं, यज्ञो रूपमुपाधिर्येषां ते यज्ञरूपाः । ते तु षोडशर्त्विजः । ऋतुयजनेनोपाधिना ऋत्विक्शब्दः प्रवृत्त इति यज्ञोपाधय ऋत्विजः । एवं यजमानोपि यज्ञोपाधिरेव । एवं पत्नी, (४)'पत्युर्नो यज्ञसंयोगे'इति स्मरणात् । त एतेऽष्टादश यज्ञरूपाः, येष्वृत्विगादिषूक्तं कर्म यज्ञः, यदाश्रयो यज्ञ इत्यर्थः । तच्च कर्मावरं, स्वर्गाद्यवरफलत्वात् । अपियन्ति–प्राप्नुवन्ति । **"नहि दृष्टान्तदार्ष्टान्तिकयो"**(पृ० २९० पं० ५)रित्युक्ताभिप्रायम्(५) ॥ २१ ॥

(सू०) विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २२ ॥

विशेषणं हेतुं व्याचष्टे—**"विशिनष्टि ही"**ति । शारीरादित्युपलक्षणं, (६)प्रधानादित्यपि द्रष्टव्यम् । भेदव्यपदेशं व्याचष्टे—**"तथा प्रधानादपी"**ति । स्यादेतत्, किमागमिकं सांख्याभिमतं प्रधानम् ? तथा च (७)बहुसमञ्जसं स्यादित्यत आह–**"नात्र प्रधानं नाम किंचि"**दिति (पृ० २९१ पं० २) ॥ २२ ॥

(सू०) रूपोपन्यासाच्च ॥ २३ ॥

तदेतत् परमतेनाक्षेपसमाधानाभ्यां व्याख्याय स्वमतेन व्याचष्टे—**"अन्ये पुनर्मन्यन्त"** इति । पुनःशब्दोपि पूर्वस्माद्विशेषं द्योतयन्नस्येष्टतां सूचयति । जायमानवर्गमध्य-

---

(१) विवर्तस्त्विति श्लोकस्य द्वितीयार्धं व्याचष्टेऽपि चेति ।

(२) वेदान्तिनो विवर्तवादे विवर्त्ताश्रयो ब्रह्मैवेत्युपसंहरति लिङ्गान्ती तस्मादिति ।

(३) भोग्यव्यतिरिक्त इति भाष्यं व्याचष्टे भोगा इति ।

(४) ननु ऋतुषु यजन्तीति कर्तरि क्विपि सम्प्रसारणे व्युत्पन्नत्वाद्वृत्विग्शब्दस्यैव यजते इति व्युत्पत्त्या यजमानशब्दस्य यज्ञरूपत्वमुपपन्नं पत्न्यास्तु कथं तादित्याशंक्याह 'पत्युर्नो' इति । तथा च यज्ञसंयोगे गम्यमाने पतिशब्दप्रातिपदिकैकदेशस्य नकारादेशेऽन्त्यस्येकारस्य ततो ङीपि व्युत्पन्नत्वादस्यापि यज्ञरूपत्वमुपपन्नमेवेत्यर्थः ।

(५) उक्ताभिप्रायमिति । विवर्तत्वेन दृष्टान्तदार्ष्टान्तिकयोर्न सारूप्यापेक्षेत्युक्तोऽभिप्राय इत्यर्थः ।

(६) प्रधानादित्यपीति । यद्यपि भाष्यकारेण शारीरप्रधानयोर्निराकरणे क्रमेण हेतुद्वयं व्याख्यातम्, तथापि पुरुषशब्दस्य प्रधानव्यावर्तकत्वादाद्यहेतुरपि प्रधानवारणार्थ इति बोध्यम् ।

(७) बहुसमंजसमिति । चेतनस्य जगदुपादानत्वादिकम् । बहु समञ्जसं स्यादिति क्वाचित्कः पाठः । तस्य च प्रधानस्यागमिकत्वे स्वप्रकृतिविकारसारूप्यादि बहु समंजसं स्यादित्यर्थो बोध्यः ।

पतितस्याग्निमूर्धादिरूपवतः सति जायमानत्वसम्भवे नाकस्माज्जनकत्वकल्पनं युक्तम्। प्रकरणं खल्वेतद्विश्वयोनेः, सन्निधिश्च जायमानानां, सन्निधेश्च प्रकरणं बलीय इति जायमानपरित्यागेन विश्वयोनेरेव प्रकरणिनो रूपाभिधानमिति चेत्। (१)न। प्रकरणिनः शरीरेन्द्रियादिरहितस्य विग्रहवत्त्वविरोधात्। (२)न चैतावता मूर्धादिश्रुतयः प्रकरणविरोधात्स्वार्थत्यागेन सर्वात्मतामात्रपरा इति युक्तम्। श्रुतेरत्यन्तविप्रकृष्टार्थात्प्रकरणाद्बलीयस्त्वात्। (३)सिद्धे च प्रकरणिनोऽसम्बन्धे जायमानमध्यपातित्वं जायमानग्रहणे कारणमुपन्यस्तं भाष्यकृता। तस्माद्धिरण्यगर्भ एव भगवान् प्राणात्मना सर्वभूतान्तरः कार्यो निर्दिश्यत इति साम्प्रतम्। तत्किमिदानीं सूत्रमनर्थकमेव, नेत्याह-"अस्मिन्पक्षे" इति (पृ०२पं० १३) (४)प्रकरणात् २३

(सू०) वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥

स्मर्यमाणमनुमानं स्यादिति ॥ २४ ॥

शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते ॥ २५ ॥

(५)प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलाः समेत्य मीमांसां चक्रुः—"**को न आत्मा किं ब्रह्मे**"**ति** (पृ० २९४ पं० ५) आत्मेत्युक्ते जीवात्मनि प्रत्ययो मा भूत्, अत उक्तं किं ब्रह्मेति। ते च मीमांसमाना निश्चयमनधिगच्छन्तः कैकेयराजं वैश्वानरविद्याविदमुपसेदुः। उपसद्य चोचुः—"**आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि स्मरसि, तमेवे नो ब्रूहीत्युपक्रम्य द्युसूर्यवाय्वाकाशवारिपृथिवीना**"मिति। अयमर्थः। (६)वैश्वानरस्य भगवतो द्यौ"**र्मूर्धा सुतेजाः**" (पृ० २९५ पं० १) "**चक्षुर्विश्वरूपः**" सूर्यः, "**प्राणो**" वायुः, "**पृथग्वर्त्मात्मा**" पृथग्वर्त्म यस्य वायोः स पृथग्वर्त्मा, स एवात्मा स्वभावो यस्य स पृथग्वर्त्मात्मा। "**सन्देहो**" देहस्य मध्यभागः, स आकाशो "**बहुलः**" सर्वगतत्वात्। "**वस्तिरेव रयिः**" आपः, यतोऽद्भ्योऽन्नमन्नाच्च रयिर्धनं तस्मादापो रयिरुक्तास्तासां च मूत्रीभूतानां बस्तिः स्थानमिति बस्तिरेव रयिरित्युक्तम्। "**पादौ**

---

(१) प्रकरणमित्यादिना जायमानसन्निधिलक्षणस्थानस्य प्रकरणेन बाधमाशंक्य विग्रहवत्त्वलिङ्गेन प्रकरणबाधमाह नेति।

(२) लिङ्गं सार्वात्म्यपरं न शरीरादिमत्त्वपरमित्याशंक्य नथासति मूर्धादिबहुश्रुतीना बाधः स्यात्तास्तु प्रकरणाद्बलीयस्त्व इत्याह न चैतावतेति। प्रकरणमात्रेणेत्यर्थः। एवं च हृदयं विश्वमस्य एष सर्वभूतान्तरात्मेति चाग्नित्वे सर्वनामनी सन्निहिततरं विग्रहवन्तं गृह्णीतो न भूतयोनिमित्यर्थः।

(३) लिङ्गनिरुद्धे प्रकरणे सन्निधिर्विजयते इत्याह सिद्धे चेति।

(४) 'पुरुष एवेद'मित्यादिसर्वरूपत्वोपन्यासोऽपि द्युमूर्धादिकस्यैवास्तु तस्य सन्निहिततरत्वादत आह प्रकरणादिति। सन्निधेः प्रकरणस्य बलीयस्त्वात्पूर्ववद्बाधकलिङ्गाभावाच्चेत्यर्थः।

(५) 'को न आत्मे'त्युदाहरणभाष्यं छान्दोग्याख्यायिकार्थानुसन्धानेन व्याचष्टे प्राचीनेति। उद्दालकोऽप्युपलक्षणीयः, जन इत्यापि ऋषिनाम।

(६) द्युसूर्येत्यादिभाष्यमादाय व्याचष्टे वैश्वानरस्येत्यादिना। सुतेजस्त्वगुणा द्यौर्वैश्वानरस्य मूर्धा विश्वरूपत्वगुणः सूर्यः 'एष शुक्र'इत्यादिश्रुतेः, स च वैश्वानरस्य चक्षुः, पृथग्गतिमत्त्वगुणो वायुः, बहुलगुण आकाशो देहमध्यं रयेर्धनम्। तद्गुणा आपो बस्तिस्थमुदकम्। तत्र पृथिव्या वैश्वानरस्य प्रतिष्ठानात् इत्यर्थः।

पृथिवी" तत्र प्रतिष्ठानात् । तदेवं वैश्वानरावयवेषु द्युसूर्यानिलाकाशजलावनिषु मूर्धचक्षुः-प्राणसन्देहबस्तिपादेष्वेकैकस्मिन् वैश्वानरबुद्ध्या विपरीततयोपासकानां प्राचीनशालादिनां मूर्धपातादिचक्षुष्ट्वप्राणोत्क्रमणदेहशीर्णताबस्तिभेदपादक्षतीभावदूषणैरुपासनानां निन्दया मूर्धादिसमस्तभावमुपदिश्य(१)आयते—'यस्त्वेतमेवं प्रादेशमात्रमभिविमान'मिति । स सर्वेषु लोकेषु द्युप्रभृतिषु सर्वेषु भूतेषु स्थावरजङ्गमेषु सर्वेष्वात्मसु देहेन्द्रियमनोबुद्धिजीवेष्वन्नमत्ति, सर्वसम्बन्धिफलमाप्नोतीत्यर्थः । अथास्य (२)वैश्वानरस्य भोक्तुर्भोजनस्याग्निहोत्रतासम्पिपादयिषयाऽऽह श्रुतिः—**"उर एव वेदिः"** वेदिसारूप्यात् । **"लोमानि बर्हिः"**आस्तीर्णबर्हिःसारूप्यात् । **"हृदयं गार्हपत्यः"** । हृदयानन्तरं **"मनोऽन्वाहार्यपचनः"** । **"आस्यमाहवनीयः"** । तत्र हि तदन्नं हूयते ॥

(३)ननु 'को न आत्मा किं ब्रह्मे'त्युपक्रमे आत्मब्रह्मशब्दयोः परमात्मनि रूढत्वेन तदुपरक्षायां बुद्धौ वैश्वानराग्न्यादयः शब्दास्तदनुरोधेन परमात्मन्येव कथंचिन्नेतुं युज्यन्ते न तु प्रथमावगतौ ब्रह्मात्मशब्दौ चरमावगतवैश्वानरादिपदानुरोधेनान्यथयितुं युज्येते । यद्यपि च वाजसनेयिनां वैश्वानरविद्योपक्रमे 'वैश्वानरं ह वै भगवान् सम्प्रति वेद तं नो ब्रूही'त्यत्र नात्मब्रह्मशब्दौ स्तः, तथापि तत्समानार्थं छान्दोग्यवाक्यं तदुपक्रममिति तेन निश्चितार्थेन तदविरोधेन वाजसनेयिवाक्यार्थो निश्चीयते । (४)निश्चितार्थेन ह्यनिश्चितार्थं व्यवस्थाप्यते, नानिश्चितार्थेन निश्चितार्थम् ।(५)कर्मवच्च ब्रह्मापि सर्वशाखाप्रत्ययमेकमेव । (६)न च द्युमूर्द्धत्वादिकं जाठरभूताग्निदेवताजीवात्मनामन्यतमस्यापि सम्भवति, न च सर्वलोकाश्रयफलभागिति, न च सर्वपाप्मप्रदाह इति पारिशेष्यात्परमात्मैव वैश्वानर इति निश्चिते कुतः पुनरियमाशङ्का—**"शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेदि"ति (पृ० २९७ पं० ११)**। उच्यते—तदेवोपक्रमानुरोधेनान्यथा नीयते, यन्नेतुं शक्यम् । अशक्यौ च वैश्वानराग्निशब्दावन्यथा नेतुमिति शङ्कितुरभिमानः । अपि चान्तःप्रतिष्ठितत्वं प्रादेशमात्रत्वं च न सर्वव्यापिनोऽपरिमाणस्य च परब्रह्मणः सम्भवतः । न च प्राणाहुत्यधिकरणताऽन्यत्र जठराग्नेर्युज्यते । न च गार्हपत्यादिहृदयादिता ब्रह्मणः सम्भविनी । तस्माद्यथायोगं जाठरभूताग्निदेवताजीवानामन्यतमो वैश्वानरो, न तु ब्रह्म । (७)तथा च ब्रह्मात्मशब्दावुपक्रमगतावप्यन्यथा नेतव्यौ । द्युमूर्द्धत्वादयश्च स्तुतिमात्रम् । अथवा अग्निशरीरायां देवतायां ऐश्वर्ययोगाद् द्युमूर्द्धत्वादय

---

(१) उपादिश्येति । 'मूर्धा ते व्यपतिष्यत' इत्यादिनैकैकनिन्दया 'तस्य ह वा एतस्ये'त्यादिना वैश्वानरस्य द्युलोकादयो मूर्धादय इति कथनेनावयविनः समस्तभावमुपदिश्येत्यर्थः ।

(२) उपासक एव वैश्वानरोऽहमिति मन्यत इत्याह वैश्वानरस्येति ।

(३) शब्दादिभ्योऽन्तःप्रतिष्ठानान्न परमेश्वरो वैश्वानर इति पूर्वपक्षमाक्षिपति नन्वित्यादिना ।

(४) निर्णीतार्थेन छान्दोग्यवाक्येन तदेकार्थं वाजसनेयिवाक्यं निश्चीयते न विपर्यय इत्यत्र न्यायमाह निश्चितार्थेन हीति । यथा 'तं चतुर्धा कृत्वा बर्हिषदं करोति' इति पुरोडाशमात्रचतुर्धाकरणवाक्यमेकार्थसम्बन्धिना शाखान्तरीयेणाग्नेयं चतुर्धा करोतीति विशेषविषयत्वेन निश्चितार्थेनाग्नेय एव पुरोडाशो व्यवस्थाप्यते एवमत्रापीत्यर्थः । (५) कर्मवत्—दर्शपूर्णकर्मवत् ।

(६) उपसंहारादपि वैश्वानरादिशब्दानां परमात्मपरत्वमाहाक्षेप्ता नन्वेति ।

(७) प्रतीकोपदेशमुपाध्यवच्छिन्नस्योपास्त्युपदेशं च प्रपञ्चयति तथाचेति ।

उपपद्यन्त इति शङ्कितुरभिसन्धिः । अत्रोत्तरम् "न" । कुतः ? "तथा दृष्ट्युपदेशात्" (पृ० २९८ पं० १०) । अद्धा चरममनन्यथासिद्धं प्रथमावगतमन्यथयति, न त्वत्र चरमस्यानन्यथासिद्धिः प्रतीकोपदेशेन वा मनो ब्रह्मेतिवत् तदुपाध्युपदेशेन वा मनोमयः प्राणशरीरो भारूप इतिवदुपपत्तेः । व्युत्पत्त्या वा वैश्वानराग्निशब्दयोर्ब्रह्मवचनत्वाज्ञानन्यथासिद्धिः । तथा च ब्रह्माश्रयस्य प्रत्ययस्याश्रयान्तरे जाठरवैश्वानराख्ये क्षेपेण वा जाठरवैश्वानरोपाधिनि वा ब्रह्मण्युपास्ये वैश्वानरधर्माणां ब्राह्मधर्माणां च समावेश उपपद्यते । असम्भवादिति सूत्रावयवं व्याचष्टे-"यदि चेह परमेश्वरो न विवक्ष्येते"ति । पुरुषमपि चैनमधीयत इति सूत्रावयवं व्याचष्टे—"यदि केवल एवे"ति (पृ० २९९ पं० ३) । न ब्रह्मोपाधितया नापि प्रतीकतयेत्यर्थः । न केवलमन्तःप्रतिष्ठं पुरुषमपीत्यपरेर्थः । (१)अत एव 'यत्पुरुष' इति पुरुषमनूद्य न वैश्वानरो विधीयते । तथासति पुरुषे वैश्वानरदृष्टिरुपदिश्येत । एवं च 'परमेश्वरदृष्टिर्हि जाठरे वैश्वानर इहोपदिश्यत' इति भाष्यं विरुध्येत । श्रुतिविरोधश्च "स यो ह्येतमेवमग्निं वैश्वानरं पुरुषं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदे"ति वैश्वानरस्य हि पुरुषत्ववेदनमत्रानूद्यते, न तु पुरुषस्य वैश्वानरत्ववेदनम् । (२)तस्मात् 'स एषोग्निर्वैश्वानरो यदि'ति यदिति यदः पूर्वेण सम्बन्धः, पुरुष इति तत्र पुरुषदृष्टेरुपदेश इति युक्तम्।२४।२५।२६

(सू०) अत एव न देवता भूतं च ॥ २७ ॥

अत एवैतेभ्यः श्रुतिस्मृत्यवगतद्युमूर्धत्वादिसम्बन्धसर्वलोकाश्रयफलभागित्वसर्वपाप्मप्रदाहात्मब्रह्मपदोपक्रमेभ्यो हेतुभ्य इत्यर्थः । "यो भानुना पृथिवीं द्यामुतेमा"मिति मन्त्रवर्णोपि न केवलौष्ण्यप्रकाशविभवमात्रस्य भूताग्नेरिममीदृशं महिमानमाहापि तु ब्रह्मविकारतया तादृप्येणेति भावः ॥ २७ ॥

(सू०) साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥

यदेतत्प्रकृतं मूर्द्धादिषु चुबुकान्तेषु पुरुषावयवेषु द्युप्रभृतीन् पृथिवीपर्यन्तांस्त्रैलोक्यात्मनो वैश्वानरस्यावयवान् सम्पाद्य पुरुषविधत्वं कल्पितं तदभिप्रायेणेदमुच्यते,-'पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदे'ति । (३)अत्रावयवसम्पत्त्या पुरुषविधत्वं (४)कार्यकारणसमुदायरूपपुरुषावयवमूर्द्धादिचुबुकान्तःप्रतिष्ठानाच्च पुरुषेऽन्तःप्रतिष्ठितत्वम् , समुदायमध्यपतितत्वात्तदवय-

---

(१) अत एवेति । यत एवान्तःप्रतिष्ठितत्वेन सह समुच्चयः सूत्रगतापिशब्दार्थेऽत एवान्तःप्रतिष्ठितत्ववत्पुरुषत्वमपि वैश्वानरमुद्दिश्य विधेयं न विपर्यय इत्यर्थः । यदि पुरुषमनूद्य वैश्वानरो विधीयते तदा पुरुषस्य दृष्ट्याश्रयत्वं स्यादित्याह तथा सतीति । सूत्रश्रुतिविरोधश्च स्फुट एव ।

(२) पुरुषस्य विधेयत्वे यच्छब्दत्यागमाशंक्याह तस्मादिति ।

(३) मूर्धादिचिबुकान्तावयवेषु सम्पादितस्य कथं पुरुषविधत्वमेषां पुरुषैकदेशत्वादित्याशंक्य वैश्वानरपुरुषस्य पादादिमूर्धान्तावयवानामेषु सम्पादनात्पुरुषसादृश्यमित्याहावयवसम्पत्त्येति ।

(४) मूर्धचिबुकान्तरालस्थस्य पुरुषावयवस्थत्वात्कथं पुरुषेऽन्तःप्रतिष्ठितत्वमित्याशंक्याह कार्यकारणेति । कार्यकारणसमुदाय एव पुरुषस्तस्यावयवा मूर्धादिचिबुकान्तास्तेष्वन्तःप्रतिष्ठानात्पुरुषेऽन्तःप्रतिष्ठितत्वम्, तत्र हेतुः समुदायेति । अवयविन्यवयवस्यान्तर्भावादवयवस्थोऽप्यवयवाश्रितो भवति मूढस्थ इवाग्रामस्थ इत्यभिप्रायः ।

वानां समुदायिनाम् । (१)अत्रैव निदर्शनमाह—"यथा वृक्षे शाखा"मिति (पृ० ३०० पं० १४) । शाखाकाण्डमूलस्कन्धसमुदाये प्रतिष्ठिता शाखा तन्मध्यपतिता भवतीत्यर्थः । समाधानान्तरमाह—"अथवे"ति । अन्तःप्रतिष्ठत्वं माध्यस्थ्यं तेन साक्षित्वं लक्षयति । एतदुक्तं भवति वैश्वानरः परमात्मा चराचरसाक्षीति । पूर्वपक्षिणोऽनुशयमुन्मूलयति—"निश्चिते चे"ति (पृ० ३०१ पं० २) विश्वात्मकत्वाद् वैश्वानरः प्रत्यगात्मा, विश्वेषां वायं नर(२)स्तद्विकारत्वाद्विश्वप्रपञ्चस्य । विश्वे नरा जीवा वाऽऽत्मानोऽस्य तादात्म्येनेति २८

(सू०) अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥

अनुस्मृतेर्बादरिः ॥ ३० ॥

साकल्येनोपलम्भासम्भवादुपासकानामनुग्रहायानन्तोऽपि परमेश्वरः प्रादेशमात्रमात्मानमभिव्यक्तीत्याह—"अतिमात्रस्यापी"ति । अतिक्रान्तो मात्रां परिमाणमतिमात्रः । "उपासकानां कृते" उपासकार्थमिति यावत् । व्याख्यान्तरमाह—"प्रदेशविशेषेषु वे"ति ॥ २९ ॥ ३० ॥

(सू०) सम्पत्तेरिति जैमिनिः ॥ ३१ ॥

मूर्द्धान्तमुपक्रम्य चुबुकान्तो हि कायप्रदेशः प्रादेशमात्रः । तत्रैव त्रैलोक्यात्मनो वैश्वानरस्यावयवान् सम्पादयन् प्रादेशमात्रं वैश्वानरं दर्शयति ॥ ३१ ॥

अत्रैव जाबालश्रुतिसंवादमाह सूत्रकारः—

(सू०) आमनन्ति चैनमस्मिन् ॥ ३२ ॥

"अविमुक्ते" (पृ० ३०३ पं० १०) अविद्यापाधिकल्पितावच्छेदे जीवात्मनि, सुखल्वविमुक्तः, तस्मिन् प्रतिष्ठितः परमात्मा तादात्म्यात् । अत एव हि श्रुतिः—'अनेन जीवेनात्मने'ति । अविद्याकल्पितत्वेन भेदमाश्रित्याधाराधेयभावः । "वरणा" (३)भ्रूः । शेषमतिरोहितार्थम् ॥

इति श्रीवाचस्पतिमिश्रविरचिते शारीरकमीमांसाभाष्यविभागे भामत्यां
प्रथमस्याध्यायस्य द्वितीयः पादः ॥

(सू०) द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

इह ज्ञेयत्वेन ब्रह्मोपक्षिप्यते । तत्र—

(४)पारवश्येन सेतुत्वाद्भेदे षष्ठ्याः प्रयोगतः ।
द्युभ्वाद्यायतनं युक्तं नामृतं ब्रह्म कर्हिचित् ॥

---

(१) अत्रैव—अवयवाश्रितस्यावयव्याश्रितत्व, न तु अवयवस्यावयविनिष्ठत्वे, तथाच यथा शाखानां समुदाये प्रतिष्ठिता शाखा समुदायमध्यपातिनी तथा मूर्धादयोऽवयवाः कार्यकारणसमुदायमध्यपातिन इत्येवं निदर्शनार्थो भाष्यकारस्येत्याशयः । अवयवस्थस्य वैश्वानरस्यावयविपुरुषान्तःस्थत्वमर्थत एव सिद्धमित्यर्थः ।

(२) नेता कारणमित्यर्थः । (३) 'का वै वरणा का च नाशी'त्यत्र वरणशब्दार्थमाह भ्रूरिति ।

(४) आयतनत्वसाधारणधर्मसंशये पूर्वपक्षसङ्ग्राहकश्लोकमाह पारवश्येनेति । सेतुत्वस्य पारवश्येन व्याप्तेर्ब्रह्मणश्चापरत्वात्, भेदे सति सम्बन्धार्थकषष्ठीप्रयोगात् ब्रह्मणश्चामृतत्वादद्भूतस्येति षष्ठीप्रयोगस्याप्युक्तत्वेनामृतत्वाभावाच्चामृतं यद्भ्रू ब्रह्म तद्द्युभ्वाद्यायतनं कदाचिदपि न युक्तमित्यर्थः ।

(१)पारावारमध्यपाती हि सेतुः ताभ्यामवच्छिद्यमानो जलविधारको लोके दृष्टः, न तु बन्धहेतुमात्रम्, हडिनिगडादिष्वपि प्रयोगप्रसङ्गात्। न चानवच्छिन्नं ब्रह्म सेतुभावमनुभवति। न चामृतं सद्ब्रह्मामृतस्य सेतुरिति युज्यते। (२)न च ब्रह्मणोऽन्यदमृतमस्ति, यस्य तत्सेतुः स्यात्। न चाभेदे षष्ठ्याः प्रयोगो दृष्टपूर्वः। तदिदमुक्तम्—"**अमृतस्यैष सेतुरिति श्रवणादि**"**ति** (पृ० ३०५ पं०)। अमृतस्येति श्रवणात्, सेतुरिति श्रवणादिति योजना। तत्रामृतस्येति श्रवणादिति विशदतया न व्याख्यातम्। सेतुरिति श्रवणादिति व्याचष्टे—'**पारवानि**"**ति**। तथा च पारवत्यमृतव्यतिरिक्ते सेतावनुश्रीयमाणे प्रधानं वा साङ्ख्यपरिकल्पितं भवेत्। तत्खलु स्वकार्योपहितमर्यादतया पुरुषं यावदगच्छद्भवति पारवत्, भवति च द्युभ्वायतनं तत्प्रकृतित्वात्, प्रकृत्यायतनत्वाच्च विकाराणां, भवति चात्माऽऽत्मशब्दस्य स्वभाववचनत्वात्, प्रकाशात्मा प्रदीप इति वत्। भवति चास्य ज्ञानमपवर्गोपयोगि, तदभावे प्रधानाद्विवेकेन पुरुषस्यानवधारणादपवर्गानुपपत्तेः। यदि त्वस्मिन्प्रमाणाभावेन न परितुष्यति, अस्तु तर्हि नामरूपबीजशक्तिभूतमव्याकृतं भूतसूक्ष्मं द्युभ्वाद्यायतनं, तस्मिन्प्रामाणिके सर्वस्योक्तस्योपपत्तेः। एतदपि प्रधानेपन्यासेन सूचितम्। अथ तु साक्षाच्छ्रुत्युक्तं द्युभ्वाद्यायतनमाद्रियसे ततो वायुरेवास्तु, 'वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ती'ति श्रुतेः। यदि त्वात्मशब्दाभिधेयत्वं न विद्यत इति न परितुष्यसि, भवतु तर्हि शारीरस्तस्य भोक्तृभोग्यान् द्युप्रभृतीन् प्रत्यायतनत्वात्। यदि पुनरस्य द्युभ्वाद्यायतनस्य सर्वज्ञश्रुतेरत्रापि न परितुष्यसि, भवतु ततो हिरण्यगर्भ एव भगवान् सर्वज्ञः सूत्रात्मा द्युभ्वाद्यायतनम्। तस्य हि कार्यत्वेन(३) पारवत्वं चामृतात्परब्रह्मणो भेदश्चेत्यादि सर्वमुपपद्यते। अयमपि 'वायुना वै गौतम सूत्रेणे'ति श्रुतिमुपन्यस्यता सूचितः। तस्मादयं द्युप्रभृतीनामायतनमिति।

एवं प्राप्तेऽभिधीयते। द्युभ्वाद्यायतनं परब्रह्मैव, न प्रधानाव्याकृतवायुशारीरहिरण्यगर्भाः। कुतः? स्वशब्दात्,

(४)धारणाद्वाऽमृतत्वस्य साधनाद्वाऽस्य सेतुता।
पूर्वपक्षेऽपि मुख्यार्थः सेतुशब्दो हि नेष्यते॥

न हि मृद्दारुमयो मूर्तः पारावारमध्यवर्ती पाथसां विधारको लोकसिद्धः सेतुः प्रधानं वाऽव्याकृतं वा वायुर्वा जीवो वा सूत्रात्मा वाऽभ्युपेयते। किन्तु पारवत्तामात्रपरो लाक्षणिकः सेतुशब्दोऽभ्युपेयः। सोस्माकं पारवत्तावर्जं(५) विधरणत्वमात्रेण योगमात्राद्रूढिं परित्यज्य

---

(१) पारं कूलम्, अवारमर्वाक्कूलम्। न त्विति। विप्रो बन्धनार्थात्सेतुशब्दव्युत्पत्त्या जगन्मर्यादाबन्धनिरूपणे प्रयोगेऽनेन निवारितोऽन्यथा हडिनिगडादिष्वपि सेतुशब्दप्रयोगः स्यात्। यत्र दारुणि च्छिद्रिते विप्राह्माणा पादप्रोतनं तद्धडिः, निगडः शृंखला।

(२) नन्वमृतमपि ब्रह्मामृतान्तरमम्बन्धि, नेत्याह न च ब्रह्मण इति। 'अतोऽन्यदार्तमिति श्रुतेरित्यर्थः।

(३) शरीरावच्छिन्नत्वेन।

(४) उत्तरपक्षसङ्ग्राहकश्लोकमाह धारणाद्वेति। अस्य द्युभ्वाद्यायतनस्यास्य वा तज्ज्ञानस्य यथाक्रममृतत्वस्य धारणात्साधनाद्वा सेतुता ब्रह्मण एवोचितेत्यर्थः। ननु तर्हि रूढिर्लुप्तेत्याशंक्याह पूर्वपक्षेपीति। अस्मार्थं स्फुटीकर्वन्नाह वहीति। लाक्षणिकत्वमुभयमतेपि सेतुशब्दस्य तुल्यमिति भावः।

(५) पारवत्ता त्यक्त्वा। योगमात्रादिति। विप्रुषात्वर्थयोगादित्यर्थः।

प्रवर्त्स्यति । जीवानाममृतत्वपदप्राप्तिसाधनत्वं वात्मज्ञानस्य पारवत एव लक्षयिष्यति । (१)अमृतशब्दश्च भावप्रधानः, यथा 'द्वेकयोर्द्विवचनैकवचने' इत्यत्र द्वित्वैकत्वे द्वेकशब्दार्थौ, अन्यथा द्वेकेष्विति स्यात् , तादिदमुक्तं भाष्यकृता "अमृतत्वसाधनत्वादि"ति । तथा चामृतस्येति च सेतुरिति च ब्रह्मणि द्युभ्वाद्यायतने उपपत्स्येते । अत्र च स्वशब्दादिति (२)तन्त्रोच्चरितमात्मशब्दादिति च सदायतना इति सच्छब्दादिति च ब्रह्मशब्दादिति च सूचयति । सर्वे ह्येतेऽस्य स्वशब्दाः । (३)स्यादेतत् , आयतनायतनवद्भावः सर्वं ब्रह्मेति च सामानाधिकरण्यं हिरण्यगर्भेऽप्युपपद्यते , तथा च स एवात्राऽस्त्वमृतत्वस्य सेतुरित्याशङ्क्य श्रुतिवाक्येन सावधारणेनोत्तरमाह--"तत्रायतनायतनवद्भावश्रवणादि"ति (पृ० ३०६ पं० १३) । विकाररूपेऽनृतेऽनिर्वाच्येऽभिसन्धेऽभिसन्धानं यस्य स तथोक्तः । भेदप्रपञ्चं सत्यमभिमन्यमान इति यावत् । तस्यापवादो दोषः श्रूयते "मृत्यो"रिति (पृ० ३०७ पं० ५) "सर्वं ब्रह्मेति त्वि"ति । यत्सर्वमविद्यारोपितं तत्सर्वं परमार्थतो ब्रह्म, न तु यद्ब्रह्म तत्सर्वमित्यर्थः ।

"अपर आहे"ति (पृ० ३०८ पं० १) । नात्र द्युभ्वाद्यायतनस्य सेतुता येन पारवत्ता स्यात्, किन्तु 'जानथे'ति यज् ज्ञानं कीर्तितं, यश्च 'वाचो विमुञ्चथे'ति वाग्विमोकः, तस्यामृतत्वसाधनत्वेन सेतुतोच्यते । तच्चोभयमपि पारवदेव । (४)न च प्राधान्यादेष इति सर्वनाम्ना द्युभ्वाद्यायतनमात्मैव परामृश्यते, न तु तज्ज्ञानवाग्विमोचने इति साम्प्रतम् । वाग्विमोचनात्मज्ञानभावनयोरेव विधेयत्वेन प्राधान्यात् , आत्मनस्तु द्रव्यस्याव्यापारतयाऽविधेयत्वात् , विधेयस्य व्यापारस्यैव व्यापारवतोऽमृतत्वसाधनत्वात् । (५)न चेदमैकान्तिकं यत्प्रधानमेव सर्वनाम्ना परामृश्यते, क्वचिदयोग्यतया प्रधानमुत्सृज्य योग्यतया गुणोऽपि परामृश्यते ॥१॥

(सू०) मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥

द्युभ्वाद्यायतनं प्रकृत्याविद्यादिदोषमुक्तैरुपसृप्यं व्यपदिश्यते 'भिद्यते हृदयग्रन्थि' रित्यादिना (पृ० ३०८ पं० १३) । तेन तद् द्युभ्वाद्यायतनविषयमेव । ब्रह्मणश्च मुक्तोपसृप्यत्वं 'यदा सर्वे प्रमुच्यन्त' इत्यादौ श्रुत्यन्तरे प्रसिद्धम् । तस्मान्मुक्तोपसृप्यत्वात् द्युभ्वाद्यायतनं ब्रह्मेति निश्चीयते । (६)हृदयग्रन्थिश्चाविद्यारागद्वेषभयमोहाः । मोहश्च विषादः,

---

(१) अमृतस्य ब्रह्मणो हेत्वभावात्साधनत्वं ज्ञानस्यायुक्तमित्याशंक्याविद्यानिवृत्तिरमृतत्वशब्दार्थ इत्याहामृतशब्दश्चेति । अन्यथा-द्वयोरेकस्य च संख्येयानामुपादाने तेषां बहुत्वात् द्वेकेष्विति स्यात् इत्यर्थः ।

(२) तन्त्रेति । नानार्थसाधारण्येन सकृदुच्चारणमिह तन्त्रम् , एवं चावृत्तिलक्षणवाक्यभेदो व्युदस्तः

(३) तत्र त्वायतनवद्भावश्रवणादिति भाष्ये द्युभ्वाद्यायतनस्य ब्रह्मत्वे सिद्धे तस्य सविशेषत्वानिरासार्थम् , तत्प्रधानवादनिरासानुपयोगित्वात्प्रकृतासङ्गतमित्याशंक्य हिरण्यगर्भपूर्वपक्षनिरासार्थत्वेन प्रकृते सङ्गमयति स्यादेतदिति ।

(४) अप्रधानं ज्ञानं न सर्वनामपरामर्शार्हमिति कश्चित्तं प्रत्याह नचेति ।

(५) 'तेते पयसि दध्यानयति सा वैश्वदेव्यामिक्षे'त्यादौ शब्दतोऽप्रधानस्यापि पयआदेः सर्वनामनिर्देशादनियतं सर्वनाम्नः प्रधानपरामर्शित्वमित्याह न चेति ।

(६) अविद्येत्यादि भाष्ये आदिग्रहणेन प्राङ्निर्दिष्टभयमोहावुक्तौ । एतेऽविषादयः श्रुतौ हृदयशब्दार्थ इत्याह हृदयग्रन्थिश्चेति ।

शोकः। (१)परं हिरण्यगर्भाद्यवरं यस्य तद्ब्रह्म तथोक्तम्। तस्मिन्ब्रह्मणि यदृष्टं दर्शनं तस्मिन्नस्तदर्थमिति यावत्, यथा 'चर्मणि द्वीपिनं हन्ती'ति चर्मार्थमिति गम्यते। (२)नामरूपादित्यप्यविद्याभिप्रायम्। 'कामा येऽस्य हृदि श्रिता' इति कामा इत्यविद्यामुपलक्षयति ॥२॥

(सू०) नानुमानमतच्छब्दात् ॥ ३ ॥

नानुमानमित्युपलक्षणं, नाव्याकृतमित्यपि(३) द्रष्टव्यम्, हेतोरुभयत्रापि साम्यात् ॥३॥

(सू०) प्राणभृच्च ॥ ४ ॥

(सू०) भेदव्यपदेशात् ॥ ५ ॥

चेनातच्छब्दत्वं हेतुरनुकृष्यते। स्वयं च भाष्यकृद्धेतुमाह—"**न चोपाधिपरिच्छिन्नस्ये**"ति (पृ० ३१० पं० ३) "**न सम्यक् सम्भवति**" नाञ्जसमित्यर्थः। भोग्यत्वेन हि आयतनत्वमतिक्लिष्टम्। स्यादेतत्, यद्यतच्छब्दत्वादित्यत्रापि हेतुरनुकृष्टव्यो, हन्त कस्मात्पृथग्योगकरणं, यावता न प्राणभृदनुमाने इत्येक एव योगः कस्मान्न कृत इत्यत आह—"**पृथगि**"ति। 'भेदव्यपदेशादि'त्यादिना हि प्राणभृदेव निषिध्यते, न प्रधानं, तच्चैकयोगकरणे दुर्विज्ञानं स्यादिति ॥ ४ ॥ ५ ॥

(सू०) प्रकरणात् ॥ ६ ॥

न खलु हिरण्यगर्भादिषु ज्ञातेषु सर्वं ज्ञातं भवति किन्तु ब्रह्मण्येवेति ॥ ६ ॥

(सू०) स्थित्यदनाभ्यां च ॥ ७ ॥

यदि जीवो हिरण्यगर्भो वा द्युभ्वाद्यायतनं भवेत्, ततस्तत्प्रकृत्या'ऽनश्नन्नन्यो अभिचाकशीती'ति परमात्माभिधानमाकस्मिकं प्रसज्येत। न च हिरण्यगर्भ उदासीनः, तस्यापि भोक्तृत्वात्। (४)न च जीवात्मैव द्युभ्वाद्यायतनं, तथासति स एवात्र कथ्यते तत्कथनाय च ब्रह्मापि कथ्यते, अन्यथा सिद्धान्तेऽपि जीवात्मकथनमाकस्मिकं स्यादिति वाच्यम्। यतोऽनधिगतार्थावबोधनस्वरसेनाम्नायेन प्राणभृन्मात्रप्रसिद्धजीवात्माधिगमाया(५)त्यन्तानवगतमलौकिकं ब्रह्मावबोध्यत इति सुभाषितम्। "**यदापि पैङ्ग्युपनिषत्कृतेन व्याख्यानेने**"ति। (पृ० ३११ पं० ९) तत्र 'ह्यनश्नन्नन्यो अभिचाकशीती'ति जीव उपाधिरहितेन रूपेण ब्रह्मस्वभाव उदासीनोऽभोक्ता दर्शितः। तदर्थमेवाचेतनस्य बुद्धिसत्त्वस्यापरमार्थिकं भोक्तृत्वमुक्तम्। तथा चेत्थम्भूतं जीवं कथयतानेन मन्त्रवर्णेन द्युभ्वाद्यायतनं ब्रह्मैव कथितं भवति, उपाध्यवच्छिन्नश्च जीवः प्रतिषिद्धो भवतीति न पैङ्गिब्राह्मणविरोध इत्यर्थः। "**प्रपञ्चार्थ**"मिति (पृ० ३१२ पं० २)। तन्मध्ये न पठितमिति कृत्वाचिन्तयेदमधिकरणं प्रवृत्तमित्यर्थः ॥ ७ ॥

---

(१) परावरशब्दार्थमाह परमिति। (२) तथेत्यादिमन्त्रस्थनामरूपशब्दार्थमाह नामरूपादिति।

(३) सूत्रेणानिराकृतत्वान्न वाच्यानुक्तपूर्वपक्षसम्भव इत्याशङ्क्याह नाव्याकृतमित्यपीति। साधारणहेतुनिर्देशादव्याकृतवाच्यत्वापि पूर्वपक्षत्वेन सूचितमित्यर्थः।

(४) न चोपाधिपरिच्छिन्नस्येति भाष्ये चकारप्रयोगात्सौत्रचशब्दव्याख्यात्वभ्रममपाकरोति न चेति। जीवात्मैव द्युभ्वाद्यायतनमिति वाच्यमित्यन्वयः।

(५) प्रसिद्धं जीवस्वरूपमनूद्याज्ञस्य पारमार्थिकस्वरूपाधिगमायेत्यर्थः।

(सू०) (१)भूमा सम्प्रसादादध्युपदेशात् ॥ ८ ॥

(२)नारदः खलु देवर्षिः कर्मविदनात्मवित्तया शोच्यमात्मानं मन्यमानो भगवन्तमात्मज्ञमाजानसिद्धं महायोगिनं सनत्कुमारमुपससाद । उपसद्य चोवाच 'भगवन्ननात्मज्ञताजनित-शोकसागरपारमुत्तारयतु मां भगवानि'ति । तदुपश्रुत्य सनत्कुमारेण 'नामब्रह्मेत्युपास्वे'त्युक्ते नारदेन पृष्टं 'किं नाम्नोस्ति भूय' इति । तत्र सनत्कुमारस्य प्रतिवचनं 'वाग्वा व नाम्नो भूयसी'ति । तदेवं नारदसनत्कुमारयोर्भूयसि प्रश्नोत्तरे वागिन्द्रियमुपक्रम्य मनःसङ्कल्पचित्तध्यान-विज्ञानबलान्नतोयवायुसहिततेजोनभःस्मराशाप्राणेषु पर्यवसिते(३) । (४)कर्तव्याकर्तव्यविवेकः सङ्कल्पः, तस्य कारणं पूर्वापरविषयनिमित्तप्रयोजननिरूपणं चित्तम् । स्मरः, स्मरणम् । (५) प्राणस्य च समस्तक्रियाकारकफलभेदेन पित्राद्यात्मत्वेन च रथारनाभिदृष्टान्तेन सर्वप्रतिष्ठत्वेन च प्राणभूयस्त्वदर्शिनोऽतिवादित्वेन च नामादेरप्यहादाशान्तादूभूयस्त्वमुक्त्वाऽपृष्ट एव नारदेन सनत्कुमार एकग्रन्थेन 'एष तु वातिवदति यः सत्येनातिवदती'ति सत्यादीन्कृतिपर्यन्तानुक्त्वो-पदिदेश–सुखं त्वेव विजिज्ञासितव्य'मिति। तदुपश्रुत्य नारदेन'सुखं त्वेव भगवो विजिज्ञासे' इत्युक्ते सनत्कुमारो 'यो वै भूमा तत्सुखमि'त्युपक्रम्य भूमानं व्युत्पादयांबभूव, 'यत्र नान्यत्पश्यती'-त्यादिना । तदीदृशे विषये विचार आरभ्यते । तत्र संशयः–किं प्राणो भूमा स्यादाहो पर-मात्मेति । (६)भावभवित्रोस्तादात्म्यविवक्षया सामानाधिकरण्यं संशयस्य बीजमुक्तं भाष्य-कृता । तत्र

(७)एतस्मिन्ग्रन्थसन्दर्भे यदुक्ताद्भूयसोऽन्यतः ।
उच्यमानं तु तद्भूय उच्यते प्रश्नपूर्वकम् ॥

---

(१) सुभाद्याधिकरणे आत्मशब्दात् सुभाद्यायतनं ब्रह्मेत्युक्तम्, तत्रात्मशब्दः प्राणेऽनैकान्तः, 'तरति शोकमात्मावित्' इत्यत्राब्रह्मणि प्राणे प्रयोगादित्यापेक्षिकयधिकरणसंगतिरत्र द्रष्टव्या ।

(२) छान्दोग्यस्थाख्यायिकामर्थतोऽनुक्रामन् विषयं विविनक्ति नारद इत्यादिना । आजानसिद्धं—स्व-भावसिद्धम् ।

(३) प्राणेषु पर्यवसिते भूयसि बहुतरे प्रश्नोत्तरे इत्यन्वयः ।

(४) सङ्कल्पादिपदार्थान् व्याचष्टे कर्तव्येत्यादिना । पूर्वापरेति । पूर्वं चापरे च विषया निमित्तं यस्य प्र योजनस्य तन्निरूपणमित्यर्थः । तत्र वर्णानिष्पादनी वाङ्नाम्नो भूयसी, वाक्येरकत्वाद्वाचो मनो भूयः कुर्यामिति निश्चयस्य मनसः कर्तव्यादिविवेकः संकल्पः कारणम्, तस्य चातीतादिविषयसाध्यप्रयोजनज्ञानं चित्तम्, तस्मादपि लौकिकविषयाच्छास्त्रीययदेवतायैकाग्र्यं ध्यानं फलतो भूयः, ध्यानस्य विज्ञानं शा स्त्रीयं कारणं तस्य मनोगतं बलं प्रतिभानसामर्थ्यं कारणम्, तस्यान्नमन्नं, तस्यापः, एवमाकाशपर्यन्तं बोध्यम् । आकाशस्य भोग्यत्वे 'स्मरः' स्मरणं, तस्याशा तया हीष्टं तात्पर्येण स्मरति, प्राणो नामाद्याशान्त सर्वहेतुतया भूयानित्युत्तरोत्तरभूयस्त्वं द्रष्टव्यम् ।

(५) ननु 'एष त्वि'ति विच्छिद्य भूमोपदेशात्कथं भूमत्वमित्याशंक्य विषययदर्शनावसर एव संशयोपपे-क्षितया पूर्वपक्षसम्भावनामाह प्राणस्येति । सर्वात्मत्वशब्दात् प्राण एव भूमा, तुशब्दस्तु सत्यप्राणवेदिन ए नामाद्यतिवाहित्वाद्विशेषार्थ इति सम्भवः पूर्वपक्षस्येत्यर्थः । अपृष्ट एवेति । यदि प्राणादन्यो भूमा तर्हि प्राग्व प्रश्नेन भाव्यमिति भावः ।

(६) भूमशब्दस्य निष्कृष्टबहुत्ववचनत्वात्किं प्राणो भूमेति भाष्ये सामानाधिकरण्यायोगमाशंक्या भावभविष्नोरिति ।

(७) पूर्वपक्षसंग्रहश्लोकमाह एतस्मिन्निति । उक्तछान्दोग्यग्रन्थसमुदाये यो वै भूमेति यदुक्ताद्भू

न च प्राणादिकं भूय इति पृथग्, नापि भूमा वाऽस्माद् भूयानिति प्रत्युक्तम्। तस्मात्प्राणभूयस्त्वाभिधानानन्तरमपृष्टेन भूमोच्यमानः प्राणस्यैव भवितुमर्हति। आप च भूमेति भावो न भवितारमन्तरेण शक्यो निरूपयितुमिति भवितारमपेक्षमाणः प्राणस्यानन्तर्येण बुद्धिसन्निधानात्तमेव भवितारं प्राप्य निर्वृणोति। 'यस्योभयं हविरार्तिमार्छेदि'त्यत्रार्तिरिवार्तं हविः। यथाहुः—(१)'मृष्यामहे हविषा विशेषणमि'ति। न चात्मनः प्रकरणादात्मैव बुद्धिस्थ इति तस्यैव भूमा स्यादिति युक्तम्। सनत्कुमारस्य 'नामब्रह्मेत्युपास्वे'ति प्रतीकोपदेशरूपेणोत्तरेण नारदप्रश्नस्यापि तद्विषयत्वेन परमात्मोपदेशप्रकरणस्यानुत्थानात्, (२)अतद्विषयत्वे चोत्तरस्य प्रश्नोत्तरयोर्वैयधिकरण्येन विप्रतिपत्तेरप्रामाण्यप्रसङ्गात्। तस्मादसति प्रकरणे प्राणस्यानन्तर्यात्तस्यैव भूमेति युक्तम्। (३)तदेतत्संशयबीजं दर्शयता भाष्यकारेण सूचितं पूर्वपक्षसाधनमिति न पुनः उक्तम्। न च भूयोभूयः प्रश्नात्परमात्मैव नारदेन जिज्ञासित इति युक्तम्। प्राणोपदेशानन्तरं तस्योपरमात्तदेवं प्राण एव भूमेति स्थिते यद्यत्तद्विरोध्यापाततः प्रतिभाति तत्तदनुगुणतया नेयं, नीतं च भाष्यकृता। स्यादेतत्, 'एष तु वातिवदती'ति तुशब्देन प्राणदर्शिनोऽतिवादिनो व्यवच्छिद्य सत्येनातिवादिनं वदन्कथं प्राणस्य भूमानमभिदधीतेत्यत आह—**"प्राणमेव त्वि"ति (पृ० ३१३ पं० ६)। "प्राणदर्शिनश्चातिवादित्वमि"ति।** नामाद्याशान्तमतीत्य वदनशीलत्वमित्यर्थः। एतदुक्तं भवति—नायं तुशब्दः प्राणातिवादित्वाद्व्यवच्छिनत्ति, अपि तु (४)तदतीवादित्वमपरित्यज्य प्रत्युत तदनुकृष्य तस्यैव प्राणस्य सत्यस्य श्रवणमननश्रद्धानिष्ठाकृतिभिर्विज्ञानाय निश्चयाय सत्येनातिवदतीति प्राणव्रतमेवातिवादित्वमुच्यते। तुशब्दो नामाद्यतिवादित्वाद्व्यवच्छिनत्ति। न नामाद्याशान्तवाद्यतिवादी, अपि तु सत्यप्राणवाद्यतिवादीत्यर्थः। (५)अत्र चागमाचार्योपदेशाभ्यां सत्यस्य श्रवणम्। अथागमाविरोधिन्यायनिवेशनं मननं, (६)मत्वा च गुरुशिष्यसब्रह्मचारिभिरनसूयुभिः सह सम्वाद्य तत्त्वं श्रद्दधते। श्रद्धानन्तरं च विषयान्तरदोषदर्शी विरक्तस्ततो व्यावृत्तः तत्त्वज्ञानाभ्यासं करोति, सेयमस्य कृतिः प्रयत्नः। अथ तत्त्वज्ञानाभ्यासनिष्ठा भवति, यदनन्तरमेव तत्त्वविज्ञा-

---

यसोऽप्यप्रोच्यमानं भूयस्त्वं प्राणस्यैव प्रश्नपूर्वकमुच्यत इति श्लोकार्थः। अस्यार्थमाह नचेति। अत्र च 'यो वै भूमे'त्युक्तो भूमा न प्राणादन्यस्य 'अस्ति भगव आशाया भूय' इति प्रश्नातिरिक्तप्रश्नाविषयत्वे सति एतद्ग्रन्थस्य भूमरूपत्वात् आशापेक्षप्राणभूमवादित्यनुमानप्रयोगो सूचितः।

(१) शबरस्वामिनः—आर्तिमर्तस्योद्देश्यत्वापर्यवसानाद्द्विषा विशेषणं सहामहे, पर्यवसितस्य तूद्देश्यस्य विशेषणं वाक्यभेदावहं प्रहस्यैवैकत्वामिति।

(२) प्रश्नस्यारोप्यविषयत्वे दूषणमाहातदिति। प्रश्नो यद्यात्मविषयः स्यात्तदोत्तरस्यप्रतीकविषयस्याविषयत्वमपृष्टविषयत्वं स्यात्तदा प्रश्नोत्तरयोर्वैयधिकरण्यमित्यर्थः।

(३) तदेतदिति। तदेतत्प्रकरणानुत्थानं, प्रकरणमेव प्राणसन्निधिसमकक्षत्वेन संशयबीजं दर्शयता भाष्यकारेण प्रकरणत्वमस्य न निश्चितं सन्निधिमात्रमात्मशब्दस्येति सूचितम्, अत एव पूर्वपक्षावसरे पुनर्नोक्तमित्यर्थः।

(४) अस्य 'नामाद्यतिवादित्वाद्व्यवच्छिनत्ती'ति अग्रेऽन्वयः कार्यः।

(५) सत्यादिपरम्परयेति भाष्योक्तं सत्यादि दर्शयति अत्र चेति।

(६) मननमान्वीक्षिकी, गुरुशिष्येति। अनेन 'ज्ञानग्रहणाभ्यासस्तद्विदैश्च सह संवादः। तैः शिष्यगुरुसब्रह्मचारिविशिष्टभेदार्थिभिरनसूयुभिरनुपेयात्' इति ४ अ० २ आ० ४६।४७ गौतमीयं सूत्रद्वयमपवर्गप्रयोजनकं वात्स्यायनमिश्रैः सूचितम्।

नमनुभवः प्रादुर्भवति । तदेतद्वाक्या अप्याहुः—'भूतार्थभावनाप्रकर्षपर्यन्तजं योगिज्ञानमि'ति । भावनाप्रकर्षपर्यन्तो निष्ठा तस्माज्जायते तत्त्वानुभव इति । तस्मात्प्राण एव भूमा ।

इति प्राप्ते ऽभिधीयते 'एष तु वा ऽतिवदति यः सत्येनातिवदती'त्युक्त्वा भूमोच्यते, तत्र सत्यशब्दः परमार्थे निरूढवृत्तिः श्रुत्या परमार्थमाह । परमार्थश्च परमात्मैव । ततो ह्यन्यद्विकारजातमनृतं कयाचिदपेक्षया कथंचित्सत्यमुच्यते । तथा 'चैष तु वा ऽतिवदति यः सत्येनातिवदती'ति ब्रह्मणोऽतिवादित्वं श्रुत्याऽन्यनिरपेक्षया लिङ्गादिभ्यो बलीयस्याऽवगमितं कथमिव संनिधानमात्रात् श्रुत्याद्यपेक्षादतिदुर्बलात्कथंचित्प्राणविषयत्वेन शक्यं व्याख्यातुम् । एवं च प्राणादूर्ध्वं ब्रह्मणि भूमावगम्यमानो न प्राणविषयो भवितुमर्हति किन्तु सत्यस्य परमात्मन एव । (१)एवं चानात्मविद आत्मानं विविदिषोर्नारदस्य प्रश्ने परमात्मानमेवास्मै व्याख्यास्यामीत्यभिसन्धिमान् सनत्कुमारः सोपानारोहणन्यायेन स्थूलादारभ्य तत्तद्भूमव्युत्पादनक्रमेण भूमानमतिदुर्ज्ञानतया परमसूक्ष्मं व्युत्पादयामास । (२)न च प्रश्नपूर्वताप्रवाहपतितेनोत्तरेण सर्वेण प्रश्नपूर्वेणैव भवितव्यमिति नियमोऽस्तीत्यादि सुगमेन भाष्येण व्युत्पादितम् । विज्ञानादिसाधनपरम्परा मननश्रद्धादिः प्राणान्ते चानुशासने तावन्मात्रेणैव प्रकरणसमाप्तेर्न प्राणस्यान्यायत्ततोच्येत । तदभिधाने हि सापेक्षत्वेन न प्रकरणं समाप्येत । तस्मान्नेदं प्राणस्य प्रकरणमपि तु यदायत्तः प्राणस्तस्य स चात्मेत्यात्मन एव प्रकरणम् । शङ्कते—**"प्रकरणान्त"** इति (पृ० ३१७ पं० १०) । प्रकरणस्य प्रकरणसमाप्तावित्यर्थः । निराकरोति **"न स भगव"** इति । (३)संदंशन्यायेन हि भूम्न एतत्प्रकरणं, स चेद्भूमा प्राणः प्राणस्य तत्प्रकरणं भवेत् । तच्चायुक्तमित्युक्तम् ॥ ८ ॥

न केवलं श्रुतेर्भूमात्मता परमात्मनः, लिङ्गादपीत्याह सूत्रकारः—

(सू०) धर्मोपपत्तेश्च ॥ ९ ॥

यदि पूर्वपक्षिणा कथंचिन्नीतं तदनुभाष्य भाष्यकारो दूषयति **"योऽप्यसौ सुषुप्तावस्थायामि"**ति । सुषुप्तावस्थायामिन्द्रियाद्यसङ्गत्यात्मैव । न प्राणः **"परमात्मप्रकरणात्"** (पृ० ३१८ पं० १) । **"अन्यदार्त"** विनश्वरमित्यर्थः । अतिरोहितार्थमन्यत् ॥ ९ ॥

(सू०) अक्षरमम्बरान्तधृतेः ॥ १० ॥

(४)अक्षरशब्दः समुदायप्रसिद्ध्या वर्णेषु रूढः । परमात्मनि चावयवप्रसिद्ध्या यौगिकः । अवयवप्रसिद्धेश्च समुदायप्रसिद्धिर्बलीयसीति वर्णा एवाक्षरम् । न च वर्णेष्वाकाशस्योतत्वप्रोतत्वे नोपपद्येते, सर्वस्यैव (५)रूपधेयस्य नामधेयात्मकत्वात् । सर्वं हि रूपधेयं नामधेयसं-

---

(१) प्रतीकविषयोत्तरवशात्प्रश्नोपि तद्विषय इति यदुक्तं तत्राह एवं चेति । तत्त्वे बुद्धिनिवेशाय नामाद्युपन्यासः, उपास्तिस्तूत्तराश्रित्य विहितेत्यर्थः ।

(२) प्राणात्परं प्रश्नाभावे हेतुमाह नचेति ।

(३) ननु भूम्न आप्रकरणसमाप्तेरनुवर्तोऽस्तु स एव प्राणः किं न स्यादत आह संदंशेति । पुरस्तादुपरिष्टाच्च निर्देशः संदंशः । तच्चायुक्तमिति । प्राणस्यान्यायत्ततोक्त्या सत्यशब्दश्रुत्या च तदयुक्तमित्युक्तमिति भावः । (४) पूर्वपक्षमाहाक्षरशब्द इति ।

(५) रूपेति । रूप्यते निरूप्यते इति रूपमभिधेयं, स्वार्थे धेयप्रत्ययः, अर्थे शब्दात्मकत्वानुभवो न तत्रश्यत्वकृतः भूमगम्यत्वहेरतादात्म्यानवभासादिति ।

भिन्नमनुभूयते, गौरयं वृक्षोऽयमिति । न चोपायत्वात्तत्सम्भेदसम्भवः । नहि धूमोपाया वह्नेः धीर्धूमसंभिन्नं वह्निमवगाहते, धूमोयं वह्निरिति, किन्तु वैयधिकरण्येन धूमाद्वह्निरिति । भवति तु नामधेयसम्भिन्नो रूपधेयप्रत्ययो डित्थोऽयमिति । (१)अपि च शब्दानुपायेऽपि रूपधेयप्रत्यये लिङ्गेन्द्रियजन्मनि नामसम्भेदो दृष्टः । तस्मान्नामसम्भिन्नाः पृथिव्यादयोऽम्बरान्ता नाम्ना प्रथिताश्च विद्वांश्च, नामानि चोङ्कारात्मकानि तद्व्याप्तत्वात् । 'तथथा शङ्कुना सर्वाणि पर्णानि संतृण्णानि एवमोङ्कारेण सर्वा वागि'ति श्रुतेः। अत ॐकारात्मकाः पृथिव्यादयोऽम्बरान्ता इति वर्णा एवाक्षरं न परमात्मेति प्राप्तम् ।

एवं प्राप्ते ऽभिधीयते—अक्षरं परमात्मैव, न तु वर्णाः । कुतः ? अम्बरान्तधृतेः । (पृ० ३१९ पं० ३) । न खल्वम्बरान्तानि पृथिव्यादीनि वर्णा धारयितुमर्हन्ति, किन्तु परमात्मैव, तेषां परमात्मविकारत्वात् । न च नामधेयात्मकं रूपधेयमिति युक्तम्, स्वरूपभेदादुपायभेदादर्थक्रियाभेदाच्च । (२)तथाहि-शब्दत्वसामान्यात्मकानि श्रोत्रग्राह्याण्यभिधेयप्रत्ययार्थक्रियाणि नामधेयान्यनुभूयन्ते, रूपधेयानि तु घटपटादीनि घटत्वपटत्वादिसामान्यात्मकानि चक्षुरादीन्द्रियग्राह्याणि मधुधारणप्रावरणाद्यर्थक्रियाणि च भेदेनानुभूयन्ते इति कुतो नामसम्भेदः ।(३)न च डित्थोऽयमिति शब्दसामानाधिकरण्यप्रत्ययः । न खलु शब्दात्मकोऽयं पिण्ड इत्यनुभवः, किन्तु यो नानादेशकालसंप्लुतः पिण्डः सोऽयं सन्निहितदेशकाल इत्यर्थः । (४)संज्ञा तु गृहीतसम्बन्धैरस्यन्ताभ्यासात्पिण्डाभिनिवेशिन्येव संस्कारोद्बोधसंपातायाता स्मर्यते । यथाहुः—

यत्संज्ञास्मरणं तत्र न तदप्यन्यहेतुकम्(५) ।
पिण्ड एव हि दृष्टः सन्संज्ञां स्मारयितुं क्षमः ॥
(६)संज्ञा हि स्मर्यमाणापि प्रत्यक्षत्वं न बाधते ।
संज्ञिनः सा तटस्था हि न रूपाच्छादनक्षमा ॥ इति ।

न च वर्णातिरिक्ते स्फोटात्मनि अलौकिकेऽक्षरपदप्रसिद्धिरस्ति लोके । न चैष प्रामाणिक इत्युपरिष्टात्प्रवेदयिष्यते । निरूपितं चास्माभिस्तत्त्वबिन्दौ । तस्माच्छोत्रग्राह्याणां वर्णानामम्बरान्तधृतेरनुपपत्तेः समुदायप्रसिद्धिबाधनाद् अवयवप्रसिद्ध्या परमात्मैवाक्षरमिति सिद्धम् ॥

---

(१) शाब्दबोधेऽभिधया मानान्तरगम्यार्थबोधे यः शाब्दबोधस्तत्रोपायत्वमयुक्तशङ्कापि नेत्याह अपि चेति । प्रथिताः सम्बद्धाः । विद्वांस्तादात्म्येन । शङ्कुना 'पर्णनालेन, पर्णानि-पर्णावयवाः । संतृण्णानि-विद्धानि । (२) स्वरूपप्रमाणार्थक्रियाभिर्भेदमाह तथाहीति ।

(३) ननु डित्थोऽयमिति नामसम्भेदोऽर्थेऽनुभूयते, तत्राह नचेति ।

(४) ननु यद्यर्थो न शब्दात्मा तर्हि कथमर्थप्रत्यये शब्दभानम्, नहि स तदा श्रोत्रेनान्येन वोच्चार्यत इत्याशंक्याह संज्ञा त्विति । गृहीतवाच्यवाचकभावसम्बन्धैः पुंभिरस्यन्ताभ्यासेन संस्कारोद्बोधोत्पादपाता संज्ञाऽर्थासक्तैव स्मर्यते इति तत्र शब्दभानं नातोऽर्थः शब्दात्मेति भावः ।

(५) अर्थात्मत्वहेतुकम् ।

(६) संज्ञा हीति । स्मर्यमाणापि संज्ञा संज्ञिनोऽर्थस्य प्रत्यक्षत्वं न बाधते यतः सा तटस्था-अर्थानिविष्टाऽतो नार्थस्वरूपाच्छादनक्षमेत्यर्थः । एतेन स्मर्यमाणशब्दस्य परोक्षत्वात्तद्विशिष्टोऽर्थः कथं प्रत्यक्ष इत्याशंका परास्ता ।

(१)ये तु प्रधानं पूर्वपक्षयित्वाऽनेन सूत्रेण परमात्मैवाक्षरमिति सिद्धान्तयन्ति, 'तरैम्बरान्तधृतेरि'त्यनेन कथं प्रधानं निराक्रियत इति वाच्यम् । अथ नाधिकरणत्वमात्रं धृतिः, अपि तु प्रशासनाधिकरणता, तथा च श्रुतिः—एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत' इति । तथाप्यम्बरान्तधृतेरित्यनर्थकम् । एतावदुक्तव्यम्—'अक्षरं प्रशासनादे'ति । एतावतैव प्रधाननिराकरणसिद्धेः । तस्माद्वर्णाक्षरतानिराक्रियैवास्यार्थः । न च स्थूलादीनां वर्णेष्वप्राप्तेरस्थूलमित्यादिनिषेधानुपपत्तेर्वर्णेषु शङ्कैव नास्तीति वाच्यम् । नञ्यवश्यं प्राप्तिपूर्वका एव प्रतिषेधा भवन्ति, अप्राप्तेष्वपि नित्यानुवादानां दर्शनात् । यथा नान्तरिक्षे न दिवीत्यग्निचयननिषेधानुवादः । तस्मादयमेवाभिसन्धिरेतत् ॥ १० ॥

(सू०) (२)सा च प्रशासनात् ॥ ११ ॥

प्रशासनमाज्ञा चेतनधर्मो नाचेतने प्रधाने वाऽव्याकृते वा सम्भवति । (३)न च मुख्यार्थसम्भवे कूलं पिपतिषतीतिवद्भाक्तत्वमुचितमिति भावः ॥ ११ ॥

(सू०) अन्यभावव्यावृत्तेश्च ॥ १२ ॥

अम्बरान्तविधरणस्याक्षरस्येश्वरायदन्यद्वर्णा वा प्रधानं वाऽव्याकृतं वा तेषामन्येषां भावोऽन्यभावस्तमत्यन्तं व्यावर्तयति श्रुतिः—'तद्वा एतदक्षरं गार्गी'त्यादिका । अनेनैव सूत्रेण जीवस्याप्यक्षरता निषिद्धेत्यत आह—"तथे"ति । (पृ० १२० पं० १०) 'नान्यदित्या'दिकया हि श्रुत्याऽऽत्मभेदः प्रतिषिध्यते, तथा चोपाधिभेदभिन्ना जीवा निषिद्धा भवन्त्यभेदाभिधानादित्यर्थः । इतोऽपि न शारीरस्याक्षरशब्दतेत्याह—"अचक्षुष्क"मिति । अक्षरस्य चक्षुराद्युपाधिं वारयन्ती श्रुतिरौपाधिकस्य जीवस्याक्षरतां निषेधतीत्यर्थः । तस्माद्वर्णप्रधानाद्याकृतजीवानामसम्भवात्सम्भवाच्च परमात्मनः परमात्मैवाक्षरमिति सिद्धम् ॥ १२ ॥

ईक्षतिकर्मव्यपदेशात्सः ॥ १३ ॥

(४)कार्यब्रह्मजनप्राप्तिफलत्वादर्थभेदतः ।
दर्शनध्यानयोर्ध्येयमपरं ब्रह्म गम्यते ॥

(५)'ब्रह्म वेद ब्रह्मैव भवती'ति श्रुतेः सर्वगतपरब्रह्मवेदने तद्भावापत्तौ 'स [सामभिरुन्नीयते ब्रह्मलोकमि'ति न देशविशेषप्राप्तिरुपपद्यते । तस्मादपरमेव ब्रह्मेह ध्येयत्वेन चोद्यते ।

---

(१) 'अस्थूलमि'त्यादेर्वर्णेष्वप्राप्तिनिषेधानुपपत्त्या प्रधानपूर्वपक्षखण्डनार्थमिदमधिकरणमिति वादिनां भास्कराचार्याणां मतमनूद्य निराकरिष्यति ये त्विति । निराक्रियत इति । साधारणत्वादम्बरान्तधृतेः प्रधानं निराकर्तुमशक्यमित्यर्थः । (२) अम्बरान्तधृति ।

(३) ननु प्रपञ्चाधिष्ठानमात्रस्य ब्रह्मणो प्रशासनायोगात्तदारोपस्य ब्रह्मणि स्वीकार्यत्वात्प्रधान एवारोपितं प्रशासितृत्वं वाच्यमित्याशंक्याह नचेति । एवं च चेतने दृष्टस्य नियन्तृत्वस्य जगदैश्वर्यरूपेण चेतन एव समारोपसम्भवान्नहि गजादिपरिवृते राजामात्ये राजत्वमारोपितमिति कुड्यादावारोप्यते, आरोपितमपि नियन्तृत्वं ब्रह्मण्येव मुख्यं प्रपञ्चस्थित्यर्थक्रियाकारित्वादकारगतङ्गत्वादिवत्प्रधाने तु गौणमित्यर्थः ।

(४) पूर्वपक्षसंग्रहश्लोकमाह कार्येति । कार्यब्रह्म हिरण्यगर्भ एव जनो जीवो यस्मिन् स ब्रह्मलोकस्तथा तत्प्राप्तिः फलं यस्य ध्यानस्य तस्य भावस्तत्त्वाद्धेतोस्तथा ध्यानस्य परविषयत्वादीक्षणस्य परात्परो यस्तद्विषयत्वादेकविषयत्वाच्चिन्त्यार्थभेदतश्च दर्शनध्यानयोर्ध्येयमपरमेव ब्रह्मेति श्लोकार्थः ।

(५) तत्रार्थं हेतुं व्याचष्टे ब्रह्म वेदेति ।

(१)न चेक्षणस्य लोके तत्त्वविषयत्वेन प्रसिद्धेः परस्यैव ब्रह्मणस्तथाभावाद् ध्यायतेश्च तेन समानविषयत्वात्परब्रह्मविषयमेव ध्यानमिति साम्प्रतम्। समानविषयत्वस्यैवासिद्धेः। परो हि पुरुषो ध्यानविषयः, परात्परस्तु दर्शनविषयः। न च तत्त्वविषयमेव सर्वत्र दर्शनम्, अनृतविषयस्यापि तस्य दर्शनात्। (२)न च मननं दर्शनं, तच्च तत्त्वविषयमेवेति साम्प्रतम्। मननाद्भेदेन तत्रतत्र दर्शनस्य निर्देशात्। न च मननमपि तर्कापरनामावश्यं तत्त्वविषयम्। यथाहुः—'तर्कोऽप्रतिष्ठ' इति। तस्मादपरमेव ब्रह्मेह ध्येयम्। तस्य च परत्वं शरीरापेक्षयेति।

एवं प्राप्ते उच्यते—

(३)ईक्षणध्यानयोरेकः कार्यकारणभूतयोः।
अर्थ औत्सर्गिकं तत्त्वविषयत्वं तथेक्षतेः॥

ध्यानस्य हि साक्षात्कारः फलम्। साक्षात्कारश्चोत्सर्गतस्तत्त्वविषयः। क्वचित्तु बाधकोपनिपाते समारोपितगोचरो भवेत्। न चासत्यपवादे शक्य उत्सर्गस्त्यक्तुम्। तथा चास्य तत्त्वविषयत्वात्तत्कारणस्य ध्यानस्यापि तत्त्वविषयत्वम्। (४)अपि च वाक्यशेषेणैकवाक्यत्वसम्भवे न वाक्यभेदो युज्यते। सम्भवति च परपुरुषविषयत्वेनार्थप्रत्यभिज्ञानात् सप्रभिव्याहारा(५)च्चैकवाक्यता। तदनुरोधेन च परात्पर इत्यत्र परादिति जीवघनविषयं द्रष्टव्यम्। तस्मात्तु परः पुरुषो ध्यातव्यश्च द्रष्टव्यश्च भवति। तदिदमुक्तम्—न चात्र जीवघनशब्देन प्रकृतोऽभिध्यातव्यः परः पुरुषः परामृश्यते, किन्तु जीवघनात् परात् परो यो ध्यातव्यो द्रष्टव्यश्च तमेव कथयितुं जीवघनो जीवः खिल्यभावमुपाधिवशादापन्नः स उच्यते। 'स सामभिरुन्नीयते ब्रह्मलोकमि'त्यनन्तरवाक्यनिर्दिष्टो ब्रह्मलोको वा जीवघनः। स हि समस्तकरणात्मनः सूत्रात्मनो हिरण्यगर्भस्य भगवतो निवासभूमितया करणपरिवृतानां जीवानां तत्र सङ्घात इति भवति जीवघनः। तदेवं त्रिमात्रोङ्कारायतनं परमेव ब्रह्मोपास्यम्। अत एव चास्य देशविशेषाधिगतिः फलमुपाधिमत्त्वात्, क्रमेण च सम्यग्दर्शनोत्पत्तौ मुक्तिः। 'ब्रह्म वेद ब्रह्मैव भवती'ति तु निरुपाधिब्रह्मवेदनविषया श्रुतिः। अपरन्तु ब्रह्मैकैकमात्रायतनमुपास्यमिति मन्तव्यम्॥ १३॥

दहर उत्तरेभ्यः॥ १४॥

"अथ यदिदमस्मिन्ब्रह्मपुरे दहरं—सूक्ष्मं गुहाप्रायं—पुण्डरीकसंनिवेशं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्"। (६)आगमाचार्योप-

(१) अर्थभेदत इति द्वितीयहेतुं शङ्कोत्तरत्वेन व्याचष्टे न चेति।

(२) ननु युक्त्या पर्यालोचनमिहेक्षणं तच्च तत्त्वविषयमित्याशंक्याह न च मननमिति।

(३) ईक्षणध्यानयोरर्थभेदं निराकुर्वन्सिद्धान्तसंग्रहश्लोकमाह ईक्षणेति। कार्यकारणभूतयोरीक्षणध्यानयोरेकोर्थः। तथेक्षतेरीक्षणस्य तत्त्वविषयत्वमौत्सर्गिकम्, न चेदपवादः कश्चित्तथा ध्यानस्यापि तत्कारणस्य स्यादन्यथाऽन्यद् ध्यायत्यन्यत्पश्यतीति हेतुहेतुमत्त्वानिर्देशेरित्यर्थः।

(४) प्रकारान्तरेणार्थभेदं निराकरोति अपि चेति।

(५) 'स ईक्षत' इति प्रकृतापेक्षानिर्देशाच्चेत्यर्थः। तदनुरोधेन—प्रमाणद्वयानुरोधेन।

(६) उक्तछान्दोग्यस्थविषयवाक्यघटकान्वेष्टव्यशब्दार्थं वक्तुमारभते आगमेति।

देशाभ्यां श्रवणं च, तदविरोधिना तर्केण मननं च, तदन्वेषणं तत्पूर्वकेण चादरनैरन्तर्यदीर्घकालासेवितेन ध्यानाभ्यासपरिपाकेण साक्षात्कारो विज्ञानम् । विशिष्टं हि तज्ज्ञानं पूर्वेभ्यः(१)। तदिच्छा विजिज्ञासनम् । अत्र संशयमाह–"तत्रे"ति । (पृ० ३२४ पं० ४) तत्र प्रथमं तावदेष संशयः 'किं दहराकाशादन्यदेव किंचिदन्वेष्टव्यं विजिज्ञासितव्यं च उत दहराकाश' इति । यदापि दहराकाशोऽन्वेष्टव्यस्तदापि किं भूताकाश आहो शारीर आत्मा किं वा परमात्मेति । संशयहेतुं पृच्छति–"कुत" इति । तद्धेतुमाह "आकाशब्रह्मपुरशब्दाभ्यामि"ति । तत्र प्रथमं तावद्भूताकाश एव दहर इति पूर्वपक्षयति–"तत्राकाशशब्दस्य भूताकाशे रूढत्वादि"ति । एष तु बहुतरोत्तर(२)सन्दर्भविरोधात्तुच्छः पूर्वपक्ष इत्यपरितोषेण पक्षान्तरमालम्बते पूर्वपक्षी–"अथ वा जीवो दहर इति प्राप्तम्" । (पृ० ३२५ पं० १) युक्तमित्यर्थः । तत्र––

(३)आधेयत्वाद्विशेषाच्च पुरं जीवस्य युज्यते ।
देहो न ब्रह्मणो युक्तो हेतुद्वयवियोगतः ॥

(४)असाधारणेन हि व्यपदेशा भवन्ति, तद्यथा क्षितिजलपवनबीजादिसामग्रीसमवधानजन्माऽप्यङ्कुरः शालिबीजेन व्यपदिश्यते शाल्यङ्कुर इति, न तु क्षित्यादिभिः तेषां कार्यान्तरेष्वपि साधारण्यात् । तद्दिह शरीरं ब्रह्मविकारोऽपि न ब्रह्मणा व्यपदेष्टव्यम् , ब्रह्मणः सर्वविकारकारणत्वेनातिसाधारण्यात् । जीवभेदधर्माधर्मोपार्जितं तदित्यसाधारणकारणत्वाज्जीवेन व्यपदिश्यत इति युक्तम् । (५)अपि च ब्रह्मपुर इति सप्तम्यधिकरणे स्मर्यते, तेनाधेयेनानेन सम्बन्धव्यम् । न च ब्रह्मणः स्वे महिम्नि व्यवस्थितस्यानाधेयस्याधारसम्बन्धः कल्पते । जीवस्त्वाराग्रमात्र इत्याधेयो भवति । तस्माद् ब्रह्मशब्दो रूढिं परित्यज्य देहादिबृंहणतया जीवे यौगिको वा भाक्तो वा व्याख्येयः । चैतन्यं च भक्तिः । (६)उपधानानुपधाने तु विशेषः । "वाच्यत्वं" गम्यत्वम् । स्यादेतत् , जीवस्य पुरं भवतु शरीरं, पुण्डरीकदहरगोचरता त्वन्यस्य(७) भविष्यति, वत्सराजस्य पुर इवोज्जयिन्यां मैत्रस्य सङ्गेन्यत आह "तत्र पुरस्वामिन" इति । अयमर्थः । वेश्म खल्वधिकरणमनिर्दिष्टाधेयमाधेयविशेषापेक्षायां पुरस्वामिनः प्रकृतत्वात्तेनैवाधेयेन सम्बद्धं सदनपेक्षं नाधेयान्तरेण स-

---

(१) पूर्वेभ्यः–श्रवणमननादिध्यासनेभ्यः ।

(२) 'एष आत्मे'त्यादावात्मशब्दादेर्भूताकाशेऽयुक्तत्वेनेत्यादिः ।

(३) आधेयत्वादिति । ब्रह्मपुरशब्दोक्तं देहलक्षणं पुरं परिच्छिन्नत्वेनाधेयत्वात्स्वकर्मोपार्जितशरीरेण सम्बन्धविशेषाच्च ब्रह्मणः पुरमिति षष्ठीसम्भवाज्जीवस्य सम्भवति, ब्रह्मणस्तूक्तहेतुद्वयाभावान्न युक्तं पुरमित्यर्थः ।

(४) विशेषादिति हेतुं व्याचष्टे असाधारणेनेति । जीवभेदो–जीवविशेषः ।

(५) आधेयत्वहेतुं व्याचष्टे अपि चेति । तेनाधिकरणेन सह अनेन ब्रह्मशब्दार्थेनाधेयेनान्वेतव्यम् , समासाभिहितसम्बन्धसामान्यस्याधाराधेयभाव एव विश्रान्तत्वादिति भावः ।

(६) यद्युभयत्र भक्तिप्रयोजकं चैतन्यं समं तर्हि जीवब्रह्मणोः को विशेषस्तत्राह उपधानेति । उपाधितदभावावित्यर्थः । वाच्यत्वमिति । भक्त्या च ब्रह्मशब्दवाच्यत्वमिति भाष्ये वाच्यत्वं तात्पर्यगम्यत्वं भाक्तत्वे सत्यभिधेयत्वविरोधादित्यर्थः ।

(७) ब्रह्मणः ।

म्बन्धं कल्पयति । ननु तथापि शरीरमेवास्य भोगायतनमिति को हृदयपुण्यरीकेऽस्य विशेषो यत्तदेवास्य सद्मेत्यत आह—"मनउपाधिकश्च जीव" इति । ननु मनोपि चलतया सकलदेहवृत्ति पर्यायेणेत्यत आह—"मनश्च प्रायेणे"ति । आकाशशब्दश्चारूपत्वादिना सामान्येन जीवे भाक्तः । अस्तु वा भूताकाश एवायमाकाशशब्दो दहरोऽस्मिन्नन्तराकाश इति, तथाप्यदोष इत्याह—"न चात्र दहरस्याऽऽकाशस्याऽन्वेष्टव्यत्वमि"ति ।

एवं प्राप्ते उच्यते । भूताकाशस्य तावन्न दहरत्वं यावान्वाऽयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इत्युपमानविरोधात् । तथाहि—

(१)तेन तस्योपमेयत्वं रामरावणयुद्धवत् ।
अगत्या भेदमारोप्य गतौ सत्यां न युज्यते ॥

अस्ति तु दहराकाशस्य ब्रह्मत्वेन भूताकाशाद्भेदेनोपमानस्य गतिः । (२)न चानवच्छिन्नपरिमाणमवच्छिन्नं भवति, तथा सत्यवच्छेदानुपपत्तेः । (३)न भूताकाशमानत्वं ब्रह्मणोऽत्र विधीयते, येन 'ज्यायानाकाशादि'ति श्रुतिविरोधः स्याद्, अपि तु भूताकाशोपमानेन पुण्डरीकोपाधिप्राप्तं दहरत्वं निवर्त्यते । अपि च सर्वएवोत्तरे हेतवो दहराकाशस्य भूताकाशत्वं व्यासेधन्तीत्याह "न च कल्पितभेद" (पृ० ३२६ पं० १४) इति । नापि दहराकाशो जीव इत्याह—"यद्यप्यात्मशब्द" इति (पृ० ३२७ पं० ३) ॥

(४)उपलब्धेरधिष्ठानं ब्रह्मणो देह इष्यते ।
तेनासाधारणत्वेन देहो ब्रह्मपुरं भवेत् ॥

देहे हि ब्रह्मोपलभ्यत इत्यसाधारणतया देहो ब्रह्मपुरमिति व्यपदिश्यते, न तु ब्रह्मविकारतया । (५)अथवा ब्रह्मशब्दार्थो मुख्यो भवति । अस्तु वा ब्रह्मपुरं जीवपुरं, तथापि यथा वत्सराजस्य पुरे उज्जयिन्यां मैत्रस्य सद्म भवति, एवं जविस्य पुरे हृत्पुण्डरीकं ब्रह्मसदनं भविष्यति, उत्तरेभ्यो ब्रह्मलिङ्गेभ्यो ब्रह्मणोऽवधारणात् । (६)ब्रह्मणो हि बाधके प्रमाणे बलीयसि जीवस्य च साधके प्रमाणे सति ब्रह्मलिङ्गानि कथंचिदभेदविवक्षया जीवे व्याख्यायन्ते । न चेह ब्रह्मणो बाधकं प्रमाणं साधकं वाऽस्ति जविस्य । ब्रह्मपुरव्यपदेशश्चोपपादितो ब्रह्मोपलब्धिस्थानतया(७) । अर्भकौकस्त्वं चोक्तम् । तस्मात्साते सम्भवे ब्रह्मणि तल्लिङ्गानां नाब्रह्मणि व्याख्यानमुचितमिति ब्रह्मैव दहराकाशो न जीवभूताकाशाविति । (८)श्रवणमनन-

---

(१) उपमानोक्तेरन्यथासिद्धिमाशंक्याह तेनेति । ब्रह्मस्तनायतनत्वादिना 'रामरावणयोर्युद्धं रामरावणयोरिवे'त्यनागत्या भेदमारोप्योपमेयत्वं युक्तमन्यथा नेत्यर्थः । इदमेवाहास्ति त्वित्यादिना ।

(२) उपाध्यपेक्षयाऽऽकाशे भेदारोपेऽपि न बाह्याकाशतुल्यत्वं हार्दाकाशस्येत्याह नचेति ।

(३) यद्यनन्तत्वाद्धार्दनभसो न बाह्येनोपमेयता हस्ताधिकत्वाद्ब्रह्मणोऽपि न स्यादत आह न भूतेति ।

(४) आधेयत्वहेतुं पूर्वपक्ष्युपन्यस्तं निरस्यन्नाह उपलब्धेरिति । तेनेत्यादिना विशेषत्वहेतुनिरासो ज्ञेयः । श्लोकार्थः सुगमः । (५) श्लोकार्थं व्याचक्षाणो मुख्याध्येयत्वनिराकरणे हेतुमाह तथाचेति ।

(६) ननु लिङ्गानि ब्रह्माभेदपराण्येव कुतो नेत्यत्राह ब्रह्मणो हीति । इह ब्रह्मणि बाधकं जीवे च साधकं प्रमाणं नास्ति ब्रह्मबाधकत्वेन जीवसाधकत्वेन चाभिमतस्य संनिधेर्लिङ्गैर्बाधादित्यर्थः ।

(७) एवं च पुरस्य ब्रह्मसम्बन्धोपपादनाद्ब्रह्मशब्देन जीवानभिधानाज्जीवसंनिधिरसिद्ध इति भावः ।

(८) 'अथ य इहात्मानमनुविद्य' (पृ० ३२७ पं० १७) इति भाष्यस्थश्रुतावनुशब्दार्थमाह श्रवणेति । अनुभूय-साक्षात्कृत्येति विदेरर्थः । कामाः-विषयः, चार-उपलब्धिः ।

मनुविद्य ब्रह्मानुभूय चरणं चारस्तेषां कामेषु चरणं भवतीत्यर्थः । (१)स्यादेतत्, दहराकाशस्यान्वेष्यत्वे सिद्धे तत्र विचारो युज्यते, न तु तदन्वेष्टव्यम्, अपि तु तदाधारमन्यदेव किंचिदित्युक्तमित्यनुभाषते "यदप्येतदि"ति (पृ० ३२७ प० १) अनुभाषितं दूषयति-"अत्र ब्रूम" इति । यद्याकाशाधारमन्यदन्वेष्टव्यं भवेत्तदेवोपरि व्युत्पादनीयमाकाशव्युत्पादनं तु क्रोपयुज्यत इत्यर्थः । चोदयति "नन्वेतदपी"ति । आकाशकथनमपि तदन्तर्वर्तिवस्तुसद्भावप्रदर्शनायैव । अथाकाशपरमेव कस्मान्न भवतीत्यत आह "तं चेदं ब्रूयु"रिति । आचार्येण हि 'दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमि'त्युपदिष्टेऽन्तेवासिनाऽऽक्षिप्तं, किं तदत्र विद्यते यदन्वेष्टव्यम् । पुण्डरीकमेव तावत्सूक्ष्मतरं तदवरुद्धमाकाशं सूक्ष्मतमम् । तस्मिन्सूक्ष्मतमे किमपरमस्ति नास्त्यवेत्यर्थः । तत्किमन्वेष्टव्यमिति । तदस्मिन्नाक्षेपे परिसमाप्ते समाधानावसर आचार्यस्याकाशोपमानोपक्रमं वचः-'उभे अस्मिन्द्यावापृथिवी समाहिते' इति । तस्मात्पुण्डरीकावरुद्धाकाशाश्रये द्यावापृथिव्यावेवान्वेष्टव्ये उपदिष्टे, नाकाश इत्यर्थः । परिहरति "नैतदेवम्" । "एवं हि"ति । (२)स्यादेतत्, एव मेवैतन्नो खल्वभ्युपगमा एव दोषत्वेन चाद्यन्ते इत्यत आह-"तत्र वाक्यशेष" इति । वाक्यशेषो हि दहराकाशात्मवेदनस्य फलवत्त्वं ब्रूते, यच्च फलवत् तत्कर्तव्यतया चोद्यते, यच्च कर्तव्यं तदिच्छतीति, 'तदन्वेष्टव्यं तद्वाव जिज्ञासितव्यमि'ति दहराकाशविषयमवतिष्ठते । स्यादेतत्, द्यावापृथिव्यावेवात्मानौ भविष्यतः, ताभ्यामेवात्मा लक्षयिष्यते, आकाशशब्दवत्, ततश्चाकाशाधारौ तावेव परामृश्येते इत्यत आह—"अस्मिन्कामाः समाहिताः"प्रतिष्ठिताः । "एष आत्माऽपहतपाप्मे"ति । अनेन हि प्रकृतं द्यावापृथिवीसमाधानाधारमाकाशमाकृष्य" द्यावापृथिव्याद्यभिधानव्यवहितमपीति(३) शेषः । ननु सत्यकामज्ञानस्यैतत्फलं, तदनन्तरं निर्देशाद्, न तु दहराकाशवेदनस्येत्यत आह-"समुच्चयार्थेन चशब्देने"ति । अस्मिन्कामा इति च एष इति चैकवचनान्तं न द्वे द्यावापृथिव्यौ पराम्रष्टुमर्हतीति दहराकाश एव पराम्रष्टव्य इति समुदायार्थः । (४)तदनेन क्रमेण 'तस्मिन्यदन्तरि'त्यत्र तच्छब्दोऽनन्तरमप्याकाशमतिलङ्घ्य हृत्पुण्डरीके परामृशतीत्युक्तं भवति । तस्मिन् हृत्पुण्डरीके यदन्तराकाशं तदन्वेष्टव्यमित्यर्थः ॥ १४ ॥

(सू०) गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च ॥ १५ ॥

उत्तरेभ्य इत्यस्य प्रपञ्चः । (५)एतमेव दहराकाशं प्रक्रम्य बताहो कष्टमिदं वर्तते जन्तूनां तत्त्वावबोधविकलानां यदेभिः स्वाधिनमपि ब्रह्म न प्राप्यते । तद्यथा चिरन्तननिरूढ-

---

(१) आद्यसंशयस्थपूर्वपक्षमनूद्य सिद्धान्तयन्नाह स्यादेतदिति ।

(२) द्यावापृथिव्याद्यन्वेष्टव्यापत्तिरित्यत्र भाष्ये इष्टापत्त्यभिप्रायेणाशङ्कते स्यादेतदिति । 'तद्यथ य इहात्मे'त्यत्रात्मशब्दः कथमत आह ताभ्यामिति । तथा च भूताकाशस्य दहरत्वसिद्धिरित्यर्थः ।

(३) व्यवहितमपीति । 'उभेऽस्मिन् द्यावापृथिवी अन्तरेव समाहिते' इति पूर्ववाक्ये आकाशनिर्देशानन्तरं द्यावापृथिव्यादिनिर्देशात् व्यवधानमत्राकृष्येति भाष्यार्थो बोध्यस्तथाच 'अस्मिन्कामा' इत्यस्मिन्शब्देन द्यावापृथिव्याधार आकाश एव परामृश्यते समानाधारत्वप्रत्यभिज्ञानान्न द्यावापृथिव्यौ, एवं चैष इत्यात्मेति तदुपरितनशब्दाभ्यामप्याकाश एव निर्दिष्ट इति समाधानार्थतात्पर्यम् ।

(४) यदि दहराकाशस्य ज्ञेयत्वं कथं तर्हि तदधिकरणस्य ज्ञेयत्वोपदेशोऽत आह तदनेनेति ।

(५) अस्य श्रुतिः प्रवृत्त इत्यन्वयः ।

निबिडमलपिहितानां कलधौतशकलानां पथि पतितानामुपर्युपरि सञ्चरद्भिरपि पान्थैर्धनाय(१) प्रावखण्डनिवहविभ्रमेणैतानि नोपादीयन्त इत्यभिसन्धिमती साद्भुतमिव सखेदमिव श्रुतिः प्रवर्तते 'इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्ती'ति। स्वापकाले हि सर्व एवायं विद्वानविद्वाँश्च जीवलोको हृत्पुण्डरीकाश्रयं दहराकाशाख्यं ब्रह्मलोकं प्राप्योप्य-नाद्यविद्यातमःपटलापिहितदृष्टितया ब्रह्मभूयमापन्नोऽहमस्मीति न वेद। सोयं ब्रह्मलोकशब्द-स्तद्गतिश्च प्रत्यहं जीवलोकस्य दहराकाशस्यैव ब्रह्मरूपलोकतामाहतुः। तदेतदाह भाष्यकार **"इतश्च परमेश्वर एव दहरो यस्माद्दहरवाक्यशेष"** इति (पृ० ३२९ पं० २) तदनेन गतिशब्दौ व्याख्यातौ। 'तथाहि दृष्ट'मिति सूत्रावयवं व्याचष्टे-**"तथा ह्य-हरहर्जीवाना"मिति**। वेदे च लोके च **"दृष्टम्"**। यद्यपि सुषुप्तस्य ब्रह्मभावे लौकिकं न प्रमाणान्तरमस्ति, तथापि वैदिकीमेव प्रसिद्धिं स्थापयितुमुच्यते। 'ईदृशी नामेयं वैदिकी प्र-सिद्धिर्यल्लोकेऽपि गीयते' इति। यथा श्रुत्यन्तरे यथा च लोके तथेह ब्रह्मलोकशब्दोऽपीति योजना। **लिङ्गं चेति** सूत्रावयवव्याख्यानं चोद्यमुखेनावतारयति-**"ननु कमलासनलो-कमपी"ति**। परिहरति-**"गमयेद्यदि ब्रह्मणो लोक"** इति। (२)अत्र तावन्निषाद-स्थपतिन्यायेन षष्ठीसमासात्कर्मधारयो बलीयानिति स्थितमेव, तथापीह षष्ठीसमासनिराकरणेन कर्मधारयस्थापनाय लिङ्गमप्यधिकमस्तीति तदप्युक्तं सूत्रकारेण(३)। तथाहि लोकवेदप्रसिद्धं-दहरब्रह्मलोकप्राप्त्यभिधानमेव लिङ्गं कमलासनलोकप्राप्तेर्विपक्षादसम्भवाद्व्यावर्तमानं षष्ठीसमा सासङ्गं व्यावर्तयद्दहराकाशप्राप्तावेवावतिष्ठते, न च दहराकाशो ब्रह्मणो लोकः, किन्तु तद्ब्र-ह्मेति। ब्रह्म च तल्लोकश्चेति कर्मधारयः सिद्धो भवति। लोक्यत इति लोकः। हृत्पुण्डरीकस्थः खल्वयं लोक्यते। यत्खलु पुण्डरीकस्थमन्तःकरणं तस्मिन्विशुद्धे प्रत्याहृतेतरकरणानां योगिनां निर्मल इवोदके चन्द्रमसो बिम्बमतिस्वच्छं चैतन्यं ज्योतिस्स्वरूपं ब्रह्म विलोक्यत इति॥१५॥

(सू०) धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥१६॥

सौत्रो धृतिशब्दो भाववचनः। धृतेश्च परमेश्वर एव दहराकाशः। अस्य धारणल क्षणस्य महिम्नोऽस्मिन्नेवेश्वर एव श्रुत्यन्तरेषूपलब्धेः। निगदव्याख्यानमस्य भाष्यम् ॥१६॥

(सू०) प्रसिद्धेश्च ॥ १७ ॥

(४)न चेयमाकाशशब्दस्य ब्रह्मणि लक्ष्यमाणविभुत्वादिगुणयोगावृत्तिः साम्प्रतिकी, यथा

---

(१) धनेच्छावद्भि-।

(२) कर्मधारयस्य षष्ठीसमासादुत्तीयस्त्वाच्चिङ्गोपन्यासवैयर्थ्यमाशंक्य न्युच्चयार्थत्वेन परिहरति अत्र तावदित्यादिना। 'निषादस्थपतिं याजयेदि'त्यत्र निषादस्थपतिशब्दो वर्णिकानामन्यतम उताम्य इति संशयेऽन्ति-विद्यावत्त्वेन समर्थत्वादनिषादेपि निषादानां स्वामीतिशब्दवृत्तिसम्भवादन्यतम इति प्राप्ते, कर्मधारयसमासेन निषाद एव स्थपतिर्ग्राह्यो शैतार्थलाभेन शब्दसामर्थ्यात् षष्ठीसमासे लक्षणाया अपत्तेरिति मीमांसायां स्थितेपि लिङ्गाधिक्यसूचनार्थमत्र षष्ठीसमासमनादृत्य कर्मधारयस्थापनमिति भावः।

(३) चकारं प्रयुञ्जानेनेति शेषः। सूत्रावयवांशार्थमाह तथाहीति। विपक्षाद्व्यावृत्तौ हेतुरसम्भवादिति।

(४) प्रसिद्धिशब्दस्य रूढिवाचित्वभ्रममपनयति न चेति। रथाङ्गमिति नाम्नश्चक्रवाके लक्षणया सम्प्र-त्येव प्रयोगः रथाङ्गशब्दपर्यायस्य चक्रप्रातिपदिकस्य चक्रवाकशब्दावयवत्वेन निवेशात्, आकाशशब्दस्य तु तु ब्रह्मण्यनादिकाले बहुकृत्वः प्रयोगान्निरूढलक्षणेत्यर्थः।

रथाङ्गनामा चक्रवाक इति लक्षणा, किन्त्वत्यन्तनिरूढेति सूत्रार्थः । (१)ये त्वाकाशशब्दो ब्रह्मण्यपि मुख्य एव नभोवदित्याचक्षते, तै'रन्यायश्चानेकार्थत्वमि'ति 'चानन्यलभ्यः शब्दार्थ' इति च मीमांसकानां मुद्राभेदः कृतः । लभ्यते ह्याकाशशब्दाद्विभुत्वादिगुणयोगेनापि ब्रह्म । (२)न च ब्रह्मण्येव मुख्यो नभसि तु तेनैव गुणयोगेन वर्त्स्यतीति वाच्यम् । लोकाधीनावधारणत्वेन शब्दार्थसम्बन्धस्य वैदिकपदार्थप्रत्ययस्य तत्पूर्वकत्वात् । (३)ननु 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश' इति व्यतिरेकनिर्देशान्न लक्षणा युक्ता। (४)नहि भवति गङ्गायाः कूले विवाक्षते(५) गङ्गाया गङ्गेति प्रयोगः (६)तत्किमिदानीं 'पौर्णमास्यां पौर्णमास्या यजेतामावास्यायामवास्यये'त्यसाधुर्वैदिकः प्रयोगः । न च पौर्णमास्यमावास्यशब्दावाग्नेयादिषु मुख्यौ । यच्चोक्तं यत्र शब्दादर्थप्रतीतिस्तत्र लक्षणा, यत्र पुनरन्यतोऽर्थे निश्चिते शब्दप्रयोगस्तत्र वाचकत्वमेवेति । तदयुक्तम्, उभयस्यापि व्यभिचारात् । 'सोमेन यजेते'ति शब्दादर्थः प्रतीयते, न चात्र कस्यचिल्लाक्षणिकत्वमृते वाक्यार्थात् । न च 'य एवं विद्वान्पौर्णमासीं यजते य एवं विद्वानमावास्या'मित्यत्र पौर्णमास्यमावास्याशब्दौ न लाक्षणिकौ । तस्माद्यत्किञ्चिदेतदिति ॥ १७ ॥

सू० इतरपरामर्शात्स इति चेन्नासम्भवात् ॥ १८ ॥

सम्यक् प्रसीदत्यस्मिन् जीवो विषयेन्द्रियसंयोगजनितं कालुष्यं जहातीति सुषुप्तिः संप्रसादो जीवस्यावस्थाभेदो, न ब्रह्मणः । तथा शरीरात्समुत्थानमपि शरीराश्रयस्य जीवस्य न त्वनाश्रयस्य ब्रह्मणः । तस्माद्यथा पूर्वोक्तैर्वाक्यशेषगतैर्लिङ्गैर्ब्रह्मावगम्यते दहराकाश, एवं वाक्यशेषगताभ्यामेव संप्रसादसमुत्थानाभ्यां दहराकाशो जीवः कस्मान्नावगम्यते ? तस्मान्नास्ति विनिगमनेति शङ्कार्थः । 'नासम्भवात्' संप्रसादसमुत्थानाभ्यां हि जीवपरामर्शो न जीवपरः, किन्तु तदीयतात्त्विकरूपब्रह्मभावपरः । तथा चैष परामर्शो ब्रह्मण एवेति न संप्रसादसमुत्थाने जीवलिङ्गमपि तु ब्रह्मण एव तादर्थ्यादित्यग्रे वक्ष्यते । आकाशोपमानादयस्तु ब्रह्माव्यभिचारिणश्च ब्रह्मपराश्चेत्यस्ति विनिगमनेत्यर्थः ॥ १८ ॥

सू० उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १९ ॥

---

(१) पञ्चपादिकाकारमतं दूषयन्नाह य इति । तैरिति । नभसि ब्रह्मणि च रूढ्यभ्युपगमेऽनेकार्थत्वात्, नाभसगुणयोगाद्ब्रह्मणि वृत्तिसम्भवे च शक्तिकल्पनायां गौरवान्मीमांसकानां नियमद्वयं खण्डितं स्यादिति भावः।

(२) अस्तु तर्ह्यनेकार्थत्वनिरासाय ब्रह्मण्येव मुख्यत्वमाकाशशब्दस्येत्यत आह नचेति। तेनैव—विभुत्वादिगुणयोगेन ।

(३) रूढवादी प्रसिद्धगुणवृत्तिवैषम्यं शङ्कते नन्विति । 'अन्तर्हृदय आकाश' इति ब्रह्मण्याकाशशब्दस्य प्रयोगादेवाकाशगुणयोगस्य लक्ष्यस्य सिद्धौ लभ्यायामपि तद्व्यतिरेकेण 'यावान्वा अयमाकाशस्तावानि'त्याकाशसादृश्यस्य निर्देशाल्लक्षणा न युक्तेत्यर्थः ।

(४) कूलमिति विवक्षिते इति मु० मु० पु० पाठः ।

(५) लक्षणास्थले लक्ष्यांशस्य पृथगनिर्देशे दृष्टान्तमाह नहीति । गंगापदेन गंगायाः कूलमित्यर्थे विवक्षिते गङ्गापदमेव प्रयुज्यते न तु गङ्गाया इति लक्ष्यसम्बन्धं पृथगुक्त्वा गङ्गेति प्रयुज्यत इत्यर्थः ।

(६) परिहरति तत्किमिति । आग्नेयादौ पौर्णमास्यादिशब्दप्रयोगादेव लक्ष्यभूतकालसम्बन्धस्य सिद्धावपि पौर्णमास्यामिति पुनस्तन्निर्देशादुक्तन्यायो व्यभिचारीति भावः ।

दहराकाशमेव प्रकृत्योपाख्यायते । यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् तमात्मानं विविदिषन्तौ सुरासुरराजाविन्द्रविरोचनौ समित्पाणी प्रजापतिं वरिवसितु(१)माजग्मतुः । आगत्य च द्वात्रिंशतं वर्षाणि तत्परिचरणपरौ ब्रह्मचर्यमूषतुः । अथैतौ प्रजापतिरुवाच—'किं कामाविहस्थौ युवामि'ति । तावूचतुः—'य आत्माऽपहतपाप्मा तमावां विविदिषाव' इति । ततः प्रजापतिरुवाच—'य एषोऽक्षिणि पुरुषो दृश्यते एष आत्माऽपहतपाप्मत्वादिगुणो, यद्विज्ञानात्सर्वलोककामावाप्तिः । एतदमृतमभयम्' । अथैतच्छ्रुत्वैतावप्रक्षीणकल्मषावरणतया छायापुरुषं जगृहतुः । प्रजापतिं च पप्रच्छतुः—'अथ योयं भगवोप्सु दृश्यते यश्चादर्शे यश्च खड्गादौ कतम एतेष्वसावथ वैक एव सर्वेष्वि'ति । तमेतयोः श्रुत्वा प्रश्नं प्रजापतिर्बताहो सुदूरमुद्भ्रान्तावेतौ, अस्माभिरक्षिस्थान आत्मोपदिष्टः, एतौ च छायापुरुषं प्रतिपन्नौ, तद्यदि वयं भ्रान्तौ स्थ इति ब्रूमस्ततः स्वात्मनि समारोपितपाण्डित्यबहुमानौ विमानितौ सन्तौ दौर्मनस्येन यथावदुपदेशं न गृह्णीयाताम्, इत्यनयोराशयमनुरुध्य यथार्थं ग्राहयिष्याम इत्यभिसन्धिमान्प्रत्युवाच—'उदशराव आत्मानमवेक्षेथामस्मिन्यत्पश्यथस्तद्ब्रूतामि'ति तौ च दृष्ट्वा सन्तुष्टहृदयौ नाब्रूताम् । अथ प्रजापतिरेतौ विपरीतग्राहिणौ मा भूतामित्याशयवान्पप्रच्छ 'किमत्रापश्यतमि'ति । तौ होचतुः—यथैवावामतिचिरब्रह्मचर्यचरणसमुपजातायतनखलोमादिमन्तावेवमावयोः प्रतिरूपकं नखलोमादिमदुदशरावेऽपश्यावेति । पुनरेतयोश्छायात्मविभ्रममपनिनी(२)षुर्यथैव हि छायापुरुष उपजनापायधर्माभेदेनावगम्यमान आत्मलक्षणविरहान्नात्मैवेवमेवेदं शरीरं नात्मा, किन्तु ततो भिन्नमित्यन्वयव्यतिरेकाभ्यामेतौ जानीयातामित्याशयवान्प्रजापतिरुवाच—'साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वा पुनरुदशरावे पश्यतमात्मानम्, यच्चात्र पश्यथस्तद्ब्रूतमि'ति । तौ च साध्वलंकृतौ सुवसनौ छिन्ननखलोमानौ भूत्वा तथैव चक्रतुः । पुनश्च प्रजापतिना पृष्टौ तामेव छायामात्मन ऊचतुः । तदुपश्रुत्य प्रजापतिरहो बताद्यापि न प्रशान्त एनयोर्विभ्रमः, तथथाभिमतमेवात्मतत्त्वं कथयामि तावत् । कालेन कल्मषे क्षीणेऽस्मद्वचनसन्दर्भपौर्वापर्यपर्यालोचनयाऽऽत्मतत्त्वं प्रतिपत्स्येते स्वयमेवेति मत्वोवाच—'एष(३) आत्मेतदमृतमभयमेतद्ब्रह्मे'ति । तयोर्विरोचनो देहानुपातित्वाच्छायाया(४) देह एवात्मतत्त्वमिति मत्वा निजसदनमागत्य तथैवासुरानुपदिदेश । (५)देवेन्द्रस्त्वप्राप्तनिजसदनोऽध्वन्येव किंचिद्विरलकल्मषतया छायात्मनि शरीरगुणदोषानुविधायिनि तन्तं दोषं परिभावयन् नाहमत्र छायात्मदर्शने भोग्यं पश्यामीति प्रजापतिसमीपं समित्पाणिः पुनरेवेयाय । आगतश्च प्रजापतिनाऽऽगमनकारणं पृष्टः पथि परिभावितं जगाद । प्रजापतिस्तु 'सुव्याख्यातमप्यात्मतत्त्वमक्षीणकल्मषावरणतया नाग्रहीस्तत्पुनरपि तत्प्रक्षयाय चरापरा-

---

(१) शुश्रूषितुम् ।

(२) अपनेतुमिच्छुः, अस्य प्रजापतिरुवाचेत्यत्रान्वयः ।

(३) एषः—देहायागमापायसाक्षी ।

(४) च्छायाया इति । यथा नीलानीलपटयोरादर्शे दृश्यमानयोर्यन्नीलं तन्महार्हमित्युक्ते न छायाय महार्हत्वमेवं छायाकारदेहस्यैवात्मत्वमिति विरोचनो मन्यते स्मेत्यर्थः ।

(५) इन्द्रस्त्वल्पपापत्वाच्छ्रद्दधानतया न प्रतिबिम्बमेवात्मेति मत्वा प्रजापतिसमीपमुपजगामेत्याहेन्द्रस्त्विति ।

णि द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमथ प्रक्षीणकल्मषाय ते अहमेतमेवात्मानं भूयो व्याख्यास्यामी'त्यवोचत् । स च तथा चरितब्रह्मचर्यः सुरेन्द्रः प्रजापतिमुपससाद । उपसन्नाय चास्मै प्रजापतिर्व्याचष्ट 'य आत्माऽपहतपाप्मादिलक्षणोऽक्षिणि दर्शितः सोऽयं य एष स्वप्ने महीयमानो वनितादिभिरनेकधा स्वप्नोपभोगान् भुञ्जानो विहरती'ति । अस्मिन्नपि देवेन्द्रो भयं ददर्श । 'यद्यप्ययं छायापुरुषवन्न शरीरधर्मानुपपतति, तथापि शोकभयादिविविधबाधानुभवान्न तत्राप्यस्ति स्वस्तिप्राप्तिरि'त्युक्तवति मघवति 'पुनरपराणि चर द्वात्रिंशत वर्षाणि स्वच्छं ब्रह्मचर्यमिदानीमप्यक्षीणकल्मषोऽसी'त्यूचे प्रजापतिः। अथास्मिन्नेवंकार(१)मुपसन्ने मघवति प्रजापतिरुवाच–'य एष आत्माऽपहतपाप्मादिगुणो दर्शितोऽक्षिणि च स्वप्ने च स एष यो विषयेन्द्रियसंयोगविरहात्प्रसन्नः सुषुप्तावस्थायामि'ति । अत्रापि नेन्द्रो निर्ववार(२)। 'यथा हि जाग्रद्वा स्वप्नगतो वाऽयमहस्मीति इमानि भूतानि चेति विजानाति नैवं सुषुप्तः किंचिदपि वेदयते, तदा खल्वयमचेतयमानोऽभावं प्राप्त इव भवति तदिह का निर्नुतिरिति' एवमुक्तवति मघवति 'बताद्यापि न ते कल्मषक्षयोऽभूत् , तत्पुनरपराणि चर पञ्च वर्षाणि ब्रह्मचर्यमि'त्यवोचत्प्रजापतिः । तदेवमस्य मघोनस्त्रिभिः पर्यायैर्व्यतीयुः षण्णवतिर्वर्षाणि । चतुर्थे च पर्याये पञ्च वर्षाण्त्येकोत्तरं शतं वर्षाणि ब्रह्मचर्यं चरतः सहस्राक्षस्य संपेदिरे । अथास्मै ब्रह्मचर्यसम्पदुन्मृदितकल्मषाय मघवते य एषोऽक्षिणि (३)यश्च स्वप्ने यश्च सुषुप्तावनुस्यूत एष आत्माऽपहतपाप्मादिगुणो दर्शितः, तमेव 'मघवन् मर्त्यं वै शरीरमि'त्यादिना विस्पष्टं व्याचष्टे प्रजापतिः । अयमस्याभिसन्धिः—यावत्किंचित्सुखं दुःखमागमापायि तत्सर्वं शरीरेन्द्रियान्तःकरणसम्बन्धि, न त्वात्मनः । स पुनरेतानेव शरीरादीन् अनाद्यविद्यावासनावशादात्मत्वेनाभिप्रतीतस्तद्गतेन सुखदुःखेन तद्वन्तमात्मानमनुमन्यमानोऽनुतप्यते । यदा त्वयमपहतपाप्मादिलक्षणमुदासीनमात्मानं देहादिभ्यो विविक्तमनुभवति, अथास्य शरीरवतोऽप्यशरीरस्य न देहादिधर्मसुखदुःखप्रसङ्गोऽस्तीति नानुतप्यते, केवलमयं निजे चैतन्यानन्दघने रूपे व्यवस्थितः समस्तलोककामान् प्राप्तो भवति । एतस्यैव हि परमानन्दस्य मात्राः सर्वे कामाः, दुःखं त्वविद्यानिर्माणमिति न विद्वान्प्राप्नोति ।

अशीलितोपनिषदां व्यामोह इह जायते ।
तेषामनुग्रहायेदमुपाख्यानमवर्तयम् ॥

एवं व्यवस्थित उत्तरद्वाक्यसंदर्भोत्प्राजापत्यादक्षिणि च स्वप्ने च सुषुप्ते च चतुर्थे च पर्याये 'एष(४) संप्रसादोऽस्माच्छरीरादुत्थाये'ति जीवात्मैवापहतपाप्मादिगुणः श्रुत्योच्यते । नो खलु परस्याक्षिस्थानं संभवति, नापि स्वप्नाद्यवस्थायोगः, नापि शरीरात्समुत्थानम् । तस्माद्यदैतत्सर्वं सोऽपहतपाप्मादिगुणः श्रुत्योक्तः । जीवस्य चैतत्सर्वमिति स एवापहतपाप्मादिगुणः श्रुत्योक्त इति नापहतपाप्मादिभिः परं ब्रह्म गम्यते । ननु जीवस्यापहतपाप्मत्वादयो न संभवन्तीत्युक्तम् । वचनाद्भविष्यन्ति । किमिव वचनं न कुर्यात्, नास्ति वचनस्यातिभारः । न च मानान्तरविरोधः । नहि जीवः पाप्मादिस्वभावः, किन्तु

---

(१) एवङ्कारम्—एवङ्कृत्वा ।(२) न सुप्तितोऽभूदित्यर्थः ।(३) अक्ष्युपलक्षिते जाग्रतीत्यर्थः ।
(४) चतुर्थपर्यायमेव प्रतीकत उपादत्ते एष इति ।

वाग्बुद्धिशरीरारम्भसम्भवो(१)ऽस्य पाप्मादिः शरीराद्यभावे न भवति धूम इव धूमध्वजाभाव इति शङ्कार्थः—निराकरोति—"तं प्रति ब्रूयात् आविर्भूतस्वरूपस्तु" (पृ० ३३३ पं० ११)। अयमभिसन्धिः। पौर्वापर्यपर्यालोचनया तावदुपनिषदां शुद्धबुद्धमुक्तमेकप्रपञ्चं ब्रह्म,(२) तदतिरिक्तं च सर्वं तद्विवर्तो रज्जोरिव भुजङ्ग इत्यत्र तात्पर्यमवगम्यते। तथा च जीवोऽप्यविद्याकल्पितदेहेन्द्रियाद्युपहितं रूपं ब्रह्मणो न तु स्वभाविकः। एवं च नापहतपाप्मत्वादयस्तस्मिन्नविद्योपाधौ संभविनः। आविर्भूतब्रह्मरूपे तु निरुपाधौ संभवन्तो ब्रह्मण एव न जीवस्य। (३)एवं च ब्रह्मैवापहतपाप्मादिगुणं श्रुत्युक्तमिति तदेव दहराकाशो न जीव इति। स्यादेतत्, स्वरूपाविर्भावे चेद्ब्रह्मैव न जीवः, तर्हि विप्रतिषिद्धमिदमभिधीयते 'जीव आविर्भूतस्वरूप इति' अत आह—"भूतपूर्वगत्ये"ति। "उदशरावब्राह्मणने"ति। (पृ० ३३४ पं० १)। यथैव हि मधोनः प्रातर्बिम्बान्युदशराव उपजनापायधर्मकाण्यात्मलक्षणविरहान्नात्मा, एवं देहेन्द्रियाद्यप्युपजनापायधर्मकं नात्मेत्युदशरावदृष्टान्तेन शरीरात्मताया व्युत्थानं बोध इति।

चोदयति—"कथं पुनः स्वं च रूप"मिति (पृ० ३३५ पं १)। द्रव्यान्तरसंसृष्टं हि तेनाभिभूतं तस्माद्विविच्यमानं व्यज्यते हेमतारकादि, कूटस्थनित्यस्य पुनरन्येनासंसृष्टस्य कुतो विवेचनादभिव्यक्तिः। न च संसारावस्थायां जीवोऽनभिव्यक्तो, दृष्ट्यादयो ह्यस्य स्वरूपं ते च संसारावस्थायां भासन्त इति कथं जीवरूपं न भासत इत्यर्थः।

परिहरति—"प्राग्विवेकज्ञानोत्पत्ते"रिति। अयमर्थः—यद्यप्यस्य कूटस्थनित्यस्यान्यसंसर्गो न वस्तुतोऽस्ति, यद्यपि च संसारावस्थायामस्य दृष्ट्यादिरूपं चकास्ति, तथाप्यनिर्वाच्यानाद्यविद्यावशादविद्याकल्पितैरेव देहेन्द्रियादिभिरसंसृष्टमपि संसृष्टमिव विविक्तमप्यविविक्तमिव दृष्ट्यादिरूपमस्य प्रथते। तथा च देहेन्द्रियादिगतैस्तापादिभिस्तापादिमदिव भवतीति। उपपादितं चैतद्विस्तरेणाध्यासभाष्य इति नेहोपपाद्यते। (४)यद्यपि स्फटिकादयो जपाकुसुमादिसंनिहिताः, संनिधानं च संयुक्तसंयोगात्मकम्, तथा च संयुक्ताः, तथापि न साक्षाज्जपादिकुसुमसंयोगिन इत्येतावता दृष्टान्तिता इति। "वेदना" हर्षभयशोकादयः। दार्ष्टान्तिके योजयति—"तथा देहादी"ति (पृ० ३३६ पं ३) 'सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इत्येतद्विभजते—"श्रुतिकृतं विवेकविज्ञानमि"ति। तदनेन श्रवणमननध्यानाभ्यासाद्विवेकज्ञानमुक्त्वा तस्य विवेकवि-

---

(१) वागिति। वाग्बुद्धिशरीराणां कार्यभूतो य आरम्भः क्रिया ततः सम्भवो यस्य पाप्मादेरपूर्वस्य स तथा।

(२) एतेनेश्वरस्यैव जीवत्वमिति जीववादिनः पक्षो निरस्तः। ईश्वरस्य जीवप्रत्यगात्मत्वमिति तस्यैव पक्षान्तरं निरस्यति तदतिरिक्तं चेति। तथाचेति। रज्ज्वां भुजङ्गवत् जगत्परमात्मनि कल्पितम्, एवं जीवेऽपि द्वितीयचन्द्रवद्भेदेनाध्यस्त इति नायमपि पक्षो युक्त इति भावः।

(३) अभ्युपेत्येश्वरस्य जीवप्रत्यक्त्वमत्र वाक्ये ईश्वरस्य प्रतिपादनं न मन्यत इति जीववादिनस्तूतीयपक्षोऽपि न युक्त इत्याह एवं चेति। श्रुत्युक्तं—श्रुत्या प्रजापतिवाक्ये उक्तमित्यर्थः।

(४) भाष्येऽन्यासंसर्गेण आत्मनोऽभिव्यक्तिसम्भवेऽन्यसंसर्गिस्फटिकदृष्टान्तवर्णनमयुक्तमित्याशंक्य परिहरति यद्यपीति। जपाकुसुमादिना संयुक्तं भूतलं तेन निकट एव संयोगो येषां स्फटिकादीनां ते संयुक्तसंयोगास्तद्रूपत्वं तदात्मत्वम्, तथाच व्यवधानेन संयुक्ता इत्यर्थः।

ज्ञानस्य फलं केवलात्मरूपसाक्षात्कारः, स्वरूपेणाभिनिष्पत्तेः, स च साक्षात्कारो वृत्तिरूपः प्रपञ्चमात्रं प्रविलापयन् स्वयमपि प्रपञ्चरूपत्वात् कतकफलवत् प्रलीयते । तथा च निर्मृष्टनिखिलप्रपञ्चजालमनुपसर्गमपराधीनप्रकाशमात्मज्योतिः सिद्धं भवति(१) । तदिदमुक्तं 'परं ज्योतिरुपसम्पद्ये'ति । (२)अत्र चोपसम्पत्तावुत्तरकालायामपि कत्वाप्रयोगो मुखं व्यादाय स्वपितीतिवन्मन्तव्यः। (३)यदा च विवेकसाक्षात्कारः शरीरात्समुत्थानं, न तु शरीरापादानकं गमनम्, तदा तत्सशरीरस्यापि सम्भवति प्रारब्धकार्यकर्मक्षयस्य पुरस्तादित्याह—**"तथा विवेकाविवेकमात्रेणे"ति** । न केवलं 'स यो ह वै तत्परमं, ब्रह्म वेद ब्रह्मैव भवती'त्यादिश्रुतिभ्यो जीवस्य परमात्मनोऽभेदः, प्राजापत्यवाक्यसन्दर्भपर्यालोचनयाप्येवमेव प्रतिपत्तव्यमित्याह—**"कुतश्चैतदेवं प्रतिपत्तव्यमि"ति** । (४)स्यादेतत्, प्रतिच्छायात्मवज्जीवं परमात्मनो वस्तुतो भिन्नमप्यमृताभयात्मत्वेन ग्राहयित्वा पश्चात्परमात्मानममृताभयादिमन्तं प्रजापतिर्ग्राहयति, न त्वयं जीवस्य परमात्मभावमाचष्टे छायात्मन इवेत्यत आह—**"नापि प्रतिच्छायात्मायमक्षिलक्षित" इति** (पृ० ३३७ पं०) । अक्षिलक्षितोप्यात्मैवोपदिश्यते न छायात्मा । तस्मादसिद्धो दृष्टान्त इत्यर्थः । किं च द्वितीयादिष्वपि पर्याये'ष्वेतं त्वेव ते भूयोनुव्याख्यास्यामी'त्युपक्रमात्प्रथमपर्यायनिर्दिष्टो न छायापुरुषोऽपि तु ततोऽन्यो द्रष्टात्मेति दर्शयत्यन्यथा प्रजापतेः प्रतारकत्वप्रसङ्गादित्यत आह—**"तथा द्वितीयेऽपी"ति** । अथ छायापुरुष एव जीवः कस्मान्न भवति, तथा च छायापुरुष एवैतमिति परामृश्यत इत्यत आह—**'किं चाहमद्य स्वप्ने हस्तिनमि"ति** । **"किञ्च"ति**—समुच्चयाभिधानं पूर्वोपपत्तिसाहित्यं ब्रूते, तच्च शङ्कानिराकरणद्वारेण । छायापुरुषोऽस्थायी, स्थायी चायमात्मा चकास्ति, प्रत्यभिज्ञानादित्यर्थः । **"नाहं खल्वयमेवे"ति** । अयं-सुषुप्तः । **"सम्प्रति"** सुषुप्तावस्थायाम् । अहमात्मानमहङ्कारास्पदमात्मानम् । न जानाति । केन प्रकारेण न जानातीत्यत आह—**"अयमहमस्मीमानि भूतानि चे"ति । "यथा जागृति स्वप्ने चे"ति** । 'नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते अविनाशित्वादि'त्यनेना(५)विनाशित्वं सिद्धवद्धेतूकुर्वता सुप्तोत्थितस्यात्मप्रत्यभिज्ञानमुक्तम्—'य एवाहं जागरित्वा सुप्तः स एवैतर्हि जागर्मी'ति ।

आचार्यदेशीयमतमाह(६)—**"के चिरिव"ति**। यदि(७) ह्येतमित्यनेनानन्तरोक्तं चक्षुर-

---

(१) अयमेव ह्यनावृतस्वरूपस्फुरणात्मक उपसम्पत्तिशब्दार्थ इति भावः ।

(२) ननु स्वरूपाभिनिष्पत्तिर्वृत्तिस्तयाऽपसारिते आवरणे पश्चाज्ज्योतिरूपसम्पत्तिस्तत्कथं व्युत्क्रमेण कथनमत आहाथ चेति ।

(३) यदेति । प्रथमं परोक्षज्ञानं शरीरात्समुत्थानमुक्तम्, इदानीं तस्य फलपर्यन्तत्वात्तत्फलं साक्षात्कारोपि शरीरात्समुत्थानत्वेनानूदित इति न पौनरुक्त्यम् ।

(४) प्रतिबिम्बस्थायिपुरुषत्वेन निर्देशवारकं 'नापि प्रतिच्छायेत्या'दिभाष्यमप्रासंगिकमिवेति पूर्वपक्षितजीवदृष्टान्तनिराकरणपरत्वेन प्रकृते संगमयति स्यादेतदिति ।

(५) अविनाशित्वादिति हेतोः साध्याविशेषमाशंक्याह अनेनेति । असिद्धस्यापि हेतोः सिद्धिनिर्देशेन सिद्धिहेतुभूतं प्रमाणं सूचितमित्यर्थः । तदेव प्रमाणं दर्शयति य एवाहमिति ।

(६) आचार्यकल्पमतं नतु वास्तवाचार्यमतमित्यर्थः ।

(७) एकदेशिप्रत्यवस्थानं जीवो दहर इति पूर्वपक्षेऽन्तर्भावयति यदीति । पूर्वपक्षिणा तावच्छाया-

धिष्ठानं पुरुषं परामृश्य तस्यात्मत्वमुच्यते ततो न भवेच्छायापुरुषः । न त्वेतदस्ति, वाक्योपक्रमसूचितस्य परमात्मनः परामर्शाद्, न(१) खलु जीवात्मनोऽपहतपाप्मत्वादिगुणसम्भव इत्यर्थः । तदेतद्दूषयति--"तेषामेतमि"ति । सुबोधम्(२) ।

(३)मतान्तरमाह—"अपरे तु वादिन" इति (पृ० ३३८ पं० ८) । यदि न जीवः कर्ता भोक्ता च वस्तुतो भवेत्, ततस्तदाश्रयाः कर्मविधय उपरुध्येरन् । सूत्रकारवचनं च 'नासम्भवादि'ति कुप्येत । तत्खलु ब्रह्मणो गुणानां जीवेऽसम्भवमाह । न चाभेदे ब्रह्मणो जीवानां ब्रह्मगुणानामसम्भवो जीवेष्विति तेषामभिप्रायः । तेषां वादिनां शारीरकेणैवोत्तरं दत्तम् । तथाहि-पौर्वापर्यपर्यालोचनया वेदान्तानामेकमद्वयमात्मतत्त्वं, जीवास्त्वविद्योपधानकल्पिता इत्यत्र तात्पर्यमवगम्यते । (४)न च वस्तुतो ब्रह्मणो गुणाः समारोपितेषु जीवेषु सम्भवन्ति । नो खलु वस्तुसत्या रज्ज्वा धर्माः सेव्यत्वादयः समारोपिते भुजङ्गे सम्भविनः । न च समारोपितो भुजङ्गो रज्ज्वा भिन्नः तस्मान्न सूत्रव्याकोपः । (५)अविद्याकल्पितं च कर्तृत्वभोक्तृत्वं यथा लोकसिद्धमुपाश्रित्य कर्मविधयः प्रवृत्ताः श्येनादिविधय इव निषिद्धेऽपि 'न हिंस्यात्सर्वा भूतानी'ति साध्यांशेऽभिचारेऽतिक्रान्तनिषेधं पुरुषमाश्रित्याविद्यावत्पुरुषाश्रयत्वाच्छास्त्रस्येत्युक्तम् । तदिदमाह—"तेषां सर्वेषा"मिति ॥ १९ ॥

ननु ब्रह्म चेदत्र वक्तव्यं कृतं जीवपरामर्शेनेत्युक्तमित्यत आह--

(सू०)अन्यार्थश्च परामर्शः ॥ २० ॥

जीवस्योपाधिकल्पितस्य ब्रह्मभाव उपदेष्टव्यो, न चासौ जीवमपरामृश्य शक्य उपदेष्टुमिति तिसृष्ववस्थासु जीवः परामृष्टः, तद्भावप्रविलयनं तस्य परिमार्थिकं ब्रह्मभावं दर्शयितुमित्यर्थः ॥ २० ॥

(सू०) अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २१ ॥

निगदव्याख्यातेन भाष्येण व्याख्यताम् ॥ २१ ॥

(सू०) अनुकृतेस्तस्य च ॥ २२ ॥

(६)अभानं तेजसो दृष्टं सति तेजोन्तरे यतः ।

वद्वाऽऽरोपेण स्वत एव वा देहादिवियोगमपेक्ष्यामृताभयत्वादि जीवस्येवेति एतं त्वेव त इत्यञ्जिस्थपुरुषानुकर्षणमङ्गीकृतम्, इदानीन्तु परामर्शस्याभ्यविषयत्वेन स एवैकदेशी भूत्वा प्रत्यवतिष्ठत इत्यर्थः ।

(१) ननु परमात्मपरामर्शो जीवः परामृष्ट एव तदभेदादत आह न खल्विति ।

(२) दृष्टे सम्भवत्यदृष्टकल्पनानुपपत्तेर्लोकसिद्धजीवानुवादेन ब्रह्मत्वं बोध्यते नोपास्तिविधिः, इत्यब्रह्मचर्यावसानानन्तर्यार्था भविष्योक्तिरिति परिहारोऽभिप्रायः ।

(३) एवमौपाधिको जीवोऽवच्छिन्ने च नापहतपाप्मत्वादिसम्भव इति एकदेशिमतं निरस्य पारमार्थिकजीवब्रह्मविभागमतपदर्शनायाह मतान्तरमिति ।

(४) ननु यदि जीवब्रह्माभेदः शारीरकार्थस्तर्हि 'नासम्भवात्' १।३।१० इति सूत्रबोधितभेदस्य का गतिरत आह नचेति । औपाधिकभेदेन गुणसङ्कर इत्यर्थः ।

(५) कर्मविध्युपरोध वारयति आविद्येति । अविद्याकल्पितकर्तृत्वाद्याश्रयेण कर्मविधिप्रवृत्तौ हेतुरविद्यावत्पुरुषाश्रयत्वाच्छास्त्रस्येति उक्तमध्यासभाष्ये ।

(६) न तत्रेत्यादि मुण्डकस्थविषयवाक्ये तत्रेति विषयसप्तमीस्वीकारे तद्वासयतीतिणिजध्याहारपक्ष-

तेजो धात्वन्तरं तस्मादनुकाराच्च गम्यते ॥

बलीयसा हि सौर्येण तेजसा मन्दं तेजश्चन्द्रतारकाद्यभिभूयमानं दृष्टं, न तु तेजसोऽन्येन। (१)येऽपि पिधायका प्रदीपस्य गृहघटादयो न ते स्वभासा प्रदीपं भासयितुमीशते। श्रूयते च 'तस्य भासा सर्वमिदं विभाती'ति। सर्वशब्दः प्रकृतसूर्याद्यपेक्षः। (२)न चातुल्यरूपेऽनुभानमित्यनुकारः सम्भवति। नहि गावो वराहमनुधावन्तीति कृष्णविहङ्गानुधावनमुपपद्यते गवाम्, अपि तु तादृशसूकरानुधावनम्। तस्माद्यद्यपि 'यस्मिन्द्यौः पृथिवी चान्तरिक्षमोत'मिति ब्रह्म प्रकृतं, तथाप्यभिभवानुकारसामर्थ्यलक्षणेन लिङ्गेन प्रकरणबाधया तेजो धातुरवगम्यते, न तु ब्रह्म लिङ्गानुपपत्तेः। (३)तत्र तं तस्येति च सर्वनामपदानि प्रदर्शनीयमेवावभ्रक्ष्यन्ति। न च तच्छब्दः पूर्वोक्तपरामर्शीति नियमः समस्ति। नहि 'तेन रक्तं रागात्' 'तस्यापत्यम्' इत्यादौ पूर्वोक्तं किंचिदस्ति। तस्मात्प्रमाणान्तराप्रतीतमपि तेजोन्तरमलौकिकं शब्दादुपास्यत्वेन गम्यत इति प्राप्ते,

उच्यते—

(४)ब्रह्मण्येव हि तल्लिङ्गं न तु तेजस्यलौकिके।
तस्मान्न तदुपास्यत्वं ब्रह्म ज्ञेयं तु गम्यते ॥

'तमेव भान्तमि'त्यत्र किमलौकिकं तेजः कल्पयित्वा सूर्यादीनामनुभानमुपपाद्यताम्, किं वा 'भारूपः सत्यसङ्कल्प' इति श्रुत्यन्तरप्रसिद्धेन ब्रह्मणो भानेन सूर्यादीनां भानमुपपाद्यतामिति विशये, न श्रुतसम्भवेऽश्रुतस्य कल्पना युज्यत इत्यप्रसिद्धं नालौकिकमुपास्यं तेजो युज्यते, अपि तु श्रुतिप्रसिद्धं ब्रह्मैव ज्ञेयमिति, तदेतदाह–"प्राज्ञ एवात्मा भवितुमर्हति"। (पृ० ३४१पं ४) विरोध(५)माह–"समत्वाच्चे"ति। ननु स्वप्रतिभाने सूर्यादयश्चाक्षुषं तेजोऽपेक्षन्ते, नह्यन्धेनैते दृश्यन्ते। तथा तदेव चाक्षुषं तेजो बाह्यसौर्यादितेजआप्यायितं रूपादि प्रकाशयति नाप्यायितम्, अन्धकारेऽपि रूपदर्शनप्रसङ्गादित्यत आह—"यं भान्तमभायु"रिति। (६)नहि तेजोन्तरस्य तेजोन्तरापेक्षां व्यासेधामः, किन्तु तद्भानमनुभानम्। न

कृत्वातिमतमीमांसाय पूर्वपक्षसंग्रहश्लोकमाह भानमिति। यस्मात्सूर्यादितेजोन्तरे वर्तमाने चन्द्रतारकादितेजोऽभिभवेनाभानं दृष्टम् तस्मात्तेजःप्रत्यभिभावकत्वलिङ्गादनुभानलक्षणानुकाराच्च तत्र शब्देन तेजोधातुरूपं पदार्थान्तरं गम्यत इति श्लोकार्थः। तत्र प्रथमार्धं व्याचष्ट बलीयसेति। अत्र विमतं तेजः तदभिभावकत्वात् सूर्यवदित्यनुमानं पूर्वपक्षिमते द्रष्टव्यम्।

(१) उक्तानुमानेनैकान्तिकत्वमाशंक्याह येऽपीति। भासकत्वे सतीति हेतौ विशेषणान्न व्यभिचार इत्यर्थः। (२) अनुकाराच्चेति द्वितीयार्धांशं व्याचष्टे नचेति।

(३) ननु मन्त्रस्थतच्छब्दैः प्रकृतं ब्रह्म परामृश्यतेऽत आह तत्रेति। प्रदर्शनीयवक्ष्यमाणमलौकिकं तेजोन्तरं ग्रहीष्यन्तीत्यर्थः।

(४) सिद्धान्तसंग्रहश्लोकमाह ब्रह्मण्येवेति। तत्र–उक्तमन्त्रनिष्ठमनुभानं ब्रह्मण्येव लिङ्गं 'तस्य भा'रूप' इत्यादिश्रुतौ चैतन्यप्रकाशत्वलिङ्गैस्तदध्यस्तसूर्यादेस्तदनुभानसम्भवात्, न तेजस्यलौकिकत्वोद्देशनाश्रितत्वाच्च। तस्मादिति। तेजःपक्षे उपास्तिकल्पनाददृष्टार्थकं वाक्यं स्याद्ब्रह्मपक्षे तु प्रस्तुतस्य तेजसः समर्पणाद्दृष्टार्थकत्वमित्येतेऽपि ब्रह्मपक्ष एव युक्त इत्यभिप्रायः।

(५) अनपेक्षाद्वारकं भास्यभासकत्वविरोधमित्यर्थः।

(६) किं भानेऽनपेक्षा तेजस उत भासकत्वे इति विकल्प्य क्रमेण दूषयित्वा समाधत्ते नेत्यादिना। भासमानतेजसा न तेजो भातीति नियमाद्विरोध इत्यर्थः।

च लोचनभानमनुभान्ति सूर्यादयः, तदिदमुक्तम्—"न हि प्रदीप" इति । पूर्वपक्षमनुभाष्य व्यभिचारमाह—"यद्प्युक्तमि"ति । एतदुक्तं भवति—यदि स्वरूपसाम्याभावमभिप्रेत्यानुकारो निराक्रियते, तदा व्यभिचारः(१) । अथ क्रियासाम्याभावं, सोऽसिद्धः । अस्ति हि वायुरजसोः स्वरूपविसदृशयोरपि नियतदिग्देशवहनक्रियासाम्यम् । वह्नयःपिण्डयोस्तु यद्यपि दहनक्रिया न भिद्यते तथापि द्रव्यभेदेन क्रियाभेदं कल्पयित्वा क्रियासादृश्यं व्याख्येयम् । तदेवमनुकृतेरिति विभज्य तस्य चेति सूत्रावयवं विभजते—"तस्य चे"ति । "चतुर्थमि"ति । "(२)ज्योतिषाम् सूर्यादीनाम्, ब्रह्मज्योतिः" प्रकाशकमित्यर्थः । तेजोन्तरेणानिन्द्रियभावमापन्नेन(३) सूर्यादितेजो विभातीत्यप्रसिद्धम् । (४)सर्वशब्दस्य हि स्वरसतो निःशेषाभिधानं वृत्तिः । सा तेजोधातावलौकिके रूपमात्रप्रकाशके सङ्कुचेत्, ब्रह्मणि तु निःशेषजगदवभासके न सर्वशब्दस्य वृत्तिः सङ्कुचतीति । "तत्र शब्दमाहरान्न"ति (पृ० ३४३ पं० ७) । सर्वत्र खल्वयं तत्रशब्दः पूर्वोक्तपरामर्शी । '(५)तेन रक्तं रागा'दित्यादावपि प्रकृतेः परस्मिन्प्रत्ययेऽर्थभेदेऽन्वाख्यायमाने प्रातिपदिकप्रकृत्यर्थस्य पूर्ववृत्तत्वमस्तीति, तेनेति तत्परामर्शान्न व्यभिचारः । तथा च सर्वनामश्रुतिरेव ब्रह्मोपस्थापयति । तेन भवतु नाम प्रकरणाल्लिङ्गं बलीयः, श्रुतिस्तु लिङ्गाद्बलीयसीति श्रौतमिह ब्रह्मैव गम्यत इति । अपि चापेक्षितानपेक्षिताभिधानं युक्तं, दृष्टार्थत्वादित्याह—"अनन्तरं च हिरण्मये परे कोश" इति । अस्मिन्वाक्ये ज्योतिषां ज्योति'रित्युक्तं, तत्र कथं तज्ज्योतिषां ज्योतिरित्यपेक्षायामिदमुपतिष्ठते—"न तत्र सूर्य" इति। स्वातन्त्र्येण तूच्यमानेऽनपेक्षितं स्याद'दृष्टार्थमि'ति । "ब्रह्मण्यपि चैषां भानप्रतिषेधोऽवकल्पत" इति । अयमभिप्रायः—'न तत्र सूर्यो भाती'ति नेयं सतिसप्तमी, यतः सूर्यादीनां तस्मिन्सत्यभिभवः प्रतीयेत, अपि तु विषयसप्तमी(६), तेन न तत्र ब्रह्मणि प्रकाशयितव्ये सूर्यादयः प्रकाशकतया भान्ति, किन्तु ब्रह्मैव सूर्यादिषु प्रकाशयितव्येषु प्रकाशकत्वेन भाति, तच्च स्वयं प्रकाशम्—"अगृह्यो नहि गृह्यते इत्यादिश्रुतिभ्य" इति ॥ २२ ॥

(सू०) अपि च स्मर्यते ॥ २३ ॥

"न तद्भासयत" इति ब्रह्मणोऽप्राह्यत्वमुक्तं, "यदादित्यगतमि"त्यनेन तस्यैव प्राहकत्वमुक्तमिति ॥ २३ ॥

(सू०) शब्दादेव प्रमितः ॥ २४ ॥

---

(१) व्यभिचारः—धूलिपवनयोरियोदहनयोर्भिन्नस्वभावयोरपि अनुकृतिदर्शनाद्व्यभिचारः ।

(२) ज्योतिषां ज्योतिरिति भाष्योदाहृतश्रुतिं व्याचष्टे ज्योतिषामिति ।

(३) इन्द्रियेण सूर्यादिभानादिन्द्रियत्वमनापन्नेनेति तेजोन्तरस्य विशेषणं देयमित्यर्थः ।

(४) अथवा न सूर्यादीनामिति भाष्यं व्याचष्टे सर्वेति ।

(५) तेन रक्तमिति । उक्तसूत्रेऽपि प्रकृतेः परो यः प्रत्ययस्तस्मिन्योऽर्थविशेषस्तस्मिन्नन्वाख्यायमाने प्रत्ययाधस्तनप्रकृत्यर्थस्यास्ति प्रस्तुतत्वमित्यर्थः ।

(६) विषयसप्तमीति । सतिसप्तमीपक्षे न भातीति श्रुतं वर्तमानत्वं त्यक्त्वा तस्मिन्सति न भास्यन्तीत्यश्रुतभविष्यत्वं कल्प्यं प्रत्यक्षविरोधनिरासाय, विषयसप्तमीपक्षे तु न भासयतीत्यश्रुतणिजध्याहारमात्रं कल्प्यम् न श्रुतत्याग इति लाघवमतो ब्रह्मणि विषये भूर्यादेर्भासकत्वनिषेधेन ब्रह्मभास्यत्वमुच्यत इत्यर्थः ।

(१) नाञ्जसा मानभेदोऽस्ति परस्मिन्मानवर्जिते ।
भूतभव्येशिता जीवे नाञ्जसी तेन संशयः ।

किमङ्गुष्ठमात्रश्रुत्यनुग्रहाय जीवोपासनापरमेतद्वाक्यमस्तु, तदनुरोधेन चेशान्श्रुतिः कथंचिद्व्याख्यायताम्, आहोस्विदीशानश्रुत्यनुग्रहाय ब्रह्मपरमेतदस्तु, तदनुरोधेनाङ्गुष्ठमात्रश्रुतिः कथंचिन्नीयताम् । (२) तत्रान्यतरस्यान्यतरानुरोधविषये प्रथमानुरोधो न्याय्य इत्यङ्गुष्ठश्रुत्यनुरोधेनेशानश्रुतिर्नेतव्या । (३)अपि च युक्तं हृत्पुण्डरीकदहरस्थानत्वं परमात्मनः, स्थानभेदनिर्देशात् । तद्धि तस्योपलब्धिस्थानं शालग्राम इव कमलनाभस्य भगवतः । न च तथेहाङ्गुष्ठमात्रश्रुत्या स्थानभेदो निर्दिष्टः, परिमाणमात्रनिर्देशात् । न च 'मध्य आत्मनी'त्यत्र स्थानभेदोऽवगम्यते । आत्मशब्दो ह्ययं स्वभाववचनो वा ब्रह्मवचनो वा स्यात् । तत्र स्वभावचस्य स्वभावित्रधीननिरूपणतया स्वस्य च भवितुरनिर्देशान्न ज्ञायते कस्य मध्य इति । न च जीवपरयोरस्ति मध्यमञ्जसेति नैष स्थाननिर्देशो विस्पष्टः, स्पष्टस्तु परिमाणनिर्देशः । परिमाणभेदश्च परस्मिन्न संभवतीति जीवात्मैवाङ्गुष्ठमात्रः, स खल्वन्तःकरणाद्युपाधिकल्पितो भागः परमात्मनः, अन्तःकरण च प्रायेण हृत्कमलकोशस्थानं, हृत्कमलकोशश्च मनुष्याणामङ्गुष्ठमात्र इति तदवच्छिन्नो जीवात्माऽप्यङ्गुष्ठमात्रो नभ इव वशपर्वावच्छिन्नमरालिऽमात्रम्(४) । अपि च जीवात्मनः स्पष्टमङ्गुष्ठमात्रत्वं स्मर्यते—

अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् । इति ।

नहि सर्वेशस्य ब्रह्मणो यमेन बलान्निष्कर्षः कल्पते । यमो हि जगौ—

हरिगुरुवशगोऽस्मि न स्वतन्त्रः
प्रभवति संयमने ममापि विष्णुः । इति ।

तेनाङ्गुष्ठमात्रत्वस्य जीवे निश्चयाद् आपेक्षिकं किंचिद्भूतभव्यं प्रति जीवस्येशानत्वं व्याख्येयम् । 'एतद्वै तदि'ति च प्रत्यक्षजीवरूपं परामृशतीति । तस्माज्जीवात्मैवात्रोपास्य इति, प्राप्तेऽभिधीयते—

(५)प्रश्नोत्तरत्वादीशानश्रवणस्याविशेषतः ।
जीवस्य ब्रह्मरूपत्वप्रत्यायनपरं वचः ॥

(६)इह हि भूतभव्यमात्रं प्रति निरङ्कुशमीशानत्वं प्रतीयते । प्राक् पृष्टं चात्र ब्रह्म

---

(१) जीवपरयोः समानधर्मादर्शनेपि भुत्योर्विप्रतिपत्तिः संशयबीजमित्याह नाञ्जसेति । परिमाणरहिते परमात्मनि मुख्याङ्गुष्ठमात्ररूपः परिमाणविशेषो नास्ति, एवं जीवे भूतभव्येशितृत्वं मुख्यं न सम्भवतीत्येकत्र गौणता वाच्या सा च ज्ञेयज्ञानात्संशय इत्यर्थः ।

(२) पूर्वपक्षमाह तत्रेति । विशये—संशये । नेतव्येति । लक्षणेति शेषः ।

(३) दहरविच्छेरेणास्य न पुनरुक्तिरित्याहापि चेति । शङ्कानिरासः समुच्चयार्थः । परमात्मोपलब्ध्यर्थं स्थानविशेषानिर्देशाच्च हृदयकमलदहरस्थानत्वमौपाधिकं तत्रोपदर्शितं नैवमत्रेत्यर्थः ।

(४) समुष्टिः सकनिष्ठिकः करोऽरत्निः ।

(५) सिद्धान्तसङ्कटश्लोकमाह प्रश्नेति । अंगुष्ठवाक्यस्य 'अन्यत्र धर्मात्' इति प्रस्तुतपरमात्मप्रश्नोत्तरत्वादीशानश्रवणस्य परमात्मनि अविशेषात् उपाहितपरिमितजीवानुवादेन विरुद्धांशं त्यक्त्वा जीवस्येशत्वैक्यबोधकमुक्तवाक्यमिति श्लोकार्थः । (६) सङ्कटश्लोकार्थमेवाहेहेति ।

'अन्यत्र धर्मादन्यत्राधर्मादि'त्यादिना । तदनन्तरस्य सन्दर्भस्य तत्प्रतिवचनतोचितेति 'एतद्वै तदि'ति ब्रह्माभिधानं युक्तम् । तथा चाङ्गुष्ठमात्रतया यद्यपि जीवोऽवगम्यते तथापि न तत्परमेतद्वाक्यं, किन्त्वङ्गुष्ठमात्रस्य जीवस्य ब्रह्मरूपताप्रतिपादनपरम् । एवं निरङ्कुशमीशानत्वं न संकोचयितव्यम् । न च ब्रह्मप्रश्नोत्तरता हातव्या, तेन यथा 'तत्त्वमसी'ति विज्ञानात्मनस्त्वंपदार्थस्य तदिति परमात्मनैक्यं प्रतिपाद्यते, तथेहाप्यङ्गुष्ठपरिमितस्य विज्ञानात्मन ईशानस्तुत्या ब्रह्मभावः प्रतिपाद्यत इति युक्तम् ॥ २४ ॥

(सू०) हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ २५ ॥

"सर्वगतस्यापि परब्रह्मणो हृदयेऽवस्थानमपेक्ष्ये"ति (पृ० ३४५ पं० १)(२)जीवाभिप्रायम् । न चान्यः परमात्मन इह ग्रहणमर्हतीति (१)न जीवपरमेतद्वाक्यमित्यर्थः । "मनुष्यानेवे"ति । त्रैवर्णिकानेवेति(३) । "अर्थित्वा"दिति अन्तःसंज्ञानां(४) मोक्षमाणानां च काम्येषु कर्मस्वधिकारं निषेधति । "शक्तत्वादि"ति तिर्यग्देवर्षीणामशक्तानां(५)मधिकारं निवर्तयति । "उपनयनादिशास्त्राच्चे"ति(६) शूद्राणामनधिकारितां दर्शयति । "यदप्युक्तं परिमाणोपदेशात्स्मृतेश्चे"ति । यद्येतत्परमात्मपरं, किमिति तर्हि जीव इहोच्यते । ननु परमात्मैवोच्यताम्, उच्यते च जीवः, तस्माज्जीवपरमेवेति भावः । परिहरति-"तत्प्रत्युच्यत" इति । जीवस्य हि तत्त्वं परमात्मभावः, तदुक्तव्यम्, न च तज्जीवमनभिधाय शक्यं वक्तुमिति जीव उच्यत इत्यर्थः ॥२५॥

(सू०) तदुपर्यपि बादरायणः संभवात् ॥ २६ ॥

देवर्षीणां ब्रह्मविज्ञानाधिकारचिन्ता समन्वयलक्षणेऽसंगतेत्यस्याः प्रासङ्गिकीं सङ्गतिं दर्शयितुं प्रसङ्ग(७)माह—"अङ्गुष्ठमात्रश्रुतिरि"ति (पृ० ३४६ पं० १२) । स्यादेतत्, देवादीनां विविधविचित्रानन्दभोगभागिनां वैराग्याभावान्नार्थित्वं ब्रह्मविद्यायामित्यत आह-"तत्रार्थित्वं तावन्मोक्षविषयमि"ति (पृ० ३४७ पं० १) । क्षयातिशययोगस्य स्वर्गादुपभोगेऽपि भावादस्ति वैराग्यमित्यर्थः । ननु देवादीनां विग्रहाद्यभावेनेन्द्रियार्थसंनिकर्षजायाः(८) प्रमाणादेवृत्तेरनुपपत्तेरविद्वत्तया सामर्थ्याभावेन नाधिकार इत्यत आह—"तथा

---

(१) ननूक्तवाक्यस्योपोद्घातपीठीभूतजीवे ब्रह्मत्वबोधकत्वाद्ब्रह्मणः परिमाणकथनमफलमत आह जीवेति । जीवभावापन्नब्रह्माभिप्रायमित्यर्थः ।

(२) न जीवपरमिति जीवनिर्देशवारणायेह न क्रियते तथासत्यनुवादाभावप्रसङ्गादित्यर्थः ।

(३) मनुष्यग्रहणं शूद्रादावधिकारिण्यतिप्रसंजकामिति सङ्कोचयति त्रैवर्णिकानेवेति ।

(४) स्थावराणाम् । चित्तशुद्ध्यर्थं नित्येषु मुमुक्षूणामधिकार इति सूचयितुं काम्येष्विति ।

(५) अत्र तिरश्चां वेदार्थज्ञानादिसामग्र्यभावादेवानां स्वदेवत्ये कर्मणि स्वोद्देशेन हव्यत्यागायोगादृषीणामार्षेयवरणे ऋत्व्यन्तराभावाच्चेत्यशङ्कौ हेतवो बोध्याः ।

(६) 'शूद्रो यज्ञेऽनवक्लृप्तः' इति पर्युदासात् 'उपनयीत, तमध्यापयी'त इति शास्त्राच्च शूद्रस्य वैदिके कर्मण्यनधिकार इत्यर्थः ।

(७) प्रसङ्गमिति । यद्यपीयमधिकारिचिन्ता न देवादिप्रवृत्त्यर्था तथापि क्रममुक्तिफलोपास्तिषु भोगद्वारा मुक्तिकाममनुष्यप्रवृत्त्यर्थेति प्रसङ्गसङ्गतिमित्यर्थः ।

(८) अनेन कामादीनामुपलक्षणं बोध्यम् ।

सामर्थ्यमपि तेषामि"ति। यथा च मन्त्रादिभ्यस्तदवगमस्तथोपरिष्टादुपपादयिष्यते। ननु शूद्रवदुपनयनासंभवेनाध्ययनाभावात्तेषामनधिकार इत्यत आह-"न चोपनयनशास्त्रेणे"ति। न(१) खलु विधिवद्गुरुमुखाद्गृह्यमाणो वेदः फलवत्कर्मब्रह्मबोधहेतुरपि त्वध्ययनोत्तरकालं निगमनिरुक्तव्याकरणादिविदितपदतदर्थसंगतेरधिगतशाब्दन्यायतत्त्वस्य पुंसः स्मर्यमाणः(२), स च मनुष्याणामिह जन्मनीव देवादीनां प्राचि भवे विधिवदधीत आम्नाय इह जन्मनि स्मर्यमाणोऽत एव स्वयं प्रतिभातो वेदः संभवतीत्यर्थः। न च कर्मानधिकारे ब्रह्मविद्यानधिकारो भवतीत्याह--"यदपि कर्मस्वनधिकारकारणमुक्तमि"ति। वस्वादीनां हि न वस्वाद्यन्तरमस्ति, नापि मृग्वादीनां मृग्वाद्यन्तरमस्ति। प्राचां वसुमृगुप्रभृतीनां क्षीणाधिकारत्वेनेदानीं देवर्षित्वाभावादित्यर्थः ॥ २६ ॥

(सू०) विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ २७ ॥

मन्त्रादिपदसमन्वयात्प्रतीयमानोऽर्थः प्रमाणान्तराविरोधे सत्युपेयो, न तु विरोधे। प्रमाणान्तरविरुद्धं चेदं विग्रहवत्त्वादि देवतायास्तस्मा'द्यजमानः प्रस्तर' इत्यादिवदुपचरितार्थो मन्त्रादिर्व्याख्येयः। तथा च विग्रहाद्यभावाच्छन्दोपाहितार्थोऽर्थोपहितो वा शब्दो देवतेत्यचेतनत्वान्नैवास्याः क्वचिदप्यधिकार इति शङ्कार्थः(३)। निराकरोति-"न" (पृ० १४८ पं० ९)। "कस्मादनेकरूपप्रतिपत्तेः"। सैव कुत इत्यत आह-"दर्शनात्" श्रुतिषु स्मृतिषु च। तथा ह्येकस्यानेककायनिर्माणमदर्शनाद्वा न युज्यते, बाधदर्शनाद्वा? तत्रादर्शनमसिद्धं, श्रुतिस्मृतिभ्यां दर्शनात्। नहि लौकिकेन प्रमाणेनादृष्टत्वादागमेन दृष्टमदृष्टं भवति। मा भूद्यागादीनामपि स्वर्गादिसाधनत्वमदृष्टमिति। (४)मनुष्यशरीरस्य मातापितृसंयोगजत्वनियमादसति पित्रोः संयोगे कुतः संभवः? संभवे वाऽनग्नितोपि धूमः स्यादिति बाधदर्शनमिति चेत्। (५)हन्त किं शरीरत्वेन हेतुना देवादिशरीरमपि मातापितृसंयोगजं सिषाधयिषसि? तथा चानेकान्तो हेत्वाभासः। स्वेदजोद्भिज्जानां शरीराणामतद्धेतुत्वात्। इच्छामात्रनिर्माणत्वं देहादीनामदृष्टचरमिति चेत्, न। भूतोपादानत्वेनेच्छामात्रनिर्माणत्वासिद्धेः। (६)भूतवशिनां हि देवादीनां नानाकायचिकीर्षावशाद्भूतक्रियोत्पत्तौ भूतानां परस्परसंयोगेन नानाकायसमुत्पादात्। दृष्टा च वशिन इच्छावशाद्भूतेषु क्रिया, यथा विषविद्याविद इच्छामात्रेण विषशकलप्रेरणम्। न च विषविद्याविदो दर्शनेनाधिष्ठानद-

---

(१) ननु देवादीनां वेदार्थस्य स्वयं प्रतिभानेऽपि गुरुमुखात्तद्ग्रहणस्याभावेनापुरुषार्थत्वं ज्ञानस्य स्यादत आह न खल्विति।

(२) अस्य फलवद्ब्रह्मावबोधहेतुरित्यनेनान्वयः।

(३) मीमांसकमते विग्रहवत्यश्चतनाया देवताया अस्वीकारात् 'अग्नये स्वाहा' इत्यादौ चतुर्थ्यन्तशब्दप्रतीतिमात्रं शब्दोदितं तादर्थ्यनियामितः शब्दो वा देवतेति विग्रहाद्यभावात्कथं देवतानां कर्मण्यधिकार इति शङ्काभिप्रायो मीमांसकानां बोध्यः।

(४) अदर्शनपक्षं निरस्य बाधपक्षेणाशङ्कते मनुष्येति। अनेन देवादयो न शरीरिणः मातापितूरहितत्वादृष्टवदित्यनुमानं देवताशरीरस्वीकारे बाधकमिति सूचितम्। विपक्षे बाधकमाह सम्भवे इति।

(५) उक्तमीमांसकानुमानं यूकादावनैकान्तिकमित्याह हन्तेति।

(६) भूतवशिनामिति। अनेन भूतानामधिष्ठात्रभावादनारम्भकत्वमित्याशङ्का परास्ता।

र्शनाव्यवहितविप्रकृष्टभूतादर्शनाद्देवादीनां कथमधिष्ठानामिति वाच्यम्। काचाभ्रपटलपिहितस्य विप्रकृष्टस्य भौमशनैश्चरादेर्दर्शनेन व्यभिचारात्। (१)असक्ताश्च दृष्टयो देवादीनां काचाभ्रपटलादिवन्महीमहीधरादीभिर्न व्यवधीयन्ते। न चास्मदादिवत्तेषां शरीरित्वेन व्यवहितविप्रकृष्टादिदर्शनासंभवोऽनुमीयत इति वाच्यम्। आगमविरोधिनोऽनुमानस्योत्पादायोगात्। अन्तर्धानं चाञ्जनादिना मनुजादीनामिव तेषां प्रभवतामुपपद्यत, तेन संनिहितानामपि न क्वचिद्देशे दर्शनं भविष्यति। तस्मात्सूक्त'मनेकप्रतिपत्तरि'ति। "तथाहि कति देवा इत्युपक्रम्ये"ति। वैश्वदेवशस्त्रस्य(२) हि निविदं 'कति देवा' इत्युपक्रम्य निविदैवान्तरं दत्तं शाकल्याय याज्ञवल्क्येन "त्रयश्च त्री च शता त्रयश्च त्री च सहस्रे"ति। निविन्नाम शस्यमानदेवतासंख्यावाचकानि मन्त्रपदानि। एतदुक्तं भवति—वैश्वदेवस्य निविदि कति देवाः शस्यमानाः प्रसंख्याता इति शाकल्येन पृष्टे याज्ञवल्क्यस्योत्तरं—'त्रयश्च त्री च शते'त्यादि। यावत्संख्याका वैश्वदेवनिविदि संख्याता देवास्त एतावन्त(३) इति। पुनश्च शाकल्येन 'कतमे त' इति संख्येयेषु पृष्टेषु याज्ञवल्क्यस्योत्तरं-'महिमान(४) एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति'। 'अष्टौ वसव एकादश रुद्रा द्वादशादित्या इन्द्रश्च प्रजापतिश्चे'ति त्रयस्त्रिंशद्देवाः। तत्राग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चेति वसवः। एते हि प्राणिनां कर्मफलाश्रयेण कार्यकारणसंघातरूपेण परिणमन्तो जगदिदं सर्वं वासयन्ति, तस्माद्वसवः। कतमे रुद्रा इति दशेमे पुरुषे प्राणाः। बुद्धिकर्मेन्द्रियाणि दश। एकादशं च मन इति। तदेतानि प्राणाः, (५)तद्वृत्तित्वात्। ते हि प्रायणकाले उत्क्रामन्तः पुरुषं रोदयन्तीति रुद्राः। कतम आदित्या इति द्वादशमासाः संवत्सरस्यावयवाः पुनःपुनः परिवर्तमानाः प्राणभृतामायूंषि च कर्मफलोपभोगं चादापयन्तीत्यादित्याः। (६)अशनिरिन्द्रः सा हि बलं सा इन्द्रियस्य परमा ईशता तया हि सर्वान् प्राणिनः प्रमापयति तेन स्तनयित्नुरशनिरिन्द्रः। यज्ञः प्रजापतिरिति, यज्ञसाधनं च यज्ञरूपं च पशवः प्रजापतिः। (७)एत एव त्रयस्त्रिंशद्देवाः षण्णामग्निपृथिवीवायवन्तरिक्षादित्यदिवां महिमानो न ततो भिद्यन्ते। षडेव तु देवाः। ते तु षडग्निं पृथिवीं चैकीकृत्यान्तरिक्षं वायुं चैकीकृत्य दिवं चादित्यं चैकीकृत्य त्रयो लोकास्त्रय एव देवा भवन्ति। त्रय एव च त्रयोऽग्नप्राणयोरन्तर्भवन्तोऽग्नप्राणौ द्वौ देवौ भवतः। तावप्यध्यर्द्धौ देव एकः। कतमोऽध्यर्द्धः? योऽयं वायुः पवते(८)। कथमय-

---

(१) ननु काचादीनां स्वच्छत्वादस्मदादिदृगव्यवधायकत्वं युक्तं शैलभूम्यादयस्तु देवादिदृष्टीनां व्यवधायका भविष्यन्ति इत्याशङ्क्याहासक्ताश्चेति। असक्ताः-अप्रतिबद्धाः।

(२) श्रुतिगतवैश्वदेवपदस्य व्याख्या शस्त्रस्यति।

(३) एतावन्तः—अधिकत्रिंशतानि अधिकसहस्राणि चेति। (४) विस्तारः।

(५) इन्द्रियेषु प्राणशब्दस्य प्रवृत्तौ निमित्तमाह तद्वृत्तित्वादिति। तस्मात्प्राणाद्वृत्तिर्वर्तनं येषां तेषां भावस्तत्त्वादित्यर्थः।

(६) भुवौ त्रयस्त्रिंशतां पूरणाविन्द्रप्रजापती उक्तौ तौ च स्तनयित्नुयज्ञत्वेन व्याख्यातौ, पुनः कतमः स्तनयित्नुः कतमो यज्ञ इति पृष्ट्वा यथाक्रममशनिरिति पशव इति च प्रयुक्तं तदुपपादयति अशनिरिन्द्र इत्यादिना। परमा ईशता परमैश्वर्यम्। रूपं यज्ञं द्रव्यतया रूपयन्तो यज्ञस्य रूपं पशवस्ते प्रजापतिः।

(७) षडायन्तर्भावेणेति भाष्यं व्याचष्टे एत एवेति। (८) जगत् पुनाति।

मेक एवाध्यर्द्धः? यदस्मिन्सति सर्वामदमध्यर्धाद्वृद्धिं प्राप्नोतीति, तेनाध्यर्द्ध इति । कतम एक इति ? (१)स एवाध्यर्द्धः प्राण एको ब्रह्म । सर्वदेवात्मत्वेन बृहत्त्वाद्ब्रह्म तदेव सदित्याचक्षते परोक्षाभिधायकेन शब्देन, तस्मादेकस्यैव देवस्य महिमवशाद्युगपदनेकदेवरूपतामाह श्रुतिः । स्मृतिश्च निगदव्याख्याता । अपि च पृथग्जनानामप्युपायानुष्ठानवशात्प्राप्तानिमाद्यैश्वर्याणां युगपन्नानाकायनिर्माण श्रूयते, तत्र कैव कथा देवानां स्वभावसिद्धानामित्याह–"**प्राप्तानि माद्यैश्वर्याणां योगिना**"मिति (पृ० ३४९ पं० ८) 'आणमा लाघमा महिमा (२)प्राप्तिः प्राकाम्यमीशित्वं वाशित्वं यत्रकामावसायिते'त्यैश्वर्याणि ।

"**अपरा व्याख्ये**"ति । अनेकत्र कर्मणि युगपदङ्गभावप्रतिपत्तिरङ्गभावगमनं, तस्य दर्शनात् । तदेव परिस्फुटं दर्शयितु व्यतिरेकं तावदाह—"**क्वचिदेक**" इति । न खलु बहुषु श्राद्धेष्वेको ब्राह्मणो युगपदङ्गभावं गन्तुमर्हति । एकस्यानेकत्र युगपदङ्गभावमाह–"**क्वचिदेक**" इति । (पृ० ३५० पं० १) यथैकं ब्राह्मणमुद्दिश्य युगपन्नमस्कारः क्रियते बहुभिस्तथा स्वस्थानास्थतामेकां देवतामुद्दिश्य बहुभिर्यजमानैर्नानादेशावास्थतैर्युगपद्धविस्त्यज्यते, तस्याश्च तत्रासन्निहिताया अप्यङ्गभावो भवति । अस्ति हि तस्या युगपद्विप्रकृष्टानेकार्थोपलम्भसामर्थ्यमित्युपपादितम् ॥ २७ ॥

शब्द इति चेत्, नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॥२८॥

(३)गोत्वादिवत्पूर्वावमर्शाभावादुपाधेरप्येकस्याप्रतीतेः पाचकादिवद् आकाशादिशब्दवद् व्यक्तिवचना एव वस्वादिशब्दाः तस्याश्च नित्यत्वात्तया सह सम्बन्धो नित्यो भवेत् । विग्रहादियोगे तु सावयवत्वेन वस्वादीनामनित्यत्वात्ततः पूर्वं वस्वादिशब्दो न स्वार्थेन सम्बद्ध आसीत्स्वार्थस्यैवाभावात् । ततश्चोत्पन्ने वस्वादौ वस्वादिशब्दसम्बन्धः प्रादुर्भवन् देवदत्तादिशब्दसम्बन्धवत्पुरुषबुद्धिप्रभव इति तत्पूर्वको वाक्यार्थप्रत्ययोऽपि पुरुषबुद्ध्यधीनः स्यात् । पुरुषबुद्धिश्च मानान्तराधीनजन्मेति मानान्तरापेक्षया प्रामाण्यं वेदस्य व्याहन्येतेति शङ्कार्थः ।

उत्तरम्(४)। "**न**" "**अतः प्रभवाद्**" वसुत्वादिजातिवाचकाच्छब्दात्तज्जातीयां व्यक्तिं चिकीर्षितां बुद्धावालिख्य तस्याः प्रभवनम् । तदिदं तत्प्रभवत्वम् । एतदुक्तं भवति । यद्यपि न शब्द उपादानकारणं वस्वादीनां ब्रह्मोपादानत्वात्, तथापि निमित्तकारणमुक्तेन क्रमेण । न चैतावता शब्दार्थसम्बन्धस्यानित्यत्वं, वसुत्वादिजातेर्वा तदुपाधेर्वा यया कयाचिदाकृत्याऽवच्छिन्नस्य नित्यत्वादिति । इममेवार्थमाक्षेपसमाधानाभ्यां विभजते—"**ननु जन्माद्यस्य यत**" इति । ते निगदव्याख्याते । तत् किमेदानीं स्वयम्भुवा वाङ् निर्मिता कालिदा-

---

(१) स ब्रह्म त्यद् इत्याचक्षते इति वाक्यं व्याचष्टे स एवेति ।

(२) प्राप्तिरगुल्यग्रेण चन्द्रस्पर्शः । प्राकाम्यमिच्छानभिघातः । ईशित्वं सृष्टिशक्तिः । वशित्वं नियमनशक्तिः । सङ्कल्पमात्रादिष्टलाभो यत्रकामावसायिता । अन्यत्सुगमम् ।

(३) गोत्वादिवदिति । अयं भावः । प्रत्यभिज्ञा खलु पूर्वावमर्शः, स चादृष्टे वस्वादौ न सम्भवति, अत एव चोपाध्यभावोऽपि, उपाधेरपि नरपतित्वादिवत् किञ्चिद्घटकपदार्थगतजात्यवच्छेदेनानुगतीकर्तव्यत्वाद्घटकपदार्थेष्वप्यलौकिकेषु प्रत्यभिज्ञाभावेनानुगतजात्यसिद्धिरित्यर्थः । अन्यच्च शङ्कार्थः सुगमः ।

(४) मन्त्रादिसिद्धे वस्वादौ असौ वसुरसावपि वसुरिति परामर्शस्य सम्भवः, त्रिदिवत्वादिजात्यवच्छिन्नैश्वर्येषु पाकत्वावच्छिन्नपाकयोगेष्विवोपाधिकत्वेऽपि शक्यः शब्दार्थसंगतिग्रह इत्युत्तरार्थः । अन्यत्सुगमम् ।

सादिभिरिव कुमारसम्भवादि, तथा च तदेव प्रमाणान्तरापेक्षवाक्यत्वादप्रामाण्यमापतितमित्यत आह—"उपसर्गोऽप्ययं वाचः सम्प्रदायप्रवर्तनात्मकः" इति । (पृ० ३५२ पं० १७) सम्प्रदायो गुरुशिष्यपरम्परयाऽध्ययनम् । एतदुक्तं भवति । स्वयम्भुवो वेदकर्तृत्वेऽपि न कालिदासादिवत् स्वतन्त्रत्वमपि तु पूर्वसृष्ट्यनुसारेण । एतच्चास्माभिरुपपादितम, उपपादयिष्यति चाग्रे भाष्यकारः । अपि चाद्यत्वेप्येतद् दृश्यते तद्दर्शनात् प्राचामपि कर्तृणां तथाभावोऽनुमीयत इत्याह—"अपि च चिकीर्षितमि"ति (पृ० ३५३ पं० ४) । आक्षिपति(१)-"किमात्मकं पुन"रिति । (२)अयमभिसन्धिः । वाचकशब्दप्रभवत्वं हि देवानामभ्युपेतव्यम् , अवाचकेन तेषां बुद्धावनालेखनात् । (३)तत्र न तावदुस्वादीनां वकारादयो वर्णा वाचकास्तेषां प्रत्युच्चारणमन्यत्वेनाशक्यसङ्गतिग्रहत्वात् , अगृहीतसङ्गतेश्च वाचकत्वेऽतिप्रसङ्गात् । अपि चैते प्रत्येकं वा स्वार्थमभिदधीरन् मिलित्वा वा ? न तावत् प्रत्येकम्, एकवर्णोच्चारणानन्तरमर्थप्रत्ययादर्शनात् , वर्णान्तरोच्चारणानर्थक्यप्रसङ्गाच्च । नापि मिलिताः, तेषामेकवक्तृप्रयुज्यमानानां रूपतो व्यक्तितो वा प्रतिक्षणमपवर्गवतां मिथः साहित्यसम्भवाभावात् । न च प्रत्येकसमुदायाभ्यामन्यः प्रकारः सम्भवति । (४)न च स्वरूपसाहित्याभावेऽपि वर्णानामाग्नेयादीनामिव संस्कारद्वारकमास्त साहित्यमिति साम्प्रतम् , विकल्पासहत्वात् । (५)को नु खल्वयं संस्कारोऽभिमतः किमपूर्वं नामाग्नेयादिजन्यमिव, किं वा भावनापरनामा स्मृतिप्रभवबीजम् । न तावत् प्रथमः कल्पः, नहि शब्दः स्वरूपतोऽज्ञातो वाऽविदितो(६)विदितसङ्गतिरर्थधीहेतुरिन्द्रियवत् । उच्चरितस्य बधिरेणागृहीतस्य गृहीतस्य वाऽगृहीतसङ्गतेरप्रत्यायकत्वात् । तस्माद्विदितो विदितसङ्गतिर्विदितसमस्तज्ञापनाङ्गश्च शब्दो धूमादिवत् प्रत्यायकोऽभ्युपेयः । तथाचापूर्वाभिधानोऽस्य संस्कारः प्रत्यायनाङ्गमित्यर्थप्रत्ययात्प्रागवगन्तव्यः, न च तदास्यावगमोपायोऽस्ति, अर्थप्रत्ययात्तु तदवगमं समर्थयमानो दुरुत्तरमितरेतराश्रयमाविशति—संस्कारावसायादर्थप्रत्ययस्ततश्च तदवसाय इति । (७)भावनाभिधानस्तु संस्कारः स्मृतिप्रसवसामर्थ्यमात्मनो, न च तदेवार्थप्रत्ययप्रसवसामर्थ्यमपि भवितु-

---

(१) वैयाकरणैस्तावत् स्फुट्यते वर्णैर्व्यज्यत इति व्युत्पत्त्या वर्णव्यङ्ग्योऽर्थस्य व्यञ्जको स्फोटो गवादिशब्दरूपो नित्योऽङ्गीक्रियते, नैयायिकैश्च पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहितान्त्यवर्णैरेवार्थोत्पत्तिरित्यभ्युपेयते तदुभयमते जगद्धेतुत्वं शब्दस्य न सम्भवतीत्यभिप्रायेणाक्षिपतीत्यर्थः ।

(२) नन्वनित्यत्वेपि वर्णानां महाभूतवद्देवादिहेतुतेत्याशङ्क्याह अयमिति ।

(३) नैयायिकपक्षं निरस्यन्नाह तत्रेति ।

(४) नैयायिकमतेनाशङ्कते नचेति । यथाग्नेयादीनां कलकरणत्वान्यथानुपपत्त्याऽपूर्वमवश्यमेवं वर्णानामर्थधीहेतुत्वान्यथानुपपत्त्या संस्कारः साहित्यमवश्यमित्याशङ्क्यार्थः ।

(५) विकल्पप्रदर्शनद्वारा क्रमेण दूषयति को नु खल्विति ।

(६) स्वरूपेणाविदितस्यार्थधीहेतुत्वनिषेधो दृष्टान्तार्थः । यथा स्वरूपेण विदितस्यार्थबुध्या हेतुत्वमेवमज्ञातोपीत्यर्थः । अविदितसङ्गतिरिति हेत्वर्थः । शब्दः सहाङ्गेन ज्ञातोऽर्थधीहेतुः सम्बन्धग्रहणमपेक्ष्य बोधकत्वाद्धूमवदित्यर्थः । इन्द्रियवदिति वैधर्म्यदृष्टान्तः ।

(७) भावनेति । भावनाख्यः संस्कार आत्मनो वर्णस्य स्वस्यैव विषयस्य स्मृतिप्रसवसामर्थ्यम् , तथा चास्माद्वर्णविषया स्मृतिस्ततोऽर्थधीः स्यादिति वक्तव्यम्, तत्र किमर्थप्रसवसामर्थ्यमेवार्थधीजननशक्तिरुत ततोऽर्थधीशक्तिरुदेतीति विकल्पद्वयमप्यसम्भवतीत्याह नचेति ।

महति । नापि तस्यैव सामर्थ्यस्य सामर्थ्यान्तरम् । (१)नहि यैव वह्नेर्दहनशक्तिः सैव तस्य प्रकाशनशक्तिः, नापि दहनशक्तेः प्रकाशनशक्तिः । अपि च व्युत्क्रमेणोच्चरितेभ्यो वर्णेभ्यः सैवास्ति स्मृतिर्बीजं वासनेत्यर्थप्रत्ययः प्रसज्येत, न चास्ति । (२)तस्मान्न कथंचिदपि वर्णा अर्थधीहेतवो, नापि तद्व्यतिरिक्तः स्फोटात्मा, तस्यानुभवानारोहात् । अर्थधियस्तु कार्यात्तदवगमे परस्पराश्रयप्रसङ्ग इत्युक्तप्रायम् । सत्तामात्रेण तु तस्य नित्यस्यार्थधीहेतुभावे सर्वदाऽर्थप्रत्ययोत्पादप्रसङ्गो निरपेक्षस्य हेतोः सदातनत्वात् । तस्माद्वाचकाच्छब्दाद्वाच्योत्पाद इत्यनुपपन्नमिति।

अत्राचार्यदेशीय (३)आह—"स्फोटमित्याहे"ति । मृष्यामहे न वर्णाः प्रत्यायका इति, न स्फोट इति तु न मृष्यामः, तदनुभवानन्तरं विदितसङ्गतेरर्थधीसमुत्पादात् । न च वर्णातिरिक्तस्य तस्यानुभवो नास्ति । गौरित्येकं पदं गामानय शुक्लामित्येकं वाक्यमिति (४)नानावर्णपदातिरिक्तैकपदवाक्यावगतेः सर्वजनीनत्वात् । न चायमसति बाधके एकपदवाक्यानुभवः शक्यो मिथ्येति वक्तुम् । नाप्यौपाधिकः । उपाधिः खल्वेकधीग्राह्यता वा स्यात्, एकार्थधीहेतुता वा । न तावदेकधीगोचराणां धवखदिरपलाशानामेकनिर्भासः प्रत्ययः समस्ति, तथा सति धवखदिरपलाशा इति न जातु स्यात् । नाप्येकार्थधीहेतुता, तद्धेतुत्वस्य वर्णेषु व्यासेधात् । तद्धेतुत्वेन तु (५)साहित्यकल्पनेऽन्योन्याश्रयप्रसङ्गः—साहित्यात्तद्धेतुत्वं तद्धेतुत्वाच्च साहित्यमिति । तस्मादयमबाधितोऽनुपाधिश्च पदवाक्यगोचर एकनिर्भासो वर्णातिरिक्तं वाचकमेकमवलम्बते स स्फोट इति । (६)तं च ध्वनयः प्रत्येकं व्यञ्जयन्तोऽपि न द्रागित्येव विशदयन्ति, येन द्रागर्थधीः स्यात्, अपि तु रत्नतत्त्वज्ञानवत् यथास्वं द्वित्रिचतुष्पञ्चषड्दर्शनजनितसंस्कारपरिपाकसचिवचेतोलब्धजन्मनि चरमे चेतसि चकास्ति विशदं पदवाक्यतत्त्वमिति प्रागनुत्पन्नायास्तदनन्तरमर्थधिय उदय इति नोत्तरेषामानर्थक्यं ध्वनीनाम् । नापि प्राचां, तदभावे तज्जनितसंस्कारतत्परिपाकाभावेनानुग्रहाभावात् । अन्त्यस्य चेतसः केवलस्याजनकत्वात् । (७)न च पदप्रत्ययवत् प्रत्येकमव्यक्तामर्थधियमाधास्यन्ति प्राच्यो वर्णाश्चरमस्तु तत्सचिवः स्फुटतरामिति युक्तम् । व्यक्ताव्यक्तावभासितायाः प्रत्यक्षज्ञाननियमात्, स्फोटज्ञानस्य च प्रत्यक्षत्वात् । अर्थधियस्त्वप्रत्यक्षाया मानान्तरजन्मनो व्यक्त

---

(१) उक्तविकल्पद्वयासम्भवे क्रमेण निदर्शनमाह नहीति।

(२) नैयायिकमतनिरासमुपसंहरन् वैयाकरणमतखण्डनमतिदिशति तस्मादित्यादिना । परस्परेति । स्फोटे ज्ञातेऽर्थधीस्ततश्च स्फोटधीरित्यन्योन्याश्रयप्रसङ्गो बोध्य इति भावः । सत्तायाः हेतुत्वान्नोक्तदोष इत्याशंक्याह सत्तेति ।

(३) वैयाकरणः, स्फोटवादमङ्गीकुर्याद्देत्यर्थः ।

(४) नानेति "नानावर्णातिरिक्तैकपदावगतेर्नानापदातिरिक्तैकवाक्यावगतेश्चेत्यर्थः ।

(५) साहित्यमेकत्वम् ।

(६) ननूक्तैः स्फोटः किमेकैकवर्णात्स्फुटति किंवा मिलितेभ्यः ? नाद्यः, एकवर्णादेव स्फोटव्यक्तौ ततएवार्थधीसिद्धेरितरवैयर्थ्यात्, नान्त्यः, वर्णसाहित्यस्य भवताऽनङ्गीकारादत आह तं चेति ।

(७) नन्वेवं स्फोटन्यायेनार्थोऽपि प्रत्येकं ध्वनिभिर्व्यज्यतां पूर्वार्थव्यक्तिसंस्कृतरसहितमन्त्यश्चेतोऽर्थस्य तत्त्वं व्यनक्तु इत्याशंक्य समाधत्ते न चेत्यादिना । व्यक्ताति । अभिहितश्चेदर्थो नाव्यक्तः सन्दिग्धस्तु नाभिहितः स्यात् . प्रत्यक्षे तु प्रतिसन्निकर्षं विशदाविशदनिश्चयसम्भव इत्यर्थः ।

एवोपजनो न वा स्यान्न पुनरस्फुट इति न समः समाधिः । तस्मान्नित्यः स्फोट एव वाचको न वर्णा इति ।

तदेतदाचार्यदेशीयमतं स्वमतमुपपादयन्नपाकरोति—"वर्णा एव तु न शब्द" इति । (१)एवं हि वर्णातिरिक्तः स्फोटोऽभ्युपेयेत, यदि वर्णानां वाचकत्वं न सम्भवेत्, स चानुभवपद्धतिमध्यासीत । (२)द्विधा चावाचकत्वं वर्णानां, क्षणिकत्वेनाशक्यसंगतिग्रहत्वाद्वा व्यस्तसमस्तप्रकारद्वयाभावाद्वा । न तावत्प्रथमः कल्पः, वर्णानां क्षणिकत्वे मानाभावात् । ननु वर्णानां प्रत्युच्चारणमन्यत्वं सर्वजनप्रसिद्धम् । न । प्रत्यभिज्ञानानुभवविरोधात् । न चासत्यप्येकत्वे ज्वालादिवत्सादृश्यनिबन्धनमेतत् प्रत्यभिज्ञानमिति साम्प्रतम् । सादृश्यनिबन्धनत्वमस्य बलवद्बाधकोपनिपाताद्वाऽऽस्थीयेत, क्वचिज्ज्वालादौ व्यभिचारदर्शनाद्वा । तत्र क्वचिद्व्यभिचारदर्शनेन तदुत्प्रेक्षायामुच्यते वृद्धैः स्वतःप्रामाण्यवादिभिः—

उत्प्रेक्षेत हि यो मोहादज्ञातमपि बोधनम् ।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत् ॥ इति ।

प्रपञ्चितं चैतदस्माभिर्न्यायकणिकायाम् । (३)न चेदं प्रत्यभिज्ञानं गत्वादिजातिविषयं, न गादिव्यक्तिविषयं, तासां प्रतिनरं भेदोपलम्भात् । अत एव शब्दभेदोपलम्भाद्भक्तृभेद उन्नीयते, सोमशर्माऽधीते न विष्णुशर्मेति युक्तम् । यतो बहुषु गकारमुच्चारयत्सु निपुणमनुभवः परीक्ष्यताम् । यथा कालाक्षीं च स्वस्तिमतीं चेक्षमाणस्य व्यक्तिभेदप्रथायां सत्यामेव तदनुगतमेकं सामान्यं प्रथते, तथा किं गकारादिषु भेदेन प्रथमानेष्वेव गत्वमेकं तदनुगतं चकास्ति, किं वा यथा गोत्वमाजानत एकं भिन्नदेशपरिमाणसंस्थानव्यक्त्युपधानभेदाद्भिन्नदेशमिवाल्पमिव महदिव दीर्घमिव वामनमिव, तथा गव्यक्तिराजानत एकाऽपि व्यञ्जकभेदात्तद्धर्मानुपातिनीव प्रथत इति भवन्त एव विदाङ्कुर्वन्तु । (४)तत्र गव्यक्तिभेदमङ्गीकृत्यापि यो गत्वस्यैकस्य परोपधानभेदकल्पनाप्रयासः स वरं गव्यक्तावेवास्तु किमन्तर्गडुना गत्वेनाभ्युपेतेन । यथाहुः—

(५)तेन यत्प्रार्थ्यते जातेस्तद्वर्णादेव लप्स्यते ।
व्यक्तिलभ्यं तु नादेभ्य इति गत्वादिधीर्वृथा ॥

(६)न च स्वस्तिमत्यादिवद् गव्यक्तिभेदप्रत्ययः स्फुटः प्रत्युच्चारणमस्ति, तथा सति

---

(१) स्फोटे प्रमाणसत्ता विकल्प्य तं खण्डयन्नाह एवं हीति ।

(२) वाचकत्वानुपपत्तावपि विकल्पद्वयमाह द्विधेति । व्यस्तानामेकैकवर्णानां समस्तानां वा वाचकत्वमिति प्रकारद्वयाभावाद्वेत्यर्थः ।

(३) सामान्यतोदृष्टस्यातिप्रसङ्गादप्रामाण्यमभिधाय वर्णभेदग्राहकं प्रत्यक्षं बाधकमाशङ्क्याह नचेदमिति । युक्तमित्यन्वयः । भेदेनोपलब्धौ युक्तिरत एवेति । अयुक्तत्वे हेतुमाह यत इति । बहुषु गकारमुच्चारयत्सु योऽनुभवो जायते स किं व्यक्तिभेदावमर्शपूर्वकं जातिविषय उतौपाधिकभेदवदेकव्यक्तिविषय इति निपुणं निरूपणे ह्यन्युपाधिकभेदमन्तरेण स्वाभाविकव्यक्तिभेदो न भासत इत्यर्थः ।

(४) व्यक्तिभेदपक्षे च कल्पनागौरवमाह तत्रेति ।

(५) येन वर्णेषु व्यक्तिभेदो न स्फुरस्तेन, यत् प्रत्यभिज्ञानं जातेः प्रार्थ्यते, व्यक्तिलभ्यं भेदज्ञानमिति कारिकार्थः ।

(६) व्यवस्था जातिषु व्युपपादने गोत्वाद्युच्छेद इत्याशङ्क्याह नचेति । दशवारमुच्चारितवानित्येकस्यैव गकारस्योच्चारणेष्वावृत्तिप्रतीतेः ।

दश गकारानुदचारयच्चैत्र इति प्रत्ययः स्यात्, न स्याद्दशकृत्व उदचारयदूकारमिति । (१)न चैष जात्यभिप्रायोऽभ्यासो यथा-'शतकृत्वस्तित्तिरीनुपायुङ्क्त देवदत्त' इति । अत्र हि सोरस्ताडं(२) क्रन्दतोऽपि गकारादिव्यक्तौ लोकस्योच्चारणाभ्यासप्रत्ययस्याविनिवृत्तेः । चोदकः प्रत्यभिज्ञानबाधकमुत्थापयति(३) **"कथं ह्येकस्मिन् काले बहूनामुच्चारयतामि"ति** (पृ० ३५६ पं ९) । यद्युगपद्विरुद्धधर्मसंसर्गवत् तन्नाना , यथा गवाश्वादिर्द्विशफैकशफकेसरगलकम्बलादिमान् । युगपदुदात्तानुदात्तादिविरुद्धधर्मसंसर्गवांश्चायं वर्णस्तस्मान्नाना भवितुमर्हति । न चोदात्तादयो व्यञ्जकधर्मा न वर्णधर्मा इति साम्प्रतम् , व्यञ्जकाश्चास्य वायवः । तेषामश्रावणत्वे कथं तद्धर्माः श्रावणाः स्युः । इदं तावदत्र वक्तव्यम्-नहि गुणगोचरमिन्द्रियं गुणिनमपि गोचरयति, मा भूवन् घ्राणरसनश्रोत्राणां गन्धरसशब्दगोचराणां तद्वन्तः पृथिव्युदकाकाशा गोचराः । एवं च मा नाम भूद्वायुगोचरं श्रोत्रम् तद्गुणांस्तूदात्तादीन् गोचरयिष्यति । (४)ते च शब्दासंसर्गाग्रहात् शब्दधर्मत्वेनाध्यवसीयन्ते । न च शब्दस्य प्रत्यभिज्ञानाद्ध्रुवैकत्वस्य स्वरूपत उदात्तादयो धर्माः परस्परविरोधिनोऽपर्यायेण सम्भवन्ति । तस्माद्यथा मुखस्यैकस्य मणिकृपाणदर्पणाद्युपधानवशान्नानादेशपरिमाणसंस्थानभेदविभ्रमः, एवमेकस्यापि वर्णस्य व्यञ्जकध्वनिनिबन्धनोऽयं विरुद्धनानाधर्मसंसर्गविभ्रमो, न तु भाविको नानाधर्मसंसर्ग, इति स्थितेऽभ्युपेत्य परिहारमाह भाष्यकारः—**"अथ वा ध्वनिकृत"** इति । अथवेति पूर्वपक्षं व्यावर्तयति । भवेतां नाम गुणगुणिनावेकेन्द्रियग्राह्यौ, तथाप्यदोषः, ध्वनीनामपि शब्दवच्छ्रावणत्वात् । ध्वनिस्वरूपं प्रश्नपूर्वकं वर्णेभ्यो निष्कर्षयति—**"कः पुनरयमि"ति** । न चायमनिर्द्धारितविशेषवर्णत्वसामान्यमात्रप्रत्ययो न तु वर्णातिरिक्तदभिव्यञ्जकध्वनिप्रत्यय इति साम्प्रतम् । (५)तस्यानुनासिकत्वादिभेदभिन्नस्य गादिव्यक्तिवत्प्रत्यभिज्ञानाभावादप्रत्यभिज्ञायमानस्य चैकत्वाभावेन सामान्यभावानुपपत्तेः । तस्मादवर्णात्मको वैष शब्दः शब्दातिरिक्तो वा ध्वनिः शब्दव्यञ्जकः श्रावणोऽभ्युपेयः । उभयथापि चाक्षु(६)व्यञ्जनेषु च तत्तद्ध्वनिभेदोपधानेनानुनासिकत्वादयोऽवगम्यमानास्तद्धर्मा एव शब्दे प्रतीयन्ते न तु स्वतः शब्दस्य धर्माः । तथा च येषामनुनासिकत्वादयो धर्माः परस्परविरुद्धा भासन्ते भवतु तेषां ध्वनीनामनित्यता, नहि तेषु प्रत्यभिज्ञानमस्ति, येषु तु वर्णेषु प्रत्यभिज्ञानं न तेषामनुनासिकत्वादयो धर्मा इति नानित्याः । (७)**"एवं च सति सालम्बना"** इति (पृ० २५७ पं २) । यद्येष परस्याग्रहो धर्मिण्यगृह्यमाणे तद्धर्मा न शक्या ग्रहीतुमिति । एवं नामास्तु तथा तुष्यतु परस्तथाप्यदोष इत्यर्थः । तदनेन प्रबन्धेन क्षणिकत्वेन वर्णानामशक्यसङ्गतिग्रहतया यदवाचकत्वमापादितं वर्णानां तदपाकृतम् । व्यस्तसमस्तप्रकारसम्भवेन तु

---

(१) उक्तैक्यस्यान्यथासिद्धिमाशङ्क्याह न चैष इति ।

(२) भाविष्कारम् ।

(३) उक्तमपि बाधकं गतिनिरूपणाय पुनरुत्थापयतीत्यर्थः । एतेन वर्णेषु भेदाभेदनिषेधपरं 'कथं तर्ही'ति भाष्यमिति रत्नप्रभाकारादिमतं प्रकृतासंगतेरयुक्तमिति सूचितम् ।

(४) भवन्त्वश्रावणवायुधर्माः श्रावणाः, कथं तेषां शब्दधर्मत्वप्रतीतिरत आह ते चेति ।

(५) तैस्येति । ध्वनेर्भिन्नत्वान्न प्रत्यभिज्ञानमस्यतो ध्वन्युल्लेखिप्रत्ययस्य न जातिविषयत्वमित्यर्थः ।

(६) स्वरेषु । (७) 'एवं च सती'ति दूषणाङ्गीकरणवादः, दूषणाप्राप्तेरुक्तत्वादित्यर्थः ।

यदासङ्कितं तन्निराचिकीर्षुराह-"वर्णेभ्यश्चार्थप्रतीतेरि"ति । कल्पनाममृष्यमाण एकदेश्याह—"न कल्पयामी"ति । निराकरोति—"न अस्या अपि बुद्धे"रिति । निरूपयतु तावत् गौरित्येकं पदमिति धियमायुष्मान् । किमियं पूर्वानुभूतान् गकारादीनेव सामस्त्येनावगाहते, किं वा गकारादितिरिक्तं गवयमिव वराहादिभ्यो विलक्षणम् ? यदि गकारादिविलक्षणमवभासयेत् गकारादिरूपितः प्रत्ययो न स्यात् , नहि वराहधीर्महिषरूपितं वराहमवगाहते । (१)पदतत्त्वमेक प्रत्येकमभिव्यञ्जयन्तो ध्वनयः प्रयत्नभेदभिन्नास्तुल्यस्थानकरणनिष्पाद्यतयाऽन्योन्यविसदृशतत्तत्पदव्यञ्जकध्वनिसादृश्येन स्वव्यञ्जनीयस्यैकस्य पदतत्त्वस्य मिथो विसदृशानेकपदसादृश्यान्यापादयन्तः सादृश्योपधानभेदादेकमप्यभागमपि नानेव भागवदिव भासयन्ति मुखमिवैकं नियतवर्णपरिमाणसंस्थानभेदमपि मणिकृपाणदर्पणादयोऽनेकमनेकवर्णपरिमाणसंस्थानभेदम् , एवं च कल्पिता एवास्य भागा वर्णा इति चेत् । (२)तत्किमिदानीं वर्णभेदानसत्यपि बाधके मिथ्येति वक्तुमध्यवसितोऽसि । एकधीरेव नानात्वस्य बाधिकेति चेत्, हन्तास्यां नाना वर्णाः प्रथन्त इति नानात्वावभास एवैकत्वं कस्मान्न बाधते । (३)अथ वा वनसेनादिबुद्धिवदेकत्वनानात्वे न विरुद्धे, नो खलु सेनावनबुद्धी गजपदातितुरगादीनां चम्रकाशोककिंशुकादीनां च भेदमपबाधमाने उदीयेते, अपि तु भिन्नानामेव सतां केनचिदेकेनोपाधिनाऽवच्छिन्नानामेकत्वमापादयतः । न चौपाधिकेनैकत्वेन स्वाभाविकं नानात्वं विरुध्यते, नह्यौपचारिकमात्मत्वं माणवकस्य स्वाभाविकनरत्वविरोधि । तस्मात्प्रत्येकवर्णानुभवजनितभावनानिचयलब्धजन्मनि निखिलवर्णावगाहिनि स्मृतिज्ञान एकस्मिन् भासमानानां वर्णानां तदेकविज्ञानविषयतया वैकार्थधीहेतुतया वैकत्वमौपचारिकमवगन्तव्यम्(४) न चैकार्थधीहेतुत्वेनैकत्वमेकत्वेन चैकार्थधीहेतुभाव इति परस्पराश्रयम् । नन्वर्थप्रत्ययात्पूर्वमेतावन्तो वर्णा एकस्मृतिसमारोहिणो न प्रथन्ते, न च तत्प्रथानन्तरं वृद्धस्यार्थधीर्नान्वियते, तदुन्नयनाच्च तेषामेकार्थधियं प्रति कारकत्वमेकमवगम्यैकपदत्वाध्यवसानामिति नान्योन्याश्रयम् । न चैकस्मृतिसमारोहिणां क्रमाक्रमविपरीतक्रमप्रयुक्तानामभेदो वर्णानामिति यथाकथञ्चित्प्रयुक्तेभ्य एतेभ्योऽर्थप्रत्ययप्रसङ्ग इति वाच्यम् । उक्तं हि—

यावन्तो यादृशा ये च पदार्थप्रतिपादने ।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः ॥ इति ।

---

(१) पदबुद्धौ वर्णोल्लेखस्यान्यथासिद्धिं शङ्कते पदतत्त्वमिति । एकमभागमभिव्यञ्जयन्तो नानेव भागवदिव भासयन्तीत्यन्वयः । विभागारोपे हेतुमाह सादृश्योपधानेति । सादृश्यमेवोपधानमुपाधिः । सादृश्ये भेदमुपपादयति अन्योन्येति । ये हि गकारौकारविसर्जनीया गंगा औष्ण्यं वृक्षः इति विसदृशपदव्यञ्जकास्तैः सदृशा अपरे गकारादयो ध्वनयो गौरित्येकं पदं व्यञ्जयन्ति । विभागारोपेऽपि कथं वर्णैकत्वितपदप्रतिभानमत आह कल्पिता एवेति । व्यञ्जकवर्णात्मकत्वं व्यंग्येष्वारोप्यत इति भावः ।

(२) दूषयति तत्किमिति ।

(३) औपाधिकत्वस्वाभाविकत्वाभ्यामेकैकत्वनानात्वे व्यवस्थापयन्नाहाथवेति ।

(४) एवं चौपैकप्रत्यक्षानारोहेऽप्येकस्मृतिविषयत्वं वर्णानामुपाधिरित्यर्थः । उपचारे सति निमित्तानुसरणं न तु निमित्तानुसारेणोपचार इति न धक्खादिरादिष्यतिप्रसङ्गः । एतेन समुदितानां वर्णानामर्थज्ञानजनकत्वमित्युपपादितम् ।

(१)ननु पङ्क्तिबुद्धावेकस्यामक्रमायामपि वास्तवी शालादीनामस्ति पङ्क्तिरिति तथैव प्रथा युक्ता, न च तथेह वर्णानां नित्यानां विभूनां चास्ति वास्तवः क्रमः, प्रत्ययोपाधिस्तु भवेत्, सचैक इति कुतस्त्यः क्रम एषामिति चेत् । न । एकस्यामपि स्मृतौ वर्णरूपवत्क्रमवत्पूर्वानुभूतापरामर्शात् । तथाहि-जरा राजात पदयोः प्रथयन्त्योः स्मृतिधियोस्तत्त्वेऽपि वर्णानां क्रमभेदात्पदभेदः स्फुटतरं चकास्ति । तथा च नाक्रमविपरीतक्रमप्रयुक्तानामविशेषः स्मृतिबुद्धावेकस्यां वर्णानां क्रमप्रयुक्तानाम् । यथाहुः-

(२)पदावधारणोपायान् बहूनिच्छन्ति सूरयः ।
क्रमन्यूनातिरिक्तत्वस्वरवाक्यश्रुतिस्मृतीः ॥ इति ।

शेषमतिरोहितार्थम्(३) । दिङ्मात्रमत्र सूचितं, विस्तरस्तु तत्त्वबिन्दाववगन्तव्य इति । अलं वा नैयायिकैर्विवादेन, सन्त्वानेत्या एव वर्णास्तथापि गत्वाद्यवच्छेदेनैव सङ्गतिग्रहादिश्च व्यवहारः सेत्स्यतीत्याह—"अथापि नामे"ति (पृ० ३५९ पं० २) ॥ २८ ॥

(सू०) अत एव च नित्यत्वम् ॥ २९ ॥

ननु प्राच्यामेव मीमांसायां वेदस्य नित्यत्वं सिद्धं तत्किं पुनः साध्यत इत्यत आह—"स्वतन्त्रस्य कर्तुरस्मरणादि"ति हि स्थित वेदस्य नित्यत्व"मिति । नन्वनित्याज्जगदुत्पत्तुमर्हति, तस्याप्युत्पत्तिमत्त्वेन सापेक्षत्वात् । तस्मादनित्यो वेदो जगदुत्पत्तिहेतुत्वाद् ईश्वरवदिति सिद्धमेव नित्यत्वमनेन दृढीकृतम् । शेषमतिरोहितार्थम् ॥ २९ ॥

(सू०) (४)समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥ ३० ॥

शङ्कापदोत्तरत्वात् सूत्रस्य शङ्कापदानि पठति "अथापि स्यादि"ति । (पृ० ३६० पं० १) अभिधानाभिधेयाविच्छेदे हि सम्बन्धनित्यत्वं भवेत् । एवमध्यापकाध्येतृसम्परा-विच्छेदे वेदस्य(५) नित्यत्व स्यात् । निरन्वयस्य तु जगतः प्रविलयेऽत्यन्तासतश्चापूर्वस्योत्पादेऽभिधानाभिधेयावत्यन्तमुच्छिन्नाविति किमाश्रयः सम्बन्धः स्यात् । अध्यापकाध्येतृसन्तानविच्छेदे च किमाश्रयो वेदः स्यात् । न च जीवास्तद्वासनावासिताः सन्तीति वाच्यम् । अन्तःकरणाद्युपाधिकल्पिता हि ते तद्विच्छेदे न स्थातुमर्हन्ति । (६)न च ब्रह्मणस्तद्वासना,

---

(१) भाष्ये पङ्क्तिबुद्धौ पिपीलिकाक्रमवत् स्मृतौ वर्णक्रमसिद्धिरित्युक्तं, तदाक्षिप्य समाधत्त नन्वित्यादिना ।

(२) पदेति । तत्र राजा जारत्यत्र क्रम उपायः, गौर्गौमनित्यत्र न्यूनातिरिक्तत्वे, स्वरो भाषिकादिः वाक्यमित्यत्र जना इत्यादौ, वाक्यं पदान्तरसमभिव्याहारः यथाश्वो गच्छतीति, न लुङन्तमाख्यातम् क्रियान्तरोपादानात्, श्रुतिरुद्भिदो यागनामधरत्वं समानाधिकरणश्रुतिगम्यम्, स्मृतेर्युगपत्सर्ववर्णविषया ।

(३) वृद्धव्यवहारे चेत्यादिकल्पना स्यादित्यन्तं भाष्यं स्पष्टार्थमित्यर्थः ।

(४) महाप्रलये जातेरभावाच्छब्दार्थसम्बन्धानित्यत्वमित्याशङ्कापरिहारार्थं सूत्रं समानेत्यादि ।

(५) वाक्यरूपस्येत्यर्थः ।

(६) ननु जीवानामनवस्थितावप्यभिधानादिवासितस्य ब्रह्मणोऽवस्थितिः स्यात्तत्राह न चेति । निरवयस्यावियापिरूपमाणाश्रयत्वान्न तज्जवासनाश्रयत्वमित्यर्थः ।

तस्य विद्यात्मनः शुद्धस्वभावस्य तदयोगात् । (१)ब्रह्मणश्च सृष्ट्यादावन्तःकरणादयस्तदवच्छिन्नाश्च जीवाः प्रादुर्भवन्तो न पूर्वकर्माविद्यावासनावन्तो भवितुमर्हन्ति, अपूर्वत्वात् । तस्माद्विरुद्धमिद शब्दार्थसम्बन्धवेदनित्यत्व सृष्टिप्रलयाभ्युपगमेनेति । अभिधातृप्रहणेनाध्यापकाध्येतारावुक्तौ(२) । शङ्कां निराकर्तुं सूत्रमवतारयति--**"तत्रेदमभिधीयते समाननामरूपत्वादि"ति** । यद्यपि महाप्रलयसमये नान्तःकरणादयः समुदाचरद्वृत्तयः सन्ति, तथापि स्वकारणेऽनिर्वाच्यायामविद्यायां लीनाः सूक्ष्मेण-शक्तिरूपेण कर्मविक्षेपकाविद्यावासनाभिः(३) सहावतिष्ठन्त एव । तथा च स्मृतिः—

(४)आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥ इति ।

(५)ते चावधिं प्राप्य परमेश्वरेच्छाप्रचोदिताः, यथा कूर्मदेहनिलीनान्यङ्गानि ततो निस्सरन्ति, यथा वा वर्षापाये प्राप्तमृद्भावानि मण्डूकशरीराणि तद्वासनावासिततया घनघनाघनासारावसेकसुहितानि पुनर्मण्डूकदेहभावमनुभवन्ति, तथा पूर्ववासनावशात्पूर्वसमाननामरूपाण्युत्पद्यते । (६)एतदुक्तं भवति—यद्यपीश्वरात्प्रभवः संसारमण्डलस्य, तथापीश्वरः प्राणभृत्कर्माविद्यामहकारी तदनुरूपमेव सृजति । न च सर्गप्रलयप्रवाहस्यानादितामन्तरेणैतदुपपद्यत इति सर्गप्रलयाभ्युपगमेऽपि संसारानादिता न विरुध्यत इति । तदिदमुक्त**"मुपपद्यत(७) चाप्युपलभ्यते चागमत" इति** । स्यादेतत्, भवत्वनादिता संसारस्य, तथापि महाप्रलयान्तरिते कुतः स्मरणं वेदानामित्यत आह—**"अनादौ च संसारे यथा स्वापप्रबोधयोरि"ति** । (८)यद्यपि प्राणमात्रावशेषतातन्निःशेषते सुषुप्तप्रलयावस्थयोर्विशेषः, तथापि कर्मविक्षेपसंस्कारसहितलयलक्षणाविद्याऽवशेषतासाम्येन स्वापप्रलयावस्थयोरभेद इति द्रष्टव्यम् । ननु नापर्यायेण सर्वेषां सुषुप्तावस्था, केषांचित्तदा प्रबोधात्, तेभ्यश्च सुप्तोत्थितानां ग्रहणसम्भवात्, प्रायणकालविप्रकर्षयोश्च वासनोच्छेदकारणयोरभावेन सत्यां वासनायां स्मरणोपपत्तेः शब्दार्थसम्बन्धवेदव्यवहारानुच्छेदो युज्यते । महाप्रलयस्त्वपर्यायेण प्राण-

---

(१) अथानपेक्ष्य वासनाः ब्रह्म जगत्सृजेत्तत्राह ब्रह्मणश्चेति ।

(२) द्वयारप्युच्चारयितृत्वादित्यर्थः ।

(३) कर्मेति । कर्मविक्षेपकाविद्या भ्रान्तयस्तासां वासनाभिरित्यर्थ । वासनाऽभावे च हिंस्राहिंस्रादिव्यवस्था न स्यादिति बोध्यम् ।

(४) आसीदिति । सृष्टे पूर्वमिदं जगदन्तकरणादिरूपं प्रत्यक्षतोऽज्ञातमननुमेयं तर्कागोचरो आगमतश्चाविज्ञेयमतः सर्वतः प्रसुप्तमिव तमोरूपमासीदित्यर्थः ।

(५) ते चेति । अवधिमुत्तरकालं प्राप्य पूर्वसमाननामरूपाणि भूत्वोत्पद्यन्त इत्यग्रेऽन्वयः । इच्छा-ईक्षणम् । कूर्माङ्गानां दर्शनादर्शनमात्रं नोत्पत्तिरित्युदाहरणान्तरमाह यथावेति । घनाः—निबिडाः, घनाश्च घनाः मेघाः, तेषामासारेण सन्ततधारावर्षेण बृंहितानि इत्यर्थः ।

(६) ननु अविद्यायाः पूर्ववासनाश्रयत्वेन जगद्धेतुत्वे ब्रह्मणो जगत्कारणत्वविरोध इत्याशङ्क्याह, उपकरणस्य स्वातन्त्र्याविघातकत्वान्न विरोध इत्याशयेन परिहरति एतदिति ।

(७) उक्तन्यायेनानादित्वमित्यर्थः ।

(८) भाष्यस्थसुषुप्तिदृष्टान्ते वैषम्यमाशङ्क्य परिहरन्नाह यद्यपीति । लीयतेऽस्यां सर्वं कार्यमिति लयलक्षणाविशेषेत्यर्थः ।

मृन्मात्रवर्ती, प्रायणकालविप्रकर्षौ च तत्र संस्कारमात्रोच्छेदहेतू स्त इति कुतः सुषुप्तवत्पूर्वप्रबोधव्यवहारवदुत्तरप्रबोधव्यवहार इति चोदयति—"**स्यादेतत्स्वाप**" इति (पृ० ३६१ पं० ३)। परिहरति—"**नैष दोषः। सत्यपि व्यवहारोच्छेदिनी**"ति। अयमाभेसन्धिः—न तावत्प्रायणकालविप्रकर्षौ सर्वसंस्कारोच्छेदकौ, (१)पूर्वाभ्यस्तस्मृत्यनुसन्धानाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः। मनुजजन्मवासनानां चानेकजात्यन्तरसहस्रव्यवहेतानां पुनर्मनुष्यजातिसम्बर्तकेन कर्मणाऽभिव्यक्तयभावप्रसङ्गात्। तस्मान्निकृष्टधियामपि यत्र सत्यपि प्रायणकालविप्रकर्षादौ पूर्ववासनानुवृत्तिस्तत्र कैव कथा परमेश्वरानुग्रहेण धर्मज्ञानवैराग्यैश्वर्यातिशयसम्पन्नानां हिरण्यगर्भप्रभृतीनां महाधियाम्। यथा वा आ च मनुष्येभ्य आ च कृमिभ्यो ज्ञानादीनामनुभूयते निकर्षः। एवमा मनुष्यभ्य एवा च भगवतो हिरण्यगर्भाज्ज्ञानादीनां प्रकर्षोऽपि सम्भाव्यते। तथा च तदभिवदन्तो वेदस्मृतिवादाः प्रामाण्यमप्रत्यूहमश्नुवते। एवं चात्रभवतां हिरण्यगर्भादीनां परमेश्वरानुगृहीतानामुपपद्यते कल्पान्तरसम्बन्धिनिखिलव्यवहारानुसन्धानमिति। सुगममन्यत्(२)। स्यादेतत्, अस्तु कल्पान्तरव्यवहारानुसन्धानं तेषामस्यां तु सृष्टावन्य एव वेदाः, अन्य एव चैषामर्थाः, अन्य एव वर्णाश्रमाः, धर्माच्चानर्थोऽर्थश्चाधर्मात्, अनर्थश्चेप्सितोऽपूर्वत्वात् सर्गस्य, तस्मात्कृतमत्र कल्पान्तरव्यवहारानुसन्धानेनाकिञ्चित्करत्वात्, तथा च पूर्वव्यवहारोच्छेदाच्छब्दार्थसम्बन्धश्च वेदश्चानित्यौ प्रसज्येयातामित्यत आह—"**प्राणिनां च सुखप्राप्तय**" इति (पृ० ३६२ पं० ७)। यथावस्तुस्वभावसामर्थ्यं हि सर्गः प्रवर्तते, न तु स्वभावसामर्थ्यमन्यथयितुमर्हति। नहि जातु सुखं तत्त्वेन जिहास्यते, दुःखं चोपादित्सिष्यते। न च जातु धर्माधर्मयोः सामर्थ्यविपर्ययो भवति, नहि मृत्पिण्डात्पटो घटश्च तन्तुभ्यो जायते, तथा सति वस्तुसामर्थ्यनियमाभावात् सर्वं सर्वस्माद्भवेदिति पिपासुरपि दहनमाहृत्य पिपासामुपशमयेत्, शीतार्तो वा तोयमाहृत्य शीतार्तिमिति। तेन सृष्ट्यन्तरेऽपि ब्रह्महत्यादिरनर्थहेतुरेवाऽर्थहेतुश्च यागादिरित्यानुपूर्व्यं सिद्धम्।

एवं च य एव वेदा अस्मिन्कल्पे त एव कल्पान्तरे त एव चैषामर्थास्त एव च वर्णाश्रमाः। दृष्टसाधर्म्यसम्भवे तद्वैधर्म्यकल्पनमनुमानागमाविरुद्धम्।

(३)आगमाश्चेह भूयांसो भाष्यकारेण दर्शिताः।
श्रुतिस्मृतिपुराणाख्यास्तदुत्कोपोऽन्यथा भवेत्॥

तस्मात्सुष्ठूक्तं "**समाननामरूपत्वाच्चावृत्तावप्यविरोध**" इति। '**अग्निर्वा अकामयते**'ति (पृ० ३६४ पं० ५)। वृत्तिमाश्रित्य यजमान एवाग्निरुच्यते(४), नह्यग्नेर्देवतान्तरमग्निरस्ति॥ ३०॥

---

(१) प्रायणकालविप्रकर्षयोस्संस्कारानुच्छेदकत्वे हेतुमाह पूर्वाभ्यस्तेति। इदं न्यायसूत्रम्। विपक्षे बाधमाह मनुजेति। (२) अन्यदिति। तथा चेत्यादि, विद्यादितीत्यन्तम्।

(३) आगमा इति। तेषां ये यानीत्यादिस्मृतिरूपा आगमा इत्यर्थः।

(४) यजमानो भाविन्या वृत्त्या यदाग्नेरिदानीमग्नये निर्वपति तदा भविष्यदयतनाग्न्योस्तुल्यनामता। ननु किमिति भाविन्या वृत्त्या यजमानोऽग्निरुच्यतेऽग्नेर्देवतैवाग्नये निर्वपतु नेत्याह नहीति। सत्त्वे वा स एवास्माभिरुद्देष्टुं शक्यते यागकाले इति प्राचीनो वृथा स्यादित्यर्थः।

(सू०) मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॥ ३१ ॥

(१)ब्रह्मविद्यास्वधिकारं देवर्षीणां ब्रुवाणः प्रष्टव्यो जायते—किं सर्वासु ब्रह्मविद्यास्वविशेषेण सर्वेषां, किं वा कासुचिदेव केषाञ्चित् । यद्यविशेषेण सर्वासु, ततो मध्वादिविद्यास्वसंभवः। (२)"कथमसौ वाऽऽदित्यो देवमधित्यत्र हि मनुष्या आदित्यं मध्वध्यासेनोपासीरन्" (पृ० ३६ पं० ४) । उपास्योपासकभावो हि भेदाधिष्ठानो न स्वात्मन्यादित्यस्य देवतायाः सम्भवति, न चादित्यान्तरमस्ति, प्राचामादित्यानामस्मिन् कल्पे क्षीणाधिकारत्वात् । "पुनश्चादित्यव्यपाश्रयाणि पञ्च रोहितादीन्युक्तम्य"ति । अयमर्थः—'असौ वा आदित्यो देवमधि'ति देवानां मोदनान्मध्विव मधु । (३)भ्रामरमधुमाहात्म्यमाहास्य श्रुतिः—'तस्य मधुनो द्यौरेव तिरश्चीनवंशः । अन्तरिक्षं मध्वपूपः' । (४)आदित्यस्य हि मधुनोऽपूपः पटलमन्तरिक्षमाकाशं तत्रावस्थानात् । (५)यानि च सोमाज्यपयःप्रभृतीन्यग्नौ हूयन्ते तान्यादित्यरश्मिभिरग्निसंवलितैरुत्पन्नपाकान्यमृतीभावमापन्नान्यादित्यमण्डलमृच्छन्त्रमधुपैर्नीयन्ते । (६)यथा हि भ्रमराः पुष्पेभ्य आहृत्य मकरन्दं स्वस्थानमानयन्त्येवमृच्छन्त्रा भ्रमराः प्रयोगसमवेतार्थस्मरणादिभिर्ऋग्वेदविहितेभ्यः कर्मकुसुमेभ्य आहृत्य तन्निष्पन्नमकरन्दमादित्यमण्डलं लोहिताभिरस्य प्राचीनरश्मिनाडीभिरानयन्ति, तदमृतं वसव उपजीवन्ति । (७)अथास्यादित्यमधुनो दक्षिणाभी रश्मिनाडीभिः शुक्लाभिर्यजुर्वेदविहितकर्मकुसुमेभ्य आहृत्याग्नौ हुतं सोमादि पूर्ववदमृतभावमापन्नं यजुर्वेदमन्त्रभ्रमरा आदित्यमण्डलमानयन्ति, तदेतदमृतं रुद्रा उपजीवन्ति । तथाऽस्यादित्यमधुनः प्रतीचीभी रश्मिनाडीभिः कृष्णाभिः सामवेदविहितकर्मकुसुमेभ्य आहृत्याग्नौ हुतं सोमादि पूर्ववदमृतभावमापन्नं साममन्त्रस्तोत्रभ्रमरा आदित्यमण्डलमानयन्ति, तदमृतमादित्या उपजीवन्ति । अथास्यादित्यमधुन उदीचीभिरतिकृष्णाभी(८) रश्मिनाडीभिरथर्ववेदविहितेभ्यः कर्मकुसुमेभ्य आहृत्याग्नौ हुतं

---

(१) देवादीना स्वमिमविद्यास्वनधिकारेऽपि ब्रह्मविद्याधिकारसम्भवादाक्षेपासम्भवमाशङ्क्य विकल्पद्वारा सूत्रमवतारयति ब्रह्मविद्यास्विति ।

(२) मधुविद्यावाक्यं भाष्यमुखेनादत्ते कथमिति ।

(३) भ्रामरेति । भ्रमरैर्निर्वृत्तं भ्रामरम् । तस्येति । द्यौः स्वर्गस्तिर्यग्गतवंशो इवादित्यं मधु हि तत्र तत्र लग्नमित्यर्थः ।

(४) अन्तरिक्षं मध्वपूप इति श्रुतिं व्याचष्टे आदित्यस्य इति । पटलं इति अपूपव्याख्यानम् । तत्रेति प्रसिद्धमध्वपूपसाम्योक्तिः ।

(५) श्रुतिनिर्दिष्टपञ्चामृतान्याह यानि चेति । 'तस्यादित्यस्य ये प्राचो रश्मयस्ता एवास्य प्राचो मधुनाडच', ऋच एव मधुकृत. ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋचः 'ऐतमृग्वेदमभ्यतपंस्तस्यामितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्वायं रसोऽजायत तद्यशस्तेजइन्द्रियवीर्यमन्नाद्यं वा एतदादित्यमभितोऽभयत्तद्वा एतदेतदादित्यस्य रोहितं रूपम्' इत्यादिश्रुतावाम्नातानि पञ्चामृतानि बोध्यानि । तान्यामृतसाधनत्वादमृता इति श्रुत्यर्थः ।

(६) ऋच एव मधुकृत इत्येतद्व्याचष्टे यथेति । मन्त्रैः प्रयुक्तं कर्मफलात्मकं रसं स्रवन्तीत्यृचां मधुपसाम्यं बोध्यम् ।

(७) अथ यस्य दक्षिणा इत्यादिश्रुतिं व्याचष्टे अथास्येत्यादिना ।

(८) परः कृष्णमित्यमृतं श्रुतौ निर्दिष्टं तद्वदम्युपाधिकमित्याह अतिकृष्णाभिरिति ।

सोमादि पूर्ववदमृतभावमापन्नमथर्वाङ्गिरसमन्त्रभ्रमराः(१), तथाश्वमेधवाचःस्तोमकर्मकुसुमादितिहासपुराणमन्त्रभ्रमरा आदित्यमण्डलमानयन्ति । (२)अश्वमेधे वाचःस्तोमे च पारिप्लवं शंसन्तीति श्रवणादितिहासपुराणमन्त्राणामप्यस्ति प्रयोगः । तदमृतं मरुत उपजीवन्ति । अथास्य या आदित्यमधुन (३)ऊर्ध्वा रश्मिनाड्यो गोप्यास्ताभिरुपासनभ्रमराः प्रणवकुसुमादाहृत्यादित्यमण्डलमानयन्ति, तदमृतमुपजीवन्ति साध्याः । (४)ता एता आदित्यव्यपाश्रयाः पञ्च रोहितादयो रश्मिनाड्य ऋगादिसम्बद्धाः क्रमेणोपदिश्येति योजना । एतदेवामृतं दृष्ट्वोपलभ्य यथास्वं समस्तैः करणैर्यशस्तजइन्द्रियसाकल्यवीर्याज्ञाद्यान्यमृतं तदुपलभ्यादित्ये तृप्यन्ति । तेन खल्वमृतेन देवानां वस्वादीनां मोदनं विदधदादित्यो मधु । एतदुक्तं भवति— न केवलमुपास्योपासकभाव एकास्मन् विरुध्यतेऽपि तु ज्ञातृज्ञेयभावश्च प्राप्यप्रापकभावश्चेति(५)। **"तथाग्निः पाद"** इति । अधिदैवतं खल्वाकाशे ब्रह्मदृष्टिविधानार्थमुक्तम् । आकाशस्य हि सर्वगतत्वं रूपादिहीनत्वं च ब्रह्मणा सारूप्यं, तस्य चैतस्याकाशस्य ब्रह्मणश्चत्वारः पादा अग्न्यादयोऽग्निः पाद इत्यादिना दर्शिताः । यथा हि गोः पादा न गवा वियुज्यन्ते, एवमग्न्यादयोऽपि नाकाशेन सर्वगतेनेत्याकाशस्य पादाः । तदेवमाकाशस्य चतुष्पदो ब्रह्मदृष्टिं विधाय स्वरूपेण वायु संवर्गगुणमुपास्य विधातुं महीकरोति—**"वायुर्वाव संवर्गः"** तथा स्वरूपेणैवादित्यं ब्रह्मदृष्ट्योपास्यं विधातुं महीकरोति—**"आदित्यो ब्रह्मत्यादेश"** उपदेशः। अतिरोहितार्थमन्यत् ॥ ३१ ॥

यद्युच्येत (६)नाविशेषेण सर्वेषां देवर्षीणां सर्वासु ब्रह्मविद्यास्वधिकारः किन्तु यथासम्भवमिति । तत्रेदमुपतिष्ठते—

सू० ज्योतिषि भावाच्च ॥ २२ ॥

लौकिकौ ह्यादित्यादिशब्दप्रयोगप्रत्ययौ ज्योतिर्मण्डलादिषु दृष्टौ न चैतेषामस्ति चैतन्यं, नह्येतेषु देवदत्तादिवत्तदनुरूपा दृश्यन्ते चेष्टाः । **"स्यादेतन्मन्त्रार्थवादेतिहासपुराणलोकेभ्य"** इति । तत्र "जगृम्भ(७) ते दक्षिणमिन्द्र हस्तमि"ति च, "काशिरिन्द्र

---

(१) इतिहासपुराणमन्त्रा यत्र प्रयुज्यन्ते तस्य कर्मणः पुष्पत्वेन निर्देशात्तन्मन्त्रा मधुकृत इत्याशयेनाहाथर्वाङ्गिरसेति । कर्मकुसुमेभ्य आहृत्याग्नौ हुतममृतमथर्वमन्त्रा आदित्यमण्डलं नयन्तीत्यन्वयः । इतिहासपुराणमन्त्रप्रयोगयोग्यं कर्माह तथाश्वमेधेति । कर्मकुसुमादाहृत्येत्यनुषङ्गः ।

(२) ननु कथमितिहासादिमन्त्राणां वाचस्तोमसम्बन्धोऽत आहाश्वमेधेति । पारिप्लवो यदृच्छया बुद्धिस्थमन्त्रशंसनम् । सर्वाण्याख्यानानि पारिप्लव शंसन्तीति श्रवणादैतिहासिकान्यपि गृह्यन्त इति भावः ।

(३) अथ येऽस्योर्ध्वा मधुनाड्या गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पमिति पञ्चमपर्यायं व्याचष्टे ऊर्ध्वा इति । (४) व्याख्यातमधुविद्यामुपसंहरति ता एता इति ।

(५) एकास्मन्नादित्ये उपास्योपासकभावो विरुद्धः, वस्वादौ तु स च प्राप्यप्रापकभावश्चेत्यर्थः ।

(६) देवादीनां सर्वेषां सर्वविद्यास्वधिकार इति कल्पे निरस्तेऽपि यथासम्भवमधिकार इति इत्याशङ्क्याह यद्युच्यतेति ।

(७) तत्र जगृम्भेति । हे इन्द्र ते दक्षिणं हस्तं जगृम्भ गृहीतवन्तो वयम् । यदीमे रोदसीन्द्र गृह्णासि तर्हि तव काशिर्मुष्टिः मुष्टौ सम्मति इदं इत्थामेत्यर्थः । तुविग्रीवः-पृथुग्रीवः, वपोदरः सावकाशोदरः, सुबाहुरिन्द्रोऽधसोऽन्नस्यापयुक्तस्य मदे हर्षे सति वृत्राणि शत्रून् जिघ्नते हतवानिति मन्त्रार्थवादार्थः ।

इदि"ति च । काशिर्मुष्टिः । तथा 'तुविग्रीवो वपादरः सुबाहुरन्धसो मदे । इन्द्रो वृत्राणि जिघ्नत' इति विग्रहवत्त्वं देवताया मन्त्रार्थवादा आभवदन्ति । तथा हविर्भोजनं देवताया दर्शयन्ति—'अद्धीन्द्र पिब च (१)प्रास्थितस्ये'त्यादयः । तथेशनाम्(२)—'इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम् । इन्द्रो वृधाम् इन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्र' इति, तथा 'ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुष' इति । तथा वरिवसितारं (३)प्रति देवतायाः प्रसादं प्रसन्नायाश्च फलदान दर्शयति—'आहुतिभिरेव देवान् हुतादः प्रीणाति तस्मै प्रीता इषमूर्जं च यच्छन्ती'ति । 'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयती'ति च । धर्मशास्त्रकारा अप्याहुः—

ते तृप्तास्तर्पयन्त्यनं सर्वकामफलैः शुभैः । इति ।

पुराणवचांसि च भूयांसि देवताविग्रहादिपञ्चक(४)प्रपञ्चमाचक्षते । लौकिका अपि देवताविग्रहादिपञ्चकं स्मरन्ति चोपचरन्ति च । तथाहि—यमं दण्डहस्तमालिखन्ति, वरुणं पाशहस्तम्, इन्द्रं वज्रहस्तम् । कथयन्ति च 'देवता हविर्भुङ्क्ते' इति । तथेशनामिमामाहुः—'देवप्रायो देवक्षत्रमि'ति । तथास्याः प्रसादं च प्रसन्नायाश्च फलदानमाहुः—'प्रसन्नोऽस्य पशुपतिः पुत्रोऽस्य जातः । प्रसन्नोऽस्य धनदो धनमनेन लब्धमि'ति । तदेतत्पूर्वपक्षो दूषयति—**"नेत्युच्यते । नहि तावल्लोको नामे"ति** (पृ० ३६६ पं० ९) । न खलु प्रत्यक्षादिव्यतिरिक्तो लोको नाम प्रमाणान्तरमस्ति, किन्तु प्रत्यक्षादिमूला लोकप्रसाद्धः सत्यतामश्नुते, तदभावे त्वन्धपरम्परावत् मूलाभावाद्विप्लवते । न चात्र विग्रहादौ प्रत्यक्षादीनामन्यतममस्ति प्रमाणम् । न चेतिहासाद मूलं भवितुमर्हति, तस्यापि पौरुषेयत्वेन प्रत्यक्षाद्यपेक्षणात्, प्रत्यक्षादीनां चात्राभावादित्याह—**"इतिहासपुराणमपी"ति** । ननूक्तं मन्त्रार्थवादेभ्यो विग्रहादिपञ्चकप्रसिद्धिरित्यत आह—**"अर्थवादा अपी"ति** । विध्युद्देशेनैकवाक्यतामापद्यमाना अर्थवादा विधिविषयप्राशस्त्यलक्षणापरा न स्वार्थे प्रमाणं भवितुमर्हन्ति । 'यत्परः शब्दः स शब्दार्थ' इति हि शाब्दन्यायविदः । प्रमाणान्तरेण तु यत्र स्वार्थोऽपि यथा वायोः क्षेपिष्ठत्वम् तत्र प्रमाणान्तरवशात्सोऽभ्युपेयते न तु शब्दसामर्थ्यात् । यत्र तु न प्रमाणान्तरमस्ति यथा विग्रहादिपञ्चके, सोऽर्थः शब्दादेवावगन्तव्यः, अतत्परश्च शब्दो न तदवगमयितुमलमिति तदवगमायास्य

---

(१) प्रास्थितस्ये पकालितस्य पक्वस्य हविषो भागमद्धि सोमस्य सुतस्य भाग पिब चेत्यर्थः ।

(२) ईशानमैश्वर्यं, देवताया दर्शयतीत्यनुषङ्गः । इन्द्र इति । इन्द्रो दिव स्वर्गस्य पृथिव्या अपां पर्वतानां वृधां—वीरुधां स्थावराणां मेधिराणां मघवतां जङ्गमानां चेशे इष्टेऽतः प्रातस्य रक्षणेऽपासप्रापणे च हव्यो यष्टव्य इत्यर्थः। ईशानमिति । हे इन्द्र जगतो जङ्गमस्य तस्थुषः स्थावरस्य चेशानं सर्वदृशं दिव्यज्ञानं त्वा वय स्तुम इत्यर्थः ।

(३) पूजकम् । आहुतिभिरिति । हुतादौ हुतभक्षकान् देवान् आहुतिभिः प्रीणयति यो होता तस्मै प्रीता देवा इषमन्नमूर्जं बलं च प्रयच्छन्तीत्यर्थः ।

(४) विग्रहो हविषां भाग ऐश्वर्यं च प्रसन्नता ।
फलप्रदानमित्येतत्पंचक विग्रहादिकम् ॥
इति देवताविग्रहादिपञ्चकं द्रष्टव्यम् ।

तत्रापि तात्पर्यमभ्युपेतव्यम् । न चैकं वाक्यमुभयपरं भवतीति वाक्यं भिद्येत । न च सम्भवत्येकवाक्यत्वे वाक्यभेदो युज्यते । तस्मात्प्रमाणान्तरानधिगतविग्रहादिमत्ताऽन्यपरा-च्छब्दादवगन्तव्येति मनोरथमात्रमित्यर्थः । मन्त्राश्च व्रीह्यादिवच्छ्रुत्यादिभिस्तत्रतत्र विनि-युज्यमानाः प्रमाणभावाननुप्रवेशिनः कथमुपयुज्यन्तां तेषुतेषु कर्मस्वित्यपेक्षायां(१)दृष्टे प्रकारे सम्भवति नादृष्टकल्पनोचिता । दृष्टश्च प्रकारः प्रयोगसमवेतार्थस्मरणं, स्मृत्वा चानुतिष्ठन्त्य-नुष्ठातारः पदार्थान् । (२)औत्सर्गिकी चार्थपरता पदानामित्यपेक्षितप्रयोगसमवेतार्थस्मरणता-त्पर्याणां मन्त्राणां नानधिगते विग्रहादावपि तात्पर्यं युज्यत इति न तेभ्योऽपि तत्सिद्धिः । तस्माद्देवताविग्रहवत्त्वादिभावप्राहकप्रमाणाभावात्प्राप्ता षष्ठप्रमाणगोचरताऽस्येति प्राप्तम् ॥३२॥

एवं प्राप्तेऽभिधीयते—

भावं तु बादरायणोऽस्ति हि ॥ ३३ ॥

"तुशब्दः पूर्वपक्षं व्यावर्तयती"त्यादि (पृ० ३६ ७ प० ५) "भूतधातोरादि-त्यादिष्वचेतनत्वमभ्युपगम्यते" (पृ० ३६८ पं० ८) इत्यन्तमतिरोहितार्थम् । "मन्त्रा-र्थवादादिव्यवहारादि"ति । आदिग्रहणेनेतिहासपुराणधर्मशास्त्राणि गृह्यन्ते । मन्त्रादीन व्यवहारः प्रवृत्तिस्तस्य दर्शनादिति । पूर्वपक्षमनुभाषते—"यदप्युक्तमि"ति । एकदेशमतेन तावत्परिहरति—"अत्र ब्रूम" इति । तदेतत्पूर्वपक्षिणमुत्थाप्य दूषयति—"अत्राह" पूर्वपक्षी । शाब्दी खल्वियं गतिः—यत्तात्पर्याधीनवृत्तित्वं नाम, नह्यन्यपरः शब्दोऽन्यत्र प्रमाणं भवितुमर्हति । नहि श्वित्रिनिर्णेजनपरं(३) 'श्वेतो धावती'ति वाक्यमितः सारमेयवे-गवद्गमनं गमयितुमर्हति । (४)न च नञ्वति महावाक्येऽवान्तरवाक्यार्थो विधिरूपः शक्यो ऽवगन्तुम् । न च प्रत्ययमात्रात्सोऽप्यर्थोऽस्य भवति, तत्प्रत्ययस्य भ्रान्तित्वात् । (५)न पुनः प्रत्यक्षादीनामियं गतिः, नह्युदकाहरणार्थिना घटदर्शनायोन्मीलितं चक्षुर्घटपटौ व पटं वा केवलं नोपलभते । तदेवमेकदेशिनि पूर्वपक्षिणा दूषिते परमसिद्धान्तवाद्याह—"अ-त्रोच्यते विषम उपन्यास" इति (पृ, ३६९ पं० ३) । अयमभिसन्धिः—लोके वि

---

(१) ये सिद्धरूपादिनो मन्त्रा न ते विधिक्षमा इति तत्स्वरूपमेव श्रुत्यादिभिरेन्द्रयत्यादिभिस्तत्र तत्र कर्मणि विनियुज्यतेऽतो न प्रमाणं चेतर्हि किमुच्चारणमात्रोपयोगा अविवक्षितार्थाः ? नेत्याह दृष्टे प्रकारे इति । नन्वनधिगतमेयाभावे कथं दृष्टार्थतेत्यत आह दृष्टश्चेति । प्रयोगसमवेतो इन्द्रयेदेवतादिः स च विधिभिर्ज्ञात इति स्मार्यः, मन्त्राश्च विधय इव निरपेक्षा देवतायाभिदधतीति नाप्रमाणम् । नन्वविहितायाः स्मृतेः कथं द्वारतेत्यत आह स्मृत्वा चेति । सामर्थ्याद् द्वारतेत्यर्थः ।

(२) ननु देवतास्मरण इव देवताविग्रहादावप्यस्तु मन्त्राणां तात्पर्यं तेषामपि मन्त्रपदैरवबोधादित्याशं क्याहौत्सर्गिकं चेति । उद्दिश्यत्यागस्य हि देवतास्वरूपमात्रं विवक्षितं न विग्रहादि तद्बोधकपदानामुत्सर्गप्राप्त-प्यर्थपरत्वं विध्यनपेक्षत्वादपोद्यत इत्यर्थः ।

(३) श्वित्री कुष्ठी, निर्णेजनं शोधनम् , कुष्ठी वर्णं शोधयतीति विवक्षायामितः श्वा गच्छतीति व क्यार्थज्ञान 'श्वेतो धावती'ति वाक्यान्न जायते इत्यर्थः ।

(४) वेदेपि 'न सुरां पिबेत्' इति नञ्युक्ते महावाक्ये तात्पर्यं विना सुरापानरूपोऽवान्तरवाक्यार्थबो-भवतीत्याह नचेति ।

(५) यदि तात्पर्याच्छाब्दबोधस्तर्हि प्रत्यक्षादिष्वपि तथा स्यादत आह न पुनरिति ।

शिष्टार्थप्रत्यायनाय पदानि प्रयुक्तानि तदन्तरेण न स्वार्थमात्रस्मरणे पर्यवस्यन्ति। नहि स्वार्थस्मरणमात्राय लोके पदानां प्रयोगो दृष्टपूर्वः, वाक्यार्थे तु दृश्यते, न चैतान्यस्मारितस्वार्थानि साक्षाद्वाक्यार्थं प्रत्याययितुमीशते इति स्वार्थस्मारणं वाक्यार्थमितयेऽवान्तरव्यापारः कल्पितः पदानाम्। न च यदर्थं यत् तत् तेन विना पर्यवस्यतीति न स्वार्थमात्राभिधानेन पर्यवसानं पदानाम्। (१)न च नञ्वति वाक्ये विधानपर्यवसानम्, तथा सति नञ्पदमनर्थकं स्यात्। यथाहुः—

(२)साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।
वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले॥
वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥ इति।

सेयमेकस्मिन्वाक्ये गतिः। (३)यत्र तु वाक्यस्यैकस्य वाक्यान्तरेण सम्बन्धस्तत्र लोकानुसारतो भूतार्थव्युत्पत्तौ च सिद्धायामेकैकस्य वाक्यस्य तत्तद्विशिष्टार्थप्रत्यायनेन पर्यवसितवृत्तिनः पश्चात्कुतश्चिद्धेतोः प्रयोजनान्तरापेक्षायामन्वयः कल्पते। यथा 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति वायव्यं श्वेतमालभेत' इत्यत्र। (४)इह हि यदि न स्वाध्यायाध्ययनविधिः स्वाध्यायशब्दवाच्यं वेदराशिं पुरुषार्थतामनेष्यत्ततो भूतार्थमात्रपर्यवसितार्थवादा विध्युद्देशेन नैकवाक्यतामगमिष्यन्। तत्स्वाध्यायविधिवशात् कैमर्थ्याकाङ्क्षायां वृत्तान्तादिगोचराः सन्तस्तत्प्रत्यायनद्वारेण विधेयप्राशस्त्यं लक्षयन्ति, न पुनरविवक्षितस्वार्था एव तल्लक्षणे प्रभवन्ति, तथा सति लक्षणैव न भवेत्, अभिधेयाविनाभावस्य तद्बीजस्याभावात्। (५)अत एव 'गङ्गायां घोष'इत्यत्र गङ्गाशब्दः स्वार्थसम्बद्धमेव तीरं लक्षयति न तु समुद्रतीरं, तत्कस्य हेतोः? स्वार्थप्रत्यासत्त्यभावात्, न चैतत्सर्वं स्वार्थाविवक्षायां कल्पते। अत एव यत्र प्रमाणान्तरविरुद्धार्था अर्थवादा दृश्यन्ते, यथा'ऽऽदित्यो वै यूपो यजमानः प्रस्तर'इत्येवमादयः। तत्र यथा प्रमाणन्तराविरोधो यथा च स्तुत्यर्थता तदुभयसिद्ध्यर्थं 'गुणवादस्त्वे'ति च 'तत्सिद्धिरि'ति चासूत्रयज्जैमिनिः। (६)तस्मा-

---

(१) मा भूत्स्वार्थमात्राभिधाने पर्यवसानं किमस्तत्राह न च नञ्वतीति।

(२) साक्षादिति। यथा काष्ठानि ज्वालाकरणेऽपि पाकार्थान्येव तथा वर्णाः पदार्थप्रतिपादनेऽपि वाक्यार्थान्येवेति श्लोकद्वयार्थः।

(३) एवं सोदाहरणं पदैकवाक्यतां दर्शयित्वा विध्यर्थवादेषु वाक्यैकवाक्यतामाह यत्र त्विति। लोकानुसारत इति। यथा 'क्रय्या गौर्देवदत्तस्य यतो बहुक्षीरे'त्यादौ बहुक्षीरत्वादेरानर्थक्यावगतेर्विध्यर्थवादयोरस्ति वाक्यैकवाक्यतेत्यर्थः।

(४) कुतश्चिद्धेतोरिति वाक्यस्य वाक्यान्तरैकवाक्यत्वे सूचितं हेतुं विवृणोति, इह हीति। अनेन भिन्नवाक्यार्थपर्यवसायिनां पदानां काऽपेक्षेति शङ्का वार्यते।

(५) ननु यदि लक्षणायामभिधेयविवक्षा तत्कथं विरुद्धार्थार्थवादेषु सा स्यात्तत्राभिधेयस्य विरुद्धत्वादेव विवक्षासम्भवादत आहात एवेति।

(६) ननु विरुद्धार्थार्थवादेषु कथमभिधेयाविनाभावनिबन्धना प्राशस्त्यलक्षणा विरोधेनाभिधेयाभावादत आह तस्मादिति। यजमानादिशब्दैस्तत्सिध्यादि लक्ष्यते, ततश्च प्राशस्त्यं लक्षितलक्ष्यस्याप्यभिधेयाविनाभूतत्वादिति भावः।

यत्र सोऽर्थोऽर्थवादानां प्रमाणान्तरविरुद्धस्तत्र गुणवादेन प्राशस्त्यलक्षणेति लक्षितलक्षणा । (१)यत्र तु प्रमाणान्तरसंवादस्तत्र प्रमाणान्तरादिवार्थवादादपि सोऽर्थः प्रतिपद्यते, द्वयोः परस्परानपेक्षयोः प्रत्यक्षानुमानयोरिवैकत्रार्थे प्रवृत्तेः । प्रमात्रपेक्षया त्वनुवादकत्वं, प्रमाता ह्यव्युत्पन्नः प्रथमं यथा प्रत्यक्षादिभ्यो ऽर्थमवगच्छति न तथाऽऽम्नायतस्तत्र व्युत्पत्त्याद्यपेक्षत्वात्, न तु प्रमाणापेक्षया, द्वयोः स्वार्थेऽनपेक्षत्वादित्युक्तम् । (२)नन्वेवं मानान्तरविरोधेऽपि कस्माद्गुणवादो भवति ? यावता शब्दविरोधे मानान्तरमेव कस्मान्न बाध्यते, वेदान्तैरिवाद्वैतविषयैः प्रत्यक्षादयः प्रपञ्चगोचराः, कस्माद्वार्थवादवद्वेदान्ता अपि गुणवादेन न नीयन्ते । (३)अत्रोच्यते । लोकानुसारतो द्विविधो हि विषयः शब्दानाम्, द्वारतश्च तात्पर्यतश्च । यथैकस्मिन् वाक्ये पदानां पदार्था द्वारतो वाक्यार्थश्च तात्पर्यतो विषयः, एवं वाक्यद्वयैकवाक्यतायामपि, यथेयं देवदत्तीया गौः क्रेतव्येत्येकं वाक्यमेषा बहुक्षीरेत्यपरं, तदस्य बहुक्षीरत्वप्रतिपादनं द्वारम्, तात्पर्यं तु क्रेतव्येति वाक्यान्तरार्थे । तत्र यद्वारतस्तत्प्रमाणान्तरविरोधेऽन्यथा नीयते, यथा 'विष भक्षये'ति वाक्य 'मा ऽस्य गृहे भुङ्क्ष्वे'ति वाक्यान्तरार्थपरं सत् । यत्र तु तात्पर्यं तत्र मानान्तरविरोधे पौरुषेयमप्रमाणमेव भवति । वेदान्तास्तु पौर्वापर्यपर्यालोचनया निरस्तसमस्तभेदप्रपञ्चब्रह्मप्रतिपादनपरा अपौरुषेयतया स्वतःसिद्धतात्त्विकप्रमाणभावाः सन्तस्तात्त्विकप्रमाणभावात् प्रत्यक्षादीनि प्रत्याख्याय सांव्यवहारिके तस्मिन् व्यवस्थापयन्ति । न चा'ऽऽदित्यो वै यूप' इति वाक्यमादित्यस्य यूपत्वप्रतिपादनपरमपि तु यूपस्तुतिपरम् । तस्मात्प्रमाणान्तरविरोधे द्वारीभूतो विषयो गुणवादेन नीयते, यत्र तु प्रमाणान्तरं विरोधकं नास्ति यथा देवताविग्रहादौ तत्र द्वारतोऽपि विषयः प्रतीयमानो न शक्यस्त्यक्तुम् । न च गुणवादेन नेतुं, को हि मुख्ये सम्भवति गौणमाश्रयेदतिप्रसङ्गात् । तथा सत्यनधिगतविग्रहादि प्रतिपादयद् वाक्यं भिद्येतेति चेत् । अद्धा । (४)भिन्नमेवैतद्वाक्यम् । (५)तथा सति तात्पर्यभेदोऽपीति चेत् । न । द्वारतोऽपि तदवगतौ तात्पर्यान्तरकल्पनाया अयोगात् । न च यत्र यस्य न तात्पर्यं तस्य तत्राप्रामाण्यम्, तथा सति विशिष्टपरं वाक्यं विशेषणेष्वप्रमाणमिति विशिष्टपरमपि न स्यात्, विशेषणाविषयत्वात् । विशिष्टविषयत्वेन तु तदाक्षेपे परस्पराश्रयत्वम्—आक्षेपाद्विशेषणप्रतिपत्तौ सत्यां विशिष्टविषयत्वं विशिष्टविषयत्वाच्च तदाक्षेपः । तस्माद्विशिष्टप्रत्ययपरेभ्योऽपि पदेभ्यो विशेषणानि प्रतीयमानानि तस्यैव वाक्यस्य विषयत्वेनानिच्छताप्यभ्युपेयानि यथा, तथान्यपरेभ्योऽप्यर्थवादवाक्येभ्यो देवताविग्रहादयः प्रतीयमाना असति प्रमाणान्तरविरोधे न युक्तास्त्यक्तुम्, नहि

---

(१) नन्वनुवादकार्थवादानामप्रामाणिकत्वात् कथं विध्यैकवाक्यतेत्यत आह यत्र त्विति ।

(२) ननु मानान्तरसिद्धार्थत्वेऽपि स्मृतिवदर्थवादानां यदि न सापेक्षत्वं तदा विरुद्धार्थानामपि तदस्तु, गौणार्थत्वं कुत इत्याशयेनाशङ्कते नन्विति ।

(३) वेदान्तानां निष्प्रपञ्चब्रह्मपरतया निरवकाशत्वाद्विरोधिप्रत्यक्षादिबोधकत्वम् न त्वर्थवादानामतत्परत्वेन सावकाशत्वादिति विशेषेण प्रतिबन्दीं परिहरन्नाहात्रोच्यत इत्यादिना ।

(४) भिन्नमिति । विध्यन्वितस्यार्थवादवाक्यस्य महावाक्यरूपेण प्राशस्त्यबोधकत्वात्स्वरूपेणावान्तरवाक्यतया विग्रहादिबोधकत्वाच्च भिन्नमेवैतद्वाक्यमित्यर्थः ।

(५) तथेति । अपौरुषेये वेदे पौरुषेयवाक्यावृत्त्यसम्भवेन कथं तात्पर्यभेदोऽङ्गीकरिष्यत इत्यर्थः ।

मुख्यार्थसम्भवे गुणवादो युज्यते । न च भूतार्थमप्यपौरुषेयं वचो मानान्तरापेक्षं स्वार्थे येन मानान्तरासम्भवे भवेदप्रमाणमित्युक्तम्(१) । स्यादेतत्(२), तात्पर्यैक्ये ऽपि यदि वाक्यभेदः कथं तर्ह्यर्थैकत्वादेकं वाक्यम् ? न(३), तत्रतत्र यथास्वं तत्तत्पदार्थविशिष्टैकपदार्थप्रतीतिपर्यवसानसम्भवात् । स तु पदार्थान्तरविशिष्टः पदार्थ एकः क्वचिद्द्वारभूतः क्व चिद्द्वारीत्येतावान् विशेषः । नन्वेवं(४)'सत्योदनं भुक्त्वा ग्रामं गच्छती'त्यत्रापि वाक्यभेदप्रसङ्गः, अन्यो हि संसर्ग ओदनं भुक्त्वेति, अन्यस्तु ग्रामं गच्छतीति । न(५), एकत्र प्रतीतेरपर्यवसानात् । 'भुक्त्वे'ति हि समानकर्तृकता पूर्वकालता च प्रतीयते । न चेयं प्रतीतिरपरकालक्रियान्तरप्रत्ययमन्तरेण पर्यवस्यति । तस्माद्यावति पदसमूहे पदाहिताः पदार्थस्मृतयः पर्यवस्यन्ति, तावदेकं वाक्यम् । अर्थवादवाक्ये चैताः (६) पर्यवस्यन्ति, विनैव विधिवाक्यं विशिष्टार्थप्रतीतेः । (७)न च द्वाभ्यां द्वाभ्यां पदाभ्यां विशिष्टार्थप्रत्ययपर्यवसानात् पञ्चषपदवति वाक्ये एकस्मिन्नानात्वप्रसङ्गः, नानात्वेऽपि विशेषणानां विशेष्यस्यैकत्वात्, तस्य च सकृच्छ्रुतस्य प्रधानभूतस्य गुणभूतविशेषणानुरोधेनावर्तनायोगात् । प्रधानभेदे तु वाक्यभेद एव । तस्माद्विधिवाक्यादर्थवादवाक्यमन्यदिति वाक्ययोरेव स्वस्ववाक्यार्थप्रत्ययावसितव्यापारयोः पश्चात् कुतश्चिदपेक्षायां परस्परान्वय इति सिद्धम् । **"अपि च विधिभिरेवेन्द्रादिदेवत्यानी"ति** (पृ० ३७० पं० २) । देवतामुद्दिश्य हविरवमृश्य च तद्विषयस्वत्वत्याग इति यागशरीरम् । न च चेतस्यनालिखिता देवतोद्देष्टुं शक्या, न च स्वरूपरहितो चेतसि शक्यते आलेखितुमिति यागविधिनैव तद्रूपापेक्षिणा यादृशमन्यपरेभ्योऽपि मन्त्रार्थवादेभ्यस्तद्रूपमवगतं तदभ्युपेयते, (८)रूपान्तरकल्पनायां मानाभावात्, मन्त्रार्थवादयोरत्यन्तपरोक्षवृत्तिप्रसङ्गाच्च । यथा हि 'व्रात्यो व्रात्यस्तोमेन यजेते'ति व्रात्यस्वरूपापेक्षायां 'यस्य पिता पितामहो वा सोमं न पिबेत् स व्रात्य'इति सिद्धवद् व्रात्यस्वरूपमवगतं व्रात्यस्तोमविध्यपेक्षितं सद्विधिप्रमाणकं भवति, यथा वा स्वर्गस्य रूपमलौकिकं 'स्वर्गकामो यजेते'ति विधिनाऽपेक्षितं सदर्थवादतोऽवगम्यमानं विधिप्रमाणकम्, तथा देवता-

---

(१) इत्युक्तमिति । वाक्यस्य सतः सापेक्षत्वे पौरुषेयत्वमुपाधिरिति समन्वयसूत्रे उक्तमित्यर्थः ।

(२) यदि विधेः प्राशस्त्यपरा अन्यार्थवादा भिन्नं वाक्यं तर्हि 'अग्नेरेकत्व देकं वाक्ये साकाङ्क्षं चोद्भागे स्यादि'त्यधिकरणविरोध इत्याशयेनाक्षिपति स्यादेतदिति ।

(३) परिहरति नेति । यथा सत्यपि वाक्यैक्ये प्रयाजादिवाक्यानामवान्तरभेद एवमर्थवादानामप्यस्तित्वत्यर्थः । तर्हि प्रयाजादिवाक्यानामर्थवादवाक्यानां च को भेद इत्यत आह स त्विति । स्तुतिप्रतिपत्तिद्वारं विग्रहादि प्रयाजादि तु नान्यप्रतिपत्तौ द्वारं किन्तु द्वारि इति भावः ।

(४) एवं सति—विध्येकवाक्यत्वेऽप्यर्थवादेषु पृथक्पदार्थसंसर्गप्रतीत्या वाक्यभेदे सति ।

(५) प्रतीतिपर्यवसानतदभावाभ्यामुभयत्र वैषम्यमाह नेति ।

[६] वाक्येष्वेताः—इति पाठान्तरम् ।

(७) यद्यर्थवादेषु द्वारभूतार्थभेदात् वाक्यभेदस्तदाप्यातिप्रसङ्ग इत्याशंक्य परिहरति नचेति । पञ्चषट्पदवति 'अरुणयैकहायन्ये'त्यादिवाक्ये नावान्तरवाक्यभेदप्रसङ्गो विशेषणानां भेदेपि विशेष्यक्रियादेरेकत्वात्तस्य गुणानुरोधेनावृत्तेरभावाद्गुणा एव तत्र समुच्चेया इत्येकवाक्यतेत्यर्थः । इदमेव व्यतिरेकद्वारोपपादयति प्रधानभेदे त्विति । 'आयुर्यज्ञेन कल्पतामि'त्यादौ प्रधानभेदाद्वाक्यभेद इति भावः ।

(८) रूपान्तरेति । आरोपितदेवतारूपोल्लेख इत्यर्थः ।

रूपमपि । (१)ननूद्देशो रूपज्ञानमपेक्षते न पुना रूपसत्तामपि, देवतायाः समारोपेणापि च रूपज्ञानमुपपद्यते इति समारोपितमेव रूपं देवतायाः मन्त्रार्थवादैरुच्यते । (२)सत्यम्, रूपज्ञानमपेक्षते, तच्चान्यतोऽसम्भवान्मन्त्रार्थवादेभ्य एव, तस्य तु रूपस्यासति बाधकेऽनुभवारूढं तथाभावं परित्यज्यान्यथात्वमननुभूयमानमसाम्प्रतं कल्पयितुम् । तस्याद्विध्यपेक्षितं मन्त्रार्थवादैरन्यपरैरपि देवतारूपं बुद्धावुपनिधीयमानं विधिप्रमाणकमेवेति युक्तम् । स्यादेतत्, विध्यपेक्षायामन्यपरादपि वाक्यादवगतोऽर्थः स्वीक्रियते, तदपेक्षैव तु नास्ति, शब्दरूपस्य देवताभावात्, तस्य च मानान्तरवेद्यत्वादित्यत आह—"**न च शब्दमात्र**"मिति । न केवलं मन्त्रार्थवादतो विग्रहादिसिद्धिरपि त्वितिहासपुराणलोकस्मरणेभ्यो मन्त्रार्थवादमूलेभ्यो वा प्रत्यक्षादिमूलेभ्यो वेत्याह—"**इतिहासे**"ति । श्लिष्यते—युज्यते । निगदव्याख्यातमन्यत् । (३)तदेवं मन्त्रार्थवादादिसिद्धे देवताविग्रहादौ गुर्वादिपूजावद्देवतापूजात्मको यागो देवताप्रसादाद्द्वारेण सफलोऽवकल्पते (४)अचेतनस्य तु पूजामप्रतिपद्यमानस्य तदनुपपत्तिः । (५)न चैवं यज्ञकर्मणो देवतां प्रति गुणभावाद्देवतातः फलोत्पादे यागभावनायाः श्रुतं फलवत्त्वं यागस्य च तां प्रति तत्फलांशं वा प्रति श्रुतं करणत्वं हातव्यम् । यागभावनाया एव हि फलवत्त्वं यागलक्षणस्वकरणवान्तरव्यापारत्वाद्देवताभोजनप्रसादादीनां कृषिकर्मण इव तत्तदवान्तरव्यापारस्य सस्याधिगमसाधनत्वम्, आग्नेयादीनामिवोत्पत्तिपरमापूर्वावान्तरव्यापाराणां भवन्मते स्वर्गसाधनत्वम् । तस्मात्कर्मणोऽपूर्वावान्तरव्यापारस्य वा देवताप्रसादावान्तरव्यापारस्य वा फलवत्त्वात् प्रधानत्वमुभयस्मिन्नपि पक्षे समानम्, न तु देवताया विग्रहादिमत्त्वाः प्राधान्यमिति न धर्ममीमांसायाः सूत्रम् '**अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं गुणत्वे देवताश्रुतिः**' इति विरुध्यते(६) । तस्मात्सिद्धो देवतानां प्रायेण ब्रह्मविद्यास्वधिकारः ॥ ३३ ॥

शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥ ३४ ॥

(७)अवान्तरसङ्गतिं कुर्वन्नधिकरणतात्पर्यमाह—"**यथा मनुष्याधिकारे**"ति (पृ. ३७२ पं. २) । शङ्काबीजमाह—"**तत्र**"ति । (८)निर्मृष्टनिखिलदुःखानुषङ्गे शाश्वतिक आनन्दे कस्य नाम चेतनस्यार्थिता नास्ति, येनार्थितायाः अभावाच्छूद्रो नाधिक्रियेत । ना

---

(१) मन्त्रार्थवादयोरारोपितरूपोल्लेख एवेत्यभिप्रायेणाक्षिपति नन्विति ।

(२) परिहरति सत्यमिति ।

(३) दृष्टानुसाराच्च चेतना देवतेत्याह तदेवमिति । (४) शब्दमात्रस्येत्यर्थः ।

(५) देवतातः फलोत्पत्तौ श्रुतहानिमाशंक्याह नचैवमिति । हानाभावे हेतुमाह यागेति ।

(६) विरुध्यत इति । तथाचातिथिवत् देवता धर्मप्रयोजिकेति पूर्वपक्षे अपिचेति सिद्धान्तसूत्रे मीमांसकैर्यज्ञकर्मणो प्रधानमङ्गमाहि न देवता 'यजेत स्वर्गकाम' इतियागगतफलसाधनतायाः शब्दपूर्वत्वात् देवता तूद्देश्या भूतत्वाद्धव्यस्य यागस्य गुण इति गुणत्वे देवताशब्दो वर्तत इति सिद्धान्तितं तदस्मन्मतेपि देवताया गुणत्वस्वीकारान्न विरुध्यत इति भावः ।

(७) अवान्तरेति । देवताधिकरणान्तेऽपशूद्राधिकरणवर्णनेऽवान्तरसङ्गतिमित्यर्थः । यथाग्नेवर्णिकानां विद्यास्वधिकारस्तथा शूद्राणामपि तथात्वात् स स्यादित्यवान्तरसङ्गतिरिति भावः ।

(८) पूर्वपक्षमाह निर्मृष्टेति ।

प्यस्य ब्रह्मज्ञाने सामर्थ्याभावः । द्विविधं हि सामर्थ्यं निजं चान्तुकं (१)च । तत्र द्विजातीनामिव शूद्राणां श्रवणादिसामर्थ्यं निजमप्रतिहतम् । अध्ययनाधानाभावादागन्तुकसामर्थ्याभावे सत्यनधिकार इति चेद् । हन्ताऽऽधानाभावे सत्यग्न्यभावादग्निसाध्ये कर्मणि मा भूदधिकारः, न च ब्रह्मविद्यायामग्निः साधनमिति किमित्यनाहिताग्नयो नाधिक्रियन्ते । (२)न चाध्ययनाभावात्तत्साधनायामनधिकारो ब्रह्मविद्यायामिति साम्प्रतम् । (३)यतो युक्तं 'यदाहवनीये जुहोती'त्याहवनीयस्य होमाधिकरणतया विधानात्तद्रूपस्यालौकिकतयानारभ्याधीतवाक्यविहितादाधानादन्यतोऽनधिगमादाधानस्य च द्विजातिसम्बन्धितया विधानात् तत्साध्योऽग्निरलौकिको न शूद्रस्यास्तीति नाहवनीयादिसाध्ये कर्मणि शूद्रस्याधिकार इति, न च तथा ब्रह्मविद्यायामलौकिकमस्ति साधनं यच्छूद्रस्य न स्यात् । (४)अध्ययनियम इति चेत् । न । विकल्पासहत्वात् । तदध्ययनं पुरुषार्थं वा नियम्येत, यथा धनार्जने प्रतिग्रहादि, क्रत्वर्थं वा, यथा 'व्रीहीनवहन्ती'त्यवघातः । न तावत् क्रत्वर्थं, नहि स्वाध्यायोऽध्येतव्य इति कंचित् क्रतुं प्रकृत्य पठ्यते, यथा दर्शपूर्णमासं प्रकृत्य 'व्रीहीनवहन्ती'ति । (५)न चानारभ्याधीतमप्यव्यभिचरितक्रतुसम्बन्धितया क्रतुमुपस्थापयति, येन वाक्येनैव क्रतुना सम्बध्येताध्ययनम्, नहि यथा जुह्वाद्यव्यभिचरितक्रतुसम्बद्धमेवं स्वाध्याय इति । तस्मान्नैष क्रत्वर्थे नियमो नापि पुरुषार्थे । पुरुषेच्छाधीनप्रवृत्तिर्हि पुरुषार्थो भवति, यथा फलं तदुपायो वा । तदुपायेऽपि हि विधितः प्राक् सामान्यरूपा प्रवृत्तिः पुरुषेच्छानिबन्धनैव । इतिकर्तव्यतासु तु सामान्यतो विशेषतश्च प्रवृत्तिर्विधिपराधीनैव(६) । नह्यनधिगतकरणभेद इतिकर्तव्यतासु घटते । तस्माद्विध्यधीनप्रवृत्तितयाऽज्ञानात् क्रत्वर्थता । (७)क्रतुरिति हि विधिविषयेण विधिं परामृशति विषयिणम्, तेनार्थ्यते विषयीक्रियत इति क्रत्वर्थः । न चाध्ययनं वा स्वाध्यायो वा तदर्थज्ञानं वा प्राग् विधेः पुरुषेच्छाधीनप्रवृत्तिर्येन पुरुषार्थः स्यात् । (८)यदि चाध्ययनेनैवार्थावबोधरूपं नियम्यते ततो मानान्तरविरोधः, तद्रूपस्य विनाप्यध्ययनं पुस्तकादिपाठेनाप्य-

---

(१) शास्त्रीयमित्यर्थः । (२) ननु कर्मण्यग्निवद्विद्यायामध्ययनं हेतुरित्याशङ्क्य नचेति ।

(३) समाधत्ते यत इति । कर्मण्यग्नेर्नियतत्वादध्ययनस्य च विद्यायामनियतत्वाद्वैषम्यो दृष्टान्त इति समाधानतात्पर्यम् ।

(४) अध्ययनक्रियायां लौकिकत्वेपि तन्नियम एव वैधत्वादलौकिकं साधनं ब्रह्मविद्यायां स्यादित्यभिप्रायेणाशङ्क्तेऽध्ययननियम इति ।

(५) प्रकारणादध्ययननियमस्य क्रत्वर्थत्वं निरस्य वाक्यादपि तन्निराकरोति नचेति । व्याप्ताया जुह्वा व्यापके क्रतौ बुद्धिस्थीकृते वाक्यं पर्णतां क्रतुना सम्बन्धयति, स्वाध्यायस्तु स्वशाखात्मकोऽवयवी न कर्मविशेषेण व्याप्त इत्यनुपस्थापिते कर्मणि कथं वाक्यमध्ययनस्य कर्मसम्बन्धं वददित्यर्थः ।

(६) विधिपराधीनैवेति । येन पुंसा विधितः करणविशेषो नाधिगतः स इतिकर्तव्यतासु न चेष्टते, नहि करणसामान्यमितिकर्तव्यतोपकार्यं किन्तु विहितः कथं भावाकाङ्क्षः करणविशेषः, तत्र च यदङ्गं सामान्यतो विशेषतश्च तत्र सर्वत्र विध्यधीनैव प्रवृत्तिरिति भावः ।

(७) ननु क्रतुविध्योर्भेदात्कथं विध्यधीनप्रवृत्तिकता क्रत्वर्थतेत्यत आह क्रतुरितीति । क्रतुरितिशब्दो विषयेण क्रतुना तदभिधायकं विषयिणं विधिशब्दं लक्षणया परामृशतीत्यर्थः ।

(८) अध्ययनादीनां पुमर्थता तदाश्रितादृष्टनियमश्च मा भूत् अर्थज्ञानरूपादृष्टप्रयोजनार्थमेवाध्ययनं कुतो न नियम्यत इत्याशंक्याह यदि चेति ।

धिगमात् । (१)तस्मात् 'सुवर्णं भार्यमि'तिवदध्ययनाद्धेव फलं कल्पनीयम् । तथा चाध्ययन-विधेरनियामकत्वाच्छूद्रस्याध्ययनेन वा पुस्तकादिपाठेन वा सामर्थ्यमस्तीति सोऽपि ब्रह्मविद्यायामधिकृतः । मा भूद्वाऽध्ययनाभावात्सर्वत्र ब्रह्मविद्यायामधिकारः संवर्गविद्यायां तु भविष्यति, 'अहहारे त्वा शूद्र' इति शूद्रं सम्बोध्य तस्याः प्रवृत्तेः । न चैष शूद्रशब्दः कदाचिदवयव-व्युत्पत्त्याऽशूद्रे वर्णनीयः, अवयवप्रसिद्धितः समुदायप्रसिद्धेरनपेक्षतया बलीयस्त्वात् । तस्माद्यथाऽनधीयानस्येष्टौ निषादस्थपतेरधिकारो वचनसामर्थ्यादेवं संवर्गविद्यायां शूद्रस्याधिकारो भविष्यतीति प्राप्तम् ।

एवं प्राप्ते ब्रूमः । न शूद्रस्याधिकारो वेदाध्ययनाभावादिति । अयमभिसंन्धिः—यद्यपि 'स्वाध्यायोऽध्येतव्य' इत्यध्ययनविधिर्न किञ्चित्फलवत्कर्मारभ्याम्नातो, नाप्यव्यभिचरितक्रतु-सम्बन्धपदार्थगतः, नहि जुह्वादिवत्स्वाध्यायोऽव्यभिचरितक्रतुसम्बन्ध(२)स्तथापि स्वाध्यायस्याध्ययनसंस्कारविधिरध्ययनस्यापेक्षितोपायतामवगमयन् किं पिण्डपितृयज्ञवत्स्वर्गं वा सुवर्णं भार्यमिति वदार्थवादिकं वा फलं कल्पयित्वा (३)विनियोगभङ्गेन स्वाध्यायेनाधीयीतेत्येवमर्थः कल्पतां, किं वा (४)परम्परयाऽप्यन्यतोऽपेक्षितमधिगम्य निर्वृणोतिवेति विशये, न दृष्टद्वारेण परम्परयाऽप्यन्यतोऽपेक्षितप्रतिलम्भे च यथाश्रुतिविनियोगोपपत्तौ च सम्भवन्त्यां श्रुतविनियोगभङ्गेनाध्ययनादेवाश्रुतादृष्टफलकल्पनोचिता । (५)दृष्टश्च स्वाध्यायस्याध्ययन-संस्कारस्तेन हि पुरुषेण सम्प्राप्यते, प्राप्तश्च फलवत्कर्मब्रह्मावबोधमभ्युदयनिःश्रेयसप्रयोजन-मुपजनयति, न तु सुवर्णधारणादौ दृष्टद्वारेण परम्परयाप्यस्त्यपेक्षितं पुरुषस्य, तस्माद्विपरिवृत्त्य(६) साक्षाद्धारणादेव विनियोगभङ्गेन फलं कल्पते । (७)यदा चाध्ययनसंस्कृतेन स्वाध्यायेन फलवत्कर्मब्रह्मावबोधो भाव्यमानोऽभ्युदयनिःश्रेयसप्रयोजन इति स्थापितं, तदा यस्याध्ययनं तस्यैव कर्मब्रह्मावबोधोऽभ्युदयनिःश्रेयसप्रयोजनो नान्यस्य, यस्य चोपनयनसंस्कारस्तस्यैवाध्ययनं, स च द्विजातीनामेवेत्युपनयनाभावेनाध्ययनसंस्काराभावात् पुस्तकादिपठित-स्वाध्यायजन्योऽर्थावबोधः शूद्राणां न फलाय कल्पत इति शास्त्रीयसामर्थ्याभावान्न शूद्रो ब्रह्मविद्यायामधिकृत इति सिद्धम् । "यज्ञेऽनवक्लृप्त" इति (पृ. ३७२ पं. ६) यज्ञ-ग्रहणमुपलक्षणार्थम् , विद्यायामनवक्लृप्त इत्यपि द्रष्टव्यम् , सिद्धवदभिधानस्य न्यायपूर्वक-त्वान्न्यायस्य चोभयत्र (८)साम्यात् । द्वितीयं पूर्वपक्षमनुभाषते—"यत्पुनः संवर्गावे-

---

(१) परिशेषादध्ययनमपूर्वविधिरित्याह तस्मादिति ।

(२) वाक्यप्रकरणयोरभावेऽपि कल्पनालाघवेन सामर्थ्यरूपलिङ्गेन चानुगृहीतस्तव्यप्रत्ययः कर्मभाव्यमवगमयन्नध्ययनस्य संस्कारकर्मत्वमापादयतीत्याह तथापीति ।

(३) विनियोगः पदान्वयः ।

(४) परम्परयेति । अक्षरप्राप्तिपदार्थोत्पत्तिविचारपरम्परयेत्यर्थ. । अन्यतः—अनुष्ठानतः, अपेक्षितमर्थबोधमित्यर्थः

(५) अर्थबोधेऽध्ययनस्य सामर्थ्यं प्रदर्शयन्नाह दृष्टश्चेति । संस्कारोऽवाप्तिः, सैव प्रदर्श्यते तेन हीति ।

(६) श्रुतविनियोगाद्व्यावृत्त्य ।

(७) लिखितपठितवेदादर्थबोध इति पूर्वपक्षयुक्तं दूषयन्नाह यदा चेति ।

(८) 'तस्माच्छूद्र' इति एतच्छब्दपरामृष्टन्यायस्य यज्ञविषयोऽस्तुल्यत्वादित्यर्थ. ।

द्याया"मिति । दूषयति—"न तल्लिङ्गम्" । कुतः ? "न्यायाभावात्" । न तावच्छूद्रः संवर्गविद्यायां साक्षाच्छ्रोयते यथैतया निषादस्थपतिं याजयेदिति निषादस्थपतिः, किं त्वर्थवादगतोऽयं शूद्रशब्दः स चान्यतः सिद्धमर्थमवद्योतयति न तु प्रापयतीत्यध्वरमीमांसकाः । (१)अस्माकं त्वन्यपरादपि वाक्यादसति बाधके प्रमाणान्तरेणार्थोऽवगम्यमानो विधिना चापेक्षितः स्वीक्रियत एव । न्यायश्चास्मिन्नर्थे उक्तो बाधकः । न च विध्यपेक्षाऽस्ति, द्विजात्यधिकारप्रतिलम्भेन विधेः पर्यवसानात् । विध्युद्देशगतत्वे त्वयं न्यायोऽपोद्यते वचनबलान्निषादस्थपतिवन्न त्वेष विध्युद्देशगत इत्युक्तम् । तस्मान्नार्थवादमात्राच्छूद्राधिकारासिद्धिरिति भावः । अपि च किमर्थवादबलाद्विद्यामात्रेऽधिकारः शूद्रस्य कल्प्यतां संवर्गविद्यायां वा ? न तावद्विद्यामात्र इत्याह—"कामं चायमि"ति । नहि संवर्गविद्यायामर्थवादः श्रुतो विद्यामात्रेऽधिकारिणमुपनयत्यतिप्रसङ्गात् । अस्तु तर्हि संवर्गविद्यायामेव शूद्रस्याधिकार इत्यत आह—"अर्थवादस्थत्वादि"ति(२) । तत्किमेतच्छूद्रपदं प्रमत्तगीतं ? न चैतद्युक्तं, तुल्यं हि साम्प्रदायिकमित्यत आह—"शक्यते चायं शूद्रशब्द"इति । (३)एवं किलाख्यायते—"जानश्रुतिः पौत्रायणो (४)बहुदायी श्रद्धादेयो बहुपाक्यः प्रियातिथिर्बभूव । स च तेषुतेषु ग्रामनगरश्रृङ्गाटकेषु(५) विविधानामन्नपानानां पूर्णानतिथिभ्य आवसथान्कारयामास—'सर्वत एवैतेष्वावसथेषु ममान्नपानमर्थिन उपयोक्ष्यन्त' इति । अथास्य राज्ञो दानशौण्डस्य(६) गुणगरिमसन्तोषिताः सन्तो देवर्षयो हंसरूपमास्थाय तदनुग्रहाय तस्य निदाघसमये दोषा(७) हर्म्यतलस्थस्योपरि मालामाबध्याजग्मुस्तेषामग्रेसर हंसं सम्बोध्य पृष्ठतो व्रजन्नेकतमो हंसः सादृभुतमभ्युवाच—"भल्लाक्ष भल्लाक्ष(८) ! जानश्रुतेरस्य पौत्रायणस्य द्युनिशं द्युलोक आयतं ज्योतिस्तन्मा (९)प्रसाङ्क्षीर्मैतत्त्वा धाक्षीदि"ति । तमेवमुक्तवन्तमग्रगामी हंसः प्रत्युवाच—"कं वरमेनमेतत्सन्तं सयुग्वानमिव रैक्कमात्थ" । अयमर्थः—वर इति सोपहासमवरमाह । अथ वा वरो वराकोऽयं जानश्रुतिः । कमित्याक्षेपे, यस्मादयं वराकस्तस्मात्कमेनं किंभूतमेत(१०)त्सन्तं प्राणिमात्रं रैक्कमिव सयुग्वानमात्थ । (११)युग्वा गन्त्री शकटी, तया सह वर्तत इति सयुग्वा रैक्कस्तमिव कमेनं प्राणिमात्रं जानश्रुतिमात्थ । रैक्कस्य हि ज्योतिरसह्यं न त्वेतस्य प्राणिमात्रस्य । तस्य हि भगवतः पुण्यज्ञानसम्पन्नस्य

---

(१) अतत्परः शब्दो नाज्ञातार्थबोधीतिमते मा भूल्लिङ्गादधिकारासिद्धिः शूद्रस्य, सिद्धान्तमत तु किं न स्यादत आहास्माकं त्विति ।

(२) विधिवाक्यस्थत्वान्निषादशब्दस्याधिकारिसमर्पकत्वेपि शूद्रशब्दस्य विद्याविधिपरार्थवादस्थत्वान्नाधिकारिबोधकत्वमसामर्थ्यन्यायविरोधेनान्यपरशब्दस्य स्वार्थबोधकत्वासम्भवादिति उत्तरभाष्यभाव. ।

(३) शूद्रशब्दस्यावयववृत्तिप्रदर्शनार्थमाख्यायिका [illegible] एवं किलेति ।

(४) पुत्रसंज्ञस्यापत्यं पौत्र. तस्यापत्यं पौत्रायण इत्यर्थः । श्रद्धया देयं यस्य स तथा । पाक्यमन्नं बहुविधं यस्य गृहे स तथा ।

(५) चतुष्पथेषु । (६) शूरस्य । (७) रात्रौ, अव्ययपदमिदम् ।

(८) विरुद्धलक्षणयाऽन्धेत्युपालम्भार्थं सम्बोधनम् ।

(९) स्वर्गगमने प्रसक्तिं माकुर्वित्यर्थः । (१०) एतद्वचनमात्थेति सम्बन्धः ।

(११) युग्वेति । युजिधातोः कर्तरि 'अन्येभ्योपि दृश्यन्त' इति सूत्रेण क्वनिपि कृते युग्वेति सिध्यति, स्वारूढं पुरुषं देशान्तरेण युनक्तीत्यर्थः ।

रैक्वस्य ब्रह्मविदो धर्मे त्रैलोक्योदरवर्तिप्राणभृन्मात्रधर्मोऽन्तर्भवति न पुना रैक्धर्मकक्षां कस्यचिद्धर्मोऽवगाहत इति । अथैष हंसवचनादात्मनोऽत्यन्तनिकर्षमुत्कर्षकाष्ठां च रैक्स्योपश्रुत्य विषण्णमानसो जानश्रुतिः कितव इवाक्षपराजितः पौनःपुन्येन निःश्वसन्नुद्वेलं(१) कथमपि निशीथमतिवाहयांबभूव । ततो निशान्तपिशुनमनिभृतवन्दारुवृन्दप्रारब्धस्तुतिसहस्रसंदलितं(२) मङ्गलतूर्यनिर्घोषमाकर्ण्य तल्पतलस्थ एव राजकपदे(३) यन्तारमाहूयादिदेश—"रैक्काह्वयं ब्रह्मविदमेकरतिं सयुग्वानमतिविविक्तेषु तेषुतेषु विपिननगनिकुञ्जनदीपुलिनादिप्रदेशेष्वन्विष्य प्रयत्नतोऽस्मभ्यमाचक्ष्वे"ति । स च तत्रान्विष्यन् क्वचिदतिविविक्ते देशे शकटस्याधस्तात् पामानं कण्डूयमानं ब्राह्मणायन(४)मद्राक्षीत् । दृष्ट्वा च रैक्कोयं भवितेति प्रतिभावानुपविश्य सविनयमप्राक्षीत्—"त्वमसि हे भगवन् ! सयुग्वा रैक्" इति । तस्य च रैक्भावानुमतिं च तैस्तैरिङ्गितैर्गाहस्थ्येच्छां धनायां(५) चोन्नीय यन्ता राज्ञे निवेदयामास । राजा तु तं निशाम्य गवां षट्शतानि निष्कं च हारं चाश्वतरीरथं चादाय सत्वरं रैक्कं प्रतिचक्रमे । गत्वा चाभ्युवाद "हे रैक्क ! गवां षट्शतानीमानि निष्कश्च हारश्चायमश्वतरीरथ(६) एतदादत्स्व, अनुशाधि मां भगवन्नि"ति । अथैवमुक्तवन्तं प्रति साटोपं च सस्पृहं चोवाच रैक्कः—"अह हारेत्वा शूद्र तवैव सह गोभिरस्त्वि"ति । अहेति निपातः साटोपमामन्त्रणे । हारेण युक्ता इत्वा गन्त्री रथो हारेत्वा गोभिः सह तवैवास्तु किमेतन्मात्रेण मम धनेनाकल्पवर्तिनो गार्हस्थ्यस्य निर्वाहानुपयोगिनेति भावः । 'आहर त्वे'ति तु पाठो ऽनर्थकतया च गोभिः सहेत्यत्र प्रतिसम्बन्ध्यनुपादनेन चाचार्यैर्दूषितः । तदस्यामाख्यायिकायां शक्यः शूद्रशब्देन जानश्रुती राजन्योऽप्यवयवव्युत्पत्त्या वक्तुं, स हि रैक्कः परोक्षज्ञतां चिख्यापयिषुरात्मनो जानश्रुतेः शूद्रेति शुचं सूचयामास । **"कथं पुनः शूद्रशब्देन शुगुत्पन्ना सूच्यत इति ? उच्यते, "तदाद्रवणात्"** । तदुपाचष्टे—**"शुचमभिदुद्राव"** जानश्रुतिः । शुचं प्राप्तवानित्यर्थः । **'शुचा वा'**जानश्रुतिः **"द्रुद्रुवे"**शुचा प्राप्त इत्यर्थः । अथवा **शुचा रैक्कं** जानश्रुतिर्**दुद्राव,** गतवान्, तस्मात्तदाद्रवणादिति तच्छब्देन शुग्वा जानश्रुतिर्वा रैक्को वा परामृश्यत इत्युक्तम् ॥ ३४ ॥

सू० (७)क्षत्त्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥

"इतश्च न जातिशूद्रो जानश्रुतिः । यत्कारणं" (पृ० ३७४ पं० ८) प्रकरणनिरूपणे क्रियमाणे क्षत्त्रियत्वमस्य जानश्रुतेरवगम्यते । चैत्ररथेन लिङ्गादिति व्याचक्षाणः प्रकरणं निरूपयति—**"उत्तरत्र संवर्गविद्या वाक्यशेषे"** चैत्ररथेनाभिप्रतारिणा निश्चितक्षत्त्रियत्वेन समानायां संवर्गविद्यायां समभिव्याहाराल्लिङ्गात् संदिग्धक्षत्त्रियभावो जानश्रुतिः क्षत्त्रियो निश्चीयते । **"अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं सु-**

---

(१) चिन्ताविष्टत्वादपारम् । (२) स्तावकसमूहकृतस्तुतिस्तुतमित्यर्थः ।
(३) झटिति । (४) विप्रवेषधारिणम् ।
(५) धनेच्छाम् । (६) अश्वतरीयुक्तो रथः ।
(७) एवन्तावन्न्यायबलेन शूद्रशब्दलिङ्गमन्यथोपपादितम्, अधुना शूद्राधिकारवारकबहुलिङ्गविरोधादपि तथेत्याह क्षत्त्रियत्वगतेश्चेत्यारभ्याधिकरणसमाप्तिपर्यन्तम् ।

देन परिविष्यमाणौ ब्रह्मचारी विभिक्ष इति" प्रसिद्धयाजकत्वेन कापेयेनाभिप्रतारिणो योगः प्रतीयते । ब्रह्मचारिभिक्षया चास्याशूद्रत्वमवगम्यते । नहि जातु ब्रह्मचारी शूद्रान्नं भिक्षते । याजकेन च कापेयेन योगाच्चाज्योऽभिप्रतारी, क्षत्रियत्वं चास्य चैत्ररथित्वात्, 'तस्माच्चैत्ररथिनामैकः क्षत्रपतिरजायते'ति वचनात् । (१)चैत्ररथित्वं चास्य कापेयेन याजकेन योगात् । **"एतेन वै चित्ररथं कापेया अयाजयन्निति"** छन्दोगानां द्विरात्रे श्रूयते । तेन चित्ररथस्य याजकाः कापेयाः । (२)एष चाभिप्रतारी चित्ररथादन्यः सन्नेव कापेयानां याज्यो भवति यदि चैत्ररथिः स्यात्, समानान्वयानां हि प्रायेण समानान्वया याजका भवन्ति । तस्माच्चैत्ररथित्वादभिप्रतारी काक्षसेनिः क्षत्रियः । तत्समभिव्याहाराच्च जानश्रुतिः क्षत्रियः सम्भाव्यते । (३)इतश्च क्षत्रियो जानश्रुतिरित्याह **"क्षत्तृप्रेषणाद्यैश्वर्ययोगाच्च"** । (पृ० ३३५ पं० ७) क्षत्तृप्रेषणे चार्थसम्भवे(४)च तादृशस्यान्यवदान्यप्रष्ठस्यैश्वर्यं प्रायेण क्षत्रियस्य दृष्टं युधिष्ठिरादिवदिति ॥ ३५ ॥

सू० संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ ३६ ॥

(५)न केवलमुपनीताध्ययनविधिपरामर्शेन न शूद्रस्याधिकारः, किन्तु तेषु तेषु विद्योपदेशप्रदेशेषूपनयनसंस्कारपरामर्शात् शूद्रस्य तदभावाभिधानाद्ब्रह्मविद्यायामनधिकार इति । नन्वनुपनीतस्यापि ब्रह्मोपदेशः श्रूयते 'तान्हानुपनीयैवे'ति, तथा शूद्रस्यानुपनीतस्यैवाधिकारो भविष्यतीत्यत आह—**"तान् हानुपनीयैवेत्यपि प्रदर्शितैवोपनयनप्राप्तिः"** । (पृ० ३७६ पं० १) प्राप्तिपूर्वकत्वात्प्रतिषेधस्य येषामुपनयनं प्राप्तं(६) तेषामेव तन्निषिध्यते । तच्च द्विजातीनामिति द्विजातय एव निषिद्धोपनयना अधिक्रियन्ते न शूद्र इति ॥३६॥

सू० तदभावनिर्धारणे च प्रवृत्तेः ॥ ३७ ॥

"सत्यकामो ह वै जाबालः प्रमीतपितृकः स्वां मातरं जबालामपृच्छत्—'अहमाचार्यकुले ब्रह्मचर्यं चरिष्यामि, तद्ब्रवीतु भवती किंगोत्रोऽहमि"ति । साऽब्रवीत्—'त्वज्जनकपरिचरणपरतया नाहमज्ञासिषं यद्गोत्रं तवे'ति । स त्वाचार्यं गौतममुपससाद । उपसद्योवाच 'हे भगवन् ! ब्रह्मचर्यमुपेयां त्वयी'ति । स होवाच—'नाविज्ञातगोत्र उपनीयत इति किंगोत्रोऽसी'ति । अथोवाच सत्यकामो—नाहं वेद स्वं गोत्रं, स्वां मातरं जबालामपृच्छं, सापि न वेदे'ति । तदुपश्रुत्याभ्यधाद्गौतमः—'नाद्विजन्मन आर्जवयुक्तमीदृशं वचस्तेना-

---

(१) नन्वस्य चैत्ररथित्वं न श्रुतमित्यत आह चैत्ररथित्वं चेति ।

(२) ननु कापेययाज्योऽभिप्रतारी चित्ररथ एव किं न स्यादत आह एष चेति । नामभेदादन्यत्वे सति तद्वंश्यत्वाच्चयाजके न याज्यत्वमित्यर्थः ।

(३) एवं वाक्यारम्भे सन्देहं स्वीकृत्य वाक्यशेषान्निर्णयं विधायेदानीं तु सन्देह एवायुक्तः शूद्रशब्दपरामर्शात्प्रागेव 'सह क्षत्तारमुवाचे'त्यमात्यप्रेषणादिना क्षत्रियत्वनिश्चयादित्याह इतश्चेति ।

(४) बहुदायी बहुपाक्य इति अर्थसम्भवोपि क्षत्रियस्यैव दृष्ट इति भावः ।

(५) आद्यसूत्र एवाध्ययनाधिकारस्य सूचितत्वात् पुनरुक्तिमाशंक्याह न केवलमिति ।

(६) प्राप्तमिति । 'ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे' (छां० ५।११।७) इति पूर्ववाक्ये ब्राह्मणा उपनयनार्थमागता इति प्राप्तमुपनयनं निषिध्यत इत्यर्थः ।

स्मिन्न शूद्रत्वसम्भावनास्तीति त्वां द्विजातिजन्मानमुपनेष्य' इत्युपनेतुमनुशासितुं च जाबालं गौतमः प्रवृत्तः । तेनापि शूद्रस्य नाधिकार इति विज्ञायते । "न सत्यादगा" इति । न सत्यमतिक्रान्तवानसीति ॥ ३७ ॥

सू० (१)श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ॥ ३८ ॥

निगदव्याख्यातेन भाष्येण व्याख्यातम् । अतिरोहितार्थमन्यत् ॥ ३८ ॥

सू० कम्पनात् ॥ ३९ ॥

(२)प्राणवज्रश्रुतिबलाद्वाक्यं प्रकरणं भङ्क्त्वा वायुः पञ्चवृत्तिराध्यात्मिको बाह्यश्चात्र प्रतिपाद्यः । तथाहि—प्राणशब्दो मुख्यो वायावाध्यात्मिके, वज्रशब्दश्चाशनौ । अशनिश्च वायुपरिणामः । वायुरेव हि बाह्यो धूमज्योतिःसलिलसम्वलितः पर्जन्यभावेन परिणतो विद्युत्स्तनयित्नुवृष्ट्यशनिभावेन विवर्तते । यद्यपि च सर्वं जगदिति सवायुकं प्रतीयते, तथापि सर्वशब्द आपेक्षिकोऽपि न स्वाभिधेयं जहाति किन्तु सङ्कुचितवृत्तिर्भवति । प्राणवज्रशब्दौ तु ब्रह्मविषयत्वे स्वार्थमेव त्यजतः । तस्मात्स्वार्थत्यागाद्वरं वृत्तिसङ्कोचः स्वार्थलेशावस्थानात् । अमृतशब्दोऽपि मरणाभाववचनो न सार्वकालिकम् तदभावं ब्रूत, ज्योतिर्जीवितयापि तदुपपत्तेः, यथा अमृता देवा इति । तस्मात्प्राणवज्रश्रुत्यनुरोधाद्वायुरेवात्र विवक्षितो न ब्रह्मेति प्राप्तम् ।

एव प्राप्ते उच्यते—**'कम्पनात्'** सवायुकस्य जगतः कम्पनात्, परमात्मैव शब्दात् प्रमित इति (३)मण्डुकप्लुत्याऽनुषज्यते । ब्रह्मणो हि बिभ्यदेतज्जगत् कृत्स्नं स्वव्यापारे नियमेन प्रवर्तते न तु मर्यादामातिवर्तते । (४)एतदुक्तं भवति—न श्रुतिसङ्कोचमात्रं श्रुत्यर्थपरित्यागे हेतुरपि तु पूर्वापरवाक्यैकवाक्यताप्रकरणाभ्यां सम्वलितः श्रुतिसङ्कोचः । तदिदमुक्तं **"पूर्वापरयोर्ग्रन्थभागयोर्ब्रह्मैव निर्दिश्यमानमुपलभामहे, इहैव कथमन्तराले वायुं निर्दिश्यमानं प्रतिपद्येमहि"**ति (पृ० ३७८ प० १२) । तदनेन वाक्यैकवाक्यता दर्शिता । प्रकरणादपीति भाष्येण प्रकरणमुक्तम् । (५)यत् खलु पृष्टं तदेव

---

(१) स्मृत्या श्रवणादिनिषेधाच्च नाधिकार इत्याह श्रवणेति । प्रतिषेधात्—वेदं शृण्वतः पठतो वा शूद्रस्य सीसलाक्षाभ्यां तताभ्यां श्रोत्रद्वयपूरणात्मकेन प्रायश्चित्तेन तस्याध्ययननिषेधस्मरणात् इति सूत्रार्थः ।

(२) ननु तदेव शुक्रं तद्ब्रह्मेति च, भयादग्निस्तपतीति च प्राचीनपराचीनवचनसन्दृब्धतयास्य तदेकवाक्यत्वादन्यत्र धर्मादिति ब्रह्मप्रकरणाच्च ब्रह्मपरत्वागतेः कथं पूर्वपक्षोत्थापनमत आह प्राणवज्रेति । वायुपरिग्रहे वज्रशब्दः श्रुतिवृत्तः स्यादिति श्रुतिः । प्राणश्रुतिबलाद्वायुराध्यात्मिको शारीरः, वज्रश्रुतिबलाद्वज्रश्च वायुरूप प्रतिपाद्यः, नहि प्राणमात्रस्य वज्रोपमनहेतुता, उभयोश्च चिन्तनमेकं संवर्गविद्यावदिति न वाक्यभेद इति भावः । '

(३) मण्डूकेति । यथा मण्डूको बहून् विहाय स्वपङ्क्तिगतमण्डूकं प्रति प्लवते एवं शब्दादिति व्यवहितापि प्रतिज्ञा हेतुनाऽनुषज्यत इत्यर्थः ।

(४) ननु प्राणवज्रश्रुत्योः स्वार्थत्यागभयात्सर्वशब्दसङ्कोच उक्तः, तत्कथं सवायुकजगत्प्रतीतिरित आह एतदुक्तमिति ।

(५) अङ्गाकाङ्क्षस्य प्रधानस्य वचनं प्रकरणमिति प्रकरणलक्षणं प्रस्तुते वर्तयन्नाह यत्खल्विति । पृष्टं जिज्ञास्यं वात्प्रधानं तस्य नियन्तृत्वादीनि प्रतिपत्तावङ्गानि प्रतिवचनेन निरूप्यन्त इति प्रकरणसिद्धेरित्यर्थः ।

प्रधानं प्रतिवक्तव्यमिति तस्य प्रकरणम् । पृष्टादन्यस्मिंस्तूच्यमाने शास्त्रमप्रमाणं भवेदसम्बद्धप्रलापित्वात् । यत्तु वायुविज्ञानात् क्वचिदमृतत्वमभिहितमापेक्षिकं तदिति । 'अपपुनर्मृत्युं जयती'ति श्रुत्या ह्यपमृत्योर्विजय उक्तो न तु परममृत्युविजय इत्यापेक्षिकत्वं तच्च तत्रैव प्रकरणान्तरकरणेन हेतुना । न केवलमपश्रुत्या तदापेक्षिकमपि तु परमात्मानमभिधायातोन्यदार्तमिति वाय्वादेरार्तत्वाभिधानात् । न ह्यार्ताभ्यासादनार्तो भवतीति भावः ॥ ३९ ॥

सू० ज्योतिर्दर्शनात् ॥ ४० ॥

(१) अत्र हि ज्योतिःशब्दस्य तेजसि मुख्यत्वाद्ब्रह्मणि जघन्यत्वात् प्रकरणाच्च श्रुतेर्बलीयस्त्वात् पूर्ववच्छ्रुतिसंकोचस्य चात्राभावात्, प्रत्युत ब्रह्मज्योतिःपक्षे कृत्वाश्रुतेः पूर्वकालार्थायाः पीडनप्रसङ्गात्, समुत्थानश्रुतेश्च तेज एव ज्योतिः, (२)तथाहि—समुत्थानमुद्गमनमुच्यते, न तु विवेकविज्ञानम् । उद्गमनं च तेजःपक्षेऽर्चिरादिमार्गेणोपपद्यते । आदित्यश्चार्चिराद्यपेक्षया परं ज्योतिर्भवतीति । 'तदुपसम्पद्य' तस्य समीपे भूत्वा स्वेन रूपेणाभिनिष्पद्यते, कार्यब्रह्मलोकप्राप्तौ क्रमेण मुच्यते । ब्रह्मज्योतिःपक्षे तु ब्रह्म भूत्वा का परा स्वरूपनिष्पत्तिः । (३)न च देहादिविविक्तब्रह्मस्वरूपसाक्षात्कारो वृत्तिरूपोऽभिनिष्पत्तिः, सा हि ब्रह्म भूयात् प्राचीना न तु पराचीना सेयमुपसम्पद्यति कृत्वाश्रुतेः पीडा । तस्मात्तिसृभिः श्रुताभिः प्रकरणबाधनात्तज एवात्र ज्योतिरिति प्राप्तम् ।

एवं प्राप्ते ऽभिधीयते—**परमेव ब्रह्म ज्योतिःशब्दम्** । कस्मात् ? **दर्शनात्** । **"तस्य हीह प्रकरणेऽनुवृत्तिर्दृश्यते"** (पृ० ३८१ पं० २) । यत् खलु प्रतिज्ञायते यच्च मध्ये परामृश्यते यच्चोपसंह्रियते स एव प्रधानं प्रकरणार्थः । तदन्तःपातिनस्तु सर्वे तदनुगुणतया नेतव्याः, न तु श्रुत्यनुरोधमात्रेण प्रकरणादाकृष्टव्या इति हि लोकस्थितिः । अन्यथोपांशुयाजवाक्ये जामितादोषोपक्रमे तत्प्रतिसमाधानोपसंहारे च तदन्तःपातिनो 'विष्णुरुपांशु यष्टव्य' इत्यादयो विधिश्रुत्यनुरोधेन पृथग् विधयः प्रसज्येरन् । (४)तत्किमिदानीं त्रिसृभिः साह्नस्योपसदः (कार्या) द्वादशाहीनस्येति (५)प्रकरणानुरोधात् समुदायप्रसिद्धिबललब्धमहर्गणाभिधानं परित्यज्याहीनशब्दः कथमप्यवयव्युत्पत्त्या साह्नं ज्योतिष्टोममभिधाय तत्रैव द्वादशोपसत्तां विधत्ताम् । स हि कृत्स्नविधानान्न कुतश्चिदपि ह्रीयते क्रतोरित्यहीनः

---

(१) ननु ज्योतिषा ज्योतिरिति ब्रह्मापि ज्योतिःशब्दवाच्यमिति कथमादित्य इति पूर्वपक्षस्तत्राह अत्र हीति ।

(२) ननु समुत्थानं विवेक इति दहराधिकरणे व्याख्यातमत आह तथाहीति । अप्रसिद्धेर्न विवेकविज्ञानमित्यर्थः ।

(३) नन्वभिनिष्पत्तिर्ब्रह्मसाक्षात्कारः स्यादित्यत आह नचेति । साक्षात्काररूपाभिनिष्पत्तिर्ज्योतिरुपसम्पत्तेः प्राक्तेः पूर्वा सती परत्वेन वक्तुमशक्येत्यर्थः ।

(४) प्रकरणमनुरुध्य श्रुतिमङ्गीकृताधिकरणविरोधं शङ्कते तदिति ।

(५) प्रस्तुतेऽतिप्रसङ्गपदर्शनायाद्यत्वं पूर्वपक्षमाह प्रकरणेति । अत्रोपसद इष्टयस्तत्सित्वं ज्योतिष्टोमस्यैव, द्वादशत्वं तु साह्नस्योताहीनस्येति विचारः । साह्न एकाहत्वाज्ज्योतिष्टोमोऽहीनोऽहर्गणसाध्यत्वाद्द्वादशाहादिः । अहीनश्रुतिरहर्गणे रूढा, पाणिनिस्तु स्वरार्थं प्रत्ययमनुशशास, अतः सा ज्योतिःश्रुतिरेव ब्रह्मप्रकरणरुद्धा साह्नमभिदध्यात् तत्रैव च द्वादशोपसत्तां विदध्यात् तत्किम् विधत्ताम्, अयुक्तं हि विधातुमुत्कर्षस्य सिद्धान्ततत्वात् इत्यर्थः ।

शक्यो वक्तुम् । मैवम् । (१)अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीति श्रुत्या प्रकरणबाधनान्न द्वादशोपसत्तामहीनगुणयुक्ते ज्योतिष्टोमे शकनोति विधातुम् । नाप्यतोपकृष्टः सन्नहर्गणस्य विधत्ते, परप्रकरणेऽन्यधर्मविधेरन्याय्यत्वात् । असंबद्धपदव्यवायविच्छिन्नस्य प्रकरणस्य पुनरनुसन्धानक्लेशात् । तेनानपकृष्टेनैव द्वादशाहीनस्येति वाक्येन साङ्गस्य तिस्र उपसदः कार्या इति विधिं स्तोतुं द्वादशाहविहिता द्वादशोपसत्ता तत्प्रकृतित्वेन च सर्वाहीनेषु प्राप्ता निर्वीतादिवदनूद्यते(२) । तस्मादहीनश्रुत्या प्रकरणबाधेऽपि न द्वादशाहीनस्येति वाक्यस्य प्रकरणापकर्षो ज्योतिष्टोमप्रकरणाम्नातस्य । (३)पूषाद्यनुमन्त्रणमन्त्रस्य यल्लिङ्गबलात्प्रकरणबाधेनापकर्षस्तदगत्या, पौष्णादौ च कर्मणि तस्यार्थवत्त्वादिह त्वपकृष्टस्यार्चिरादिमार्गोपदेशे फलस्योपायमार्गप्रतिपादकेऽतिविशदे 'एष सम्प्रसाद'(४) इति वाक्यस्याविशदैकदेशमात्रप्रतिपादकस्य निष्प्रयोजनत्वात् । न च द्वादशाहीनस्येतिवद्यथोक्तात्मध्यानसाधनानुष्ठानं स्तोतुं 'एष सम्प्रसाद'इति वचनमर्चिरादिमार्गमनुवदतीति युक्तम् । स्तुतिलक्षणायां स्वाभिधेयसंसर्गतात्पर्यपरित्यागप्रसङ्गात्, द्वादशाहीनस्येति तु वाक्ये स्वार्थसंसर्गतात्पर्ये प्रकरणविच्छेदस्य प्राप्तानुवादमात्रस्य चाप्रयोजनत्वमिति स्तुत्यर्थो लक्ष्यते । न चैतद्दोषभयात्समुदायप्रसिद्धिमुल्लङ्घ्यावयवप्रसिद्धिमुपाश्रित्य साङ्गस्येव द्वादशोपसत्तां विधातुमर्हति, त्रित्वाद्वादशत्वयोर्विकल्पप्रसङ्गात् । न च सत्यां गतौ विकल्पो न्याय्यः, साङ्गाहीनपदयोश्च प्रकृतज्योतिष्टोमाभिधायिनोरानर्थक्यप्रसङ्गात्, प्रकरणादेव तदवगतेः, (५)इह तु स्वार्थसंसर्गतात्पर्ये नोक्तदोषप्रसङ्ग इति पौर्वापर्यपर्यालोचनया प्रकरणानुरोधाद्रूढिमपि पूर्वकालतामपि परित्यज्य प्रकरणानुगुण्येन ज्योतिः परं ब्रह्म प्रतीयते । (६) यत्तूक्तं मुमुक्षोरादित्यप्राप्तिरभिहितेति । नासावात्यन्तिको मोक्षः, किन्तु कार्यब्रह्मलोकप्राप्तिः । (७)न च क्रममुक्त्यभिप्रायं स्वेन रूपेणाभिनिष्पद्यत इति वचनम्, नह्येतत्प्रकरणोक्तं ब्रह्मतत्त्वं विदुषो गत्युत्क्रान्ती स्तः । तथा च श्रुतिः—'न तस्मात्प्राणा उत्क्रामन्ति अत्रैव समवनीयन्त' इति । (८)न च तद्द्वारेण क्रममुक्तिः । अर्चिरादि-

---

(१) परमसिद्धान्तेन परिजिहीर्षुरेकदेशमनुजानाति अवयवेति ।

(२) निर्वीतादिवदिति । 'निर्वीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामि'ति दर्शपूर्णमासप्रकरणे आम्नातम् । तत्रोपवीतं विधीयते इतरयोस्तु विधिरर्थवादो वेति संशये द्वयोरुपवीतवद्विधिः इति पूर्वपक्षे, मनुष्याणां क्रियासु लौकिकेन निर्वीतस्य पितृयज्ञे वचनान्तरेण प्राचीनावीतस्य च प्राप्तत्वाच्चार्थवाद एवोपवीतं स्तोतुं यथा तद्वदित्यर्थः ।

(३) पूषादिमन्त्राणां दर्शपूर्णमासप्रकरणोक्तानामगत्याऽपकर्षस्वीकार इत्याह पूषादीति ।

(४) एष सम्प्रसाद इति का० सु० पु० पाठः ।

(५) अस्तु तर्हि ज्योतिर्वाक्येष्वपि श्रुतिवशादादित्यवादिनो निर्गुणानुपयोगादर्चिरादिमार्गे उपयोगोत्कर्षस्तमाह इह त्विति ।

(६) ननु 'स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छती'तिप्रस्तावात् आदित्यस्येत्यप्यस्ति प्रकरणमित्युक्तमनुवदति यत्त्विति । परिहरति नेति । दहरविद्याफलं ब्रह्मलोकावाप्तिरादित्यद्वारोक्ता, इदं तु 'य आत्माऽपहतपाप्मे'त्यादिकं निर्गुणप्रकरणमित्यर्थः ।

(७) नन्वात्यन्तिकमोक्षोऽपि ब्रह्मलोकद्वारा प्राप्य इति तत्र वक्तव्यम्—किं मोक्षस्य गतिपूर्वकानाप्यत्वं स्वीकृत्यैतद्वाक्यं क्रममुक्तिपरमुत नियमेन गतिपूर्वप्राप्यत्वमभिमतमिति । तत्राद्यं निरस्यति नचेति । समवनीयन्ते—लीयन्ते । (८) द्वितीयं निराकुर्वन्नाह न च तद्द्वारेणेति । तच्छब्दो ब्रह्मलोकवाचकः ।

मार्गस्य हि कार्यब्रह्मलोकप्रापकत्वं न तु ब्रह्मभूयहेतुभावो, जीवस्य तु निरुपाधिनित्यशुद्धबुद्धब्रह्मभावसाक्षात्कारहेतुके मोक्षे कृतमर्चिरादिमार्गेण कार्यब्रह्मलोकप्राप्त्या, अत्रापि ब्रह्मविदस्तदुपपत्तेः। (१)तस्मान्न ज्योतिरादित्यमुपसम्पद्य सम्प्रसादस्य जीवस्य स्वेन रूपेण पारमार्थिकेन ब्रह्मणाऽभिनिष्पत्तिराजसीति श्रुतेरत्रापि क्लेशः। (२)अपि च परं ज्योतिः स उत्तमपुरुष इतीहैवोपरिष्टाद्विशेषणात्तेजसो व्यावर्त्यपुरुषविषयत्वेनावस्थापनाज्ज्योतिष्पदस्य परमेव ब्रह्म ज्योतिर्न तु तेज इति सिद्धम् ॥ ४० ॥

सू० आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥

यद्यपि 'आकाशस्तल्लिङ्गादि'त्यत्र ब्रह्मलिङ्गदर्शनादाकाशः परमात्मेति व्युत्पादितं, तथापि तद्वदत्र परमात्मलिङ्गदर्शनाभावान्नामरूपनिर्वहणस्य भूताकाशेष्यवकाशदानेनोपपत्तेरकस्माच्च(३) रूढिपरित्यागस्यायोगात्, 'नामरूपे अन्तरा ब्रह्मे'ति च नाकाशस्य नामरूपयोर्निर्वहितुरन्तरालत्वमाहापि तु ब्रह्मणस्तेन भूताकाशो नामरूपयोर्निर्वहिता। ब्रह्म चैतयोरन्तरालं मध्यं सारमिति यावत्। (४)न तु निर्वोढैव ब्रह्म अन्तरालं वा निर्वोढृ। तस्मात्प्रसिद्धभूताकाशवाकाशो न तु ब्रह्मेति(५) प्राप्तम्।

एवं प्राप्त उच्यते—परमेवाकाशं ब्रह्म, "**कस्मात्? अर्थान्तरत्वादिव्यपदेशात्**' (पृ० ३८२ पं० ८)। नामरूपमात्रनिर्वाहकमिहाकाशमुच्यते। भूताकाश च विकारत्वेन' नामरूपान्तःपाति सत्कथमात्मानमुद्वहेत्। नहि सुशिक्षितोऽपि विज्ञानी स्वेन स्कन्धेनात्मानं वोढुमुत्सहते। न च नामरूपश्रुतिरविशेषतः प्रवृत्ता भूताकाशवर्जं नामरूपान्तरे सङ्कोचयितुं शक्ति सम्भवं युज्यते, न च निर्वाहकत्वं निरङ्कुशमवगतं ब्रह्मलिङ्गं कथञ्चित्क्लेशेन परतन्त्रे नेतुमुचितम्(६)। 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी'ति च तत्सृष्ट्वा मतिस्पष्टं ब्रह्मलिङ्गमत्र प्रतीयते। ब्रह्मरूपतया च जीवस्य व्याकर्तृत्वे ब्रह्मण एव व्याकर्तृत्वमुक्तम्। एवं च निर्वहितुरेवान्तरालतोपपत्तेरन्यो निर्वहिताऽन्यच्चान्तरालमित्यर्थभेदकल्पनापि न युक्ता। तथा च ते नामरूपे यदाकाशमन्तरेत्ययमर्थान्तरव्यपदेश उपपन्नो भवत्याकाशस्य। तस्मादर्थान्तरव्यपदेशात्तथा. 'तद्ब्रह्म तदमृतमि'ति व्यपदेशाद्ब्रह्मैवाकाशमिति सिद्धम् ॥ ४१ ॥

सू० सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥

(७)आदिमध्यावसानेषु संसारिप्रतिपादनात्।

---

(१) तस्मादिति। आदित्यमुपसम्पद्येति व्याचक्षाणानां मध्ये ब्रह्मलोकप्राप्तिव्यवायाङ्गीकारेण कल्पतरुस्थनाञ्जस्यमुभयमतेऽपि समानमिति नास्मन्मत एव तदनुपपत्तिरुद्भाव्येति भावः।

(२ प्रकरणादिव श्रुतिवशादपि श्रुतिभङ्गमाहापि चेति।

(३) अनन्तराधिकरणेनागतार्थत्वसङ्गती वक्ति अकस्माच्चेति। पूर्वत्र प्रकरणादानर्थक्यहतश्रुतिर्नीता इह तु न ब्रह्मप्रकरणं नाप्याकाशश्रुतेरानर्थक्यं नामरूपाधिष्ठानब्रह्मप्रतिपत्त्यर्थत्वादाकाशस्येति भावः।

(४) व्यतिरेकमुखेनैतदेव विशदयति नत्विति। निर्वोढा य आकाशस्स नैव ब्रह्म, अन्तरालभूतं यद्ब्रह्म तदपि निर्वोढृत्वेनेत्यर्थः। (५) भूताकाशो नतु ब्रह्मेति मु० मु० पु० पाठः।

(६) सत्यप्यवकाशदातृत्वेऽभिधानाभिधेयनामरूपनिर्वाहकत्वरूपनियन्तृत्वमाकाशे न घटत इति भावः।

(७) पूर्वपक्षसङ्गमाहकश्लोकमाहादीति। आदावन्ते च विज्ञानमयशब्दात् मध्ये स्वप्नाद्युक्तेश्च संसारि-

तत्परे ग्रन्थसन्दर्भे सर्वं तत्रैव योज्यते ॥

संसार्येव तावदात्माऽहंकारास्पदं प्राणादिपरीतः सर्वजनसिद्धः । तमेव च 'योऽयं विज्ञानमयः प्राणेष्वि'त्यादिश्रुतिसन्दर्भ आदिमध्यावसानेष्वामृशतीति तदनुवादपरो भवितुमर्हति । एवं च संसार्यात्मैव कश्चिदपेक्ष्य महान्, संसारस्य चानादित्वेनानादित्वादज उच्यते, न तु तदतिरिक्तः कश्चिदत्र नित्यशुद्धबुद्धमुक्तस्वभावः प्रतिपाद्यः । यत्तु सुषुप्त्युत्क्रान्त्योः प्राज्ञेनात्मना (स)परिष्वक्त इति भेदं मन्यसे, नासौ भेदः, किन्त्वयमात्मशब्दः स्वभाववचनस्तेन सुषुप्त्युत्क्रान्त्यवस्थायां विशेषविषयाभावात्संपिण्डितप्रज्ञेन(१) प्राज्ञेनात्मना स्वभावेन परिष्वक्तो न किंचिद्वेदेत्यभेदेऽपि भेदवदुपचारेण योजनीयम् । यथाहुः **'माज्ञः संपिण्डितप्रज्ञ' इति** । पत्यादयश्च शब्दाः संसारिण्येव कार्यकरणसंघातात्मकस्य जगतो जीवकर्मार्जिततया तद्भोग्यतया च योजनीयाः । तस्मात्संसार्येवानूद्यते न तु परमात्मा प्रतिपाद्यत इति प्राप्तम् ।

एवं प्राप्त उच्यते(२)—**'सुषुप्त्युत्क्रान्त्योर्भेदेन'** व्यपदेशात् (पृ० ३८४ पं० ८२) इत्यनुवर्तते । (३)अयमभिसंधिः । किं संसारिणोऽन्यः परमात्मा नास्ति, तस्मात्संसार्यात्मपरं योऽयं विज्ञानमयः प्राणेष्विति वाक्यम्, आहोस्विदिह संसारिव्यतिरेकेण परमात्मनोऽसंकीर्तनात्संसारिणश्चादिमध्यावसानेष्ववमर्शात्संसार्यात्मपरम् ? न तावत्संसार्यतिरिक्तस्य तस्याभावः । तत्प्रतिपादका हि शतश आगमा **'ईक्षतेर्नाशब्दं, गतिसामान्यादि'**त्यादिभिः सूत्रसन्दर्भैरुपपादिताः ।(४)न चात्रापि संसार्यतिरिक्तपरमात्मसंकीर्तनाभावः, सुषुप्त्युत्क्रान्त्योस्तत्संकीर्तनात्। न च प्राज्ञस्य परमात्मनो जीवाद्भेदेन संकीर्तनं सति सम्भवे राहोः शिर इतिवदौपचारिकं युक्तम् । न च प्राज्ञशब्दः प्रज्ञाप्रकर्षशालिनि निरूढवृत्तिः कथंचिदज्ञविषयो व्याख्यातुमुचितः । न च प्रज्ञाप्रकर्षोऽसङ्कुचद्वृत्ति(५)र्विदितसमस्तवेदितव्यात्सर्ववित्सोऽन्यत्र सम्भवति । नचेत्थम्भूतो जीवात्मा, तस्मात्सुषुप्त्युत्क्रान्त्योर्भेदेन जीवात्प्राज्ञस्य परमात्मनो व्यपदेशात् **'योऽयं विज्ञानमय'** इत्यादिना जीवात्मानं लोकसिद्धमनूद्य(६) तस्य परमात्मभावोऽनधिगतः प्रतिपाद्यते । न च जीवात्मानुवादमात्रपराण्येतानि वचांसि, अनधिगतार्थावबोधपरं हि शाब्दं प्रमाणम्, न त्वनुवादमात्रनिष्ठं भवितुमर्हति । (७)अत एव च संसारिणः परमात्मभावविधानायादिमध्यावसानेष्वनुवाद्यतयाऽवमर्श उपपद्यते । एवं च महत्त्वं चाजत्वं च सर्वगतस्य नित्यस्यात्मनः सम्भवान्नापेक्षिकं कल्पयिष्यते । यत्तु मध्ये बुद्ध्यान्ताद्यवस्थोपन्यासादिति, नानेनावस्थावत्त्वं विवक्ष्यते, अपि त्ववस्थानामुपजनापायधर्मकत्वेन तदतिरिक्तमवस्थारहितं परमात्मानं विवक्षति **"उपरितनवाक्यसन्दर्भालोचनादि"ति** ॥ ४२ ॥

प्रतिपादके ग्रन्थे सम्भवति 'महानज' इत्यादिकं संसारिण्येव सङ्कुच्छत इति श्लोकार्थः । श्लोकार्थमेवाह संसार्येवेत्यादिना ।

(१) संपिण्डितप्रज्ञेन—विषयसम्बन्धकृतविक्षेपाभावाद्घनीभूतप्रज्ञेन ।

(२) अभिधीयते इति मु० मु० पु० पाठः ।

(३) नन्वात्मनि ईश्वरधर्मिणि भेदव्यवहारोऽसिद्ध इत्याशङ्क्याह अयमिति ।

(४) द्वितीयकल्पं निरस्यन्नाह न चात्रापीति ।

(५) अनेन जीवस्यापि शास्त्रादिविषयप्रज्ञाप्रकर्षोऽस्तीति निरस्तम् ।

(६) एतेन वाक्यभेदापत्तिर्निरासः ।

(७) नन्वभ्यासाज्जीवपरत्वं वाक्यस्य स्यादित्याशङ्क्याह अत एवेति ।

सू० पत्यादिशब्देभ्यः ॥४३॥

"सर्वस्य वशी" (पृ० ३८५० पं० ८) वशः सामर्थ्यं, सर्वस्य जगतः प्रभवस्ययम्, (१)व्यूहावस्थानसमर्थ इति । अत एव सर्वस्येशानः, सामर्थ्येन व्ययमुक्तेन सर्वस्येष्टे तदिच्छानुविधानाज्जगतः । अत एव सर्वस्याधिपतिः सर्वस्य नियन्ताऽन्तर्यामीति यावत् । किञ्च 'स एवम्भूतो हृदयन्तर्ज्योतिः पुरुषो विज्ञानमयो न साधुना कर्मणा भूयानुत्कृष्टो भवती'त्येवमाद्याः श्रुतयोऽसंसारिणं परमात्मानमेव प्रतिपादयन्ति । तस्माज्जीवात्मानं मानान्तरसिद्धमनूद्य तस्य ब्रह्मभावप्रतिपादनपरो 'योऽयं विज्ञानमय' इत्यादिर्वाक्यसन्दर्भ इति सिद्धम् ॥ ४३ ॥

इति श्रीमद्वाचस्पतिमिश्रविरचितशारीरकभगवत्पादभाष्यविभागे भामत्यां प्रथमस्याध्यायस्य तृतीयः पादः ॥

सू० अनुमानिकमप्येकेषामिति चेन्न, शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥

स्यादेतत् , ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मणो लक्षणमुक्तम् 'जन्माद्यस्य यत' इति, तच्चेदं लक्षणं न प्रधानादौ गतं येन व्यभिचारादलक्षणं स्यात् , किन्तु ब्रह्मण्येवेति 'ईक्षतेर्नाशब्दमि'ति प्रतिपादितम् , गतिसामान्यं च वेदान्तवाक्यानां ब्रह्मकारणवादं प्रति विद्यते, न प्रधानकारणवादं प्रतीति प्रपञ्चितमधस्तनेन सूत्रसन्दर्भेण, तत्किमवशिष्यते यदर्थमुत्तरः सन्दर्भ आरभ्यते, न च 'महतः परमव्यक्तमि'त्यादीनां प्रधाने समन्वयेऽपि व्यभिचारः, नह्येते प्रधानकारणत्वं जगत आहुः, अपि तु प्रधानसद्भावमात्रम् , न च तत्सद्भावमात्रेण 'जन्माद्यस्य यत' इति ब्रह्मलक्षणस्य किंचिद्धीयते, तस्मादनर्थक उत्तरः सन्दर्भ इत्यत आह—"ब्रह्मजिज्ञासां प्रतिज्ञाये"ति (पृ० ३८६ पं० ९) । न प्रधानसद्भावमात्रं प्रतिपादयन्ति 'महतः परमव्यक्तमि'त्यादयः(२) किन्तु जगत्कारणं प्रधानमिति, 'महतः परमि'त्यत्र हि परशब्दोऽविप्रकृष्टपूर्वकालत्वमाह, तथा च(३) कारणत्वम् , 'अजामेकामि'त्यादीनां तु कारणत्वाभिधानमतिस्फुटम् , (४)एवं च लक्षणव्यभिचारात् तद्व्यभिचाराय युक्त उत्तरसूत्रसन्दर्भारम्भ इति । पूर्वपक्षयति—"तत्र य एवे"ति (पृ० ३८७ पं० ३) । सांख्यप्रवादरूढिमाह—"तत्राव्यक्तमि"ति । सांख्यस्मृतिप्रसिद्धेर्न केवलं रूढिरवयवप्रसिद्ध्याप्ययमेवार्थोऽवगम्यत इत्याह—"न व्यक्तमि"ति । शान्तघोरमूढशब्दादिहीनत्वाच्चेति(५) । श्रुतिरुक्ता । स्मृतिश्च सांख्यीया । न्यायश्च—

---

(१) विभागेन जगत्साध्ये समर्थः ।

(२) मू अजामेकामि'त्यादय इति मु० मु० पु० पाठः ।

(३) तथाचेति । अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वरूपकारणत्वसिद्धिरित्यर्थः ।

(४) एवं चेति । जगतः प्रधानकारणत्वे प्रोक्तरीत्या सिद्धे जन्मादिरूपलक्षणस्य ब्रह्मातिरिक्तप्रधानगतत्वेन व्यभिचारप्रसङ्गात् तत्राव्यभिचारं दर्शयितुमुत्तरसन्दर्भारम्भ इत्यर्थः ।

(५) एतेन 'शब्दादिहीनत्वाच्चे'ति भाष्यस्य प्रधानकालेऽपि सूक्ष्मशब्दादिभावात् गुणवैषम्योत्तरकालभाविशब्दादिहीनत्वात् इत्यर्थो ग्राह्य इति सूचितम् ।

(१)'भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥
कारणमस्त्यव्यक्तम्' इति ।

न च 'महतः परमव्यक्तमि'ति प्रकरणपरिशेषाभ्यामव्यक्तपदं शरीरगोचरम्, शरीरस्य शान्तघोरमूढरूपशब्दाद्यात्मकत्वेनाव्यक्तत्वानुपपत्तेः । तस्मात्प्रधानमेवाव्यक्तमुच्यत इति प्राप्ते,

उच्यते–"नैतदेवं नह्येतत्काठकं वाक्यमि"ति । (२)लौकिकी हि प्रसिद्धिः,(३) रूढिर्वेदार्थनिर्णये निमित्तं तदुपायत्वात् । यथाहुः—'य एव लौकिकाः शब्दास्त एव वैदिकास्त एव चैषामर्था'इति, न तु परीक्षकाणां परिभाषिकी, पौरुषेयी हि सा न वेदार्थनिर्णयनिबन्धनं सिद्धौषधादिप्रसिद्धिवत्(४) । तस्माद्रूढितस्तावन्न प्रधानं प्रतीयते, (५)योगस्त्वन्यत्रापि तुल्यः । तदेवमव्यक्तश्रुतावन्यथासिद्धायां (६)प्रकरणपरिशेषाभ्यां शरीरगोचरोऽयमव्यक्तशब्दः । यथा चास्य तद्गोचरत्वमुपपद्यते तथाग्रे दर्शयिष्यते । (७)तेषु शरीरादिषु मध्ये विषयास्तद्गोचरान् विद्धि । यथाऽश्वोऽध्वानमालम्ब्य चलत्येवमिन्द्रियहयाः स्वगोचरमालम्ब्येति । (८)आत्मा भोक्तेत्याहुर्मनीषिः । णकथमिन्द्रियमनोयुक्तं योगो यथा भवति । इन्द्रियार्थमनःसन्निकर्षेण हि आत्मा गन्धादीनां भोक्ता । प्रधानस्याकाङ्क्षावतो वचनं प्रकरणमिति गन्तव्यं(९) विष्णो. परमं पदं प्रधानमिति तदाकाङ्क्षामवतारयति—"तैश्चेन्द्रियादिभिरसंयते"रिति (पृ० ३८८ पं० ९) । असंयमाभिधानं व्यतिरेकमुखेन संयमावदातीकरणम् । परशब्दः श्रेष्ठवचनः । नन्वान्तरत्वेन यदि श्रेष्ठत्वं तदेन्द्रियाणामेव बाह्येभ्यो गन्धादिभ्यः श्रेष्ठत्वं स्यादित्यत आह "अर्था ये शब्दादयः" इति । नान्तरत्वेन श्रेष्ठत्वमपि तु प्रधानतया, तच्च विवक्षाधीनं, प्रहेभ्यश्चेन्द्रियेभ्योऽतिग्रहतयाऽर्थानां प्राधान्यं श्रुत्वा(१०

---

(१) भेदानामिति । परिमाणारब्धापित्वात्, समन्वयात्तदनुरागाविज्ञानवेद्यत्वात्, कारणगतशक्तितः कार्यस्य प्रवृत्तेः, वैश्वरूप्यस्य जगतः सृष्टिकाले इदमस्य कारणमिदमस्य कार्यमिति विभागात् प्रलये च तयोर्विभागाभावाच्च हेतोर्महदादिकार्यविशेषाणामव्यक्तं कारणमस्तीति सांख्यकारिकार्थः ।

(२) अव्यक्तपदेन किं रूढ्या प्रसिद्ध्या प्रधानं गृह्यते, योगाद्वा स्मार्तक्रमानुगृहीतयोगाद्वेति विकल्प्याद्यं निराकरोति लौकिकी हीति । यथाहुरिति । शाबरभाष्यकारा इत्यर्थः । पारिभाषिकी रूढिरित्यनुषज्यते । अत्र हेतुमाह पौरुषेयीति । अत्र पुरुषसङ्केतो नात्र दिवेदार्थज्ञानहेतुः पुमतेर्विचित्रत्वादित्यनुमानाकारो बोध्यः ।

(३) प्रसिद्धा रूढिरिति मु० मु० पु० पाठः ।

(४) अत्र प्रा० का० मु० पुस्तके मु० मु० पुस्तके च 'वेदार्थनिर्णयनिबन्धनासिद्धौषधादिप्रसिद्धिवदि'त्येव पाठो वर्तते, अनन्तकृष्णशास्त्रिभिश्च वेदार्थनिर्णयनिबन्धनसिद्धौ निमित्तं औषधादिषु सिद्धिवद्' इति संस्करणं कृतमस्माभिस्तत्कृतसंस्करणं च विद्वत्सन्तोषकं भवेदिति आशास्महे ।

(५) द्वितीयविकल्पं निरस्यन्नाह योगस्त्विति । अन्यत्र—अन्यस्मिन्सूक्ष्मेस्त्व तुलदये च ।

(६) प्रकरणेति । प्रकरणनिरूपणेन परिशेषाच्चाव्यक्तशब्दो शरीरवाचकः सिध्यतीत्यर्थः । ('तृतीयं निराकरोति प्रकरणे'ति इत्यादि प्रतीकदर्शनात् इयं भामती स्मार्तक्रमानुगृहीतयोगाद्वेति तृतीयकल्पनिराकरणपरेति कल्पतरुकारैर्व्याख्यातम्, किन्तु भामतीस्थैतद्ग्रन्थस्यैतद्विकल्पनिराकरणत्वापरत्वात्तत् न युक्तम् इति सुधीभिर्ध्येयम् । 'न तु परीक्षकाणा'मित्यादिभामतिग्रन्थ एव तृतीयविकल्पनिराकरण पर इति वयं ब्रूमः ।

(७) विषयास्तेषु गोचरानिति श्लोकं व्याचष्टे तेष्विति ।

(८) आत्मेन्द्रियमनोयुक्तमिति व्याचष्टे आत्मेति । (९) शरीरूपरथादिभिरित्यादिः ।

(१०) 'इन्द्रियाणां ग्रहत्वं विषयाणामतिग्रहत्वम्' इति २।२ बृहदारण्यकभाष्येऽर्थः ।

विवक्षितमितीन्द्रियेभ्योऽर्थानां प्राधान्यात् परत्वं भवति । घ्राणजिह्वात्वक्चक्षुःश्रोत्रमनोहस्तत्वचो ह्रीन्द्रियाणि श्रुत्याष्टौ ग्रहा उक्ताः, गृह्णन्ति वशीकुर्वन्ति खल्वेतानि पुरुषपशुमिति । न चैतानि स्वरूपतो वशीकर्तुमीशते यावदस्मै पुरुषपशवे गन्धरसनामरूपशब्दकामकर्मस्पर्शान्योपहरन्ति । अत एव गन्धादयोऽष्टावतिग्रहास्तदुपहारेण ग्रहाणां ग्रहत्वोपपत्तेः । तदिदमुक्तम् **"इन्द्रियाणां ग्रहत्वं विषयाणामतिग्रहत्वमिति श्रुतिप्रसिद्धेरि"ति** (पृ० ८९९ पं० ५) । (१)ग्रहत्वेनेन्द्रियैः साम्येऽपि मनसः स्वगतेन विशेषणार्थेभ्यः परत्वमाह **"विषयेभ्यश्च मनसः परत्व"मिति** । कस्मात्पुना रथित्वेनोपक्षिप्तो गृह्यत इत्यत आह—**"आत्मशब्दादि"ति** । तत्प्रत्यभिज्ञानादित्यर्थः । श्रेष्ठत्वे हेतुमाह—**"भोक्तुश्चे"ति** । तदेनेन जीवात्मा स्वामितया महानुक्तः । अथ वा श्रुतिस्मृतिभ्यां हैरण्यगर्भी बुद्धिरात्मशब्देनोच्यत इत्यत आह—**"अथ वे"ति** । **"पूरि"ति** । भोग्यजातस्य बुद्धिरधिकरणमिति बुद्धिः पूस्तदेवं सर्वासां बुद्धीनां प्रथमजाहिरण्यगर्भबुद्ध्येकनीडतया हिरण्यगर्भबुद्धेर्महत्त्वं चापनादात्मत्वं च । अत एव बुद्धिमात्रात्पृथक्करणमुपपन्नम् । नन्वेतस्मिन् पक्षे हिरण्यगर्भबुद्धेरात्मत्वान्न रथिन आत्मनो भोक्तुरत्रोपादानमिति न रथमात्रं परिशिष्यतेऽपि तु रथवानपीत्यत आह—**"एतस्मिंस्तु पक्ष"** इति (पृ० ३९० पं० २) । (२)यथा हि समारोपितं प्रतिबिम्बं बिम्बान्न वस्तुतो भिद्यते तथा न परमात्मनो विज्ञानात्मा वस्तुतो भिद्यत इति परमात्मैव रथवानिहोपात्तस्तेन रथमात्रं परिशिष्टमिति । अथ रथादिरूपककल्पनायाः शरीरादिषु किं प्रयोजनमित्यत आह—**"शरीरेन्द्रियमनोबुद्धिविषयवेदनासंयुक्तस्य ही"ति** । वेदना–सुखाद्यनुभवः । प्रत्यर्थमञ्चतीति(३) प्रत्यगात्मेह जीवोऽभिमतस्तस्य ब्रह्मावगतिः । न च जीवस्य ब्रह्मत्वं मानान्तरासिद्धं, येनात्र नागमोऽपेक्ष्येतेत्याह—**"तथा चे"ति** । (४)**वागिति** च्छान्दसो द्वितीयालोपः । शेषमतिरोहितार्थम्॥१॥

पूर्वपक्षिणोऽनुशयबीजनिराकरणपरं सूत्रम्(५) ।

सू० सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥

प्रकृतेर्विकाराणामनन्यत्वात् प्रकृतेरव्यक्तत्वं विकार उपचर्यते । यथा 'गोभिः श्रीणीते'ति गोशब्दस्तद्विकारे पयसि । अव्यक्तात् कारणाद् विकाराणामनन्यत्वेनाव्यक्तशब्दार्हत्वे प्रमाणमा — **था च श्रुतिरि"ति** (पृ० ३९१ पं० १) अव्याकृतमव्यक्तमित्यनर्थान्तरम् ॥ २ ॥

नन्वेवं सति(६) प्रधानमेवाभ्युपेतं भवति, सुखदुःखमोहात्मकं हि जगदेवम्भूतादेव कारणाद्भवितुमर्हति कारणात्मकत्वात्कार्यस्य, यच्च तस्य सुखात्मकत्वं तत्सत्त्वम्, यच्च तस्य दुःखात्मकत्वं तद्रजः, यच्च तस्य मोहात्मकत्वं तत्तमः, तथा चाव्यक्तं प्रधानमेवाभ्युपेतामिति

---

(१) ननु मनस इन्द्रियत्वेनार्थेभ्योऽपरत्वात्कथं 'अर्थेभ्यश्च परं मन' इति सङ्कुच्छत इत्यत आह ग्रहत्वेनेति । (२) ननु रथिनः संसारिणः कथमसंसार्यात्मत्वेन निर्देशोऽत्र आह यथाहीति ।

(३) अवगच्छति । (४) वागिति । यच्छेद्वाङ्मनसीत्यत्रेत्यर्थः ।

(५) सूक्ष्मामिति । पूर्वपक्ष्यसन्तोषनिराकरणाय शरीरमेव रूपकेण रथेन विन्यस्तामित्यर्थः ।

(६) कार्यकारणभेदे सति ।

शङ्कानिराकरणार्थं सूत्रम्—

सू० तदधीनत्वादर्थवत् ॥ ३ ॥

प्रधानं हि सांख्यानां (१)सेश्वराणामनीश्वराणां वेश्वरात् क्षेत्रज्ञेभ्यो वा वस्तुतो भिन्नं शक्यं निर्वक्तुम् । ब्रह्मणस्त्वियमविद्या शक्तिर्मायादिशब्दवाच्या न शक्या तत्त्वेनान्यत्वेन वा निर्वक्तुम् । इदमेवास्या अव्यक्तत्वं यदनिर्वाच्यत्वं नाम । सोऽयमव्याकृतवादस्य प्रधानवादाद्भेदः । अविद्याशक्तेश्चेश्वराधीनत्वं तदाश्रयत्वात् । न च द्रव्यमात्रमशक्तं कार्यायालमिति शक्तेरर्थवत्त्वं, तेनेदमुक्तमर्थवदिति । (२)स्यादेतत्, यदि ब्रह्मणोऽविद्याशक्त्या संसारः प्रतीयते हन्त मुक्तानामपि पुनरुत्पादप्रसङ्गः, तस्याः प्रधानवत्तादवस्थ्यात्, तद्विनाशे वा समस्तसंसारोच्छेदस्तन्मूलाविद्याशक्तेः समुच्छेदादित्यत आह—**"मुक्तानां च पुनर्बन्धस्यानुत्पत्तिः, कुतः ? विद्यया तस्या बीजशक्तेर्दाहात्"** (पृ० ३७२ पं० २) । अयमभिसन्धिः । न वयं प्रधानवदविद्यां सर्वजीवेष्वेकामाचक्ष्महे येनैवमुपालभेमहि, किं त्वियं प्रतिजीवं भिद्यते । तेन यस्यैव जीवस्य विद्योत्पन्ना तस्यैवाविद्याऽपनीयते न जीवान्तरस्य, भिन्नाधिकरणयोर्विद्याविद्ययोरविरोधात्, तत्कुतः समस्तसंसारोच्छेदप्रसङ्गः ? प्रधानवादिनां त्वेष दोषः, प्रधानस्यैकत्वेन तदुच्छेदे सर्वोच्छेदोऽनुच्छेदे वा न कस्यचिदित्यनिर्मोक्षप्रसङ्गः । प्रधानभेदेऽपि चेत्तदविवेकख्यातिलक्षणाविद्यासदसत्त्वनिबन्धनौ बन्धमोक्षौ तर्हि कृतं प्रधानेनाविद्यासदसद्भावाभ्यामेव तदुपपत्तेः । न चाविद्योपाधिभेदाधीनो जीवभेदो जीवभेदाधीनत्वाविद्योपाधिभेद इति परस्पराश्रयादुभयासिद्धिरिति साम्प्रतम् । अनादित्वाद्बीजाङ्कुरवदुभयसिद्धेः । (३)अविद्यात्वमात्रेण चैकत्वोपचारोऽव्यक्तमिति चाव्याकृतमिति चेति । नन्वेवमविद्यैव जगद्बीजमिति कृतमीश्वरेणेत्यत आह **"परमेश्वराश्रये"ति** । नह्यचेतनं चेतनानधिष्ठितं कार्याय पर्याप्तमिति स्वकार्यं कर्तुं परमेश्वरं निमित्ततयो(४)पादानतया चाश्रयते, प्रपञ्चविभ्रमस्य हीश्वराधिष्ठानत्वमहिविभ्रमस्येव रज्ज्वधिष्ठानत्वम्, तेन यथाऽहिविभ्रमो रज्ज्वुपादान एवं प्रपञ्चविभ्रम ईश्वरोपादानस्तस्माज्जीवाधिकरणाप्यविद्या निमित्ततया विषयतया चेश्वरमाश्रयत इतीश्वराश्रयेत्युच्यते, न त्वाधारतया, विद्यास्वभावे(५) ब्रह्मणि तदनुपपत्तेरिति । अत एवाह **"यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवा"** इति । यस्यामविद्यायां (६)सत्यां शेरते जीवा, जीवानां स्वरूपं वास्तवं ब्रह्म तद्बोधरहिताः शेरत इति लय उक्तः, संसारिण इति विक्षेप उक्तः । **"अव्यक्ताधीनत्वाज्जीवभावस्ये"ति** । यद्यपि जीवाव्यक्तयोरनादित्वेनानियतं पौर्वापर्यं

---

(१) विज्ञानभिक्षवादीनाम् मते ईश्वरात्, अनीश्वराणां प्राच्यसांख्यानां क्षेत्रज्ञेभ्य इति सम्बन्धः ।

(२) एकैवाविद्येति मन्वानस्याशङ्का स्यादेतदित्यादिना ।

(३) यद्यविद्या नाना तर्हि कथं श्रुतावव्यक्तमित्येकवचनमत आहाविद्यात्वेति ।

(४) निमित्ततया—प्रेरकतयाऽविद्याविषयत्वेन चाविद्याप्रेरकत्वमीश्वरस्य गन्धस्येव घ्राणं प्रतीति भावः । उपादानतया जगद्भ्रमाधिष्ठानतयेत्यर्थः ।

(५) निरवयवमिति श्रुत्युक्तनिर्दोषज्ञानात्मत्वं विद्यास्वभावत्वम् ।

(६) उपाधिभूताऽविद्यैवाप्रबोधेऽपि कारणमित्याह सत्यामिति ।

तथाप्यव्यक्तस्य पूर्वत्वं विवक्षितमेतदुक्तं "सत्यपि शरीरत्वादिन्द्रियादीना"मिति । (१)गोबलीवर्दपदवदेतद्द्रष्टव्यम् ।

आचार्यदेशीयमतमाह "अन्ये त्वि"ति (पृ० ३९३ पं० १) एतदूदूषयति "तैस्त्वि"ति । प्रकरणपारिशेष्ययोरुभयत्र तुल्यत्वान्नैकग्रहणनियमहेतुरस्ति । शङ्कते—"आम्नातस्यार्थ"मिति । अव्यक्तपदमेव स्थूलशरीरव्यावृत्तिहेतुर्व्यक्तत्वात्तस्येति शङ्कार्थः । निराकरोति—"नैकवाक्यताधीनत्वादि"ति । प्रकृतहान्यप्रकृतप्रक्रियाऽप्रसङ्गैनैकवाक्यत्वे सम्भवति न वाक्यभेदो युज्यते । न चाकाङ्क्षां विनैकवाक्यत्वमुभयं च प्रकृतमित्युभयं प्राप्यत्वेनेहाकाङ्क्षितमित्येकाभिधायकमपि पदं शरीरद्वयपरम् । (२)न च मुख्यया वृत्त्याऽतत्परमित्यौपचारिकं न भवति । यथोपहन्तृमात्रनिराकरणाकाङ्क्षायां काकपदं प्रयुज्यमानं श्वादिसर्वहन्तृपरं (३)विज्ञायते । यथाहुः—

काकेभ्यो रक्ष्यतामन्नमिति बालोऽपि नोदितः ।
उपघातप्रधानत्वान्न श्वादिभ्यो न रक्षति ॥ इति ।

ननु न शरीरद्वयस्यात्राकाङ्क्षा, किन्तु दुःशोधत्वात्सूक्ष्मस्यैव शरीरस्य, न तु षाट्कौशिकस्य स्थूलस्य, तद्धि दृष्टबीभत्सतया सुकरं वैराग्यविषयत्वेन शोधयितुमित्यत आह—"न चैवं मन्तव्य"मिति (पृ० ३९४ पं० १) । विष्णोः परमं पदमवगमयितुं परं परमत्र प्रतिपाद्यत्वेन प्रस्तुतं न तु वैराग्याय शोधनमित्यर्थः । अलं वा विवादेन भवतु सूक्ष्मशरीरं परिशोध्यं तथापि न सांख्याभिमतमत्र प्रधानं परमित्यभ्युपेत्याह—"सर्वथापि त्वि"ति ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥

इतोऽपि नायशब्यक्तशब्दः सांख्याभिमतप्रधानपरः । सांख्यैः खलु प्रधानाद्विवेकेन पुरुषं निःश्रेयसाय ज्ञातुं वा विभूत्यै वा प्रधानं ज्ञेयत्वेनोपक्षिप्यते, न चेह जानीयादिति चोपासीतेति वा विधिविभक्तिश्रुतिरस्ति, अपि त्वव्यक्तपदमात्रं, न चैतावता सांख्यस्मृतिप्रत्यभिज्ञानं भवतीति भावः ॥ ४ ॥

ज्ञेयत्वावचनस्यासिद्धिमाशङ्क्य तन्निराकरणप्रदर्शनार्थं सूत्रम्—

(सू०) वदतीति चेन्न, प्राज्ञो हि प्रकरणात् ॥ ५ ॥

निगदव्याख्यातमस्य भाष्यम् ॥ ५ ॥

(सू०) त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥

वरप्रदानोपक्रमा हि मृत्युनचिकेतःसम्वादवाक्यप्रवृत्तिरासमाप्तेः कठवल्लीनां लक्ष्यते ।

---

(१) गोबलीवर्दपदवदिति । यथा बलीवर्दमानयेत्युक्ते गामानयेति प्रयोगे गोपदमितरगोविषयमेव जीवत्वनियामकेऽव्यक्ते पूर्वत्वमुपचरितमित्यर्थः ।

(२) ननु अव्यक्तपदस्य स्थूलदेहे मुख्यत्वाभावादौपचारिकत्वमिति न युक्तं, सकृच्छ्रुतस्य सूक्ष्मस्थूलदेहविषयतया मुख्यगौणत्वे वैरूप्यापातादित्याशङ्क्याह न चेति ।

(३) विज्ञायत इति । तथा पुरुषपरत्वप्रतिपत्त्यर्थं तुल्यपदाकाङ्क्षितप्रस्तुतशरीरद्वयं छविन्यायेन लक्ष्यव्यव्यक्तपदं न सूक्ष्ममेवाभिधत्त इति पूरणीयम् ।

मृत्युर्नचिकेतसे कुपितेन पित्रा प्रहिताय तुष्टस्त्रीन् वरान् प्रददौ, नचिकेतास्तु प्रथमेन वरेण पितुः सौमनस्यं वव्रे, द्वितीयेनाग्निविद्यां तृतीयेनात्मविद्याम्—'वराणामेष वरस्तृतीय' इति वचनात् । न तु तत्र वरप्रदाने प्रधानगोचरे स्तः प्रश्नप्रतिवचने । तस्मात्कठवल्लीष्वभिजीवपरमात्मपरैव वाक्यप्रवृत्तिर्न त्वप्रक्रान्तप्रधानपरा भवितुमर्हतीत्याह—"**इतश्च न प्रधानस्याव्यक्तशब्दवाच्यत्व**"मिति (पृ० ३९५ पं० २१) । 'हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनमि'त्यनेन(१) व्यवहितं जीवविषयं 'यथा तु मरणं प्राप्यात्मा भवति गौतमे'त्यादिप्रतिवचनमिति योजना । अत्राह चोदकः—किं जीवपरमात्मनोरेक एव प्रश्नः, किं वान्यो जीवस्य 'येयं प्रेते'मनुष्य इति प्रश्नोऽन्यश्च परमात्मनो'ऽन्यत्र धर्मादि'त्यादिः । एकत्वे (२)सूत्रविरोध"**स्त्रयाणामि**"ति । भेदे तु सौमनस्यावाप्त्यग्न्यात्मज्ञानविषयवरत्रयप्रदानानन्तर्भावो'ऽन्यत्र धर्मादि'त्यादेः प्रश्नस्य । (३)तुरीयवरान्तरकल्पनायां वा तृतीय इति श्रुतिबाधप्रसङ्गः । (४)वरप्रदानानन्तर्भावे प्रश्नस्य तद्वत् प्रधानाख्यानमप्यनन्तर्भूतं वरप्रदाने ऽस्तु महतः परमव्यक्तमित्याक्षेपः ।

परिहरति "**अत्रोच्यते नैवं वयमिहे**"ति । (पृ० ३९७ पं० ११) । वस्तुतो जीवपरमात्मनोरभेदात्प्रष्टव्याभेदेनैक एव प्रश्नः, (५)अत एव प्रतिवचनमप्येकं, सूत्रं त्ववास्तवभेदाभिप्रायम् । वास्तवश्च जीवपरमात्मनोरभेदस्तत्रतत्र श्रुत्युपन्यासेन भगवता भाष्यकारेण दर्शितः । तथा जीवविषयस्यास्तित्वनास्तित्वप्रश्नस्येत्यादि । 'येयं प्रेत' इति हि नचिकेतसः प्रश्नमुपश्रुत्य तत्तत्कामविषयमलोभं चास्य प्रतीत्य मृत्युर्विद्याभीप्सिनं नचिकेतसं मन्य' इत्यादिना नचिकेतसं प्रशस्य प्रश्नमपि तदीयं प्रशंसन्नस्मिन्प्रश्ने ब्रह्मैवोत्तरमुवाच—"**तं दुर्दर्शमि**"ति (पृ० ३९९ पं० ७) । यदि पुनर्जीवात्प्राज्ञो भिद्येत जीवगोचरः प्रश्नः प्राज्ञगोचरं चोत्तरमिति किं केन सङ्गच्छेत । (६)अपि च यद्विषयं प्रश्नमुपश्रुत्य मृत्युनैष प्रशंसितो नचिकेता यदि तमेव भूयः पृच्छेत्तदुत्तरे चावदध्यात् ततः प्रशंसा दृष्टार्था स्यात्, प्रश्नान्तरे त्वसावस्थाने प्रसारिता सत्यदृष्टार्था स्यादित्याह—"**यत्प्रश्ने**"ति । यस्मि(७)न्प्रश्नो यत्प्रश्नः । शेषमतिरोहितार्थम् ॥ ६ ॥

(सू०) महद्वच्च ॥ ७ ॥

अनेन सांख्यप्रसिद्धैर्वैदिकप्रसिद्धया विरोधान्न सांख्यप्रसिद्धिर्वेद आदर्तव्येत्युक्तम् । सांख्यानां महत्तत्त्वं सत्तामात्रं पुरुषार्थक्रियाक्षमं सत्तस्य भावः सत्ता तन्मात्रं महत्तत्त्वमिति ।

---

(१) 'व्यवहितं जीवविषयम्' (पृ० ३७६ पं० १८) इति भाष्यस्थव्यवहितपदार्थमाह इत्यनेनेति । 'हन्ते'त्यादि 'सनातन'मित्यन्तं परमात्मप्रतिवचनप्रतिज्ञावाक्यं, तेन व्यवहितं यथेत्यादि जीवप्रश्नस्य प्रतिवचनमित्यर्थः । (२) अन्यात्मविषयोर्द्वित्वादित्यादिः ।

(३) यदि प्रश्नभाष्यथानुपपत्त्या वरान्तरं कल्प्यते तत्राह तुरीयेति ।

(४) वरत्रयमेवास्तु परमात्मप्रश्नश्च तदनन्तर्गत एव यथाऽधृतरत्नमालादानमित्याक्षेपे आह वरप्रदानेऽनन्तर्भाव इति । (५) अतएव—जीवपरयोरभेदादेव ।

(६) एवं प्रतिवचनेन जीवपराभेदं साधयित्वा शब्दप्रवृत्त्यापि साधयति अपि चेति । तदुत्तरे-तस्य प्रश्नस्योत्तरे, तमेव विषयं यथावदध्याज्ज्ञानीयादित्यर्थः ।

(७) विषये न तु प्रश्ने, विषयगौरवेण प्रश्नप्रशंसासम्भवात् इति यत्प्रश्नेत्यादि भाष्यार्थो बोध्यः ।

या या (१)पुरुषार्थक्रिया शब्दाद्युपभोगलक्षणा च सत्त्वपुरुषान्यताख्यातिलक्षणा च सा सर्वा महति बुद्धौ समाप्यत इति महत्तत्त्वं सत्तामात्रमुच्यत इति ॥ ७ ॥

सू० चमसवदविशेषात् ॥ ८ ॥

अजाशब्दो यद्यपि छागायां रूढस्तथाप्यध्यात्मविद्याधिकारात्र तत्र वर्तितुमर्हति । तस्माद्रूढेरसम्भवाद्योगेन वर्तयितव्यः । तत्र किं स्वतन्त्रं प्रधानमनेन मन्त्रवर्णेना(२)नानूयतामुत पारमेश्वरी मायाशक्तिस्तेजोबन्नव्याक्रियाकारणमुच्यताम् ? किं तावत्प्राप्तं, प्रधानमेवेति, तथाहि—यादृशं प्रधानं सांख्यैः स्मर्यते तादृशमेवास्मिन्नन्यूनानतिरिक्तं प्रतीयते, सा हि प्रधानलक्षणा प्रकृतिर्न जायत इत्यजा च एका च(३) लोहितशुक्लकृष्णा च । यद्यपि लोहितत्वादयो वर्णा न रजःप्रभृतिषु सन्ति, तथापि लोहितं कुसुम्भादि रञ्जयति रजोऽपि रञ्जयतीति लोहितम् । एवं प्रसन्नं पायः शुक्लं सत्त्वमपि प्रसन्नमिति शुक्लम् । एवमावरकं मेघादि कृष्णं तमोप्यावरकमिति कृष्णम् । (४)परेणापि नाव्याकृतस्य स्वरूपेण लोहितत्वादियोग आस्थेयः, किन्तु तत्कार्यस्य तेजोबन्नस्य लोहितत्वादि कारण उपचरणीयम् । कार्यसारूप्येण वा कारणे कल्पनीयं तदस्माकमपि तुल्यम् । 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य'इति त्वात्मभेदश्रवणात् सांख्यस्मृतेरेवात्र मन्त्रवर्णे प्रत्यभिज्ञानं न त्वव्याकृतप्रक्रियायाः, तस्यामैकात्म्याभ्युपगमेनात्मभेदाभावात् । तस्मात्स्वतन्त्रं प्रधानं नाशब्दमिति प्राप्तम् । **तेषां साम्यावस्था अवयवधर्मैरिति** । अवयवाः प्रधानस्यैकस्य सत्त्वरजस्तमांसि तेषां धर्मा लोहितत्वादयस्तैरिति । **"प्रजास्त्रैगुण्यान्विता"** (पृ० ४१२ पं० १) इति । सुखदुःखमोहात्मिकाः । तथाहि—मैत्रदारेषु नर्मदायां मैत्रस्य सुखं, तत्कस्य हेतोः ? तं प्रति सत्त्वसमुद्भवात्, तथा च तत्सपत्नीनां दुःखं, तत्कस्य हेतोः ? ताः प्रति रजःसमुद्भवात्, तथा चैत्रस्य तामविन्दतो मोहो विषादः, स कस्य हेतोः ? तं प्रति तमःसमुद्भवात्। नर्मदया च सर्वे भावा व्याख्याताः । तदिदं त्रैगुण्यान्वितत्वं प्रजानाम् । अनुशेत इति व्याचष्टे **"तामेवाविद्यये"ति** । (५)विषया हि शब्दादयः प्रकृतिविकारास्त्रैगुण्येन सुखदुःखमोहात्मान इन्द्रियमनोहंकारप्रणालिकया बुद्धिसत्त्वमुपसंक्रामन्ति । तेन तद्बुद्धिसत्त्वं प्रधानविकारः सुखदुःखमोहात्मकशब्दादिरूपेण परिणमते । चितिशक्तिस्त्वपरिणामिन्य(६)प्रतिसंक्रमापि बुद्धिसत्त्वादात्मनो विवेकमबुध्यमाना बुद्धिवृत्तयैव विपर्यासेनाविद्यया बुद्धिस्थान् सुखादीन् आत्म-

---

(१) ननु सांख्यैर्बुद्धेर्महत्त्वेनाङ्गीकारात् 'सांख्ये सत्तामात्र महच्छब्दः प्रयुक्त' इत्ययं कथं सङ्गच्छत इत्याशङ्क्याह पुरुषार्थेति । अर्थक्रियाकारिणि तैः सच्छब्दः प्रयुक्तः पुरुषापेक्षितप्रयोजनकारितया महत्त्वत्वं चकास्ति न तु सामान्यवाचीत्यर्थः ।

(२) अनेन मन्त्रवर्णेन—अजामेकामित्यादिमन्त्राक्षरेण ।

(३) एका चेत्यनेन विशेषणेन मायायाः प्रतिजीवं भेदादेकत्वानुपपत्तिर्मायाशक्तिपक्षे सूचिता ।

(४) न च गौणत्वं दोषः समत्वादित्याह परेणापीति । वेदान्तिनापीत्यर्थः ।

(५) 'तामेवाविद्यये'तिभाष्ये तच्छब्दार्थो विषयज्ञानाधारः प्रधानकार्यमन्तःकरणमित्याह विषया हीति ।

(६) अपरिणामिनीति । कूटस्थनित्यत्वात्स्वयं सुखादिरूपेणापरिणामिनी, परिणामिन्यां बुद्धौ वस्तुतोऽप्रविष्टत्वादप्रतिसंक्रमापीत्यर्थः । आत्मत्वेनोपगम्येत्येतद्व्याख्यं विवृणोति बुद्धिस्थानिति । विपर्यासेनेत्यनुवादेनाविद्यया बुद्धिधर्मानात्मन्यभिमन्यमाना सुखादिमतीव चितिशक्तिरात्मा बभूवेति सम्बन्धः ।

न्यभिमन्यमाना सुखादिमतीव बभूव । तदिदमुक्तं—"सुखी दुःखी मूढोऽहमित्यविवेकतया संसरति, एकः । सत्त्वपुरुषान्यताख्यातिसमुन्मूलितनिखिलवासनाविद्यानुबन्धस्त्वन्यो जहात्येनां प्रकृतिं—तदिदमुक्त"मन्यः पुन"रिति । भुक्तभोगामिति व्याचष्टे—'कृतभोगापवर्गाम्" । शब्दाद्युपलब्धिर्भोगः, (१)गुणपुरुषान्यताख्यातिरपवर्गः, अपवृज्यते हि तया पुरुष इति ।

एवं प्राप्तेऽभिधीयते—न 'तावजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य' इत्येतदात्मभेदप्रतिपादनपरमपि तु सिद्धमात्मभेदमनूद्य बन्धमोक्षौ प्रतिपादयतीति, (२)न चानूदितो भेद

'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा'

इत्यादिश्रुतिभिरात्मैकत्वप्रतिपादनपराभिर्विरोधात्कल्पनिकोऽवतिष्ठते । तथा च न सांख्यप्रक्रियायाः प्रत्यभिज्ञानमित्यजावाक्यं चमसवाक्यवत्परिप्लवमानं न स्वतन्त्रप्रधाननिश्चयाय पर्याप्तं, तदिदमुक्तं सूत्रकृता—'चमसवदविशेषादि'ति ॥ ८ ॥

उत्तरसूत्रमवतारयितुं शङ्कते—तत्र त्विदं तच्छिर इति । सूत्रमवतारयति—अत्र ब्रूमः ।

सू० ज्योतिरुपक्रमात्तु तथाह्यधीयत एके ॥ ९ ॥

(३)सवशाखाप्रत्ययमेकं ब्रह्मेति स्थितौ शाखान्तरोक्तरोहितादिगुणयोगिनी तेजोवन्नलक्षणा जरायुजाण्डजस्वेदजोद्भिज्जचतुर्विधभूतग्रामप्रकृतिभूतेयमजा प्रतिपत्तव्या । 'रोहितशुक्लकृष्णामि'ति रोहितादिरूपतया तस्या एव प्रत्यभिज्ञानान्न तु सांख्यपरिकल्पिता प्रकृतिः, तस्या अप्रामाणिकतया श्रुतहान्यश्रुतकल्पनाप्रसङ्गाद्भजनादिना च रोहितायुपचारस्य सति मुख्यार्थसम्भवेऽयोगात् , तदिदमुक्तं "रोहितादीनां शब्दानामि"ति (पृ० ५०३ पं० ४) । अजापदस्य च समुदायप्रसिद्धिपरित्यागेन न जायत इत्यवयवप्रसिद्ध्याश्रयणे दोषप्रसङ्गात् । (४)अत्र तु रूपककल्पनया(५) समुदायप्रसिद्धेरेवानपेक्षायाः स्वीकारात् । (६)अपि चायमपि श्रुतिकलापोऽस्मद्दर्शनानुगुणो न सांख्यस्मृत्यनुगुण इत्याह—"तथेहापी"ति । "किं कारणं ब्रह्मेत्युपक्रम्ये"ति । ब्रह्मस्वरूपं तावज्जगत्कारणं न भवति विशुद्धत्वात्तस्य, यथाहुः—

पुरुषस्य च शुद्धस्य नाशुद्धा विकृतिर्भवेत्

इत्याशयवतीयं श्रुतिः पृच्छति "किंकारणं" ? यस्य ब्रह्मणो जगदुत्पत्तिस्तत्किंकारणं ब्रह्मेत्यर्थः । 'ते ब्रह्मविदो ध्यानयोगेनात्मानं गताः प्राप्ता, अपश्यन्नि'ति योजना । "यो

---

(१) कृतत्वापवर्त्यमपवर्गशब्दस्तदुपायपर इत्याह गुणादि ।

(२) न चानुवदसामर्थ्यात्प्रमाणं कल्प्यं विरोधादित्याह न चेति ।

(३) विप्रकृष्टतया शाखान्तरेण ब्रह्मनिर्णयासम्भवमाशङ्क्याह सर्वेति ।

(४) कल्पनायामिति मु० मु० पु० पाठः ।

(५) ननु 'अजावदजे'तिगुणवृत्त्यङ्गीकारे रूढि परित्यक्ता स्यादित्यत आह न चेति । रूढेरपहाने योगे रूढ्यर्थगुणसम्बन्धात् सिद्धा वृत्तिरात्रितेति रूढिरपि स्वीकृताऽन्यथा गुणयोगस्यैवाभिधेयत्वेत्यर्थः ।

(६) न केवलं शाखान्तरादेव किन्तु प्रकरणादपि अस्याकृतपक्ष एव युक्त इत्याहापिचेति ।

योनिं योनिमि"ति । अविद्या शक्तिर्योनिः सा च प्रतिजीवं नानेत्युक्त(१)मतो वीप्सोपपन्ना । शेषमतिरोहितार्थम् ॥ ९ ॥

सूत्रान्तरमवतारयितुं शङ्कते "कथं पुनरि"ति (पृ० ४९४ पं० १) । अजाकृतिर्जातिस्तेजोबन्नेषु नास्ति । न च तेजोबन्नानां जन्मश्रवणादजन्मनिमित्तोप्यजाशब्दः सम्भवतीत्याह—"न च तेजोबन्नानामि"ति । सूत्रमवतारयति–"अत उत्तरं पठति" ॥

सू० कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

ननु किं छागा लोहितशुक्लकृष्णैवान्यादृशीनामपि छागानामुपलम्भादित्यत आह–"यदृच्छये"ति । बहुबर्करा—बहुशावा । शेषं निगदव्याख्यातम् ॥ १० ॥

सू० न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥

(२)अवान्तरसङ्गतिमाह–"एवं परिहृतेपीति (पृ० ४०५ पं० ८) । (३)पञ्चजना इति हि समासार्थः पञ्चसंख्यया सम्बध्यते । न च 'दिक्संख्ये संज्ञायामि'ति समासविधानान्मनुजेषु निरूढोऽयं पञ्चजनशब्द इति वाच्यम् । तथाहि सति पञ्च मनुजा इति स्यात् । एवं चात्मनि पञ्चमनुजानामाकाशस्य च प्रतिष्ठानमिति निस्तात्पर्यं सर्वस्यैव प्रतिष्ठानात् । तस्माद्रूढेरसम्भवात्तत्यागेनात्र योग आश्रेयः । जनशब्दश्च कथञ्चित्तत्त्वेषु व्याख्येयः । (४)तत्रापि किं पञ्च प्राणादयो वाक्यशेषगता विवक्ष्यन्ते उत तदतिरिक्ता अन्यएव वा केचित । तत्र पौर्वापर्यपर्यालोचनया काण्वमाध्यन्दिनवाक्ययोर्विरोधात्, एकत्र हि ज्योतिषा पञ्चत्वमन्ने नेतरत्र । न च षोडशिग्रहणाग्रहणवद्विकल्पसम्भवोऽनुष्ठानं हि विकल्प्यते न वस्तु, वस्तुतत्त्वकथा चेयं नानुष्ठानकथा, विध्यभावात्, तस्मात्कानि चिदेव तत्त्वानीह पञ्च प्रत्येकं पञ्चसंख्यायोगीनि पञ्चविंशतितत्त्वानि भवन्ति । सांख्यैश्च प्रकृत्यादीनि पञ्चविंशति तत्त्वानि स्मर्यन्ते इति तान्येवानेन मन्त्रेणोच्यन्ते इति नाशब्दं प्रधानादि । न चाधारत्वेनात्मनो व्यवस्थानात्तत्त्वात्मनि चाधाराधेयभावस्य विरोधाद् आकाशस्य च व्यतिरेचनात् त्रयोविंशतिर्जना इति स्यान्न पञ्च पञ्चजना इति वाच्यम् । (५)सत्यप्याकाशात्मनोर्व्यतिरेचने मूलप्रकृतिभागैः सत्वरजस्तमोभिः पञ्चविंशतिसंख्योपपत्तेः । तथा च सत्याकाशात्मभ्यां सप्तविंशतिसंख्यायां पञ्चविंशति तत्त्वानीति स्वसिद्धान्तव्याकोप इति चेत् । न । मूलप्रकृतित्वमात्रे-

---

(१) उक्तमिति । आनुमानिकाधिकरण इति शेषः ।

(२) अवान्तरेति । पूर्वशाध्यात्मप्रकरणे रूढच्छागाया अजन्मत्वादजातेजआदिकेत्युक्तमिहापि रूढेर्मनुष्यग्रहे वाक्यस्य निस्तात्पर्यकत्वप्रसङ्गादवयववृत्त्या सांख्यस्मृततत्त्वपरतेत्यवान्तरसङ्गतिमाहेत्यर्थः ।

(३) ननूपसर्जनस्य संख्यायाः संख्यान्तरेण विशेषणायोगात्कथं पञ्चविंशतिलाभोऽत आह पञ्चजना इति ।

(४) ननु रूढित्यागेन मनुष्यसम्बन्धिनः प्राणादयो लक्ष्यन्ते तथाच निस्तात्पर्यमत आह तत्रापीति । रूढयर्थग्रहेऽपीत्यर्थः ।

(५) आत्माकाशभिन्नानां त्रयोविंशतितत्त्वानामपि प्रधानस्य विशेषकरणात्पञ्चविंशतित्वं श्रुतौ, स्मृतौ तु तत्त्वेष्वात्माकाशावन्तर्भाव्य प्रधानं चाभिन्त्वा पञ्चविंशतितत्त्वगणनेत्यविरोध इत्याशयेनोत्तरयति सत्यपीति ।

णैकीकृत्य सत्त्वरजस्तमांसि पञ्चविंशतितत्त्वोपपत्तेः । (१)हिरुग्भावेन तु तेषां सप्तविंशति-त्वविरोधस्तस्माच्छाब्दी सांख्यस्मृतिरिति प्राप्ते (२)मूलप्रकृतिः प्रधानम्, नासावन्यस्य विकृतिरपि तु प्रकृतिरेव तदिदमुक्तं "मूले"ति (पृ० ४०५ पं० १५) । महदहङ्कारः पञ्चतन्मात्राणि प्रकृतिश्च विकृतिश्च, तथाहि—महत्तत्त्वमहङ्कारस्य तत्त्वान्तरस्य प्रकृतेर्मूल-प्रकृतेस्तु विकृतिः, एवमहङ्कारतत्त्वं महतो विकृतिः, प्रकृतिश्च तदेव तामसं सत् पञ्चतन्मा-त्राणाम् , तदेव सात्त्विकं सत् प्रकृतिरेकादशेन्द्रियाणाम् , पञ्चतन्मात्राणि चाहङ्कारस्य विकृ-तिराकाशादीनां पञ्चानां प्रकृतिस्तदिदमुक्तं "**महदाद्याः प्रकृतिविकृतयः सप्त । षो-डशकश्च विकारः**" षोडशसंख्यावच्छिन्नो गणो विकार एव । पञ्चभूतान्यतन्मा(३)त्रा-ण्येकादशेन्द्रियाणीति षोडशको गणः । यद्यपि पृथिव्यादयो गोघटादीनां प्रकृतिस्तथापि (४)न ते पृथिव्यादिभ्यस्तत्त्वान्तरमिति न प्रकृतिः । तत्त्वान्तरोपादानत्वं चेह प्रकृतित्वम-भिमतं नोपादानमात्रत्वमित्यविरोधः । पुरुषस्तु कूटस्थनित्योऽपरिणामी न कस्यचित्प्रकृ तिर्नापि विकृतिरिति ।

एवं प्राप्ते ऽभिधीयते—"**न संख्योपसङ्ग्रहादपि प्रधानादीनां श्रुतिमत्त्वाशङ्का कर्तव्या । कस्मात् ? नानाभावात् । नाना ह्येतानि पञ्चविंशतितत्त्वानि नैषां पञ्चशः पञ्चशः साधारणधर्मो ऽस्ति**" (पृ० ४०६ पं० ३) । न खलु सत्त्वरजस्त-मोमहदहङ्काराणामेकः क्रिया वा गुणो वा द्रव्यं वा जातिर्वा धर्मः पञ्चतन्मात्रादिभ्यो व्या-वृत्तः सत्त्वादिषु चानुगतः कश्चिदस्ति(५) । नापि पृथिव्यप्तेजोवायुघ्राणानां, नापि रसनच-क्षुस्त्वक्श्रोत्रवाचां, (६)नापि पाणिपादपायूपस्थमनसां, येनैकेनासाधारणेनोपगृहीताः पञ्च पञ्चका भवितुमर्हन्ति । पूर्वपक्षैकदेशिन(७)मुत्थापयति—"**अथोच्येत पञ्चविंशतिसंख्यै-वेयमि**"ति । यद्यपि परस्यां संख्यायामवान्तरसंख्या द्वित्वादिका नास्ति,(८) तथापि त-त्पूर्वं तस्याः सम्भवात्पौर्वापर्यलक्षणया प्रत्यासत्त्या परसंख्योपलक्षणार्थं पूर्वसंख्योपन्यस्यत इति । दूषयति "**अयमेवास्मिन्पक्षे दोष**" इति । न च पञ्चशब्दो जनशब्देन सम-स्तोऽसमस्तः शक्यो वक्तुमित्याह—"**परश्चात्र पञ्चशब्द**" इति (पृ० ४०७ पं० १)

---

(१) पृथग्भावेन ।

(२) भाष्योक्तां मायामाह मूलेति । अत्र 'प्राप्ते मूलेती'ति मु० मु० पु० पाठः । अव्यवसायो महदाख्या बुद्धिः, अभिमानोऽहङ्कारः, पञ्चतन्मात्राणि सूक्ष्माणि इन्द्रियसांख्यतत्त्वकौमुद्यां विस्तरेण विवृतम् ।

(३) स्थूलरूपाणि ।

(४) पृथिव्यादीनां घटादिप्रकृतिकत्वात्कथं षोडशको विकार एवेत्यत्राह न त इति । उभयेषां स्थूल-तेन्द्रियग्राह्यता च समेति न तत्त्वान्तरत्वमित्यर्थः ।

(५) अस्तीति । तथाचाकाशात्मानौ विहाय या पञ्चविंशतिसंख्योक्ता तस्यां नावान्तरत्वेन पञ्च-सङ्ख्यानिवेश इति भावः ।

(६) नापीति । एवं च साधारणोपाध्यभावात् उद्रिक्ताकाशानां पृथिव्यादीनां ज्ञानेन्द्रियेभ्यो घ्राणमादाय, तथा तदतिरिक्तानां ज्ञानेन्द्रियाणां कर्मेन्द्रियेभ्यो वाचमाहृत्य, एवमुद्रेचितवाचां कर्मेन्द्रियाणां च न मनसा पञ्चत्वलाभ इति भावः । (७) पञ्चजनशब्दे समासमनङ्कुर्वन्तामित्यर्थः ।

(८) नास्तीति । अपेक्षाबुद्धिनाशे द्वित्वादिनाशादिति शेषः । तथापीति । साहचर्याभावेऽपि हेतुहेतुम-द्भावरूपलक्षणाबीजसम्बन्धसत्त्वान्महासङ्ख्याया अवान्तरसङ्ख्यासम्बन्धः सम्भवतीत्यर्थः ।

ननु भवतु समासस्तथापि किमित्यत आह—"समस्तत्वाच्चे"ति । अपि च वाप्सायां पञ्चकद्वयग्रहणे दशैव तत्त्वानीति न सांख्यस्मृतिप्रत्यभिज्ञानामियसमासमभ्युपेत्याह—"न पञ्चकद्वयग्रहणं पञ्चपञ्चे"ति । (१)न चैका पञ्चसंख्या पञ्चसंख्यान्तरेण शक्या विशेष्टुम्, पञ्चशब्दस्य संख्योपसर्जनद्रव्यवचनत्वेन संख्याया उपसर्जनतया विशेषणेनासंसंयोगादित्याह—"एकस्याः पञ्चसंख्याया" इति । तदेवं पूर्वपक्षैकदेशिनि दूषिते परमपूर्वपक्षिणमुत्थापयति—"नन्वापन्नपञ्चसंख्याका जना एवे"ति (पृ० ४०८ पं० १) । अत्र तावद्यौ सत्यां(२) न योगः सम्भवतीति वक्ष्यते, तथापि यौगिकं पञ्चजनशब्दमभ्युपेत्य दूषयति—"युक्तं यत् पञ्चपूलीशब्दस्ये"ति । (३)पञ्चपूलीत्यत्र यद्यपि पृथक्त्वैकार्थसमवायिनी पञ्चसंख्यावच्छेदिकाऽस्ति तथापीयं समुदायिनोऽवच्छिनत्ति न समुदायं समासपदगम्यमतस्तस्मिन् कति ते समुदाया इत्यपेक्षायां पदान्तराभिहिता पञ्चसंख्या सम्बध्यते पञ्चेति, पञ्चजना इत्यत्र तु पञ्चसंख्ययोत्पत्तिशिष्टया जनानामवच्छिन्नत्वात्समुदायस्य च पञ्चपूलीवदत्राप्रतीतेर्न पदान्तराभिहिता संख्या सम्बध्यते । स्यादेतत्, संख्येयानां जनानां मा भूच्छब्दान्तरवाच्यसंख्यावच्छेदः पञ्चसंख्यायास्तु तयावच्छेदो भविष्यति, (४)नहि साप्यवच्छिन्नेत्यत आह-'भवदपीदं विशेषणमि"ति(५)उक्तोऽत्र दोषः, नह्युपसर्जनं विशेषणेन युज्यते पञ्चशब्द एव तावत्संख्येयोपसर्जनसंख्यामाह विशेषतस्तु पञ्चजना इत्यत्र समासे, (६)विशेषणापेक्षायां तु न समासः स्यादसामर्थ्याज्जहि भवति ऋद्धस्य राजपुरुष इति समासोऽपि तु वृत्तिरेव ऋद्धस्य राज्ञः पुरुष इति, सापेक्षत्वेनासामर्थ्यादित्यर्थः । "अतिरेकाच्चे"ति अभ्युच्चयमात्रम् । यदि सत्त्वरजस्तमांसि प्रधानेनैकीकृत्यात्माकाशौ तत्त्वेभ्यो व्यतिरिच्येते तदा सिद्धान्तव्याकोपः । अथ तु सत्त्वरजस्तमांसि मिथो भेदेन विवक्ष्यन्ते, तथापि वस्तुतत्त्वव्यवस्थापने आधारत्वेना(७)त्मा निष्कृष्यतामाधेयान्तरेभ्यस्त्वाकाशस्याधेयस्य व्यतिरेचनमनर्थकमिति गमयितव्यम् । "कथं च संख्यामात्रश्रवणे सती"ति (पृ० ४०९ पं० ५) । (८)'दिक्संख्ये संज्ञायामि'ति संज्ञायां

---

(१) असमासपक्ष एव वीप्सां विहाय विशेषणपक्षमाशङ्क्याह नचैकेति ।

(२) सत्यामिति । तद्द्वारा प्राणादिषु लक्षणायां च सत्यामित्यर्थः ।

(३) अनाकाङ्क्षां दर्शयति पञ्चपूलीत्यत्रेति । तथाचेदन्ताद्विगुसमासो समाहाराभिधानात् पदान्तरोपात्तसङ्ख्यया समाहारस्योत्पत्तिशिष्टया समानपदस्थया समाहारिणा पूलानां चावच्छेद्यत्वात्पञ्चपूलीत्यत्राऽऽकाङ्क्षा, पञ्चजना इत्यत्र त्वीबन्तत्वाभावेन समाहारापतीत्या जनानां च स्वपदगतसङ्ख्ययाऽवच्छिन्नत्वान्न सङ्ख्यान्तराकाङ्क्षेति भावः ।

(४) नहि सोपीति । आत्माश्रयप्रसङ्गान्न सङ्ख्या तयाऽवच्छिद्यतेऽतः सङ्ख्यान्तराकाङ्क्षेत्यर्थः ।

(५) तत्र चोक्तो दोष इति परिहारभाष्यार्थमाह उक्त इति ।

(६) ननूपसर्जनस्यापि विशेषाभ्ययः किं न स्यादत आह विशेषणापेक्षायां त्विति । सापेक्षस्यासमासे उदाहरणमाह नहि भवतीति । इत्यर्थः—उदाहृतभाष्यस्यायमर्थः ।

(७) आधारत्वेन—भोक्तुरात्मनो भोग्यप्रतिष्ठाहेतुत्वेन ।

(८) ननु पञ्चसङ्ख्याद्वयात्पञ्चविंशतिसिद्धौ 'कथं चे'तिभाष्यं कथं सगच्छते इत्याशङ्क्याह दिक्संख्ये इति । दिक्संख्यावाचिशब्दौ संज्ञायां गम्यमानायां उत्तरपदेन समस्येते यथा दक्षिणाग्नि सत्तर्पय इति सूत्रार्थः । एवं चैकैव पञ्चसंख्या द्वितीयपञ्चशब्दस्य संज्ञा समासगतस्य न संख्यार्थतेति ग्रन्थतात्पर्यम् ।

समासस्मरणात् पञ्चजनशब्दस्तावदयं क्वचिन्निरूढः । न च रूढौ सत्यामवयवप्रसिद्धेर्ग्रहणं सापेक्षत्वात्, निरपेक्षत्वाच्च रूढेः । तयदि रूढौ मुख्योऽर्थः प्राप्यते ततः स एव ग्रहीतव्योऽथ त्वसौ न वाक्ये सम्बन्धार्हः पूर्वापरवाक्यविरोधी वा ततो रूढ्यपरित्यागेनैव वृत्त्यन्तरेणार्थान्तरं कल्पयित्वा वाक्यमुपपादनीयम्, यथा 'श्येनेनाभिचरन् यजेते'ति श्येनशब्दः शकुनिविशेषे निरूढवृत्तिस्तदपरित्यागेनैव निरस्यादानसादृश्येनार्थवादिकेन(१) क्रतुविशेषे वर्तते(२), यथा सप्तर्षिशब्दो वसिष्ठ एकस्मिन् सप्तसु च वर्तते । न चैष तत्त्वेषु रूढः पञ्चविंशतिसंख्यानुरोधेन तत्त्वेषु वर्तयितव्यः, रूढौ सत्यां पञ्चविंशतेरेव संख्याया अभावात् कथं तत्त्वेषु वर्तते । ॥ ११ ॥

(सू०) प्राणादयो वाक्यशेषात् ॥ १२ ॥

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

(३)एवं च के ते पञ्चजना इत्यपेक्षायां किं वाक्यशेषगताः प्राणादयो गृह्यन्तामुत पञ्चविंशतितत्त्वानीति विशये, तत्त्वानामप्रामाणिकत्वात्प्राणादीनां च वाक्यशेषे श्रवणात्तदपरित्यागे श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्प्राणादय एव पञ्चजनाः । (४)न च काण्वमाध्यन्दिनयोर्विरोधान्न प्राणादीनां वाक्यशेषगतानामपि ग्रहणमिति साम्प्रतम्, विरोधेऽपि तुल्यबलतया षोडशिग्रहणाग्रहणवद्विकल्पोपपत्तेः । (५)न चेयं वस्तुस्वरूपकथाऽपितूपासनानुष्ठानविधिर्मनसैवानुष्टुदव्यमि'ति विधिश्रवणात् । **'कथं पुनः प्राणादिषु जनशब्दप्रयोग'** इति । जनवाचकः शब्दो जनशब्दः, पञ्चजनशब्द इति यावत्, तस्य कथं प्राणादिष्वजनेषु प्रयोग इति व्याख्येयम् । अन्यथा(६)तु प्रत्यस्तमितावयवार्थे समुदायशब्दार्थे जनशब्दार्थो नास्तीत्यपर्यनुयोग एव । रूढ्यपरित्यागेनैव वृत्त्यन्तरं दर्शयति—**"जनसम्बन्धाच्चे"ति** (पृ० ४१०–पं० २) जनशब्दभाजः—पञ्चजनशब्दभाजः । ननु सत्यामवयवप्रसिद्धौ समुदायशक्तिकल्पनमनुपपन्नं, सम्भवति च पञ्चविंशत्यां तत्त्वेष्ववयवप्रसिद्धिरित्यत आह—**"समासबलाच्चे"ति** । (७)स्यादेतत्, समासबलाच्चेद्रूढिरास्थीयते हन्त न दृष्टस्तर्हि तस्य प्रयोगोऽश्वकर्णादिवद्वृक्षादिषु, तथा च लोकप्रसिद्ध्यभावान्न रूढिरित्याक्षिपति-**कथं पुनरसीति** । (८)जनेषु तावत्पञ्चजनशब्दस्य प्रथमः प्रयोगो लोकेषु दृष्ट इत्यमति प्रथम-

(१) 'यथा वै श्येनो निपत्यादत्त एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन' इत्यर्थवादोक्तेन रूढ्यर्थापरित्यागेनैव क्रतुविशेषबोधकः श्येनशब्द इति भावः ।

(२) वर्तत इति । 'स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरा' इत्यमरसिंहोक्तेरवयवार्थपञ्चसंख्यासम्बन्धानपेक्ष एकोऽपि पुरुषे वर्तत इति भावः ।

(३) ननु रूढ्यभावेऽपि पञ्चजनशब्दस्तत्त्वेषु लाक्षणिकः स्यादित्याशंक्याह एवं चेति ।

(४) वाक्यशेषगतैर्विरोधान्न प्राणादयः पञ्चजना इत्युक्तं निरस्यन्नाह नचेति ।

(५) यच्चोक्तं वस्तुति न विकल्प इति, तत्राह नचेति ।

(६) अन्यथा—जनवाचकत्वेन पञ्चजनशब्दव्याख्यानाभावे, सिद्धान्त्यभिमतेऽवयवार्थशून्ये समुदायशब्दार्थे प्राणादौ योग्यानुपपत्तिरनुक्तोपालम्भस्यात् स्यादिति भावः ।

(७) व्याकरणस्य प्रयोगानुरोधित्वेन तदभावात्कथं रूढिरित्याभिप्रायेणाशङ्क्य भाष्यवचनारूपति दर्शयति-तदित्यादिना ।

(८) मनुष्येषु पञ्चजनशब्दस्य लोक एव प्रयोगदर्शनात्तत्सम्बन्धात्प्राणादिषु स्फुटो वृत्त्युपपत्ति 'ज-

प्रयोग इत्यसिद्धमिति स्वबीयस्तत्यानभिधायाभ्युपेत्य प्रथमप्रयोगाभावं समाधत्ते—"शाक्यो-ल्लिङ्गादिवदि"ति । आचार्यदेशीयानां मतभेदेष्वपि न पञ्चविंशतितत्त्वानि सिध्यन्ति परमार्थतस्तु पञ्चजना वाक्यशेषगता एवेत्याशयवानाह—"कौञ्चास्त्रिव"दिति । शेषमति-रोहितार्थम् ॥ १२ ॥ १३ ॥

सू० कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥

अथ समन्वयलक्षणे केयमकाण्डे(१) विरोधाविरोधचिन्ता, भविता हि तस्याः स्थानम-विरोधलक्षण(२)मित्यत आह—"प्रतिपादितं ब्रह्मण" इति (पृ० १२पं० १०) । अय-मर्थः—नानैकशाखागतततद्वाक्यालोचनया वाक्यार्थावगमे पर्यवसिते सति(३) प्रमाणान्तरा-विरोधेन वाक्यार्थावगतेरप्रामाण्यमाशङ्क्याविरोधेत्युपादनेन प्रामाण्यव्यवस्थापनमविरोधलक्ष-णार्थः, (४)प्रासङ्गिकं तु तत्र सृष्टिविषयाणां वाक्यानां परस्परमविरोधप्रतिपादनं न तु लक्ष-णार्थः, तत्प्रयोजनं च तत्रैव प्रतिपादयिष्यते, इह तु वाक्यानां सृष्टिप्रतिपादकानां परस्पर-विरोधे ब्रह्मणि जगद्योनौ न समन्वयः सेद्धुमर्हति, तथा च न जगत्कारणत्वं ब्रह्मणो लक्षणं, न च तत्र गतिसामान्यं, न च तत्सिद्धये प्रधानस्याशब्दत्वप्रतिपादनम् , तस्माद्वाक्यानां वि-रोधाविरोधाभ्यामुक्तार्थाक्षेपसमाधानाभ्यां समन्वय एवोपपाद्यत इति समन्वयलक्षणे सङ्गत-मिदमधिकरणम् ।

(५)वाक्यानां कारणे कार्ये परस्परविरोधतः ।
समन्वयो जगद्योनौ न सिध्यति परात्मनि ॥

'सदेव सोम्येदमग्र आसीदि'त्यादीनां कारणविषयाणाम् 'असद्वा इदमग्र आसीदि'त्यादि-भिर्वाक्यैः कारणविषयैर्विरोधः, कार्यविषयाणमपि विभिन्नक्रमाक्रमोत्पत्तिप्रतिपादकानां विरोधः। तथा हि कानिचिदन्यकर्तृकं जगदुत्पत्तिमाचक्षते वाक्यानि, कानिचित्स्वयंकर्तृकाम्(६)। सृष्ट्या च तत्कार्येण तत्कारणतया ब्रह्म लक्षितम् । सृष्टिविप्रतिपत्तौ तत्कारणतायां ब्रह्मलक्षणे विप्रतिपत्तौ सत्यां भवति तल्लक्ष्ये ब्रह्मण्यपि विप्रतिपत्तिः । तस्माद्ब्रह्मणि समन्व-

---

नश्चबन्धाच्च' इति भाष्येण सूचितां पृथङ्नाह भाष्यकारः, किन्तु प्रौढ्या रूढिं समर्थयन इत्याह जनेष्विति स्थवीयस्तया-स्फुटतया । (१) अनवसरे ।

(२) अविरोधलक्षणम्—मानान्तराविरोधपरिहारार्थो द्वितीयाध्यायः ।

(३) पर्यवसिते सति अविरोधव्युत्पादेन इतरेतरविरोधपरिहारेण प्रामाण्यव्यवस्थापनमिति योजना।

(४) यदि मानान्तराविरोधो द्वितीयाध्यायार्थः वियत्यादौ कथं श्रुतीनामन्योन्याविरोधचिन्तोक्त्याशं क्यह प्रसङ्गिकमित्यादि । तत्रेति । निषेधात् परपक्षाणामनपेक्ष्यत्वे उक्ते स्वपक्षस्यापि तत्प्रसङ्गे तन्निवृत्तिरू-पप्रयोजनं तत्रैव प्रतिपादयिष्यत इत्यर्थः ।

(५) पूर्वपक्षसंग्राहकश्लोकमाह वाक्यानामिति । कारणताबोधकानां कार्यविषयाणां च वाक्यानां पर-स्परविरोधात्कार्यद्वारगम्ये जगद्योनौ परमात्मनि न समन्वयसिद्धिरिति तदर्थः । श्लोकार्थं विवृणोति सदे-वेति । विभिन्नेति । विभिन्ना अक्रमा च युगपद्भाविनी योत्पत्तिस्तत्प्रतिपादकानामित्यर्थः । तथाच 'आत्मन आकाशस्तत्तेजोसृजते'ति भिन्नक्रमेण 'स इमाल्लोकानसृजते'त्यक्रमेण कारणविषयाणामन्योन्यविरोधो बोध्यः ।

(६) स्वयंकर्तृकामिति । 'तन्नामरूपाभ्यां व्याक्रियते'त्यादीनि स्वयंकर्तृकामुत्पत्तिं वदन्तीति कार्यवि-षयविरोधो दर्शितः । विरोधमुपपाद्य समन्वयमाक्षिपति सृष्ट्या चेति ।

याभावाच्च समन्वयगम्यं ब्रह्म । वेदान्तास्तु कर्त्रादिप्रतिपादनेन कर्मविधिपरतयोपचरितार्था अविवक्षितार्था वा जगदुपयोगिन इति प्राप्तम् । क्रमादीत्यादिग्रहणेनाक्रमो गृह्यते ।

एवं प्राप्त उच्यते—

(१)सर्गक्रमविवादेऽपि न स स्रष्टरि विद्यते ।
सतस्त्वसद्वचो भक्त्या निराकार्यतया क्वचित् ॥

न तावदस्ति सृष्टिक्रमे विगानं, श्रुतीनामविरोधात्, तथाहि—(२)अनेकशिल्पपर्यवदातो देवदत्तः प्रथमं चक्रदण्डादि करोत्यथ तदुपकरणः कुम्भं, कुम्भोपकरणस्त्वाहरत्युदकम्, उदकोपकरणश्च संयवनेन गोधूमकणिकानां करोति पिण्डं, पिण्डोपकरणस्तु पचति घृतपूर्णं, तदस्य देवदत्तस्य सर्वत्रैतस्मिन्कर्तृत्वाच्छक्यं वक्तुं देवदत्ताच्चक्रादि सम्भूतं तस्माच्चक्रादेः कुम्भादीति, शक्यं च देवदत्तात्कुम्भः समुद्भूतस्तस्मादुदकोहरणादीत्यादि । नह्यस्त्यसम्भवः, सर्वत्रास्मिन् कार्यजाते क्रमवत्यपि देवदत्तस्य साक्षात्कर्तुरनुस्यूतत्वात्, तथेहापि यद्यप्याकाशादिक्रमेणैव सृष्टिस्तथाप्याकाशानलानिलादौ तत्रतत्र साक्षात् परमेश्वरस्य कर्तृत्वाच्छक्यं वक्तुं परमेश्वरादाकाशः सम्भूत इति, शक्यं च वक्तुं परमेश्वरादनलः सम्भूत इत्यादि । यदि 'त्वाकाशाद्वायुर्वायोस्तेज'इत्युक्त्वा 'तेजसो वायुर्वायोराकाश' इति ब्रूयाद्भवेद्विरोधो न चैतदस्ति(३) तस्मादमूषामविवादः श्रुतिनाम् । एवं 'स इमान् लोकानसृजते'त्यक्रमाभिधायिन्यपि श्रुतिरविरुद्धा, एषा हि स्वव्यापारमभिधानक्रमेण कुर्वती नाभिधेयानां क्रमं निरुणद्धि, ते तु यथाक्रमावस्थिता एवाक्रमेणोच्यन्ते, यथाक्रमवन्ति ज्ञानानि जातानीति, तदेवमविगानम् । (४)अभ्युपेत्य तु विगानमुच्यते स्रष्टरि खल्वेतद्विगानम् । स्रष्टा तु सर्ववेदान्तवाक्येष्वनुस्यूतः परमेश्वरः प्रतीयते, नात्र श्रुतिविगानं मात्रयाप्यस्ति । (५)न च सृष्टिविगानं स्रष्टरि तदधीननिरूपणे विगानमावहतीति वाच्यम् । नह्येष सृष्टृत्वमात्रेणोच्यतेऽपि तु 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादिना रूपेणोन्यते स्रष्टा । तच्चास्य रूपं सर्ववेदान्तवाक्यानुगतम् । (६)तज्ज्ञानं च फलवत्, 'ब्रह्मविदाप्नोति परं तरति शोकमात्मविदि'ति श्रुतेः, सृष्टिज्ञानस्य तु न फलं श्रूयते,'फलवत्संनिधावफलं तदङ्गमि'ति सृष्टिविज्ञानं स्रष्टृब्रह्मविज्ञानाङ्गं तदनुगुणं सद्ब्रह्मज्ञानावतारोपायतया व्याख्येयम्, तथा च श्रुतिः–'अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छे'त्यादिका । शुङ्गेनाग्रेण, कार्येणेति यावत् । तस्माच्च सृष्टिविप्रतिपत्तिः स्रष्टरि विप्रतिपत्तिमावहति, अपि तु

(१) सिद्धान्तसंग्रहश्लोकमाह सर्गेति । स्वयंकर्तृत्वान्यकर्तृकत्वाभ्यां सर्गे क्रमाक्रमव्युत्क्रमैस्तत्क्रमे च विवादे सत्यपि स्रष्टरि विवादो नास्ति, तथा सतः कारणस्य 'असद्वे'त्यादि असदुक्तिरौपचारिकी निराकरणीयत्वेनानुवादो असच्च इति श्लोकार्थः । श्लोकार्थमेवाह नतावदिति ।

(२) विमिश्रक्रमत्वं परिहरति अनेकेति । पर्यवदातः—कुशल । संयवनं–मिश्रणम् । घृतपूर्ण–पक्वान्नविशेषः ।

(३) अस्तीति । ईदृग्वाक्यं नास्ति श्रुतौ कुत्रापीत्यर्थः । तथा चाकाशवायुतेजसां क्रमेणोत्पत्तिमभिधाय व्युत्क्रमाभिधाने विरोधः स्यान्न तु तेजसः साक्षाद्ब्रह्मणः सृष्टिमात्राभिधाने, न ह्यनेन क्रमो बाध्यत इति भावः । (४) न स स्रष्टरीति श्लोकद्वितीयपादं व्याचष्टे अभ्युपेत्येति ।

(५) कार्यविगानेनोक्तं समन्वयाक्षेपं पदमर्थं परिहरति नचेति । सत्यादिलक्षणं ब्रह्मावगमस्य तदानन्त्योपपादविषया जगतस्तत्रारोपः श्रुत्या सृष्टिरुक्ता, न तु तस्य तात्पर्यमतो मिथ्याभूतायां सृष्टौ विगानं न वेदान्तिनां दूषणमपि त्वलङ्कार इत्यर्थः । (६) ननु सृष्टिः किमित्यात्मज्ञानार्थेत्याशंक्याह तज्ज्ञानं चेति ।

'गुणे त्वन्याय्यकल्पने'ति तदनुगुणतया व्याख्येया। (१)यच्च कारणे विगानम्-'असद्वा इदमग्र आसी दि'ति, तदपि 'तदप्येष श्लोको भवती'ति पूर्वप्रकृतं सद्ब्रह्माकृष्य 'असदवेदमग्र आसीदि'त्युच्यमानं त्वसतोऽभिधानेऽसम्बद्धं स्यात्(२)। श्रुत्यन्तरेण च मानान्तरेण च विरोधः। तस्मादौपचारिकं व्याख्येयम्। (३)'तद्धैक आहुरसदेवेदमग्र आसीदि'ति तु निराकार्यतयोपन्यस्तमिति न कारणे विवाद इति। सूत्रे चशब्दस्त्वर्थः पूर्वपक्षं निवर्तयति। आकाशादिषु सृज्यमानेषु क्रमविगानेपि न स्रष्टरि विगानम्। कुतः? यथैकस्यां श्रुतौ व्यपदिष्टः परमेश्वरः सर्वस्य कर्ता तथैव श्रुत्यन्तरेषूक्तेः, केन रूपेण? कारणत्वेन, अपरः (४)कल्पो यथा व्यपदिष्टः क्रम आकाशादिषु, 'आत्मन आकाशः सम्भूत आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी'ति तथैव क्रमस्यानपबाधनेन 'तत्तेजोऽसृजते'त्यादिकाया अपि सृष्टेरुक्तेर्न सृष्टावपि विगानम् ॥१४॥

सू० समाकर्षात् ॥ १५ ॥

नन्वेकत्रात्मन आकाशकारणत्वेनोक्तिरन्यत्र च तेजःकारणत्वेन तत्कथमविगानमत आह-"कारणत्वेने"ति (पृ० ४१६ पं० ७) हेतौ तृतीया, सर्वत्राकाशानलानिलादौ साक्षात्कारणत्वेनात्मनः। प्रपञ्चितं चैतदधस्तात्(५)। 'व्याक्रियत' इति च कर्मकर्तरि कर्मणि वा रूपम्, न चेतनमतिरिक्तं कर्तारं प्रतिक्षिपति किन्तूपस्थापयति, न हि 'लूयते केदारः स्वयमेवेति वा, लूयते केदार इति' वा लवितारं देवदत्तादिं प्रतिक्षिपति, अपि तूपस्थापयत्येव। तस्मात्सर्वमवदातम् ॥ १५ ॥

सू० जगद्वाचित्वात् ॥ १६ ॥

सू० जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥ १७ ॥

(६)ननु 'ब्रह्म ते ब्रवाणी'ति ब्रह्माभिधानप्रकरणादुपसंहारे च 'सर्वान्पाप्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यं पर्येति य एवं वेदे'ति निरतिशयफलश्रवणाद्ब्रह्मवेदनादन्यस्य तदसम्भवात्, (७)आदित्यचन्द्रादिगतपुरुषकर्तृत्वस्य च 'यस्य वैतत्कर्मे'ति चास्यासत्यवच्छेदे सर्वनाम्ना प्रत्यक्षसिद्धस्य जगतः परामर्शेन जगत्कर्तृत्वस्य च ब्रह्मणोऽन्यत्रासम्भवात्कथं जीवमुख्यप्राणाशङ्का। (८)उच्यते-'ब्रह्म ते ब्रवाणी'ति बालाकिना गार्ग्येण ब्रह्माभिधानं प्रतिज्ञाय तत्तदादित्यादिगताब्रह्मपुरुषाभिधानेन न तावद्ब्रह्मोक्तम्। (९)यस्य चाजातशत्रो 'योवै बालाके एतेषां पुरुषाणां कर्ता यस्यं वैतत्कर्मे'ति वाक्यं न तेन ब्रह्माभिधानं प्रति-

---

(१) 'सतस्त्वसदूचो भवत्ये'ति श्लोकांशं व्याकुर्वन्नाह यच्चेति।

(२) 'अस्ति ब्रह्मेति चेदूदे'ति प्रस्तुतं ब्रह्म तच्छब्दसमानार्थकतच्छब्देन परामृश्य श्लोकेनासदभिधाने श्लोकवाक्यमसम्बद्धं स्यादित्यर्थः।

(३) निराकार्यतया क्वचिदिति श्लोकभागं विभजते तद्धैक इति।

(४) एवं कारणविगाननिषेधपरत्वेन सूत्रं व्याख्यायाधुना कार्यविगाननिषेधपरतया योजयति अपर इति। कल्पः-प्रकारः। (५) धृतपूर्णटीकायाम्। (६) सिद्धान्त्याशङ्कते नन्विति।

(७) उपक्रमोपसंहाराभ्यां जीवमुख्यप्राणलिङ्गयोर्ब्रह्मपरत्वं प्रदर्श्य मध्येऽपि ब्रह्मपरामर्शमाहाऽऽदित्येति पुरुषकर्तृत्वस्य ब्रह्मणोऽन्यत्रासम्भवादित्यत्रान्वयः। अवच्छेदके-प्रकरणादौ।

(८) अथ 'ब्रह्म ते ब्रवाणी'ति बालाकिवाक्याद्ब्रह्म मन्यते सिद्धान्ती राजवाक्याद्वा, नाथ इत्याह पूर्वपक्षी उच्यत इत्यादिना। (९) न द्वितीय इत्याह यस्येति।

ज्ञातम् । (१)न चान्यदीयेनोपक्रमेणान्यस्य वाक्यं शक्यं नियन्तुम् । (२)तस्मादजातशत्रोर्वाक्यसन्दर्भपौर्वापर्यालोचनया योऽस्यार्थः प्रतिभाति स एव ग्राह्यः । अत्र च कर्मशब्दस्तावद्व्यापारे निरूढवृत्तिः, कार्येषु क्रियते इति व्युत्पत्त्या वर्तेत । न च रूढौ सत्यां व्युत्पत्तिर्युक्ताश्रयितुम् । न च ब्रह्मण उदासीनस्यापरिणामिनो व्यापारवत्ता । वाक्यशेषे चा'ऽस्यास्मिन्प्राण एवैकधा भवती'ति श्रवणात्परिस्पन्दलक्षणस्य च कर्मणो यत्रोपपत्तिः स एव वेदितव्यतयोपदिश्यते । आदित्यादिगतपुरुषकर्तृत्वं च प्राणस्योपपद्यते हिरण्यगर्भरूपप्राणावस्थाविशेषत्वादादित्यादिदेवतानां 'कतम एको देवः प्राण' इति श्रुतेः । उपक्रमानुरोधेन चोपसंहारे सर्वशब्दः सर्वान्प्राप्मन इति च सर्वेषां भूतानामिति चापेक्षिकवृत्ति(३)र्बहून्प्राप्मनो बहूनां भूतानामित्येवम्परो द्रष्टव्यः । एकस्मिन्वाक्ये उपक्रमानुरोधादुपसंहारो वर्णनीयः । (४)यदि तु दृप्तबालाकिमब्रह्मणि ब्रह्माभिधायिनमपोद्याजातशत्रोर्वचनं ब्रह्मविषयमेवान्यथा तु तदुक्ताद्विशेषं विवक्षोरब्रह्माभिधानमसम्बद्धं स्यादिति मन्यते, तथापि नैतद्ब्रह्माभिधानं भवितुमर्हति, अपि तु जीवाभिधानमेव, (५)यत्कारणं वेदितव्यतयोपन्यस्तस्य पुरुषाणां कर्तुर्वेदनायोपेतं बालाकिं प्रति बुबोधयिषुरजातशत्रुः सुप्तं पुरुषमामन्त्र्यामन्त्रणशब्दश्रवणात्प्राणादीनामभोक्तृत्वमस्वामित्वं प्रतिबोध्य यष्टिघातोत्थानात्प्राणादिव्यतिरिक्तं जीवं भोक्तारं स्वामिनं प्रतिबोधयति, परस्तादपि(६)—तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्ति एवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते एवमेते आत्मान एनमात्मानं भुञ्जन्ती'ति श्रवणात्, यथा श्रेष्ठी प्रधानः पुरुषः स्वैर्भृत्यैः करणभूतैर्विषयान्भुङ्क्ते यथा वा स्वा भृत्याः श्रेष्ठिनं भुञ्जन्ति, ते हि श्रेष्ठिनमशनाच्छादनादिप्रदानेन भुञ्जन्ति, एवमेवैष प्रज्ञात्मा जीव एतैरादित्यादिगतैरात्मभिर्विषयान्भुङ्क्ते, ते ह्यादित्यादय आलोकवृष्ट्यादिना साचिव्यमाचरन्तो जीवात्मानं भोजयन्ति, जीवात्मानमपि यजमानं तदुत्सृष्टहविरादानादादित्यादयो भुञ्जन्ति, तस्माज्जीवात्मैव ब्रह्मणोऽभेदाद्ब्रह्मेह वेदितव्यतयोपदिश्यते । (७)यस्य वैतत्कर्मेति (पृ० ४९८ पं० ३) जीवप्रयुक्तानां देहेन्द्रियादीनां कर्म जीवस्य भवति । कर्मजन्यत्वाद्वा धर्माधर्मयोः कर्मशब्दवाच्यत्वं रूढ्यनुसारात्, तौ च धर्माधर्मौ जीवस्य, धर्माधर्मापेक्षित्वाच्चादित्यादीनां भोगोपकरणानां तेषु जीवस्य कर्तृत्वमुपपन्नम् । उपपन्नं च प्राणभृच्चाजीवस्य प्राणशब्द-

---

(१) ननु बालाकिवाक्यस्थब्रह्मप्रतिषेधैव राजवाक्यं तत्परं भवतु अग्निशाकपार्थिवाचार्यवाक्यमित्याशङ्क्याह नचेति । तत्र वक्तृभेदेप्येकवाक्यताऽग्निभिर्दर्शिताऽचार्यस्तु ते गतिं वक्ष्यति, इह तु तदभावाद्वाक्यभेद इत्यर्थः ।

(२) तर्हि बालाकिवाक्ये ब्रह्मशब्दस्य का गतिरित्यत्राह तस्मादिति । राजवाक्यमेव ग्राह्यं बालाकिवचनस्त्वसद्वादवत्पूर्वपक्षतया न ग्राह्यमिति भावः । राजवाक्ये च ब्रह्मपरत्वमसम्भवीत्याह अत्र चेत्यादिना ।

(३) सङ्कुचितवृत्तिः, सर्वशब्द इत्यर्थः, सङ्कोचमेवाह बहूनिति ।

(४) विप्रतिषेधवाक्ययोरेकत्वेपि पूर्वपक्षसङ्क्रमनाभिप्रायेणाह यदि त्विति ।

(५) जीवाभिधाने हेतुमाह यत्कारणमिति । उपेतं-अस्तेवास्तित्वेनागतम्

(६) वक्ष्यमाणोपसंहारादपि जीवपरत्वमित्याह परस्तादपीति ।

(७) ननु विभुनो निरवयस्य च जीवस्यापि स्वप्नादयसम्भवात्कथं तत्परत्वे 'यस्य वै तत्कर्मेति वाक्यस्य निर्देशोऽत आह यस्येति । तथाचोपचारेण लक्षणया वा कर्मशब्दस्य धर्माधर्मवाचकत्वं स्वीकृत्य जीवपरमुक्तवाक्यं व्याख्येयमिति भावः ।

त्वम् । ये च प्रश्नप्रतिवचने 'क्वैष एतद्बालाके पुरुषोऽशयिष्ट, यदा सुप्तः स्वप्नं न कंचन पश्यती'ति, अनयोरपि न स्पष्टं ब्रह्माभिधानमुपलभ्यते । जीवव्यतिरेकश्च प्राणात्मनो हिरण्यगर्भस्याप्युपपद्यते, तस्माज्जीवप्राणयोरन्यतर इह ग्राह्यो न परमेश्वर इति प्राप्तम् ।

एवं प्राप्ते उच्यते—

(१)मृषावादिनमापोद्य बालाकिं ब्रह्मवादिनम् ।
राजा कथमसम्बद्धं मिथ्या वा वक्तुमर्हति ॥

(२)यथा हि केनचिन्मणिलक्षणज्ञमानिना काचे मणिरेष वेदितव्य इत्युक्ते परस्य काचोऽयं मणिर्न तल्लक्षणायोगादित्यभिधाय आत्मनो विशेषं जिज्ञापयिषोस्तत्त्वाभिधानमसम्बद्धम्, अमणौ मण्यभिधानं न पूर्ववादिनो विशेषमापादयति, स्वयमपि मृषाभिधानात्, तस्मादनेनोत्तरवादिना पूर्ववादिनो विशेषमापादयता मणितत्त्वमेव वक्तव्यम्, एवमजातशत्रुणा दृप्तबालाकेरब्रह्मवादिनो विशेषमात्मनो दर्शयता जीवप्राणाभिधाने असम्बद्धमुक्तं स्यात्, तयोर्वाऽब्रह्मणोर्ब्रह्माभिधाने मिथ्याभिहितं स्यात्, तथा च न कश्चिद्विशेषो बालाकेर्गार्ग्यादजातशत्रोर्भवेत् । तस्मादनेन ब्रह्मतत्त्वमभिधातव्यं, तथासत्यस्य न मिथ्यावद्यम् । (३)तस्माद् 'ब्रह्म ते ब्रवाणी'ति ब्रह्मणोपक्रमा'त्सर्वान्पाप्मनोपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यं पर्येति य एवं वेदे'ति च सति सम्भवे सर्वश्रुतेरसंकोचाच्चिरतिशयेन फलेनोपसंहाराद्(४)ब्रह्मवेदनादन्यतश्च तदनुपपत्तेरादित्यादिपुरुषकर्तृत्वस्य च स्वातन्त्र्यलक्षणस्य मुख्यस्य ब्रह्मण्येव सम्भवादन्येषां हिरण्यगर्भादीनां तत्पारतन्त्र्यात् (५)'क्वैष एतद्बालाके' इत्यादेर्जीवाधिकरणभवनापादानप्रश्नस्य 'यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति' इत्यादेरुत्तरस्य च ब्रह्मण्येवोपपत्तेर्ब्रह्मविषयत्वं निश्चीयते । अथ कस्मान्न भवतो हिरण्यगर्भगोचर एव प्रश्नोत्तरे, तथा च नैताभ्यां ब्रह्मविषयत्वसिद्धिरित्येतन्निराचिकीर्षुः पठति—"एतस्मादात्मनः प्राणा यथा यथायतनं प्रतिष्ठन्त" इति । एतदुक्तं भवति । आत्मैव जीवप्राणादीनामधिकरणं नान्यदिति (६) । यद्यपि च जीवो नात्मनो भिद्यते; तथाप्युपाध्यवच्छिन्नस्य परमात्मनो जीवत्वेनोपाधिभेदाद्भेदमारोप्याधाराधेयभावो द्रष्टव्यः । एवं च जी

(१) सिद्धान्तसङ्ग्राहकश्लोकमाह मृषेति । आदित्यादीन् ब्रह्मनिष्ठान् ब्रह्मतिमिथ्यावादिनं बालकिं 'मृषा मा संवदिष्ठा' इति निरस्य राजा सत्यं ब्रह्माभिधित्सन् जीवं प्राणं वा यदि ब्रूयात्तदाऽसंबद्धप्रलापितया मिथ्यावादी स्यात्तन्नार्हमिति श्लोकार्थः ।

(२) दृष्टान्तप्रदर्शनपूर्वकं श्लोकार्थं विवृण्वन्नाह यथेति ।

(३) मिथ्याभिधानम् । एवं च भिन्नवक्तृकवाक्यद्वयस्यापि भ्रमप्रसक्तिनिरासपरतयैकवाक्यत्वाद्ब्रह्मोपक्रमे सिद्धेऽस्योपसंहारेण सङ्गतत्वात्सर्वस्य सन्दर्भस्य ब्रह्मपरत्वमित्युपसंहरति तस्मादिति ।

(४) अयं श्रुत्यसङ्कोचे हेतुः ।

(५) हिरण्यगर्भे व्यतिरेकनिर्देश इति पूर्वपक्षिणोक्तं दूषयन्नाह क्वैष इति । अत्र 'हे बालाके एष पुरुषः क्वैतदशयिष्ट' इति प्रश्ने, एतदित्थमिति जीवाभयः, क्व वा एतदभूदिति भवनसम्बन्धी, कुत एतदागादिति अपादानविषयः प्रश्नस्तथा प्राण एवैकधा भवति इति भवनप्रश्नस्य, तदेनं वाक्यशेषेणाभिसन्धाप्योनेति शयनप्रश्नस्य उत्तरमेवमन्ये प्रश्ना उत्तराणि च हिरण्यगर्भे न सम्भवन्ति जीवस्य जीवान्तरात्मत्वायोगादिति भावः ।

(६) न केवलमनुपपत्त्या प्रश्नोत्तरयोर्ब्रह्मार्थत्वं किन्त्वात्मशब्दादपि तथात्वमिति भावः ।

वभवनाधारत्वमपादानत्वं च परमात्मन उपपन्नम् । तदेवं बालाक्यजातशत्रुसंवादवाक्यसन्दर्भस्य ब्रह्मपरत्वे स्थिते 'यस्य वैतत्कर्मे'ति व्यापाराभिधाने न संगच्छत इति कर्मशब्दः कार्याभिधायी भवति, एतदिति सर्वनामपरामृष्टं च तत्कार्यं, सर्वनाम चेदं सन्निहितपरामर्शि, न च किञ्चिदिह शब्दोक्तमस्ति सन्निहितम् । न चादित्यादिपुरुषाः सन्निहिता अपि परामर्शार्हाः बहुत्वात्पुंल्लिङ्गत्वाच्च । एतदिति चैकस्य नपुंसकस्याभिधानात् 'एतेषां पुरुषाणां कर्ते'त्यनेनैव गतार्थत्वाच्च । तस्मादशब्दोक्तमपि प्रत्यक्षसिद्धं सम्बन्धार्हं जगदेव परामृष्टव्यम् । (१)एतदुक्तं भवति—अत्यल्पमिदमुच्यते एतेषामादित्यादिगतानां जगदेकदेशभूतानां कर्तेति, किंतु कृत्स्नमेव जगद्यस्य कार्यमिति वाशब्देन सूच्यते । जीवप्राणशब्दौ च ब्रह्मपरौ(२)जीवशब्दस्य ब्रह्मोपलक्षणपरत्वाद् , न पुनर्ब्रह्मशब्दो जीवोपलक्षणपरस्तथा सति हि बहुसमञ्जसं स्यादित्युक्तम् । न चानधिगतार्थावबोधनस्वरसस्य शब्दस्याधिगतबोधनं युक्तम् । नाप्यनधिगतेनाधिगतोपलक्षणमुपपन्नम् । (३) न च सम्भवत्येकवाक्यत्वे वाक्यभेदो न्याय्यः । वाक्यशेषानुरोधेन च जीवप्राणपरमात्मोपासनात्रयविधाने वाक्यत्रयं भवेत्पौर्वापर्यपर्यालोचनया तु ब्रह्मोपासनपरत्वे एकवाक्यतैव । तस्मान्न जीवप्राणपरत्वमपि तु ब्रह्मपरत्वमेवेति सिद्धम् । स्यादेतत् , निर्दिश्यन्तां पुरुषाः कार्यास्तद्विषया तु कृतिरनिर्दिष्टा तत्फला वा कार्यस्योत्पत्तिस्ते यस्येदं कर्मेति निर्देक्ष्येते, ततः कुतः पौनरुक्त्यमित्यत आह-"**नापि पुरुषविषयस्ये**"**ति** (पृ०४२०-पं०२)। (४)(एतदुक्तं भवति) कर्तृशब्देनैव कर्तारमाभिदधता तयोरुपात्तत्वादाक्षिप्तत्वान्नहि कृतिं विना कर्त्ता भवतीनापि कृतिर्भावनापराभिधाना भूतिमुत्पत्तिं विनेत्यर्थः । ननु यदीदमा जगत्परामृष्टं ततस्तत्रान्तर्भूताः पुरुषा अपीति य एतेषां पुरुषाणामिति पुनरुक्तमत आह-"**एतदुक्तं भवति । य एतेषां पुरुषाणा**"**मिति** ॥ १६ ॥ १७ ॥

सू० अन्यार्थन्तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥

ननु 'प्राण एवैकधा भवती'त्यादिकादपि वाक्याज्जीवातिरिक्तः कुतः प्रतीयत(५)इत्यतो वाक्यान्तरं पठति—"**एतस्मादात्मनः प्राणा**" इति (पृ० ४२२ पं० ४) । अपि च सर्ववेदान्तसिद्धमेतादित्याह—"**सुषुप्तिकाले चे**"**ति** । वेदान्तप्रक्रियायामेवोपपत्तिमुपसंहारव्याजेनाह-"**तस्माद्यत्राऽस्य**"आत्मनो यतो निःसम्बोधोऽतः स्वच्छतारूपमिव रूपमस्येति स्वच्छतारूपो न तु स्वच्छतैव लयविक्षेपसंस्कारयोस्तत्र भावात् , समुदाचरद्धीविक्षेपाभा-

(१) ननु सिद्धान्तिमतेऽपि ब्रह्मणः सर्वकर्तृत्वादादित्यादिकर्तृत्वाभिधानं पुनरुक्तं स्यादत आह एतदुक्तमिति । बालाकिभ्रमापनोदार्थं पुनरेकदेशोक्त्या न पुनरुक्तिरित्यर्थः ।

(२) ब्रह्मपराविति । प्राणयतीति योगात्प्राणशब्दः जीवसुप्तिस्थानभूतब्रह्मलक्षणार्थ, पुरुषशब्दश्च जीवत्वेऽपि ब्रह्मपर इत्यर्थः । असमञ्जसं-विश्वकर्तृत्वादिरूपम् ।

(३) ननु किं जीवस्य ब्रह्मोपलक्षकत्वेन, प्रसिद्धावपि जीवप्राणावनूद्य नामादिवदुपास्तिर्विधयतामित्याशङ्क्य निराकुर्वन् जीवमुख्येति (अ० १ पा० १० सू० ३१) व्याचष्टे नचेति ।

(४)( ) एतच्चिह्नान्तर्गतः पाठः का० मु० मा० पुस्तके नास्ति ।

(५) प्राणशब्दो हिरण्यगर्भमाह तत्र कुतो ब्रह्मप्रतीतिरित्याशङ्क्यार्थः । आत्मशब्दोऽस्यत इति परिहारार्थः ।

वमात्रेणोपमानम्(१)। एतदेव विभजते—"उपाधिभि"रन्तःकरणादिभि"र्जनितं" यद्विशेषविज्ञानं घटपटादिविज्ञानं तद्रहितं स्वरूपमात्मनो, (२)यदि विज्ञानमित्येवोच्येत ततस्तदविशिष्टमनवच्छिन्नं सद्ब्रह्मैव स्यात्तच्च नित्यमिति नोपाधिजनितं नापि तद्रहितं स्वकं ब्रह्मस्वभावस्याप्रहाणात्, अत उक्तं विशेषेति। यदा तु लयलक्षणाविद्योपबृंहितो विक्षेपसंस्कारः समुदाचरति तदा विशेषविज्ञानोत्पादात्स्वप्नजागरावस्थातः परमात्मनो रूपाद्भ्रंशरूपमागमनमिति। न केवल कौषीतकिब्राह्मणे वाजसनेयेप्येवमेव प्रश्नोत्तरयोर्जीवव्यतिरिक्तमामनन्ति परमात्मानमित्याह—"अपि चैवमेक" इति। नन्वत्राकाशं शयनस्थानं तःकुतः परमात्मप्रत्यय इत्यत आह—"आकाशशब्दश्चे"ति। न तावन्मुख्यस्याकाशस्यात्माधारत्वसम्भवः। यदपि च द्वासप्ततिसहस्रहिताभिधाननाडीसचारेण सुषुप्त्यवस्थायां पुरीतदवस्थानमुक्तं तदप्यन्तःकरणस्य। तस्माद्हरोस्मिन्नन्तराकाश इतिवदाकाशशब्दः परमात्मनि मन्तव्य इति। प्रथमं भाष्यकृता जीवनिराकरणाय सूत्रमिदमवतारितं तत्र मन्दधियां नेदं प्राणनिराकरणायेति बुद्धिर्मा भूदित्याशयवानाह—"प्राणनिराकरणस्यापी"ति (पृ० ४२३ पं० ३)। 'तौ ह(३) बालाक्यजातशत्रू सुप्तं पुरुषमाजग्मतुस्तमजातशत्रुर्नामभिरामन्त्रयांचक्रे 'बृहत्पाण्डुरवासः सोमराजन्नि'ति, स आमन्त्र्यमाणो नोत्तस्थौ, तं पाणिनापेषं बोधयांचकार, स होत्तस्थौ स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूदे'त्यादि, सोऽयं सुप्तपुरुषोत्थापनेन प्राणादिव्यतिरिक्तोपदेश इति॥ १८॥

सू० वाक्यान्वयात्॥ १९॥

(४)ननु मैत्रेयीब्राह्मणोपक्रमे याज्ञवल्क्येन गार्हस्थ्याश्रमादुत्तमाश्रमं यियासता मैत्रेय्या भार्यायाः कात्यायन्या सहार्थसविभागकरण उक्ते मैत्रेयी याज्ञवल्क्यं पतिममृतत्वार्थिनी पप्रच्छ—'यन्नु म इयं भगोः(५)सर्वा पृथ्वी वित्तेन पूर्णा स्यात्किमहं तेनामृता स्यामुत ने'ति। तत्रनेति होवाच याज्ञवल्क्यः। यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेन। एवं वित्तेनामृतत्वाशा भवेद्यदि वित्तसाध्यानि कर्माण्यमृतत्वाय युज्येरन्, तदेव तु नास्ति, ज्ञानसाध्यत्वादमृतत्वस्य, कर्मणां च ज्ञानविरोधिनां तत्सहभावित्वानुपपत्तेरिति भावः। सा होवाच मैत्रेयी—'येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहि'। अमृतत्वसाधनमिति शेषः। तत्रामृतत्वसाधनज्ञानोपन्यासाय वैराग्यपूर्वकत्वात्तस्य रागविषयेषु तेषुतेषु पतिजायादिषु वैराग्यमुत्पादयितुं याज्ञवल्क्यो 'न वा अरे पत्युः कामाये'त्यादिवाक्यसन्दर्भमुवाच। (६)आत्मौपाधिकं हि प्रियत्वमेषां न तु साक्षात्प्रियाण्येतानि, तस्मादेतेभ्यः पतिजायादिभ्यो विरम्य यत्र साक्षात्प्रेम स एवात्मा वा अरे

---

(१) उपमानमिति। भ्रमसंस्कारे सत्यपि प्रोद्भूतभ्रमाभावान्मुक्त्योपमानं सुषुप्ते रूपशब्देन भाष्ये कृतमित्यर्थः।

(२) उपाधिजनितावशेषविज्ञानेति भाष्ये विशेषपदव्यावृत्तिमाह यदीति। राहित्याभावे हेतुः ब्रह्मस्वभावस्याप्रहाणादिति।

(३) भाष्योक्तप्राणादिव्यतिरिक्तोपदेशं दर्शयति तौ हेति।

(४) मैत्रेयीब्राह्मणार्थमनुक्रामन् प्रतर्हननयेन गतार्थतामाशङ्कते नन्विति।

(५) भगवन्!। (६) भाष्योक्तवाक्यसन्दर्भं व्याचष्टे आत्मेति।

द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः । वाशब्दोऽवधारणे । आत्मैव द्रष्टव्यः साक्षात्कर्तव्यः । एतत्साधनानि च श्रवणादीनि विहितानि 'श्रोतव्य' इत्यादिना । "कस्मात्" ? आत्मनो वाऽरे दर्शनेन श्रवणादिसाधनेनेदं जगत्सर्वं विदितं भवतीति वाक्यशेषः । यतो नामरूपात्मकस्य जगतस्तत्त्वं पारमार्थिकं रूपमात्मैव भुजङ्गस्येव समारोपितस्य तत्त्वं रज्जुस्तस्मादात्मनि विदिते सर्वमिदं जगत्तत्त्वं विदितं भवति रज्ज्वामिव विदितायां समारोपितभुजङ्गस्य तत्त्वं विदितं भवति यतस्तस्मादात्मैव द्रष्टव्यो न तु तदतिरिक्तं जगत्स्वरूपेण द्रष्टव्यम् । (१)कुतः ? यतो ब्रह्म तं परादाद्ब्राह्मणजातिर्ब्राह्मणोऽहमित्यभिमान इति यावत् । परादात्—पराकुर्यात्, अमृतत्वपदात्, कं ? योऽन्यत्रात्मनो ब्रह्म ब्राह्मणजातिं वेद । एवं क्षत्त्रादिष्वपि द्रष्टव्यम् । आत्मैव जगतस्तत्त्वं न तु तदतिरिक्तं तदित्यत्रैव भगवती श्रुतिरुपपत्तिं दृष्टान्तप्रबन्धेनाह । (२)यत् खलु यद्ग्रहं विना न शक्यते ग्रहीतुं तत्ततो न व्यतिरिच्यते, यथा रजतं शुक्तिकाया भुजङ्गो वा रज्जोः, दुन्दुभ्यादिशब्दसामान्याद्वा तत्तच्छब्दभेदाः, न गृह्यन्ते च चिद्रूपग्रहणं विना स्थितिकाले नामरूपाणि तस्मान्न चिदात्मनो भिद्यन्ते, तदिदमुक्तं—"स यथा दुन्दुभेर्हन्यमानस्ये"ति । दुन्दुभिग्रहणेन तद्गतं शब्दसामान्यमुपलक्षयति । न केवलं स्थितिकाले नामरूपप्रपञ्चश्चिदात्मातिरेकेणाग्रहणाच्चिदात्मनो न व्यतिरिच्यतेऽपि तु नामरूपोत्पत्तेः प्रागपि चिद्रूपावस्थानात् तदुपादानत्वाच्च नामरूपप्रपञ्चस्य तदनतिरेकः, रज्जूपादानस्येव भुजङ्गस्य रज्जोरनतिरेक इत्येतद् दृष्टान्तेन साधयति भगवती श्रुतिः-स यथा(३)द्वैधोभेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद' इत्यादिना चतुर्विधो मन्त्र उक्तः, इतिहास इत्यादिनाऽष्टविधं (४)ब्राह्मणमुक्तम् । एतदुक्तं भवति-यथाग्निमात्रं प्रथममवगम्यते क्षुद्राणां विस्फुलिङ्गानामुपादानम्, अथ ततो विस्फुलिङ्गा व्युच्चरन्ति न चैतेभ्यस्तत्त्वान्यत्वाभ्यां शक्यन्ते निर्वक्तुम्, एवमृग्वेदादयोऽप्यल्पप्रयत्नाद्ब्रह्मणो व्युच्चरन्तो न ततस्तत्त्वान्यत्वाभ्यां निरुच्यन्ते ऋगादिभिर्नामोपलक्ष्यते, यदा च नामधेयस्येयं गतिस्तदा तत्पूर्वकस्य रूपधेयस्य कैव कथेति भावः । न केवलं तदुपादानत्वात्ततो न व्यतिरिच्यते नामरूपप्रपञ्चः,

---

(१) आत्मदर्शनफलमुक्त्वाऽनात्मदृष्टौ दोषदर्शकं वाक्यमवतारयति कुत इति । ब्राह्मण्याद्यभिमानो नियोज्यत्वाविर्भावेनात्मतत्त्वादपैतीत्यर्थः ।

(२) 'स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दाञ्शक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत' इत्यादि (बृ० ४।५।८) श्रुतिसूचितानुमानं विशदयति यदिति । स दृष्टान्तो यथा लोके दुन्दुभेर्हन्यमानस्य लक्षणया हन्यमानदुन्दुभिव्यक्तशब्दत्वसामान्यस्य विशेषभूतात् सामान्याद्ग्राह्यत्वेन गृहीतुं शक्नुयादिति व्यतिरेकः, एवमन्वयोऽपि दुन्दुभिशब्दस्य ग्रहणेन ताडिशेषशब्दो आघातसंज्ञको गृहीत आघातस्य वा ग्रहणेन तदवान्तरविशेषशब्दो गृहीत इति श्रुत्यर्थः ।

(३) आर्द्रेधोभिरिद्धः आर्द्रेधाः, अभ्याहित-उपचितः ।

(४) 'ऊर्वशी हाप्सराः पुरूरवसं चक्रमे' इत्यादिरितिहासः(१), 'सदेव सोम्येदमग्र आसीदि'त्यादिसर्गकथनात्मकं पुराणम्(२), देवयजनविद्याया विद्या(३), 'प्रियमित्येतदुपासीत' इत्यादिरहस्योपासनात्मिका उपनिषदः(४), 'तदेते श्लोका' इत्यादिनिर्दिष्टा ब्राह्मणप्रभवा मन्त्रश्लोकाः(५), 'आत्मेत्येवोपासीत' इत्यादिवस्तुसङ्ग्रहवाक्यानि सूत्राणि(६), सङ्ग्रहविवरणरूपाण्यनुव्याख्यानि(७), मन्त्रव्याख्यात्मकानि व्याख्यानि(८) इत्येवमष्टविधं ब्राह्मणं बोध्यम् ।

प्रलयसमये च तदनुप्रवेशात्ततो न व्यतिरिच्यते, (१)यथा सामुद्रमेवाम्भः पृथिवीतेजःसम्पर्कात्कठिन्यमुपगतं सैन्धवं खिल्यः स हि स्वाकरे समुद्रे क्षिप्तोऽम्भ एव भवत्येवं चिदम्भोधौ लीनं जगच्चिदेव भवति न तु ततोऽतिरिच्यत इति । एतद्दृष्टान्तप्रबन्धेनाह—"स यथा सर्वासामपामि"त्यादि(२) । दृष्टान्तप्रबन्धमुक्त्वा दार्ष्टान्तिके योजयति "एवं वा अरे इदं महदि"ति । बृहत्त्वेन ब्रह्मोक्तम् । इदं ब्रह्मेत्यर्थः । भूतं सत्यम् , अनन्तम् नित्यम् , अपारं सर्वगतं, विज्ञानघनो विज्ञानैकरस इति यावत् । एतेभ्यः कार्यकारणभावेन व्यवस्थितेभ्यो भूतेभ्यः समुत्थाय साम्येनोत्थाय कार्यकारणसंघातस्य व्यवच्छेदा(३)द्दुःखित्वशोकित्वादयस्तदवच्छिन्ने चिदात्मनि तद्विपरीतेऽपि प्रतीयन्ते यथोदकप्रतिबिम्बिते चन्द्रमसि तोयगताः कम्पादयस्तदिदं साम्येनोत्थानं, यदा त्वागमाचार्योपदेशपूर्वकमननानिदिध्यासनप्रकर्षपर्यन्तजोऽस्य ब्रह्मस्वरूपसाक्षात्कार उपावर्तते तदा निर्मृष्टानिखिलसवासनाविद्यामलस्य कार्यकरणसङ्घातभूतस्य विनाशे तान्येव भूतानि नश्यन्त्यनु तदुपाधिश्चिदात्मनः खिल्यभावो विनश्यति । ततो न प्रेत्य कार्यकरणभूतनिवृत्तौ रूपगन्धादिसंज्ञाऽस्तीति, न प्रेत्य संज्ञास्तीति संज्ञामात्रनिषेधादात्मा नास्तीति मन्यमाना सा मैत्रेयी होवाच–'अत्रैव मा भगवानमूमुहन्मोहितवान् न प्रेत्य संज्ञास्तीति' ।(४)स होवाच याज्ञवल्क्यः स्वाभिप्रायं द्वैते हि रूपादिविशेषसंज्ञानिबन्धनो दुःखित्वाद्यभिमानः । (५)आनन्दज्ञानैकरसब्रह्माद्वयानुभवे तु तत्केन कं पश्येत् (६) ब्रह्म वा केन विजानीयात् नहि तदास्य कर्मभावोऽस्ति स्वप्रकाशत्वात् । एतदुक्तं भवति—न संज्ञामात्रं मया व्यासेधि किन्तु विशेषसंज्ञेति । तदेवममृतत्वफलेनोपक्रमान्मध्ये चात्मविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तदुपपादनाद् उपसंहारे च 'महद्भूतमनन्तमि-' त्यादिना च ब्रह्मरूपाभिधानाद्द्वैतनिन्दया चाद्वैतगुणकीर्तनाद्ब्रह्मैव मैत्रेयीब्राह्मणे प्रतिपाद्यं न जीवास्मेति नास्ति पूर्वपक्ष इत्यनारभ्यमेवेदमधिकरणम् ।

(७)अत्रोच्यते । भोक्तृत्वज्ञातृताजीवरूपोत्थानसमाधये मैत्रेयीब्राह्मणे पूर्वपक्षेणोपक्रमः कृतः । पतिजायादिभोग्यसम्बन्धो नाभोक्तुर्ब्रह्मणो युज्यते, नापि ज्ञानकर्तृत्वमकर्तुः साक्षाच्च

---

(१) 'स यथा सैन्धवखिल्य' इति वाक्येन ज्ञाननिमित्तक आत्यन्तिकः प्रलयः प्रपञ्चस्योक्तस्तमाह यथेति । खिल्यो—घनः ।

(२) इदमप्युपनिषत्प्रतीकम् । अनेनात्यन्तिकप्रलये प्राकृतलयो दृष्टान्तत्वेनोक्त इत्यर्थः ।

(३) अल्पत्वात् ।

(४) 'यत्र हि द्वैतमिव भवती'त्यादिवाक्यं विभजते सहोवाचेति ।

(५) 'यत्र त्वस्य सर्वमात्मैवे'त्यादिवाक्यं विवृणुते आनन्देति ।

(६) विषयाभावेऽपि आत्मभूतं ब्रह्म जानीयादिति शङ्कानिवृत्त्यर्थं 'विज्ञातारमरे केन विजानीयादि'ति वाक्यं व्याचष्टे ब्रह्म वेति ।

(७) यद्यप्यत्र जीवब्रह्मालिङ्गसंशये सर्वात्मकब्रह्मण्यन्तर्भवन्तो जीवधर्मा न ब्रह्मरतया योज्यन्त इति दर्शनाधिकरण एव तत्सिद्धेर्नापि प्रसिद्धजीवानुवादेनाप्रसिद्धब्रह्मात्मबोधनपरत्वमवधार्यते सुषुप्त्युत्क्रान्त्यधिकरणेनैव तत्सिद्धेस्तथापि जीवमनूद्य ब्रह्मत्वबोधनादनुवाद्यविधेययोर्भेदाभेदाविति मतानिरासेनैकान्तिकमद्वैतं प्रतिपाद्यत इत्याह अत्रोच्यत इत्यादिना सिद्धान्ती । मैत्रेयीब्राह्मणविषये तु भेदपरत्वेन शंक्यमानानां भोक्तृत्वज्ञातृत्वादीनां समाधये जीवमात्रपरत्वेन पूर्वपक्ष उपन्यस्त इत्याह भोक्तृत्वेति । तदेव क्रमशो विभजते पतीति ।

महतो भूतस्य विज्ञानात्मभावेन समुत्थानाभिधानं विज्ञानात्मन एव द्रष्टव्यत्वमाह, अन्यथा ब्रह्मणो द्रष्टव्यत्वपरेऽस्मिन् ब्राह्मणे तस्य विज्ञानात्मत्वेन समुत्थानाभिधानमनुपयुक्तं स्यात्तस्य तु द्रष्टव्यत्वमुपयुज्यते इत्युपक्रममात्रं पूर्वपक्षः कृतः। भोक्तृत्वाच्च भोग्यजातस्येति तदुपोद्बलनमात्रम्। सिद्धान्तस्तु निगदव्याख्यातेन भाष्येणोक्तः ॥ १९ ॥

तदेवं पौर्वापर्यालोचनया मैत्रेयीब्राह्मणस्य ब्रह्मदर्शनपरत्वे स्थिते भोक्त्रा जीवात्मनोपक्रममाचार्यदेशीयमतेन तावत्समाधत्ते सूत्रकारः--

सू० प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

यथा हि वह्नेर्विकारा व्युच्चरन्तो विस्फुलिङ्गा न वह्नेरत्यन्तं भिद्यन्ते तद्रूपानिरूपणत्वा(१)त्तथापि ततोऽत्यन्तमभिन्ना वह्नेरिव परस्परव्यावृत्त्यभावप्रसङ्गात्, तथा जीवात्मानोपि ब्रह्मविकारा न ब्रह्मणोऽत्यन्तं भिद्यन्ते चिद्रूपत्वाभावप्रसङ्गान्नाप्यत्यन्तं न भिद्यन्ते परस्परं व्यावृत्त्यभावप्रसङ्गात्, सर्वज्ञं प्रत्युपदेशवैयर्थ्याच्च। तस्मात्कथंचिद्भेदो जीवात्मनामभेदश्च। तत्र तद्विज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धये विज्ञानात्मपरमात्मनोरभेदमुपादाय परमात्मनि दर्शायेतव्ये विज्ञानात्मनोपक्रम इत्याश्मरथ्य आचार्यो मेने ॥ २० ॥

आचार्यदेशीयान्तरमतेन समाधत्ते—

सू० उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥२१॥

जीवो हि परमात्मनोऽत्यन्तं भिन्न एव सन् देहेन्द्रियमनोबुध्युपधानसम्पर्कात्सर्वदा कलुषस्तस्य च ज्ञानध्यानादिसाधनानुष्ठानात्सम्प्रसन्नस्य देहेन्द्रियादिसंघातादुत्क्रमिष्यतः परमात्मनैक्योपपत्तेरिदमभेदेनोपक्रमणम्। एतदुक्तं भवति—भविष्यन्तमभेदमुपादाय भेदकालेऽभेद उक्तः। यथाहुः पाञ्चरात्रिकाः--

आमुक्तेर्भेद एव स्याज्जीवस्य च परस्य च।
मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः ॥ इति।

अत्रैव श्रुतिमुपन्यस्यति-"श्रुतश्चैव"मिति (पृ० ४२५-२२)। पूर्वं देहेन्द्रियाद्युपाधिकृतं कलुषत्वमात्मन उक्तं, सम्प्रति स्वाभाविकमेव जीवस्य नामरूपप्रपञ्चाश्रयत्वलक्षणं कालुष्यं पार्थिवानामणूनामिव(२) श्यामत्वं केवलं पाकेनेव ज्ञानध्यानादिना तदपनीय जीवः परात्परतरं पुरुषमुपैतीत्याह—"क्वचिच्च जीवाश्रयमपी"ति (पृ० ४२६ प० २)। नदी निदर्शनं यथा 'सोम्येमा नद्य' इति ॥ २१ ॥

तदेवमाचार्यदेशीयमतद्वयमुक्त्वाप्रपरितुष्यन्नाचार्यमतमाह सूत्रकारः--

सू० अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

एतद्व्याचष्टे-"अस्यैव परमात्मन" इति। न जीव आत्मनोऽन्यो नापि तद्वि-

(१) वह्निरूपानिरूपणत्वात्। तत इति। अत्यन्तभेदे हि ब्रह्मवत्परस्परमव्यावृत्तिप्रसङ्गात् ब्रह्मव्यतिरिक्तजीवाभावे च तस्यैवोपदेशः स्यात्तस्य चायुक्तत्वादिति दार्ष्टान्तिकान्तार्थो बोध्यः।

(२) 'अणुश्यामतावदेतत्स्यात्' इति गौतमसूत्रेषु धृतस्य प्राचीननैयायिकमतस्य दृष्टयेदमुक्तं, तथाच यथानोदिरप्यणुश्यामता पाकेन विनश्यति तथा जीवस्य स्वाभाविकमपि कालुष्यं ज्ञानादिना नश्यतीति भावः।

कारः किं स्वात्मैवाविद्योपाधानकल्पितावच्छेदः, आकाश इव घटमणिकादिकल्पितावच्छेदो घटाकाशो मणिकाकाशो न तु परमाकाशादन्यस्तद्विकारो वा । ततश्च जीवात्मनोपक्रमः परमात्मनैवोपक्रमस्तस्य ततोऽभेदात् । स्थूलदर्शिलोकप्रतीतिसौकर्यायौपाधिकेनात्मरूपेणोपक्रमः कृतः । अत्रैव श्रुतिं प्रमाणयति—"**तथा चे**'ति । अथ विकारः परमात्मनो जीवः कस्मान्न भवत्याकाशादिवदित्याह—"**न च तेजःप्रभृतीनामि**"ति । नहि यथा तेजःप्रभृतीनामात्मविकारत्वं श्रूयते एवं जीवस्येति । आचार्यस्त्रयमतं विभजते—"**काशकृत्स्नस्याचार्यस्ये**"ति । आत्यन्तिके सत्यभेदे कार्यकारणभावाभावात् अनात्यन्तिकोऽभेद आस्थेयस्तथा च कथंचिद्भेदोपीति तमास्थाय कार्यकारणभाव इति(२) । मतत्रयमुक्त्वा काशकृत्स्नीयमतं साधुत्वेन निर्द्धारयति—"**तत्र**-तेषु मध्ये, **काशकृत्स्नीयं मत**"मिति (पृ० ४२७० पं० ३) । आत्यन्तिके हि जीवपरमात्मनोरभेदे तात्त्विकेऽनाद्यविद्योपाधिकल्पितो भेदस्तत्त्वमसीति जीवात्मनो ब्रह्मभावतत्त्वोपदेशश्रवणमननिदिध्यासनप्रकर्षपर्यन्तजन्मना साक्षात्कारेण विद्यया शक्यः समूलकाषं कषितुं रज्ज्वामहिविभ्रम इव रज्जुतत्त्वसाक्षात्कारेण राजपुत्रस्येव च म्लेच्छकुले वर्द्धमानस्यात्मनि समारोपितो म्लेच्छभावो राजपुत्रोऽसीति आप्तोपदेशेन । न तु मृद्विकारः शरावादिः शतशोऽपि मृन्मृदिति चिन्त्यमानस्तज्जन्मना मृद्भावसाक्षात्कारेण शक्यो निवर्तयितुं, तत्कस्य हेतोस्तस्यापि मृदो भिन्नाभिन्नस्य तात्त्विकत्वाद्, वस्तुनस्तु ज्ञानेनोच्छेत्तुमशक्यत्वात् सोऽयं(१) प्रतिपिपादयिषितार्थानुसारः । अपि च जीवस्यात्मविकारत्वे तस्य ज्ञानध्यानादिसाधनानुष्ठानात् स्वप्रकृतावप्यये सति नामृतत्वस्याशास्तीत्यपुरुषार्थत्वममृतत्वप्राप्तिश्रुतिविरोधश्च, काशकृत्स्नमते त्वेतदुभयं नास्तीत्याह—"**एवं च सती**"ति । ननु यदि जीवो न विकारः किन्तु ब्रह्मैव कथ तर्हि तस्मिन्नामरूपाश्रयत्वश्रुतिः कथं च यथाग्नेः क्षुद्रा विस्फुलिङ्गा इति ब्रह्मविकारश्रुतिरित्याशङ्कामुपसंहारव्याजेन निराकरोति—"**अतश्च स्वाश्रयस्ये**"ति । यतः प्रतिपिपादयिषितार्थानुसारश्चामृतत्वप्राप्तिश्च विकारपक्षे न सम्भवतः, अतश्चेति योजना ।

द्वितीयपूर्वपक्षबीज(३)मनयैव त्रिसूत्र्यापाकरोति—"**यदप्युक्त**"मिति । शेषमतिरोहितार्थं व्याख्यातार्थं च । (४)तृतीयपूर्वपक्षबीजनिरासे काशकृत्स्नीयेनैवेत्यवधारणं तन्मताश्रयणेनैव तस्य शक्यनिरासत्वात् । (५)ऐकान्तिके त्वद्वैते आत्मनोऽन्यकर्मकरणे 'केन कं पश्येदि'ति आत्मनश्च कर्मत्वं 'विज्ञातारमरे केन विजानीयादि'ति शक्यं निषेद्धुम् । भेदाभेदपक्षे वैकान्तिके वा भेदे सर्वमेतदद्वैताश्रयमशक्यमित्यवधारणस्यार्थः । न केवलं काशकृ-

---

(२) कार्यकारणभाव इति । आश्मरथ्यमते आत्यन्तिकेऽभेदे आस्थिते सति कार्यकारणभावाभावप्रसङ्गात् ईषद्भेदोप्यायातीति भावः । (२) सोय—परापरयोरत्यन्ताभेद ।

(३) परस्यैव समुत्थानश्रुत्या जीवाभेदाभिधानरूपं द्वितीयपूर्वपक्षबीजमित्यर्थः ।

(४) विज्ञातृशब्देन कर्तृनिर्देशलिङ्गरूपतृतीयं पूर्वपक्षबीजन्तु काशकृत्स्नमतेनैव परिहरणीयमित्याह तृतीयति ।

(५) शक्यनिराकरणत्वमेवाह ऐकान्तिके इति। 'केन कं पश्येदि'त्यनेनान्यकर्मकरणे निषिद्धे सति 'केन कं विजानीयादि'त्यनेन ज्ञानकर्मत्वं निषेद्धुं, शक्यं काशकृत्स्नमते, भेदपक्षे भेदाभेदपक्षे च प्रमाणदैः सत्त्वात्र शक्यमिति भावः ।

रस्नीयदर्शनाश्रयणेन भूतपूर्वगत्या विज्ञातृत्वमपि तु श्रुतिपौर्वापर्यपर्यालोचनयाप्येवमेवेत्याह—**"अपि च यत्र ही"ति** (४२८-१८) । कस्मात्पुनः काशकृत्स्नस्य मतमास्थीयते नेतरेषामाचार्याणामित्यत आह—(१)**दर्शितं तु पुरस्तादि"ति** (पृ० ४२९ पं० ७) । काशकृत्स्नीयस्य मतस्य श्रुतिप्रबन्धोपन्यासेन पुनः श्रुतिमत्त्वं स्मृतिमत्त्वं चोपसंहारोपक्रममाह—**"अतश्चे"ति** । क्वचित्पाठ आतश्चेति । तस्यावश्यं चेत्यर्थः । (२)जननजरामरणभीतयो विक्रियास्तासां सर्वासां 'महानज' इत्यादिना प्रतिषेधः, परिणामपक्षेऽन्यस्य चान्यभावपक्षे ऐकान्तिकाद्वैतप्रतिपादनपरा एकमेवाद्वितीयमित्यादयो द्वैतदर्शननिन्दापराश्चान्योसावन्योहमस्मीत्यादयो जन्मजरादिविक्रियाप्रतिषेधपराश्चैष महानज इत्यादयः श्रुतय उपरुध्येरन् । (३)अपि च यदि जीवपरमात्मनोर्भेदाभेदावास्थीयेयाताँ ततस्तयोर्मिथो विरोधात्समुच्चयाभावादेकस्य बलीयस्त्वे नात्मनि निरपवाद विज्ञानं जायेत बलीयसैकेन दुर्बलपक्षावलम्बिनो ज्ञानस्य बाधनात् । (४)अथ त्वगृह्यमाणविशेषतया न बलावलावधारणं, ततः संशये सति न सुनिश्चितार्थमात्मनि ज्ञानं भवेत्सुनिश्चितार्थं च ज्ञानं मोक्षोपायः श्रूयते 'वेदान्तविज्ञानसुनिश्चितार्था' इति । तदेतदाह—**"अन्यथा मुमुक्षूणामि"ति** । एकत्वमनुपश्यत इति श्रुतिर्न पुनरेकत्वानेकत्वे अनुपश्यत इति । ननु यदि क्षेत्रज्ञपरमात्मनोरभेदो भाविकः, कथं तर्हि व्यपदेशबुद्धिभेदौ क्षेत्रज्ञः परमात्मेति, कथं च नित्यशुद्धबुद्धमुक्तस्वभावस्य भगवतः संसारिता ? अविद्याकृतनामरूपोपाधिवशादिति चेत्, कस्येयमविद्या, ? न तावज्जीवस्य, तस्य परमात्मनो व्यतिरेकाभावात्, नापि परमात्मनस्तस्य विद्यैकरसस्याविद्याश्रयत्वानुपपत्तेः । तदत्र संसारित्वासंसारित्वविद्याविद्यावत्त्वरूपविरुद्धधर्मसंसर्गाद्बुद्धिव्यपदेशभेदाच्चास्ति जीवेश्वरयोर्भेदोपि भाविक इत्यत आह—**"स्थिते च परमात्मक्षेत्रज्ञात्मैकत्व"** इति (पृ० ४३० पं० १) । (५)न तावद्भेदाभेदावेकत्र भाविकौ भवितुमर्हत इति विपश्चितं प्रथमे पादे । (६)द्वैतदर्शननिन्दया चैकान्तिकाद्वैतप्रतिपादनपराः पौर्वापर्यालोचनया सर्वे वेदान्ताः प्रतीयन्ते । तत्र यथा बिम्बादवदातात्तात्त्विके प्रतिबिम्बानामभेदेऽपि नीलमणिकृपाणकाचाद्युपधानभेदात्काल्पनिको जीवानां भेदो बुद्धिव्यपदेशभेदौ वर्तयति 'इदं बिम्बमनदातामिमानि च प्रतिबिम्बानि नीलोत्पलपलाशश्यामलानि वृत्तदीर्घादिभेदभाञ्जि बहूनी'ति, एवं परमात्मनः शुद्धस्वभावाज्जीवानामभेद ऐकान्तिकेप्यनिर्वचनीयानाद्यविद्योपधानभेदात्काल्पनिको जीवानां भेदो बुद्धिव्यपदेशभेदा'वयं च परमात्मा शुद्धा-नानन्दस्वभाव इमे च जीवा अविद्याशोकदुःखाद्युपद्रवभाज' इति वर्तयति । अविद्योपधानं च यद्यपि विद्यास्वभावे परमात्मनि न साक्षादस्ति तथापि तत्प्रतिबिम्बकल्पजीवद्वारेण परस्मि(७)न्नु-

---

(१) पुरुषेण श्रुत्यनुमानाद्वरं प्रत्यक्षश्रुतिदृष्टं मतं गृहीतमिति पारेहारभाष्यार्थोऽत्र बोध्यः ।

(२) 'सर्वाविक्रियाप्रतिषेधादि'ति (पृ० ४२९-२०) भाष्यं विवृण्वन्नाह जननेति ।

(३) 'अन्यथा निरपवादानुपपत्तेरि'ति भाष्यं व्याचष्टे अपि चेति ।

(४) 'सुनिश्चितार्थत्वानुपपत्तेश्चे'ति भाष्यस्याभिप्रायमाहाथस्विति । समबलयोर्धीतविपर्यये विषये सत्प्रतिपक्षानुमानवत्संशय एव स्यादित्यर्थः ।

(५) ननु भेदाभेदसम्भवाच्छ्रौताभेदसिद्धौ मृषाभेद' इति भाष्योक्तिरयुक्तेत्याशंक्याह न तावदिति ।

(६) तर्हि भेद एवास्तु तात्त्विक इत्याक्षेपे आह द्वैतेति ।

(७) ब्रह्मणि, उच्यते प्राचीनाचार्यैरिति शेषः ।

च्यते। न चैवमन्योन्याश्रयो जीवविभागाश्रया विद्या अविद्याश्रयश्च जीवविभाग इति, बीजाङ्कुरवदनादित्वात्। अत एव 'कानुद्दिश्यैष ईश्वरो मायामारचयत्यनर्थिकामुद्देश्यानां सर्गादौ जीवानामभावात्, कथं चात्मानं संसारिणं विविधवेदनाभाजं कुर्यादि'त्याशङ्यनुयोगो निरवकाशः। (१)न खल्वादिमान् संसारो नाप्यादिमानविद्याजीवविभागो येनानुयुज्येतेति। अत्र च नामग्रहणेनाविद्यामुपलक्षयति। स्यादेतत्, यदि न जीवाद्ब्रह्म भिद्यते हन्त जीवः स्फुट इति ब्रह्मापि तथा स्यात्तथा च 'निहितं गुहायामि'ति नोपपद्यत इत्यत आह-"नहि सत्यमि"ति। यथा हि बिम्बस्य मणिकृपाणादयो गुहा एवं ब्रह्मणोपि प्रतिजीवं भिन्ना अविद्या गुहा इति(२)। यथा प्रतिबिम्बेषु भासमानेषु बिम्बं तदभिन्नमपि गुह्यमेवं जीवेषु भासमानेषु तदभिन्नमपि ब्रह्म गुह्यम्। अस्तु तर्हि ब्रह्मणोऽन्यद्गुह्यमित्यत आह—,'न च ब्रह्मणोऽन्य" इति। ये त्वाश्मरथ्यप्रभृतयो "निर्बन्धं कुर्वन्ति ते वेदान्तार्थमि"ति। (३)ब्रह्मणः सर्वात्मना भागशो वा परिणामाभ्युपगमे तस्य कार्यत्वादनित्यत्वाच्च तदाश्रितो मोक्षोपि तथा स्यात्। यदि त्वेवमपि मोक्षं नित्यमकृतकं ब्रूयुस्तत्राह—"न्यायेने"ति। (४)एवं ये नदीसमुद्रनिदर्शनेनामुक्तेर्भेदं मुक्तस्य चाभेदं जीवस्यास्थिषत तेषामपि न्यायेनासंगतिः, नो जातु घटः पटो भवति। ननूक्तं यथा नदी समुद्रो भवतीति। का पुनर्नयभिमताऽऽयुष्मतः? किं पाथःपरमाणव उतैषां संस्थानभेद आहोस्वित्तदारब्धोवयवी? तत्र संस्थानभेदस्य वाऽवयविनो वा समुद्रनिवेशे विनाशात् कस्य समुद्रेणैकता, नदीपाथःपरमाणूनां तु समुद्रपाथःपरमाणुभ्यः पूर्वावस्थितेभ्यो भेद एव नाभेदः, एवं समुद्रादपि तेषां भेद एव। ये (५)तु काशकृत्स्नीयमेव मतमास्थाय जीवं परमात्मनोंऽशमाचक्ष्युस्तेषां कथं 'निष्कलं निष्क्रियं शान्त'-मिति न श्रुतिविरोधः।(६)निष्कलमिति सावयवत्वं व्यासेधि न तु सांशत्वम्,अंशश्च जीवः परमात्मनो नभस इव कर्णनेमिमण्डलावच्छिन्नं नभः शब्दश्रवणयोग्यं वायोरिव च शरीरावच्छिन्नं पञ्चवृत्तिः प्राण इति चेत्। न (७)तावन्नभो नभसोंशस्तस्य तत्त्वात्। कर्णनेमिमण्डलावच्छिन्नमंश इति चेद्, (८)हन्त तर्हि प्राप्ताप्राप्तविवेकेन कर्णनेमिमण्डलं वा तत्संयोगावेत्युक्तं भवति। न च कर्णनेमिमण्डलं तस्यांशस्तस्य ततो भेदात्। तत्संयोगो नभोधर्मत्वात्तस्यांश इति चेत्। न। अनुपपत्तेः, नभोधर्मत्वे हि तदनवयवं सर्वत्राभिन्नमिति तत्संयोगः

---

(१) अतएवेत्यादिकमेव विवृणोति न खल्विति। अयं भाव:-आवद्याधीनस्य जीवविभागस्यानादित्वादुद्देश्याभावोऽसिद्धः, अनादित्वाच्च मायाया आरचनाभावः, संसारस्यानादित्वात्संसारिणं कथं कुर्यादित्यपि युक्तमयम्, मायाकृतसंसारे गन्धर्वनगरादिभ्रमवत्र प्रयोजनानुयोग इति।

(२) यथा दर्पणादयो मुखादावदातत्वादेर्भानाभानप्रयोजका तथाऽविद्याप्येकास्मिन्स्वयंप्रभे निरंशेऽपि भानाभाने प्रवर्त्तयति असम्भावनीयावभासचतुरत्वादित्यर्थः।

(३) आश्मरथ्यमते वेदान्तार्थबोधकत्वान्न युक्तमित्याह ब्रह्मण इति।

(४) औडुलोमिमतेऽसंगतिं प्रदर्शयन्नाह एवं ये इति। मिश्रयोरैक्यासम्भवादेकत्वशाखा तन्मतेऽसंगतं स्यादित्यर्थः। (५) भास्करमतमनूद्य दूषयति ये त्विति।

(६) भास्करमतेनाशङ्कते निष्कलमितीति। (७) समाधत्ते न तावदिति।

(८) कर्णनेमिमण्डलावच्छिन्नं नभोंऽशः स्यादित्याशङ्क्याहाह हन्तेति। नेम्याकारकर्णवलयतत्संयोगयोः प्राप्तयोरेवाकाशाशनिर्देशसम्भवादन्यथाऽनिर्देशाच्च कल्पितनभोवच्छेदानभ्युपगमादपि कर्णस्तत्संयोगो वा आकाशांश इत्युक्तं स्यादित्यर्थः।

सर्वत्र प्रथेत। (१)नह्यस्ति सम्भवोऽनवयवमव्याप्य वर्तत इति। तस्मात्तत्रास्ति चेद्व्याप्यैव। न चेद्व्याप्नोति तत्र नास्त्येव। व्याप्यैवास्ति केवलं प्रतिसम्बन्ध्यधीननिरूपणतया न सर्वत्र निरूप्यत इति चेत्। न नाम निरूप्यताम्, तत्संयुक्तं तु नभः श्रवणयोग्यं सर्वत्रास्तीति सर्वत्र श्रवणप्रसङ्गः। (२)न च भेदाभेदयोरन्यतरेणांशः शक्यो निर्वक्तुम्, न चोभाभ्यां, विरुद्धयोरेकत्रासमवायादित्युक्तम्। तस्मादनिर्वचनीयानाद्यविद्यापरिकल्पित एवांशो नभसो न भाविक इति युक्तम्। (३)न च काल्पनिको ज्ञानमात्रायत्तजीवितः, कथमविज्ञायमानोऽस्ति, असंश्चांशः कथं शब्दश्रवणलक्षणाय कार्याय कल्पते, न जातु रज्ज्वामज्ञायमान उरगो भयकम्पादिकार्याय पर्याप्त इति वाच्यम्। अज्ञातत्वाप्रसिद्धेः, कार्यव्यंग्यत्वादस्य। (४)कार्योत्पादात् पूर्वमज्ञातं कथ कार्योत्पादाज्ज्ञामिति चेत्। (५)न, पूर्वपूर्वकार्योत्पादव्यङ्ग्यत्वादस्यापि ज्ञाने तत्संस्कारानुवृत्तेरनादित्वाच्च कल्पना तत्संस्कारप्रवाहस्य। अस्तु वाऽनुपपत्तिरेव कार्यकारणयोर्मायात्मकत्वात्। अनुपपद्यमानार्थत्वान्मायायाः। अपि च भाविकांशवादिनां मते भाविकांशस्य ज्ञानेनोच्छेत्तुमशक्यत्वान्न ज्ञानध्यानसाधनो मोक्षः स्यात् तदेवमाकाशांश इव श्रोत्रमनिर्वचनीयम्। एवं जीवो ब्रह्मणोऽश इति काशकृत्स्नीयं मतमिति सिद्धम्॥ २२॥

सू० प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्॥ २३॥

(६)स्यादेतत्, वेदान्तानां ब्रह्मणि समन्वये दर्शिते समाप्तं समन्वयलक्षणमिति किमपरमवशिष्यते यदर्थमिदमारभ्यत इति शङ्कां निराकर्तुं सङ्गतिं दर्शयन् अवशेषमाह "यथाभ्युदये"ति। अत्र च लक्षणस्य सङ्गतिमुक्त्वा लक्षणेनास्याधिकरणस्य सङ्गतिरुक्ता। एतदुक्तं भवति—सत्य जगत्कारणे ब्रह्मणि वेदान्तानामुक्तः समन्वयस्तत्र कारणभावस्योभयथा दर्शनाज्जगत्कारणत्वं ब्रह्मणः किं निमित्तत्वेनैव, उतोपादानत्वेनापि। तत्र यदि प्रथमः पक्षस्तत उपादानकारणानुसरणे सांख्यस्मृतिसिद्धं प्रधानमभ्युपेयम्। तथा च जन्माद्यस्य यत इति ब्रह्मलक्षणमसाधु, अतिव्याप्तेः प्रधानेऽपि गतत्वात्। असम्भवाद्वा। यदि तूत्तरः पक्ष

---

(१) कर्णनेमिमण्डलपक्षं निरस्य संयोगपक्षे किं संयोगो व्यापी न वा? आद्यमनुपलम्भान्निरस्य द्वितीयं निराकरोति नहीति।

(२) अधुनाशमात्रे साधारणदूषणमाह नचेति। वस्तुतो भिन्नयोर्भेदाभ्युपगमात्तांशांशित्वम्, नाप्यभिन्नस्यैकवत्, नापि भिन्नाभिन्नयोस्तद्विरोधस्य समन्वयसूत्रे उक्तत्वादित्यर्थः।

(३) अविद्याकल्पितोऽपि नभोंशो न सम्भवतीत्याह नचेति। यत्काल्पनिकं न तदज्ञातदशायामास्ति रज्जुभुजङ्गवच्छ्रोत्रलक्षणांशो यदि कल्पनिकत्वेन ज्ञानमात्रप्राप्तजीविकः प्रतीतसत्ताकस्तर्हि कथमज्ञायमानोऽस्ति। इष्टप्रसङ्गतामाशंक्याह अज्ञेति। अज्ञातत्वेन हि श्रोत्रं शब्दधीहेतुस्तदज्ञातदशायां यथसत्स्यात्ततः शब्दज्ञानं स्यादित्यर्थः।

(४) कथमित्यादि। शब्दोपलब्धिकार्यलिङ्गकानुमानाद्या श्रोत्रस्याभिव्यक्तिः सा कार्योत्पत्तेरर्वाचीति प्राक्कार्यादसच्छ्रोत्रं स्यात्तदुत्पत्तिस्त्वे तु चक्रकापत्तिस्तथाच नियतप्राक्सत्त्वरूपकारणत्वं न स्यादिति भावः।

(५) समाधत्ते नेति। (६) मध्येपादं वृत्तकीर्तनस्य प्रयोजनमाह स्यादेतदिति।

म्ततो नातिव्याप्तिर्नाप्यव्याप्तिरिति साधुलक्षणम् । सोऽयमवशेषः । तत्र—

(१)ईक्षापूर्वककर्तृत्वं प्रभुत्वमसरूपता ।
निमित्तकारणेष्वेव नोपादानेषु कर्हिचित् ॥

तदिदमाह—"तत्र निमित्तकारणमेव तावदि"ति (पृ. ४११. पं. १) । आगमस्य कारणमात्रे पर्यवसानादनुमानस्य तद्विशेषनियममागमो न प्रतिक्षिपत्यपि त्वनुमन्यत एवेत्याह—"पारिशेष्याद्ब्रह्मणोन्यदि"ति । ब्रह्मोपादानत्वस्य प्रसक्तस्य प्रतिषेधे ऽन्यत्राप्रसङ्गात्साङ्ख्यस्मृतिप्रसिद्धमानुमानिकं प्रधानं शिष्यत इति । (२)एकविज्ञानेन च सर्वविज्ञानप्रतिज्ञान'मुत तमादेशमि'त्यादिना, यथा सोम्यैकेन मृत्पिण्डेनेति च दृष्टान्तः, परमात्मनः प्राधान्यं सूचयतः । यथा सोमशर्मणैकेन ज्ञातेन सर्वे कठा ज्ञातो भवति ।

एवं प्राप्त उच्यते—प्रकृतिश्च । न केवलं ब्रह्म निमित्तकारणं, कुतः ? प्रतिज्ञादृष्टान्तयोरनुपरोधात् । निमित्तकारणत्वमात्रे तु तावुपरुध्येयाताम् , तथाहि—

(३)न मुख्ये सम्भवत्यर्थे जघन्या वृत्तिरिष्यते ।
न चानुमानिकं युक्तमागमेनापबाधितम् ॥
सर्वे हि तावद्वेदान्ताः पौर्वापर्येण वीक्षिताः ।
ऐकान्तिकाद्वैतपरा द्वैतमात्रनिषेधतः ॥

तदिहापि प्रतिज्ञादृष्टान्तौ मुख्यार्थावेव युक्तौ न तु 'यजमानः प्रस्तर' इतिवद्गुणकल्पनया नेतव्यौ तस्यार्थवादस्यातत्परत्वात् । प्रतिज्ञादृष्टान्तवाक्ययोस्त्वद्वैतपरत्वादुपादानकारणात्मकत्वाच्चोपादेयस्य कार्यजातस्योपादानज्ञानेन तज्ज्ञानोपपत्तेः । निमित्तकारणं तु कार्यादत्यन्तभिन्नमिति न तज्ज्ञाने कार्यज्ञानं भवति । अतो ब्रह्मोपादानकारणं जगतः । (४)न च ब्रह्मणोऽन्यन्निमित्तकारणं जगत इत्यपि युक्तम् । प्रतिज्ञादृष्टान्तोपरोधादेव । न हि तदानीं ब्रह्मणि ज्ञाते सर्वं विज्ञातं भवति । जगन्निमित्तकारणस्य ब्रह्मणोऽन्यस्य सर्वमध्यपातिनस्तज्ज्ञानेनाविज्ञानात् । (५)'यत' इति च पञ्चमी न कारणमात्रे स्मर्यतेऽपि तु प्रकृतौ जनिकर्तुः प्रकृतिरिति । ततोऽपि प्रकृतित्वमवगच्छामः । दुन्दभिप्रहणं दुन्दुभ्याघातग्रहण च तद्भूतशब्दत्वसामान्योपलक्षणार्थम् ॥ २३ ॥

---

(१) ईक्षितृत्वश्रुतेरेकविज्ञानेन सर्वविज्ञानप्रतिज्ञानाच्च ब्रह्म निमित्तकारणमुतोपादानकारणमपीति सन्देहे पूर्वं मुख्यतः प्रतिज्ञाश्रयेण वाक्यस्य जीवपरत्वं निरस्तम् , अधुना निमित्तोपादानभेदाद्गौणी सेति सङ्गतिमभिसन्धाय पूर्वपक्षमाह ईक्षेति । अनेन ब्रह्म द्रव्यप्रकृतिः ईक्षितृत्वात्कर्तृत्वात्स्वामित्वाच्च प्रभुवत् , न पृथिव्यादिप्रकृतिः असरूपत्वात् गन्धादिशून्यत्वादित्याद्यनुमानं पूर्वपक्षिमतेन सूचितम् । श्लोकार्थः स्पष्टः ।

(२) ननु निमित्तोपादानभेदे कथं प्रतिज्ञादृष्टान्तयोर्योजना तत्राह एकेति ।

(३) ननु प्रतिज्ञादृष्टान्तौ प्राधान्यपरौ भविष्यत इत्याशंक्याह न मुख्य इति । नन्वनुमानबाधा गौणताऽत आह नचेति । आगमोपि निमित्तत्वपर एवास्तु तत्राह सर्वे हीति । वेदान्तिमते कार्यमात्रस्य विवर्तत्वेनाधिष्ठानव्यतिरेकेण सर्वेषामभावाङ्गीकारात् सर्ववेदान्तवाक्यजातमैकान्तिकाद्वैतपरत्वमित्यर्थः ।

(४) यदि कारणज्ञानात्सर्वकार्यज्ञानार्थं ब्रह्मण उपादानत्वं तर्हि ततोऽन्यन्निमित्तं स्यादित्याह नचेति ।

(५) प्रतिज्ञालिङ्गैरिव श्रुत्यापि पूर्वपक्षयनुमानबाधमित्याह यत इति । जनिकर्तुरिति । जायमानस्य कार्यस्य प्रकृतिरुपादानसंज्ञिका भवतीति पाणिनिसूत्रार्थः ।

सू० अभिध्योपदेशाच्च ॥ २४ ॥

(१)अनागतेच्छा सकल्पोऽभिध्या । एतया खलु स्वातन्त्र्यलक्षणेन कर्तृत्वेन निमित्तत्वं दर्शितम् । 'बहु स्यामि'ति च स्वविषयतयोपादानत्वमुक्तम् ॥ २४ ॥

सू० साक्षाच्चोभयाम्नानात् ॥ २५ ॥

आकाशादेव ब्रह्मण एवेत्यर्थः । **साक्षादिति** चेति सूत्रावयवमनूद्य तस्यार्थं व्याचष्टे-**"आकाशादेवे"ति** । (पृ. ४३३ पं. ८) श्रुतिर्ब्रह्मणो जगदुपादानत्वमवधारयन्ती उपादानान्तराभावं साक्षादेव दर्शयतीति साक्षादिति सूत्रावयवेन दर्शितमिति योजना ॥२५॥

सू० आत्मकृतेः परिणामात् ॥ २६ ॥

प्रकृतिग्रहणमुपलक्षणं निमित्तमित्यपि द्रष्टव्यं, (२)कर्मत्वेनोपादानत्वात्कर्तृत्वेन च तत्प्रति निमित्तत्वात् । **"कथं पुनरि"ति** सिद्धसाध्ययोरेकत्रासमवायो विरोधादिति । **"परिणामादिति । ब्रूम" इति** । पूर्वसिद्धस्याप्यनिर्वचनीयविकारात्मनो परिणामोऽनिर्वचनीयत्वाद्भेदेनाभिन्न एवेति सिद्धस्यापि साध्यत्वमित्यर्थः । एकवाक्यत्वेन व्याख्याय परिणामादित्यवाच्छिद्य(३) व्याचष्टे--**"परिणामादिति वे"ति** । सच्चत्यच्चेति द्वे ब्रह्मणो रूपे । सच्च सामान्यविशेषेणापरोक्षतया निर्वाच्यं पृथिव्यप्तेजोलक्षणम् । त्यच्च परोक्षमत एवानिर्वाच्यमिदन्तया वाय्वाकाशलक्षणम् । कथं च तद्ब्रह्मणो रूपं ? यदि तस्य ब्रह्मोपादानं, तस्मात्परिणामाद्ब्रह्म भूतानां प्रकृतिरिति ॥ २६ ॥

सू० योनिश्च हि गीयते ॥ २७ ॥

(४)पूर्वपक्षिणोऽनुमानमनुभाष्यागमविरोधेन दूषयति **"यत्पुनरि"ति** (पृ. ४३५ पं. ६) । एतदुक्तं भवति—ईश्वरो जगतो निमित्तकारणमेवेक्षापूर्वकजगत्कर्तृत्वात् कुम्भकर्तृकुलालवत् । (५)अत्रेश्वरस्यासिद्धेराश्रयासिद्धो हेतुः पक्षश्चाप्रसिद्धविशेष्यः । (६)यथाहुर्'नानुपलब्धे न्यायः प्रवर्तते' इति । आगमात्तत्सिद्धिरिति चेद् , हन्त तर्हि यादृशमीश्वरमागमो गमयति तादृशोऽभ्युपगन्तव्यः । स च निमित्तकारणं चोपादानकारणं चेश्वरमवगमयतीति । (७)विशेष्याश्रयग्राह्यागमविरोधान्नानुमानमुदेतुमर्हतीति, कुतस्तेन निमित्तत्वावधारणेत्यर्थः । (८)इयं चोपादानपरिणामादिभाषा न विकाराभिप्रायेणापि तु यथा सर्पस्योपादानं रज्जुरेवं ब्रह्म जगदुपादानं द्रष्टव्यम् । न खलु नित्यस्य निष्कलस्य ब्रह्मणः सर्वात्मनैकदेशेन वा परिणामः सम्भवति नित्यत्वादनेकदेशत्वादित्युक्तम् । (९)न च मृदः शरावादयो भिद्यन्ते न

---

(१) सूत्रस्थाभिध्याशब्दार्थमाहानागतेति । अनागतवस्तुनीच्छा-सङ्कल्पो वाऽभिध्या, तया स्वातन्त्र्यं दर्शितं तेन च निमित्तत्वमपि 'सोऽकामयते'त्यादिश्रुतौ दर्शितमित्यर्थः ।

(२) निमित्तोपादानत्वे हेतुपरं यत्कारणमित्यादिभाष्यं व्याचष्टे कर्मत्वेनेति ।

(३) पृथक्कृत्वा । (४) नैयायिकस्य । (५) पूर्वोक्तनैयायिकानुमाने । (६) न्यायभाष्यकाराः ।

(७) विशेष्येति । साध्यं प्रति विशेष्यस्य हेतुं प्रति चाश्रयस्य ग्राहकतयोपजीव्यागमविरोधादित्यर्थः ।

(८) ननु आत्मकृतेः परिणामादित्यनेन सूत्रेण परिणामवादो वेदान्तदर्शनकारस्याप्यभिमतो भातीत्याशङ्क्याह इयं चेति ।

(९) एवं च सौत्रपरिणामशब्दस्य विवर्तपरत्वं वेदान्तिमतेनोक्त्वा यथाश्रुताभिप्रायेण परिणामत्वेन लोकसिद्धस्य मृदत्यसहत्वेन विवर्ततामाह न च मृद इति ।

चाभिन्ना न वा भिन्नाभिन्नाः किं त्वनिर्वचनीया एव । यथाह श्रुतिः "मृत्तिकेत्येव सत्यमि"ति । तस्मादद्वैतोपक्रमादुपसंहाराच्च सर्व एव वेदान्ताः ऐकान्तिकाद्वैतपराः सन्तः साक्षादेव क्वचिदद्वैतमाहुः, क्वचिद्वैतनिषेधेन, क्वचिद्ब्रह्मोपादानत्वेन जगतः । एतावतापि तावद्भेदो निषिद्धो भवति, न तूपादानत्वाभिधानमात्रेण विकारग्रह आस्थेयः । (१)नहि वाक्यैकदेशस्यार्थोऽस्तीति ॥ २७ ॥

स्यादेतत् , मा भूत्प्रधानं जगदुपादानं तथापि न ब्रह्मोपादानत्वं सिध्यति, परमाण्वादीनामपि तदुपादानानामुपप्लवमानत्वा(२)त्तेषामपि हि किंचिदुपोद्बलकमस्ति वैदिकं लिङ्गमित्याशङ्कामपनेतुमाह सूत्रकारः—

सू० एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥

निगदव्याख्यातेन भाष्येण व्याख्यातं सूत्रम् ।

(३)प्रतिज्ञालक्षणं लक्ष्यमाणे पदसमन्वयः ।

वैदिकः स च तत्रैव नान्यत्रेत्यत्र साधितम् ॥ २८ ॥

इति श्रीमद्वाचस्पतिमिश्रविरचिते श्रीमच्छारीरकभाष्यविभागे भामत्यां

प्रथमाध्यायस्य चतुर्थः पादः ॥

सम्पूर्णश्च प्रथमोऽध्यायः ॥

सू० स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥

वृत्तवर्तिष्यमाणयोः समन्वयविरोधपरिहारलक्षणयाः सङ्गतिप्रदर्शनाय सुखग्रहणाय(४) चैतयोः सङ्क्षेपतस्तात्पर्यार्थमाह—"प्रथमेऽध्याय" इति (पृ० ४३७ पं० ५) । अनपेक्षवेदान्तवाक्यस्वरसासिद्धसमन्वयलक्षणस्य विरोधतत्परिहाराभ्यामाक्षेपसमाधानकरणादनेन लक्षणेनास्ति विषयावषयिभावः सम्बन्धः । पूर्वलक्षणार्थो हि विषयस्तदुच्चरत्वादाक्षेपसमाधानयोरेष च विषयीति । तदेवमध्यायमवतार्य तदवयवमधिकरणमवतारयति—"तत्र प्रथमं तावदि"ति (पृ० ४२८ पं० १) । तन्त्र्यते व्युत्पाद्यते मोक्षसाधनमनेनेति तन्त्रं, तदेवाख्या यस्याः सा स्मृतिः तन्त्राख्या परमर्षिणा कपिलेनादिविदुषा प्रणीता । अन्याश्चाङ्गिरसशिखादिप्रणीताः स्मृतयस्तदनुसारिण्यः । न खल्वमूषां स्मृतीनां मन्वादिस्मृतिवदन्योऽवकाशः शक्यो वदितुमृते मोक्षसाधनप्रकाशनात् । तदपि चेन्नाभिदध्युरनवकाशाः सत्यो ऽप्रमाणं प्रसज्येरन् । तस्मात्तदविरोधेन कथंचिद्वेदान्ता व्याख्यातव्याः । पूर्वपक्षमाक्षिपति—

---

(१) ननु मध्ये सृष्टिश्रुत्यैव सपक्षता स्याद्ब्रह्मण इत्याशंक्याह नहीति । उपक्रमोपसंहारगततात्पर्यमहावाक्यमध्यस्थोऽवान्तरवाक्यस्य प्रधानानुरोधेन मायामयसृष्टिविषयत्वमित्यर्थः ।

(२) बुद्धौ प्रतिभासमानत्वात् ।

(३) अध्यायार्थसङ्ग्राहकश्लोकमाह प्रतिज्ञेति । प्रथमे सूत्रे विचारप्रतिज्ञा, द्वितीये लक्षणम् , चतुर्थे लक्ष्यमाणे वेदान्तवाक्यसमन्वयः, स च ब्रह्मण्येव नान्यत्रेति शिष्टायां विषायां साधितमित्यर्थः ।

(४) वृत्तेति। वृत्तस्य समन्वयाध्यायस्य वर्तिष्यमाणस्य विरोधाध्यायस्य च सङ्गतिप्रदर्शनाय अनायासेन ज्ञानाय च ।

"कथं पुनरीक्षत्यादभ्य" इति (पृ० ४३९ पं० ४)। प्रसाधितं खलु धर्ममीमांसायां(१) 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमान'मित्यत्र यथा श्रुतिविरुद्धानां स्मृतीनां दुर्बलतयाऽनपेक्षणीयत्वम्, तस्माच्च दुर्बलानुरोधेन बलीयसीनां श्रुतीनां युक्तमुपवर्णनमपि तु स्वतःसिद्धप्रमाणभावाः श्रुतयो दुर्बलाः स्मृतीर्बाधन्त एवेति युक्तम्। पूर्वपक्षी समाधत्ते—"भवेदय"मिति। प्रसाधितोऽप्यर्थः श्रद्धाजडान् प्रति पुनः प्रसाध्यत इत्यर्थः। आपाततः समाधानमुक्त्वा परमसमाधानमाह पूर्वपक्षी—"कपिलप्रभृतीनां चार्ष"मिति। अयमस्याभिसन्धिः—ब्रह्म हि शास्त्रस्य कारणमुक्तं 'शास्त्रयोनित्वा'दिति, तेनैष वेदराशिर्ब्रह्मप्रभवः सन्(२)जानसिद्धानावरणभूतार्थमात्रगोचरतद्बुद्धिपूर्वको यथा तथा कपिलादीनामपि श्रुतिस्मृतिप्रथिताजानसिद्धभावानां स्मृतयोऽनावरणसर्वविषयतद्बुद्धिप्रभवा इति न श्रुतिभ्योऽमूषामस्ति कश्चिद्विशेषः। न चैताः स्फुटतरं प्रधानादिप्रतिपादनपराः शक्यन्तेऽन्यथयितुम्। तस्मात्तदनुरोधेन कथंचिच्छ्रुतय एव नेतव्याः। अपि च तर्कोऽपि कपिलादिस्मृतीरनुमन्यते, तस्मादप्येतदेव प्राप्तम्।

एवं प्राप्त आह—"तस्य समाधि"रिति। (३)यथा हि श्रुतीनामविगानं ब्रह्मणि गतिसामान्यात्, नैवं स्मृतीनामविगानमस्ति प्रधाने, तासां भूयसीनां ब्रह्मोपादानत्वप्रतिपादनपराणां तत्रतत्र दर्शनात्, तस्मादविगानाच्छ्रौत एवार्थ आस्थेयो नतु स्मार्तो विगानादिति। तत्किमिदानीं परस्परविगानात् सर्वा एव स्मृतयोऽवहेया इत्यत आह—"विप्रतिपत्तौ च स्मृतीना"मिति (पृ० ४४० पं० १४)। "न चातीन्द्रियार्थानि"ति (पृ० ४४१ पं० १) अर्वाग्दृगभिप्रायम्। शङ्कते—"शक्यं कपिलादी"नामिति निराकरोति—"न सिद्धेरपी"ति। न तावत्कपिलादय ईश्वरवदाजानसिद्धाः, किन्तु विनिश्चितवेदप्रामाण्यानां तेषां तदनुष्ठानवतां प्राचि भवेऽस्मिन् जन्मनि सिद्धिरत एवाजानसिद्धा उच्यन्ते। यदस्मिन् जन्मनि न तैः सिद्ध्युपायोऽनुष्ठितः प्राग्भवीयवेदार्थानुष्ठानलब्धजन्मत्वात्तत्सिद्धीनां, तथा चावधृतवेदप्रामाण्यानां तद्विरुद्धार्थाभिधानं तदपबाधितमप्रमाणमेव। अप्रमाणेन च न वेदार्थोऽतिशङ्कितुं युक्तः प्रमाणसिद्धत्वात्तस्य। तदेवं वेदविरोधे सिद्धवचनमप्रमाणमुक्त्वा सिद्धानामपि परस्परविरोधे तद्वचनादनाश्वास इति पूर्वोक्तं(४) स्मारयति—"सिद्धव्यपाश्रयकल्पनायामपी"ति। श्रद्धाजडान् बोधयति—"परत-

---

(१) 'औदुम्बरीं स्पृष्ट्वोद्गायेत्' इति प्रत्यक्षश्रुतिविरुद्धा 'सर्वामावेष्टेत' इति स्मृतिर्मानं नवेति संशये स्मृतिमिर्मूलश्रुत्यनुमानात्प्रत्यक्षानुमितश्रुत्योश्च स्वपरार्थीतश्रुतिवत्समबलतयोऽदितानुदितवैकल्पासम्भवान्मानामिति पूर्वपक्षे, सिद्धान्ततयेदमुपपादिष्ठते 'विरोधे त्वि'ति मीमांसायाम्, असति विरोधे यतो मूलश्रुत्यनुमानस्वपरार्थितश्रुत्योस्तुल्यबलत्वमितत्वात्समबलताऽतः श्रुतिविरुद्धस्मृतीनां प्रामाण्यमनपेक्षमपेक्षावाजते हेयमित्यर्थः। प्रत्यक्षश्रुतिविरुद्धार्थे तु न श्रुत्यनुमानमर्थापहारेण मानस्याप्यपहारात् अतो मूलाभावादप्रमाणमिति।

(२) आजानेति। आजानसिद्धा—स्वभावसिद्धा च सा अनावरणभूतार्थमात्रगोचरा या तद्बुद्धिर्ब्रह्मज्ञानं तत्पूर्वको वेदराशिः इत्यर्थः। सत्यानृतविषयवारणार्थं मात्रपदम्।

(३) अन्यस्मृत्यनवकाशदोषान्तरमपि सिद्धान्तसाधकं प्रदर्शयन्नाह यथाहीत्यादिना। अविगानं विरुद्धार्थानभिधानम्। (४) 'विप्रतिपत्तौ च'त्यादिभाष्येण पूर्वमुक्तम्।

प्रसङ्गस्यापी"ति । ननु श्रुतिश्चेत्कपिलादीनामनावरणभूतार्थगोचरज्ञानातिशयं बोधयति, तेषां वचनमप्रमाणं, तदप्रामाण्ये श्रुतेरप्यप्रामाण्यप्रसङ्गादित्यत आह--"या तु श्रु-"रिति । न तावत्सिद्धानां परस्परविरुद्धानि वचांसि प्रमाणं भवितुमर्हन्ति । न च विरोधो वस्तुनि, सिद्धे तदनुपपत्तेः । अनुष्ठानमनागतोत्पाद्यं विकल्प्यते, न सिद्धम्, तस्य वस्थानात् । तस्मात् श्रुतिसामान्यमात्रेण(१)भ्रमः सांख्यप्रणेता कपिलः श्रौत इति । देतत्, कपिल एव श्रौतो नान्ये मन्वादयः, ततश्च तेषां स्मृतिः कपिलस्मृतिविरुद्धा-हेयेत्यत आह--"भवति चान्या मनो"रिति (पृ० ४४२ पं० १) । तस्याश्चागतरसम्वादमाह--"महाभारते ऽपि चे"ति । न केवलं मनोः स्मृतिः स्मृत्यन्तरसंवादिनी श्रुतिसम्वादिन्यपीत्याह--"श्रुतिश्चे"ति । उपसंहरति—"अत" इति (पृ० ३ पं० ३) स्यादेतत्, भवतु वेदविरुद्धं कापिलं वचस्तथापि द्वयोरपि पुरुषबुद्धिप्रभवत्वा को विनिगमनायां हेतुर्यतो वेदविरोधि कापिलं वचो नादरणीयमित्यत आह-"वेद-हि निरपेक्ष"मिति । अयमभिसन्धिः-सत्यं शास्त्रयोनिरीश्वरस्तथाप्यस्य न शास्त्रायामास्ति स्वातन्त्र्यं कपिलादीनामिव, स हि भगवान् यादृशं पूर्वस्मिन् सर्गे चकार तं तदनुसारेणास्मिन्नपि सर्गे प्रणीतवान्, एवं पूर्वतरानुसारेण पूर्वस्मिन्, पूर्वतमानुसारेण पूर्वतर इत्यनादिरयं शास्त्रेश्वरयोः कार्यकारणभावः(२) । तेनेश्वरस्य न शास्त्रार्थज्ञानपूर्विका क्रिया येनास्य कपिलादिवत्स्वातन्त्र्यं भवेत् । शास्त्रार्थज्ञानं चास्य स्वयमाविर्भवदपि न ज्ञानकारणतामुपैति, द्वयोरप्यपर्यायेणाविर्भावात् । (३)शास्त्रं च स्वतो बोधकतया पुरुषस्वातन्त्र्याभावेन निरस्तसमस्तदोषाशङ्कं सदनपेक्षं साक्षादेव स्वार्थे प्रमाणम् । (४)कपिलादिवचांसि तु स्वतन्त्रकपिलादिप्रणेतृकाणि तदर्थस्मृतिपूर्वकाणि, तदर्थस्मृतयश्च तदर्थानुभवपूर्वाः, आप्तासामर्थ्यप्रत्ययाच्च प्रामाण्यविनिश्चयाय यावत् स्मृत्यनुभवौ कल्प्येते तावत् स्वतःसिद्धप्रमाणभावयाऽनपेक्षयैव श्रुत्या स्वार्थो विनिश्चायित इति शीघ्रतरप्रवृत्तया श्रुत्या स्मृत्यबाध्यत इति युक्तम् ॥ १ ॥

सू० इतरेषां चानुपलब्धेः ॥ २ ॥

प्रधानस्य तावत् क्वचिद्वेदप्रदेशे वाक्याभासानि दृश्यन्ते, तद्विकाराणां तु महदादीनां न्यपि न सन्ति । न च भूतेन्द्रियादिवन्महदादयो लोकसिद्धाः । तस्मादात्यन्तिकात् प्रमाणान्तरासम्वादात् प्रमाणमूलत्वाच्च स्मृतेर्मूलाभावादभावो वन्ध्याया इव दौहित्र्यस्मृतेः(५) ।

---

(१) नगरपुरुषप्रतप्तुः सांख्यप्रणेतुश्च कपिल इति शब्दसाम्यमात्रेण ।

(२) कार्यकारणभाव इति । एवं च कार्यकारणभावस्यानादित्वेन न प्रागभूतस्य शास्त्रस्य तदर्थभानकाले नूतना क्रिया किन्तु नियतक्रमस्य तस्य संस्काररूपेणानुवर्तमानस्य स्मारणेनाभिव्यक्तिरित्यर्थः ।

(३) ननु गुणवद्वक्तृज्ञानजन्यत्वाभावे कथं शास्त्रस्य प्रामाण्यमिति चेत्, स्वत इत्याह शास्त्रं चेति ।

(४) नन्वेवं तर्हि वेदान्तिमते प्रमाणानां प्रामाण्यस्य स्वतस्त्वात्कपिलादिवचस्तथा किं न स्यादित्यत आह कपिलादीति। यथाऽनपेक्षत्वेन शीघ्रतरप्रवृत्तश्रुत्या तद्विरुद्धलिङ्गस्य श्रुतिकल्पनापेक्षत्वेन विलम्बितप्रवृत्तेः छेदकत्वाभावस्तथाऽनपेक्षश्रुत्या तद्विरुद्धकापिलवाक्यस्य सापेक्षत्वेन विलम्बितः प्रामाण्याभाव इति भावः ।

(५) दौहित्र्यस्मृतेरिति। यथा वन्ध्या चेत्स्मरति इदं मे दौहित्रेण कृतमिति, सा स्मृतिर्मूलस्य दौहित्राद्यप्रमाणभेवमेवाप्यपि मूलभूतानुभवाभावात्स्मरणाभाव इति भावः ।

न चार्षज्ञानमत्र मूलमुपपद्यत इति युक्तम् । तस्मान्न कापिलस्मृतेः प्रधानोपादानत्वं जगत इति सिद्धम् ॥ २ ॥

एतेन योगः प्रत्युक्तः ॥ ३ ॥

नानेन योगशास्त्रस्य हैरण्यगर्भपातञ्जलादेः सर्वथा प्रामाण्यं निराक्रियते, किन्तु जगदुपादानस्वतन्त्रप्रधानतद्विकारमहदहङ्कारपञ्चतन्मात्रगोचरं प्रामाण्यं नास्तीत्युच्यते । न चैतावतैषामप्रामाण्यं भवितुमर्हति । यत्पराणि हि तानि तत्राप्रामाण्येऽप्रामाण्यमश्नुवीरन् । न चैतानि प्रधानादिसद्भावपराणि, किन्तु (१)योगस्वरूपतत्साधनतदवान्तरफलविभूतितत्परमफलकैवल्यव्युत्पादनपराणि । तच्च किञ्चिन्निमित्तीकृत्य व्युत्पाद्यमिति प्रधानं सविकारं निमित्तीकृतं पुराणेष्विव (२)सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितं तत्प्रतिपादनपरेषु, न तु तद्विवक्षितम् । अन्यपरादपि चान्यनिमित्तं तत्प्रतीयमानमभ्युपेयेत, यदि न मानान्तरेण विरुद्ध्येत । अस्ति तु वेदान्तश्रुतिभिरस्य विरोध इत्युक्तम् । तस्मात् प्रमाणभूतादपि योगशास्त्रान्न प्रधानादिसिद्धिः । अत एव योगशास्त्रं व्युत्पादयितास्माभगवान् वार्षगण्यः—

(३)गुणानां परमं रूपं न दृष्टिपथमृच्छति ।
यत्तु दृष्टिपथप्राप्तं तन्मायैव सुतुच्छकम् ॥ इति ।

योगं व्युत्पिपादयिषता निमित्तमात्रेणेह गुणा उक्ता, न तु भावतस्तेषामतात्त्विकत्वादित्यर्थः । अलोकसिद्धानामपि प्रधानादीनामनादिपूर्वपक्षन्यायाभासोत्प्रेक्षितानामनुवाद्यत्वमुपपन्नम् । तदनेनाभिसन्धिनाह—"एतेन सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतेरपि, प्रधानादिविषयतया, प्रत्याख्याता द्रष्टव्ये"ति (पृ० ४४४ पं०) । अधिकरणान्तरारम्भमाक्षिपति—"नन्वेवं सति समानन्यायत्वा"देति । समाधते—"अस्त्यत्राभ्यधिका शंका" । मा नाम सांख्यशास्त्रात् प्रधानसत्ता विज्ञायि, योगशास्त्रात्तु प्रधानादिसत्ता विज्ञापयिष्यते । बहुलं हि योगशास्त्राणां वेदेन सह संवादो दृश्यते । उपनिषदुपायस्य च तत्त्वज्ञानस्य योगापेक्षास्ति । न जातु योगशास्त्रविहितं यमनियमादिबहिरङ्गमुपायमपहायान्तरङ्गं च धारणादिकमन्तरेणोपनिषदात्मतत्त्वसाक्षात्कार उदेतुमर्हति । तस्मादौपनिषदेन तत्त्वज्ञानेनापेक्षणात् संवादबाहुल्याच्च वेदेनाष्टकादिस्मृतेः(४)त्रयीयोगस्मृतिः प्रमाणम् । ततश्च प्रमाणात् प्रधानादिप्रतितेर्नाशब्दत्वम् । न च तदप्रमाणं प्रधानादौ, प्रमाणं च यमादाविति युक्तम्। तत्राप्रामाण्येऽन्यत्राप्यनाश्वासात् । यथाहुः—

---

(१) योगेति । योगस्वरूपं चित्तवृत्तिनिरोधः, तत्साधनं यमनियमादिः, तदवान्तरफलमणिमादिविभूतयः, मुख्यफलं कैवल्यं चैतेषां व्युत्पादकानीत्यर्थः ।

(२) सर्गः सृष्टिः, प्रतिसर्गः प्रलयः, वंशानुचरितं तत्कर्म ।

(३) गुणानामिति । यतः प्रधानादेरविवक्षा योगशास्त्रतो गुणानां सत्त्वादीनां परमं रूपमधिष्ठानमात्मा दृष्टिपथं न गच्छति, यत्तु दृष्टिपथप्राप्तं दृश्यं प्रधानादि तन्मायैव सुतुच्छकं मिथ्येत्यर्थः ।

(४) 'अष्टकाः कर्तव्याः, तटाकं खनितव्यम्' इत्यादिस्मृतयो प्रमाणं नवेति सन्देहे धर्मस्य वेदैकप्रमाणत्वात् तासां श्रेयःसाधनत्वे वेदानुपलम्भात्स्मृतेर्भ्रमेणापि निर्माणसम्भवाच्च न प्रमाणमिति पूर्वपक्षे, वेदार्थानुष्ठानुगामेव स्वनिबन्धनासु स्मृतिषु कर्तृत्वाम्नूकभूतवेदमनुमापयन्त्यस्ताः स्मृतयः प्रमाणमिति पूर्वमीमांसायां यथाऽष्टकादिस्मृतीनां प्रामाण्यमित्यर्थः ।

(१)'प्रसरं न लभन्ते हि यावत् क्वचन मर्कटाः ।
नाभिद्रवन्ति ते तावत् पिशाचा वा स्वगोचरे ॥ इति ।

सेयं लब्धप्रसरा प्रधानादौ योगाप्रमाणतापिशाची सर्वत्रैव दुर्वारा भवोदित्यस्याः प्रसरं निषेधता प्रधानाद्यभ्युपेयमिति नाशब्दं प्रधानमिति शङ्कार्थः । से"यमभ्यधिकाशङ्कातिदेशेन निवर्त्यते" । निवृत्तिहेतुमाह—"अर्थैकदेशसम्प्रतिपत्तावपी"ति (पृ० ४४५ पं० १) । यदि प्रधानादिसत्तापरं योगशास्त्रं भवेत भवेत् प्रत्यक्षवेदान्तश्रुतिविरोधेनाप्रमाणम्, तथा च तद्विहितेषु यमादिष्वप्यनाश्वासः स्यात्, तस्मान्न प्रधानादिपरं तत्, किन्तु तन्निमित्तीकृत्य योगव्युत्पादनपरमित्युक्तम् । न चाविषयेऽप्रामाण्यं विषयेऽपि प्रामाण्यमुपहन्ति, नहि चक्षू रसादावप्रमाणं रूपेऽप्यप्रमाणं भवितुमर्हति । तस्माद्वेदान्तश्रुतिविरोधात् प्रधानादिरस्याविषयो न स्वप्रमाण्यमिति परमार्थः । स्यादेतत्, अध्यात्मविषयाः सन्ति मन्वादिस्मृतयो बौद्धार्हतकापालिकादीनां, ता अपि कस्मान्न निराक्रियन्त इत्यत आह—"सतीष्वपी"ति । तासु खलु बहुलं वेदार्थविसंवादिनीषु शिष्टानादृतासु कैश्चिदेव तु पुरुषापसदैः पशुपायैर्म्लेच्छादिभिः परिगृहीतासु वेदमूलत्वाशङ्कैव नास्तीति न निराकृताः, तद्विपरीतास्तु सांख्ययोगस्मृतय इति ताः प्रधानादिपरतया व्युदस्यन्त इत्यर्थः । "न सांख्यज्ञानेन वेदनिरपेक्षेण"ति । प्रधानादिविषयेणेत्यर्थः । "द्वैतिनो हि ते सांख्या योगाश्च" । ये प्रधानादिपरतया तच्छास्त्रं व्याचक्षत इत्यर्थः । संख्या सम्यग्बुद्धिर्वैदिकी तया वर्तन्ते इति सांख्याः, एवं योगो ध्यानम्, (२)उपयोपेययोरभेदविवक्षया, चित्तवृत्तिनिरोधो हि योगः, तस्योपायो ध्यानं प्रत्ययैकतानता । एतच्चोपलक्षणम्, अन्येऽपि यमनियमादयो बाह्या आन्तराश्च धारणादयो योगोपाया द्रष्टव्यः । एतेनाभ्युपगतवेदप्रामाण्यानां कणभक्षाक्षचरणादीनां सर्वाणि तर्कस्मरणानीति योजना । सुगममन्यत् ॥ ३ ॥

सू० न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥

(३)अवान्तरसङ्गतिमाह—"ब्रह्मास्य जगतो निमित्तकारणं प्रकृतिश्चेत्यस्य पक्षस्ये"ति (पृ० ४४६ पं० ६) । चोदयति—"कुतः पुनः"रिति । समानविषयत्वे हि विरोधो भवेत्, न चेहास्ति समानविषयता, धर्मब्रह्मणोपि मानान्तराविषयतयाऽतर्क्यत्वेनानपेक्षान्नायैकगोचरत्वादित्यर्थः । समाधत्ते-"भवदय"मिति ।

(४)मानान्तरस्याविषयः सिद्धवस्त्ववगाहिनः ।
धर्मोऽस्तु कार्यरूपत्वाद्ब्रह्म सिद्धं तु गोचरः ॥

---

(१) प्रसरमिति । यथा मर्कटानां पिशाचानां वैकत्रप्रसरसम्भव एव सर्वत्र प्रदेशेषु प्रसरो भवति तथैव योगशास्त्रस्यापि प्रधानादौ विषयैकदेशे प्रामाण्यसम्भव एव यमादिसर्वयोगविषयेषु प्रामाण्यं सम्भवतीति श्लोकार्थः ।

(२) ननु कथं चित्तवृत्तिनिरोधवचकयोगशब्दस्य चिन्तारूपध्यानवाचकत्वमत्राह उपायेति ।

(३) अवान्तरसङ्गतिमिति । स्मृतीनामप्रामाण्यात्ताभिः समन्वयस्य न विरोध इति सिद्धान्तवैलक्षण्यादनुक्तानुवादनास्याधिकरणस्य तात्पर्यमिति सङ्गतिमित्यर्थः ।

(४) 'भवेदयम्' इत्यादिसमाधानार्थभाष्यसङ्ग्राहकश्लोकमाह मानान्तरस्येति । सिद्धपदार्थावगाहिप्रमाणान्तरस्य कार्यतया धर्मो विषयो न भवेद्ब्रह्म तु सिद्धवस्त्वाश्रयं भवत्येवेत्यर्थः ।

तस्मात्समानविषयत्वादस्यत्र तर्कस्यावकाशः । नन्वस्तु विरोधः, तथापि तर्कादरे को हेतुरित्यत आह--"यथा च श्रुतीना"मिति (पृ० ४४६ पं० १२)। (१)सावकाशा बहवोऽपि श्रुतयोऽनवकाशैकश्रुतिविरोधे तदनुगुणतया यथा नीयन्ते एवमनवकाशैकतर्कविरोधे तदनुगुणतया बहवोऽपि श्रुतयो गुणकल्पनादिभिर्व्याख्यानमर्हन्तीत्यर्थः । अपि च ब्रह्मसाक्षात्कारो विरोधितयाऽनादिमविद्यां निवर्तयन् दृष्टेनैव रूपेण मोक्षसाधनमिष्यते, तत्र ब्रह्मसाक्षात्कारस्य मोक्षसाधनतया प्रधानस्यानुमानं दृष्टसाधर्म्येणादृष्टविषयं विषयतोऽन्तरङ्गं, बहिरङ्गं त्वत्यन्तपरोक्षगोचरं शाब्दं ज्ञानं, तेन प्रधानप्रत्यासत्त्याप्यनुमानमेव बलीय इत्याह--"दृष्टसाधर्म्येण चे"ति। अपि च श्रुत्याऽपि ब्रह्मणि तर्क आहृत इत्याह--"श्रुतिरपी"ति । सोऽयं ब्रह्मणो जगदुपादानत्वाक्षेपः पुनस्तर्केण प्रत्युयते ।

(२)प्रकृत्या सह सारूप्यं विकाराणामवस्थितम् ।
जगद्ब्रह्मस्वरूपं च नेति नो तस्य विक्रिया ॥
विशुद्धं चेतनं ब्रह्म जगज्जडमशुद्धिभाक् ।
तेन प्रधानसारूप्यात् प्रधानस्यैव विक्रिया ॥

(३)तथाहि--एक एव स्त्रीकायः सुखदुःखमोहात्मकतया पत्युश्च सपत्नीनां च चैत्रस्य च क्रौणस्य तामविन्दतोऽपर्यायं सुखदुःखविषादानाधत्ते । स्त्रिया च सर्वे भावा व्याख्याताः । तस्मात्सुखदुःखमोहात्मतया च स्वर्गनरकोच्चावचप्रपञ्चतया च जगदशुद्धमचेतनं च, ब्रह्म तु चेतनं विशुद्धं च निरतिशयत्वात् । तस्मात् प्रधानस्याशुद्धस्याचेतनस्य विकारो जगत् तु ब्रह्मण इति युक्तम् ।

ये तु चेतनब्रह्मविकारतया जगच्चैतन्यमाहुस्तान् प्रत्याह--"अचेतनं चेदं जगदि"ति (पृ० ४४७ पं० १३) । व्यभिचारं चोदयति--"ननु चेतनमपी"ति । परिहरति--"न स्वामिभृत्ययोरपी"ति । ननु मा नाम साक्षाच्चेतनचेतनान्तरस्योपकार्यात्, तत्कार्यकरणबुद्ध्यादिनियोगद्वारेण तूपकरिष्यतीत्यत आह--"निरतिशया ह्यकर्तारश्चेतना" इति (पृ० ४४८ पं० २)। उपजनापायधर्मयोगोऽतिशयः, तद्भावो निरतिशयत्वम्(४), अत एव निर्व्यापारत्वादकर्तारस्तस्मात्तेषां बुद्ध्यादिप्रयोक्तृत्वमपि नास्तीत्यर्थः । चोदकोऽनुशयबीजमुद्घाटयति--"योऽपी"ति । अभ्युपेत्यापाततः समाधानमाह--"तेनापि कथंचिदि"ति । परमसाधनं तु सूत्रावयवेन वक्तुं तमेवावतारयति "न चैतदपि विलक्षणत्वमि"ति । सूत्रावयवाभिसन्धि(५)माह--"अवगम्यमानमेव

---

(१) एकश्रुत्यनुसारेणेतरश्रुतिनयनदृष्टान्तमाधायोक्तर्कवशेन श्रुतिसङ्कोचो न युज्यते वैपरीत्यस्यापि वक्तुं शक्यत्वादित्याशङ्क्याह सावकाशा इति । श्रुतीनां निमित्तकारणत्वे सावकाशत्वं तर्कस्यानौपाधिकत्वेनानवकाशत्वमित्यर्थः ।

(२) सर्वत्र प्रकृतिसमानरूपत्वं विकारेष्वनुगतं दृश्यते, जगद्रूपविकारस्य विशुद्धचेतनात्मकब्रह्मसमानरूपत्वाभावाच्च तस्य जगदुपादानत्वं किन्तु सुखदुःखात्मकत्वात्तदात्मकप्रधानतुल्यरूपत्वं सम्भवतीति कारिकाद्वयेन तर्काकारः प्रदर्शितः ।

(३) जगतः सुखाद्यात्मकत्वं विवृण्वानः प्रधानकारणवादं दृढयति तथाहीत्यादिना ।

(४) आगमापायिधर्मशून्यत्वम् । (५) 'शब्दात्' इति सूत्रैकदेशाभिप्रायम् ।

हीदमि"ति। (१)शब्दार्थात् खलु चेतनप्रकृतित्वाच्चैतन्यं पृथिव्यादीनामवगम्यमानमुपोद्बलितं मानान्तरेण साक्षाच्छ्रूयमाणमप्यचैतन्यमन्यथयेत्, मानान्तराभावे त्वार्थोऽर्थः श्रुत्यर्थेनापबाधनीयो, न तु तद्बलेन श्रुत्यर्थोऽन्यथयितव्य इत्यर्थः ॥ ४ ॥

सूत्रान्तरमवतारयितुं चोदयति—"ननु चेतनत्वमपि क्वचिदि"ति (पृ० ४४९ पं० ४)। न पृथिव्यादीनां चैतन्यमार्थमेव, किन्तु भूयसीनां श्रुतीनां साक्षादेवार्थ इत्यर्थः ॥

सूत्रमवतारयति—"अत उत्तरं पठति"—

सू० अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ ५ ॥

विभजते—"तुशब्द" इति। नैताः श्रुतयः साक्षान्मृदादीनां वागादीनां च चैतन्यमाहुरपि तु तदधिष्ठात्रीणां देवतानां चिदात्मनां, तेनैतच्छ्रुतिबलेन न मृदादीनां वागादीनां च चैतन्यमाशङ्कनीयमिति। कस्मात् पुनरेतदेवमित्यत आह—"विशेषानुगतिभ्याम्"। तत्र विशेषं व्याचष्टे—"विशेषा ही"ति। भोक्तृणामुपकार्यत्वाद् भूतेन्द्रियाणां चोपकारकत्वात् साम्ये च तदनुपपत्तेः सर्वजनप्रसिद्धेश्च 'विज्ञानं चाभव'दिति श्रुतेश्च विशेषश्चेतनाचेतनलक्षणः प्रागुक्तः स नोपपद्यते। देवताशब्दकृतो वाऽत्र विशेषो विशेषशब्देनोच्यत इत्याह—"अपि च कौषीतकिनः प्राणसंवाद"इति। अनुगतिं व्याचष्टे—"अनुगताश्चे"ति (पृ० ४५० पं० १)। सर्वत्र भूतेन्द्रियादिष्वनुगता देवता अभिमानिनीरुपदिशन्ति मन्त्रादयः। अपि च भूयस्यः श्रुतयोऽग्निर्वाग् भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्'—(ऐ० आ० २।४।२।४) इत्यादय इन्द्रियविशेषगता देवता दर्शयन्ति। देवताश्च क्षेत्रज्ञभेदाश्चेतनाः। तस्माच्चेन्द्रियादीनां चैतन्यं रूपत इति। अपि च प्राणसंवादवाक्यशेषे प्राणानामस्मदादिशरीराणामिव क्षेत्रज्ञाधिष्ठितानां व्यवहारं दर्शयन् प्राणानां क्षेत्रज्ञाधिष्ठानेन चैतन्यं द्रढयतीत्याह "प्राणसंवादवाक्यशेषे चे"ति। "तत्तेज ऐक्षतेत्यपी"ति। यद्यपि प्रथमेऽध्याये(२) भाक्तत्वेन वर्णितं तथापि मुख्यतयापि कथंचिन्नेतुं शक्यमिति द्रष्टव्यम्। पूर्वपक्षमुपसंहरति—"तस्मादि"ति ॥ ५ ॥

सिद्धान्तसूत्रम्—

सू० दृश्यते तु ॥ ६ ॥

प्रकृतिविकारभावे हेतुं सारूप्यं विकल्प्य दूषयति "अत्यन्तसारूप्ये चे"ति (पृ० ४५१ पं० २)। प्रकृतिविकारभावाभावहेतुं वैलक्षण्यं विकल्प्य दूषयति—"विलक्षणत्वेन

---

(१) जगतोऽचेतनत्वश्रवणमपि चैतन्यानभिव्यक्तिपरमिति प्रधानकारणवादिनः शङ्कानिरासार्थकभाष्यस्थाऽनवगम्यमानपदं व्याचक्षाण आह शब्दार्थादिति। लोकतोऽनवगम्यमानस्य चेतनप्रकृतिकत्वस्य केवलश्रुतार्थापत्त्या कल्पनायामचेतनत्वप्रतिपादकशब्दविरोधस्य दूषणतयोद्भावनसामर्थ्याल्लोकानुभवसद्भावे श्रुतार्थापत्तेस्तद्विरोधो न दूषणं किन्तु प्रत्यक्षश्रुतिरेव चैतन्यानभिव्यक्तिपरतया व्याख्येया भवेदिति तात्पर्यम्।

(२) तत्रस्थेक्षित्यधिकरण इत्यर्थः। ऐक्षतेत्यस्य मुख्यत्वं तेज आदिशब्दा लाक्षणिका एव तदिदमुक्तं कथंचिदिति।

च कारणेने"ति । सर्वस्वभावाननुवर्तनं प्रकृतिविकारभावाविरोधि-तदनुवर्तने तादात्म्येन प्रकृतिविकारभावाभावात्, मध्यमस्त्वसिद्धः, तृतीयस्तु निदर्शनाभावादसाधारण(१) इत्यर्थः । अथ जगद्योनितयाऽऽगमाद्ब्रह्मणोऽवगमादागमबाधितविषयत्वमनुमानस्य कस्मान्नोद्भाव्यत इत्यत आह—"आगमाविरोधास्त्विव"ति । न चास्मिन्नागमैकसमधिगमनीये ब्रह्मणि प्रमाणान्तरस्यावकाशोऽस्ति, येन तदुपादायागम आक्षिप्येतेत्याशयवानाह—"यत्तूक्तं परिनिष्पन्नत्वाद्ब्रह्मणो"ति । यथा हि कार्यत्वाविशेषेऽप्यारोग्यकामः पथ्यमश्नीयात्स्वरकामः सिकता भक्षयेदित्यादीनां मानान्तरापेक्षता, न तु 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'त्यादीनाम्, तत्कस्य हेतोः ? अस्य कार्यभेदस्य प्रमाणान्तरागोचरत्वात् । एवं भूतत्वाविशेषेऽपि पृथिव्यादीनां मानान्तरगोचरत्वं न तु भूतस्यापि ब्रह्मणस्तस्याम्नायैकगोचरस्यातिपतितसमस्तमानान्तरसीमतया स्मृत्यागमसिद्धत्वादित्यर्थः । यदि स्मृत्यागमसिद्धं ब्रह्मणस्तर्काविषयत्वं कथं तर्हि श्रवणातिरिक्तमननविधानमित्यत आह—"यद्यपि श्रवणव्यतिरेकेणे"ति । तर्को हि प्रमाणविषयविवेचकतया तादितिकर्तव्यताभूतस्तदाश्रयोऽसति प्रमाणेऽनुग्राह्यस्याश्रयस्याभावात् शुष्कतया नादियते, यस्त्वागमप्रमाणाश्रयस्तद्विषयविवेचकस्तदविरोधी स 'मन्तव्य' इति विधीयते । "श्रुत्यनुगृहीत" इति । श्रुत्या श्रवणस्य पश्चादितिकर्तव्यतात्वेन गृहीतो"ऽनुभवाङ्गत्वेने"ति । (२)मतो हि भाव्यमानो भावनाया विषयतयाऽनुभूतो भवतीति मननमनुभवाङ्गम् । "आत्मनोऽनन्वागतत्व"मिति । स्वप्नाद्यवस्थाभिरसंपृक्तत्वमुदासीनत्वमित्यर्थः । अपि च चेतनकारणवादिभिः कारणसालक्षण्येऽपि कार्यस्य कथंचिच्चैतन्याविर्भावानाविर्भावाभ्यां विज्ञानं चाविज्ञानं चाभवदिति जगत्कारणे योजयितुं शक्यम्, अचेतनप्रधानकारणवादिनां तु दुर्योजमेतत्, (३)नह्यचेतनस्य जगत्कारणस्य विज्ञानरूपता सम्भविनी, चेतनस्य जगत्कारणस्य सुषुप्ताद्यवस्थास्विव सतोऽपि चैतन्यस्यानाविर्भावतया शक्यमेव कथंचिदविज्ञानात्मत्वं योजयितुमित्याह—"योऽपि चेतनकारणश्रवणबलेने"ति (पृ० ४५३ पं०) । परस्यैव स्वचेतनप्रधानकारणवादिनः सांख्यस्य न युज्यते । "प्रत्युक्तत्वात्तु वैलक्षण्यस्ये"ति । वैलक्षण्ये कार्यकारणभावो नास्तीत्यभ्युपेत्येदमुक्तम्, परमार्थतस्तु नास्माभिरेतदभ्युपयते इत्यर्थः ॥ ६ ॥

सू० असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ ७ ॥

(४)न कारणात्कार्यमभिन्नमभेदे कार्यत्वानुपपत्तेः, कारणवत्स्वात्मनि क्रियाविरोधात् शुक्लशुक्लादिविरुद्धधर्मसंसर्गाच्च । अथ चिदात्मनः कारणस्य जगतः कार्यात्मभेदः, तथा

---

(१) सपक्षविपक्षव्यावृत्तो पक्षमात्रवृत्तिरसाधारणो, यथा सर्वं क्षणिकं सत्त्वादिति, एवं चैतन्यान्वितत्वमपि असाधारण इत्यर्थस्तथाचास्यान्वयव्यतिरेकदृष्टान्ताभावादसाधारणत्वं भाष्ये स्फुटीकृतम् ।

(२) श्रवणपश्चात्यासम्भावनानिरासकवाक्यारम्भणत्वादितकौर्भिप्रायं मननस्य साक्षात्कारानङ्गत्वं व्याख्यव्यधानेन न तु साक्षादित्याह मतो हीति ।

(३) नहीति । अचेतनस्य जगत्कारणस्य सर्गोत्तरकालं विज्ञानात्मकजीवस्वरूपता न सम्भवतीत्यर्थः ।

(४) उत्पत्तेः पूर्वं कारणस्य सत्त्वात्तदभिन्नं कार्यं कथमसत्स्यादत आह न कारणादिति ।

चेदं जगत्कार्यं सत्त्वेऽपि चिदात्मनः कारणस्य प्रागुत्पत्तेर्नास्ति, नास्ति चेदसदुत्पद्यत इति स-त्कार्यवादव्याकोप इत्याह-"यदि चेतनं शुद्धमि"ति। परिहरति--"नैष दोष" इति कुतः ? "प्रतिषेधमात्रत्वात्"। विभजते—"प्रतिषेधमात्रं हीदमिति"। प्रतिपाद-यिष्यति(१) हि 'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यत्र। यथा कार्यं स्वरूपेण सदसत्त्वाभ्यां नैं निर्वचनीयम् अपि तु कारणरूपेण शक्यं सत्त्वेन निर्वक्तुमिति। एवं च कारणसत्तैव कार्यस्य सत्ता न ततोऽन्येति कथं तदुत्पत्तेः प्राक् सति कारणे भवत्यसत्। (२)स्वरूपेण तूत्पत्तेः प्रागुत्पन्नस्य ध्वस्तस्य वा सदसत्त्वाभ्यामनिर्वाच्यस्य न सतोऽसतो वोत्पत्तिरिति निर्विषयः सत्कार्यवादप्रतिषेध इत्यर्थः ॥ ७ ॥

सू० अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ ८ ॥

असामञ्जस्यं विभजते-"अत्राह" चोदकः, "यदि स्थौल्ये"ति (पृ० ४५४पं० ३)। यथा हि (३)यूषादिषु हिङ्गुसैन्धवादीनामविभागलक्षणो लयः स्वगतरसादिभिर्यूषं रूषयत्येवं ब्रह्मणि विशुद्धत्वादिधर्मणि जगल्लीयमानमविभागं गच्छद् ब्रह्म स्वधर्मेण (४)रूषयेन्न चान्यथा लयो लोकसिद्ध इति भावः। कल्पान्तरेणासामञ्जस्यमाह-"अपि च समस्त-स्थे"ति। नहि समुद्रस्य फेनोर्मिबुद्बुदादिपरिणामे वा रज्ज्वां सर्पधारादिविभ्रमे वा नियमो दृष्टः, समुद्रो हि कदाचित्फेनोर्मिरूपेण परिणमते कदाचिद्बुद्बुदादिना, रज्ज्वां हि कश्चित्सर्प इति विपर्यस्यति कश्चिद्धारेति। न च क्रमनियमः। सोऽयमत्र भोग्यादिविभागनि-यमः क्रमनियमश्चासमञ्जस इति। कल्पान्तरेणासामञ्जस्यमाह-"अपि च भोक्तृणा"मि-ति। कल्पान्तरं शङ्कापूर्वमाह-"अथेद"मिति। ॥ ८ ॥

सिद्धान्तसूत्रम्—

सू० न तु दृष्टान्तभावात् ॥ ९ ॥

नाविभागमात्रं लयोऽपि तु कारणे कार्यस्याविभागस्तत्र च तद्धर्मारूषणे सन्ति सहस्रं दृष्टान्ताः, तव(५) तु कारणे कार्यस्य लये कार्यधर्मरूषणे न दृष्टान्तलवोऽप्यस्तीत्यर्थः। स्यादे-तत्, यदि कार्यस्याविभागः कारणे, कथं कार्यधर्मारूषणं कारणस्येत्यत आह-"अनन्यत्वे पी"ति (पृ० ४५५ पं० ७)। यथा रजतस्यारोपितस्य पारमार्थिकं रूपं शुक्तिर्न च शुक्ते रजतमेवमिदमपीत्यर्थः। अपि च स्थित्युत्पत्तिप्रलयकालेषु त्रिष्वपि कार्यस्य कारणादभेदमभि-

---

(१) पृथुबुध्नोदराद्याकारेण कार्यं कारणान्न भिन्नं, नाप्यभिन्नम्, न सत्र चासदतस्तदूपेण सत्ता दुःसाध्येति वक्ष्यतीत्यर्थः।

(२) न केवलमुत्पत्तेः प्रागेव स्वरूपेण कार्यस्यासत्त्वमस्माभिर्नैयायिकवदङ्गीक्रियते किन्तु सर्वदैवेत्याह स्वरूपेणेति।

(३) यूषः—शाकरसः, जूस इति भाषायां प्रसिद्धः।

(४) मिश्रयेत्। तथाच जगतो ब्रह्मकारणकत्वे कारणस्यापि कार्यवदशुद्धत्वादिप्रसङ्ग इति सत्कार्यवा-दिनः शङ्काभिप्रायः। ननु घटलये मृदो यथा न तद्रूपमिश्रणमेवमिहापि भवेदत आह नचेति। निरन्वयना-शानभ्युपगमादोषानुदवर्तमान एव लयो लोकप्रसिद्ध इति भावः।

(५) सत्कार्यवादिनस्तवास्य।

दधती श्रुतिरनतिशङ्कनीया, सर्वैरेव वेदवादिभिस्तत्र स्थित्युत्पत्त्योर्यः परिहारः स प्रलयेऽपि समानः कार्यस्याविद्यासमारोपितत्वं नाम, तस्मान्नापीतिमात्रमनुयोज्यमित्याह–"अत्यल्पं चेदमुच्यतइति। अस्ति चायमपरो दृष्टान्तो यथा च स्वप्नदृगेक"इति पृ० ४५६ पं १)। लौकिकः पुरुषः। "एवमवस्थात्रयसाक्ष्येक"इति। अवस्थात्रय-(१)मुत्पत्तिस्थितिप्रलयाः। कल्पान्तरेणासामञ्जस्ये(२) कल्पान्तरेण दृष्टान्तभावं परिहारमाह–"यत्पुनरेतदुक्तमि"ति। अविद्याशक्तेर्नियतत्वादुत्पत्तिर्नियम इत्यर्थः। "एतेने"ति। मिथ्याज्ञानविभागशक्तिप्रतिनियमेन मुक्तानां पुनरुत्पत्तिप्रसङ्गः(३) प्रत्युक्तः, कारणाभावे कार्याभावस्य प्रतिनियमात्, तत्त्वज्ञानेन च सशक्तिको मिथ्याज्ञानस्य समूलघातं निहतत्वादिति ॥ ९ ॥

सू० स्वपक्षदोषाच्च ॥ १० ॥

कार्यकारणयोर्वैलक्षण्यं तावत्समानमेवोभयोः पक्षयोः, प्रागुत्पत्तेरसत्कार्यवादप्रसङ्गोऽभीतौ तद्दृत्प्रसङ्गश्च प्रधानोपादानपक्ष एव नास्मत्पक्ष इति यद्यप्युपरिष्टात्प्रतिपादयिष्याम(४)स्तथापि गुडजिह्विकया समानत्वापादनमिदानीमिति मन्तव्यमिदमस्य पुरुषस्य सुखदुःखोपादानं क्लेशकर्माशयादीदमस्येति। सुगममन्यत् ॥ १० ॥

सू० तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः ॥ ११ ॥

केवलागमगम्येऽर्थे स्वतन्त्रतर्काविषयेण सांख्यादिवत् साधर्म्यवैधर्म्यमात्रेण तर्कः प्रवर्तेत, यो येन प्रधानादिसिद्धिर्भवेत्, शुष्कतर्को हि स भवत्यप्रतिष्ठानात्, तदुक्तम्–

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते(५) ॥ इति।

न च महापुरुषपरिगृहीतत्वेन कस्यचित्तर्कस्य प्रतिष्ठा, महापुरुषाणामेव तार्किकाणां मिथो विप्रतिपत्तेरिति। सूत्रेण शङ्कते–"अन्यथानुमेयमिति चेत्"। तद्विभजते–"अन्यथा वयमनुमास्यामह" इति। (६)नानुमानाभासव्यभिचारेणानुमानव्यभिचारःशङ्कनीयः प्रत्यक्षादिष्वपि तदाभासव्यभिचारेण तत्प्रसङ्गात्। तस्मात्स्वाभाविकप्रतिबन्धबलिङ्गानुसरणे निपुणेनानुमात्रा भवितव्यम्, ततश्चाप्रत्यूहं प्रधानं सेत्स्यतीति भावः। अपि च येन तर्केण तर्काणामप्रतिष्ठामाह स एव तर्कः प्रतिष्ठितोऽभ्युपेयस्तदप्रतिष्ठायामितराप्रतिष्ठानाभावादित्याह–"नहि

(१) जगत्कारणस्य ब्रह्मणो सुषुप्त्याद्यभावादाद्योत्पत्तीति।
(२) अपिच समस्तस्येत्यादिनोक्ते द्वितीयेऽसामञ्जस्ये।
(३) अपिच मोक्षतृणमित्यन्थे तृतीयकल्पान्तरेणोक्तः प्रसङ्ग इत्यर्थः।
(४) शिष्टापरिग्रहाधिकरणपूर्वपक्षेऽग्रिमे।
(५) ऊहापोहनिपुणैरनुमितोऽप्यनुमानप्रणाल्याऽन्यैर्निपुणतरैरस्य खण्डनं क्रियतेऽतो नानुमानमात्रेण कस्यचिदर्थस्य ब्रह्मादेः स्थापयितुं शक्य इति श्लोकार्थः।
(६) सर्वस्तर्कोऽप्रतिष्ठितः कुत एवमित्याह नानुमानाभासेति। स्वाभाविकप्रतिबन्धोऽस्यास्तीति। नापि इत्याहापि चेति।

प्रतिष्ठितस्तर्क एवे"ति । अपि च तर्काप्रतिष्ठायां सकललोकयात्रोच्छेदप्रसङ्गः, न च श्रुत्यर्थाभासनिराकरणेन तदर्थतत्त्वविनिश्चय इत्याह–"सर्वतर्काप्रतिष्ठायां चे"ति । अपि च विचारात्मकस्तर्कस्तर्कितपूर्वपक्षपरित्यागेन तर्कितं सिद्धान्तमनुजानाति, सति चैष पूर्वपक्षविषये तर्के प्रतिष्ठारहिते प्रवर्तते, तदभावे विचाराप्रवृत्तेः । तदिदमाह–'अयमेव च तर्कस्यालंकारः" इति (पृ० ४५६ पं० ८)। तामिमामाशङ्क्य सूत्रेण परिहरति–"एवमप्यविमोक्षप्रसंगः" । न वयमन्यत्र तर्कमप्रमाणायामः, किन्तु जगत्कारणसत्त्वे स्वाभाविकप्रतिबन्धवन्न लिङ्गमस्ति । यत्तु साधर्म्यवैधर्म्यमात्रं, तदप्रतिष्ठादोषान्न मुच्यत इति । कल्पान्तरेणापि निर्मोक्षपदार्थमाह—"अपि च सम्यग्ज्ञानान्मोक्ष इति" । भूतार्थगोचरस्य हि सम्यग्ज्ञानस्य व्यवस्थितवस्तुगोचरतया व्यवस्थानं लोके दृष्टं, यथा प्रत्यक्षस्य, वैदिकं चेदं चेतनजगदुपादानविषयं विज्ञानं वेदोत्थतर्कैरेतिकर्तव्यताकं वेदजनितं व्यवस्थितम्, वेदानपेक्षेण तु तर्केण जगत्कारणभेदमवस्थापयतां तार्किकाणामन्योन्यं विप्रतिपत्तेस्तत्त्वनिर्द्धारणकारणाभावाच्च न ततस्तत्त्वव्यवस्थेति न ततः सम्यग्ज्ञानम्, असम्यग्ज्ञानाच्च न संसारान्मोक्ष इत्यर्थः ॥११॥

सू० एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १२ ॥ भ०

(१)न कार्यं कारणादभिन्नमभेदे कारणरूपवत् कार्यत्वानुपपत्तेः, करोत्यर्थानुपपत्तेश्च । अभूतप्रादुर्भावन हि तदर्थः । न चास्य(२) कारणात्मत्वे किंचिदभूतमस्ति यदर्थमयं पुरुषो यतेत । अभिव्यक्त्यर्थमिति चेत्, न,तस्या अपि कारणात्मत्वेन सत्त्वादसत्त्वे वा ऽभिव्यग्यस्यापि तद्वत्प्रसङ्गेन कारणात्मत्वव्याघातात् । नाह तदेव तदानीमेवास्ति नास्ति चेति युज्यते । (३)किञ्चेदं मणिमन्त्रौषधमिन्द्रजालं कार्येण शिक्षितं यदिदमजातानिरुद्धातिशयमव्यवधानमविदूरस्थानं च तस्यैव तदवस्थेन्द्रियस्य पुंसः कदाचित्प्रत्यक्षं परोक्षं च (४)येनास्य कदाचित्प्रत्यक्षमुपलम्भनं कदाचिदनुमानं कदाचिदागमः । कार्यान्तरव्यवधिरस्य पारोक्ष्यहेतुरिति चेत्, न, कार्यजातस्य सदातनत्वात् । अथापि स्यात्कार्यान्तराणि पिण्डकपालशर्कराचूर्णकणप्रभृतीनि कुम्भं व्यवदधते, ततः कुम्भस्य पारोक्ष्यं कदाचोदेति । तन्न । तस्य कार्यजातस्य कारणात्मनः सदातनत्वेन सर्वदा व्यवधानेन कुम्भस्यात्यन्तानुपलब्धिप्रसङ्गात् । कादाचित्कत्वे वा कार्यजातस्य न कारणात्मत्वं, नित्यत्वानित्यत्वलक्षणविरुद्धधर्मसंसर्गस्य भेदकत्वात् । भेदाभेदयोश्च परस्परविरोधेनैकत्र सहासम्भव इत्युक्तम् । तस्मात्कारणात्कार्यमेकान्ततः एव भिन्नम् । न च भेदे गवाश्ववत्कार्यकारणभावानुपपत्तिरिति साम्प्रतम् । अभेदेऽपि कारणरूपवत्तदनुपपत्तेरुक्तत्वात् । (५)अत्यन्तभेदे च कुम्भकुम्भकारयोर्निमित्तनैमित्तिकभावस्य द-

---

(१) पूर्वं दूषितमपि सत्कार्यवादं नैयायिकमतेन दूषयितुमनुवदति आरम्भवादस्थापनपूर्वकन्तन्मतखण्डनाय न कार्यमिति। (२) कार्यस्य।

(३) कुलालादिव्यापारात्माक् मृद् घटशून्या तदानीं योग्यत्वे सति अनुपलभ्यमानघटत्वात्, ततश्च सत्त्वविरोधात्र कार्यकारणयोरभेद इत्याह किञ्चेति। (४) अर्थगतप्रत्यक्षत्वपरोक्षत्वेन।

(५) घटो यदि मृदो भिन्नस्तर्हि तत्कार्यं न स्यादश्ववदिति तर्कस्य स ततो यद्यभिन्नस्तर्हि तत्कार्यं न स्यान्मृद्वदिति प्रतिरोधमुक्त्वा मूलशैथिल्यमाह–अत्यन्तेति।

र्शनात् । (१)तस्मादन्यत्वाविशेषेऽपि समवायभेद एवोपादानोपादेयभावनियमहेतुः । यस्या-भूत्वा भवतः समवायस्तदुपादेयं, यत्र च समवायस्तदुपादानम् । उपादानत्वं च कारणस्य कार्यादल्पपरिमाणस्य दृष्टं यथा तन्त्वादीनां पटाद्युपादानानां पटादिभ्यो न्यूनपरिमाणत्वम् । चिदात्मनस्तु परममहत उपादानान्नात्यन्ताल्पपरिमाणमुपादेयं भवितुमर्हति । तस्माद्यत्रेदम-ल्पतारतम्यं विश्राम्यति यतो न क्षोदीयः सम्भवति तज्जगतो मूलकारणं परमाणुः । (२)क्षो-दीयोन्तरानन्त्ये तु मेरुराजसर्षपयोस्तुल्यपरिमाणत्वप्रसङ्गोऽनन्ताऽवयवत्वादुभयोः । तस्मात्प-रममहतो ब्रह्मण उपादानादभिन्नमुपादेयं जगत्कार्यमभिदधती श्रुतिः प्रतिष्ठितप्रामा-ण्यतर्कविरोधात् (३)सहस्रपंवत्सरश्रुतिवत्कथंचिज्जघन्यवृत्त्या व्याख्येयेत्याधिकं शङ्कमानं प्रति सांख्यदूषणमतिदिशति "एतेने"ति सूत्रेण (पृ० ४६० पं० १६) । अस्यार्थः— कारणात्कार्यस्य भेदं 'तदनन्यत्वमारम्भशब्दादिभ्य' इत्यत्र निषेत्स्यामः । (४)अविद्यासमा-रोपणेन च कार्यस्य न्यूनाधिकभावमप्यप्रयोजकत्वादुपेक्षिष्यामहे । तेन वैशेषिकाद्याभिमतस्य तर्कस्य शुष्कत्वेनाव्यवस्थितेः सूत्रमिदं सांख्यदूषणमतिदिशति । यत्र कथंचिद्वेदानुसारिणो मन्वादिभिः शिष्टैः परिगृहीतस्य सांख्यतर्कस्यैषा गतिस्तत्र परमाण्वादिवादस्यात्यन्तवेदबा-ह्यस्य मन्वाद्युपेक्षितस्य च कैव कथेति । "केनचिद्दर्शने"ति (पृ० ४६१ पं० २) । सृष्ट्यादयो हि व्युत्पाद्यास्ते च किं चित्सदसद्वा पूर्वपक्षन्यायोत्प्रेक्षितमप्युदाहृत्य व्युत्पाद्यन्त इति केनचिदंशेनेत्युक्तम् । सुगममन्यत् ॥ १२ ॥

सू० भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ १३ ॥

स्यादेतत्, अतिगम्भीरजगत्कारणविषयत्वं तर्कस्य नास्ति, केवलागममयमयमेतदित्युक्तं, तत्कथं पुनस्तर्कनिमित्त आक्षेप इत्यत आह—"यद्यपि श्रुतिः प्रमाण"मिति । प्रवृत्ता हि श्रुतिरनपेक्षतया स्वतः प्रमाण्येन न प्रमाणान्तरमपेक्षते, (५)प्रवर्तमाना पुनः स्फुट-तरप्रतिष्ठितप्रामाण्यतर्कविरोधेन मुख्यार्थात् प्रत्याख्य जघन्यवृत्तिता नीयते, यथा मन्त्रार्थ-वादादित्यर्थः । अतिरोहितार्थं भाष्यम् । "यथा त्वद्यत्व" इति (पृ० ४६२ पं० १०) । यद्यतीतानागतयोः सर्गयोरेष विभागो न भवेन् तवस्तदेवाद्यतनस्य विभागस्य बाधकं

(१) ननु यदि कुम्भकारमृदोरत्यन्तभेदस्तर्हि कथमुपादानोपादेयव्यवस्थाऽत आह तस्मादिति ।

(२) ननु परमाणुरप्यक्षुद्रतरावयवारब्धो मूर्तत्व दृष्टत्वादिति अनुमानेन नाल्पावयवविभ्रान्तिरत आह क्षोदीयान्तरानन्त्ये त्विति ।

(३) सहस्रेति । 'पञ्चपञ्चाशतस्त्रिवृतः सम्वत्सरा' इत्यादिवाक्ये सम्वत्सरशब्दस्य द्युत्पत्तिवाक्ये मु-ख्यार्थलाभात्तावद्यावुष्करसादिसिद्धमनुष्यपशवधिकारिता स्यादिति पूर्वपक्षे, 'द्वादशाहे त्रयस्त्रिवृतो भवन्ति' इत्यादिना त्रिवृदादिशब्दानां त्रिवृदादिस्तोमविशिष्टाहःपरत्वात्पञ्चपञ्चाशत्त्रिवृतः सम्वत्सरा इत्युत्पत्ति-वाक्येष्वहःपरत्रिवृदादिशब्दैः सामानाधिकरण्यादहःपरतैवेति सिद्धान्तितं, तत्र यथा सहस्रसुम्नत्वरशब्दस्य तादृशस्तावकर्मपरत्वं यथा लक्षणया तथात्र लक्षणयैवोत्पत्तिवाक्येन्द्रस्तोमपरत्वं सम्भवतीत्यर्थः ।

(४) आरम्भे हि न्यूनपरिमाणान्महदुदयनियमो न निर्वर्तते, उन्नततरागोरीशेखरवर्तिमहातरुषु भूमि-स्थस्य दूर्वाकाण्डेभ्यः सर्षपप्रतिभासोपलम्भादित्याह्याविद्यासमारोपेणेति ।

(५) स्वविषयप्रतिष्ठाविरोधितर्केण सहोन्मज्जन्ती निमज्जन्ती च बलाबलविवेकस्योत्प्राणेत्यर्थः । प्र-तिष्ठितोऽनुपचरितः ।

स्यात्, स्वप्नदर्शनस्येव जाग्रद्दर्शनं, न त्वेतदस्ति अबाधितायतनदर्शनेन तयोरपि तथात्वानुमानादित्यर्थः। इमां शङ्कामापाततोऽविचारितलोकसिद्धदृष्टान्तोपदर्शनमात्रेण निराकरोति सूत्रकारः "स्याल्लोकवत्" ॥ १३ ॥

परिहाररहस्यमाह—

सू० तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १४ ॥

(१)पूर्वस्मादविरोधादस्य विशेषाभिधानोपक्रमस्य विभागमाह—"अभ्युपगम्य चेममि"ति (पृ० ४६३ पं० १५)। स्यादेतत्, यदि कारणात्परमार्थभूतादनन्यत्वमाकाशादेः प्रपञ्चस्य कार्यस्य कुतस्तर्हि न वैशेषिकाद्युक्तदोषप्रपञ्चावतार इत्यत्र आह "व्यतिरेकेणाभावः कार्यस्यावगम्यत" इति (पृ० ४६४ पं० २)। न खल्वनन्यत्वमित्यभेदं ब्रूमः, किन्तु भेदं व्यासेधामस्ततश्च नाभेदाश्रयदोषप्रसङ्गः, किन्त्वभेदं व्यासेधद्भिर्वैशेषिकादिभिरस्मासु साहायकमेवाचरितं भवति। भेदनिषेधहेतुं व्याचष्टे "आरम्भणशब्दस्ताव"दिति। एवं हि ब्रह्मविज्ञानेन सर्वं जगत्तत्त्वतो ज्ञायेत यदि ब्रह्मैव तत्त्वं जगतो भवेत्, यथा रज्ज्वां ज्ञातायां भुजङ्गतत्त्वं ज्ञातं भवति, सा हि तस्य तत्त्वम्। (२)तत्त्वज्ञानं च ज्ञानमतोऽन्यन्मिथ्याज्ञानमज्ञानमेव। अत्रैव वैदिको दृष्टान्तो "यथा सौम्यैकेन मृत्पिण्डेने"ति। स्यादेतत्, मृदि ज्ञातायां कथं मृन्मयं घटादि ज्ञातं भवति, न हि तन्मृदात्मकमित्युपपादितमधस्तात्(३), तस्मात्तत्त्वतो भिन्नं न चान्यस्मिन् विज्ञातेऽन्यद्विज्ञातं भवतीत्यत आह श्रुतिः "वाचारम्भणं विकारो नामधेयम्" वाचा केवलमारभ्यते विकारजातं, न तु तत्त्वतोऽस्ति, यतो नामधेयमात्रमेतद्, यथा 'पुरुषस्य चैतन्यमिति, राहोः शिर इति' विकल्पमात्रम्। यथाहुर्विकल्पविदः—"शब्दज्ञानानुपाती वस्तुशून्यो विकल्प"इति। (यो० सू० १।१२) तथा चावस्तुतयाऽनृतं विकारजातं मृत्तिकेत्येव सत्यम्। तस्माद्घटशरावोदञ्चनादीनां तत्त्वं मृदेव, तेन मृदि ज्ञातायां तेषां सर्वेषामेव तत्त्वं ज्ञातं भवति। तदिदमुक्तं "न चान्यथैकविज्ञानेन सर्वविज्ञानं सम्पद्यत"इति। निदर्शनान्तरद्वयं दर्शयन्नुपसंहरति—"तस्माद्यथा घटकरकाद्याकाशानामि"ति (पृ० ४६५ पं० १) (४)ये हि दृष्टनष्टस्वरूपा न ते वस्तुसन्तो यथा मृगतृष्णिकोदकादयः, तथा च सर्वं विकारजातं, तस्मादवस्तुसत्। तथाहि यदस्ति तदस्त्यव, यथा चिदात्मा, नह्यसौ कदाचित् क्वचित् कथंचिद्वास्ति, किन्तु सर्वदा सर्वत्र सर्वथास्त्येव, न नास्ति, न चैवं विकारजातं, तस्य

---

(१) पूर्वाधिकरणेऽपि भेदग्राहिमानाविरोधोक्त्या पुनरुक्तिमाशंक्याह पूर्वस्मादिति। भेदग्राहिमानस्य प्रामाण्यमङ्गीकृत्य भेदाभेदयो रूपभेदेन विरोधः पूर्वं परिहृतः, इदानीमनङ्गीकृत्य तत्त्वावेदकत्वात्प्रत्याख्याय व्यावहारिके व्यवस्थाप्यते इति भावः।

(२) ननु परिमाणपक्षेऽप्यभेदांशेन सर्वज्ञानं स्यादत आह तत्त्वज्ञानं चेति। भेदालीकतायां उक्तत्वादित्यर्थः॥

(३) अधस्तादिति। शिष्टापरिग्रहाधिकरणपूर्वपक्षे (ब्र० अ० २ पा० ३ सू० २१-२३) इत्यर्थः।

(४) दृष्टान्तमात्रान्नार्थसिद्धिरित्याशयकं दृष्टनष्टस्वरूपत्वादिति भाष्योक्तं हेतुं व्याचक्षाण आह ये हीति। क्वचिद्दृष्टं पुनर्नष्टमदृष्टमित्यर्थः। प्रतीतिसमयेऽपि तत्त्वव्यावृत्त्यर्थं दृष्टपदम्।

कदाचित् कथंचित् कुत्रचिदवस्थानात् । तथाहि (१)सत्स्वभावं चेद्विकारजातं, कथं कदाचिदसत्, (२)असत्स्वभावं चेत्कथं कदाचित्सत्, सदसतोरेकत्वाविरोधात्, न हि रूपं कदाचित् क्वचित् कथंचिद्वा गन्धो भवति । अथ तस्य सदसत्त्वे धर्मौ ते च स्वकारणाधीनजन्मतया कदाचिदेव भवतः, तर्हि विकारजातं दण्डायमानं सदातनमिति न विकारः कस्यचित् । अथासत्त्वसमये तन्नास्ति, कस्य तर्हि धर्मोऽसत्त्वम्, न हि धर्मिण्यप्रत्युत्पन्ने तद्धर्मोऽसत्त्वं प्रत्युत्पन्नमुपपद्यते । अथास्य न धर्मः किन्त्वर्थान्तरमसत्त्वं, किमायातं भावस्य, न हि घटे जाते पटस्य किंचिद्भवति । (३)असत्त्वं भावविरोधीति चेद्, न(४), आकिञ्चित्करस्य तत्त्वानुपपत्तेः, किंचित्करत्वे वा तत्राप्यसत्त्वेन तदनुयोगसम्भवात् । अथास्यासत्त्वं नाम किंचिन्न जायते किन्तु स एव न भवति, यथाहुः--

न तस्य किंचिद्भवति न भवत्येव केवलम् । इति ।

अथैष प्रसज्यप्रतिषेधो, निरुच्यतां किं तत्स्वभावो भाव उत भावस्वभावः स इति । तत्र पूर्वस्मिन् कल्पे भावानां तत्स्वभावतया तुच्छतया जगच्छून्यं प्रसज्येत तथा च भावानुभवाभावः । उत्तरस्मिंस्तु सर्वभावनित्यतया नाभावव्यवहारः स्यात् । कल्पनामात्रनिमित्तत्वेऽपि निषेधस्य भावनित्यतापत्तिस्तदवस्थैव । तस्माद्विघ्नमस्ति कारणाद्विकारजातं न वस्तु सत्, अतो विकारजातमनिर्वचनीयमनृतम् । तदनेन प्रमाणेन सिद्धमनृतत्वं विकारजातस्य कारणस्य निर्वाच्यतया सत्त्व, 'मृत्तिकेत्येव सत्यमि'त्यादिना प्रबन्धेन दृष्टान्ततयाऽनुवदति श्रुतिः । (५)'यत्र लौकिकपरीक्षकाणां बुद्धिसाम्य स दृष्टान्त' इति चाक्षपादसूत्रं प्रमाणसिद्धो दृष्टान्त इत्येतत्परं, न पुनर्लोकासिद्धत्वमत्र विवक्षितम्, अन्यथा तेषां परमाण्वादिर्न दृष्टान्तः स्यात्, नहि परमाण्वादिर्नैसर्गिकवैनयिकबुद्ध्यतिशयरहितानां लौकिकानां सिद्ध इति ।

(६)सम्प्रत्यनेकान्तवादिनमुत्थापयति—"नन्वनेकात्मक"मिति । अनेकाभिः शक्तिभिर्याः प्रवृत्तयो नानाकार्यसृष्टयस्तद्युक्तं ब्रह्मैकं नाना चेति । किमतो यद्येवमित्यत आह "तत्रैकत्वांशेने"ति। यदि पुनरेकत्वमेव वस्तुसद्भवत् ततो नानात्वाभावाद्वैदिकः कर्मकाण्डाश्रयो लौकिकश्च व्यवहारः समस्त एवोच्छिद्येत । ब्रह्मगोचराश्च श्रवणमननादयः सर्वे दत्त-

---

(१) विमतं मिथ्या सावधिकत्वाद्य तैरेके चिदात्मवादित्यनुमानस्य विपक्षे बाधकतामाह सत्स्वभावं चेदिति।

(२) सत्त्वासत्त्वे विकारस्य स्वरूपमुत धर्मौ, अथार्थान्तरमलीकं वेति विकल्प्य क्रमेण निराकुर्वन्ननुमानस्यानुकूलतर्कमाह असत्स्वभावं चेति।

(३) अर्थान्तरत्वेऽपि विरोधित्वं शङ्कते असत्त्वमिति ।

(४) विरोधिरूपमसत्त्वं भावस्य किमकिञ्चित्करमुताकिञ्चित्करं स्वरूपं वेति विकल्प्य क्रमेण दूषयति नेत्यादिना । किञ्चित्करत्वे यत्किञ्चिदसत्त्वं क्रियते तदपि स्वरूपं धर्मो वेत्यादि विकल्प्य तद्दूषणानां सम्भवादित्यर्थः ।

(५) ननु लोकासिद्धस्यैव 'यत्रे'त्यादिना गोतमसूत्रेण दृष्टान्तत्वसम्भवात्कार्यामिथ्यात्वं कारणसत्यत्वं चानुमानसिद्धं श्रुत्या दृष्टान्तीकर्तुमयुक्तमित्यत्राह यत्रेति ।

(६) एवं शुद्धाद्वैतमतं प्रदर्श्य विशिष्टाद्वैत(भेदाभेद)मतमुत्थापयितुमवतारयति सम्प्रतीति । अनेकाभिः शक्तिभिः तदधीनप्रवृत्तिभिः परिणामैर्युक्तं ब्रह्मैकं नाना चेत्यर्थः । भेदाभेदमते सर्वत्रयवस्थासिद्धेरन्यत्तमद् इतमानबाध इत्यस्य मतस्याभिमानः ।

जलाञ्जलयः प्रक्षिप्येरन्। एवं चानेकात्मकत्वे ब्रह्मणो मृदादिदृष्टान्ता अनुरूपा भविष्यन्तीति। तमिममनेकान्तवादं दूषयति—"नैवं स्यादि"ति। (१)इदं तावदत्र वक्तव्यं—मृदात्मनैकत्वं घटशरावाद्यात्मना नानात्वमिति वदतः कार्यकारणयोः परस्परं किमभेदोऽभिमत, आहो भेद, उत भेदाभेदाविति। तत्राभेदे ऐकान्तिके मृदात्मनेति च घटशरावाद्यात्मनेति चोल्लेखद्वयं नियमश्च नोपपद्यते(२)। भेदे चोल्लेखद्वयनियमावुपपन्नौ, आत्मनेति त्वसमञ्जसम्, नह्यन्यस्यान्य आत्मा भवति। (३)न चानेकान्तवादः। भेदाभेदाकल्पे तुल्लेखद्वयं भवेदपि। नियमस्त्ववयुक्तो नहि धर्मिणोः कार्यकारणयोः सङ्करे तद्धर्मविवेकत्वनानात्वे न सङ्कीर्यते इति सम्भवति। ततश्च मृदात्मनैकत्वं यावद्भवति तावद्घटशरावाद्यात्मनापि स्यात्, एवं घटशरावाद्यात्मना नानात्वं यावद्भवति तावन्मृदात्मना नानात्वं भवेत्। सोऽयं नियमः कार्यकारणयोरैकान्तिकं भेदमुपकल्पयति, अनिर्वचनीयतां वा कार्यस्य। पराक्रान्तं चास्माभिः प्रथमाध्याये तदास्तां तावत्। तदेतद्युक्तिनिराकृतमनुवदन्तीं श्रुतिमुदाहरति—"मृत्तिकेत्येव सत्यमि"ति। स्यादेतत्, न ब्रह्मणो जीवभावः काल्पनिकः किन्तु भाविकः, अंशो हि स, तस्य कर्मसहितेन ज्ञानेन ब्रह्मभाव आधीयत इत्यत आह—"स्वयं प्रसिद्धं ही"ति। 'स्वाभाविकस्यानादेरि'ति यदुक्तं नानात्वांशेन तु कर्मकाण्डाश्रयो लौकिकश्च व्यवहारः सेत्स्यतीति तत्राह—"बाधिते चे"ति। यावदबाधं हि सर्वोऽयं व्यवहारः स्वप्नदशायामिव तदुपदर्शितपदार्थजातव्यवहारः। स च यथा जाग्रदवस्थायां बाधकान्निवर्तते एवं तत्त्वमस्यादिवाक्यपरिभावनाभ्यासपरिपाकभुवा शारीरस्य ब्रह्मात्मभावसाक्षात्कारेण बाधकेन निवर्तते। स्यादेतत्, 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्ये'दित्यादिना मिथ्याज्ञानाधीनो व्यवहारः क्रियाकारकादिलक्षणः सम्यग्ज्ञानेनापनीयत इति न ब्रूमे, किन्त्ववस्थाभेदाश्रयो व्यवहारोऽवस्थान्तरप्राप्तौ निवर्तते, यथा बालकस्य कामचारवादभक्षतोपनयनप्राप्तौ निवर्तते न च तावतासौ मिथ्याज्ञाननिबन्धनो भवत्येवमत्रापीत्यत आह—"न चायं व्यवहाराभाव" इति (पृ० ४६६-पं०४)। कुतः? "तत्त्वमसीति ब्रह्मात्मभावस्ये"ति। न खल्वेतद्वाक्यमवस्थाविशेषविनियतं ब्रह्मात्मभावमाह जीवस्य, अपि तु न भुजङ्गो रज्जुरियमितिवत् सदातनं तमभिवदति(४), अपि च सत्यानृताभिधानेनाप्येतदेव युक्तमित्याह—"तस्करदृष्टान्तेन(५) चे"ति। "न चास्मिन् दर्शन"इति। नहि जातु कठस्य दण्डकमण्डलुकुण्डलशीलिनः कुण्डालिङ्गानं दण्डवत्तां कमण्डलुमत्तां बाधते, तत्कस्य हेतोः? तेषां कुण्डलादीनां तस्मिन् भाविकत्वात्, तद्वदिहापि भाविकगोचरेणैकात्म्यज्ञानेन न नानात्वं भाविकम-

---

(१) मृदेका शरावादयः परस्परं भिन्ना इत्यभ्युपगमेऽत्यन्तभेद एव भवेत्। अथ मृदात्मना शरावादीनामेकत्वं मृदश्च शरावाद्यात्मना नानात्वमित्याशयस्तं विकल्प्य दूषयति इदं तावदित्यादिना।

(२) नोपपद्यत इति। अत्यन्ताभेदे त्वपुनरुक्तशब्दद्वयप्रयोगो भेदाभेदयोः कार्यकारणात्मना व्यवस्थया च न स्यादित्यर्थः।

(३) न चेति। भेदपक्षेऽनेकान्तवादश्च न भवतीत्यर्थः। भवेदपीति। अनेकान्तत्वान्न भवेदपीत्यपेरर्थः।

(४) अभिवदतीति। संसारस्यत्वे तदवस्थायां जीवस्य ब्रह्म वै न स्यात्, भेदाभेदयोरेकैकस्य विरोधात्, अतोऽसंसारिब्रह्माभेदस्य सदातनत्वावगमात् संसारोऽपि मिथ्यैवेत्याभिप्राय।

(५) सत्यवादिनस्तस्कर-चेनारो पितस्य मोक्षवत्सत्यब्रह्मात्मत्वविदेनो मोक्ष इति तस्करदृष्टान्तः।

पवदनीयम् , नहि ज्ञानेन वस्त्वपनीयतेऽपि तु मिथ्याज्ञानेनारोपितामित्यर्थः । चोदयति(१) **"नन्वेकत्वैकान्ताभ्युपगम"** इति । अबाधितानधिगतासंदिग्धविज्ञानसाधनं प्रमाणमिति प्रमाणसामान्यलक्षणोपपत्त्या प्रत्यक्षादीनि प्रमाणतामश्नुवते, एकत्वैकान्ताभ्युपगमे तु तेषां सर्वेषां भेदविषयाणां बाधितत्वादप्रामाण्यं प्रसज्येत(२) । तथा विधिप्रतिषेधशास्त्रमपि भावनाभाव्यभावककरणेतिकर्तव्यताभेदापेक्षत्वाद्व्याहन्येत । तथा च नास्तिक्यमेकदेशाक्षेपेण च सर्ववेदाक्षेपाद्वेदान्तानामप्यप्रामाण्यमित्यभेदैकान्ताभ्युपगमहानिः । न केवलं विधिनिषेधाक्षेपेणास्य मोक्षशास्त्रस्याक्षेपः स्वरूपेणास्यापि भेदापेक्षत्वादित्याह **"मोक्षशास्त्रस्यापी"ति** (पृ० ५६७ पं० २) । अपि चास्मिन् दर्शने वर्णपदवाक्यप्रकरणादीनामलीकत्वात्तत्प्रभवमद्वैतज्ञानमसमीचीनं भवेत् , न खल्वलीकाद्धूमाद्धूमकेतनज्ञानं समीचीनमित्याह–**"मोक्षशास्त्रस्यापी"ति** । परिहरति **"अत्रोच्यत"इति** । यद्यपि प्रत्यक्षादीनां तात्त्विकमबोधित्वं नास्ति, युक्त्यागमाभ्यां बाधनात् , तथापि व्यवहारे बाधनाभावात्सांव्यवहारिकमबाधनम् । नहि प्रत्यक्षादिभिरर्थं परिच्छिद्य प्रवर्तमानो व्यवहारे विसंवाद्यते सांसारिकः कश्चित् । तस्मादबाधनान्न प्रमाणलक्षणमतिपतन्ति प्रत्यक्षादय इति । **"सत्यत्वोपपत्ते"रिति** । सत्यत्वाभिमानोपपत्तेरिति । प्रहणकवाक्यमेतद्विभजते—**"यावद्धि न सत्यात्मैकत्वप्रतिपत्ति"रिति** । विकारानेव तु (३)शरीरादीनहमित्यात्मभावेन पुत्रपश्वादीन्ममेत्यात्मयिभावेनेति योजना । **"वैदिकश्चे"ति** कर्मकाण्डमोक्षशास्त्रव्यवहारसमर्थना । **"स्वप्नव्यवहारस्येवे"**ति विभजते(४)—**"यथा सुप्तस्य प्राकृतस्ये"ति** । 'कथं चानृतेन मोक्षशास्त्रेणे'ति यदुक्तं तदनुभाष्य दूषयति(५)–**"कथंत्वसत्येने'ति** । शक्यमत्र वक्तुं श्रवणाद्युपाय आत्मसाक्षात्कारपर्यन्तो वेदान्तसमुत्थोऽपि ज्ञानविचयोऽसत्यः सोऽपि हि वृत्तिरूपः कार्यतया निरोधधर्मा, यस्तु ब्रह्मस्वभावसाक्षात्कारोऽसौ न कार्यस्तत्स्वभावत्वात्तस्मादचोद्यमेतत् 'कथमसत्यात्सत्योत्पाद' इति । यत्खलु सत्यं न तदुत्पद्यत इति कुतस्तस्यासत्यादुत्पादो यच्चोत्पद्यते तत्सर्वमसत्यमेव । सांव्यवहारिकं तु(६) सत्यत्वं वृत्तिरूपस्य ब्रह्मसाक्षात्कारस्येव श्रवणादीनामप्यभिन्नम्, तस्मादभ्युपेत्य वृत्तिरूपस्य ब्रह्मसाक्षात्कारस्य परमार्थसत्यतां व्यभिचारोद्भावनमिति मन्तव्यम् । यद्यपि सांव्यवहारिकसत्यादेव भयात्सत्यं मरणमुत्पद्यते, तथापि भयहेतुरहिस्तज्ज्ञानं वाऽसत्यं ततो भयं सत्यं चायत इत्यसत्यात्सत्यस्योत्पत्तिरुक्ता । यद्यपि चाहिज्ञानमपि स्वरूपेण सत्तथापि न तज्ज्ञानत्वेन भ-

---

(१) प्रत्यक्षादिप्रामाण्यान्यथानुपपत्त्या नानात्वस्य सत्यत्वमिति पूर्वपक्षबीजोद्घाटनार्थमित्यर्थः ।

(२) प्रसज्येतेति । तथा चोपजीव्यप्रत्यक्षादिप्रामाण्याय वेदान्तानां भेदाभेदपरत्वमुचितमिति भावः ।

(३) अहं ममाभिमानयोरेकत्र व्याघातः स्यादिति प्रविभज्य योजयति शरीरादीनिति ।

(४) वस्तुतो मिथ्यात्वेऽपि विकारेषु तन्निश्चयाभावेन प्रत्यक्षादिव्यवहारोपपत्तावयुक्तं दृष्टान्तं विवृणोतीत्यर्थः ।

(५) द्वैतप्रमाणानां व्यवहारकाले बाधशून्यार्थबोधकत्वं व्यावहारिकं प्रामाण्यमुपपाद्यद्वैतप्रमाणानां वेदान्तानां सर्वकालेषु बाधशून्यब्रह्मबोधकत्वं तात्त्विकं प्रामाण्यमुपपादयितुपुक्तशङ्कामनूद्य दूषयतीत्यर्थः ।

(६) ननु मिथ्यात्वे श्रवणादीनामविद्यानिवृत्तिसमर्थसाक्षात्कारहेतुत्वं न स्यादत आह सांव्यवहारिकं त्विति

यहेतुरपि स्वानिर्वाच्याहिरूषितत्वेन । अन्यथा रज्ज्ञानादपि भयप्रसङ्गाज्ज्ञानत्वेनाविशेषात् । तस्मादनिर्वाच्याहिरूषितं ज्ञानमनिर्वाच्यमिति सिद्धमसत्यादपि सत्यस्योपजन इति । (१)न च ब्रूमः सर्वस्मादसत्यात्सत्यस्योपजनो यतः समारोपितधूमभावाया धूममहिष्या वह्निज्ञानं सत्यं स्यात् । नहि चक्षुषो रूपज्ञानं सत्यमुपजायत इति रसादिज्ञानेनापि ततः सत्येन भवितव्यम् । यतो नियमो हि स तादृशः सत्यानां यतः कुतश्चित्किञ्चिदेव जायत इत्येवमसत्यानामपि नियमो यतःकुतश्चिदसत्यात्सत्यं कुतश्चिदसत्यं यथा दीर्घत्वादेर्वर्णेषु समारोपितत्वाविशेषेऽप्यजीनमित्यत्रोज्यानिविरहमवगच्छन्ति सत्यमजिनमित्यत्रतु समारोपितदीर्घभावाज्ज्यानिविरहमवगच्छन्तो भवन्ति भ्रान्ताः(२)। न चोभयत्र दीर्घसमारोपं प्रति कश्चिदस्ति भेदस्तस्मादुपपन्नमसत्यादपि सत्यस्योदय इति । निदर्शनान्तरमाह–"स्वप्नदर्शनावस्थस्ये"ति । यथा सांसारिको जाग्रद्भुजङ्गं दृष्ट्वा पलायते ततश्च न दंशवेदनामाप्नोति, पिपासुः सलिलमालोक्य पातुं प्रवर्तते ततस्तदासाद्य पायंपाय(३)माप्यायितः सुखमनुभवति, एवं स्वप्नान्तिकेऽपि तदवस्थं सर्वमित्यसत्यात्कार्यसिद्धिः । शङ्कते–"तत्कार्यमप्यनृतमेवे"ति (पृ० ४६८ पं० १) एवमपि नासत्यात्सत्यस्य सिद्धिरुक्तेत्यर्थः । परिहरति–"तत्र ब्रूमो, यद्यपि स्वप्नदर्शनावस्थस्ये"ति । लौकिको हि सुप्तोत्थितोऽवगम्यं बाधितं मन्यते न तदवगतिं,(४) तेन यद्यपि परीक्षका अनिर्वाच्यरूपितामवगतिमनिर्वाच्यां निश्चिन्वन्ति तथापि लौकिकाभिप्रायेणैतदुक्तम् । अत्रान्तरे लौकायतिकानां मतमाकरोति–"एतेन स्वप्नदृशोऽवगत्यबाधनेने"ति । यदा खल्वयं चैत्रस्तारक्षवीं(५) व्यात्तविकटदंष्ट्राकरालवदनामुत्तब्धबभ्रुभ्रमन्मस्तकावचुम्बिलाङ्गूलामतिरोषारुणस्तब्ध(६)विशालवृत्तलोचनां रोमाञ्चसञ्जायोत्फुल्लभीषणां स्फटिकाचलभित्तिप्रतिबिम्बितामभ्यमित्रीणां(७)तनुमास्थाय स्वप्ने प्रतिबुद्धो मानुषीमात्मनस्तनुं पश्यति तदोभयदेहानुगतमात्मानं प्रतिसन्दधानो देहातिरिक्तमात्मानं निश्चिनोति, न तु देहमात्रम्, तन्मात्रे वे देहवत्प्रतिसन्धानाभावप्रसङ्गात् । कथं चैतदुपप

---

(१) यदसत्यात्सत्यबुद्धिः स्यात्तर्हि धूमाभासादपि सत्यवह्निज्ञानं स्यादित्याशङ्कितशङ्कायामाह नचेति । असत्यादपि सत्यमुत्पद्यत इत्युच्यते न पुनरसत्यात्सत्योत्पादनियम इत्यर्थः । धूममहिषी धूमी, बाष्पमिति यावत् ।

(२) अजीनामिति । 'ज्या वयोहानौ' इत्यस्य धातोर्निष्ठायां सम्प्रसारणे नञ्समासे चाजीनामिति रूपम्, अस्मादध्यस्तदीर्घभावादपि ज्यानिर्वयोहानेरभावं सत्यमवगच्छति, वक्ता तु ह्रस्वत्वेनाजिनमिति उच्चरिते भ्रमादजिनमिति गृहीतादस्माच्छब्दाद्या वयोहानिप्रतीतिः सा भ्रान्तिरजिनशब्दस्य चर्मवाचकत्वात् एवं चात्र यथारोपितत्वाविशेषेऽपि किञ्चिद्दीर्घ्यं सत्यबोधकं किञ्चिदसत्यबोधकमेवं वेदान्तिमतेऽपीत्यर्थः ।

(३) पीत्वा पीत्वा ।

(४) अवगतिर्बुद्धिः घटादिवत्सत्यापि प्रातिभासिकस्वप्नदृष्टवस्तुनः फलं, वैतथ्यं वा वृत्त्यभिव्यक्त अवगतिशब्दार्थः ।

(५) व्याघ्रमयीं, अस्य तनुमाश्रित्यत्यर्थः । उत्तब्धभुग्नस्य धृतं बभ्रुभ्रमदत्यन्तं भ्रमन्मस्तकावचुम्बि लाङ्गूलं यस्यास्तां तनुमित्यर्थः ।

(६) स्वस्तेतिपाठे इतस्ततो विक्षिप्तनयनामित्यर्थो बोध्यः ।

(७) अभिमत्रमामि प्रतियोद्धुं गतां स्फटिकशैलप्रतिबिम्बितां स्वामिमामिति भ्रमादात्मतनुं धावन्तीं मुक्त व्याघ्रतनुमास्थितां पश्यतीति, यदि स्वप्नदृशोऽवगतिरबाधिता स्यात्तर्ह्येवोपपद्यते इति भावः ।

स्येत यदि स्वप्नदृशोऽवगतिरबाधिता स्यात्तद्बाधे तु प्रतिसन्धानाभाव इति । असत्याच्च सत्यप्रतीतिः श्रुतिसिद्धाऽन्वयव्यतिरेकसिद्धा चेत्याह-"तथा च श्रुतिरि"ति । "तथाऽकारादी"ति । यद्यपि रेखास्वरूपं सत्यं तथापि तद्यथासङ्केतमसत्यं, नहि सङ्केतयितारः संकेतयन्तीदृशेन रेखाभेदेनायं वर्णः प्रत्येतव्योऽपि त्वीदृशो रेखाभेदोऽकार ईदृशश्च ककार इति, तथा चासमीचीनात्संकेतात्समीचिनिवर्णावगतिरिति सिद्धम् । (१)यच्चोक्तं-'एकत्वांशेन ज्ञानमोक्षव्यवहारः सेत्स्यति नानात्वांशेन तु कर्मकाण्डाश्रयो लौकिकश्च व्यवहारः सेत्स्यती'ति तत्राह--"अपि चान्त्यमिदं प्रमाण"मिति(पृ०४६९पं० १)। (२)यदि खल्वेकत्वानेकत्वनिबन्धनौ व्यवहारावेकस्य पुंसोऽपर्यायेण सम्भवतस्तत्तदर्थमुभयसद्भावः कल्प्येत, न त्वेतदस्ति, नह्येकत्वावगतिनिबन्धनः कश्चिदस्ति व्यवहारस्तदवगतेः सर्वोत्तरत्वात्, तथाहि--'तत्त्वमसी'त्यैकात्म्यावगतिः समस्तप्रमाणतत्फलव्यवहारानपवदमानैवोदीयते, नैतस्याः परस्तात्किञ्चिदनुकूलं प्रतिकूलं चास्ति यदपेक्षेत येन चेयं प्रतिक्षिप्येत, तत्रानुकूलप्रतिकूलनिवारणान्नातः परं किञ्चिदाकाङ्क्षयमिति । न चेयमवगतिर्डुलि(३)क्षीरप्रायेत्याह--"न चेयमि"ति । स्यादेतत्, अन्त्या चेदियमवगतिर्निष्प्रयोजना तर्हि, तथा च न प्रेक्षावद्भिरुपादीयेत, प्रयोजनवत्त्वे वा नान्त्या स्यादित्यत आह-"न चेयमवगतिरनर्थिका" कुतः ? "अविद्यानिवृत्तिफलदर्शनात्" । नह्येयमुत्पन्ना सती पश्चादविद्यां निवर्तयति येन नान्त्या स्यात्, किन्त्वविद्याविरोधि(४)स्वभावतया तन्निवृत्त्यात्मनोदयते । (५)अविद्यानिवृत्तिश्च न तत्कार्यतया फलमपि त्विष्टतयेष्टलक्षणत्वात्फलस्येति । प्रतिकूलं पराचीनं निराकर्तुमाह-"भ्रान्तिर्वे"ति । कुतो ? "बाधके"ति । (६)स्यादेतत्, मा भूदेकत्वनिबन्धनो व्यवहारोऽनेकत्वनिबन्धनस्त्वस्ति तदेव हि सकलामुद्वहति लोकयात्रामतस्तत्सिध्यर्थमनेकत्वस्य कल्पनीयं तात्त्विकत्वमित्यत आह-"प्राक्चे"ति । व्यवहारो हि बुद्धिपूर्वकारिणां बुद्ध्योपपद्यते, न त्वस्यास्तात्त्विकत्वेन, भ्रान्त्यापि तदुपपत्तेरित्यावेदितम् । सत्यं च तदविसंवादादृतं च विचारासहतयाऽनिर्वाच्यत्वात् । अन्त्यस्यैकात्म्यज्ञानस्यानपेक्षतया बाधकत्वमनेकत्वज्ञानस्य च प्रतियोगिग्रहापेक्षया दुर्बलत्वेन बाध्यत्वं वदन् प्रकृतमुपसंहरति-"तस्मादन्त्येन प्रमाणेने"ति । स्यादेतत्, न वयमनेकत्वव्यवहारसिध्यर्थमनेकत्वस्य तात्त्विकत्वं कल्पयामः, किन्तु श्रौतमेवास्य तात्त्विकत्वमिति चोदयति—"ननु मृदादी"ति । परिहरति(७)—

(१) भेदाभेदव्यवहारयोर्भेदाभेदोपपादकत्वं मन्यमानो विशिष्टाद्वैतवादी किं ब्रह्मज्ञानात्प्राचीनयोस्तयोस्तत्त्वमङ्गीकरोति पराचीनयोर्वेति विकल्पयोराद्ये नानात्वांशेनेति उत्तरितम्, अन्त्यमधुनाशङ्कते यच्चोक्तमिति। तत्त्वज्ञानात्प्रागभेदव्यवहारस्याप्राप्तत्वान्न तदुपन्यासः ।

(२) एकत्वज्ञानोत्तरकालमेकत्वव्यवहारोऽपि नास्ति, ततरामनेकत्वव्यवहार इत्याशयेन परिहरति यदीति।

(३) डुलिः कच्छपी, क्षीराभावेऽपि सा तत्स्मृत्याऽपत्यानि पोषयति ।

(४) यथा घटध्वंसो घटविरोधिकार्योदयो नाभावस्तस्य तुच्छत्वेन कार्यत्वानुपपत्तेरेवमविद्यानिवृत्तिरपि विरोधिविद्याभिव्यक्तिरित्याह विद्याविरोधीति ।

(५) यद्यविद्यानिवृत्तिर्विद्याया: स्वरूपं कथं तर्हि विद्याफलमत आहाविद्यानिवृत्तिश्चेति ।

(६) न वयं ज्ञानात्पराचीनव्यवहाराय द्वैतसत्यत्वं कल्पयामः किन्तु प्राचीनसिध्यर्थमेवेत्याभिप्रायेणाशङ्कते स्यादेतदिति । व्यवहारः=द्वैतसत्यत्वाक्षेपक इति यावत् ।

(७) कार्यकारणयोरन्यत्वांशेऽयं दृष्टान्तः न परिणामित्वे ब्रह्मणः कूटस्थत्वश्रुतिविरोधादित्याशयेन परिहरतीत्यर्थः ।

"नेत्युच्यत" इति (पृ० ४७० पं० १)। मृदादिदृष्टान्तेन हि कथंचित्परिणाम उक्तो, न च शक्य उक्तुमपि, 'मृत्तिकेत्येव सत्यमि'ति कारणमात्रसत्यत्वावधारणेन कार्यस्यानृतत्वप्रतिपादनात् साक्षात्कूटस्थनित्यत्वप्रतिपादिकास्तु सन्ति सहस्रशः श्रुतय इति न परिणामधर्मता ब्रह्मणः। अथ कूटस्थस्यापि परिणामः कस्मान्न भवतीत्यत आह—"नह्येकस्ये"ति। (१)शङ्कते—"स्थितिगतिवदि"ति। यथैकबाणाश्रये गतिनिवृत्ती एवमेकस्मिन् ब्रह्मणि परिणामश्च तदभावश्च कौटस्थ्यं भविष्यत इति। निराकरोति(२)—"न, कूटस्थस्येति विशेषणा"दिति। कूटस्थनित्यता हि सदातनी स्वभावादप्रच्युतिः, सा कथं प्रच्युत्या न विरुध्यते। न च धर्मिणो व्यतिरिच्यते धर्मो येन तदुपजनापायेऽपि धर्मी कूटस्थः स्यात्। भेद ऐकान्तिके गवाश्ववद्धर्मधर्मिभावाभावात्। बाणादयस्तु परिणामिनः स्थित्या गत्या च परिणमन्त इति। अपि च स्वाध्यायाध्ययनविध्यापादितार्थवत्त्वस्य वेदराशेरकेनापि वर्णेनानर्थकेन न भवितव्यं किं पुनरियता जगतो ब्रह्मयोनित्वप्रतिपादकेन वाक्यसन्दर्भेण, तत्र फलवद्ब्रह्मदर्शनसमाम्नानसन्निधावफलं जगद्योनित्वे समाम्नायमान तदर्थं सत्तदुपायतयाऽवतिष्ठते नार्थान्तरार्थमित्याह—"न च यथा ब्रह्मण" इति। अतो न परिणामपरत्वमस्येत्यर्थः। 'तदनन्यत्वमि'त्यस्य सूत्रस्य प्रतिज्ञाविरोधं श्रुतिविरोधं च चोदयति(३)—"कूटस्थब्रह्मवादिन" इति। परिहरति—"नाविद्यात्मके"ति। नाम च रूपं च ते एव बीजं तस्य व्याकरणं कार्यप्रपञ्चस्तदपेक्षत्वादैश्वर्यस्य। एतदुक्तं भवति—न तात्त्विकमैश्वर्यं सर्वज्ञत्वं च ब्रह्मणः किन्त्वविद्योपाधिकामिति तदाश्रयं प्रतिज्ञासूत्रं, तत्त्वाश्रयं तु तदनन्यत्वसूत्रं, तेनाविरोधः। सुगममन्यत् ॥ १४ ॥

सू० भावे चोपलब्धेः ॥ १५ ॥

कारणस्य भावः सत्ता चोपलम्भश्च तस्मिन् कार्यस्योपलब्धेर्भावाच्च। (४)एतदुक्तं भवति—विषयपदं विषयविषयिपरं, विषयिपदमपि विषयिविषयपरं, तेन कारणोपलम्भभावयोरुपादेयोपलम्भभावादिति सूत्रार्थः सम्पद्यते। (५)तथा च प्रमारूपानुविद्धबुद्धिबोध्येन चा-

---

(१) सृष्टौ परिणामित्वं, प्रलये तद्राहित्य च क्रमेण विरुद्धमिति दृष्टान्तेन शङ्कत इत्यर्थः।

(२) कूटस्थस्य कदाचिदपि विक्रिया न युक्ता कूटस्थत्वस्यैव व्याघातादित्याभिप्रायेण निराकरोतीत्यर्थः।

(३) पूर्वं 'जन्माद्यस्य यत' इतीश्वरकारणप्रतिज्ञा कृताधुना 'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यत्यन्ताभेदप्रतिपादने ईशित्रीशितव्यभेदाभावात्प्रतिज्ञाविरोधं, 'तस्माद्वा एतस्मा'दित्यादिश्रुतिविरोधञ्च चोदयतीत्यर्थः।

(४) ननु कारणस्य भाव एव कार्यस्योपलब्धेरेव च सूत्रपदाभ्यां प्रतीयते तत्कथमुभयत्रेतरेतरविशिष्टयोर्हेतुत्वमत आहैतदिति।

(५) सविशेषणहेतौ फलमाह तथाचेति। अयं भावः—उपलब्ध्युपलब्धेरिति हेतूकरणे प्रमासाक्षात्कारे साक्षात्कृतेन चाक्षुषेण व्यभिचारः स्यान्हि घटादेः प्रमायाश्चाभेदस्तन्निवृत्त्यर्थं भावे भावादिति विशेषणम्। नहि प्रमाया भाव एव घटो भवतीति न दोषः। यदि च तद्भावानुरक्तधीबोध्यत्वं हेत्वर्थस्तदापि भाति घट इति प्रमानुरक्तधीगम्येऽनेकान्तस्तादिदमुक्तं प्रमारूपानुविद्धेति। यदि च भावे भावादिति हेतुस्तदा वह्निभावे भवति विशिष्टधूमेऽनेकान्तः स्यात् अत उपलब्ध्युपलब्धेरिति। धूमस्य बहूपलब्धावेवोपलब्धेर्न दोषः इति।

श्रुतेण न व्यभिचारो, नापि वह्निमात्राभावानुविधायिभावाभावेन धूमभेदेनेति सिद्धं भवति । तत्र यथोक्तहेतोरेकदेशाभिधानेनोपक्रमते भाष्यकारः—"**इतश्च कारणादनन्यत्वं**—भेदाभावः **कार्यस्य, यत्कारणं**—यस्मात्कारणाद्धेतोः **एव कारणस्ये**"ति (पृ० ४७३ पं० १) अस्य व्यतिरेकमुखेन गमकत्वमाह—"**न च नियमेने**"ति । काकतालीयन्यायेनान्यभावेऽन्यदुपलभ्यते, न तु नियमेनेत्यर्थः । हेतुविशेषणाय व्यभिचारं चोदयति—"**नन्वन्यभावेऽपी**"ति । एकदेशिमतेन परिहरति—"**नेत्युच्यत**"इति । शङ्कयैकदेशिपरिहारं दूषयित्वा परमार्थपरिहारमाह—"**अथे**"ति । तदनेन हेतुविशेषणमुक्तम्(१)। पाठान्तरेणेदमेव सूत्रं व्याचष्टे—"**न केवलं शब्दादेवे**"ति । पट इति हि प्रत्यक्षबुद्ध्या तन्तव एवातानवितानावस्था आलम्ब्यन्ते, न तु तदतिरिक्तः पटः प्रत्यक्षमुपलभ्यते । एकत्वं तु तन्तूनामेकप्रावरणलक्षणार्थक्रियावच्छेदाद्बहूनामपि । यथैकदेशकालावच्छिन्ना धवखदिरपलाशादयो बहवोऽपि वनमिति । अर्थक्रियायां च प्रत्येकमसमर्था अप्यनारभ्यैवार्थान्तरं किंचिन्मिलिताः कुर्वन्तो दृश्यन्ते, यथा प्रावाण उखाधारणमेकम् , एवमनारभ्यैवार्थान्तर तन्तवो मिलिताः प्रावरणमेक करिष्यन्ति । (२)न च समवायाद्भिन्नयोरपि भेदानवसाय इति साम्प्रतम् । अन्योन्याश्रयत्वात् , भेदे हि सिद्धे समवायः समवायाच्च भेदः । (३)न च भेदे साधनान्तरमस्ति, अर्थक्रियाव्यपदेशभेदयोरभेदेप्युपपत्तेरित्युपपादितम् । तस्मायत्किंचिदेतत् । अनया च दिशा मूलकारणं ब्रह्मैव परमार्थसदवान्तरकारणानि च तन्त्वादयः सर्वेऽनेवंवाच्या एवेत्याह—"**तथा च तन्तुष्वि**"ति (पृ० ४७४ पं० ४) ॥ १५ ॥

सू० सत्त्वाच्चावरस्य ॥ १६ ॥

विभजते—"**इतश्चे**"ति । न केवलं श्रुतिः, उपपत्तिश्चात्र भवति—"**यच्च यदात्मने**"ति । (४)नहि तैलं सिकतात्मना सिकतायामस्ति, यथा घटोऽस्ति मृदि मृदात्मना । (५)प्रत्युत्पन्नो हि घटो मृदात्मनोपलभ्यते, नैवं प्रत्युत्पन्नं तैलं सिकतात्मना । तेन यथा सिकतायां तैलं न जायत एवमात्मनोऽपि जगज्ज जायेत जायते च, तस्मादात्मात्मनाऽऽसीदिति गम्यते । उपपत्त्यन्तरमाह—"**यथा च कारणं ब्रह्मे**"ति । (६)यथा हि घटः सर्वदा

(१) हेतुविशेषणमुक्तम्—उक्तरीत्या विशिष्टस्य हेतुत्वमुक्तम् न तु हेत्वन्तरपरत्वेन व्याख्यातमित्यर्थः ।

(२) पटस्य तन्तुव्यतिरेकेण नुपलम्भ समवायस्य भेदतिरोधायकत्वादन्यथासिद्ध इत्याशङ्क्याह न चेति । अन्योन्याश्रयत्वात्—सम्बन्धस्य भिन्नाश्रितत्वाद्धर्मिसिद्धौ समवाय समवायाच्च व्यतिरेकानुपलम्भौ समाहितायां भेदासाद्धरित्यन्योन्याश्रयत्वाद् इत्यर्थः ।

(३) ननु पटस्तन्तुभ्यो भिद्यते तदुपलम्भेपि कुविन्दव्यापारात्प्रागनुपलब्धत्वात् कुम्भवदित्यनुमानाद्भेदासाद्धेर्नान्योन्याश्रय इत्याशंक्याह न च भेद इति । अभेदव्यतिरेकस्तन्तूपलम्भे तदभिन्नपटोपलम्भाद्धेत्वसिद्धेरित्यर्थः ।

(४) उपपत्तिमेव दर्शयन्नाह नहीति । यथा मृदि घटो मृदात्मनाऽस्ति तथा सिकतायां तदात्मना तैलं नास्ति, तदुपादानोपादेयत्वाभावकृतामित्यर्थ ।

(५) ननु मृदेव घटोत्पत्तेः प्रागस्ति कथं तदात्मना घटस्य सत्ता अत आह प्रत्युत्पन्नो हीति । उत्पन्नस्य घटस्य मृदात्मत्वदर्शनान्मृदि सत्यां घटसत्त्वं युक्तामित्यर्थः ।

(६) ननु कार्यस्य कालत्रये सत्यत्व भाष्योक्तमसङ्गतम् तथ सति कार्यत्वव्याघातादित्याशंक्यानिर्वाच्यरूपस्य कादाचित्कत्वेपि कार्यस्य तत्त्वमधिष्ठानं तच्च नित्यमिति युक्त्या साधयति यथा हीति। कार्यस्य

सर्वत्र घट एव न जात्वसौ क्वचित्पटो भवत्येवं सदपि सर्वत्र सर्वदा सदेव न तु क्वचित्कदाचिदसद्भवितुमर्हतीत्युपपादितमधस्तात्। तस्मात्कार्यं त्रिष्वपि कालेषु सदेव। सत्त्वं चेत् किमतो यद्यैवमित्यत आह—"एकं च पुन"रिति (पृ० ४७५ पं० २)। सत्त्वं चैकं कार्यकारणयोः, नहि प्रतिव्यक्ति सत्त्वं भिद्यते, ततश्चाभिन्नसत्तानन्यत्वादेते अपि मिथो न भिद्येते इति। (१)न च ताभ्यामनन्यत्वात्सत्त्वस्यैव भेद इति युक्तम्। तथा सति हि सत्त्वस्य समारोपितत्वप्रसङ्गः। तत्र भेदाभेदयोरन्यतरसमारोपकल्पनायां किं तात्त्विकाभेदोपादाना भेदकल्पनास्त्वाहो तात्त्विकभेदोपादानाऽभेदकल्पनेति। वयं तु पश्यामो भेदग्रहस्य प्रतियोगिग्रहापेक्षत्वाद्भेदग्रहमन्तरेण च प्रतियोगिग्रहासम्भवादन्योन्यसंश्रयापत्तेरभेदग्रहस्य च निरपेक्षतया तदनुपपत्तेः,एकैकाश्रयत्वाच्च भेदस्यैकाभावे तदनुपपत्तेः,अभेदग्रहोपादानैव भेदकल्पनेति सर्वमवदातम् ॥ १६ ॥

सू० असदव्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॥ १७ ॥

(२)व्याकृतत्वाव्याकृतत्वे च धर्मावनिर्वचनीयौ। सूत्रमेतन्निगदव्याख्यातेन भाष्येण व्याख्यातम् ॥ १७ ॥

सू० युक्तेः शब्दान्ताच्च ॥ १८ ॥

"अतिशयवत्त्वात्प्रागवस्थाया" इति (पृ० ४७६ पं० ८)। अतिशयो हि धर्मो नासत्यतिशयवति कार्ये भवितुमर्हतीति। ननु न कार्यस्यातिशयो नियमहेतुरपि तु कारणस्य शक्तिभेदः स चासत्यपि कार्ये कारणस्य सत्त्वात्सन्नेवेत्यत आह—"शक्तिभे"दे ति। नान्या कार्यकारणाभ्यां, (३)नाप्यसती कार्यात्मनेति योजना। "अपि च कार्यकारणयो"रिति। यद्यपि 'भावाच्चोपलब्धेरि'त्यत्रायमर्थ उक्तस्तथापि समवायदूषणाय पुनरवतारितः। (४)अनभ्युपगम्यमाने च—समवायस्य समवायिभ्यां संबन्धे,विच्छेदप्रसङ्गोऽवयवा-

---

सत्त्वं स्वरूपं धर्मो वा? आद्ये तस्य कदाचिदसत्त्वं न स्यात्, धर्मत्वे च सत्त्वासत्त्वयोर्धर्मयोः कायस्य धर्मिणोऽन्वयात् कादाचित्कत्वव्याहतिरिति 'दृष्टनष्टस्वरूपत्वात्' इति भाष्यव्याख्यानावसरे उपपादितमिति भावः।

(१) यदि कार्यकारणयोरेकसत्त्वादभेदादभिन्नत्वं तर्हि तस्यापि द्वाभ्यामभेदाद्भेदापत्तिरित्याशंक्याह नचेति। नहि वयं सत्त्वेन कार्यकारणयोः साक्षादभेदं ब्रूमः किन्तु तत्र तयोरारोपितत्वेन तद्व्यतिरेकेणाभावम्। यदि च सत्त्वमेव कार्यकारणयोरारोपितं मन्येत तत्राह तथासतीति। तत्र दोषमाह तत्रेति। भेद—कार्यकारणरूपः, सत्त्वमभेदः, अस्मादयं मित्र इत्यत्र पञ्चम्युल्लिखितावधेर्यद्धो धर्मिणः सकाशादगृहीतभेदस्य न सम्भवति, भेदग्रहश्च नागृहीते प्रतियोगिन्युपपद्यते धर्मिणोपि स्वापेक्षया तत्प्रसङ्गात्ततश्चान्योन्याश्रयप्रसक्तेः भेद एवारोपितो नाभेद इत्याह वयं त्विति।

(२) व्याकृतनामरूपत्वादिति भाष्येण व्यक्ताव्यक्तस्वीकारे साङ्ख्यमतापातमाशंक्याह व्याकृतत्वेति।

(३) अत्र कार्यरूपेण शक्तेः सत्त्वमापाद्यते, तथासति हि कार्यस्यासत्त्वप्रतिक्षेपः सिध्यतीति मन्वान आह नाप्यसतीति।

(४) कार्यकारणयोरन्यत्वेऽपि समवायवशात् भिन्नौ मन्ताविति बुद्धिर्नोदेतीत्याशङ्क्याह समवायदूषणमारब्धम्, तत्र च समवायः समवायिभिः सम्बद्धो न वा? आद्ये सम्बन्धः किं समवाय उत स्वरूपम्? आद्ये समवायानवस्था, द्वितीये मृद्घटयोरपि स्वरूपसम्बन्धादेवोपपत्तेः समवायानिद्धिः। असम्बद्धपक्षे दोषमाह अनभ्युपगम्यमान इति। असम्बद्धस्य विशिष्टबुद्धिनियामकत्वाभावाद्द्रव्यगुणादीनां विशिष्टधीविरहप्रसङ्ग इत्यर्थः।

वयविद्रव्यगुणादीनां मिथः, नञ्संबद्धः समवायिभ्यां समवायः समवायिनौ संबन्धयेदिति । शङ्कते—"अथ समवायः स्वयमि"ति (पृ० ४७७ पं० १) यथा हि सत्त्वयोगाद्द्रव्यगुणकर्माणि सन्ति सत्त्वं तु स्वभावत एव सदिति न सत्त्वान्तरयोगमपेक्षते, तथा समवायः समवायिभ्यां संबन्धुं न संबन्धान्तरमपेक्षते स्वयं संबन्धरूपत्वादिति, तदेतत्सिद्धान्तान्तरविरोधापादनेन निराकरोति—"संयोगोपि तर्ही"ति । न च संयोगस्य कार्यत्वात् कार्यस्य च समवायिकारणाधीनजन्मत्वाद् असमवाये च तदनुपपत्तेः समवायकल्पना संयोग इति वाच्यम् । (१)अजसंयोगे तदभावप्रसङ्गात् । अपि च संबन्ध्यधीननिरूपणः समवायो यथा संबन्धिद्वयभेदे न भिद्यते तन्नाशे च न नश्यत्यपि तु नित्य एक एवं संयोगोऽपि भवेत् ततः को दोषः । अथैतत्प्रसङ्गभिया संयोगवत्समवायोऽपि प्रतिसंबन्धिभिन्नं भिद्यते चानित्यश्चेत्यभ्युपेयेत,(२)तथा सति स यथैकस्मान्निमित्तकारणादेव जायत एवं संयोगोऽपि निमित्तकारणादेव जनिष्यत इति समानम् । "तादात्म्यप्रतीतेश्चे"ति । संबन्धावगमो हि संबन्धकल्पनाबीजं न तादात्म्यावगमस्तस्य नानात्वैकाश्रयसम्बन्धविरोधादिति । वृत्तिविकल्पेनावयवातिरिक्तमवयविनं दूषयति(३)—"कथं च कार्यमि"ति । "समस्ते"ति । मध्यपरभागयोरर्वाग्भागव्यवहितत्वात् । अथ समस्तावयवव्याप्तत्वमपि कतिपयावयवस्थानो ग्रहीष्यत इत्यत्र आह—"नहि बहुत्वमि"ति । "अथावयवश इति" (पृ० ४७८ पं० १) बहुत्वसंख्या हि स्वरूपेणैव व्याप्तज्य संख्येयेषु वर्तते इत्येकतमसंख्येयाग्रहणेपि न गृह्यते, समस्तव्याप्तित्वात्तद्ग्रहस्य । अवयवी तु न स्वरूपेणावयवान् व्याप्नोति, अपि त्ववयवशः, तेन यथा सूत्रमवयवैः कुसुमानि व्याप्नुवन्न समस्तकुसुमग्रहणमपेक्षते कतिपयकुसुमस्थानस्यापि तस्योपलब्धेः, एवमवयव्यपीति भावः । निराकरोति—"तदापी"ति । शङ्कते—"गोत्वादिवदि"ति । निराकरोति—"ने"ति । यद्यपि गोत्वस्य सामान्यस्य विशेषा अनिर्वाच्या न परमार्थसन्तस्तथा च क्वास्य प्रत्येकपरिसमाप्तिरिति, तथाप्यभ्युपेत्येदमुदितमिति मन्तव्यम् । (४)अकर्तृका यतोऽतो निरात्मिका स्यात्, कारणाभावे हि कार्यमनुत्पन्नं किं नाम भवेत्, अतो निरात्मकत्वमित्यर्थः । (५)यद्युच्येत घटशब्दस्तदवयवेषु व्यापाराविष्टतया पूर्वापरीभावमापन्नेषु घटोपजनाभिमुखेषु तादर्थ्यनिमित्तादुपचारात्प्रयुज्यते, तेषां च सिद्धत्वेन कर्तृत्वमस्तीत्यु-

---

(१) ननु समवायः स्वपरनिर्वाहकत्वात्सम्बन्धान्तरानपेक्षश्चेत्संयोगोपि नापेक्षेतेति वेदान्तिना प्रतिबन्दीरूक्तं, तच्च संयोगस्य कार्यत्वरूपविशेषान्न युक्तमित्याशंक्य नित्ये आकाशात्मसंयोगे तस्यासिद्धिमाह अजेति ।

(२) अस्तु तावत्संयोगनित्यत्वाभावार्थं समवायोऽप्यनित्यस्तथापि नानवस्था समवायस्य समवायिकारणानभ्युपगमेन निमित्तकारणमात्रात्तदुत्पत्त्या समवायान्तरप्रसङ्गाभावादित्याशंक्याह तथासतीति । ततः संयोगस्य समवायिकारणमिच्छता समवायस्यापि तदेष्टव्यमित्यनवस्था तदवस्थेवेत्यर्थः ।

(३) एवं प्रतीत्यनुसारेण कार्यस्य कारणात्मना सत्त्वं स्वरूपेण तु मिथ्यात्वमित्यत्र प्रसङ्गेनं समवायखण्डनं कृत्वा वृत्त्यनिरूपणाच्च तस्य मिथ्यात्वमाबेदयितुं वृत्तिविकल्पेनावयवातिरिक्तमवयविनं दूषयतीत्यर्थः ।

(४) एवं वृत्त्यनिरूपणात्कार्यस्यानिर्वाच्यत्वं प्रदर्श्यासत्कार्यवादे दोषान्तरदानपरं 'प्रागुत्पत्तेश्चे'त्यादिभाष्यं व्याचक्षाण आहाकर्तृकेति ।

(५) उत्पत्तिकर्तृ कार्यस्य प्रागुत्पत्तेर्नासत्त्वमित्युक्ते तदोत्पत्तेर्न कार्यं कर्तृ किन्तु कारणमिति शङ्कते

पपद्यते घटो भवतीति प्रयोग इत्यत आह-"**घटस्य चोत्पत्तिरुच्यमाने**"ति । (१)उत्पादना हि सिद्धानां कपालकुलालादीनां व्यापारो नोत्पत्तिः । न चोत्पादनैवोत्पत्तिः, प्रयोज्यप्रयोजकव्यापारयोर्भेदादभेदे वा घटमुत्पादयतीतिवद्घटमुत्पद्यत इत्यपि प्रसङ्गात् । तस्मात्करोतिकारयत्योरिव घटगोचरयोर्भृत्यस्वामिसमवेतयोरुत्पत्त्युत्पादनयोरधिष्ठानभेदोऽभ्युपेतव्यः, तत्र कपालकुलालादीनां सिद्धानामुत्पादनाधिष्ठानानां नोत्पत्त्यधिष्ठानत्वमस्तीति पारिशेष्याद् घट एव साध्य उत्पत्तेरधिष्ठानमेषितव्यः । न चासावसन्नधिष्ठानं भवितुमर्हतीति सत्त्वमस्याभ्युपेयम् । (२) एवं च घटो भवतीति घटव्यापारस्य धातूपात्तत्वात् तत्रास्य कर्तृत्वमुपपद्यते तण्डुलानामिव सतां विक्लित्तौ विक्लिद्यन्ति तण्डुला इति । शङ्कते-"**अथ स्वकारणसत्तासम्बन्ध एवोत्पत्तिरि**"ति (पृ० ४७९ पं० ३) । एतदुक्तं भवति-नोत्पत्तिर्नाम कश्चिद्व्यापारो येनासिद्धस्य कथमत्र कर्तृत्वमित्यनुयुज्येत, किन्तु स्वकारणसमवायः स्वसत्तासमवायो वा, स चासतोऽप्यविरुद्ध इति । सोऽप्यसतोऽनुपपन्न इत्याह-"**कथमलब्धात्मकमि**"ति । अपि च प्रागुत्पत्तेरसत्त्वे कार्यस्येति कार्याभावस्य भावेन मर्यादाकरणमनुपपन्नमित्याह-"**अभावस्य चे**"ति । स्यादेतत्, अत्यन्ताभावस्य वन्ध्यासुतस्य मा भून्मर्यादाऽनुपाख्यो हि सः, घटप्रागभावस्य तु भविष्यता घटेनोपाख्येयस्यास्ति मर्यादेत्यत आह-"**यदि वन्ध्यापुत्रः कारकव्यापारादि**"ति । **उक्तमेतदधस्तात्**यथा न जातु घटः पटो भवत्येवमसदपि सन्न भवतीति । तस्मान्मृत्पिण्डे घटस्यासत्त्वेऽत्यन्तासत्त्वमेवेति । अत्रासत्कार्यवादी चोदयति-"**नन्वेवं सती**"ति । प्राक् प्रसिद्धमपि कार्यं कदाचित्कारणेन योजयितुं व्यापारोऽर्थवान्भवेदित्यत आह-"**तदनन्यत्वाच्चे**"ति । परिहरति-"**नैष दोष**" **इति** (पृ० ४८० पं० २) । **उक्तमेतद्यथा** भुजङ्गतत्त्वं न रज्जोर्भिद्यते, रज्जुरेव हि तत्, काल्पनिकस्तु भेद, एवं वस्तुतः कार्यतत्त्वं न कारणाद्भिद्यते, कारणस्वरूपमेव हि तत्,अनिर्वाच्यं तु कार्यरूपं भिन्नमिवाभिन्नमिव चावभासत(३)इति, तदिदमुक्तं "**वस्त्वन्यत्वमि**"ति। वस्तुतः परमार्थतोऽन्यत्वं न विशेषदर्शनमात्राद्भवति, सांव्यवहारिके तु कथंचित्तत्त्वान्यत्वे भवत एवेत्यर्थः । अनयैव हि दिशैष संदर्भो योज्यः । असत्कार्यवादिनं प्रति दूषणान्तरमाह-"**यस्य पुनरि**"ति (पृ० ४८१ पंक्ति ४) । कार्यस्य कारणादभेदे सविषयत्वं कारकव्यापारस्य स्यान्नान्यथेत्यर्थः । "**मूलकारणं**" ब्रह्म । शब्दान्तराच्चेति सूत्रावयवमवतार्य व्याचष्टे-"**एवं युक्तेः कार्यस्ये**"ति । अतिरोहितार्थम् ॥ १८ ॥

सू० (४) पटवच्च ॥ १९ ॥

यद्युच्येतेति । यद्यप्युत्पद्यते घट इति कार्यस्य कर्तृत्वभानम् , तथापि गौण्या वृत्त्याऽकारकस्य, तत्र च मिलेषु कपालेषु 'जायत' इति पूर्वापरकालव्याप्तक्रियायोगानुपपत्तेः कार्योत्पादनाया व्याप्तक्रियात्वादित्यर्थः ।

(१) कपालकर्तृका घटविषयोत्पादना नोत्पत्तिः, सा तु घटकर्तृकेति परिहरति उत्पादनेत्यादिना । यद्युत्पत्तिरुत्पादनैव तर्हि उत्पादनायामिवोत्पत्तावपि सकर्मकत्वात् घटस्य कर्मत्वं व्यपदिश्येत न चैवमस्तीत्यर्थः । (२) धातूपात्तव्यापारः कर्तेति कर्तृलक्षणयोगाच्च घट एवोत्पत्तिकर्तेत्याह एवं चेति ।

(३) सामानाधिकरण्येन हि भिन्नमिवाभिन्नमिव चकास्तीत्यर्थः ।

(४) कार्यमुपादानकारणाद्भिन्न तदुपलब्ध्यापि अनुपलभ्यमानत्वात्, ततोऽधिकपरिमाणत्वाच्च मशककादिव शश इत्यनुमानयोर्व्यभिचारार्थं पटवच्चेति सूत्रम् ।

सू० (१)यथा च प्राणादि ॥ २० ॥

इति च सूत्रे निगदव्याख्यातेन भाष्येण व्याख्यातेति ॥ १९-२० ॥

सू० इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥

(२)यद्यपि शारीरात्परमात्मनो भेदमाहुः श्रुतयस्तथाप्यभेदमपि दर्शयन्ति श्रुतयो बहव्यः । न च भेदाभेदावेकत्र समवेतौ, विरोधात् । (३)न च भेदस्तात्त्विक इत्युक्तम् । तस्मात्परमात्मनः सर्वज्ञान्न शारीरस्तत्त्वतो भिद्यते । स एव त्ववियोपधानभेदाद्घटकराकाशवद्भेदेन प्रथते । उपहितं चास्य रूपं शारीरस्तेन मा नाम जीवाः परमात्मतामात्मनोऽनुभूवन्, परमात्मा तु तानात्मनोऽभिन्नाननुभवत्यननुभवे सार्वज्ञ्यव्याघातः । तथा चायं जीवान् बध्नन्नात्मानमेव बध्नीयात् । तत्रेदमुक्तं "न हि कश्चिदपरतन्त्रो बन्धनागारमात्मनः कृत्वाऽनुप्रविशती"त्यादि (पृ० ४८३ पं १५) । तस्माच्च चेतनकारण जगदिति पूर्वः पक्षः ॥ २१ ॥

सू० अधिकं तु भेदनिर्देशात् ॥ २२ ॥

सत्यमयं परमात्मा सर्वज्ञत्वाद्यथा जीवान् वस्तुत आत्मनोऽभिन्नान् पश्यति पश्यत्येवं न भावत(४)एषां सुखदुःखादिवेदनासङ्गोऽस्ति, अविद्यावशात्त्वेषां तद्वदभिमान इति । तथा च तेषां सुखदुःखादिवेदनायामप्यहमुदासीन इति न तेषां बन्धनागारनिवेशेऽप्यस्ति क्षतिः का चिन्ममेति न हिताकरणादिदोषापत्तिरिति सिद्धान्तस्तदिदमुक्तम्—"अपि च यदा तत्त्वमसी"ति (पृ० ४८४ पं० १५) 'अपि चे'ति चः पूर्वोपपत्तिसाहित्यं द्योतयति, नोपपत्त्यन्तरताम् ॥ २२ ॥

स्यादेतत्, यदि ब्रह्मविवता जगत, हन्त सर्वस्यैव जीववच्चैतन्यप्रसङ्ग इत्यत आह—

सू० अदृश्यादिवच्च तदनुपपत्तिः ॥ २३ ॥

अतिरोहितार्थेन भाष्येण व्याख्यातम् ॥ २३ ॥

सू० उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २४ ॥

ब्रह्म खल्वेकमद्वितीयतया परानपेक्षं क्रमेणोत्पद्यमानस्य जगतो विविधविचित्ररूपस्योपादानमुपेयते, तदनुपपन्नम्, नह्येकरूपात्कारणात्कार्यभेदो भवितुमर्हति तस्यैकस्मिकत्वप्रसङ्गात्, कारणभेदो हि कार्यभेदहेतुः, क्षीरबीजादिभेददृश्यङ्कुरादिकार्यभेददर्शनात् । (५)न

---

(१) उक्तप्रतिज्ञायामेव विलक्षणकार्यकारित्वरूपहेतौ व्यभिचारार्थमाह सूत्रकारः यथाच प्राणादीति ।

(२) ननु 'सोऽन्वेष्टव्य' इत्यादिभेदानदेशात् कथं जीवाभिन्ने समन्वयासिद्धिरूपपूर्वपक्षस्तत्राह यद्यपीति ।

(३) यदि भेदाभेदावेकत्र विरुद्धौ तर्ह्यभेद एव भेदेन बाध्यतामत आह नचेति । उक्तमनन्तराधिकरण इत्यर्थः ।

(४) भावत - तत्त्वतः, तद्वदभिमान इति पश्यतीत्यन्वयः । यद्यपि दर्शनक्रिया परमात्मनि नास्ति तथापि स्वप्रकाश एव पुरुषस्तत्तद्विशेषोपरक्तस्तं तं यथाऽवस्थितं भासयतीति पश्यतीति निर्देशः ।

(५) कारणैक्ये कार्यवैजात्ययोगरूपं दोषमुक्त्वा एकजातीयकार्याणां क्रमायोगरूपं तमाह न चाक्रमादिति ।

चाक्रमात् कारणात्कार्यक्रमो युज्यते समर्थस्य क्षेपायोगाद(१)द्वितीयतया च क्रमवत्तत्सहकारिसमवधानानुपपत्तेः । तदिदमुक्त"मिह हि लोके"इति (पृ० ४८६ पं० १)। एकैकं मृदादि कारकं, तेषां तु सामग्र्यं साधनम्, ततो हि कार्यं भवत्येव,(२) तस्मान्नाद्वितीयं ब्रह्म जगदुपादानमिति प्राप्ते,

उच्यते-क्षीरवद्धि । इदं तावद्भवान्पृष्टो व्याचष्टां, किं तात्त्विकमस्य रूपमपेक्ष्येदमुच्यते उतानादिनामरूपबीजसहितं काल्पनिकं सार्वज्ञ्यं सर्वशक्तित्वम् ? तत्र पूर्वस्मिन् कल्पे किं नाम ततोऽद्वितीयादसहायादुपजायते, न हि तस्य शुद्धबुद्धमुक्तस्वभावस्य वस्तु सत्कार्यमस्ति, तथा च श्रुतिः "न तस्य कार्यं करणं च विद्यते" इति (पृ० ४८७ पं० १)। उत्तरस्मिंस्तु कल्पे यदि कुलालादिवदत्यन्तव्यतिरेकसहकारिकारणाभावादनुपादानत्वं साध्यते, ततः क्षीरादिभिर्व्यभिचारः, तेऽपि हि बाह्याताच्चनादिकारणानपेक्षा(३) एव कालपरिवासवशेन स्वत एव परिणामान्तरमासादयन्ति, अथान्तरकारणानपेक्षत्वं हेतुः क्रियते, तदसिद्धमनिर्वाच्यनामरूपबीजसहायत्वात्, तथा च श्रुतिः--'मायां तु प्रकृतिं विद्धि मायिनं तु महेश्वरम्, इति । (४)कार्यक्रमेण तत्परिपाकोऽपि क्रमवानुज्ञेयः । (५)एकस्मादपि च विचित्रशक्तेः कारणादनेककार्योत्पादो दृश्यते, यथैकस्माद्बीजादङ्कुरपाकावेकस्माद्वा कर्मणः संयोगविभागसंस्काराः ॥ २४ ॥

(६)यदि तु चेतनत्वे सतीति विशेषणात्र क्षीरादिभिर्व्यभिचारो, दृष्टा हि कुलालादयो बाह्यमृदाद्यपेक्षाश्चेतनं च ब्रह्मेति, तत्रेदमुपतिष्ठते—

सू० देवादिवदपि लोके ॥ २५ ॥

लोक्यतेऽनेनेति लोकः शब्द एव तस्मिन् ॥ २५ ॥

सू० कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २६ ॥

सू० श्रुतेस्तु शब्दमूलत्वात् ॥ २७ ॥

ननु न ब्रह्मणस्तत्त्वतः परिणामो येन कात्स्न्र्यभागविकल्पेनाक्षिप्येत, अविद्याकल्पितेन तु नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मना तत्त्वान्यत्वाभ्यामनिर्वचनीयेन परिणामादिव्यवहारास्पदत्वं ब्रह्म प्रतिपद्यते, न च कल्पितं रूपं वस्तु स्पृशति, न हि चन्द्रमसि तैमिरि-

---

(१) समर्थमपि सहकार्यपेक्षं सत् क्रमेण कुर्यादित्याशङ्क्यामपनयन्नाद्वितीयत्वप्रयुक्तामनुपपत्तिमाह-द्वितीयतया चेति ।

(२) अत्र कल्पतरुकारमतेन 'साधयत्येवे'त्येव पाठः, 'साधयत्येवेति साधनमित्यर्थ इति टीकनात्, किन्तु प्राचीनपुस्तकेष्वस्यैवोपलब्धेरयमेव मुद्रितः ।

(३) आद्ययनादिबाह्यकारणानपेक्षा इत्यर्थः ।

(४) ननु मायाया अव्यक्रमत्वात्कथमक्रमात्कारणात्कार्यक्रमस्तत्राह कार्यक्रमेणेति । तस्या मायाः परिपाकस्तत्तत्कार्यसर्गं प्रति पौष्कल्यम्, तस्य क्रमोऽपि कार्यक्रमान्यथानुपपत्त्या कल्प्य इत्यर्थः ।

(५) पूर्वमविद्यासाचिव्यादसहायत्वमासिद्धमित्युक्तमधुनाङ्गीकृत्यापि तदनैकान्तिकत्वमाह एकस्मादिति । शरे उत्पन्नं कर्म पूर्वाकाशप्रदेशविभागमुत्तरप्रदेशसंयोगं शरे च वेगाख्यसंस्कारं जनयतीत्यनैकान्तम् ।

(६) असहायस्योपादानत्वं क्षीरवदुपपाद्यासहायस्याधिष्ठातृत्वसमर्थकं सूत्रमवतारयति यदि त्विति ।

कस्य द्वित्वकल्पना चन्द्रमसो द्वित्वमावहति, तदनुपपत्त्या वा चन्द्रमसोऽनुपपत्तिः, तस्माद्वास्तवी परिणामकल्पनानुपपद्यमानापि न परमार्थसतो ब्रह्मणोऽनुपपत्तिमावहति, तस्मात्पूर्वपक्षाभावादनारभ्यमेदमधिकरणमित्यत आह—"चेतनमेकमि"ति (पृ० ४८८ पं० १२)। यद्यपि श्रुतिशतादैकान्तिकाद्वैतप्रतिपादनपरात् परिणामो वस्तुतो निषिद्धस्तथापि (१)क्षीरादिदेवतादृष्टान्तेन पुनस्तद्वास्तवत्वप्रसङ्गं पूर्वपक्षोपपत्त्या सर्वथाऽयं पक्षो न घटयितुं शक्यत इत्यपवाद्य 'श्रुतेस्तु शब्दमूलत्वात्,आत्मनि चैवं विचित्राश्च हीं'ति सूत्राभ्यां विवर्तदृढीकरणेनैकान्तिकाद्वयलक्षणः श्रुत्यर्थः परिशोध्यत इत्यर्थः । (२)तस्मादस्त्यविकृतं ब्रह्म" (पृ० ४९० पं० ७) तत्त्वतः । "ननु शब्देनापी"ति चोद्यमविद्याकल्पितत्वोद्घाटनाय, न हि निरवयवत्वसावयवत्वाभ्यां विधान्तरमस्त्येकनिषेधस्येतरविधाननान्तरीयकत्वात्, तेन प्रकारान्तराभावान्निरवयवत्वसावयवत्वयोश्च प्रकारयोरनुपपत्तेर्भावप्लवनायार्थवदप्रमाणं शब्दः स्यादिति चोद्यार्थः । परिहारः सुगमः ॥ २६ ॥ २७ ॥

सू० आत्मनि चैवं विचित्राश्च हि ॥ २८ ॥

अनेन स्फुटितो मायावादः । स्वप्नदृगात्मा हि मनसैव स्वरूपानुपमर्देन रथादीन्सृजति २८॥

सू० स्वपक्षदोषाच्च ॥ २९ ॥

चोदयति—"ननु नैवे"ति (पृ० ४९२ पं० १५) । परिहरति—"नैवमार्तीयकनैवे"ति । (३)यद्यपि समुदायः सावयवस्तथापि प्रत्येकं सत्त्वादयो निरवयवाः, नास्ति सम्भवः सत्त्वमात्रं परिणमते न रजस्तमसी इति, सर्वेषां सम्भूयपरिणामाभ्युपगमात । प्रत्येकं चानवयवानां कृत्स्नपरिणामे मूलोच्छेदप्रसङ्गः, एकदेशपरिणामे वा सावयवत्वमनिष्टं प्रसज्येत । "तथाऽणुवादिनोपी"ति (पृ० ४९३ पं० ५) । वैशेषिकाणां द्व्यणुभ्यां संयुज्य त्र्यणुकमेकमारभ्यते, तैस्त्रिभिर्त्र्यणुकैश्चतुरणुकमेकमारभ्यत इति प्रक्रिया । तत्र द्वयोरण्वोरनवयवयोः संयोगस्तावणू व्याप्नुयादव्याप्नुवन्वा तत्र न वर्तेत, नास्ति सम्भवः स एव तदानीं तत्र वर्तते न वर्तते चेति । तथा चोपर्यधः पार्श्वस्थाः षडपि परमाणवः समानदेशा इति प्रथिमानुपपत्तेरणुमात्रः पिण्डः प्रसज्येत । अव्यापने वा षडवयवः परमाणुः स्यादित्यनवयवत्वव्याकोपः । अशक्यं च सावयवत्वमुपेतुम्, तथा सत्यनन्तावयवत्वेन सुमेरुराजसर्षपयोः समानपरिणामत्वप्रसङ्गः तस्मात्समानो दोषः । आपातमात्रेण साम्यमुक्तं परमार्थतस्तु भाविकं परिणामं वा कार्यकारणभावं(४) वेच्छतामेष दुवारो दोषो न पुनरस्माकं मायावादिनामित्याह—"परिकृतास्त्वि"ति ॥ २९ ॥

---

(१) सावयवस्यैव नानाकार्योपादानतेति न्यायेन समन्वयस्य विरोधसन्देहे पूर्वाधिकरणीयक्षीरदृष्टान्तेन परिणामित्वभ्रमे तन्निरासात्सङ्गतिमाह क्षीरादीति ।

(२) 'तस्मादविकृतं ब्रह्मेति' भाष्यं तदस्तीति तत्त्वत च इति च पदाध्याहारेण व्याचष्टे तस्मादिति ।

(३) अवस्तुत्वात्समुदायस्य न परिणामः, समुदायिष्वपि यदि सत्त्वमात्रस्य परिणामः न रजस्तमसोस्ततो मूलोच्छेदो न स्यान्न चैतदस्तीत्याह यद्यपि इति ।

(४) आरम्भम् ।

विचित्रशक्तित्वमुक्तं ब्रह्मणस्तत्र श्रुत्युपन्यासपरं सूत्रम्--

सू० सर्वोपेता च तद्दर्शनात् ॥ ३० ॥

एतदाक्षेपसमाधानपरं सूत्रम्--

सू० विकरणत्वान्नेति चेत्तदुक्तम् ॥ ३१ ॥

(१) कुलालादिभ्यस्तावद्बाह्यकरणापेक्षेभ्यो देवादीनां बाह्यानपेक्षाणामान्तरकरणापेक्षसृष्टीनां प्रमाणेन दृष्टो यथा विशेषो नापन्होतुं शक्यः। (२)यथा तु जाग्रत्सृष्टेर्बाह्यकरणापेक्षायास्तदनपेक्षान्तरकरणमात्रसाध्या दृष्टा स्वप्ने रथादिसृष्टेरशक्यापह्नवेत्तुमेवं सर्वशक्तेः परस्या देवताया आन्तरकरणानपेक्षाया जगत्सर्जनं श्रूयमाणं न सामान्यतो दृष्टमात्रेणापह्नवमर्हतीति ॥ ३० ॥ ३१ ॥

सू० न प्रयोजनवत्त्वात् ॥ ३२ ॥

(३)न तावदुन्मत्तवदस्य मतिविभ्रमाज्जगत्प्रक्रिया, भ्रान्तस्य सर्वज्ञत्वानुपपत्तेः। तस्माप्रेक्षावताऽनेन जगत्कर्तव्यम्। प्रेक्षावतश्च प्रवृत्तिः स्वपरहिताहितप्राप्तिपरिहारप्रयोजना सती नाप्रयोजनाल्पायासापि सम्भवति, किं पुनरपरिमेयानेकविधोच्चावचप्रपञ्चजगद्विभ्रमविरचना महाप्रयासा। अत एव लीलापि परास्ता। अल्पायाससाध्या हि सा, न चेयमप्यप्रयोजना, तस्या अपि सुखप्रयोजनवत्त्वात्तादर्थ्येन(४) वा प्रवृत्तौ तदभावे कृतार्थत्वानुपपत्तेः, परेषां चोपकार्याणामभावेन तदुपकारायाः अपि प्रवृत्तेरयोगात्। तस्मात्प्रेक्षावत्प्रवृत्तिः प्रयोजनवत्तया व्याप्ता तदभावेऽनुपपन्ना ब्रह्मोपादानतां जगतः प्रतिक्षिपतीति प्राप्तम् ॥ ३२ ॥

एवं प्राप्तेऽभिधीयते--

सू० लोकवत्तु लीलाकैवल्यम् ॥ ३३ ॥

भवेदेतदेवं यदि प्रेक्षावत्प्रवृत्तिः प्रयोजनवत्तया व्याप्ता भवेत्ततस्तन्निवृत्तौ निवर्तेत शिंशपात्वमिव वृक्षतानिवृत्तौ, न त्वेतदस्ति प्रेक्षावतामननुसंहितप्रयोजनानामपि यादृच्छिकीषु क्रियासु प्रवृत्तिदर्शनात्, अन्यथा 'न कुर्वीत वृथा चेष्टामि'ति धर्मसूत्रकृतां प्रतिषेधो निर्विषयः प्रसज्येत, न चोन्मत्तान्प्रत्येतत्सूत्रमर्थवत्तेषां तदर्थबोधतदनुष्ठानानुपपत्तेः। अपि चादृष्टहेतुकयौत्पत्तिकी(५) श्वासप्रश्वासलक्षणा प्रेक्षावतां क्रिया प्रयोजनानुसन्धानमन्तरेण दृष्टा। (६)न चास्यां चेतनस्यापि चैतन्यमनुपयोगि सम्प्रसादेऽपि भावादिति युक्तं,प्राज्ञस्यापि

---

(१) सूत्रार्थं 'तदुक्तम्' इत्यंशं 'देवादिवदपी'ति सूत्रोक्तिपरत्वेन व्याचष्टे कुलालादिभ्य इति।

(२) 'आत्मनि चैवम्'इति सूत्रोक्तिपरत्वेनापि व्याचष्टे यथा चेति।

(३) यद्येवं सर्वशक्ति ब्रह्म तथापि प्रयोजनाभिसन्ध्यभावादकर्तृत्वमिति पूर्वपक्षमाहे न तावदिति।

(४) सुखार्थत्वेन, प्रवृत्तौ प्रवृत्तेः प्राक् सुखाभावे सति कृतार्थत्वानुपपत्तेरित्यर्थः।

(५) न दृष्टः प्रयोजनेहेशलक्षणो हेतुरस्या इत्यदृष्टहेतुकी, औत्पत्तिकी पुरुषस्योत्पत्तिमारभ्य प्रवृत्ता। प्रयोजनमन्तरेणेत्येतदस्यैव विवरणम्।

(६) स्वापादौ प्रयोजनानभिसन्धिरूपे श्वासे साध्याभाववद्धेतेरपि चेतनकर्तृकत्वस्याभावात्र व्यभिचार इत्याशंक्याह न चास्यामिति। जाग्रदादौ चेतनस्य जानतोऽपि चैतन्यमस्यां श्वासादिप्रवृत्तावनुपयोगि सुषुप्तेऽपि तस्याभावादिति च न युक्तम्, कुतः? प्राज्ञस्य सुषुप्तस्यापि स्वरूपचैतन्याप्रच्युतेरित्यर्थः।

चैतन्याप्रच्युतेरन्यथा मृतशरीरेऽपि श्वासप्रश्वासप्रवृत्तिप्रसङ्गात् । यथा च स्वार्थपरार्थसम्पादितसमस्तकामानां कृतकृत्यतयाऽनाकुलमनसामकामानामेव लीलामात्रात्सत्यप्यनुत्पादिनि प्रयोजने नैव तदुद्देशेन प्रवृत्तिरेवं ब्रह्मणोऽपि जगत्सर्जने प्रवृत्तिर्नानुपपन्ना । (१)दृष्टं च यदल्पबलवीर्यबुद्धीनामशक्यमतिदुष्करं वा तदन्येषामनल्पबलवीर्यबुद्धीनां सुशकमीषत्करं वा, नहि वानरैर्मारुतिप्रभृतिभिर्नगैर्न बद्धो नीरनिधिरगाधो महासत्वानाम् , न चैष पार्थेन शिलीमुखैर्न बद्धो, न चायं न पीतः संक्षिप्य चुलुकेन हेलयैव कलशयोनिना महामुनिना, न चाद्यापि न दृश्यन्ते लीलामात्रविनिर्मितानि महाप्रासादप्रमदवनानि श्रीमन्नृगनरेन्द्राणामन्येषां मनसापि दुष्कराणि नरेश्वराणाम् । तस्मादुपपन्नं यदृच्छया वा स्वभावाद्वा(२) लीलया वा जगत्सर्जनं भगवतो महेश्वरस्येति । (३)अपि च नेयं पारमार्थिकी सृष्टिर्येनानुयुज्येत प्रयोजनमपि त्वनाद्यविद्यानिबन्धना, अविद्या च स्वभावत एव कार्योन्मुखी न प्रयोजनमपेक्षते, नहि द्विचन्द्रालातचक्रगन्धर्वनगरादिविभ्रमाः समुदिष्टप्रयोजना भवन्ति । (४)न च तत्कार्या विस्मयभयकम्पादयः स्वोत्पत्तौ प्रयोजनमपेक्षन्ते । (५)सा च चैतन्यच्छुरिता जगदुत्पादहेतुरिति चेतनो जगद्योनिराख्यायत इत्याह--"न चेयं परमार्थविषये"ति । (पृ० ४९६ पं० ११) । अपि च न ब्रह्म जगत्कारणमपि तत्तया विवक्षन्त्यागमा अपि तु जगति ब्रह्मात्मभावं, तथा च सृष्टेरविवक्षायां तदाश्रयो दोषो निर्विषय एवेत्याशयेनाह--"ब्रह्मात्मभावे"ति ॥ ३३ ॥

सू० वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॥ ३४ ॥

(६)अतिरोहितोऽत्र पूर्वः पक्ष, उत्तरस्तूच्यते--उच्चावचमध्यमसुखदुःखभेदवत्प्राणभृत्प्रपञ्चं च सुखदुःखकारणं सुधाविषादि चानेकविधं विरचयतः प्राणभृद्धर्मोपात्तवापपुण्यकर्मातिशयसहायस्यात्रभवतः परमेश्वरस्य न वैषम्यनैर्घृण्ये प्रसज्येते । (७)नहि सभ्यः सभायां नियुक्तो युक्तवादिनं युक्तवादिनमयुक्तवादिनमयुक्तवादिनं ब्रुवाणः सभापतिर्वा युक्तवादिनमनुगृह्णन्नयुक्तवादिनं च निर्गृह्णन्ननुरक्तो द्विष्टो वा भवत्यपि तु मध्यस्थ

---

(१) ननु यद्वह्वायाससाध्यं तत्प्रयोजनाभिसन्धिपूर्वकमिति व्याप्तिरभिमता, तथाच न लीलादौ व्यभिचारस्तत्राह दृष्टं चेति । यदप्यस्मदाद्यपेक्षया जगद्वह्वायाससाध्यं भाति, तथापि नं ब्रह्मापेक्षयेति न प्रयोजनाभिसन्ध्यापात इत्यर्थः ।

(२) नियतानिमित्तमनपेक्ष्य यदा कदाचित्प्रवृत्त्युदयो यदृच्छा । स्वभावतस्तु स एव यावद्वस्तुभावी यथा श्वासादाविति विशेषः ।

(३) यदुक्तं न तावदुन्मत्तस्येव मतिभ्रमाज्जगत्सृष्टिर्येति, तत्र माभूदुन्मत्तं ब्रह्म भवति तु जीवाविद्याविषयीकृतं जगद्विवर्तोधिष्ठानन्तथाच न सृष्टौ प्रयोजनपर्यनुयोगो युक्त इत्याह अपि चेति ।

(४) विभ्रमाणां प्रयोजनानपेक्षायामपि तत्कार्यस्य तदपेक्षा स्यादित्याकाशादेर्भ्रमकार्यस्य तदपेक्षामाशंक्याह न चेति ।

(५) नन्वविद्याया हेतुत्वे कथं ब्रह्म कारणमत आह सा चेति । छुरिता—मिश्रिता ।

(६) यो विषमसृष्टिकर्ता स सापेक्षो, ब्रह्म च विषमं सृजतीत्यनुमानेन समन्वयस्य विरोधसन्देहे पूर्वं लीलया सृष्टुत्वं यदुक्तं तदेव कर्मादिसापेक्षस्य न युक्तमनीश्वरत्वप्रसक्तेर्निरपेक्षत्वे रागादिमत्त्वापत्तेरिति जैनानां पूर्वपक्षः स्पष्ट इति भावः ।

(७) उक्ताईतानुमाने व्यभिचारमाह नहीति ।

इति वीतरागद्वेष इति चाख्यायते, तद्वदीश्वरः पुण्यकर्माणमनुगृह्णन्पुण्यकर्माणं च निगृह्णन्मध्यस्थ एव नामध्यस्थः । एवं ह्यसावमध्यस्थः स्याद्यत्कल्याणकारिणमनुगृह्णीयात्कल्याणकारिणं च निगृह्णीयान्न त्वेतदस्ति । तस्मान्न वैषम्यदोषोऽत एव न नैर्घृण्यमपि संहरतः समस्तान्प्राणभृतः । स हि प्राणभृत्कर्माशयानां वृत्तिनिरोधसमयस्तमतिलङ्घयन्नयमयुक्तकारी स्यात् । न च कर्मापेक्षायामीश्वरस्यैश्वर्यव्याघातः । (१)न हि सेवादिकर्मभेदापेक्षः फलभेदप्रदः प्रभुरप्रभुर्भवति । (२)न च'एष ह्येव साधु कर्म कारयति यमेभ्यो लोकेभ्य उन्निनीषते, एष एवासाधु कर्म कारयति तं यमधो निनीषत' इति श्रुतेरीश्वर एष द्वेषपक्षपाताभ्यां साध्वसाधुनी कर्मणी कारयित्वा स्वर्गं नरकं वा लोकं नयति , तस्माद्वैषम्यदोषप्रसङ्गान्नेश्वरः कारणमिति वाच्यम् । विरोधात् , यस्मात् 'कर्म कारयित्वेश्वरः प्राणिनः सुखदुखिनः सृजती'ति श्रुतेरवगम्यते, तस्मान्न सृजतीति विरुद्धमभिधीयते । (३)न च वैषम्यमात्रमत्र ब्रूमो न त्वीश्वरकारणत्वं व्यासेधाम इति वक्तव्यम्, किमतो ? यद्येवं तस्मादीश्वरस्य सवासनक्लेशापरामर्शमभिवदन्तीनां भूयसीनां श्रुतीनामनुग्रहायोन्निनीषतेऽधो निनीषत इत्येतदपि तज्जातीयपूर्वकर्माभ्यासवशात्प्राणिन इत्येवं नेतव्यम् , यथाहुः—

जन्म जन्म यदभ्यस्तं दानमध्ययनं तपः ।
तेनैवाभ्यासयोगेन तच्चैवाभ्यसते नरः ॥ इति ।

(४)अभ्युपेत्य च सृष्टेस्तात्त्विकत्वमिदमुक्तमनिर्वाच्या तु सृष्टिरिति न प्रस्मर्तव्यमत्रापि, तथा च मायाकारस्येवाज्ञसाकल्यवैकल्यभेदेन विचित्रान्प्राणिनो दर्शयतो न वैषम्यदोषः सहसा संहरतो वा न नैर्घृण्यमेवमस्यापि भगवतो विविधविचित्रप्रपञ्चमनिर्वाच्यं विश्वं दर्शयतः संहरतश्च स्वभावाद्वा लीलया वा न कश्चिद्दोषः ॥ ३४ ॥

इति स्थिते शङ्कापरिहारपरं सूत्रम्—

मू० न कर्माविभागादिति चेन्नानादित्वात् ॥ ३५ ॥

शङ्कोत्तरे अतिरोहितार्थेन भाष्यग्रन्थेन व्याख्याते ॥ ३५ ॥

अनादित्वादिति सिद्धवदुक्तं तत्साधनार्थं सूत्रम्—

मू० उपपद्यते चाप्युपलभ्यते च ॥ ३६ ॥

---

(१) सापेक्षत्वेऽनीश्वरत्वमाशंक्य व्यभिचारमाह न हि सेवेति ।

(२) कर्मापेक्षत्वेन वैषम्ये परिहृतेपि विषमकर्मप्रेरकत्वेन वैषम्यं स्यादित्याशंक्योत्तरयति न चैष इति ।

(३) किमत्र ईश्वरस्य विषमसर्जनेऽनीश्वरत्वापत्त्या नायं विषमसृष्टिकर्तेत्यनुमीयते वादिनोत ईश्वरो रागादिमान् विषमसर्जनात्वादिति वैषम्यमुद्भाव्यते ? तत्र नाद्यः, विरोधादित्युक्तम् ,सूत्रानभिधेय एव 'यस्मात्कर्मे'त्यादिश्रुत्या प्रदर्शितः । द्वितीयं निषेधति न चेति । यद्येवं वैषम्यमनुमित किमतो निरवयवत्वस्यापि श्रुतिसिद्धत्वेनातीतकालतादात्म्यवस्त्वादित्यर्थः । तदेवाह तस्मादित्यादिना । ईश्वरः पर्जन्यवत्सृष्टिमात्रे कारणम् वैषम्ये तु बीजवत्तत्तत्प्राणिकर्मैवासने इति नेश्वरस्य दोषतेति भावः ।

(४) अपिच वेदान्तिमते सृष्टेर्मायामयत्वात्तादृशसृष्टिकर्तृत्वेन रागादिमत्त्वानुमाने व्यभिचारोपीत्याह अभ्युपेत्य चेति ।

(१)अकृते कर्मणि पुण्ये पापे वा तत्फलं भोक्तारमध्यागच्छेत्, तथा च विधिनिषेधशास्त्रमनर्थकं भवेत् प्रवृत्तिनिवृत्त्यभावादिति मोक्षशास्त्रस्य चोक्तमानर्थक्यम्। **न चाविद्या केवलेति** (पृ० ४९९ पं० ६) (२)लयाभिप्रायम्। (३)विक्षेपलक्षणाविद्यासंस्कारस्तु कार्यत्वात्स्वोत्पत्तौ पूर्वं विक्षेपमपेक्षते, विक्षेपश्च मिथ्याप्रत्ययो मोहापरनामा पुण्यापुण्यप्रवृत्तिहेतुभूतरागद्वेषनिदानं, स च रागादिभिः सहितः स्वकार्येण शरीरं सुखदुःखभोगायतनमन्तरेण सम्भवति। न च कर्मान्तरेण शरीरम्, न च रागद्वेषावन्तरेण कर्म, न च भोगसहितं मोहमन्तरेण रागद्वेषौ, न च पूर्वशरीरमन्तरेण मोहादिरिति पूर्वपूर्वशरीरापेक्षो मोहादिरेवं पूर्वपूर्वमोहाद्यपेक्षं पूर्वपूर्वशरीरमित्यनादित्वेवात्र भगवती चित्तमनाकुलयति। तदेतदाह—**"रागादिक्लेशवासनाक्षिप्तकर्मापेक्षा त्वविद्या वैषम्यकरी स्यादि"ति**। रागद्वेषमोहा रागादयस्त एव हि पुरुषं संसारदुःखमनुभाव्य क्लेशयन्तीति क्लेशास्तेषां वासनाः कर्मप्रवृत्त्यनुगुणास्ताभिराक्षिप्तानि प्रवर्तितानि कर्माणि तदपेक्षा लयलक्षणाऽविद्या। स्यादेतत्, भविष्यताऽपि व्यपदेशो (४)दृष्टो यथा 'पुरोडाशकपालेन तुषानुपवपती'त्यत आह—**"न च धारयिष्यतीत्यत"** इति। तदेवमनादित्वे सिद्धे 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमि'ति प्राक् सृष्टेरविभागावधारणं समुदाचरद्रूपरागादिनिषेधपरं न पुनरेतान्प्रसुप्तानप्यपाकरोतीति सर्वमवदातम्॥ ३६॥

सू० सर्वधर्मोपपत्तेश्च॥ ३७॥

(५)अत्र सर्वज्ञमिति दृश्यते। सर्वस्य चेतनाधिष्ठितस्यैव लोके प्रवृत्तिरिति लोकानुसारो दर्शितः। **"सर्वशक्ती"ति** (पृ० ५०० पं० ११)। सर्वस्य जगत उपादानकारणं निमित्तकारणं चेत्युपपादितम्। **"महामायमि"ति** सर्वानुपपत्तिशङ्का परास्ता। तस्माज्जगत्कारणं ब्रह्मेति सिद्धम्॥ ३७॥

इति श्रीवाचस्पतिमिश्रविरचिते भगवत्पादशारीरकभाष्यविभागे
भामत्यां द्वितीयस्याध्यायस्य प्रथमः पादः॥

---

(१) अकृताभ्यागमप्रसङ्गं व्याकरोति अकृते इति। तदङ्गीकारे प्राप्तौ दोषावाह तथाचेति।

(२) भ्रान्तिरूपाविद्याया विचित्रतया वैषम्यहेतुत्वसम्भवात्कथं भाष्ये तस्या वैषम्यकरत्वनिषेध इत्याशङ्क्याह लयेति।

(३) ननु तथापि भ्रमसंस्कारस्य वैषम्यहेतुत्वं स्यात्तत्राह विक्षेपेति। तथा च भ्रमसंस्कारस्य भ्रमसापेक्षत्वात्तस्य च रागाद्युत्पादनद्वारा तत्साहित्येनैव वैषम्यहेतुत्वं स च शरीरात्, तत्कर्मणः, कर्मणश्च रागद्वेषाभ्यां तौ च मोहाच्चेत्यादुमात्स्य च शरीरादीति चक्रकभ्रमणमनादितां समादधातीति भावः।

(४) अवघातनिष्पन्नास्तुषान् पुरोडाशकपालेनोपवपति विगमयतीत्यत्रावघातसमये कपालेषु पुरोडाशभ्रपणाभावाद्भाविन्यच्छ्रपणमपेक्ष्य कपालानां पुरोडाशसम्बन्धकीर्तनामिति।

(५) भाष्यकृता सौम्येदं सर्वधर्मोपपत्तिं व्याचक्षाणेन सर्वज्ञत्वादयः कारणधर्माः ब्रह्मण्युपपद्यन्त इत्युक्तम्, तदयुक्तमिव प्रतिभाति लोके कस्यचिदपि कारणस्योक्तधर्मदर्शनाभावादत आह अत्रेति। जडप्रेरककुलालादौ दृष्टम् ब्रह्मण्यपि नियन्तरि तेनावश्यं भाव्यन्तस्य सर्वप्रेरकत्वस्य श्रुतिसिद्धतयार्थात्सर्वज्ञत्वसिद्धिरे सर्वशक्तित्वादावपि योज्यम्।

सू० रचनानुपपत्तेश्च नानुमानम् ॥ १ ॥

स्यादेतत्, इह हि पादे स्वतन्त्रा-वेदानपेक्षाः प्रधानादिसिद्धिविषयाः सांख्यादियुक्तयो निराकरिष्यन्ते, तदयुक्तमशास्त्राङ्गत्वात्, नहीदं शास्त्रमुच्छृङ्खलतर्कशास्त्रवत् प्रवृत्तमपि तु वेदान्तवाक्यानि ब्रह्मपराणीति पूर्वपक्षोत्तरपक्षाभ्यां विनिश्चेतुम्, तत्र कः प्रसङ्गः शुष्कतर्कवत्स्वतन्त्रयुक्तिनिराकरणस्येत्यत आह-"**यद्यपीदं वेदान्तवाक्यानामि**"ति (पृ० ५०१ पं० ७)। नहि वेदान्तवाक्यानि निर्णेतव्यानीति निर्णीयन्ते, किन्तु मोक्षमाणानां तत्त्वज्ञानोत्पादनाय। (१)यथा च वेदान्तवाक्येभ्यो जगदुपादानं ब्रह्मावगम्यते, एवं सांख्याद्यनुमानेभ्यः प्रधानाद्यचेतनं जगदुपादानमवगम्यते। (२)न चैतदेव चेतनोपादानमचेतनोपादानं चेति समुच्चेतुं शक्यम्, विरोधात्। न च व्यवस्थिते वस्तुनि विकल्पो युज्यते। न चागमबाधितविषयतयानुमानमेव नोदीयत इति साम्प्रतम्। सर्वज्ञप्रणीततया सांख्याद्यागमस्य वेदागमतुल्यत्वात् तद्बाधितस्यानुमानस्य प्रतिकृतिसिंहतुल्यतयाऽबाध्यत्वात्। तस्मात्तद्विरोधान्न ब्रह्मणि समन्वयो वेदान्तानां सिद्ध्यतीति न ततस्तत्त्वज्ञानं सेद्धुमर्हति, न च तत्त्वज्ञानादृते मोक्ष इति स्वतन्त्राणामप्यनुमानानामाभासीकरणमिह शास्त्रे संगतमेवेति। यद्येवं ततः परकीयानुमाननिरास एव कस्मात्प्रथमं न कृत इत्यत आह—"**वेदान्तार्थनिर्णयस्य चे**"ति। ननु वीतरागकथायां तत्त्वनिर्णयमात्रमुपयुज्यते न पुनः परपक्षाधिक्षेपः स हि सरागतामावहतीति चोदयति--"**ननु मुमुक्षूणा**"मिति। परिहरति--"**बाढमेवं तथापी**"ति। तत्त्वनिर्णयावसाना वीतरागकथा, न च परपक्षदूषणमन्तरेण तत्त्वनिर्णयः शक्यः कर्तुमिति तत्त्वनिर्णयाय वीतरागेणापि परपक्षो दूष्यते न तु परपक्षतयेति न वीतरागकथात्वव्याहतिरित्यर्थः। पुनरुक्तता परिचोद्य समाधत्ते—"**नन्वीक्षते**"रिति (पृ० ५०२ पं० ४)। "**तत्र सांख्या**" इति। (३)यानि हि येन रूपेणास्थौल्यादि च सौक्ष्म्यात्समन्वीयन्ते तानि तत्कारणानि, यथा घटादयो रुचकादयश्चास्थौल्यादि च सौक्ष्म्यात्मृत्सुवर्णान्वितास्तत्कारणास्तथा चेदं बाह्यमाध्यात्मिकं च भावजातं सुखदुःखमोहात्मनान्वितमुपलभ्यते, तस्मात्तदपि सुखदुःखमोहात्मसामान्यकारणकं भवितुमर्हति। (४)तत्र जगत्कारणस्य येयं सुखात्मता तत्सत्त्वं, या च दुःखात्मता तद्रजो, या च मोहात्मता तत्तम इति त्रैगुण्यकारणसिद्धिस्तथा हि प्रत्येकं भावास्त्रैगुण्यवन्तोऽनुभूयन्ते। यथा मैत्रदारेषु पद्मावत्यां मैत्रस्य सुखं, तत्कस्य हेतोः? तं प्रति सत्त्वगुणसमुद्भवात्, तत्सपत्नीनां च दुःखं, तत्कस्य हेतो? ताः प्रत्यस्या रजोगुणसमुद्भवात्, चैत्रस्य तु क्षणस्य तामविन्दतो मोहो विषादः, तत्कस्य हेतोः? तं प्रत्यस्यास्तमोगुणसमुद्भवात्, पद्मावत्या च सर्वे भावा व्याख्याताः। तस्मात्सर्व-

(१) वेदान्तैरेव ज्ञानजननार्थं परपक्षाक्षेपेण तत्राह यथाचेति।

(२) ननु प्रमाणावगतान्युपादानानि जगति समुच्चीयन्ताम् तन्तव इव पटेऽत आह न चैतदेवेति।

(३) चेतनप्रकृतिकं जगदिति प्रतिपादकस्य वेदस्य प्रतिरोधकमनुमानमाह यानि हीति। संयोगादेर्व्यभिचारित्वात्सार्थमास्थौल्यादित्युक्तम्, संयोगादयो हि न स्थूलपिण्डादारभ्य कणपर्यन्तमनुयान्ति। कुम्भोपादानत्वं सत्त्वादिगुणाश्रितं मृद्द्रव्यत्वात्सत्तावदिति च वक्तीत्यानुमानमत्र बोध्यम्।

(४) ननु सुखाद्यारब्धत्वेऽपि जगतः कथं सत्त्वाद्यात्मकप्रधानारब्धत्वमत आह तत्रेति। येयं जगद्धेतोः कार्यावशोत्रिता सुखाद्यात्मता सा सत्त्वमित्यर्थः। विधेयापेक्षया नपुंसकत्वम्।

सुखदुःखमोहान्वितं जगत्तत्कारणं गम्यते । (१)तच्च त्रिगुणं प्रधानं प्रधीयते क्रियतेऽनेन जगदिति प्रधीयते निधीयतेऽस्मिन्प्रलयसमये जगदिति वा प्रधानं, तच्च मृत्सुवर्णवदचेतन चेतनस्य पुरुषस्य भोगापवर्गलक्षणमर्थं साधयितुं स्वभावत एव प्रवर्तते, (२)न तु केनचित्प्रवर्त्यते । तथा ह्याहुः—'पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणमि'ति । परिमाणादिभिरित्यादिग्रहणेन 'शक्तितः प्रवृत्तेः कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य' (सां० का० १५) इत्यव्यक्तसिद्धिहेतवो गृह्यन्ते । एतांश्चोपरिष्टाद्व्याख्याय निराकरिष्यत इति । तदेतत्प्रधानानुमानं दूषयति—"तत्र वदाम" इति (पृ० ५०३ पं० ४) । यदि तावदचेतनं प्रधानमनधिष्ठितं प्रवर्तते स्वभावत एवेति साध्यते, तदयुक्तम् समन्वयादेर्हेतोश्चेतनानधिष्ठितत्वविरुद्धचेतनाधिष्ठितत्वेन मृत्सुवर्णादौ दृष्टान्तधर्मिणि व्याप्तेरुपलम्भेर्विरुद्धत्वाज्जहि मृत्सुवर्णदार्वादयः कुलालहेमकाररथकारादिभिरनधिष्ठिताः कुम्भरुचकरथाद्युपाददते, तस्मात्कृतकत्वमिव नित्यत्वसाधनाय प्रयुक्तं साध्यविरुद्धेन व्याप्तं विरुद्धम्(३) । एवं समन्वयादि चेतनानधिष्ठितत्वे साध्य इति रचनानुपपत्तेरिति दर्शितम् । (४)यद्युच्येत—दृष्टान्तधर्मिण्यचेतनं तावदुपादानं दृष्टं तत्र यद्यपि तच्चेतनप्रयुक्तमपि दृश्यते तथापि तत्प्रयुक्तत्वं हेतोरप्रयोजकं बहिरङ्गत्वादन्तरङ्गं त्वचैतन्यमात्रमुपादानानुगतं हेतोः प्रयोजकम् । यथाहुः—

'व्याप्तेश्च दृश्यमानायाः कश्चिद्धर्मः प्रयोजकः'-इति । तत्राह-"न च मृदादी"ति (पृ० ५०४ पं० ७) । (५)स्वभावप्रतिबद्धं हि व्याप्यं व्यापकमवगमयति । स च स्वभावप्रतिबन्धः शङ्कितसमारोपितोपाधिनिरासे सति निश्चीयते । तन्निश्चयश्चान्वयव्यतिरेकयोरायत्तः । तौ चान्वयव्यतिरेकौ न तथोपादानाचैतन्ये यथा चेतनप्रयुक्तत्वेऽपि परिस्फुटौ तदलमत्रान्तरङ्गत्वेनेति भावः । एवमपि चेतनप्रयुक्तत्वं नाभ्युपेयेत यदि प्रमाणान्तरविरोधो भवेत् प्रत्युत श्रुतिरनुगुणतरात्रेत्याह-"न चैवं सती"ति । चकारेण सुखदुःखादिसमन्वयलक्षणस्य हेतोरसिद्धत्वं समुच्चिनोतीत्याह—"अन्वयाद्यनुपपत्तेश्चे"ति । आन्तराः खल्वमी सुखदुःखमोहविषादा बाह्येभ्यश्चन्दनादिभ्योऽतिविच्छिन्नप्रत्ययप्रवेदनीयेभ्यो व्यतिरिक्ता अध्यक्ष-

(१) ननु चेतनोपकारकत्वेन तस्मिन्नि गुणीभूतगुणत्रयात्मकस्य कथ प्रधानत्वमत आह तच्चेति ।

(२) चेतनं प्रति गुणीभूतस्यापि गुणत्रयस्य सिद्धान्तासिद्धमायाया वैलक्षण्यमाह न तु इति । करणानामिन्द्रियाणां प्रकृतौ यथा भोगापवर्गरूपः पुरुषार्थः प्रवर्तक न तु तच्चेतनेन प्रेर्यते तथा गुणत्रयात्मकं प्रधानमपीत्यर्थः ।

(३) गुणत्रयं चेतनानधिष्ठितमेव जगत उपादानं समन्वयादिति सारूप्यानुमानीयहेतोर्नित्यत्वाभावव्याप्यकृतकत्वस्येव मृत्सुवर्णादौ कुलालादिचेतनाधिष्ठितत्वव्याप्यचेतनसमन्वयोपलम्भेर्विरुद्धो हेतुरिति भावः ।

(४) मृदन्वितकुम्भवज्जगच्चेतनाधिष्ठितप्रकृतिकं सत्त्वायन्वितत्वादिति वेदान्त्यनुमाने उपाधिमाशङ्कते यद्युच्येत इति । यत्रैकस्मिन्साध्ये साधनद्वयसन्निपाते एकतरसाधनप्रयुक्ता व्याप्तिरितरत्रारोप्यते इति सोपाधिकत्वं, यथा निषिद्धत्वप्रयुक्ताव्याप्तिरधर्मत्वस्य हिंसात्वे समारोप्यते, एवमेकस्मिन्साधने समन्वयादौ प्रकृतिगताचेतनत्वचेतनाधिष्ठितत्वरूपसाध्यद्वयवत्यन्तरङ्गा चेतनत्वप्रयुक्ता हेतुसाध्ययोर्व्याप्तिर्बहिरङ्गचेतनाधिष्ठितत्वे समारोप्यत इति भवति सोपाधिकत्वमित्यर्थः ।

(५) नान्तरङ्गत्वबहिरङ्गत्वकृते व्यापकत्वे किन्त्वव्यभिचारकृतेऽन्तरङ्गस्यापि महानसादिस्वरूपस्य व्यभिचारादधूमवत्त्वं प्रत्यव्यापकत्वाद्बहिरङ्गस्यापि वह्नेर्यो गस्याव्यभिचारेण व्यापकत्वादित्याशयेन परिहरति स्वभावेति । स्वभावप्रतिबद्धमनौपाधिकत्वेन सम्बद्धम ।

मीक्ष्यन्ते । यदि पुनरेत एव सुखदुःखादिस्वभावा भवेयुस्ततः स्वरूपत्वाद्धेमन्तेऽपि चन्दनः सुखः स्यात् । न हि चन्दनः कदाचिदचन्दनस्तथा निदाघेष्वपि कुङ्कुमपङ्कः सुखो भवेत्, नह्यसौ कदा चिदकुङ्कुमपङ्क इति । एवं कण्टकः (१)क्रमेलकस्य सुख इति मनुष्यादीनामपि प्राणभृतां सुखः स्यात् । नह्यसौ कांश्चित्प्रत्येव कण्टक इति । तस्मादसुखादिस्वभावा अपि चन्दनकुङ्कुमादयो जातिकालावस्थाद्यपेक्षया सुखदुःखादिहेतवो न तु स्वयं सुखादिस्वभावा इति रमणीयम् । तस्मात्सुखादिरूपसमन्वयो भावानामसिद्ध इति नानेन तद्रूपं कारणमव्यक्तमुन्नीयत इति । तदिदमुक्तं (२)**शब्दाद्यविशेषेऽपि च भावनाविशेषादि**"ति (पृ० ५०५ पं० २) भावना वासनासंस्कारस्तद्विशेषात्करभजन्मसंवर्तकं हि कर्म करभोचितामेव भावनामभिव्यनक्ति, यथास्मै कण्टका एव रोचन्ते । एवमन्यत्रापि द्रष्टव्यम् । परिमाणादिति सांख्यीयं हेतुमुपन्यस्यति—"**तथा परिमितानां भेदानामि**"ति । संसर्गपूर्वकत्वे हि संसर्गस्यैकस्मिन्नयुतेऽसम्भवाज्ज्ञानात्वैकार्थसमवेतस्य नानाकारणानि संसृष्टानि कल्पनीयानि, तानि च सत्त्वरजस्तमांस्येवेति भावः । तदेतत्परिमितत्वं सांख्यीयराद्धान्तालोचनेनानैकान्तिकमिति दूषयति—"**सत्त्वरजस्तमसा**"मिति । यदि तावत्परिमितत्वमियत्ता, सा नभसोऽपि नास्तीत्यव्यापको हेतुः परिमाणादिति । (३)अथ न योजनादिमितत्वं परिमाणमियत्ता नभसो ब्रूमः, किन्त्वव्यापितामव्यापि, च नभस्तन्मात्रादेर्नहि कार्यं कारणव्यापि, किन्तु कारणं कार्यव्यापीति परिमितं नभस्तन्मात्राद्यव्यापित्वात् । (४)हन्त सत्त्वरजस्तमांस्यपि न परस्परं व्याप्नुवन्ति, न च तत्त्वान्तरपूर्वकत्वमेतेषामिति व्यभिचारः । न हि यथा तैः कार्यजातमाविष्टमेवं तानि परस्परं विशन्ति, मिथः कार्यकारणभावाभावात् । (५)परस्परसंसर्गस्त्वावेशाचितिशक्तौ नास्ति, न हि चितिशक्तिः कूटस्थनित्या तैः संसृज्यते, ततश्च तदव्यापका गुणा इति परिमिताः । एव चितिशक्तिरपि गुणैरसंसृष्टेति सापि परिमितेत्यनैकान्तिकत्वं परिमितत्वस्य हेतोरिति । तथा कार्यकारणविभागोऽपि समन्वयवद्विरुद्ध इत्याह—"**कार्यकारणभावास्त्व**"ति ॥ १ ॥

सू० प्रवृत्तेश्च ॥ २ ॥

न केवलं रचनाभेदा न चेतनाधिष्ठानमन्तरेण भवन्त्यपि तु साम्यावस्थायाः प्रच्युतिर्वैषम्यं, तथा च यदुद्भूतं बलीयस्तदङ्गमभिभूतं च तदनुगुणतया स्थितमङ्गमेवं हि गुणप्रधानभावे सत्यस्य महदादौ कार्ये या प्रवृत्तिः सापि चेतनाधिष्ठानमेव गमयति, नहि चेतनाधिष्ठानमन्तरेण मृत्पिण्डे प्रधानेऽङ्गभावेन चक्रदण्डसलिलसूत्रादयोऽवतिष्ठन्ते, तस्मात्प्रवृत्तेरपि चेतनाधि-

---

(१) उष्ट्रस्य ।

(२) किञ्च यदि घटे मृद्वत् सुखादिकं शब्दादावन्वितं स्यात्तर्हि सर्वैरविशेषेण सुखादिकमुपलभ्येत घटे मृद्वन्न तथोपलब्धिरस्तीति योग्यानुपलब्ध्या हेत्वभावनिश्चय इत्याह शब्दादीति । विषयस्यैकत्वेऽपि पुरुषवासनावैचित्र्यात् कस्यचित्सुखबुद्धिः कस्यचिन्मोहबुद्धिर्दृश्यतेऽतो विषयाः सुखाद्यात्मका न भवन्तीत्यर्थः ।

(३) सांख्यः शङ्कते अथेति । (४) परिहरति हन्तेति ।

(५) एवं योजनादिमितत्वरूपे अव्यापितारूपे च परिमितत्वे दोषं प्रदर्श्य स्वासंसृष्टवस्तुमत्त्वरूपे तत्र दोषमाह परस्परेति । सत्त्वादीनां चितिशक्त्या आत्मनो परस्परं च संसर्गो नास्तीत्यर्थः ।

ष्ठनसिद्धिरिति शङ्कितः प्रवृत्तेश्चेत्ययमपि हेतुः सांख्यीयो विरुद्ध एवेत्युक्तं वक्ष्यत्या(१)। अत्र सांख्यश्चोदयति—"ननु चेतनस्यापि प्रवृत्तिरि"ति (पृ० ५०६ पं० ६)। अयमभिप्रायः—त्वया किलौपनिषदेनास्मद्धेतून् दूषयित्वा केवलस्य चेतनस्यैवान्यनिरपेक्षस्य जगदुपादानत्वं निमित्तत्वं च समर्थनीयम्। तदयुक्तम्—केवलस्य चेतनस्य प्रवृत्तेर्दृष्टान्तधर्मिण्यनुपलब्धेरिति। औपनिषदस्तु चेतनहेतुकां तावदेष सांख्यः प्रवृत्तिमभ्युपगच्छतु पश्चात्स्वपक्षमत एव समाधास्यामीत्यभिसन्धिमानाह—"सत्यमेतत्"। न केवलस्य चेतनस्य प्रवृत्तिर्दृष्टेति। सांख्य आह(२)—"न त्वचेतनसंयुक्तस्ये"ति। तुशब्द औपनिषदपक्षं व्यावर्तयति। अचेतनाश्रयैव सर्वा प्रवृत्तिर्दृश्यते न तु चेतनाश्रय काचिदपि। तस्मान्न चेतनस्य जगत्सर्जने प्रवृत्तिरित्यर्थः। अत्रौपनिषदो गूढाभिसन्धिः प्रश्नपूर्वकं विमृशति—"किं पुनरत्रे"ति। अत्रान्तरे सांख्यो ब्रूते—"ननु यस्मिन्नि"ति। न तावच्चेतनः प्रवृत्त्याश्रयतया तत्प्रयोजकतया वा प्रत्यक्षमीक्ष्यते, केवलं प्रवृत्तिस्तदाश्रयश्चाचेतनो देहरथादिः प्रत्यक्षेण प्रतीयते, तत्राचेतनस्य प्रवृत्तिस्तन्निमित्तैव न तु चेतननिमित्ता। सद्भावमात्रं तु तत्र चेतनस्य गम्यते रथादिवैलक्षण्याज्जीवद्देहस्य। न च सद्भावमात्रेण कारणत्वसिद्धिः। मा भूदाकाश उत्पत्तिमतां घटादीनां निमित्तकारणमस्ति हि सर्वत्रेति, तदनेन देहातिरिक्ते सत्यपि चेतने तस्य न प्रवृत्तिं प्रति निमित्तभावोस्तीत्युक्तम्। (३)यतश्चास्य न प्रवृत्तिहेतुभावोऽस्ति, अत एव प्रत्यक्षे देहे सति प्रवृत्तिदर्शनादसति चादर्शनाद्देहस्यैव चैतन्यं लौकायतिकाः प्रतिपन्नास्तथा च न चिदात्मनिमित्ता प्रवृत्तिरिति सिद्धम्। तस्मान्न रचनायाः प्रवृत्तेर्वा चिदात्मकारणत्वसिद्धिर्जगत इति औपनिषदः परिहरति—"तदभिधीयते न ब्रूम" इति (पृ० ५०७ पं० ४)। न तावत्प्रत्यक्षानुमानागमसिद्धः शारीरो वा परमात्मा वाऽस्माभिरिदानीं साधनीयः केवलमस्य प्रवृत्तिं प्रति कारणत्वं वक्तव्यम्। तत्र मृतशरीरे वा रथादौ वाऽनधिष्ठिते चेतनेन प्रवृत्तेरदर्शनात् तद्विपर्यये च प्रवृत्तिदर्शनादन्वयव्यतिरेकाभ्यां चेतनहेतुकत्वं प्रवृत्तेर्निश्चीयते, न तु चेतनसद्भावमात्रेण, येनातिप्रसङ्गो(४) भवेत्। (५)भूतचैतनिकानामपि चेतनाधिष्ठानादचेतनानां प्रवृत्तिरित्यत्राविवाद इत्याह—'लोकायतिकानामपी"ति। (६)स्यादेतत् देहः स्वयं चेतनः करचरणादिमान् स्वव्यापारेण प्रव-

(१) चेतनानधिष्ठितप्रधानसाधकत्वेन परोक्तस्य प्रवृत्तेरिति हेतोरेव चेतनाधिष्ठितचेतनसिद्धौ हेतुत्वेनाभिधानात्साध्यविरुद्धोक्तिर्वक्ष्योक्तिः।

(२) इत्थं केवलस्य चेतनस्य प्रवृत्त्यभावमभ्युपगम्याचेतनस्य प्रवृत्तिश्चेतनाधीनेति समर्थिते सांख्य आहेत्यर्थः।

(३) न चेतनस्य प्रवृत्त्याश्रयत्वमित्यत्र लौकायतिकभ्रमोऽपि लिङ्गमित्याह यतश्चेति। प्रवृत्तेर्वा हेतोरिति शेषः।

(४) अतिप्रसङ्ग इति। आकाशस्य प्रवृत्त्यन्वयमात्रम् चैतन्यस्य तु व्यतिरेकोऽप्यस्तीति वैषम्यमत सद्भावमात्रेणाकाशेऽपि प्रवृत्तिहेतुत्वापत्तिरूपोऽतिप्रसङ्गः इत्यर्थः।

(५) लौकायतिकोऽपि चेतनाधीनामचेतनप्रवृत्तिं मन्यते सांख्यस्तु ततोऽप्याविवेकीत्याह भूतेति।

(६) रथादिवन्मूलकारणस्याप्यचेतनस्य चेतनाधीनप्रवृत्तिकत्वमिति वेदान्तिमते दृष्टान्तासिद्धिमाशङ्क्य ते कश्चित्स्यादेतदित्यादिना। रथादिप्रवर्तको देह एव स तु चेतन इत्यविवेकिनां प्रसिद्धिरनूदिता सांख्याश्चेतनः सोऽसङ्कल्पादप्रवर्तक इत्यर्थः।

र्तयतीति युक्तं, न तु तदतिरिक्तः कूटस्थनित्यचेतनो व्यापाररहितो ज्ञानैकस्वभावः प्रवृत्त्य भावात्प्रवर्तको युक्त इति चोदयति—"ननु तर्ह"ति। परिहरति—"नायस्कान्तव द्रूपादिवच्चे"ति। "यथा च वा रूपादय" इति। सांख्यानां हि स्वदेशस्था रूपादय इन्द्रियं विकुर्वते, तेन तदिन्द्रियमर्थं प्राप्तमर्थाकारेण(१) परिणमत इति स्थितिः। सम्प्रति चोदकः स्वाभिप्रायमाविष्करोति—"एकत्वादि"ति। येषामचेतनं चेतनं चास्ति तेषामेतद्युज्यते 'ववतुम्-चेतनाधिष्ठितमचेतनं प्रवर्तत' इति। यथा योगानामीश्वरवादिनाम्। येषां तु चेतनातिरिक्तं नास्त्यद्वैतवादिनां, तेषां प्रवर्त्याभावे कं प्रति प्रवर्तकत्वं चेतनस्येत्यर्थः। परिहरति—"नाविद्ये"ति (पृ० ५०८ पं० १)। कारणभूतया लयलक्षणयाऽविद्यया प्राक्सर्गोपचितेन च विक्षेपसंस्कारेण यत्प्रत्युपस्थापितं नाम रूपं तदेव माया तदावेशेनास्य चोद्यस्यासकृत्प्रत्युक्तत्वात्। एतदुक्तं भवति—नेयं सृष्टिर्वस्तुसती येनाद्वैतिनो वस्तुसतो द्वितीयस्याभावादनुयुज्येत। काल्पनिक्या तु सृष्टावस्ति काल्पनिकं द्वितीयं सहायं मायामयम्। यथाहुः—

सहायास्तादृशा एव यादृशी भवितव्यता।

न चैवं ब्रह्मोपादानत्वव्याघातो ब्रह्मण एव मायावेशेनोपादानत्वात्तदधिष्ठानत्वाज्जगद्भ्रमस्य रजतविभ्रमस्येव शुक्तिकाधिष्ठानस्य शुक्तिकोपादानत्वमिति निरवद्यम्॥ २॥

सू० पयोम्बुवच्चेत्तत्रापि॥ ३॥

यथा पयोम्बुनोरचेतनयोरधिष्ठानाद्धेतोः स्वत एव प्रवृत्तेरेवं प्रधानस्यापीति शङ्कार्थः। तत्रापि चेतनाधिष्ठितत्वं साध्यं, न च साध्येनैव व्यभिचारस्तथासत्यनुमानमात्रोच्छेदप्रसङ्गात्सर्वत्रास्य सुलभत्वात्। न चासाध्यम् अत्रापि चेतनाधिष्ठानस्यागमसिद्धत्वात्। न च सपक्षेण व्यभिचार इति शङ्कानिराकरणस्यार्थः। (२)साध्यपक्षेत्युपलक्षणम् सपक्षनिक्षिप्तत्वादित्यपि द्रष्टव्यम्। ननूपसंहारदर्शनादित्यत्रानपेक्षस्य प्रवृत्तिर्दर्शिता, इह तु सर्वस्य चेतनापेक्षाप्रवृत्तिः प्रतिपाद्यत इति कुतो न विरोध इत्यत आह—"उपसंहारदर्शनादि"ति (पृ०५०८पं०१६)। स्थूलदीक्षालोकाभिप्रायानुरोधेन तदुक्तं न तु परमार्थत इत्यर्थः॥ ३॥

सू० व्यतिरेकानवस्थितेश्चानपेक्षत्वात्॥ ४॥

(३)यद्यपि सांख्यानामविवेकिचक्रर्मवासनावासितं प्रधानं साम्यावस्थायामपि तथापि न कर्मवासनाः सर्गस्येशते, किन्तु प्रधानमेव स्वकार्ये प्रवर्तमानमधर्मप्रतिबद्धं सन्न सुखमयीं सृष्टिं कर्तुमुत्सहत इति धर्मेणाधर्मप्रतिबन्धोऽपनीयते। एवमधर्मेण धर्मप्रतिबन्धोऽपनीयते दुःखमयीं सृष्टौ। स्वयमेव च प्रधानमनपेक्ष्य सृष्टौ प्रवर्तते। (४)यथाहु'र्निमित्तमप्रयोजकं प्रकृतीनां वर

---

(१) अर्थविषयज्ञानाकारेण।

(२) यदि पयोम्बुनोः सपक्षत्वमपि कथन्तर्हि साध्यपक्षनिक्षिप्तत्वादिति भाष्यमत आह साध्यपक्षेत्युपलक्षणमिति।

(३) प्रधानस्य सहकार्यभावासिद्धेः सूत्रभाष्ययोगप्राप्तंक्यात्र यद्यपीति। सर्गस्य निर्माणे कर्मवासना न प्रभवतीति चेत्क तर्हि तासामुपयोगस्तत्राह प्रधानमेवेति।

(४) निमित्तं धर्मादि, प्रकृतीनां मूलप्रकृतेर्महदादिप्रकृतिविकृतीनां चाप्रयोजकं स्वकार्ये सर्गे, किन्तु वर-

णभेदस्तु ततः क्षेत्रिकवदि'ति(पा.४सू.३)। (१)ततश्च प्रतिबन्धकापनयसाधने धर्माधर्मवासने अपि संनिहिते इत्यागन्तोरपेक्षणीयस्याभावात्सदैव साम्येन परिणमेत वैषम्येण वा, न स्वयं कादाचित्कः परिणामभेद उपपद्यते। ईश्वरस्य तु महामायस्य चेतनस्य लीलया वा यदृच्छया (२)वा स्वभाववैचित्र्याद्वा कर्मपरिपाकापेक्षस्य प्रवृत्तिनिवृत्ती उपपद्येते एवेति ॥ ४ ॥

सू० अन्यत्राभावाच्च न तृणादिवत्॥ ५ ॥

धेनूपयुक्तं हि तृणं यथादि यथा स्वभावत एव चेतनानपेक्षं क्षीरभावेन परिणमते न तु तत्र धेनुचैतन्यमपेक्ष्यते, उपयोगमात्रे तदपेक्षत्वात्। एवं प्रधानमपि स्वभावत एव परिणंस्यते कृतमत्र चेतनेनेति शङ्कार्थः। धेनूपयुक्तस्य तृणादेः क्षीरभावे किं निमित्तान्तरमात्रं निषिध्यते, उत चेतनं, न तावन्निमित्तान्तरम्। धेनुदेहस्थस्यौदर्यस्य वह्न्यादिभेदस्य निमित्तान्तरस्य सम्भवाद्बुद्धिपूर्वकारी तु तत्रापि ईश्वर एव सर्वज्ञः सम्भवतीति शङ्कानिराकरणस्यार्थः। तदिदमुक्तं "किंचिद्दैवसम्पाद्य"मिति (पृ० ५१० पं० १) ॥ ५ ॥

सू० अभ्युपगमेऽप्यर्थाभावात् ॥ ६ ॥

पुरुषार्थापेक्षाऽभावप्रसङ्गात्। तदिदमुक्तम्--"**एवं प्रयोजनमपि किंचिन्नापेक्षिष्यत**"इति। अथ वा पुरुषार्थाभावादिति योज्यम्। तदिदमुक्तं "**तथापि प्रधानप्रवृत्तेः प्रयोजनं विवेक्तव्य**"मिति। (३)न केवलं तात्त्विको भोगोऽनाधेयातिशयस्य कूटस्थनित्यस्य पुरुषस्य न सम्भवति, अनिर्मोक्षप्रसङ्गश्च--येन हि प्रयोजनेन प्रधानं प्रवर्तितं तदनेन कर्तव्यं, भोगेन चैतत्प्रवर्तितमिति तमेव कुर्यान्न मोक्षं तेनाप्रवर्तितत्वादित्यर्थः। "**अपवर्गश्चेत्प्रागपी**"ति। चितेः सदा विशुद्धत्वान्नैतस्यां जातु कर्मानुभववासनाः सन्ति, प्रधानं तु तासामनादिनामाधारस्तथा च प्रधानप्रवृत्तेः प्राक् चितिर्मुक्तैवेति नापवर्गार्थमपि तत्प्रवृत्तिरिति। **शब्दाद्यनुपलब्धिप्रसङ्गश्च**। तदर्थमप्रवृत्तत्वात्प्रधानस्य, "**उभयार्थताभ्युपगमेऽपी**"ति। (४)न तावदपवर्गः साध्यस्तस्य प्रधानाप्रवृत्तिमात्रेण सिद्धत्वात् भोगार्थं तु प्रवर्तेत, भोगस्य च सकृच्छब्दाद्युपलब्धिमात्रादेव समाप्तत्वान्न तदर्थं पुनः प्रधानं प्रवर्तेतेत्ययत्नसाध्यो मोक्षः स्यात्। नि.शेषशब्दाद्युपभोगस्य चानन्त्येन समाप्तेरनुपपत्तेर्निर्मोक्षप्रसङ्गः। कृतभोगमपि प्रधानमासन्नपुरुषान्यताख्यातेः क्रियासमभिहारेण भोजयतीति

णस्य प्रतिबन्धकस्य सदा सङ्गस्तता निमित्तं द्रवति क्षेत्रिकवत्-यथा क्षेत्रकारी केदारादपां पूर्णात्केदारान्तरं समं निम्नं वा पिपासायिषुरपो न पाणिनाऽपकर्षति किन्तु वरणन्तासां भित्तिं भित्त्वा तस्मिन्स्वयमेवापः केदारान्तरं प्लावयन्ति तद्वदिति पातञ्जलसूत्रार्थः।

(१) तदपनीतेरित्यतिबन्धे प्रधानं सृजतु इत्यत आह ततश्चेति। सदातनापनायकात्सदापनीतिः प्रतिबन्ध इति सदैव सर्गः स्यादित्यर्थः।

(२) यदृच्छयेति। यथास्मदादेस्तृणच्छेदादौ नियतनिमित्तानपेक्षा प्रवृत्तिरेवमित्यर्थः।

(३) कीदृशोऽनाधेयातिशयस्य भोग इत्यादिभाष्यं व्याचष्टे न केवलमिति। सिद्धान्तेऽप्यतात्त्विकभोगाभ्युपगमादवास्तवस्य न निषेध इत्यर्थः।

(४) नन्वपवर्गार्थमपि प्रधानप्रवृत्तौ सत्यां क्रमेण भोगमोक्षोपपत्तेः योगैश्वर्याच्चानन्तविकाराणां युगपदुपभोगसम्भवाद्युभयार्थतेत्यादिभाष्यमयुक्तमित्याशङ्क्याह न तावदिति।

चेद्, अथ पुरुषार्थाय प्रवृत्तं किमर्थं सत्त्वपुरुषान्यथाख्यातिं करोति। अपवर्गार्थमिति चेद्, (१)हन्तायं सकृच्छब्दाद्युपभोगेन कृतप्रयोजनस्य प्रधानस्य निवृत्तिमात्रादेव सिद्ध्यतीति कृतं सत्त्वान्यताख्यातिप्रतीक्षणेन। (२)न चास्याः स्वरूपतः पुरुषार्थत्वम्। तस्मादुभयार्थमपि न प्रधानस्य प्रवृत्तिरुपपद्यत इति सिद्धोऽर्थाभावः। सुममितरत्। शङ्कते-"दृक्शक्ती"ति (पृ० ५०१ पं० ३)। पुरुषो हि दृक्शक्तिः सा च दृश्यमन्तरेणानर्थिका स्यात्। न च स्वात्मन्यर्थवती, स्वात्मनि वृत्तिविरोधात्। प्रधानं च सर्गशक्तिः सा च सर्जनीयमन्तरेणानर्थिका स्यादिति यत्प्रधानेन शब्दादि सृज्यते तदेव दृक्शक्तेर्दृश्यं भवतीति तदुभयार्थवत्त्वाय सर्जनमिति शङ्कार्थः। निराकरोति--"सर्गशक्त्यनुच्छेदवदि"ति। (३)यथा हि प्रधानस्य सर्गशक्तिरेकं पुरुषं प्रति चरितार्थापि पुरुषान्तरं प्रति प्रवर्ततेऽनुच्छेदात्, एवं दृक्शक्तिरपि तं पुरुषं प्रत्यर्थवत्त्वायानुच्छेदात्सर्वदा प्रवर्तेतेत्यनिर्मोक्षप्रसङ्गः। सकृद्दृश्यदर्शनेन वा चरितार्थत्वे न भूयः प्रवर्तेतेति सर्वेषामेकपदे निर्मोक्षः प्रसज्येतेति सहसा संसारः समुच्छिद्येतेति ॥ ६ ॥

सू० पुरुषाश्मवदिति चेत्तथापि ॥ ७ ॥

नैव दोषात्प्रच्युतिरिति शेषः। (४)मा भूत्पुरुषार्थस्य शक्त्यर्थवत्त्वस्य वा प्रवर्तकत्वं पुरुष एव दृक्शक्तिसम्पन्नः पङ्गुरिव प्रवृत्तिशक्तिसम्पन्नं प्रधानमन्धमिव प्रवर्तयिष्यतीति शङ्का। दोषादनिर्मोक्षमाह-"अभ्युपेतहानं ताव"दिति। न केवलमभ्युपेतहानम्, अयुक्तं चैतद्भवद्दर्शनालोचनेनेत्याह- 'कथं चोदासीन' इति। निष्क्रियत्वे साधनं—"निर्गुणत्वा"दिति। शेषमतिरोहितार्थम् ॥ ७ ॥

सू० अङ्गित्वानुपपत्तेश्च ॥ ८ ॥

यदि (५)प्रधानावस्था कूटस्थनित्या, ततो न तस्याः प्रच्युतिरनित्यत्वप्रसङ्गात्, यथाहुः— 'नित्यं तमाहुर्विद्वांसो यः स्वभावो न नश्यती'ति।

तदिदमुक्तं "स्वरूपप्रणाशभया"दिति (पृ० ५१२ पं० ९) अथ परिणामिनित्या, यथाहुः-'यस्मिन् विक्रियमाणेऽपि यत्तत्त्वं न विहन्यते, तदपि नित्य'मिति, तत्राह-"साम्यस्य चे"ति। यत्साम्यावस्थया सुचिरं पर्यणमत्कथं तदेवासति विलक्षणप्रत्ययोपनिपाते वैषम्यमुपैति। अनपेक्षस्य स्वतो वाऽपि वैषम्येण कदाचित्साम्यं भवेदित्यर्थः ॥ ८ ॥

सू० अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ ९ ॥

"एवमपि प्रधानस्ये"ति (पृ० ५१३ पं० ३)। अङ्गित्वानुपपत्तिलक्षणो दोषस्ता-

---

(१) शब्दाद्यनुपलब्धिर्बुद्धिजीवभेदख्यातिर्वाऽपवर्गः किमर्थैरभ्युपेयते ? आरे दोषमाह हन्तेति।

(२) अन्ये आह न चास्या इति। उभयार्थ—भोगमोक्षार्थम्।

(३) दृक्शक्तेः सर्वप्रधानकार्यविषयत्वे दोषमाह यथा हीति। एकदेशविषयत्वे आह सकृद्दृश्येति।

(४) अर्थाभावसूत्रोक्तं दूषणमभ्युपेच्छति इति चेदित्यन्तसूत्रार्थेन माभूदिति। शक्त्यर्थवत्त्वस्य—दृक्शक्तिसर्गशक्त्यर्थवत्त्वस्य।

(५) अवस्थानाशेऽपि अवस्थावतां गुणानामनाशात् 'स्वरूपप्रणाशभयात्' इति भाष्यमाकृतिमाश्रित्य विकल्पद्वारा व्याचष्टे प्रधानावस्थेति।

वन्न भवद्भिः शक्यः परिहर्तुमिति वक्ष्यामः । अभ्युपगम्याप्यस्यादोषत्वमुच्यत इत्यर्थः । सम्प्रत्यङ्गित्वानुपपत्तिमुपपादयति–"वैषम्योपगमयोश्च अपी"ति ॥ ९ ॥

सू० विप्रतिषेधाच्चासमञ्जसम् ॥ १० ॥

"क्वचित्ससेन्द्रियाणी"ति । (१)स्वल्प त्रमेव हि बुद्धीन्द्रियमनेकरूपादिग्रहणसमर्थमेकम् , कर्मेन्द्रियाणि पञ्च, सप्तमं च मन इति ससेन्द्रियाणि । "क्वचित् त्रीण्यन्तःकरणानि" बुद्धिरहङ्कारो मन इति । "क्वचिदेकं," बुद्धिरिति । शेषमतिरोहितार्थम् ।

अत्राह सांख्यः–"नन्वौपनिषदानामपी"ति । तप्यतापकभावस्तावदेकस्मिन्नोपपद्यते, (२)नहि तपिरस्तिरिव कर्तृस्थभावकः, किन्तु पचिरिव कर्मस्थभावकः । परसमवेतक्रियाफलशालि च कर्म, तथा च तप्येन कर्मणा तापकसमवेतक्रियाफलशालिना तापकादन्येन भवितव्यम् । (३)अनन्यत्वे चैत्रस्येव गन्तुः स्वसमवेतगमनक्रियाफलनगरप्राप्तिशालिनोऽप्यकर्मत्वप्रसङ्गात् , अन्यत्वे तु तप्यस्य तापकाच्चैत्रसमवेतगमनक्रियाफलभाजो गम्यस्येव नगरस्य तप्यत्वोपपत्तिः। तस्मादभेदे तप्यतापकभावो नोपपद्यत इति । दूषणान्तरमाह–"यदि चे"ति (पृ० ५१४ पं० १) । नहि स्वभावाद्भावो वियोजितुं शक्य इति भावः । (४)जलधेश्च वीचितरङ्गफेनादयः स्वभावाः सन्त आविर्भावतिरोभावधर्माणो न तु तैर्जलधिः कदाचिदपि मुच्यते । न केवलं कर्मभावात्तप्यस्य तापकादन्यत्वमपि त्वनुभवसिद्धमेवेत्याह—"प्रसिद्धश्चायमि"ति । तथाहि--अर्थोपार्जनरक्षणक्षयरागबुद्धिहिंसादोषदर्शनादनर्थः सन्नर्थिनं दुनोति, तदर्थी तप्यस्तापकश्चार्थः, तौ चेमौ लोके प्रतीतभेदौ, अभेदे च दूषणान्युक्तानि, तस्मात्कथमेकस्मिन्द्वये भवितुमर्हत इत्यर्थः । तदेवमौपनिषदं मतमसमञ्जसमुक्त्वा सांख्यः स्वपक्षे तप्यतापकयोर्भेदे मोक्षमुपपादयति--"जात्यन्तरभावे त्वि"ति (पृ० ५१५ पं० १) । दृग्दर्शनशक्त्योः किल संयोगस्तापनिदानं, तस्य हेतुरविवेकदर्शनसंस्कारोऽविद्या(५), सा च विवेकख्यात्या विद्यया विरोधित्वाद्विनिवर्त्यते, तन्निवृत्तौ तद्धेतुकः संयोगो निवर्तते, तन्निवृत्तौ च तत्कार्यस्तापो निवर्तते । तदुक्तं पञ्चशिखाचार्येण—'तत्संयोगहेतुविवर्जनात्स्यादयमात्यन्तिको दुःखप्रतीकार' इति । अत्र च न साक्षात्पुरुषस्य परिणामिनो बन्धमोक्षौ, किन्तु बुद्धिप्रतिबिम्बस्यैव चितिच्छायापत्त्या लब्धचैतन्यस्य । तथाहीष्टानिष्टगुणस्वरूपावधारणमविभाग(६)पन्नमस्य भोगः, भोक्तृस्वरूपावधारणमपवर्गस्तेन हि

---

(१) एकादशेन्द्रियाणां कथं ससत्वमित्याशङ्क्य बुद्धीन्द्रियाणां त्वगिन्द्रियेऽन्तर्भावमाह त्वङ्मात्रमेवेति । एतदभिप्रायकमेव 'स्वगव्यतिरेकाच्च' इति गौतमीयं पूर्वपक्ष (३।१।५२) सूत्रम् ।

(२) ननु तप्य एवमास्तामास्तिरिव, तथाच तप्यतापकभावः कथमद्वैतघातकस्तत्राह नहीति । कर्तृस्थभावक.—कर्तृनिष्ठफल० ।

(३) ननु क्रियाफलशालित्वमात्रं कर्मत्वमस्तु किं परेतिविशेषणेन, तथाच तत्रैव तप्यं स्यात्तत्राहानन्यत्व इति । तथाच चैत्रसमवेता गमनक्रिया तस्याः फलं नगरप्राप्तिस्तच्छालिनश्चैत्रस्य परत्वाभावादकर्मकत्वव्यवहारप्रसङ्गादित्यर्थः ।

(४) ननु यथा समुद्रः स्वभावभूतैरपि वीच्यादिभिर्वियुज्यत एवमात्मापि तप्यतापकभावाभ्यामित्यत्राह जलधेश्चेति । (५) अत एव पातञ्जलसूत्रद्वयम्–"दृग्दर्शनशक्त्योः संयोगो हेयहेतुः, तस्य हेतुरविद्ये"ति च ।

(६) अविभागेति । बुद्धिसत्त्वस्य पुरुषादविवेकोऽविभागः तेन जडायां अपि बुद्धेर्गुणस्वरूपावधार-

बुद्धिसत्त्वमेवापद्यते, तथापि यथा जयः पराजयो वा योधेषु वर्तमानः प्राधान्यात्स्वामिन्यपदिश्यते एवं बन्धमोक्षौ बुद्धिसत्त्वे वर्तमानौ कथंचित्पुरुषेऽपदिश्येते, स ह्यविभागापत्त्या(१) तत्फलस्य भोक्तेति । तदेतदभिसन्धायाह—"स्यादपि कदाचिन्मोक्षोपपत्तिरि"ति ।

(२)अत्रोच्यते "नैकत्वादेव तप्यतापकभावानुपपत्तेः" । यत एकत्वे तप्यतापकभावो नोपपद्यते एकत्वादेव, (३)तस्मात्सांव्यवहारिकभेदाश्रयस्तप्यतापकभावोस्माभिरभ्युपेयस्तापो हि सांव्यहारिक एव न पारमार्थिक इत्यसकृदावेदितम् । भवेदेष दोषो यद्येकात्मतायां तप्यतापकावन्योन्यस्य विषयविषयिभावं प्रतिपद्येयातामित्यस्मदभ्युपगम इति शेषः । सांख्योऽपि हि भेदाश्रयं तप्यतापकभावं ब्रुवाणो न पुरुषस्य तापिकर्मतामाख्यातुमर्हति, तस्यापरिणामितया तापिक्रियाजनितफलशालित्वानुपपत्तेः । केवलमनेन सत्त्वं तप्यमभ्युपेयं तापकं च रजः । दर्शितविषयत्वात्तु बुद्धिसत्त्वे तप्ये तदविभागापत्त्या पुरुषोऽप्यनुतप्यत इव न तु तप्यतेऽपरिणामित्वादित्युक्तं, (४)तदविभागापत्तिश्चाविद्या, तथा चाविद्याकृतस्तप्यतापकभावस्त्वयाऽभ्युपेयः, सोऽयमस्माभिरुच्यमानः किमिति भवतः पुरुष इवाभाति । अपि च नित्यत्वाभ्युपगमाच्च तापकस्यानिर्मोक्षप्रसङ्गः । शङ्कते—"तप्यतापकशक्त्योर्नित्यत्वेऽपी"ति (पृ० ५१६ प० ६) । सहादर्शनेन निमित्तेन वर्तत इति सनिमित्तः संयोगस्तदपेक्षत्वादिति । निराकरोति—"नादर्शनस्य तमस" इति (५)न तावत्पुरुषस्य तन्निमित्तमित्युक्तम् । केवलमियं बुद्धिसत्त्वस्य तापकरजोजनिता, तस्य च बुद्धिसत्त्वस्य तामसविपर्यासादात्मनः पुरुषाद्भेदमपश्यतः पुरुषस्तप्यत इत्यभिमानो, न तु पुरुषो विपर्यासतुषेणापि युज्यते, तस्य तु बुद्धिसत्त्वस्य सात्त्विक्या विवेकख्यात्या तामसीयमविवेकख्यातिर्निवर्तनीया । न च सति तमसि मूले शक्याऽत्यन्तमुच्छेतुम् । तथा विच्छिन्नापि छिन्नबदरीव पुनस्तमसोद्भूतेन सत्त्वमभिभूय विवेकख्यातिमपोह्य शतशिखराऽविद्याविभाव्येतेति बतेयमपवर्गकथा तपस्विनी दत्तजलाञ्जलिः प्रसज्येत । अस्मत्पक्षे त्वदोष इत्याह—"औपनिषदस्य त्वि"ति । (६)यथा हि मुखमवदातमपि मलिनादर्शतलोपाधिकल्पितप्रतिबिम्बभेदं मलिनतामुपैति, न च तद्वस्तुतो मलिनं, न च बिम्बात्प्रतिबिम्बं वस्तुतो भिद्यते, अथ तस्मिन् प्रतिबिम्बे मलिनादर्शोपधानान्मलिनता पदं लभते, तथा चात्मनो मलिनं मुखं पश्यन् देवदत्तस्तप्यते । यदा तूपाध्यपनयाद्बिम्बमेव कल्पनावशात्प्रतिबिम्बं तच्चावदातमिति तत्त्वमवगच्छति तदास्य तापः प्रशाम्यति न च मलिनं मे मुखमिति । एवमविद्योपधानकल्पितावच्छेदो जीवः

मापन्नम्, अनुकूलश्रुत्यादिज्ञानस्य विविक्तपुरुषज्ञानस्य च बुद्धिपरिणामित्वात् बुद्धेरेव बन्धमोक्षावित्यर्थः ।

(१) अविवेकापत्त्या । (२) वेदान्तिमतेनेत्यर्थः ।

(३) वास्तविके तप्यतापकविभागानुपपत्तिपक्षे इष्टापत्तिमुक्त्वा व्यावहारिके तदनुपपत्त्यभावमाह - तस्मादिति ।

(४) अविभागापत्तिस्तर्हि क्षीरवत्सत्येति तन्निमित्ता तस्मिः पुंसः सत्या स्यादत आह तदविभागापत्तिश्चेति । (५) तमसस्तत्तद्धेतुत्वमुपपादयति न तावदिति ।

(६) तप्यस्य तमसो निवृत्त्ययोगात्परस्य तन्निमित्ततेरनाश उक्तः, सिद्धान्ते त्वविद्यया अवस्तुतस्तन्निबन्धनोविद्यया निवृत्तेर्मोक्षोपपत्तिमाह यथाहीति ।

परमात्मप्रतिबिम्बकल्पः कल्पितैरेव शब्दादिभिः संपर्कात्क्लिश्यते न तु तत्त्वतः परमात्मनोऽस्ति तापः । यदा तु 'तत्त्वमसी'ति वाक्यश्रवणमननध्यानाभ्यासपरिपाकप्रकर्षपर्यन्तजोऽस्य साक्षात्कार उपजायते तदा जीवः शुद्धबुद्धतत्त्वस्वभावमात्मनोऽनुभवन् निर्मूलनिखिलक्लेशजालः केवलः स्वस्थो भवति न चास्य पुनः संसारभयमस्ति तद्धेतोरवास्तवत्वेन समूलकाषं कषितत्वात् । सांख्यस्य तु सतस्तमसोऽशक्यसमुच्छेदत्वादिति । तदिदमुक्तम्—"विकारभेदस्य च वाचारम्भणमात्रत्वश्रवणादि"ति ॥ १० ॥

"प्रधानकारणवाद" इति (पृ० ५१७ पं० ४) । (१)यथैव प्रधानकारणवादो ब्रह्मकारणवादविरोध्येवं परमाणुकारणवादोऽप्यतः सोऽपि निराकर्तव्यः । एतेन 'शिष्टापरिग्रहा अपि व्याख्याता' इत्यस्य प्रपञ्च आरभ्यते । तत्र वैशेषिका ब्रह्मकारणत्वं दूषयांबभूवुः । चेतनं चेदाकाशादीनामुपादानं तदारब्धमाकाशादि चेतनं स्यात् । कारणगुणक्रमेण हि कार्ये गुणारम्भो दृष्टो, यथा शुक्लैस्तन्तुभिरारब्धः पटः शुक्लो, न जात्वसौ कृष्णो भवति । एव चेतनेनारब्धमाकाशादि चेतनं भवेन्न त्वचेतनम् । तस्मादचेतनोपादानमेव (२)जगत्तच्चाचेतनं परमाणवः, सूक्ष्मात् खलु स्थूलस्योत्पत्तिर्दृश्यते, यथा तन्तुभिः पटस्यैवमंशुभ्यस्तन्तुनामेवमपकर्षपर्यन्तं कारणद्रव्यमतिसूक्ष्ममनवयवमवतिष्ठते, तच्च परमाणुस्तस्य तु सावयवत्वेऽभ्युपगम्यमानेऽनन्तावयवत्वेन सुमेरुराजसर्षपयोः समानपरिमाणत्वप्रसङ्ग इत्युक्तम्(३) । तत्र च प्रथमं तावद(४)दृष्टवत्क्षेत्रज्ञसंयोगात्परमाणौ कर्म, ततोऽसौ परमाण्वन्तरेण संयुज्य द्व्यणुकमारभते (५)बहवस्तु परमाणवः संयुक्ता न सहसा स्थूलमारभन्ते, परमाणुत्वे सति बहुत्वात्, घटोपगृहीतपरमाणुवत् । (६)यदि हि घटोपगृहीताः परमाणवो घटमारभेरन् न घटे प्रविभज्यमाने कपालशर्करादयुपलभ्येत, तेषामनारब्धत्वात्, घटस्यैव तु तैरारब्धत्वात् । (७)तथा सति मुद्गरप्रहाराद् घटविनाशे न किञ्चिदुपलभ्येत, तेषामनारब्धत्वात् । तत्त्वयवानां परमाणूनामतीन्द्रियत्वात् । तस्मान्न बहूनां परमाणूनां द्रव्यं प्रति समवायिकारणत्वमपि तु द्वावेव परमाणू द्व्यणुकमारभेते । तस्य चाणुत्वं परिमाणं परमाणुपरिमाणात् पारिमाण्डल्यादन्यदीश्वरबुद्धिमपेक्ष्योत्पन्ना द्वित्वसंख्याऽऽरभते । न च द्व्यणुकाभ्यां द्रव्यस्यारम्भो, वैयर्थ्यप्रसङ्गात् । तदपि हि द्व्यणुकमेव भवेन्न तु महत् (८) । कारणबहुत्वमहत्त्व प्रचयविशेषभ्यो हि महत्त्वस्योत्पत्तिः । न च द्व्यणुकयोर्महत्त्वमस्ति, यतस्ताभ्यामारब्धं महद्भवेत् । नापि तयोर्बहुत्वं, द्वित्वादेव ।

---

(१) तत्त्वज्ञानप्रधानस्यास्य शास्त्रस्य परमतनिरासपरत्वाभावान्निराकृतो निराकर्तव्य' इति च भाष्यनिर्देशायोगमाशंक्याह यथैवेति । शैवतत्त्वज्ञानार्थं तन्निरास इत्यर्थः ।

(२) अत्र विमतमचेतनोपादानकं कार्यद्रव्यत्वात्संमतवदित्यनुमानाकारो द्रष्टव्यः ।

(३) 'एतेन शिष्टापरिग्रहा' इत्यत्र पूर्वपक्षे इत्यर्थः ।

(४) महाप्रलये प्रयत्नाभिघाताद्यभावात्कथं परमाणौ कर्म तत्राह अदृष्टवदिति ।

(५) मध्ये द्व्यणुकाङ्गीकारे युक्तिमाह बहवस्त्विति ।

(६) उक्तानुमाने साध्यवैकल्यं दृष्टान्ते परिहरति यदि हीति ।

(७) परमाणुभिस्साक्षाद्घटारम्भपक्षे विद्यमाने घटे संस्पर्शानुपलम्भं प्रसञ्जय नाशादूर्ध्वमपि तमाह तथासतीति । (८) परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमादित्यर्थः ।

न च प्रचयभेदस्तूलपिण्डानामिव, तदवयवानामनवयवत्वेन प्रशिथिलावयवसंयोगभेदविरहात् । तस्मात्तेनापि तत्कारणद्व्यणुकवदणुनैव भवितव्यं, तथा च पुरुषोपभोगातिशयाभावाददृष्टनिमित्तत्वाच्च विश्वनिर्माणस्य भोगार्थत्वात्तत्कारणेन च द्व्यणुकेन तन्निष्पत्तेः कृतं द्व्यणुकाश्रयेण द्व्यणुकान्तरेणेत्यारम्भवैयर्थ्यादारम्भार्थत्वाय बहुभिरेव द्व्यणुकैस्त्र्यणुकं चतुरणुकं पञ्चाणुकं वा द्रव्यं महद्दीर्घमारब्धव्यम् । अस्ति हि तत्रतत्र भोगभेदोऽस्ति च बहुत्वसंख्येश्वरबुद्धिमपेक्ष्योत्पन्ना महत्त्वपरिमाणयोनिः । (१) त्र्यणुकादिभिरारब्धं तु कार्यद्रव्यं कारणबहुत्वाद्वा कारणमहत्त्वाद्वा कारणप्रचयभेदाद्वा महद्भवतीति प्रक्रिया । तदेतयैव प्रक्रियया कारणसमवायिनो गुणाः कार्यद्रव्यं समानजातीयमेव गुणान्तरमारभन्त इति दूषणमदूषणीक्रियते, व्यभिचारादित्याह--

(सू०) महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥११॥

(२)यथा महद्द्रव्यं त्र्यणुकादि ह्रस्वाद् द्व्यणुकाज्जायते, न तु महत्त्वगुणोत्पादने द्व्यणुकगतं महत्त्वमपेक्षते, तस्य ह्रस्वत्वात् । यथा वा तदेव त्र्यणुकादि दीर्घं ह्रस्वाद् द्व्यणुकाज्जायते, न तु ततूतं दीर्घत्वमपेक्षते, तदभावात् । वाशब्दश्चार्थे ऽ(३)नुक्तसमुच्चयार्थः । यथा द्व्यणुकमणुह्रस्वपरिमाणं परिमण्डलात्परमाणोरपरिमण्डलं जायत एवं चेतनाद्व्यणोऽचेतनं जगन्निष्पद्यते इति सूत्रयोजना । भाष्ये "परमाणुगुणविशेषस्त्विति (पृ० ५१८ पं० ३) । पारिमाण्डल्यग्रहणमुपलक्षणम्-न द्व्यणुकेऽणुत्वमपि परमाणुवर्ति पारिमाण्डल्यमारभते, तस्य हि द्वित्वसंख्यायोनित्वादित्यपि द्रष्टव्यम् । ह्रस्वपरिमण्डलाभ्यामिति सूत्रं गुणिपरं (४)न गुणपरम् । यदापि "द्वे द्वे द्व्यणुके" इति पठितव्ये प्रमादादेकं द्वे इदं न पठितम् । एवं चतुरणुकमित्याद्युपपद्यते । इतरथा हि द्व्यणुकमेव तदपि स्यात्, न तु महदित्युक्तम् । अथ वा द्वे इति द्वित्वे, यथा 'ब्येकयोर्द्विवचनैकवचने' इति । अत्र हि द्वित्वैकत्वयोरित्यर्थः । अन्यथा ब्येकेष्विति स्यात्संख्येयानां बहुत्वात् । तदेवं योजनीयम्—द्व्यणुकाधिकरणे ये द्वित्वे ते यदा चतुरणुकमारभेते (५)संख्येयानां चतुर्णां द्व्यणुकानामारम्भकत्वात्ततूते द्वित्वसंख्ये अपि आरम्भके इत्यर्थः । एवं व्यवस्थितायां वैशेषिकप्रक्रियायां तद्दूषणस्य व्यभिचार उक्तः । अथाऽव्यवस्थिता तथापि तदवस्थो व्यभिचार इत्याह—"यद्यपि बहवः परमाणवः' इति । नाणु जायते नो ह्रस्वं जायते इति योजना । चोदयति—"अथ मन्यसे विरोधिना परिमाणान्तरेण" (पृ० ५१९ पं० १) स्व

(१) यदि द्व्यणुकगता संख्यैव त्र्यणुकगतमहत्त्वस्य कारणं तदा त्र्यणुकादिनिष्ठा संख्यैव तत्कार्यमहत्त्वे हेतुरस्तु इत्याशंक्य तत्र महत्त्वादिसम्भवादाहेयम इत्याह त्र्यणुकादिभिरिति ।

(२) सूत्रमुदाहृत्य व्याचष्टे यथेति ।

(३) यथाश्रुतसूत्रे परिमण्डलादपि महदारम्भो भाति स चायुक्त इति मत्वाह अनुक्तेति । अनुक्तमेव दर्शयति यथेति । यथाक्रमं सूत्रे ह्रस्वपरिमण्डलाभ्यां महद्दीर्घाणुवदिति सूचनाय वाशब्द इत्यर्थः ।

(४) गुणिपरमिति । परिमाणवद्द्रव्याभ्यां द्रव्यान्तरारम्भ उच्यते न तु गुणारम्भ इत्यर्थः । एतेन स परिमाणान्तरारम्भकत्वनिषेधान्न युक्तमिति प्रत्युक्तम् ।

(५) ननु द्व्यणुकगतद्वित्वयोः कथं चतुरणुकारम्भकत्वं संख्याया द्रव्यारम्भकत्वायोगादत आह संख्येयानामिति ।

कारणद्वारेणाक्रान्तत्वादिति । परिहरति—"मैवं मंस्था" इति । कारणगता गुणा न कार्ये समानजातीयं गुणान्तरमारभन्त इत्येतावतैवेष्टसिद्धौ न तद्धेत्वनुसरणे खेदनीयं मन इत्यर्थः । अपि च सत्परिमाणान्तरमाक्रामति नासत्, उत्पत्तेश्च प्राक् परिमाणान्तरमसदिति कथमाक्रामेत्, न च तत्कारणमाक्रामति । पारिमाण्डल्यस्यापि समानजातीयस्य कारणस्याक्रमणहेतोर्भावेन समानबलतयोभयकार्योत्पादप्रसङ्गादित्याशययानाह—"न च परिमाणान्तराक्रान्तत्वमि"ति । न च परिमाणान्तरारम्भे व्यापृतता पारिमाण्डल्यादीनाम्, न च कारणबहुत्वादीनां सन्निधानमसन्निधानं च पारिमाण्डल्यस्येत्याह—"न च परिमाणान्तरारम्भे" इति । व्यभिचारान्तरमाह—"संयोगाच्चे"ति (पृ० ५२० पं० ५)। शङ्कते—"द्रव्ये प्रकृत" इति । निराकरोति—"न दृष्टान्तेने"ति । न चास्माकमयमनियमो भवतामपीत्याह—"सूत्रकारोपी"ति । सूत्रं व्याचष्टे—"यथा प्रत्यक्षाप्रत्यक्षयोरि"ति । शेषमतिरोहितार्थम् ॥ ११ ॥

उभयथापि न कर्मातस्तदभावः ॥ १२ ॥

(१)परमाणूनामाद्यस्य कर्मणः कारणाभ्युपगमेऽनभ्युपगमे वा न कर्मातस्तदभावः-तस्य द्व्यणुकादिक्रमेण सर्गस्याभावः । अथवा यद्यणुसमवाय्यदृष्टमथ वा क्षेत्रज्ञसमवायि, उभयथापि तस्याचेतनस्य चेतनानधिष्ठितस्याप्रवृत्तेः कर्माभावोऽतस्तदभावस्सर्गाभावः । (२)निमित्तकारणतामात्रेण त्वीश्वरस्याधिष्ठातृत्वमुपरिष्टा(३)न्निराकरिष्यते । अथ वा संयोगोत्पत्त्यर्थं विभागोत्पत्त्यर्थमुभयथापि न कर्मातः सर्गहेतोः संयोगस्याभावात् प्रलयहेतोर्विभागस्याभावात् तदभावः-तयोः सर्गप्रलययोरभाव इत्यर्थः । तदेतत्सूत्रं तात्पर्यतो व्याचष्टे—"इदानीं परमाणुकारणवादमि"ति (पृ० ५२१ पं० १०)। निराकार्यस्वरूपमुपपत्तिसहितमाह—"स च वाद" इति । "स्वानुगतैः"-(४)स्वसम्बद्धैः । सम्बन्धश्चाधार्याधारभूत इहप्रत्ययहेतुः समवायः । पञ्चमभूतस्यानवयवत्वात् "तानीमानि चत्वारि भूतानी"ति । "तत्र—परमाणुकारणवादे, इदमभिधीयते" सूत्रम् । तत्र प्रथमां व्याख्यामाह—"कर्मवतामि"ति (पृ० ५२२ पं० १२) । अभिघातादीत्यादिग्रहणेन नोदनसंस्कारगुरुत्वद्रवत्वानि गृह्यन्ते । नोदन(५)संस्कारावभिघातेन समानयोगक्षेमौ गुरुत्वद्रवत्वे च परमाणुगते सदातने इति कर्मसातत्यप्रसङ्गः । द्वितीयं व्याख्यानमाशङ्क्य(६)पूर्वमाह—"अथा

(१) प्रधान चेतनानधिष्ठितत्वान्न कारणं चेत्तर्ह्यणवस्तदाधिष्ठिता हेतवो भविष्यन्तीति सुखबोधाय सूत्रं त्रेधादौ योजयति परमाणूनामिति ।

(२) ननु कर्मणश्चेतनानधिष्ठितत्वमेवासिद्धमीश्वराधिष्ठितत्वादत आह निमित्तेति ।

(३) पत्यु (ब्र० अ० २ पा० सू० १७) रित्यत्र ।

(४) भाष्ये स्वानुगतैरिति न ज्ञातेरिव व्यक्तीनामनुगतत्वमुच्यते इत्याह स्वसम्बद्धैरिति । सम्बन्धोऽपि न संयोग इत्याह सम्बन्धश्चेति । इहेति । इहप्रत्ययकार्यगम्यः समवाय इत्यर्थः । अनेन समवाये प्रमाण प्रदर्शितम् ।

(५) संस्कारो वेगादिः । अभिघातः क्रियाविशिष्टद्रव्यस्य द्रव्यान्तरेण संयोगविशेषः, यथोद्यमितनिपातितमुसलस्योलूखलेन, नोदनं तु संयुक्तस्य स एव संयोगः प्रयत्नविशेषापेक्षः यथा सम्भृतकरशरसंयोगः क्षेपानुकूलप्रयत्नापेक्षः, निमित्तापेक्षत्वेन समानयोगक्षेमौ नोदनसंस्कारावित्यर्थः ।

(६) दृष्टनिमित्ताभावेऽपि अदृष्टवदात्मसंयोगादणुषु कर्मेत्याशङ्क्यापूर्वकामित्यर्थः ।

दृष्टं" धर्माधर्मौ, "आद्यस्य कर्मण" इति (पृ० ५२३ पं० २) । "आत्मनश्च" (१)क्षेत्रज्ञस्य "अनुत्पन्नचैतन्यस्ये"ति । "अदृष्टवता पुरुषेण"ति । संयुक्तसमवायसंबन्ध इत्यर्थः । "सम्बन्धस्य सातत्यादि"ति । यद्यपि परमाणुक्षेत्रज्ञयोः संयोगः परमाणुकर्मजस्तथापि तत्प्रवाहस्य सातत्यमिति भावः । सर्वात्मना चेदुपचयाभाव, एकदेशेन हि संयोगे यावण्वोरेकदेशौ निरन्तरौ ताभ्यामन्ये एकदेशाः संयोगेनाव्याप्ता इति प्रथिमोपपद्यते, सर्वात्मना तु नैरन्तर्ये परमाणावेकस्मिन्परमाण्वन्तराण्यपि समान्तीति न प्रथिमा स्यादित्यर्थः । शङ्कते-(२)यद्यपि निष्प्रदेशाः परमाणवस्तथापि संयोगस्तयोरव्याप्यवृत्तिरेवंस्वभावत्वात् । कैषा वाचोयुक्तिर्निष्प्रदेशं संयोगो न व्याप्नोतीति ? (३)एषैव वाचोयुक्तिर्यथा प्रतीयते तत्तथाभ्युपेयत इति । तामिमां शङ्कां (४)सूद्धारामाह—"परमाणूनां कल्पिता" इति । नह्यस्ति सम्भवो निरवयव एकस्तदैव तेनैव संयुक्तश्चासंयुक्तश्चेति, भावाभावयोरेकस्मिन्नद्वये विरोधात्, अविरोधे वा न क्वचिदपि विरोधोऽवकाशमासादयेत्, प्रतीतिस्तु प्रदर्शकल्पनयापि कल्प्यते, तदिदमुक्तं 'कल्पिताः प्रदेशा' इति । तथा च सूद्धारेयमिति तामुद्धरति 'कल्पितानामवस्तुत्वादि'ति (पृ० ५२४ पं० १) । तृतीयां व्याख्यामाह—"यथा चादिसर्ग" इति । नन्वभिघातनोदनादयः प्रलयारम्भसमये कस्माद्विभागारम्भककर्महेतवो न सम्भवन्त्यत आह—"न हि तत्रापि किंचिन्नियत"मिति । यद्यपि शरीरादिप्रलयारम्भेऽस्ति दुःखभोगस्तथाप्यसौ पृथिव्यादिप्रलये नास्तीत्यभिप्रेत्येदमुदितमिति मन्तव्यम् ॥ १२ ॥

सू० समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥१३॥

व्याचष्टे "समवायाभ्युपगमाच्चे"ति । न तावत्स्वतन्त्रः समवायोऽत्यन्तं भिन्नः समवायिभ्यां समवायिनौ घटयितुमर्हत्यतिप्रसङ्गात्, तस्मादनेन समवायिसम्बन्धिना सता समवायिनौ घटनीयौ, तथा च समवायस्य सम्बन्धान्तरेण समवायिसम्बन्धेऽभ्युपगम्यमानेऽनवस्था, (५)अथासौ सम्बन्धिभ्यां सम्बन्धे न सम्बन्धान्तरमपेक्षते सम्बन्धिसम्बन्धन-

---

(१) तथापीश्वरस्य चैतन्यमस्तीत्याशंक्याह क्षेत्रज्ञस्येति ।

(२) शङ्कत इत्यस्य परमाणूना कल्पिता इति वक्ष्यमाणप्रतीकग्रहणेनानुषङ्गः । ननु परैः कल्पिता प्रदेशा नेष्यन्ते किन्तु परमाणौ संयोगस्य वृत्त्यवृत्ती इत्याशङ्क्य वृत्त्यवृत्तिपक्षौ व्याघाताभिरस्तौ, तथापि गत्यभावाद्वैशेषिको यदि परमाणौ संयोगस्याव्याप्यवृत्त्यर्थं कल्पितं प्रदेशं मन्येत सोऽपि भाष्ये आशंक्य निरस्यत इति वक्तुं वृत्त्यवृत्तिपक्षं तावदाह यद्यपीति ।

(३) तत्र व्याघातमाह सिद्धान्ती एषैवेति । घट दिषु संयोगस्य वृत्त्यवृत्ती दूषयेते यदि तत्राप्यवयवविभागेन तर्हि यावत्परमाणु तथात्वे परमाणोश्च निरंशत्वे संयोग एव न स्यादिति वृत्त्यवृत्ती एव तस्याव्याप्यवृत्तित्वेत्यर्थः ।

(४) सुपरिहारामापाद्येत्यर्थः । शङ्कायाः सूद्धारत्वसिद्धये एव वृत्त्यवृत्तिपक्षं दूषयति न त्वस्तीति ।

(५) समवायस्तन्तुपटाभ्यां सम्बद्धस्तन्नियामकत्वात्कारणवादित्यत्रासम्बन्धत्वमुपाधिमाशङ्कते अथासाविति । अनवस्थया पक्षे साध्याभावनिश्चयात्पक्षेतरस्याप्युपाधिता सम्बन्धिनोर्न घटयितुमर्हतीत्यर्थः । सम्बन्धीति । परस्परं स्वस्य च ताभ्यां सम्बन्धनमविशिष्टत्वापादानं परमार्थः स्वभावो यस्य स तथा तत्वादित्यर्थः ।

परमार्थत्वात् , तथाहि नासौ भिन्नोऽपि सम्बन्धिनिरपेक्षो निरूप्यते, न च तस्मिन्सति सम्बन्धिनौ भवतस्तस्मात्स्वभावादेव समवायः समवायिनोर्न सम्बन्धान्तरेणेति नानवस्थेति चोदयति—**"नन्विहप्रत्ययग्राह्य" इति** (पृ० ५२५ पं० १) । परिहरति—(१) **"नेत्युच्यते, संयोगोप्येव"मिति** । तथाहि-संयोगोपि सम्बन्धिसम्बन्धनपरमार्थो, न च तस्मिन्सति संयोगिनावसंयोगिनौ भवत इति तुल्यचर्चः । (२)यद्युच्येत गुणः संयोगो न च द्रव्यासमवेतो गुणो भवति, न चास्य समवायं विना समवेतत्वं, तस्मात्संयोगस्यास्ति समवाय इति शङ्कामपाकरोति **"न च गुणत्वादि"ति** । (३)यद्यसमवायेऽस्यागुणत्वं भवति कामं भवतु न नः काचित्क्षतिस्तदिदमुक्तं **"गुणपरिभाषायाञ्चे"ति** । परमार्थतस्तु द्रव्याश्रयीत्युक्तम् । तच्च विनापि समवायं स्वरूपतः संयोगस्योपपद्यते एव । न च कार्यत्वात्समवाय्यसमवायिकारणापेक्षितय संयोगसमवायीति युक्तम् , अजसंयोगस्यातथात्वप्रसङ्गात् । अपि च समवायस्यापि सम्बन्ध्यधीनसद्भावस्य सम्बन्धिनश्चैकस्य द्वयोर्वा विनाशित्वेन विनाशित्वात्कार्यत्वम् । नह्यस्ति सम्भवो गुणो वा गुणगुणिनौ वाऽवयवी वाऽवयवावयविनौ वा न स्तोऽप्यस्ति च तयोः सम्बन्ध इति । तस्मात्कार्यः समवायः । (४)तथा च यथैष निमित्तकारणमात्राधीनोत्पाद,एवं संयोगोऽपि । अथ समवायोऽपि समवाय्यसमवायिकारणे अपेक्षते तथापि सैवानवस्थेति । तस्मात्समवायवत्संयोगोऽपि न सम्बन्धान्तरमपेक्षते । (५)यद्युच्येत सम्बन्धिनावसौ घटयति नात्मानमपि सम्बन्धिभ्यां, तत्किमसावसम्बद्ध एव सम्बन्धिभ्यामेवं चेदत्यन्तभिन्नोऽसम्बद्धः कथं सम्बन्धिनौ सम्बन्धयेत् । सम्बन्धने वा हिमवद्विन्ध्यावपि सम्बन्धयेत् । तस्मात्संयोगः संयोगिनोः समवायेन सम्बद्ध इति वक्तव्यम् । तदेतत्समवायस्यापि समवायिसम्बन्धे समानमन्यत्राभिनिवेशात्तथा चानवस्थेति भावः ॥ १३ ॥

सू० नित्यमेव च भावात् ॥ १४ ॥

प्रवृत्तेरप्रवृत्तेर्वेति शेषः । अतिरोहितार्थमस्य भाष्यम् ॥ १४ ॥

सू० रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ १५ ॥

यत्किल भूतभौतिकानां (६)मूलकारणं तद्रूपादिमान्परमाणुर्नित्य इति भवद्भिरभ्युपेयते,

---

(१) संयोगस्यापि स्वरूपसम्बन्धोपपत्तेः समवायो न स्यादित्याभिप्रायेण परिहरतीत्यर्थ । किमसम्बन्धत्वमुपाधिः असमवायत्वं वा ? नाद्यः, संयोगे साध्याव्याप्तेरित्याह संयोगोपीति । समवायेन तुल्यन्यायत्वात्संयोगोप्यसम्बन्धः प्रसज्येत नचैवं त्वयेष्यतेऽतः साध्याव्याप्तिरित्यर्थः ।

(२) अगुणत्वे सत्यसम्बन्धत्वं सम्बन्धापेक्षायामुपाधिस्तथाच न साध्याव्याप्तिरित्याशङ्कते यद्युच्येतेति ।

(३) संयोगस्य गुणत्वमसिद्धमिति साध्याव्याप्तिस्तदवस्थैवेत्याह यद्यसमवाय इति । सम्बन्धान्तरसापेक्षेपि संयोगे नाऽऽगुणत्वे सत्यसम्बन्धत्वमस्मन्मते तस्यागुणत्वात्सम्बन्धत्वाच्चातः साध्याव्याप्तिरित्यर्थः ।

(४) समवायस्य कार्यत्वेऽपि समवायिकारणानपेक्षत्वेन समवायान्तरापेक्षा नास्तीति प्रभाकरमते प्रतिबन्ध्या समवायान्तरापेक्षामुपपादयति तथाचेति ।

(५) ननु संयोगस्यापि संयोगिभ्यामसम्बन्ध एवास्तु, तथा च कुतः प्रतिबन्दीति काश्चिदाशङ्कते यद्युच्येतेति । दूषयति तत्किमिति ।

(६) अथ परमाणुपक्षत्वे आश्रयासिद्धिर्वैदान्तिमतेऽतो मूलकारणमिति । तथाच मूलकारणमुभयपक्षसम्मतं पक्षस्तर्यादं रूपादिमत्त्वाद्यावयवत्वाद्यापाद्यमिति नाश्रयासिद्धिरित्यर्थः ।

तस्य चेद्रूपादिमत्त्वमभ्युपेयते परमाणुर्नित्यत्वविरुद्धे स्थौल्यानित्यत्वे प्रसज्येयातां, सोऽयं प्रसङ्ग (१)एकधर्माभ्युपगमे धर्मान्तरस्य, नियता प्राप्तिर्हि प्रसङ्गलक्षणम्, तदनेन(२) प्रसङ्गेन जगत्कारणप्रसिद्धये प्रवृत्तं साधनं(३) रूपादिमन्नित्यपरमाणुसिद्धेः प्रत्याख्याय ब्रह्मगोचरतां नीयते । तदेतद्वैशेषिकाभ्युपगमोपन्यासपूर्वकमाह--**'सावयवानां द्रव्याणामि'**ति (पृ० ५२६ पं० ३)। (४) परमाणुनित्यत्वसाधनानि च तेषामुन्मत्तस्य दूषयति-**यच्च नित्यत्वे कारणमि''**ति । **''सदि''**ति प्रागभावाद् व्यवच्छिनत्ति। **''अकारणवदि''**ति घटादेः। **''यदपि द्वितीयमि''**ति । लक्षणरूप हि क्वचित्किञ्चिदन्यत्र निषिध्यते, तेनानित्यमिति लौकिकेन निषेधेनान्यत्र नित्यत्वसद्भावः कल्पनीयस्ते चान्ये परमाणव इति । तन्न । आत्मन्यपि नित्यत्वोपपत्तेः, व्यपदेशस्य च प्रतीतिपूर्वकस्य तदभावे नैर्मूल्यस्यापि दर्शनात्-यथेह वटे यक्ष' इति । **''यदपि नित्यत्वं तृतीयं कारणमविद्येति''** (पृ० ५२७ पं०५)। यदि सतां परमाणूनां परिदृश्यमानस्थूलकार्याणां प्रत्यक्षेण कारणाग्रहणमविद्या तया नित्यत्वमेवं सति द्व्यणुकस्यापि नित्यत्वम्। अथाद्रव्यत्वे सतीति विशेष्यते, तथासति न द्व्यणुके व्यभिचारः, तस्यानेकद्रव्यत्वेनाविद्यमानद्रव्यत्वानुपपत्तेः । तथाप्यकारणत्वमेव नित्यतानिमित्तमापद्येत यतोऽद्रव्यत्वमविद्यमानकारणभूतद्रव्यत्वमुच्यते तथा च पुनरुक्तमित्याह-**''तस्य चे''**ति। (५)अपि चाद्रव्यत्वे सति सत्त्वादित्यत एवेष्टार्थसिद्धेरविद्येति व्यर्थम्। अथाविद्यापदेन द्रव्यविनाशकारणद्वयाविद्यमानत्वमुच्यते, द्विविधो हि द्रव्यनाशहेतुरवयवविनाशोऽवयवव्यतिषङ्गविनाशश्च, तदुभयं परमाणौ नास्ति तस्मान्नित्यः परमाणुः। न च सुखादिभिर्व्यभिचारः(६), तेषामद्रव्यत्वादित्याह—**''अथापी''**ति । निराकरोति-**''नावयवी''**ति । यदि हि संयोगसचिवानि बहूनि द्रव्याणि द्रव्यान्तरमारभेरन्निति प्रक्रिया सिध्येत्, सिध्येद् द्रव्यद्वयमेव तद्विनाशकारणमिति, नत्वेतदस्ति, द्रव्यस्वरूपापरिज्ञानात्। न तावत् तन्त्वाधारस्तद्व्यतिरिक्तः पटो नामास्ति यः संयोगसचिवैस्तन्तुभिरारभ्येतेत्युक्तमधस्तात्(७) षट्पदार्थांश्च दूषयन्नग्रे वक्ष्यति, किन्तु कारणमेव विशेषवदवस्थान्तरमापद्यमानं कार्यं, (८)तच्च सामान्यात्मकम् , तथा हि मृद् सुवर्णं वा सर्वेषु घटरुचकादिष्व-

(१) नन्वेवं रूपादिमत्त्वस्य ब्रह्मणि वेदान्तिभिरस्वीकारात्पक्षधर्मत्वासिद्धि स्यादत आहकेति । यदि पर्वतेऽनग्निमत्त्वमभ्युपगम्यते तर्ह्यधूमवत्त्वं [illegible] , [illegible] नेत्यर्थः । [illegible] नादिति भावः।

(२) ननु आरोपरूपेण तर्केण कथं पदार्थसिद्धिरत आहानेनेति ।

(३) साधनमिति । विमतं सोपादानं भावकार्यत्वात्सम्मतवदिति सामान्यतः प्रवृत्तमनुमानमुक्ततर्कोपबृंहितं जगदुपादानं न स्पर्शवद् न चाणु नित्यत्वादत्यन्ताभाववादीतिविरोधसहकृतं नित्यव्यापकब्रह्मविषयं क्रियत इत्यर्थः ।

(४) सत्यपि स्पर्शादिमत्त्वे मूलकारणस्य नित्यत्वमनुमानात्सिध्यतीत्यर्थात्सत्यंतिपक्षताभाशंक्य दूषयति परमाणुनित्यत्वेति ।

(५) कारणाभावादेव नित्यत्वासिद्धे. कारणग्रहणोक्तिर्व्यर्थेत्यत आहापिचेति ।

(६) परमाणुर्नित्यः अवयवविनाशावयवविभागरहितत्वादात्मवदित्यनुमाने नित्यसुखादौ हेतोः सत्त्वेपि द्रव्यत्वे सतीति विशेषणदानान्न व्यभिचार इत्यर्थः ।

(७) आरम्भणाधिकरणे (ब्र० अ० २ पा० १ सू० १४)।

(८) ननु विशेषावस्थापि कार्यमपूर्वा स्यान्नेत्याह तच्चेति । एकं ह्यनुगतद्रव्यं कारणभूतं सामान्यं न

नुगतं सामान्यमनुभूयते, न चैते घटरुचकादयो मृत्सुवर्णाभ्यां व्यतिरिच्यन्त इत्युक्तं, अग्रे च वक्ष्यामः । तस्मान्मृत्सुवर्णे एव तेनतेनाकारेण परिणममाने घट इति च रुचक इति च कपालशर्करेत्यणमिति च शकलकणिकाचूर्णमिति च व्याख्यायेते, (१)तत्र-तत्रोपादानयोर्मृत्सुवर्णयोः प्रत्यभिज्ञानात्, न तु घटादयो वा कपालादिषु कपालादयो वा घटादिषु च रुचकादयो वा शकलादिषु शकलादयो वा रुचकादिषु प्रत्यभिज्ञायन्ते यत्र कार्य-कारणभावो भवेत् । (२)न च विनश्यन्तमेव घटक्षणं प्रतीत्य कपालक्षणोऽनुपादान एवो-त्पद्यते तत्किमुपादानप्रत्यभिज्ञानेनेति वक्तव्यम्, एतस्या अपि वैनाशिकप्रक्रियाया उपरिष्टाद् निराकरिष्यमाणत्वात् । तस्मादुपजनापायधर्माणो विशेषवस्थाः सामान्यस्योपादेयाः, सामा-न्यात्मा तूपादानम्, (३)एवं व्यवस्थिते यथा सुवर्णद्रव्यं काठिन्यावस्थामपहाय द्रवावस्थया परिणतं न च तत्रावयवविभागः सत्रापि द्रवत्वे कारणं परमाणूनां भवन्मते तदभावेन(४) द्रवत्वानुपपत्तेस्तस्माद्यथा परमाणुद्रव्यमग्निसंयोगात्काठिन्यमपहाय द्रवत्वेन परिणमते, (५)न च काठिन्यद्रवत्वे परमाणोरतिरिच्येते, एवं मृद्वा सुवर्णं वा सामान्यं पिण्डावस्थामपहाय कुलालहेमकारादिव्यापाराद् घटरुचकाद्यवस्थामापद्यते, न त्ववयविनाशात्तत्संयोगविनाशाद्वा विनष्टुमर्हन्ति घटरुचकादयः, न हि कपालादयोऽस्योपादानं तत्संयोगो वाऽसमवायिकार-णमपि तु सामान्यमुपादानं, तच्च नित्यं न च तत्संयोगसचिवमेकत्वात्, संयोगस्य द्विष्ठ-त्वेनैकस्मिन्नभावात् । तस्मात्सामान्यस्य परमार्थसतोऽनिर्वाच्या विशेषावस्थास्तदधिष्ठाना भुजङ्गादय इव रज्ज्वाद्युपादाना उपजनापायधर्माण इति साम्प्रतम् । प्रकृतमुपसंहरति—"तस्मादि"ति (पृ० ५२८ पं० ३) ॥ १५ ॥

सू० उभयथा च दोषात् ॥ १६ ॥

(६)अनुभूयते हि पृथिवी गन्धरूपरसस्पर्शात्मिका स्थूला, आपो रसरूपस्पर्शात्मिकाः सूक्ष्माः, रूपस्पर्शात्मकं तेजः सूक्ष्मतरं, स्पर्शात्मको वायुः सूक्ष्मतमः । पुराणेऽपि स्मर्यते—

आकाशं शब्दमात्रं तु स्पर्शमात्रं समाविशत् ।
द्विगुणस्तु ततो वायुः शब्दस्पर्शात्मकोऽभवत् ॥

तस्य सयोग इत्यर्थः । कारणस्य सामान्यात्मकत्वमवोपादयति तथाहीति ।

(१) ननु व्यावृत्ता: कपालशकलादय एव घटरुचकादिनारभ्यन्ते, किमनुगतद्रव्यकल्पनया इत्यत आह तत्र तथेति । उपादानव्यवस्थायाः तादात्म्य नियमनत्वात्तद्व्यानुवृत्तयोरेव मृद्धिरण्योर्घटरुचकादिष्वनुभूय-ते न व्यावृत्तेष्विति सामान्यात्मकमेव द्रव्यमुपादानमन्यथा कुम्भकारस्याप्युपादानत्वापत्तिरिति भावः ।

(२) बौद्धमतमाशंक्य निराकरोति न चेति ।

(३) 'तदा घृतकाठिन्यविलयनवदि'ति भाष्यं व्याचक्षाण आह एवमिति ।

(४) नैयायिकमते परमाणोर्निरवयवत्वेनावयवविभागाश्रयभावेन ।

(५) न केवलं परमाणुदृष्टान्तेऽवयवविभागाश्रयाभाव उपजीव्यः किन्तु कार्यकारणभेदाभावोऽपीत्याह नचेति ।

(६) गुणानामन्यत्वाद्द्रव्यस्य निरवयवत्वाविधानात्परमाणुषु गुणोपचयापचयाभ्यामुपचितापचि तावयवत्वप्रसञ्जनमयुक्तमित्याशंक्य, परमाणूनां गुणसमुदायत्वं वक्तुं कार्यस्य गुणसमुदायत्वं तद्वृत्ति ह्यभाव्यं च स्थौल्यमौद्भव्ये दर्शयति अनुभूयत इत्यादिना ।

रूपं तथैवाविशतः शब्दस्पर्शगुणावुभौ ।
त्रिगुणस्तु ततो वह्निः स शब्दस्पर्शवान् भवेत् ॥
शब्दः स्पर्शश्च रूपं च रसमात्रं समाविशत् ।
तस्माच्चतुर्गुणा आपो विज्ञेयास्तु रसात्मिकाः ॥
शब्दः स्पर्शश्च रूपं च रसश्चैवान्धमाविशत् ।
संहतान् गन्धमात्रेण तानाचष्टे महीमिमाम् ॥
तस्मात्पञ्चगुणा भूमिः स्थूला भूतेषु दृश्यते ।
शान्ता घोराश्च मूढाश्च विशेषास्तेन(१) ते स्मृताः ॥
परस्परानुप्रवेशाद्धारयन्ति परस्परम् ।

तेन गन्धादयः परस्पर संहन्यमानाः पृथिव्यादयस्तथा च यथायथा संहन्यमानानामुपचयस्तथातथा संहतस्य स्थौल्यं यथायथाऽपचयस्तथातथा सौक्ष्म्यतारतम्यम्, तदेवमनुभवागमाभ्यामवस्थितमर्थं वैशेषिकैरनिच्छद्भिरप्यशक्यापह्नवमाह—"गन्धे"ति । अस्तु तावच्छब्दो वैशेषिकैरस्य पृथिव्यादिगुणत्वेनानभ्युपगमादिति चत्वारि भूतानि चतुर्भिश्चैकगुणान्युदाहृतवान् । अनुभवागमसिद्धमर्थमुक्त्वा विकल्प्य दूषयति—"तद्वत्" । स्थूलपृथिव्यादिवत् । "परमाणवोऽपी"ति । "उपचितगुणानां मूर्त्युपचयात्"(२)उपचितसंहन्यमानानां, (२)संघातोपचयात्"अपरमाणुत्वप्रसङ्गः" स्थूलत्वादिति । (३)यस्तु ब्रूते न गन्धादिसंघातः परमाणुरपि तु गन्धाद्याश्रयो द्रव्यं, न च गन्धादीनां तदाश्रयकाणामुपचयेपि द्रव्यस्योपचयो भवितुमर्हत्यन्यत्वादिति तं प्रत्याह—"न चान्तरेणापि मूर्त्युपचयं" द्रव्यस्वरूपोपचयामित्यर्थः । कुतः?"कार्येषु भूयस्सु गुणोपचये मूर्त्युपचयदर्शनात्" (४)न तावत्परमाणवो रूपतो गृह्यन्ते किन्तु कार्यद्वारा, कार्यं च न गन्धादिभ्यो भिन्नं यदा न तदाधारतया गृह्यतेऽपि तु तदात्मकतया तथा च तेषामुपचये तदुपचितं दृष्टमिति परमाणुभिरपि तत्कारणैरेवं भवितव्यं, तथा चाऽपरमाणुत्वं स्थूलत्वादित्यर्थः । द्वितीयं विकल्पं दूषयति—"अकल्प्यमाने तूपचितापचितगुणत्वे" इति । "अथ सर्वे चतुर्गुणा" इति (पृ० ५२९ पं० २) । यद्यप्यस्मिन्कल्पे सर्वेषां स्थौल्यप्रसङ्गस्तथाप्यतिस्फुटतयोपेक्ष्य दूषयति—"ततोऽवी"ति । वायो रूपवत्त्वेन चाक्षुषत्वप्रसङ्ग इत्यपि द्रष्टव्यम् ॥ १६ ॥

---

(१) तेनेति । येन कारणेनामिलितास्तेन कारणेन स्थूला. अन्ततस्ते विशेषा व्यावृत्तव्यवहारवन्तस्सामान्यत्वैकत्वादिना शान्तघोरमूढरूपा परस्परं गन्धादीनामनुप्रवेशाद्द्रव्यसंज्ञां प्राप्य रसादयः पृथिवी भूत्वा गन्धं रूपादय आपो भूत्वा रसं स्पर्शादयस्तेजो भूत्वा रूपं शब्दस्पर्शसमुदायश्च वायुर्भूत्वा स्पर्शं धारयन्तीत्यर्थः ।

(२) उपचयमात्रेण न सङ्घातात्मकमूर्त्यधिक्यमतः सहन्यमानानामिति व्याख्या । सङ्घातेति [illegible] शब्दव्याख्यानम् ।

(३) नैयायिकः, आगममनादृत्यैवं ब्रूते इत्यर्थः ।

(४) ननु वेदान्तिभिः परमाणुषु गुणोपचयान्मूर्त्युपचयः साध्यते तत्र च कार्येषु तदुपचयान्मूर्त्युपचयप्रदर्शनं किमर्थं कृतम् ? न तावद्दृष्टान्तत्वेन प्रदर्शनं युक्तं साध्यसमत्वात्, नापि हेतुत्वेन व्यधिकरणत्वादिति नैयायिकाशङ्कायामाह न तावदिति ।

सू० अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १७ ॥

निगदव्याख्यातेन भाष्येण व्याख्यातम् । संप्रत्युत्तरसूत्रं भाष्यकृद्वैशेषिकतन्त्रं दूषयति—"अपि च वैशेषिका" इति । द्रव्याधीनत्वं द्रव्याधीननिरूपणत्वं,(१) न हि यथा गवाश्वमनहिषमातङ्गाः परस्परानधीननिरूपणाः स्वतन्त्रा निरूप्यन्ते, वह्न्याद्यधीनोत्पत्तयो वा धूमादयो यथा वह्न्याद्यनधीननिरूपणाः स्वतन्त्रा निरूप्यन्ते, एवं गुणादयो द्रव्याद्यनधीननिरूपणाः, अपि तु यदायदा निरूप्यन्ते तदातदा तदाकारतयैव प्रथन्ते न तु प्रथायामेषामास्ति स्वातन्त्र्यम्, तस्मान्नातिरिच्यन्ते द्रव्यादपि तु द्रव्यमेव सामान्यरूपं तथातथा प्रथत इत्यर्थः(२) । द्रव्यकार्यत्वमात्रं गुणादीनां द्रव्याधीनत्वमिति मन्वानश्चोदयति—"नन्वग्नेरन्यस्यापी"ति (पृ० ५३० पं० ३) । परिहरति—"भेदप्रतीतेरस्त्व"ति । न तदधीनोत्पादतां तदधीनत्वमाचक्ष्महे किन्तु तदाकारतां तथा च न व्यभिचार इत्यर्थः । शङ्कते(३)—"गुणानां द्रव्याधानत्वं द्रव्यगुणयोरयुतसिद्धत्वादिति यदुच्येत" । यत्र हि द्वावाकारिणौ विभिन्नाभ्यामाकाराभ्यामवगम्येते, तौ सम्बद्धावसम्बद्धौ वा वैयधिकरण्येन प्रतिभासेते यथेह कुण्डे दधि यथा वा गौरश्व इति न तथा गुणकर्मसामान्यविशेषसमवायास्तेषां द्रव्याकारतयाकारान्तरायोगेन द्रव्यादाकारिणोन्यत्वेनाकारितया व्यवस्थानाभावात् सेयमयुतसिद्धिस्तया च सामानाधिकरण्येन प्रथेत्यर्थः । तामिमामयुतसिद्धिं विकल्प्य दूषयति—"तत्पुनरयुतसिद्धत्व"मिति । तत्रापृथग्देशत्वं तदभ्युपगमेन विरुध्यत इत्याह—"अपृथग्देशत्वमि"ति । (४)यदि तु संयोगिनोः कार्ययोः संबन्धिभ्यामन्यदेशत्वं युतसिद्धिस्ततोऽन्याऽयुतसिद्धिः, नित्ययोस्तु संयोगिनोर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं युतसिद्धिस्ततोन्याऽयुतसिद्धिस्तथा चाकाशपरमाण्वोः परमाण्वोश्च संयुक्तयोर्युतसिद्धिः सिद्धा भवति, गुणगुणिनोश्च शौक्ल्यपटयोरयुतसिद्धिः सिद्धा भवति, नहि तत्र शौक्ल्यपटाभ्यां संबन्धिभ्यामन्यदेशौ शौक्ल्यपटौ, सत्यपि पटस्य तदन्यतन्तुदेशत्वे शौक्ल्यस्य सम्बन्धिपटदेशत्वात् । तन्न । नित्ययोरात्माकाशयोरजसंयोगे उभयस्या अपि युतसिद्धेरभावात्, नहि तयोः पृथगाश्रयाश्रितत्वमनाश्रयत्वात्, नापि द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वममूर्त्तत्वेनोभयोरपि निष्क्रियत्वात् । न चाजसंयोगो नास्ति, तस्यानुमानसिद्धत्वात् । तथाह्याकाशमात्मसंयोगि मूर्तद्रव्यरहितत्वात् घटादिवदित्यनुमानम् । (५) इत्य

---

(१) ननु द्रव्योत्पाद्यत्व कर्माद्यविद्युणानां सामान्यादीना च तदभावात् । द्रव्याधीनत्वमयोगादयात नहीति ।

(२) ननु पूर्व वेदान्तिभिर्गुणसंघातत्वं द्रव्यस्योक्तमधुना कथं गुणादेर्द्रव्यमात्रत्वमुच्यत इति चेन्न । पूर्व स्वमतेन तथोक्तमिदानी वैशेषिकमतावलम्बनेन द्रव्यमतिरिक्तमभ्युपेत्य द्रव्यसामानाधिकरण्यमतीत्या गुणादेर्द्रव्यमात्रत्वमुच्यत इति न विरोधः ।

(३) शुक्लत्वं घटवृत्ति शौक्ल्यवृत्तित्वात्पटवदित्यनुमानमभिप्रेत्य तदनुकूलत्वेन सामानाधिकरण्यमतीतिर्वेदान्तिभिरुक्ता तस्या अन्यथासिद्धिं शङ्कते इत्यर्थः । भेदेपि सामानाधिकरण्यं सम्भवतीति शङ्कार्थः ।

(४) एकदेशत्वमपृथग्देशत्वं भाष्ये दूषितम्, स्वयन्तु प्रकारान्तरेणापृथग्देशत्वमाशङ्कते, तत्र तावत्प्राप्तियोगिभूतं पृथग्देशत्वमाह नैयायिकमतेन यदि त्विति ।

(५) अभ्युपेत्यापि वर्णितामयुतसिद्धिं दोषान्तरमाह पृथगाश्रयाश्रयित्वमिति ।

श्रयाश्रयित्वपृथग्गतिमत्त्वलक्षणयुतसिद्धेरन्या त्वयुतसिद्धिर्यद्यपि नाभ्युपेतविरोधमावहति, तथापि न सामानाधिकरण्यप्रथामुपपादयितुमर्हति । एवंलक्षणेऽपि हि समवाये गुणगुणिनोरभ्युपगम्यमाने 'संबद्धे' इति प्रत्ययः स्यान्न तादात्म्यप्रत्ययः । अस्य चोपपादनाय समवाय आस्थीयते भवद्भिः । स चेदास्थितोऽपि न प्रत्ययमिममुपपादयेत् कृतं तत्कल्पनया । (१)न च प्रत्यक्षः सामानाधिकरण्यप्रत्ययः समवायगोचरः, तद्विरुद्धार्थत्वात्, तद्गोचरत्वे हि पटे शुक्ल इत्येवमाकारः स्यान्न तु पटः शुक्ल इति । (२)न च शुक्लपदस्य गुणविशिष्टगुणिपरत्वादेवं प्रथेति साम्प्रतम् । नहि शब्दवृत्त्यनुसारि प्रत्यक्षम् । नह्यग्निर्माणवक इत्युपचरितान्निभावो माणवकः प्रत्यक्षेण दहनात्मना प्रथते । न चायमभेदविभ्रमः समवायनिबन्धनो भिन्नयोरपीति वाच्यम् । गुणादिसद्भावे तद्भेदे च प्रत्यक्षानुभवादन्यस्य प्रमाणस्याभावात्तस्य च भ्रान्तत्वे सर्वाभावप्रसङ्गात् । तदाश्रयस्य तु भेदसाधनस्य तद्विरुद्धतयोत्थानासम्भवात् । तदिदमुक्तं **"तस्य तादात्म्येनैव प्रतीयमानत्वादि"**ति (पृ० ५३१ पं० २) अपि चायुतसिद्धशब्दोऽपृथग्गुप्तौ मुख्यः, सा च भवन्मते न द्रव्यगुणयोरस्ति, द्रव्यस्य प्राक् सिद्धेर्गुणस्य च पश्चादुत्पत्तेस्तस्मान्मिथ्यावादोऽयमित्याह—**"युतसिद्धयो"**रिति । अथ भवतु कारणस्य युतसिद्धिः, कार्यस्य त्वयुतसिद्धिः कारणातिरेकेणामावाद्, इत्याशङ्क्यान्यथा दूषयति **"एवमपी"**ति । सम्बन्धिद्वयाधीनसद्भावो हि सम्बन्धो नासत्येकस्मिन्नपि सम्बन्धिनि भवितुमर्हति, न च समवायो नित्यः स्वतन्त्र इति चोक्तमधस्तात् । (३)न च कारणसमवायादनन्या कार्यस्योत्पत्तिरिति शक्यं वक्तुम्, एवं हि सति समवायस्य नित्यत्वाभ्युपगमात्कारणवैयर्थ्यप्रसङ्गः । (४)उत्पत्तौ च समवायस्य सैव कार्यस्यास्तु किं समवायेन । सिद्धयोस्तु सम्बन्धे युतसिद्धिप्रसङ्गः । न चान्याऽयुतसिद्धिः सम्भवतीत्येतदुक्तम्, ततश्च यदुक्तं वैशेषिकैर्'युतसिद्ध्यभावात्कार्यकारणयोः संयोगविभागौ न विद्येते' इतीदं दुरुक्तं स्यात्, युतसिद्ध्यभावस्यैवाभावात् । एतेना'प्राप्तिसंयोगौ युतसिद्धिरि'त्यपि लक्षणमनुपपन्नम् । मा भूदप्राप्तिः कार्यकारणयोः प्राप्तिस्त्वनयोः संयोग एव कस्मान्न भवति, तत्रास्या असंयोगत्वायाऽन्या युतसिद्धिर्वक्तव्या । तथा च सैवोच्यतां किमनया (५)परस्पराश्रयदोषग्रस्तया । न चान्या सम्भवती-

---

(१) ननु समवायो न तादात्म्यप्रत्ययापपादकः किन्तु सामानाधिकरण्यप्रत्ययायैवत्याशङ्क्याह न चेति ।

(२) नचेति । शुक्लत्वमित्यादित्वतलादेर्निष्कृष्टगुणाभिधायकत्वेन शुक्लशब्दस्य द्रव्यनिलीनगुणवाचित्वेन द्रव्ये लाक्षणिकत्वात्सामानाधिकरण्यमत कथं द्रव्यगुणयोरभेदप्रतिभानमित्यभिप्रायः शङ्क्याह बोध्य । नहीतीत्युत्तरार्थस्तु शाब्दो हि व्यवहारो लक्षणिको न प्रत्यक्षप्रत्यय इति स्फुट एव ।

(३) ननु सम्बन्धिन्यसति समवायो न भवतीति विप्रतिषिद्धमेतत्, उत्पत्तिर्हि समवाय, उत्पन्नि श्चासत्येव कार्य भवति अन्यथा तद्वैयर्थ्यादित आह न चेति ।

(४) नित्यसमवायस्योत्पत्तित्वे कार्योत्पत्त्यर्थं कारणवैयर्थ्यं चेत्तर्ह्यनित्योस्तु, तत्राह उत्पत्तौ चेत । अथ समवायादन्या कार्यस्योत्पत्तिरुत्पन्नस्य च समवायस्तत्राह सिद्धयोस्त्विति ।

(५) प्राप्ति कार्यकारणसम्बन्धस्यासंयोगत्वासद्धौ [illegible] सिद्धिस्तत्सिद्धौ च तल्लक्षितयुतसिद्धिराहित्येन कार्यकारणसम्बन्धस्यासंयोगत्वासिद्धिरिति परस्पराश्रयदोषोऽत्र बोध्यः ।

त्युक्तम् । (१)यद्युच्येताप्राप्तिपूर्विका प्राप्तिरन्यतरकर्मजोभयकर्मजा वा संयोगोः, यथा स्थाणुश्येनयोर्मल्लयोर्वा, न च तन्तुपटयोः सम्बन्धस्तथा, उत्पन्नमात्रस्यैव पटस्य तन्तुसम्बन्धात्, तस्मात्समवाय एवायमित्यत आह--"यथा चोत्पन्नमात्रस्ये"ति । (२)संयोगजेऽपे हि संयोगो भवद्भिरभ्युपेयते न क्रियाज एवेत्यर्थः । न चाप्राप्तिपूर्विकैव प्राप्तिः संयोगः, आत्माकाशसंयोगे नित्ये तदभावात् । कार्यस्य चोत्पन्नमात्रस्यैकस्मिन् क्षणे कारणप्राप्तिविरहाच्चेति(३) । अपि च सम्बन्धिरूपातिरिक्ते सम्बन्धे सिद्धे तदवान्तरभेदाय लक्षणभेदोऽनुश्रीयेत स एव तु सम्बन्ध्यतिरिक्तोऽसिद्धः, उक्तं हि 'परस्तादतिरिक्तः सम्बन्धिभ्यां सम्बन्धोऽसम्बद्धो न सम्बन्धिनौ घटयितुमीष्टे, सम्बन्धिसम्बन्धे चानवस्थितिः, तस्मादुपपत्त्यनुभवाभ्यां न कार्यस्य कारणादन्यत्वमपि तु कारणस्यैवायमानिर्वाच्यः परिणामभेद इति । तस्मात्कार्यस्य कारणादनतिरेकात्किं केन सम्बद्धम्, संयोगस्य च संयोगिभ्यामनतिरेकात् कस्तयोः संयोग इत्याह-"नापि संयोगस्ये"ति । विचारासहत्वेनानिर्वाच्यनाम्ना(४) परिभावयन्नाशङ्कते--"सम्बन्धिशब्दप्रत्ययव्यतिरेकेणे"ति । निराकरोति--(५)"नैकत्वेऽपि स्वरूपबाह्यरूपापेक्षये"ति । तत्तदनिर्वचनीयानेकविशेषावस्थाभेदापेक्षयैकस्मिन्नपि नानाबुद्धिव्यपदेशोपपत्तिरिति । यथैको देवदत्तः स्वगतावशेषापेक्षया मनुष्यो ब्राह्मणोऽवदातः, स्वगतावस्थाभेदापेक्षया बालो युवा स्थविरः, स्वक्रियभेदापेक्षया श्रोत्रियः, परापेक्षया तु पिता पुत्रः पौत्रो भ्राता जामातेति । निदर्शनान्तरमाह--"यथा चैकापि सती रेखे"ति (पृ० ५३२ पं० २)। दार्ष्टान्तिके योजयति--"तथा सम्बन्धिनो"रिति । अङ्गुल्योर्नैरन्तर्यं संयोगो, दधिकुण्डयोरौत्तराधर्यं संयोगः । कार्यकारणयोस्तु तादात्म्येऽप्यनिर्वाच्यस्य कार्यस्य भेदं विवक्षित्वा संबन्धिनोरित्युक्तम् । "नापि सम्बन्धिविषयत्वे सम्बन्धशब्दप्रत्ययो"रित्येतदप्यनिर्वाच्यभेदाभिप्रायम् । अपि चादृष्टवत्क्षेत्रज्ञसंयोगात्परमाणुमनसोराद्यं कर्म भवद्भिरिष्यते । "अग्नेरूर्ध्वज्वलनं, वायोस्तिर्यक्पवनमणुमनसोराद्यं कर्मेत्यदृष्टकारितानी"ति (अ० ५ आ० सू० १३) वचनात् । न चाणुमनसोरात्मनाऽप्रदेशेन संयोगः सम्भवति, संभवे चाणुमनसोरात्मव्यापित्वात् प-

---

(१) अप्राप्तिपूर्विका प्राप्तिरन्यतरकर्मजोभयकर्मजा वा प्राप्तिरिति लक्षणस्य संयोगस्य कार्यकारणसम्बन्धे न सम्भवतीति नान्योन्याश्रयो दोष इत्यभिप्रायकं नैयायिकमतमाह यद्युच्येतेति ।

(२) तन्तुभ्य पटे उत्पन्ने तत्क्षण एव तन्त्वाकाशसंयोगजन्य. पटाकाशसंयोग इष्यते नैयायिकैस्स च न कर्मजस्ततः प्राक् पटसत्ताक्षणे पटे कर्माभावादतो यथोक्तलक्षणं तत्राव्याप्तं स्यादित्याशयेनाह संयोगजोऽपीति । तर्ह्यप्राप्तिपूर्विका प्राप्तिरित्येतावदेव लक्षणमस्तु तथाच नान्याप्ति., नाप्यन्योन्याश्रयः संयोगपदानुपादानादिति तत्राह नचेति ।

(३) अननोक्तलक्षणस्याव्याप्तिः सूचिता-अस्माति प्राप्तिरि प्राप्त्यनुपपत्तेः कार्यसत्तोत्तरक्षणे प्राप्तिरे-क्षणमात्रमप्राप्ते. सत्त्वात् ।

(४) संयोगस्य । अत्र संयोगः सम्बन्धिभिन्न. तल्लिङ्गलक्षणशब्दधीगम्यत्वाद्घटस्तम्भवदिति पूर्वपक्षिमतेनानुमानप्रयोगो द्रष्टव्य. ।

(५) उक्तानुमानेन कल्पि भेदसाधने सिद्धसाधनम्, वस्तुभेदसाधने तु व्यभिचार इत्याशयेन समाधत्ते नैकत्वेपीति । स्वरूपेणैव मनुष्यादिशब्दभागेव पुत्राद्यपेक्षया पितेत्यादिविलक्षणशब्दधीगम्यो भवति न च भिद्यत इति व्यभिचार इति भाव. ।

रममहत्त्वेनानणुत्वप्रसङ्गात् । न च प्रदेशवृत्तिरनयोरात्मना संयोगोऽप्रदेशत्वादात्मनः, कल्पनायाश्च वस्तुतत्त्वव्यवस्थापनासहत्वादतिप्रसङ्गादित्याह—"तथाऽप्यात्ममनसो"-मिति । किंचान्यद् द्वाभ्यामणुभ्यां कारणाभ्यां सावयवस्य कार्यस्य द्व्यणुकस्याकाशेनेव संश्लेषानुपपत्तिः । संश्लेषः (१)सङ्ग्रहो यत एकसम्बन्ध्याकर्षे सम्बन्ध्यन्तराकर्षो भवति तस्यानुपपत्तिरिति । अत एव संयोगादन्यः कार्यकारणद्रव्ययोराश्रयाश्रितभावोऽन्यथा नोपपद्यत इत्यवश्यं कल्पनीयः समवाय इति चेत् । निराकरोति—"न" कुतः ? "इतरेतराश्रयत्वात्" (पृ० ५३३ पं० ५) । तद्विभजते—"कार्यकारणयोर्ही"ति । "किंचान्यत् परमाणूना"मिति । ये हि परिच्छिन्नास्ते सावयवाः, यथा घटादयः, तथा च परमाणवस्तस्मात्सावयवा अनित्याः स्युः, अपरिच्छिन्नत्वे चाकाशादिवत्परमाणुत्वव्याघातः । शङ्कते—"यांस्त्वमि"ति । निराकरोति—"न स्थूले"ति । किं सूक्ष्मत्वात्परमाणवो न विनश्यन्त्यथ निरवयवतया, तत्र पूर्वस्मिन् कल्पे इदमुक्तम्—"वस्तुभूतापी"ति भवन्मते, उत्तरं कल्पमाशङ्क्य निराकरोति—"विनश्यन्तोऽप्यवयवविभागेने"ति (पृ० ५३४ पं० २) । "यथा हि घृतसुवर्णादीनामविभज्यमानावयवानामपी"ति । यथा हि पिष्टपिण्डोऽविनश्यदवयवसंयोग एव प्रथते प्रथमानश्चाश्वशफाकारतां नीयमानः पुरोडाशतामापद्यते, तत्र पिण्डो नश्यति पुरोडाशश्चोत्पद्यते, (२)न हि तत्र पिण्डावयवसंयोगा विनश्यन्ति, अपि तु संयुक्ता एव सन्तः परं प्रथनेन नुद्यमाना अधिकदेशव्यापका भवन्ति, एवमग्निसंयोगेन सुवर्णद्रव्यावयवाः संयुक्ता एव सन्तो द्रवीभावमापद्यन्ते, न तु मिथो विभज्यन्ते । तस्माद्यथावयवसंयोगविनाशावन्तरेणापि सुवर्णापिण्डो विनश्यति संयोगान्तरोत्पादमन्तरेण च सुवर्णे द्रव उपजायते, एवमन्तरेणाप्यवयवसंयोगविनाशं परमाणवो विनङ्क्ष्यन्त्यन्ये चोत्पत्स्यन्त इति सर्वमवदातम् ॥ १७ ॥

सू० समुदाय उभयहेतुकेपि तदप्राप्तिः ॥ १८ ॥

(३)अवान्तरसङ्गतिमाह—"वैशेषिकराद्धान्त" इति (पृ० ५३५ पं० ५) । वैशेषिकाः खल्वर्धवैनाशिका(४)स्ते हि परमाण्वाकाशदिक्कालात्ममनसां च सामान्यविशेषसमवायानां च गुणानां च केषांचिन्नित्यत्वमभ्युपेत्य शेषाणां निरन्वयविनाशमुपयन्ति, तेन तैऽर्धवैनाशिकास्तेन तदुपन्यासो वैनाशिकत्वसाम्येन सर्ववैनाशिकान् स्मारयतीति तदनन्तरं वैनाशिकमतनिराकरणमिति । अर्धवैनाशिकानां स्थिरभाववादिनां समुदायारम्भ उपपद्येतापि

---

(१) ननु निरवयवसावयवयोः समवायसम्भवात्कथं संश्लेषानुपपत्तिरत आह सङ्ग्रह इति । एकाकर्षणे इतराकर्षणं हि सावयवानामङ्कुरतरुशाखादीनां दृश्यत इत्यर्थः ।

(२) नहीति । यथा संवेष्टनेन पिण्डीकृते पटे प्रसारणसमये तदवयवसंयोगा न नश्यन्ति किन्त्वधःस्थितसंयोगानामेव तेषामधिकदेशव्याप्त्या पिण्डावस्था नश्यति तथा पिष्टस्यापीति ।

(३) वैशेषिकनिराकरणोत्तरं वैनाशिकनिराकरणे इत्यर्थः ।

(४) परिमाणभेदेन देहादेराशुतरविनाशादर्धवैनाशिका वैशेषिका इतीदमेव वक्ष्यति निरन्वयविनाशमित्यादिना । गुणानां केषाञ्चित्—परमाणुपरिमाणादीनाम्, अभेदे हि कार्यकारणयोः कार्यनाशेऽपि कारणरूपेण तिष्ठतीति न निरन्वयनाशः इति बोध्यम् ।

क्षणिकभाववादिनां त्वसौ दूरापेत इत्युपपादयिष्यामस्तेन नतरामित्युक्तम् । तदिदं दूषणाय वैनाशिकमतमुपन्यसितुं तत्प्रकारभेदानाह—"स च बहुप्रकार" इति । वादिवैचित्र्यात् खलु कैश्चित्सर्वास्तित्वमेव सिद्धान्तं प्रतिपद्यन्ते, कैश्चिज्ज्ञानमात्रास्तित्वं, कैश्चित्सर्वशून्यताम्, अथ त्वत्रभवतां (१)सर्वज्ञानां तत्त्वप्रतिपत्तिभेदो न सम्भवति तत्त्वस्यैकरूप्यादित्येतदपरितोषेणाह—"विनेयभेदाद्वा" । हीनमध्यमोत्कृष्टधियो हि शिष्या भवन्ति । तत्र ये हीनमतयस्ते सर्वास्तित्ववादेन तदाशयानुरोधात् शून्यतायामवतार्यन्ते । ये तु मध्यमास्ते ज्ञानमात्रास्तित्वेन शून्यतायामवतार्यन्ते । ये तु प्रकृष्टमतयस्तेभ्यः साक्षादेव शून्यतातत्त्वं प्रतिपाद्यते । यथोक्तं बोधिचित्तविवरणे(२)—

(३)देशना लोकनाथानां सत्त्वाशयवशानुगाः ।
भिद्यन्ते बहुधा लोक उपायैर्बहुभिः पुनः ॥
गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणा ।
भिन्नापि देशनाऽभिन्ना शून्यताद्वयलक्षणा ॥ इति ।

यद्यपि वैभाषिकसौत्रान्तिकयोरवान्तरमतभेदो(४)स्ति, तथापि सर्वास्तितायामस्तित्वप्रतिपत्तिरित्येकीकृत्योपन्यासः, तथा च त्रित्व(५)मुपपन्नमिति । पृथिवी खरस्वभावा, आपः स्नेहस्वभावाः, अग्निरुष्णस्वभावः, वायुरीरणस्वभावः । ईरण प्रेरणम् । भूतभौतिकानुक्त्वा चित्तचैतसिकानाह—"तथारूपे"ति । रूप्यन्ते एभिरिति रूप्यन्त इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः । यद्यपि रूप्यमाणाः पृथिव्यादयो बाह्यास्तथापि कायस्थत्वाद्वा(६)इन्द्रियसम्बन्धाद्वा भवन्त्याध्यात्मिकाः । विज्ञानस्कन्धोऽहमित्याकारो रूपादिविषय इन्द्रियादिजन्यो वा दण्ड्यायमानः(७) । वेदनास्कन्धो—या प्रियाप्रियानुभयविषयदर्शे सुखदुःखतद्रहितविशेषावस्था चित्तस्य जायते स वेदनास्कन्धः । संज्ञास्कन्धः—सविकल्पप्रत्ययः संज्ञापूर्वसंयोग्यप्रतिभासो यथा डित्थः कुण्डी गौरो ब्राह्मणो गच्छतीत्येवंजातीयकः । संस्कारस्कन्धो—रागादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मौ चेति । तदेतेषां समुदायः पञ्चस्कन्धी । "तस्मिन्नुभयहेतुकेऽपी"ति । बाह्ये पृथिव्यायणुहेतुके भूतभौतिकसमुदाये रूपविज्ञानादिस्कन्धहेतुके च समुदाय आध्यात्मिकेऽभिप्रेयमाणे तदप्राप्तिस्तस्य समुदायस्यायुक्तता । कुतः ? "समुदायिनामचेतनत्वात्" । चेतनो

---

(१) सौत्रान्तिकादीनाम्, विप्रतिपत्तिर्हि पुरुषापराधाद्भवति यथा स्थाणौ, वस्तुवशाद्वा यथा क्रियायामत्र तु न प्रथम इत्युक्तं सर्वज्ञानामिति । न द्वितीय इत्यभिहितं तत्त्वस्येति ।

(२) तदाख्ये बुद्धाभिप्रायविवरणग्रन्थे ।

(३) देशनेति । बुद्धानां प्राण्यभिप्रायवशानुसारिण आगमाः शून्यताप्रतिपक्षभूतैः क्षणिकसर्वास्तित्वादिभिर्लोके श्रोतृसमुदाये पुनर्बहुधा भिद्यन्ते । भेदमाह गम्भीरेति । अगाधतादिपरीतस्थूलदृष्टीन्यस्तवस्तुरूपेण क्वचित् ग्रन्थप्रदेश उभयलक्षणा—ज्ञानमात्रास्तित्वबाह्यार्थास्तित्वलक्षणा तत्प्रतिपादनी भिन्नापि देशना शून्यतैवाद्वयाऽलक्षणाऽनक्षात्पर्यवत्त्याभिन्नेत्यर्थः ।

(४) प्रत्ययवैचित्र्यादर्थोऽनुमेय इति सौत्रान्तिकाः । प्रत्यक्ष इति वैभाषिकाः इति मतयोर्भेदो द्रष्टव्यः ।

(५) सर्वास्तित्व—विज्ञानास्तित्व—सर्वशून्यत्ववादत्रित्वम् ।

(६) कयाकारेण संहतत्वात्संहतानामिन्द्रियसम्बन्धित्वाद्वेत्यर्थः । (७) प्रत्याहापन्नः ।

हि कुलालादिः सर्वं मृद्दण्डादुपसंहृत्य समुदायात्मकं घटमारचयन् दृष्टः, नश्यति मृद्दण्डादिव्यापारेऽपि विदुषि कुलाले स्वयमचेतना मृद्दण्डादयो व्यापृत्य जातु घटमारचयन्ति, न चासति कुविन्दे तन्तुवेमादयः पटं वयन्ते(१), तस्मात्कार्योत्पादस्तदनुगुणकारणसमवधानाधीनस्तदभावे न भवति, कार्योत्पादानुगुणं च कारणसमवधानं चेतनप्रेक्षाधीनमसत्यां चेतनप्रेक्षायां न भवितुमुत्सहत इति कार्योत्पत्तिश्चेतनप्रेक्षाधीनत्वव्याप्ता व्यापकविरुद्धोपलब्ध्या चेतनाधिष्ठितेभ्यः कारणेभ्यो व्यावर्तमाना चेतनाधिष्ठितत्व एवावतिष्ठत इति प्रतिबन्धसिद्ध (२)। यद्युच्येत—अद्धा चेतनाधीनैव कार्योत्पत्तिरस्ति तु चित्तं चेतनं तद्धीन्द्रियादिविषयस्पर्शे सत्यभिज्वलत् तत्कारणचक्रं यथायथा कार्याय पर्याप्तं तथातथा प्रकाशयदचेतनानि कारणान्यधिष्ठाय कार्यमभिनिर्वर्तयती-ति, तत्राह **चित्ताभिज्वलनस्य च समुदायसिद्ध्यधीनत्वात्** (पृ० ५३६ पं०)। न खलु बाह्याभ्यन्तरसमुदायसिद्धिमन्तरेण चित्ताभिज्वलनं ततस्तु तामिच्छन् दुरुत्तरमितरेतराश्रयमाविशदिति । न च प्राग्भवीयाचित्ताभिर्दीर्घतरसमुदायं घटयति, घटनसमये तस्याश्चिरातीतत्वेन(३) सामर्थ्यविरहात्। अस्मद्व द्वान्तवदन्यस्य चेतनस्य भोक्तुः प्रशासितुर्वा स्थिरस्य सङ्घातकर्तुरनभ्युपगमात्। कारणवन्न्यासभेदं हि विद्वान् कर्ता भवति । न चान्वयव्यतिरेकावन्तरेण तद्विन्यासभेदं वेदितुमर्हति । न च स क्षणिकोऽन्वयव्यतिरेककालानवस्थायी ज्ञातुमन्वयव्यतिरेकावुत्सहते, अत उक्तं **"स्थिरस्ये"ति** । यद्युच्येत—असमवहितान्येव कारणानि कार्यं करिष्यन्ति परम्परानपेक्षाणि, कृतमत्र समवधायायत्रा चेतनेनेत्यत आह—**"निरपेक्षप्रवृत्त्यभ्युपगमे च"ति** । यद्युच्येत अस्त्यालयविज्ञानमहङ्कारास्पदं पूर्वापरानुसन्धातृ तदेव कारणानां प्रतिसन्धातृ भविष्यतीति, तत्राह—**"आशयस्यापी"ति** । यत्खल्वेकं यदि स्थिरमभ्युपेयेत ततो नामान्तरेणात्मैव । अथ क्षणिकम्, तत उक्तदोषापत्तिः(४) । (५)न च तत्संतानस्तस्यान्यत्वे नामान्तरेणात्माऽभ्युपगतोऽनन्यत्वे च विज्ञानमेव तच्च क्षणिकमेवेत्युक्तदोषापत्तिः । (६)आशेरतेऽस्मिन् कर्मानुभववासना इत्याशय आलयविज्ञानं तस्य । अपि च प्रवृत्तिः समुदायिनां व्यापारो न च क्षणिकानां व्यापारो युज्यते, व्यापारो हि व्यापारवदाश्रयस्तत्कारणकश्च लोके प्रसिद्धस्तेन व्यापारवता व्यापारात्पूर्वं व्यापारसमये च भवितव्यम्, अन्यथा कारणत्वाश्रयत्वयोरयोगात् । (७)न च समसमययोरस्ति कार्यकारणभावे

---

(१) तन्तून् सन्तन्वन्ति ।

(२) व्याप्तिसिद्धि-। अत्र यः कार्योत्पादः स तदनुकूलकारणमेलनाधीन इति व्याप्तिः, या कार्योत्पत्तिः सा चेतनाधिष्ठितकारणजन्या इति च व्याप्तिरेवं च कार्योत्पत्तिः स्वव्यापकचेतनाधिष्ठितत्वाविरुद्धाऽनधिष्ठितेभ्यः परामिमतकारणेभ्यो व्यावर्तमाना चेतनाधिष्ठितकारणवत्त्वे सिद्धान्त्यभिमतेऽवतिष्ठत इति या२ कार्योत्पत्तिः सा २ चेतनाधिष्ठितकारणेभ्य एव जायत इति व्याप्तिसिद्धिरित्यर्थः । प्रयोगश्च-विमतं चेतनाधिष्ठितमचेतनतन्तुवदिति बोध्यः । (३) स्थायिवासनाया बौद्धैरनङ्गीकारादित्यर्थः ।

(४) पूर्वापरानुसन्धातृत्वाभावादिदोषानुपपत्तिरित्यर्थः ।

(५) क्षणिकविज्ञानसन्तानरूप आत्मा न चेत्यर्थः ।

(६) आशयस्येत्यस्य व्युत्पत्तिमाह आशेरत इति ।

(७) अस्त्वेवं व्यापारलक्षणं प्रकृते किमायातमत आह न चेति ।

नापि भिन्नकालयोराधाराधेयभावः । तथा च क्षणिकत्वहानिरित्याह—"क्षणिकत्वाभ्युपगमाच्चे"ति ॥ १८ ॥

(सू०) इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥ १९ ॥

"यद्यपीति" (पृ० ५३७ पं० ४) अयमर्थः–संक्षेपतो हि (१)प्रतीत्यसमुत्पादलक्षणमुक्तं बुद्धेन 'इदं प्रत्ययफल'मिति । (२)'उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैषा धर्माणां धर्मता' । 'धर्मस्थितिता धर्मनियामकता प्रतीत्यसमुत्पादानुलोमते'ति । अथ पुनरयं प्रतीत्यसमुत्पादो द्वाभ्यां कारणाभ्यां भवति हेतूपनिबन्धतः प्रत्ययोपनिबन्धतश्च । स पुनर्द्विविधः–बाह्य आध्यात्मिकश्च । तत्र बाह्यस्य प्रतीत्य समुत्पादस्य हेतूपनिबन्धः । यदिदं बीजादङ्कुरोऽङ्कुरात्पत्रं पत्रात्काण्डं काण्डान्नालो नालात्कोशो गर्भाच्छूकः शूकात्पुष्पं पुष्पात्फलमिति । (३)असति बीजेऽङ्कुरो न भवति, यावदसति पुष्पे फलं न भवति । सति तु बीजेऽङ्कुरो भवति, यावत्पुष्पे सति फलमिति । (४)तत्र बीजस्य नैवं भवति ज्ञानमहमङ्कुरं निर्वर्तयामीति । अङ्कुरस्यापि नैवं भवति ज्ञानमहं बीजेन निर्वर्तित इति । एवं यावत्पुष्पस्य नैवं भवति, अहं फलं निर्वर्तयामीति । एवं फलस्यापि नैवं भवत्यहं पुष्पेणाभिनिर्वर्तितमिति । तस्मादसत्यपि चैतन्ये बीजादीनामसत्यपि चान्यस्मिन्नधिष्ठातरि कार्यकारणभावनियमो दृश्यते । उक्तो हेतूपनिबन्धः । प्रत्ययोपनिबन्धः प्रतीत्यसमुत्पादस्योच्यते–प्रत्ययो हेतूनां समवायः । हेतुं हेतु प्रत्ययन्ते हेत्वन्तराणीति, तेषामयमानानां(५) भावः प्रत्ययः समवाय इति यावत् । यथा षण्णां धातूनां समवायाद्बीजहेतुरङ्कुरो जायते, तत्र पृथिवीधातुर्बीजस्य सङ्ग्रहकृत्यं करोति, यतोऽङ्कुरः कठिनो भवति, अप्धातुर्बीजं स्नेहयति, तेजोधातुर्बीजं परिपाचयति, वायुधातुर्बीजमभिनिर्हरति,यतोऽङ्कुरो बीजात्निर्गच्छति, आकाशधातुर्बीजस्यानावरणकृत्यं करोति, ऋतुरपि बीजस्यपरिणामं करोति, तदेतेषामविकलानां धातूनां समवाये बीजे रोहत्यङ्कुरो जायते नान्यथा । तत्र पृथिवीधातोर्नैवं भवत्यहं बीजस्य सङ्ग्रहकृत्यं करोमीति, यावदृतोर्नैवं भवत्यहं बीजस्य परिणामं करोमीति, अङ्कुरस्यापि नैवं भवत्यहमेभिः प्रत्ययैर्निर्वर्तित इति ।

---

(१) प्रतीत्य कारणमाश्रित्य, समुत्पादः कार्योत्पादः कारणात्कार्योत्पादस्तस्य लक्षणमुक्तं बुद्धेन, तत्सूत्रमुदाहरति इदमिति । इदं कार्यं प्रत्ययस्य कारणसमुदायमात्रस्य फलं न चेतनस्य कस्याचिदिति सूत्रार्थः ।

(२) हेतूपनिबन्धस्य सङ्ग्राहकं सूत्रमुदाहरति उत्पादाद्वेति । तथागतानां बुद्धानां मते धर्माणां कार्याणां कारणानां च या धर्मता कार्यकारणभावरूपा एषा उत्पादादनुत्पादाद्वा स्थिता, धत्ते इति धर्मः कारणम्, धियत इति धर्मः कार्यम्, यस्मिन्सति यदुत्पद्यते असति च नोत्पद्यते तत्तस्य कारणं कार्यं च न चेतनः काञ्चित्सिध्यर्थं कार्यस्यापेक्षणीय इत्यर्थः । कार्यता कारणता चाह सूत्रांशेन धर्मस्थितितेति । धर्माणामन्वयव्यतिरेकावेव कार्यता कारणता न चेतनः काञ्चिदुपलभ्यत इति भावः । उक्तसूत्रद्वयं व्याचष्टे अथेति । एकैकक्षणनिबन्धनो नानाकारणनिबन्धनश्च कारणात्कार्योत्पाद इत्यर्थः ।

(३) हेतूपनिबन्धनस्योदाहरणे उत्पादाद्वेति सूत्रं योजयति असतीत्यादिना ।

(४) तत्र चैतन्यं बीजादीनां किं वा तदतिरिक्तस्य कस्याचिद्धेतोः, ज्ञानित्वं वा ? नाद्य इत्याह तत्रेत्यादिना । न द्वितीय इत्याहासत्यपीति । अङ्कुरोत्पत्तौ चेतनव्यापारानुपलंभादित्यर्थः ।

(५) अयमानानामिति । तथाच प्रत्ययोपनिबन्ध इत्यत्र प्रत्ययशब्दं इणो धातोर्भावार्थीयात्प्रत्ययान्तस्य रूपम्, एवं च समुदितत्ववाच्ययामित्यर्थः ।

तथाध्यात्मिकः प्रतीत्यसमुत्पादो द्वाभ्यां कारणाभ्यां भवति हेतूपनिबन्धतः प्रत्ययोपनिबन्धतश्च। तत्रास्य हेतूपनिबन्धो–(१)यदिदमविद्याप्रत्ययाः संस्कारा यावज्जातिप्रत्ययं जरामरणादीति। अविद्या चेन्नाभविष्यन्नैवं संस्कारा अजनिष्यन्त। एवं यावज्जातिः, जातिश्चेन्नाभविष्यन्नैवं जरामरणादय उदपरस्यन्त। तत्राविद्याया नैवं भवत्यहं संस्कारानभिनिर्वर्तयामीति। संस्काराणामपि नैवं भवति वयमविद्यया निर्वर्तिता इति। एवं यावज्जात्या अपि नैवं भवत्यहं जरामरणाद्यभिनिर्वर्तयामीति। जरामरणादीनामपि नैवं भवति वयं जात्यादिभिर्निर्वर्तिता इति। अथ च सत्स्वविद्यादिषु स्वयमचेतनेषु चेतनान्तरानधिष्ठितेष्वपि संस्कारादीनामुत्पत्तिः बीजादिष्विव सत्स्वचेतनेषु चेतनान्तरानधिष्ठितेष्वप्यङ्कुरादीनाम्। इदं प्रतीत्य प्राप्येदमुत्पद्यत इत्येतावन्मात्रस्य दृष्टत्वाच्चेतनाधिष्ठानस्यानुपलब्धेः सोयमाध्यात्मिकस्य प्रतीत्य समुत्पादस्य हेतूपनिबन्धः। अथ प्रत्ययोपनिबन्धः–पृथिव्यप्तेजोवाय्वाकाशविज्ञानधातूनां समवायाद्भवति कायः। तत्र कायस्य पृथिवी धातुः काठिन्यं निर्वर्तयति, अब्धातुः स्नेहयति कायम्, तेजोधातुः कायस्याशितपीते परिपाचयति, वायुधातुः कायस्य श्वासादि करोति, आकाशधातुः कायस्यान्तः सुषिरभावं करोति। (२)यस्तु नामरूपाङ्कुरमभिनिर्वर्तयति पञ्चविज्ञानकायसंयुक्तं सास्रवं च मनोविज्ञानं सोऽयमुच्यते विज्ञानधातुः। यदा ह्याध्यात्मिकाः पृथिव्यादिधातवो भवन्त्यविकलास्तदा सर्वेषां समवायाद्भवति कायस्योत्पत्तिः। तत्र पृथिव्यादिधातूनां नैवं भवति वयं कायस्य काठिन्यादि निर्वर्तयाम इति, कायस्यापि नैवं भवति ज्ञानमहमेभिः प्रत्ययैरभिनिर्वर्तित इति। अथ च पृथिव्यादिधातुभ्योऽचेतनेभ्यश्चेतनान्तरानधिष्ठितेभ्योऽङ्कुरस्येव कायस्योत्पत्तिः, सोऽयं प्रतीत्य समुत्पाद दृष्टत्वान्नान्यथयितव्यः। तत्रैतेष्वेव षट्सु धातुषु यैकसंज्ञा (३)पिण्डसंज्ञा नित्यसंज्ञा सुखसंज्ञा सत्त्वसंज्ञा पुरुषसंज्ञा मनुष्यसंज्ञा मातृदुहितृसंज्ञा अहङ्काराममकारसंज्ञा, सेयमविद्या संसारानर्थसम्भारस्य मूलकारणं तस्यामविद्यायां सत्यां संस्कारा रागद्वेषमोहा विषयेषु प्रवर्तन्ते। वस्तुविषया विज्ञप्तिर्विज्ञानं (४)विज्ञानाच्चत्वारो रूपिण उपादानस्कन्धास्तन्नाम तान्युपादाय रूपमभिनिर्वर्तते। (५)तदै-

---

(१) आध्यात्मिकहेतूपनिबन्धस्योदाहरणमाह यादृदमिति। अविद्यारूपा प्रत्यया भ्रान्तय इत्यर्थः, तथा संस्काराश्च वक्ष्यमाणा यावज्जातिप्रत्ययं जातिरूपं कारणं यावच्च जरामरणादि तत्सर्वमाध्यात्मिकस्य प्रतीत्यसमुत्पादस्य हेतूपनिबन्धे उदाहरणमित्यर्थः।

(२) विज्ञानधातुं व्याचष्टे यस्त्विति। नाम्नो देवदत्तादेः शुक्रादिरूपस्य चाश्रयः शरीरं नामरूपं, तस्य कललबुद्बुदादिकाक्रान्तनामरूपं सूक्ष्मावस्था स एवाङ्कुरस्तं शब्दादिविषयपञ्चविज्ञानसमयुक्तं योऽभिनिर्वर्तयति, आस्रवत्यनुशेते कर्तारमित्यास्रवः कर्म तत्सहितं समनन्तरप्रत्ययरूपं मनोविज्ञानं चाभिनिर्वर्तयति स विज्ञानधातुरालयविज्ञानमित्युच्यते इत्यर्थः।

(३) पिण्डेति। देहाकारपरिणतेषु धातुषु शिरःपाण्यादिमत्त्वेन पिण्डसंज्ञा अत एकसंज्ञा एकैकस्मिन्धातौ नित्यसंज्ञा सत्त्वसंज्ञा प्राणिसंज्ञा वृद्धिह्रासमत्त्वेत्यर्थः।

(४) आलयत्वादिविशेषानपेक्षा सामान्यतो वस्तुविषया विज्ञप्तिर्विज्ञानमित्युक्त्वा नामरूपं व्याचष्टे विज्ञानाच्चेति। अभिनिर्वर्तत इति सम्बन्धः। पृथिव्यादयश्चत्वार उपादानकारणस्कन्धा नामेत्युच्यते, तानि उपादाय कारणत्वेन विकृत्य रूपं सितादिरूपवच्छरीरमभिनिर्वर्तत इत्यर्थः।

(५) तदैक्यं तदेकत्वेत्यर्थः, कार्यकारणे एकीकृत्यैकवचनिर्देश इति यावदेतेन नामरूपयोर्द्वित्वात्कथमेकवचनमित्याशङ्का परास्ता।

कथ्यमभिसंक्षिप्य नामरूपं निरुच्यते । (१) शरीरस्यैव कललबुद्बुदाद्यवस्था, नामरूपसंमिश्रितानीन्द्रियाणि षडायतनं, नामरूपेन्द्रियाणां त्रयाणां सन्निपातः स्पर्शः, स्पर्शाद्वेदना सुखादिका, वेदनायां सत्यां कर्तव्यमेतत्सुखं पुनर्मेत्यध्यवसानं तृष्णा भवति । तत उपादानं वाक्कायचेष्टा भवति । ततो भवः, भवत्यस्माज्जन्मेति भवो धर्माधर्मौ । तद्धेतुकः स्कन्धप्रादुर्भावो जातिः जन्म । जन्महेतुका उत्तरे जरामरणादयः । जातानां स्कन्धानां परिपाको जरा । स्कन्धानां नाशो मरणम् । म्रियमाणस्य मूढस्य साभिषङ्गस्य पुत्रकलत्रादावन्तर्दाहः शोकः । तदुत्थं प्रलपनं 'हा मातः हा तात हा च मे पुत्रकलत्रादी'ति परिदेवना । पञ्चविज्ञानकार्यसंयुक्तमसाध्वनुभवनं दुःखं, मानसं च दुःखं दौर्मनस्यम् । एवंजातीयकाश्चोपाय'स्त उपक्लेशा'(२)गृह्यन्ते । तेऽमी परस्परहेतुका जन्मादिहेतुका अविद्यादयोऽविद्यादिहेतुकाश्च जन्मादयो घटीयन्त्रवदनिशमावर्तमानाः सन्तीति तदेतैरविद्यादिभिराक्षिप्तः संघात इति । तदेतद्दूषयति–"तत्र कुतः ? उत्पत्तिमात्रनिमित्तत्वा"दिति । (पृ. ४३८ पं. १) अयमभिसन्धिः—यत्खलु हेतूपनिबद्धं कार्यं तदन्यानपेक्षं हेतुमात्राधीनोत्पादत्वादुत्पद्यतां नाम, पञ्चस्कन्धसमुदायस्तु प्रत्ययोपनिबद्धो न हेतुमात्राधीनोत्पत्तिः, अपि तु नानाहेतुसमवधानजन्मा, न च चेतनमन्तरेणान्यः सन्निधापयितास्ति कारणानामित्युक्तम् (३) । बीजादङ्कुरोत्पत्तेरपि प्रत्ययोपनिबद्धाया विवादाध्यासितत्वेन पक्षनिक्षिप्तत्वात् । पक्षेण च व्यभिचारोद्भावनायामतिप्रसङ्गेन सर्वानुमानोच्छेदप्रसङ्गात् । (४)स्यादेतत् , अनपेक्षा एवान्त्यक्षणप्राप्ताः क्षित्यादयोऽङ्कुरमारभन्ते, तेषां तूपसर्पणप्रत्ययवशात् परस्परसमवधानम् , न चैकस्मादेव कारणात्कार्यसिद्धेः किमन्यैः कारणैरिति वाच्यम् । कारणचक्रानन्तरं कार्योत्पादात् सिद्धमित्येव नास्ति । न चैकोपि तत्कारणसमर्थ इत्यन्य उदासत इति युक्तम् । न हि ते प्रेक्षावन्तो येनैवमालोचयेयुरस्मासु समर्थ एकोऽपि कार्ये इति कृतं नः सान्निधिनेति । किन्तूपसर्पणप्रत्ययाधीनपरस्परसन्निधानोत्पादा नानुत्पत्तुं नाप्यसन्निधातुमीशते । तांश्च सर्वाननपेक्षान्प्रतीत्य कार्यमपि न नोत्पत्तुमर्हति । (५)न च स्वमहिम्ना सर्वे कार्यमुत्पादयन्तोऽपि नानाकार्याणामीशते, तत्रैव तेषां सामर्थ्यात् । न च कारणभेदात्कार्यभेदः

---

(१) जातेरग्रे वक्ष्यमाणत्वादत्र गर्भाभ्यन्तरदेहोक्तिरित्याह शरीरस्येवेति । षडायतनमित्याह नामरूपसंमिश्रितानीति । षड् पृथिव्यादिधातव आयतनानि यस्य कारणसमूहस्य तत्तथा ।

(२) उपक्लेशा इति । मदमानादयस्ते उपाया दुःखादीनां ते च भाष्यगतैवञ्जातीयकशब्दनिर्देश्या इत्यर्थः ।

(३) एवं च हेतूपनिबन्धे चेतनानपेक्षत्वमस्माभिरङ्गीक्रियते न प्रत्ययोपनिबन्ध इति भावः । ननु मिलितेभ्यः पृथिवीधात्वादिभ्यश्चेतनान्तरेणैवाङ्कुरोत्पत्तिरुक्ता तद्वद्देहोत्पादोऽपि किं न स्यादत आह बीजादिति । तथापीश्वरः संहन्तेत्यर्थः ।

(४) संहतानां हेतुत्वे संहन्त्रा भावितव्यमित्युक्तं वेदान्तिना तत्र सङ्घातस्याप्रयोजकत्वम्, ततश्च न संहर्तुरनुमानमित्याशयेनाशङ्कते स्यादेतादिति । अङ्कुरोत्पत्तेराद्यक्षणो बीजादीनामन्त्यक्षणस्तं प्राप्ता एव कारण न पूर्वन्तथैव दर्शनादित्यर्थः । प्रत्येकं कारणानां कार्योत्पादसामर्थ्ये किं सङ्घातेनेत्यत आह तेषामिति । अन्योन्यसमीपगमनकारणवशान्मिथः सन्निधानप्रयोजकं जायत इत्यर्थः ।

(५) यदि प्रत्येकं हेतूनां कार्यजननसामर्थ्यं तदा प्रति कारणमेकैककार्योत्पादप्रसङ्ग इत्याशङ्क्याह न चेति । तत्रैव–एकस्मिन्नेवेत्यर्थः । बीजेनाङ्कुरो जनयितव्यः मृदादिभिरपि स एव, तत्र लाघवात्तैरेक एव जन्यत इति भावः ।

सामग्र्या एकत्वात् तद्भेदस्य च कार्यनानात्वहेतुत्वात्तथा दर्शनात् । तत्र(१) । यद्यन्त्यक्षण-प्राप्ता अनपेक्षाः स्वकार्योपजनने ह्यन्तानेन क्रमेण ततः पूर्वे ततः पूर्वे सर्वे एवानपेक्षास्तत्त-स्वकार्योपजनन इति कुसूलस्थत्वाविशेषेऽपि येन बीजक्षणेन कुसूलस्थेन स्वकार्यक्षणपरम्पर-याङ्कुरोत्पत्तिसमर्थो बीजक्षणो जनयितव्यः सोऽनपेक्ष एव बीजक्षणः स्वकार्योपजनने, एवं सर्वे एव तदनन्तरानन्तरवर्तिनो बीजक्षणा अनपेक्षा इति कुसूलनिहितबीज एव स्यात् कृती कृषीबलः, कृतमस्य दुःखबहुलेन कृषिकर्मणा । (२)येन हि बीजक्षणेन स्वक्षणपरम्परया-ऽङ्कुरो जनयितव्यस्तस्यानपेक्षासौ क्षणपरम्परा कुसूल एवाङ्कुरं करिष्यतीति । तस्मात्परस्परा-पेक्षा एवान्त्या वा मध्या वा पूर्वे वा क्षणाः कार्योपजनन इति वक्तव्यम्, यथाहुः—

न किंचिदेकमेकस्मात्सामग्र्याः सर्वसम्भवः । इति ।

तथेदं समवधानं कारणानां विन्यासभेदतत्प्रयोजनाभिज्ञप्रेक्षापूर्वकं दृष्टमिति नाचेतनाद्भ-वितुमर्हति । तदिदमुक्तम् **"भवदुपपन्नः सङ्घातो यदि सङ्घातस्य किंचिन्नि-मित्तमवगम्यते"** इति । **"इतरेतरप्रत्ययत्वेपी"**ति । इतरेतरहेतुत्वेपीत्यर्थः । उ-क्तमभिसन्धिमविद्वान्(३) परिचोदयति **"नन्वविद्यादिभिरर्थादाक्षिप्यत"** इति । परिहरति—**"अत्रोच्यते, यदि तावदि"**ति । किमाक्षेप उत्पादनमाहो ज्ञापनम् । तत्र न तावत्कारणमन्यथानुपपद्यमानं कार्यमुत्पादयति, किन्तु स्वसामर्थ्येन(४), तस्माज्ज्ञा-पनं वक्तव्यम्, तथा च ज्ञापितस्यान्यदुत्पादक वक्तव्यं, तच्च स्थिरपक्षेऽपि सत्यपि च भो-क्तरि अधिष्ठातारं चेतनमन्तरेण न सम्भवति, किमङ्ग पुनः क्षणिकेषु भावेषु । भोक्तुर्भोगे-नापि कदाचिदाक्षिप्येत संघातः, स तु भोक्तापि नास्तीति दूरोत्सारितत्वं दर्शयति—**"भो-क्तृरहितेष्वि"**ति । (५)अपि च बहवः उपकार्योपकारकभावेन स्थिताः कार्यं जनयन्ति, न च क्षणिकपक्ष उपकार्योपकारकभावोऽस्ति, (६)भावस्योपकारानास्पदत्वात्, क्षणस्याभे-द्यत्वादनुपकृतोपकृतत्वासम्भवात्, कालभेदेन वा तदुपपत्तौ क्षणिकत्वव्याघातात्तदिदमाह— **"आश्रयाश्रयिशून्येषु चे"**ति । **"अथायमभिप्रायः"** इति । यदा हि प्रत्ययोप-निबन्धनः प्रतीत्यसमुत्पादो भवेत्तदा चेतनोऽधिष्ठाताऽपेक्षेतापि, न तु प्रत्ययोपनिबन्धनो ऽपि तु हेतूपनिबन्धनः, तथा च कृतमधिष्ठात्रा, हेतुः स्वभावत एव कार्यसंघातं करिष्यति केवल इति भावः । (७)अस्तु तावद्यथा केवलाद्धेतोः कार्यं नोपजायत इति, अन्योन्याश्रयप्र

---

(१) उक्तं सङ्घातप्रयोजकत्वं दूषयति तत्रेति ।

(२) नन्वनन्तरक्षणपरम्परा बहिरेव भवतु कुतः कुसूल एवाङ्कुरमिहिस्तत्राह येनेति । अनपेक्षस्य देशभेदेऽप्यपेक्षाविरहसाम्यादित्यर्थः ।

(३) नासंहतस्य सामग्रीत्वं सहन्तां च न तवेत्युक्तमभिसन्धिमजानन्निित्यर्थः ।

(४) सामर्थ्यं चाविद्यमानस्य नास्तीत्यर्थः ।

(५) न केवलं सङ्घातानुपपत्तिः किन्तु सहतानां य इतरेतरमुपकारः सोऽपि नेत्याह अपि चेति ।

(६) भावस्याभ्यकृतोपकारस्य च किमेकक्षणवर्तित्वमुत जाते भावे उत्तरक्षणे उपकारः ? नाद्य इत्या भावस्येति । बौद्धमते क्षणस्याभेद्यत्वाद्वस्तुन उपकृतत्वानुपकृतत्वे न सम्भवतोऽतो भावस्योपकारानास्पदत्व मित्यर्थः । द्वितीयं प्रत्याह कालभेदेन वेति । नोपकार्योपकारकभाव इत्यन्वयः ।

(७) उक्तमभिसंधिमाविद्वानित्युक्तं विशदयति अस्तु तावदिति ।

प्रसङ्गोऽस्मिन्पक्ष इत्याशयवानाह "कथन्तमेवे"ति । सम्प्रति प्रत्ययोपनिबन्धनं प्रतीत्यसमुत्पादमास्थाय चोदयति "अथ मन्यसे सङ्घाता एवे"ति । अस्थिरा अपि हि भावाः सदा संहता एवोदयन्ते व्ययन्ते च, न पुनरितस्ततोऽवस्थिताः केनचित्पुञ्जीक्रियन्ते तथा च कृतमत्र संहन्त्रा चेतनेनेति भावः । "अनादा"विति परस्पराश्रयमिवर्तयति । तदेतद्विकल्प्य दूषयति "तदापि सङ्घातादि"ति । (१)स खलु संघातसन्ततिवर्ती धर्माधर्मद्वयः संस्कारसन्तानो यथायथं सुखदुःखे जनयन्नागन्तुकं कञ्चनानासाद्य स्वत एव जनयेद् आसाद्य वा ? अनासाद्य जनने सदैव सुखदुःखे जनयेत् , समर्थस्यानपेक्षस्य क्षेपायोगात् , आसाद्य जनने तदासादनकारणं प्रेक्षावानभ्युपेयः, तथा च न प्रत्ययोपनिबन्धनः प्रतीत्यसमुत्पादः, तस्मादनेनागन्तुकानपेक्षस्य संघातसन्तानस्यैव सदृशजनने विसदृशजनने वा स्वभाव आस्थेयः । तथा च भाष्योक्तं दूषणमिति । "अपि च यद्भोगार्थः सङ्घातः स्यादि"ति । (पृ. ५३९ पं. १) । (२)अप्राप्तभोगो हि भोगार्थी भोगमाप्तुकामस्तत्साधने प्रवर्तते इति प्रत्यात्मसिद्धम् । सेयं प्रवृत्तिर्भोगादन्यस्मिन् स्थिरे भोक्तरि भोगतत्साधनसमवयव्यापिनि कल्पते नास्थिरे न च भोगादनन्यस्मिन् । न हि भोगो भोगाय कल्पते नाप्यन्यो भोगायान्यस्य । एवं मोक्षेपि द्रष्टव्यम् । तत्र बुभुक्षुमुमुक्षु चेत् स्थिरावास्थीयेयातां न तदाऽभ्युपेतहानमस्थैर्यं वाऽप्रवृत्तिप्रसङ्ग इत्यर्थः । "न तु संघातः सिद्धयेद् भोक्तृभावादि"ति । (३)भोक्तृभावेन प्रवृत्त्यनुपपत्तेः कर्तृभावः, ततः कर्माभावात् संघातसिद्धिरित्यर्थः ॥ १९ ॥

सू० उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥

पूर्वसूत्रेण सङ्गतिमस्याह-"उक्तमेतादि"ति । हेतूपनिबन्धनं प्रतीत्यसमुत्पादमभ्युपेत्य प्रत्ययोपनिबन्धनः प्रतीत्यसमुत्पादो दूषितः, सम्प्रति हेतूपनिबन्धनमपि तं दूषयतीत्यर्थः । दूषणमाह—"इदमिदानीमि"ति । "निरुध्यमानस्ये"ति । (४)न तावद्वैशेषिकवन्निरोधकारणसान्निध्यं निरुध्यमानता स्वीक्रियते वैनाशिकैरकारणं विनाशमभ्युपगच्छद्भिः, तस्यानिष्टत्वात् , (५)तस्माद्विनाशग्रस्तत्वमचिरनिरुद्धत्वं निरुध्यमानत्वं वक्तव्यम्, निरुद्धत्वं च चिरनिरुद्धत्वं विवक्षितम्, तथा चोभयोरप्यभावग्रस्तत्वाद्धेतुत्वानुपपत्तिः । शङ्कते—"अथ भावभूत"इति । कारणस्य हि कार्योत्पादात्प्राक्कालसत्तार्थवती न कार्यकाला, तदा कार्यस्य सिद्धत्वेन तत्सिद्ध्यर्थायाः सत्ताया अनुपयोगादिति भावः । तदेतल्लोकदृष्ट्या दूषयति—"भावभूतस्ये"ति । भूत्वा व्यापृत्य भावाः प्रायेण हि कार्यं कुर्वन्तो

---

(१) अदृष्टात्सङ्घातोत्पत्तिव्यवस्थासिद्धमाभ्योक्तदूषणानुपपत्तिमाशङ्क्याह स खल्वित्यादि ।

(२) भोक्तुर्भोगादन्यत्वे हेतुमाह अप्राप्तभोगो हीति । भोक्तुः स्थिरतायां हेतुर्भोगार्थ इति । अर्थिन्शब्दो भोगदशायां चानुवृत्तेः स्थैर्यमित्यर्थः । अस्यैव विवरणं-भोगमाप्तुकाम इति ।

(३) ननु सङ्घातासिद्धौ कर्मभावो वाच्यो न भोक्तृभावः कर्तुर्हि हेतुता, तत्राह भोक्तृभावेनेति ।

(४) ननु निरुद्धस्यास्त्वभावग्रस्तता निरुध्यमानस्य कथमत आह न तावदिति । यथाऽऽरम्भकतन्त्वादिसंयोगस्य विनाशक्षणे वियमानस्यैव पटादेर्विनश्यदवस्थत्वं वैशेषिकैरङ्गीकृतं न तथा वैनाशिकैरित्यर्थः ।

(५) नन्वुभयोर्विनाशग्रस्तत्वे को भेदस्तत्राह तस्मादिति । यद्विनाशग्रस्तत्वं तदाचिरनिरुद्धत्वरूपं सद्निरुध्यमानत्वं वक्तव्यं तदेव चिरनिरुद्धत्वरूपं सद् विवक्षितमित्यर्थः ।

लोके दृश्यन्ते, तथा च स्थिरत्वम्, इतरथा तु लोकविरोध इति । पुनः शङ्कते—"अथ भाव एवे"ति । यथाहुः–'(१)भूतिर्येषां क्रिया सैव, कारकं सैव चोच्यते' इति । भवत्येवं व्यापारवत्ता तथापि क्षणिकस्य न कारणत्वमित्याह—"तथापि नैवोपपद्यते" (पृ० ५४० पं० १) क्षणिकस्य कारणभावः । मृत्सुवर्णकारणा हि घटादयश्च रुचकादयश्च मृत्सुवर्णात्मानोऽनुभूयन्ते । यदि च न कार्यसमये कारणं सत्कथं तेषां तदात्मनानुभवः । न च कारणसादृश्यं कार्यस्य न तु तादात्म्यमिति वाच्यम् । असति कस्यचिद्रूपस्यानुगमे सादृश्यस्याप्यनुपपत्तेः, अनुगमे वा तदेव कारणं, तथा च तस्य कार्यतादात्म्यमिति सिद्धमक्षणिकत्वमित्यर्थः । (२)सर्वथा वैलक्षण्ये तु हेतुफलभावस्तन्तुघटादावपि प्राप्त इत्यतिप्रसङ्ग इत्याह—"विनैव वे"ति । (३)न च तद्भावभावो नियामकस्तस्यैकस्मिन् क्षणेऽशक्यग्रहत्वात् (४)सामान्यस्य चाकारणत्वात्, कारणत्वे वा क्षणिकत्वहानेरस्मत्पक्षपातप्रसङ्गाच्चेति भावः । अपि चोत्पादनिरोधयोर्विकल्पत्रयेऽपि वस्तुनः शाश्वतत्वप्रसङ्ग इत्याह—"अपि चोत्पादनिरोधौ नामे"ति । पर्यायत्वापादनेऽपि नित्यत्वापादनं मन्तव्यम्। वस्तूत्पादनिरोधाभ्यामसंसृष्टमिति वस्तुनः शाश्वतत्वप्रसङ्गः । संसर्गेऽप्यसता संसर्गानुपपत्तेः सत्त्वाभ्युपगमे शाश्वतत्वमित्यपि द्रष्टव्यम् । शेषं निगदव्याख्यातम् ॥ २० ॥

सू० असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २१ ॥

(५)नीलाभासस्य हि चित्तस्य नीलादालम्बनप्रत्यया[१]न्नीलाकारता, समनन्तरप्रत्ययात्[२]पूर्वविज्ञानाद् बोधरूपता चक्षुषोधिपतिप्रत्यया[३]द्रूपग्रहणप्रतिनियमः, आलोकात्सहकारिप्रत्यया[४]द्धेतोः स्पष्टार्थता । (६)एवं सुखादीनामपि चैत्तानां चित्ताभिन्नहेतुजानां चत्वार्येतान्येव कारणानि । सेयं प्रतिज्ञा चतुर्विधान् हेतून् प्रतीत्य चित्तचैत्ता उत्पद्यन्त इत्यभावकारणत्व उपरुध्येत—"अथोत्तरक्षणोत्पत्ति यावदवातिष्ठत"इति । (७)उत्पत्तिरुत्पद्यमानाद्भावादभिन्ना, तथा च क्षणिकत्वहानिरिति प्रतिज्ञाहानिः ॥ २१ ॥

---

(१) या भूतिरुत्पत्तिर्येषां पदार्थानां सैव क्रिया कारकमिति चोच्यत इत्यर्थः ।

(२)ननु सादृश्यसिद्धौ तद्बलादनुगतरूपसिद्धिस्तदेव नास्ति असत्यपि सादृश्ये तद्भावादत आह सर्वथेति ।

(३) ननु वैसादृश्येपि तन्तुभावे पटभावादुपादानोपादेयभाव इत्याशङ्क्याह नचेति । एकस्मिन्वस्तुक्षणे तद्भावभावस्याशक्यग्रहत्वाद्वासभादावपि प्रसङ्गादित्यर्थः ।

(४) यदि च जात्युपाधौ कारणत्वं तर्हि जातिरेव कारणम् व्यक्तयस्तदवस्थाः स्युर्न्याय्याः अन्यकारणत्वस्याप्यन्याय्योगादिदं च वैनाशिकैर्नेष्टव्यमित्याह सामान्यस्य चेति ।

(५) प्रतिज्ञोपरोधं व्याख्यातुं चतुर्विधा भाष्योक्ता बौद्धीया नित्यादिप्रतिज्ञा दर्शयति नीलाभासस्येति । अयं भावः–विषयकारणसहकारिसंस्काराश्चतुर्विधा हेतवस्तान्प्रतीत्य प्राप्य चित्तं रूपादिविज्ञानं चैत्ताश्चित्तात्मकाः सुखादयश्च जायन्ते, यथा नीलविज्ञानस्य नीलं वस्तु आलम्बनप्रत्ययो विषयः, चक्षुः कारणमधिपतिप्रत्ययः, सहकारिप्रत्यय आलोकः, समनन्तरपूर्वप्रत्ययः संस्कार इति भेदः इति ।

(६) एवं चित्तानां ज्ञानानां चतुर्भ्य उत्पत्तिमुक्त्वा चैत्तानामपि दर्शयति एवमिति ।

(७) ननूत्तरक्षणोत्पत्तिकाले पूर्वक्षणस्थितावपि न स्थायित्वं सिध्यति एकक्षणेप्युभयसम्भवादुत्तरक्षणस्तु द्वितीयक्षणे भवित्येत्याशङ्क्याहोत्पत्तिरिति । भूतितत्कर्त्रोरभेदोपगमादुत्तरभावक्षणतदुत्पत्ती अभिन्ने तथा पूर्वक्षणस्योत्तरक्षणे यावदवस्थितौ स्थायित्वमित्यर्थः ।

सू० प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥२२॥

(१)भावप्रतीपा संख्या बुद्धिः प्रतिसंख्या, तया निरोधः प्रतिसंख्यानिरोधः। सन्तमिमम सन्तं करोमीत्येवमाकारता च बुद्धेर्भावप्रतीपत्वम्। (२)एतेनाप्रतिसंख्यानिरोधोऽपि व्याख्यातः। सन्तानगोचरो वा निरोधः, सन्तानिक्षणगोचरो वा ? न तावत्संतानस्य निरोधः सम्भवति । हेतुफलभावेन हि व्यवस्थिताः संतानिन एवोदयव्ययधर्माणः सन्तानः । तत्र योऽसावन्त्यः सन्तानी यन्निरोधात् सन्तानोच्छेदेन भवितव्यम् स किं फलं किञ्चिदारभते न वा ? आरभते चेत्, नान्त्यः, तथा च न सन्तानोच्छेदः । अनारम्भे तु भवेदन्त्यः सः, किन्तु स्वादसन् अर्थक्रियाकारितायाः सत्तालक्षणस्य विरहात् । तदसत्त्वे तज्जनकमप्यसत् जनकत्वेनासदित्यनेन क्रमेणासन्तः सर्व एव सन्तानिन इति तत्संतानो नितरामसन्निति कस्य प्रतिसंख्यया निरोधः । (३)न च समानानां सन्तानिनां हेतुफलभावः सन्तानस्तस्य विसभागोत्पादो निरोधः, विसभागोत्पादक एव च क्षणः सन्तानस्यान्त्यः । (४)तथासति रूपविज्ञानप्रवाहे रसादिविज्ञानोत्पत्तौ सन्तानोच्छेदप्रसङ्गः । कथंचित्सारूप्ये वा विसभागेप्यन्ततः सत्तया तदस्तीति न सन्तानोच्छेदः । तदनेनाभिसन्धिनाह—**"सर्वेष्वपि सन्तानेषु सन्तानिनामविच्छिन्नेन हेतुफलभावेन सन्तानविच्छेदस्यासम्भवादि"ति** (पृ० ५४१ पं० १४) । नापि भावगोचरौ सम्भवतः प्रतिसंख्याप्रतिसंख्यानिरोधौ । अत्र तावदुत्पन्नमात्रापवृक्तस्य भावस्य न प्रतिसंख्यानिरोधः सम्भवति तस्य पुरुषप्रयत्नापेक्षाभावादित्यस्त्येव दूषणं तथापि दोषान्तरमुभयस्मिन्नपि निरोधे ब्रूते—**"नहि भावाना"मिति** (पृ० ५४२ पं० १) । यतो निरन्वयो विनाशो न संभवत्यतो निरुपाख्योऽपि न सम्भवति, तेनैवान्वयिना रूपेण भावस्य नष्टस्याप्युपाख्येयत्वात् । निरन्वयविनाशाभावे हेतुमाह—**"सर्वास्वप्यवस्थास्वि"ति** । (५)यद्यदन्वयिरूपं तत्तत्परमार्थसद्भावः, अवस्थास्तु विशेषाख्या उपजनापायधर्माणस्तासां सर्वासामनिर्वचनीयतया स्वतो न परमार्थसत्त्वमन्वय्येव तु रूपं तासां तत्त्वं तस्य च सर्वत्र प्रत्यभिज्ञायमानत्वान्न विनाश इत्यवस्थावतोऽविनाशान्नावस्थानां निरन्वयो विनाश इति , तासां तत्त्वस्यान्वयिनः सर्वत्राविच्छेदात् ।

---

(१) प्रतिसंख्येति सूत्रे प्रतिशब्दः प्रातिकूल्यार्थ , संख्याशब्दश्च बुद्धिवचन इत्याशयेनाह भावेति । प्रतीपा—विरोधिनी ।

(२) एतेनेति । तद्विपरीतोऽबुद्धिपूर्वकनिरोधोऽप्रतिसंख्यानिरोध इत्यर्थः ।

(३) नन्वन्त्यसन्तानिनो न फलानारम्भकत्वं यतोऽसत्त्वापत्तिः, न च फलारम्भे सन्तानानुच्छेदः, न हि हेतुफलभावमात्रं सन्तानः, किन्तु सजातीयानां हेतुफलभावस्तच्च विशुद्धविजातीयक्षणोत्पत्तावपि सजातीयहेतुफलभावरूपसन्तानो निवर्तत इत्याशङ्क्याह नचेति ।

(४) हेतुमाह तथासतीति । सादृश्यं हि सन्तानिनां तुल्यजातीयविषयत्वेन, विषयाणां च तुल्यजातीयत्वं किमपरजात्या उत परजात्या ? नाद्यः, चैत्रसन्तानेऽनुवर्तमाने एव रूपज्ञानसन्तानविरमे रसज्ञानोदये सन्तानोच्छेदप्रसङ्गादित्युक्त्वा द्वितीयं दूषयति कथञ्चिदिति । सत्तया जात्या तत्सारूप्यमस्तीति सोपप्लवसन्तानोपरमे सति सति विशुद्धसन्तानोदयेऽपि न सन्तानोच्छेदः स्यादित्यर्थः ।

(५) ननु यस्य घटादेर्विनाशः स नान्वयी यस्य तु सामान्यस्यान्वयस्तन्न नश्यति तत्कथं सान्वयत्वं नाशस्येत्यत आह यद्यदिति ।

स्यादेतत्, मृत्पिण्डमृद्घटमृत्कपालादिषु सर्वत्र मृत्तत्त्वप्रत्यभिज्ञानाद्भवत्वेवम्, तप्तोपलतलपतितनष्टस्य तूदबिन्दोः किमस्ति रूपमन्वयि प्रत्यभिज्ञायमानं येनास्य न निरन्वयो नाशः स्यादित्यत आह—"अरूपष्टप्रत्यभिज्ञानात्स्वपी"ति अत्रापि तत्तोयं तेजसा मार्तण्डमण्डलमम्बुदत्वाय नयित इत्यनुमेयं मृदादीनामन्वयिनामविच्छेददर्शनात् (१)शक्यं त्वत्र वक्तुम्—

उदबिन्दौ च सिन्धौ च तोयभावो न भिद्यते ।
विनष्टेपि ततो बिन्दावस्ति तस्यान्वयोऽम्बुधौ ॥

तस्मान्न कश्चिदपि निरन्वयो नाश इति सिद्धम् ॥ २२ ॥

सू० उभयथा च दोषात् ॥ २३ ॥

परिकरः—सामग्री सम्यग्ज्ञानस्य यमनियमादिः, श्रवणमननादिश्च । **मार्गः**-क्षणिकनैरात्म्यादिभावनाः(२) । अतिरोहितमन्यत् ॥ २३ ॥

सू० आकाशे चाविशेषात् ॥ २४ ॥

एतद्व्याचष्टे "यच्च तेषामि"ति । वेदप्रामाण्ये विप्रतिपन्नानपि प्रति शब्दगुणानुमेयत्वमाकाशस्य वक्तव्यम् । (३)तथाहि जातिमत्त्वेन सामान्यविशेषसमवायेभ्यो विभक्तस्य शब्दस्यास्पर्शत्वे सति बाह्येकेन्द्रियग्राह्यत्वेन गन्धादिवद्गुणत्वमनुमितम् । न चायमात्मगुणो बाह्येन्द्रियगोचरत्वात् । अत एव न मनोगुणः, तद्गुणानामप्रत्यक्षत्वात् । न पृथिव्यादिगुणः, तद्गुणगन्धादिसाहचर्यानुपलब्धेः । तस्माद्गुणो भूत्वा गन्धादिव दसाधारणेन्द्रियग्राह्यो यद्द्रव्यमनुमापयति तदाकाशं पञ्चमं भूतं वस्त्विति । "अपि चावरणाभावमाकाशमिच्छत" इति (पृ० ५४३ प० ३) । निषेध्यानिषेधाधिकरणनिरूपणाधीननिरूपणो निषेधो नासत्यधिकरणनिरूपणे शक्यो निरूपयितुम् । तच्चावरणाभावाधिकरणमाकाशं वस्त्विति । अतिरोहितार्थमन्यत् ॥ २४ ॥

सू० अनुस्मृतेश्च ॥ २५ ॥

विभजते "अपि च वैनाशिकः सर्वस्य वस्तुन" इति । यस्तु सत्य(४)प्येतस्मिन्नुपलब्धृस्मर्त्रोरन्यत्वेऽपि समानायां संततौ कार्यकारणभावात् स्मृतिरुपपत्स्यत इति

---

(१) तप्तशिलातलपतितस्योदबिन्दोर्दृश्यमानान्वयिरूपाभावं स्वीकृत्यानुमानादन्वयं प्रदर्शयति इदानीं प्रत्यक्षतोऽनुवृत्तिमाह शक्यं त्विति । उदेति । उदबिन्दावुपलतलपतिते सिन्धौ समुद्रे च तोयभावस्तोयत्वसामान्यं न भिद्यते, तस्मादुदबिन्दौ विनष्टेऽपि च तस्य बिन्दोः सामान्यरूपेणाम्बुधावस्त्यन्वय इति श्लोकार्थः ।

(२) मोक्षप्राप्तिकारणत्वाद्भावनाया मार्गत्वमित्यर्थः ।

(३) परिशेषतः शब्दस्याकाशाश्रयत्वं साधयन्नाह तथाहीति । तस्य हि न तावद्द्रव्यादिभ्योऽन्यत्वप्रसक्तिरिति प्रदर्शयितुं सामान्यादिषयेऽनन्तर्भावमाह जातिमत्त्वेनेति । गुणत्वेन तस्याकाशाश्रयत्वासिद्धं द्रव्यकर्मणोरनन्तर्भावमाहास्पर्शेति । अत्र शब्दो गुणः जातिमत्त्वे सति बाह्येकेन्द्रियग्राह्यत्वाद्गन्धवादित्यनुमानप्रयोगो बोध्यः ।

(४) अनुस्मरणे । अन्यत्वेऽपीत्यस्य उपपत्स्यत इत्यन्वयः । एतन्मते च क्रियातिरिक्तकर्तृभावादुपलब्धिस्मृती एवोपलब्धृस्मर्तारौ तयोर्भेदेऽप्येकसन्ततिगतत्वेन कार्यकारणभावान्नातिप्रसङ्ग इति बोध्यम् ।

मन्यमानो न परितुष्यति तं प्रति प्रत्यभिज्ञा समाज्ञातप्रत्यक्षाविरोधमाह—"अपि च दर्शनस्मरणयोः कर्तरी"ति (पृ० ५४४ पं० १)। ततोऽहमद्राक्षीदिति प्रतीयाद्, अहं स्मराम्यन्यस्त्वद्राक्षीदित्यर्थः। प्रत्यभिज्ञाप्रत्यक्षविरोधप्रपञ्चस्तूत्तरः—"आ जन्मन" "आ मोक्षमादुच्छ्वासाद्" आमरणादित्यर्थः। न च सादृश्यनिबन्धनं प्रत्यभिज्ञानं, पूर्वापरक्षणदर्शिन एकस्याभावे तदनुपपत्तेः। शङ्कते—"तेनेदं सदृशमि"ति। अयमर्थो—विकल्पप्रत्ययोऽयम्। विकल्पश्च स्वाकारं बाह्यतयाऽध्यवस्यति, (१)न तु तत्त्वतः पूर्वापरौ क्षणौ तयोः सादृश्यं वा गृह्णाति, तत्कथमेकस्यानेकदर्शिनः स्थिरस्य प्रसङ्ग इति, निराकरोति—"न तेनेदमि"ति (पृ० ५४५ पं० २) "भिन्नपदार्थोपादानादि"ति। नानापदार्थसम्भिन्नवाक्यार्थाभासस्तावदयं विकल्पः प्रथते, तत्रैते नानापदार्था न प्रथन्त इति ब्रुवाणः (२)स्वसंवेदनं बाधेत। न चैकस्य ज्ञानस्य नानाकारत्वं सम्भवति, एकत्वविरोधात्। न च तावन्त्येव ज्ञानानीति युक्तम्, तथासति प्रत्याकारं ज्ञानानां समाप्तेस्तेषां च परस्परवार्ताज्ञानाभावाद् नानेत्येव न स्यात्। तस्मात्पूर्वापरक्षणतत्सादृश्यगोचरत्वं ज्ञानस्य वक्तव्यम्, न चैतत्पूर्वापरक्षणावस्थायिनमेकं ज्ञातारं विनेति क्षणभङ्गभङ्गप्रसङ्गः। यद्युच्येत—अस्त्येतास्मिन् विकल्पे तेनेदं सदृशमिति पदद्वयप्रयोगो न त्विह तत्तेदन्तास्पदौ पदार्थौ, तयोश्च सादृश्यमिति विवक्षितम्, अपि त्वेवमाकारता ज्ञानस्य कल्पितेति,(३) तत्राह—"यदा हि लोकप्रसिद्धः पदार्थ" इति। (४)एकाधिकरणविप्रतिषिद्धधर्मद्वयाभ्युपगमो विवादः। तत्रैकः स्वपक्षं साधयत्यन्यश्च तत्साधनं दूषयति। न चैतत्सर्वमसति विकल्पानां बाह्यालम्बनत्वेऽसति च लोकप्रसिद्धपदार्थकत्वे भवितुमर्हति। (५)ज्ञानाकारत्वे हि विकल्पप्रतिभासिनां नित्यत्वानित्यत्वादीनोमकार्थविषयत्वाभावाज्ज्ञानानां च धर्मिणां भेदाच्च विरोधः। नह्यात्मनित्यत्वं बुद्ध्यनित्यत्वं च ब्रुवाणौ विप्रतिपद्येते। (६)न चालौकिकार्थेनानित्यशब्देनात्मनि विभुत्वं विवक्षित्वाऽनित्यशब्दं प्रयुञ्जानो लौकिकार्थं नित्यशब्दमात्मनि प्रयुञ्जानेन विप्रतिपद्यते। तस्मादनेन स्वपक्षं प्रतितिष्ठापयिषता परपक्षसाधनं च निराचिकी-

(१) पूर्वोत्तरक्षणद्वयग्रहणाभावे तेनेदमित्याकारकप्रत्ययोदयायोगात् 'तेनेदम्' (५४५ पं० १) इति भाष्यस्थशङ्कानुपपत्तिमाशङ्क्याह न तु तत्त्वत इति।

(२) अत्र किंतावत्क्षणभङ्गवादिना तेनेदं सदृशमिति प्रत्यये तत्तेदन्तावच्छिन्नार्थयोः तयोः सादृश्यं च भानमङ्गीक्रियते न वा? भानपक्षे किंते ज्ञानस्याकारा उत तस्माद्भिन्नानि। आद्ये तज्ज्ञानमेकमनेकं वा नाद्यः इत्याह स्वसंवेदनमिति। ज्ञानाकारत्वपक्षे एकस्य नानात्वं व्याहतमित्याह न चैकस्येति। ज्ञानभेदं निराचष्टे न च तावन्तीति।

(३) अयमत्र बौद्धाक्षेपाशयः—वेदान्त्युक्तः प्रतीतिविरोधो न स्यादतो नास्मिन्मतेऽर्थस्य ज्ञानाकारस्य लोपः, किन्तु प्रतीतावारोपितो बाह्योर्थो नास्ति, न च प्रतीतिमात्रोऽतो न ज्ञानस्यैकस्य नानार्थाकारत्वप्रयुक्तव्याघातः, न वा बाह्यार्थाभ्युपगमप्रसङ्ग इति।

(४) भाष्ये परपक्षक्षेपानुपपत्तिरुक्ता तां विशदयन् समाधत्ते एकाधिकरणेति। इदं नित्यमिदमनित्यमिति भिन्नयोर्ज्ञानयोराकारौ, तथाच धर्मिभेदेन व्यवस्थापनाद्विवादो न स्यादित्यर्थः।

(५) असति बाह्यालंबनत्व इत्येतद्विवृणोति ज्ञानाकारत्वे हीति। विषयत्वाभावात्—आश्रितत्वाभावात्।

(६) असति च लोकप्रसिद्धपदार्थत्वे इत्येतद्विशदयति न चेति।

र्षता विकल्पानां लोकसिद्धपदार्थकता बाह्यालम्बनता च वक्तव्या । (१)यद्युच्येत—'द्विविधो हि विकल्पानां विषयो ग्राह्यश्चाध्यवसेयश्च । तत्र स्वाकारो ग्राह्योऽध्यवसेयस्तु बाह्यः, तथा च पक्षप्रतिपक्षपरिग्रहलक्षणा विप्रतिपत्तिः प्रसिद्धपदार्थकत्वं चोपपद्यत इत्याह—"एवमेवै-षोऽर्थ" इति । निश्चितं यत्तदेव वक्तव्यं ततोऽन्यदुच्यमानं बहुप्रलापित्वमात्मनः केवलं प्रख्यापयेत् । (२)अयमभिसन्धिः—केयमध्यवसेयता बाह्यस्य ? यदि ग्राह्यता न द्विवि-ध्यम् । अथान्या सोच्यताम् । ननूक्ता तैरेव स्वप्रतिभासेऽनर्थेऽर्थाध्यवसायेन प्रवृत्तिरिति । अथ विकल्पाकारस्य कोऽयमध्यवसायः, (३)किं करणमाहो योजनमुतारोप इति । न तावत्करणं नह्यन्यदन्यत् कर्तुं शक्यम् । नहि जातु सहस्रमपि शिल्पिनो घटं पटयितुमीशते । न चान्तरं बाह्येन योजयितुम् । अपि च तथामति युक्त इति प्रत्ययः स्यात्, न चास्ति । आरोपोऽपि किं गृह्यमाणे बाह्ये उतागृह्यमाणे । यदि गृह्यमाणे तदा किं विकल्पनाहो तत्सम-यजेनाविकल्पकेन । (४)न तावद्विकल्पोऽभिलापससर्गयोग्यगोचरोऽशक्याभिलापसमयं स्वल क्षणं देशकालाननुगतं गोचरयितुमर्हति । यथाहुः—

अशक्यसमयो ह्यात्मा सुखादीनामनन्यभाक् ।
तेषामतः स्वसंवित्तिर्नाभिजल्पानुषङ्गिणी(५) ॥ इति ।

(६)न च तत्समयभाविना निर्विकल्पकेन गृह्यमाणे बाह्ये विकल्पेनागृहीते तत्र विकल्पः स्वाकारमारोपयितुमर्हति । नहि रजतज्ञानाप्रतिभासिनि पुरोवर्तिनि वस्तुनि रजतज्ञानेन शक्यं रजतमारोपयितुम् । अगृह्यमाणे तु बाह्ये स्वाकार इत्येव स्यान्न बाह्य इति, तथा च नारो-पणम् । (७)अपि चायं विकल्पः स्वसंवेदनं सन्तं विकल्पं किं वस्तुसन्तं स्वाकारं गृहीत्वा

---

(१) एवन्तावत्तत्तेदंतास्पदादिरर्थो ज्ञानस्यान्तर आकार इत्याभिप्रायेण विज्ञानवादिमतं बाह्यार्थवा-ददूषणमध्येऽपि प्रसङ्गादाशंक्य प्रतिक्षिप्तमधुना बाह्यार्थोस्ति, स च क्षणिक एव निर्विकल्पके चकास्ति सविकल्पकप्रत्ययास्तु विकल्पास्तद्ग्रहणग्राह्याद्याकारेण निर्भासन्तेऽतो विप्रतिपत्त्यादिव्यवहारसिद्धिरिति बाह्यार्थवादमाभित्यैव शङ्कते यद्युच्येतेति । अध्यवसेयः—स्वाकारस्य निर्विकल्पस्यावसायादधि उपरि अवसेयः बाह्यः, अनेन 'स्वग्राहकस्य ज्ञानस्य स्वयं तावद्ग्राह्यं कथमस्य बाह्याकारविषयतेति' प्रत्युक्तम् ।

(२) कथन्तर्हि बाह्यार्थस्यानिश्चितत्वापादनं भाष्ये तस्योक्तरीत्या निश्चितत्वादत आहायमभि-सन्धिरिति ।

(३) किमिति । आन्तरस्यानभिधेयस्य ज्ञानाकारस्य तद्विपरीतबाह्याकाररूपेणाध्यवसायो नाम किं तद्रूपेण निष्पादनमुत तेन सम्बन्धेन किंवा तेनाकारेणारोपणमिति विकल्पार्थो बोध्यः ।

(४) सविकल्पकेन बाह्यग्रहणपक्षे तावत्किमभिमतं बाह्ये यत्रारोपः—स्वलक्षणं (विशेषः) सामान्यं वेति विकल्प्य नाद्य इत्याह न तावदिति । अभिलापसंसर्गयोग्यजातिविशिष्टवस्तुगोचरो विकल्पः, अभि-लापस्य च शब्दस्य सामान्येनैव सह संगतिग्रहो युक्तः न स्वलक्षणेन देशकाला ननुगततयाऽनन्त्या-त्तस्य सङ्केतग्रहासम्भवात् अतः शब्दोल्लिखितसविकल्पकप्रत्ययस्य न स्वलक्षणविषयत्वमित्यर्थः ।

(५) सुखादिक्षणिकभावानामात्मा स्वरूपमन्यानुगतत्वादशक्यसंकेतमतस्तेषामसाधारणाकारावे-दया संवित्तिरभिजल्पयोग्या न भवति किन्तु निर्विकल्पकैवेति यथार्थो द्रष्टव्यः ।

(६) द्वितीयं निषेधेति नचेति । विकल्पेनागृहीते बाह्ये विकल्पसमसमयेन निर्विकल्पकेन गृहीते वि-कल्पसमसमयेन निर्विकल्पकेन गृहीते विकल्पः स्वाकारमारोपयितुं नार्हतीत्यर्थः ।

(७) एवं तावदधिष्ठानप्रतिभासासम्भवाद्बाह्ये ज्ञानस्वरूपस्यारोपो निरस्तः अधुनाऽरोप्यस्फुरणायो-

पश्चाद्बाह्यमारोपयत्यथ यदा स्वाकारं गृह्णाति तदैवारोपयति, न तावत् क्षणिकतया क्रमविरहिणो ज्ञानस्य क्रमवर्तिनी ग्रहणारोपणे कल्पेते । तस्माद्यदैव स्वाकारमनर्थं गृह्णाति तदैवार्थमारोपयतीति वक्तव्यम् ।

न चेतद्युज्यते, (१)स्वाकारो हि स्वसंवेदनप्रत्यक्षतयाऽतिविशदो बाह्यं चारोप्यमाणमविशदं सततोऽन्यदेव स्यान्न तु स्वाकारः समारोपितः । (२)न च भेदाग्रहमात्रेण समारोपाभिधानम् । वैशद्यावैशद्यरूपतया भेदग्रहस्योक्तत्वात् । अपि चागृह्यमाणे चेद्बाह्येऽबाह्यात् स्वलक्षणाद्भेदाग्रहेण तदभिमुखी प्रवृत्तिः, हन्त तर्हि त्रैलोक्यत एवानेन न भेदो गृहीत इति यत्र क्वचन प्रवर्तेताविशेषात् । (३)एतेन ज्ञानाकारस्यैवालीकस्यापि बाह्यत्वसमारोपः प्रत्युक्तः । तस्मात्सूक्तं 'ततोऽन्यदुच्यमानं बहुप्रलापित्वमात्मनः ख्यापयेदि'ति । अपि च सादृश्यनिबन्धनः संव्यवहारस्तेनेदं सदृशमित्येवमाकारबुद्धिनिबन्धनो भवेन्न तु तदेवेदमित्याकारबुद्धिनिबन्धन इत्याह—"न चायं सादृश्यात्संव्यवहार इति" (पृ० ५४६ पं० १) । ननु ज्वालादिषु सादृश्यादसत्यामपि सादृश्यबुद्धौ तद्भावावगमनिबन्धनः संव्यवहारो दृश्यते यथा तथेहापि भविष्यतीति पूर्वापरितोषणाह—"भवदपि कदाचिद्बाह्यवस्तुनी"ति । तथाहि विविधजनसङ्कीर्णगोपुरेण पुरं निविशमानं नरान्तरेभ्य आत्मनिर्धारणायासाधारणं चिन्हं विदधत्मुपदर्शयन्ति पाशुपतं पृथग्जना इति ॥ २५ ॥

सू० नामतोदृष्टत्वात् ॥ २६ ॥

"इतश्चानुपपन्नो वैनाशिकसमय" इति । (४)अस्थिरात्कार्योत्पत्तिमिच्छन्तो वैनाशिका अर्थादभावादेव भावोत्पत्तिमाहु । (५)उक्तमेतदधस्तात् निरपेक्षात्कार्योत्पत्तौ पुरुषकर्मवैयर्थ्यम्, सापेक्षतायां च क्षणस्याभेद्यत्वेनापकृतत्वानुपकृतत्वानुपपत्तेरनुपकारिणि चापेक्षाभावादक्षणिकत्वप्रसङ्गः । (६)सापेक्षत्वानपेक्षत्वयोश्चान्यतरनिषेधस्यान्यतरविधानना-

---

गाच्च नारोप इत्यत्रापीत्यर्थः । स्वसंवेदनं सन्तं विकल्पं यदा बाह्यं बाह्यत्वेनारोपयति तदा किं वस्तुसन्तं स्वाकारं गृहीत्वा पश्चादारोपयतीति योजना ।

(२) युगपत्स्वाकारस्य ग्रहणं बाह्यत्वेन चारोपणमिति पक्षं किं स्वीकारबाह्ययोरैक्यस्फुरणमारोप उताख्यातिमत उत विवेकाग्रहमात्रान्तत्र नाद्य इत्याह स्वाकारो हीति । स्वप्रकाशत्वपरप्रकाशत्वाभ्यां भेदावभासस्यैक्यस्फुरणत्वमित्यर्थः ।

(२) द्वितीये किं बाह्ये गृह्यमाणे विवेकाग्रहो मिथ्याव्यवहारजनकः अगृह्यमाणे वा ? नाद्य इत्याह न चेति । न द्वितीय इत्याहापि चेति ।

(३) परमार्थज्ञानाकारस्य बाह्यवस्त्वात्मना समारोपं प्रतिक्षिप्य वासनाप्रापितस्य कल्पितज्ञानाकारस्य बाह्ये समारोपं निरस्यति एतेनेति ।

(४) ननु बौद्धैरभावस्यार्थक्रियाकारित्वानभ्युपगमान्कथमभावाद्भावोत्पत्तिरतस्सिद्धान्तत्वेनानूद्य निरस्यते इत्याशङ्क्याह अस्थिरादिति ।

(५) उक्तमिति । 'इतरेतरप्रत्ययत्वात् ' (अ० २ पा० २ सू० १९) इत्यस्य सूत्रस्य व्याख्याने यदन्यक्षणप्राप्ता अनपेक्षा' इत्यादिनोक्तं निरपेक्षस्य क्षणिकस्य कारणत्वनिरसनम्, सापेक्षस्यापि तस्य 'न क्षणिकपक्षे उपकार्योपकारकभावो स्ती'त्यादिनोक्तन्तदेवानुवदति निरपेक्षादित्यादिना ।

(६) ननु यदि क्षणिकेनोपकृतत्वं सम्भवति अनुपकृतस्य च न सापेक्षत्वं, निरपेक्षस्य च कारणत्वमतिप्रसक्तं तर्हि क्षणिको न सापेक्षो नापि निरपेक्षः किन्तु प्रकारान्तरयोगात्मेत्याशङ्क्याह सापेक्षत्वेति ।

न्तरयिकत्वेन प्रकारान्तराभावान्नास्थिरादभावाद्भावोत्पत्तिरिति क्षणिकपक्षेऽसदभावाद्भावोत्पत्तिरिति परिशिष्यत इत्यर्थः । न केवलमर्थादापद्यते दर्शयन्ति च "नानुपमृद्य प्रादुर्भावादि"ति । एतद्विभजते-"विनष्टाद्धि किले"ति । किलकारोऽनिच्छायाम्, कूटस्थाच्चेत्कारणात् कार्यमुत्पद्येतापि सर्वं सर्वत उत्पद्येत । (१)अयमभिसन्धिः-कूटस्थो हि कार्यजननस्वभावो वा स्यादतत्स्वभावो वा ? स चेत्कार्यजननस्वभावस्ततो यावदनेन कार्यं कर्तव्यं तावत्सहसैव कुर्यात्, समर्थस्य क्षेपायोगात्, अतत्स्वभावत्वे तु न कदाचिदपि कुर्यात् । यदुच्येत-'समर्थोऽपि क्रमवत्सहकारिसाचिवः क्रमेण कार्याणि करोती'ति । तदयुक्तम्, विकल्पासहत्वात्-किमस्य सहकारिणः कश्चिदुपकारमादधाति न वा ? अनाधानेऽनुपकारितया सहकारिणो नापेक्षेरन्, आधानेऽपि भिन्नमभिन्नं वोपकारमादध्युः । अभेदे तदेवाभिहितमिति कौटस्थ्यं व्याहन्येत । भेदे तूपकारस्य तस्मिन्सति कार्यस्य भावादसति चाभावात्सत्यपि कूटस्थे कार्यानुत्पादादन्वयव्यतिरेकाभ्यामुपकार एव कार्यकारी न भाव इति नार्थक्रियाकारी भावः । तदुक्तम्—

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम् ।
(२)चर्मोपमश्चेत्स्थोऽनित्यः क्षतुल्यश्चेदसत्फलः ॥ इति ।

तथा चाकिञ्चित्कराद्पि चेत्कूटस्थात्कार्यं जायेत सर्वं सर्वस्माज्जायेतेति सूक्तम् । उपसंहरति "तस्मादभावप्रस्तेभ्य" इति । "तत्रेदमुच्यते नासतोऽदृष्टत्वादि"ति । नाभावात्कार्योत्पत्तिः, कस्मात् ? अदृष्टत्वात् । नहि शशविषाणादङ्कुरादीनां कार्याणामुत्पत्तिर्दृश्यते । यदि स्वभावाद्भावोत्पत्तिः स्यात्ततोऽभावस्वाविशेषात् शशविषाणादिभ्योऽप्यङ्कुरोत्पत्तिः, नत्वभावो विशिष्यते, विशेषण योगे वा सोऽपि भावः स्यान्न निरुपाख्य इत्यर्थः । विशेषणयोगमभावस्याभ्युपेत्याह—"नाप्यभावः कस्यचिदुत्पत्तिहेतुरि"ति । (पृ० ५४७ पं० ८) । अपि च यद्येनानन्वितं न ततस्य विकारो, यथा घटशरावोदञ्चनादयो हेम्नानन्विता न हेमविकारा, अनन्विताश्चैते विकारा अभावेन, तस्मान्नाभावविकारा, भावविकारास्तु ते, भावस्य तेनान्वितत्वादित्याह—**अभावाच्च भावोत्पत्तावि**"ति। अभावकारणवादिनो वचनमनुभाष्य दूषयति—"यत्तूक्तमि"ति । स्थिरोऽपि भावः क्रमवत्सहकारिसमवधानात् क्रमेण कार्याणि करोति, न चानुपकारकाः सहकारिणः, स चास्य सहकारिभिराधीयमान उपकारो न भिन्नो नाप्यभिन्नः किन्त्वनिर्वार्य एवानिर्वार्यत्वाच्च कार्यमप्यनिर्वार्यमेव जायते । (३)न चैतावता स्थिरस्याकारणत्वं तदुपादानत्वात्का-

---

(१) कूटस्थस्यापि नियतशक्तिकत्वात् 'सर्वं सर्वत उत्पद्यते' इति भाष्यासङ्गत्या सर्वतः सर्वावस्थात्तज्जन्यसर्वोत्पत्तिरिति कार्ययौगपद्यापत्त्यभिप्रायेण भाष्यं सङ्गमयन्नाहायामिति । अन्यकृतोपकारस्य भावादभेदे सत्युपकारशब्देन भावरूपमेवाभिहितं स्यात् तस्य चान्यकृतत्वे कौटस्थ्यव्याघात इत्यर्थः ।

(२) चर्मोपमश्चेत्—स्थिरः कारणत्वाभिमतः पदार्थ उपकाराभ्युपगमश्चेदित्यर्थः । उपकारोऽभेदे भावस्य स भावोऽनित्यः भेदे स उपकारोऽनित्यः, तावेव च कारणं न भाव इति भावः । उपकारानाभ्युपगमे दूषणम् असत्फल इति ।

(३) यच्चोक्तं बौद्धेन—अन्वयव्यतिरेकाभ्यामुपकार एव कार्यकारी न भाव इति, तत्राह न चैतावतेति । परमार्थाभिप्रेतत्वात्कार्यकल्पनाया भाव उपादानं तद्धर्मस्त्वनिर्वार्य उपकारः कार्योपयोगित्यर्थः ।

र्यस्य रज्जूपादानत्वमिव भुजङ्गस्येत्युक्तम् । तथा च श्रुतिः 'मृत्तिकेत्येव सत्य'मिति । (१)अपि च येऽपि सर्वतो विलक्षणानि स्वलक्षणानि वस्तुसन्त्यास्थिषत, तेषामपि किमिति बीजजातीयेभ्योऽङ्कुरजातीयान्येव जायन्ते कार्याणि, न तु कमेलकजातीयानि, नहि बीजाङ्कुरान्तरस्य वा कमेलकस्य वाऽत्यन्तवैलक्षण्ये काश्चिद्विशेषः । न च बीजाङ्कुरत्वे सामान्ये परमार्थसती(२) येनैतयोर्भाविकः कार्यकारणभावो भवेत् । तस्मात्कालपनिकादेव स्वलक्षणोपादानाद्बीजजातीयात्तथाविधस्यैवाङ्कुरजातीयस्योत्पत्तिनियम आस्थेयः, अन्यथा कार्यहेतुकानुमानोच्छेदप्रसङ्गः । दिङ्मात्रमत्र सूचितं प्रपञ्चस्तु ब्रह्मतत्त्वसमीक्षान्यायकणिकयोः कृत इति नेह प्रतन्यते विस्तरभयात् ॥ २६ ॥

उदासीनानामपि चैवं सिद्धिः ॥ २७ ॥

भाष्यमस्य सुगमम् ॥ २७ ॥

नाभाव उपलब्धेः ॥ २८ ॥

पूर्वाधिकरणसङ्गति(३)माह—"एवमि"ति (पृ० ५४८ पं० १८) । बाह्यार्थवादिभ्यो विज्ञानमात्रवादिनां सुगताभिप्रेततया विशेषमाह—"केषाञ्चिन्किले"ति (पृ० ५४९ पं० १) । (४)अथ प्रमाता प्रमाणं प्रमेयं प्रमितिरिति हि चतसृषु विद्यासु तत्त्वपरिसमाप्तिरासामन्यतमाभावेऽपि तत्त्वस्याव्यवस्थानात् । तस्मादनेन विज्ञानस्कन्धमात्रं तत्त्वं व्यवस्थापयता चतस्रो विद्या एषितव्यास्तथा च न विज्ञानस्कन्धमात्रं तत्त्वम्, नह्यस्ति सम्भवो विज्ञानमात्रं चतस्रो विद्याश्चेत्यत आह—"तस्मिंश्च विज्ञानवादे बुद्ध्यारूढेन रूपेणे"ति । यद्यप्यनुभवाद्भान्योऽनुभाव्योऽनुभवितानुभवनं, तथापि बुद्ध्यारूढेन बुद्धिपरिकल्पितेनान्तरस्थ एवैष प्रमाणप्रमेयफलव्यवहारः प्रमातृव्यवहारश्चत्यापि द्रष्टव्यं न पारमार्थिक इत्यर्थः । (५)एवं च न सिद्धसाधनम् । नहि ब्रह्मवादिनो नीलाद्याकारं विज्ञानमित्यनुमाने किञ्चित्साधनं किं त्वनिर्वचनार्थं नीलादीति । (६)तथाहि—स्वरूपं विज्ञानस्यासत्याकारयुक्तं प्रमेयम्, प्रमेयप्रकाशनं प्रमाणफलं, तत्प्रकाशनशक्तिः प्रमाणम् । बाह्यवादिनोरपि वैभाषिकसौत्रान्तिकयोः (७)काल्पनिक

---

(१) बौद्धं मतं प्रतिबन्दीमाहापिचेति ।

(२) बाह्यमत वस्तुभूतसामान्यस्यापोहमित्रस्यासत्त्वादित्यर्थः ।

(३) रूपादिरहितब्रह्मजगदुपादानत्ववादिसमन्वयस्य विज्ञानं नीलाद्याकारमित्यनुमानविरोधाविरोधसन्देहे पूर्वोक्तसमुदायाप्रास्यादिदूषणाभ्युपजीव्य बाह्यार्थापलापाद्धेतुमल्लक्षणा सङ्गतिमित्यर्थः ।

(४) व्याघातेन विज्ञानमात्रवादिनो बौद्धस्य पूर्वोक्तदूषणमात्रेण सिद्धे अथेति । वस्तुव्यवस्थायै प्रमाणाद्यभ्युपगम्य तन्निषेधो व्याघात इत्यर्थः ।

(५) ननु नीलाद्याकारं विज्ञानमित्यनुमाने वेदान्तिमतेन सिद्धसाधनम्, ब्रह्मणो विज्ञानात्मकस्य नीलाद्यात्मकत्वादन्यथाऽद्वैतासिद्धेरत आह एवं चेति । बौद्धा हि विशेषविज्ञानस्यान्तरं नीलादिरूपं वदन्ति न वयमित्यर्थः ।

(६) बुद्धौ परिकल्पितं ज्ञेयादिविभागमुपपादयति तथाहीति । अनाकारस्यासत्यत्वं बाह्यरूपेणासत्येनान्तररूपेण सत्येनाकारेण युक्तत्वमित्यर्थः ।

(७) काल्पनिक एवेति । वास्तविकज्ञेयोपलम्भेनासोऽनुपलम्भ्या मिथ्याप्रमाणफलभागः काल्पनिक एव बाह्यार्थवादिमतेपीति भावः ।

एव प्रमाणफलव्यवहारो ऽभिमत इत्याह–"सत्यपि बाह्येऽर्थे" इति । (१)भिन्नाधिकरणत्वे हि प्रमाणफलयोस्तद्भावो न स्यात्, नहि खदिरगोचरे परशौ पलाशे द्वैधीभावो भवति, तस्मादनयोरैकाधिकरण्यं वक्तव्यम् । (२)कथं च तद्भवति ? यदि ज्ञानस्थे एव प्रमाणफले भवतः । (३)न च ज्ञानं स्वलक्षणमनंशमंशाभ्यां वस्तुवद्भ्यां युज्यते, तदेव ज्ञानमज्ञानव्यावृत्तिकल्पितज्ञानत्वांशं फलम् । अशक्तिव्यावृत्तिपरिकल्पितात्मानात्मप्रकाशनशक्त्यंशं प्रमाणम् । प्रमेयं त्वस्य बाह्यमेव । (४)एवं सौत्रान्तिकसमयेऽपि । ज्ञानस्यार्थसारूप्यमनीलाकारव्यावृत्त्या कल्पितनीलाकारत्वं प्रमाणं व्यवस्थापनहेतुत्वात् । अज्ञानव्यावृत्तिकल्पितं च ज्ञानत्वं फलं व्यवस्थाप्यत्वात् । तथा चाहुः–'नहि विप्तिसत्तैव तद्वेदना युक्ता, तस्याः सर्वत्राविशेषात् । तां तु सारूप्यमाविशत् सरूपयत्तद् घटयेत्' इति । प्रश्नपूर्वकं बाह्यार्थाभाव उपपत्तीराह–"कथं पुनरवगम्यत" इति । स हि विज्ञानालम्बनत्वाभिमतो बाह्योऽर्थः परमाणुस्तावन्न संभवति । एकस्थूलनीलाभासं हि ज्ञानं न परमसूक्ष्मपरमाण्वाभासम् । न चान्याभासमन्यगोचरं भवितुमर्हति(५), अतिप्रसङ्गेन सर्वगोचरतया सर्वसर्वज्ञत्वप्रसङ्गात् । न च प्रतिभासधर्मः स्थौल्यमिति युक्तम्, विकल्पासहत्वात्—किमयं प्रतिभासस्य ज्ञानस्य धर्मः, उत प्रतिभासनकालेऽर्थस्य धर्मः । यदि पूर्वः कल्पोऽद्धा, तथा सति हि (६)स्वांशालम्बनमेव विज्ञानमभ्युपेतं भवति । एवं च कः प्रतिकूलीभवति अनुकूलमाचरति । द्वितीय इति चेत् । तथा हि रूपपरमाणव एव निरन्तरमुत्पन्ना एकविज्ञानोपारोहिणः स्थौल्यं, न चात्र कस्य चिद्भ्रान्तता । नहि न ते रूपपरमाणवो न च न निरन्तरमुत्पन्ना न चैकविज्ञानानुपारोहिणः । तेन मा भून्नीलत्वादिवत्परमाणुधर्मः, प्रत्येकं परमाणुष्वभावात् । प्रतिभासदशापन्नानां तु तेषां भविष्यति बहुत्वादिवत्संवृतं (७) स्थौल्यम् । यथाहुः—

---

(१) वैभाषिकमते प्रमाणफलविभागस्य कल्पितत्वमुपपादयति भिन्नाधिकरणत्वे इति । तद्भावः—करणफलभावः । करणफलभावः समानाधिकरणयोरेवेत्यत्र दृष्टान्तमाह नहीति ।

(२) कथमिति । ज्ञानस्थत्वाभावे कथमैकाधिकरण्यं भवतीत्यर्थः ।

(३) नचेति । न तावत्कुण्डे बदरवज्ज्ञाने प्रमाणफलयोरवस्थानसम्भवः ज्ञानस्यांशयोगित्वात्, तादात्म्येन तु स्यात्, न च वस्तुतो भिन्नानामेकस्यैक्ययोपपत्तिस्ततः काल्पनिकः प्रमाणफलभेद इति भावः ।

(४) बाह्यार्थं प्रत्यक्षं वदतां वैभाषिकाणां मते प्रमाणफलविभागस्य कल्पितत्वं प्रदर्श्य ज्ञानगताकारवैचित्र्येणानुमेयं बाह्यार्थं स्वीकुर्वतां सौत्रान्तिकाणां मतेन तमतिदिशति एवमेति । ज्ञानगतं बाह्यनीलसारूप्यं भासमानमनीलाकारापोहरूपेण कल्पितं तच्च बाह्यार्थावस्थापकम् प्रतिबिम्बमिव बिम्बस्यातः प्रमाणम् । ज्ञानाव्यावृत्तिरूपेण कल्पितं ज्ञातत्वं सामान्यं फलम्, तद्धि सारूप्यबलान्नीलज्ञानत्वेन व्यवस्थाप्यते । अस्मिन्मतेपि प्रमेयं परमार्थभिन्नमित्यर्थः । सारूप्यस्य ज्ञानज्ञेयव्यवस्थापकत्वे सौत्रान्तिकवचनमाह तथाचेति । तां–विप्तिम् । किं घटयेदत आह सरूपयत्तदिति । तद्बाह्यं वस्तु सरूपयत् स्वरूपेण सरूपां विप्तिं कुर्वत् घटयेत् विप्त्या सह विषयभावेन योजयेदित्यर्थः ।

(५) अनेन बाह्यार्थस्य परमाणुगोचरप्रतीतिविशेषकृतत्वं निरस्तम्, न परमसूक्ष्मपरमाण्वाभासमित्यस्तेन च परमाणुमात्रत्वं निराकृतम् । अतिप्रसङ्गेनेति । भासमानादन्यगोचरत्वमातिप्रसङ्गः ।

(६) स्वाकारावलम्बनम् ।

(७) प्रातिभासिकम् ।

(१) ग्रहेऽनेकस्य चैकेन किंचिद्रूपं हि गृह्यते ।
सांवृतं प्रतिभासस्थं तदेकात्मन्यसम्भवात् ॥
न च तद्दर्शनं भ्रान्तं नानावस्तुग्रहाद्यतः ।
सांवृतं ग्रहणं नान्यन्न च वस्तुग्रहो भ्रमः ॥ इति ।

(२)तत्र । नैरन्तर्यावभासस्य भ्रान्तत्वात् । गन्धरसस्पर्शपरमाण्वन्तरिता हि ते रूपपरमाणवो न निरन्तराः । तस्मादारात् सान्तरेषु वृक्षेष्वेकघनवनप्रत्ययवदेष स्थूलप्रत्ययः परमाणुषु सान्तरेषु भ्रान्त एवेति पश्यामः । (३)तस्मात्कल्पनापोढत्वेऽपि भ्रान्तत्वाद्वटादिप्रत्ययस्य पीतशङ्खादिज्ञानवन्न प्रत्यक्षता परमाणुगोचरत्वाभ्युपगमे । तदिदमुक्तं–"न तावत्परमाणवः स्तम्भादिप्रत्ययपरिच्छेद्या भवितुमर्हन्ति, नापि तत्समूहास्तम्भादयो" ऽवयविनः । तेषामभेदे परमाणुभ्यः परमाणव एव, तत्र चोक्तं दूषणम्(४), भेदे तु गवाश्वस्येवात्यन्तवैलक्षण्यमिति न तादात्म्यम्, समवायश्च निराकृत इति । एवं भेदाभेदविकल्पेन जातिगुणकर्मादीनेपि प्रत्याचक्षीत. तस्मायद्यत्प्रतिभासते तस्य सर्वस्य विचारासहत्वाद् अप्रतिभासमानसद्भावे च प्रमाणाभावान्न बाह्यालम्बनाः प्रत्यया इति । अपि च (५)न तावद्विज्ञानमिन्द्रियवन्निलीनमर्थं प्रत्यक्षयितुमर्हति । न हि यथेन्द्रियमर्थविषयं ज्ञानं जनयत्येवं विज्ञानमपरं विज्ञानं जनयितुमर्हति, तत्रापि समानत्वादनुयोगस्यानवस्थाप्रसङ्गात् । न चार्थाधारं प्राक्तत्यलक्षणं फलमाधातुमुत्सहते, अतीतानागतेषु तदसम्भवात् । नह्यस्ति सम्भवोऽप्रत्युत्पन्नो धर्मी धर्मश्चास्य प्रत्युत्पन्न इति । तस्माज्ज्ञानस्वरूपप्रत्यक्षतैवार्थप्रत्यक्षताऽभ्युपेया । (६)तथानाकारं सद् आजानतो भेदाभावात् कथमर्थभेदं व्यवस्थापयेदिति तद्भेदव्यवस्थापनायाकारभेदोऽन्यैषितव्यः । (७)तदुक्तं 'न हि विज्ञप्तिरेव तद्भेदना युक्ता, तस्याः

---

(१) ग्रह इति । अनेकस्य परमाणोरेकेन ज्ञानेन ग्रहणे किञ्चित्स्थूलं रूपं गृह्यते तत्सांवृतम्, यत एकपरमाणुस्वरूपं स्थौल्यं गृह्यते चेत्स्वाभाविकं भवेन्न त्वेकत्र स्थौल्यं सम्भवत्यतो न स्वाभाविकमतोऽन्यौपाधिकं प्रतिभासस्थं तदित्यर्थः । एकपरमाण्वात्मनि औपाधिकविषयत्वे स्थूलबुद्धेर्भ्रान्तत्वामाशंक्य द्वितीयश्लोकेन परिहरति नचेति । तस्य स्थूलस्य दर्शनं न च भ्रान्तम् यतो नानापरमाणूनां ग्रहणान्मोवृतस्य स्थूलस्य ग्रहणमन्यत्र भवति । य एव भिन्नधीगृहीतास्त एव निरन्तराः परमाणव एकधिया गृह्यमाणाः स्थूलमिति निर्भासन्ते ते च वस्त्वेव वस्तुग्रहश्च न भ्रम इत्यर्थः ।

(२) एवं बाह्यार्थवादिमतमर्थितं स्थूलनीलावभासस्य मालम्बनत्वं विज्ञानवादी दूषयति तत्रेति ।

(३) ननु स्थूलप्रत्ययस्य भ्रान्तित्वं न युक्तम् स्वलक्षणविषयत्वेन निर्विकल्पकत्वात्, सविकल्पकं ह्यवस्तुभूतसामान्यविषयत्वाद्भ्रान्तमित्याशंक्याह तस्मादिति । कल्पना—अभिलाप, तदपोढं–तद्रहितम् ।

(४) परमाण्वाभासज्ञानानुपपत्तिरूपमित्यर्थः ।

(५) भाष्यकारेण ज्ञाने भासमानस्तम्भाद्याकारवैचित्र्यान्यथानुपपत्त्या स्तम्भादेर्ज्ञानाकारत्वमयुक्तमुक्तम्, भिन्नस्यैवार्थस्य ज्ञानेन प्रकाशनसम्भवादित्याशंक्य भेदाभ्युपगमेऽर्थस्यापरोक्षता न स्यादित्याह न तावदित्यादिना ।

(६) ननु मा भूज्ज्ञानमर्थविषयज्ञानान्तरस्य जनकम्, मा च विषयप्राकट्यमनेनाजनि, तथापि स्वभावसम्बन्धादर्थविषयव्यवहारं जनयेदित्याशंक्याह तथेति । ज्ञानमात्राकारस्य सर्वज्ञेयसाधारण्यान्नीलाकारव-ज्ज्ञानं नीलव्यवहारहेतुरित्यर्थः ।

(७) सौत्रान्तिकस्याप्येतत्सम्मतामात वदन् विज्ञानवादी तदुक्तिमाह तदुक्तमिति ।

सर्वत्राविशेषात् तां तु साकल्यमाविशत् सकल्पयत्तद् घटयेदिति । एकश्चायमाकारोऽनुभूयते स चेद्विज्ञानस्य नार्थसद्भावे किंचन प्रमाणमस्तीत्याह—**"अपि चानुभवमात्रेण साधारणात्मनो ज्ञानस्ये"**ति । **"अपि च सहोपलम्भनियमादि"**ति (पृ० ५५० पं० २) । (१)यद्येन सह नियतसहोपलम्भनं तत्ततो नाभिद्यते, यथैकस्माच्चन्द्रमसो द्वितीयश्चन्द्रमाः । नियतसहोपलम्भश्चार्थो ज्ञानेनेति व्यापकविरुद्धोपलब्धिः(२) । निषेध्यो हि भेदः सहोपलम्भनियमेन व्याप्तो यथा भिन्नावाश्विनौ नावश्यं सहोपलभ्येते, कदाचिदभ्रापिधानेऽन्यतरस्यैकस्योपलब्धेः । सोऽयमिह भेदव्यापकाज्ञानयमावेरुद्धो नियम उपलभ्यमानस्तद्व्याप्यं भेदं निवर्तयतीति । तदुक्तम्—

सहोपलम्भनियमादभेदो नीलतद्धियोः ।
भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये ॥ इति ।

"स्वप्नादिवच्चेदं द्रष्टव्यम्" (पृ० ५५० पं० ४) । यो यः प्रत्ययः स सर्वो बाह्यानालम्बनो यथा स्वप्नमायादिप्रत्ययस्तथा चैष विवादाध्यासितः प्रत्यय इति स्वभावहेतुः । (३)बाह्यानालम्बनता हि प्रत्ययत्वमात्रानुबन्धिनी वृक्षतेव शिंशपात्वमात्रानुबन्धिनीति तन्मात्रानुबन्धिनि निरालम्बनत्वे साध्ये भवति प्रत्ययत्वं स्वभावहेतुः । अत्रान्तरे सौत्रान्तिकश्चोदयति—**"कथं पुनरसति बाह्येऽर्थे नीलमिदं पीतमिदमित्यादि प्रत्ययवैचित्र्यमुपपद्येत"** स हि मेने (४)ये यस्मिन्सत्यपि कादाचित्कास्ते सर्वे तदतिरिक्तहेतुसापेक्षाः, यथाऽविवक्षत्यजिगमिषति मयि वचनगमनप्रतिभाषाः प्रत्ययाश्चेतनसन्तानान्तरसापेक्षास्तथा च विवादाध्यासिताः सत्यप्यालयविज्ञानसन्ताने षडपि प्रवृत्तिप्रत्यया इति स्वभावहेतुः । यश्चाधावालयविज्ञानसन्तानातिरिक्तः कादाचित्कप्रवृत्तिज्ञानभेदहेतुः स बाह्योऽर्थ इति । (५)वासनापरिपाकप्रत्ययकादाचित्कत्वात् कदाचिदुत्पाद इति चेत् । नन्वेकसन्ततिपतितानामालयविज्ञानानां तत्प्रवृत्तिविज्ञानजननशक्तिर्वासना, तस्याश्च स्वकार्योपजनं प्रत्यभिमुख्यं परिपाकस्तस्य च प्रत्ययः स्वसन्तानवर्ती पूर्वक्षणः सन्तानान्तरापेक्षानभ्युपगमात्, (६)तथा च सर्वेऽप्यालयसन्तानपतिताः परिपाकहेतवो भवेयुः । न वा कश्चिदपि, आलयसन्तानपातित्वाविशे-

---

(१) एवं प्रत्यक्षेणार्थस्य ज्ञानाभेदमुपपाद्यानुमानेन तमुपपादयति यद्येनेति ।

(२) अयं भावः—विज्ञानवादिना ज्ञानार्थयोर्भेदो निषिध्यते तद्व्यापकस्य सहोपलभनियमाभावस्य विरुद्धो यः सहोपलम्भनियमस्तदुपलब्धिस्ततश्च व्यापकाभावे व्याप्यभेदाभाव इति । व्यापकविरुद्धोपलब्धिमेवाह निषेध्यो हीत्यादिना । अश्विनौ—नक्षत्रविशेषे ।

(३) यो यन्मात्रानुबन्धी यदात्मा च स तत्र स्वभावहेतुर्वृक्षतेव शिंशपामात्रानुबन्धिनी, अत एवोक्तं तद्भावमात्राश्रयिणि स्वभावो हेतुरात्मनीति, तत्र तद्भेदं दर्शयन्नाह बाह्येति । स्वप्नप्रत्ययादिषु बाह्यानालम्बनत्वदर्शनात्प्रत्ययत्वमात्रमप्रयुक्तं निरालम्बनत्वव्यक्तस्य चाभावस्य प्रत्ययरूपभावात्मकत्वात्तदात्मेत्यपि अत्र द्रष्टव्यम् । अतएवोक्तं न ह्यन्यासंसर्गिणो भावादन्योऽभाव इति ।

(४) सौत्रान्तिकमतेन बाह्यार्थसद्भावेऽनुमानमाह ये यस्मिन्निति ।

(५) उक्तानुमानेऽर्थान्तरमाशङ्कते विज्ञानवादी बाधतेति ।

(६) विज्ञानवादाभिप्रायमुक्त्वा दूषयन्नाह बाह्यार्थवादी तथाचेति । प्रवृत्तिविज्ञानजनकालयविज्ञानवर्त्तिवासनापरिपाकं प्रति सर्वेष्वालयविज्ञानसन्तानवर्तिनः क्षणा हेतव इति वक्तव्यम्, न चेदेकोऽपि हेतुर्न स्यादिति बाधकमाह नवा कश्चिदिति । सर्वेषां हेतुत्वे दूषणमनुपदमेवाभिधास्यते इति भावः ।

षात् । (१)क्षणभेदाच्छक्तिभेदस्तस्य च कादाचित्कत्वात् कार्यकादाचित्कत्वमिति चेत् । (२)नन्वेवमेकस्यैव नीलज्ञानोपजनसामर्थ्यं तत्प्रबोधसामर्थ्यं चेति क्षणान्तरस्यैतन्न स्यात्, सत्त्वे वा कथं क्षणभेदात् सामर्थ्यभेद इत्यालयसन्तानवर्तिनः सर्वे समर्था इति समर्थहेतुसद्भावे कार्यक्षेपानुपपत्तेः, स्वसन्तानमात्राधीनत्वे निषेध्यस्य कदाचित्कत्वस्य विरुद्धं सदातनत्वं तस्योपलब्ध्या कादाचित्कत्वं निवर्तमानं हेत्वन्तरापेक्षत्वे व्यवतिष्ठत इति प्रतिबन्धसिद्धिः । (३)न च ज्ञानसन्तानान्तरनिबन्धनत्वं सर्वेषामिष्यते प्रवृत्तिविज्ञानानां विज्ञानवादिभिरपि तु कस्यचिदेव विच्छिन्नगमनवचनप्रतिभासस्य प्रवृत्तिविज्ञानस्य, अपि च सत्त्वान्तरसन्ताननिमित्तत्वे तस्यापि सदा सन्निधानान्न कादाचित्कत्व स्यात् , न हि सत्त्वान्तरसन्तानस्य देशतः कालतो वा विप्रकर्षसम्भवः । विज्ञानवादे विज्ञानातिरिक्तदेशानभ्युपगमादमूर्तत्वाच्च विज्ञानानामदेशात्मकत्वात्, संसारस्यादिमत्त्वप्रसङ्गेनापूर्वसत्त्वप्रादुर्भावानभ्युपगमाच्च न कालतोपि विप्रकर्षसम्भवः । (४)तस्मादसति बाह्येऽर्थे प्रत्ययवैचित्र्यानुपपत्तेरस्त्यनुमानिको बाह्योऽर्थ इति सौत्रान्तिकाः प्रतिपेदिरे, तान्निराकरोति–"वासनावैचित्र्यादित्याह" विज्ञानवादी । इदमत्राकूतम्–स्वसन्तानमात्रप्रभवत्वेऽपि प्रत्ययकादाचित्कत्वोपपत्तौ सन्दिग्धविपक्षव्यावृत्तिकत्वेन (५)हेतुरनैकान्तिकः । तथा हि—बाह्यनिमित्तकत्वेऽपि कथं कदाचिन्नीलसंवेदनं कदाचित्पीतसंवेदनम् ? बाह्यनीलपीतसन्निधानाभ्यामिति चेत् । अथ पीतसन्निधानेऽपि किमिति नीलज्ञानं न भवति पीतज्ञानं भवति ? तत्र तस्य सामर्थ्यादसामर्थ्याच्चेतरस्मिन्निति चेत् । कुतः पुनरयं सामर्थ्यासामर्थ्यभेदः ? हेतुभेदादिति चेत् । एवं तर्हि क्षणानामपि स्वकारणभेदनिबन्धनः शक्तिभेदो भविष्यति । सन्तानिनो हि क्षणाः कार्यभेदहेतवस्ते च प्रतिकार्यं भिद्यन्ते च । न च सन्तानो नाम कश्चिदेक उत्पादकः क्षणानां, यद्भेदात् क्षणा(६) न भिद्येरन् । (७)ननूक्तं न क्षणभेदाभेदाभ्यां शक्तिभेदाभेदौ भिन्नानामपि क्षणानामेकसामर्थ्योपलब्धेः,

---

(१) एकस्यैव क्षणस्य हेतुत्वं स्यादित्यभिप्रायेणाशङ्कते विज्ञानवादी क्षणभेदादिति । कार्यकादाचित्कत्वमालयविज्ञानक्षणवर्तिवासनापरिपाकतज्जन्यप्रवृत्तिविज्ञानयोः कादाचित्कत्वम् ।

(२) सौत्रान्तिको दूषयन्नाह नन्विति । एव च सर्वेषां हेतुत्वे नीलज्ञानं सदा स्यान्नतु कदाचिदिति सर्वानुभवासिद्धं नीलादिज्ञानस्य कादाचित्कत्वं व्याहन्यतेति बाह्यार्थसद्भाव आवश्यक इति भावः ।

(३) हेत्वन्तरापेक्षत्वेपि नीलादिज्ञानस्यालयविज्ञानसन्तानान्तरमेव हेतुरस्तु कुतो बाह्यार्थसिद्धिरित्यर्थान्तरत्वमनुमानस्याशङ्कते न चेति । चैत्रसन्ताने विच्छिन्नो गमनवचनप्रतिभासो यस्य तत्काले उदयतो मैत्रसन्तानस्थगमनवचनविषयविज्ञानस्य तत्तथोक्तम् , तस्यैव विज्ञानवादिभिः सन्तानान्तरनिमित्तत्वमिष्यते, न तु विवक्षति जिगमिषति वा च चैत्रे यद्गमनवचनप्रतिभानं तस्यापि, तस्य तु चैत्रसन्तानमात्रहेतुकत्वं तच्च निरस्तमिति बाह्यार्थापेक्षा वाच्येत्यर्थः । तस्यापि प्रवृत्तिविज्ञानस्यालयविज्ञानसन्तानान्तरहेतुत्वे आह्यापेक्षेति ।

(४) सन्तानान्तरनिमित्तत्वेपि तस्य सदा सन्निधानात्प्रवृत्तिविज्ञानस्य कादाचित्कत्वमनुपपन्नं यस्मात्तस्मादित्युपसंहरन्नाह तस्मादिति ।

(५) प्रवृत्तिप्रत्यय आलयविज्ञानातिरिक्तहेतुक इति पक्षस्य स्वसन्तानमात्रनिमित्तकत्वं विपक्षस्तस्यात्सन्दिग्धा व्यावृत्तिर्यस्य स हेतुरनैकान्तिक इति भावः ।

(६) नन्वालयविज्ञानक्षणानां सम्बन्धिस्वस्वकारणवैचित्र्यात्सामर्थ्यभेदेप्येकसन्ततिपतितत्वाविशेषादेकविधं सामर्थ्यं स्यादित्याशंक्याह नचेति । (७) बाह्यार्थवादी शङ्कते नन्विति ।

अन्यथैक एव क्षणो नीलज्ञानजननसमर्थ इति न भूयो नीलज्ञानानि जायेरन्, तत्समर्थस्यातीतत्वात् क्षणान्तराणां चासामर्थ्यात्, तस्मात् क्षणभेदेऽपि न सामर्थ्यभेदः, (१)सन्तानभेदे तु सामर्थ्यं भिद्यत इति। (२)तन्न। यदि भिन्नानां सन्तानानां नैकं सामर्थ्यं, हन्त तर्हि नीलसन्तानानामपि मिथो भिन्नानां नैकमस्ति नीलाकाराधानसामर्थ्यमिति सन्निधानेऽपि नीलसन्तानान्तरस्य न नीलज्ञानमुपजायेत। (३)तस्मात्सन्तानान्तराणामिव क्षणान्तराणामपि स्वकारणभेदाधीनोपजनानां केषांचिदेव सामर्थ्यभेदः केषांचिन्नेति वक्तव्यम्। तथा चैकालयज्ञानसन्तानपतितेषु कस्यचिदेव ज्ञानक्षणस्य स तादृशः सामर्थ्यातिशयो वासनापरनामा (४)स्वप्रत्ययायासादितो यतो नीलाकारं प्रवृत्तिविज्ञानं जायते न पीताकारम्, कस्यचित्तु स तादृशो यतः पीताकारं ज्ञानं न नीलाकारमिति वासनावैचित्र्यादेव स्वप्रत्ययायासादिताज्ञानवैचित्र्यसिद्धेर्न तदतिरिक्तार्थसद्भावे किंचनास्ति प्रमाणमिति पश्यामः। (५)आलयाविज्ञानसन्तानपतितमेवासंविदितं ज्ञानं वासना तद्वैचित्र्यान्नीलाद्यनुभववैचित्र्यम्, (६)पूर्वनीलाद्यनुभववैचित्र्याच्च वासनावैचित्र्यमित्यनादितोऽनयोर्विज्ञानवासनयोस्तस्माच्च परस्पराश्रयदोषसम्भवो बीजाङ्कुरसन्तानवदिति। अन्वयव्यतिरेकाभ्यामपि वासनावैचित्र्यस्यैव ज्ञानवैचित्र्यहेतुतार्थवैचित्र्यस्येत्याह—"अपि चान्वयव्यतिरेकाभ्या"मिति। "एवं प्राप्ते, ब्रूमः। नाभाव उपलब्धे"रिति। न खल्वभावो बाह्यस्यार्थस्याध्यवसातुं शक्यते, सदुपलम्भाभावाद्ध्यवसीयेत सत्यप्युपलम्भे तस्य बाह्याविषयत्वाद्वा सत्यपि बाह्यविषयत्वेबाह्यार्थबाधकप्रमाणसद्भावाद्वा? न तावत्सर्वथोपलम्भाभाव इति प्रश्नपूर्वकमाह "कस्मादुपलब्धे"रिति। नहि स्फुटतरे सर्वजनीन उपलम्भे सति तदभावः शक्यो वक्तुमित्यर्थः। द्वितीयं पक्षमवलम्बते—"ननु नाहमेवं ब्रवीमी"ति। निराकराति "बाढमेवं ब्रवीषि"। उपलब्धिप्राहिणा हि साक्षिणोपलब्धिर्गृह्यमाणा बाह्यविषयत्वेनैव गृह्यते नोपलब्धिमात्रमित्यर्थः। "अतश्चे"ति वक्ष्यमाणोपपत्तिपरामर्शः। तृतीयं पक्षमालम्बते—"ननु बाह्यस्यार्थस्यासम्भवा"दिति। निराकरोति—"नायं साधुरध्यवसाय" इति। (७)इदमत्राकूतम्—

(१) एवमालयविज्ञानसन्तानैक्ये क्षणभेदेपि न सामर्थ्यभेद इत्युपपाद्य तथातिरिक्तबाह्यार्थसन्तानभेदे शक्तिभेदः स्यादित्याह सन्तानभेदे त्विति।

(२) उक्तशङ्कां दूषयन्नाह विज्ञानवादी तन्नेति। बाह्यार्थवादे हि क्षणिकत्वान्नीलार्थानां प्रतिनीलार्थं भिन्नाः सन्ति नीलसन्तानास्तेषु च सन्तानभेदाच्छक्तिभेदोपगमे नीलसन्तानानामप्येकविधा शक्तिर्न स्यात्, तथाचैकमेव नीलं नीलाकारज्ञानं जनयेत् न सन्तानान्तरवर्तीत्यर्थः।

(३) चोद्यसाम्यं प्रदर्श्य परिहारसाम्यमाह तस्मादिति।

(४) स्वप्रत्ययः—पूर्वोत्पन्ननीलादिप्रत्ययः।

(५) वासनावैचित्र्यादिति भाष्यस्थवासनाशब्दार्थमाहालयेति। अनम्विदितमित्यनेन वासनायाः क्षणिकत्वं सूचितम्।

(६) ननु पूर्वज्ञानात्मकवासनावैचित्र्यादुत्तरज्ञानानां वैचित्र्यं तर्हि पूर्वज्ञानवैचित्र्यमेव कुतस्तत्राह पूर्वनीलादीति।

(७) तत्र भवान्भाष्यकारः प्रमाणप्रवृत्त्यप्रवृत्तिपूर्वकौ सम्भवासम्भवाविति यदनेन सूचयामास—यथा किल ज्ञानाद्वैतेन स्थूलस्यार्थस्यासम्भवः परेण भाष्यते एवमभेदेनापि मया च सुखच इत्यप्रयोजकोऽसम्भवः, प्रमाणन्तु द्वाभ्यामप्यादरणीयम्, तत्रासम्भवं परमते दर्शयन्नाह इदमत्रेत्यादिना। वौद्धोक्तं ज्ञानाद्वैतस्य

घटपटादयो हि स्थूला भासन्ते न तु परमसूक्ष्मास्तत्रेदं नानादिग्देशव्यापित्वलक्षणं स्थौल्यं यद्यपि ज्ञानाकारत्वेनावरणानावरणलक्षणेन विरुद्धधर्मसंसर्गेण युज्यते ज्ञानोपाधेरनावृतत्वादेव, (१)तथापि तद्देशत्वातद्देशत्वकम्पाकम्पत्वरक्तारक्तत्वलक्षणविरुद्धधर्मसंसर्गैरस्य नानात्वं प्रसज्यमानं ज्ञानाकारत्वेऽपि न शक्यं शक्रेणापि वारयितुम् । (२)व्यतिरेकाव्यतिरेकवृत्तिविकल्पौ च परमाणोरशक्यत्वं चोपपादितानि वैशेषिकपरीक्षायाम् । तस्माद्बाह्यार्थवज्ज्ञानेऽपि स्थौल्यसम्भवः । (३)न च तावत्परमाण्वाभासमेकज्ञानमेकस्य नानात्मत्वानुपपत्तेः, आकाराणां वा ज्ञानतादात्म्यादेकत्वप्रसङ्गात् । (४)न च यावन्त आकारास्तावन्त्येव ज्ञानानि, तावतां ज्ञानानां मिथो वार्तानभिज्ञतया स्थूलानुभवाभावप्रसङ्गात् । (५)न च तत्पृष्ठभावी समस्तज्ञानाकारसङ्कलनात्मक एकः स्थूलविकल्पो विजृम्भते इति साम्प्रतम् । तस्यापि साकारतया स्थौल्यायोगात् । यथाह धर्मकीर्तिः—

(६)तस्मान्नार्थे न च ज्ञाने स्थूलाभासस्तदात्मनः ।
एकत्र प्रतिषिद्धत्वाद्बहुष्वपि न सम्भवः ॥ इति ।

तस्माद्भवतापि ज्ञानाकारं स्थौल्यं समर्थयमानेन प्रमाणप्रवृत्यप्रवृत्तिपूर्वको सम्भवासम्भवावास्थेयौ । तथा चेदन्तास्पदमशक्यं ज्ञानाद्भिन्नं बाह्यमपह्नोतुमिति । यच्च ज्ञानस्य प्रत्यर्थं व्यवस्थायै विषयसारूप्यमास्थितं नैतेन विषयोऽपह्नोतुं शक्यः, असत्यर्थे तत्सारूप्यस्य तद्व्यवस्थायाश्चानुपपत्तेरित्याह—"न च ज्ञानस्य विषयसारूप्या"दिति । यश्च सहोपलम्भनियम उक्तः सोऽपि विकल्पं न सहते-यदि ज्ञानार्थयोः साहित्येनोपलम्भस्ततो विरुद्धो हेतुर्नाभेदं साधयितुमर्हति, साहित्यस्य तद्विरुद्धभेदव्याप्तत्वात्, अभेदे तदनुपपत्तेः । अथैकोपलम्भनियमः । न, एकत्वस्यावाचकः सहशब्दः । (७)अपि च किमेकत्वेनोपलम्भ आहो एक उपलम्भो ज्ञानार्थयोः ?न तावदेकत्वेनोपलम्भ इत्याह "बहिरुपलब्धेश्च विषयस्य" । अथैकोपलम्भनियमस्तत्राह—"अत एव सहोपलम्भनियमोऽपि प्रत्ययवि-

---

स्थूलस्यासम्भवमनुवदति तदेदमिति । ज्ञानभेदपक्षे विरुद्धधर्माध्यासाद्भेदः स्थूलस्य स्यात्र तु ज्ञानाभेदपक्षे ज्ञानावच्छेदकार्थस्य ज्ञायमानस्य तदभिन्नस्यानावृतत्वादावृतस्य च तदात्मत्वाभावेन विरोधाप्रसक्तेत्यर्थः ।

(१) इदानीमेतमसम्भवमनुमन्य बौद्धमतेऽप्यसम्भवमाह तथापीति । यद्यपि ज्ञानाभेदपक्षेऽवभासानवभासलक्षणविरुद्धधर्मसंसर्गो न प्रसज्यते तथाप्येकज्ञानपक्षाश्रिते पटे तद्देशत्वातद्देशत्वयोर्दर्शनाद्देशभेदेन च कृष्णपयोरपि सम्भवाज्ज्ञानाकारत्वेऽप्यर्थस्य वर्णितविरुद्धधर्मवत्त्वाद्भेदपक्षतुल्य इत्यर्थः ।

(२) अर्थस्य ज्ञानभेदेऽवयविन्यवयवे चोक्तं दोषान्तरमपि ज्ञाने दुर्निवारमित्याह व्यतिरेकेति ।

(३) नन्वाभिन्नदेशवतां परमाणूनामेव ज्ञानावलम्ब्यत्वाज्ज्ञानाभेदपक्षे कथं विरुद्धधर्माध्यासप्रसंगोऽत आह न च तावदिति ।

(४) प्रतिपरमाणुज्ञानभेदाङ्गीकारेऽपि दोषमाह न चेति ।

(५) ननु एकैकज्ञानगृहीतनानापरमाणुपरामर्शात्मकः प्रत्ययः स्थूलालम्बनः स्यात् इत्यत्राह न च तदभ्युपेति ।

(६) तस्मादिति । तस्मात्—बुद्धिविकल्पादितर्कात्, अर्थे-परमाणुसमूहात्मकेऽर्थे, न स्थूलाभासः, न च ज्ञानात्मके विषये, एकत्र ज्ञाने वर्णितेन मार्गेण, तदात्मनो—नानाकारात्मकत्वस्य निषिद्धत्वात्, बहुष्वपि विज्ञानेषु परमाणुगोचरेषु स्थूलाभासस्य न सम्भवः तेषां मिथो वार्तानभिज्ञत्वादित्यक्षरार्थः ।

(७) तथा चावाचकशब्दप्रयोगान्निग्रहस्थानमेवेत्यर्थः। अथैकोपलम्भनियमादित्येव हेतुस्तदाह्यापीति ।

षययोरुपायोपेयभावहेतुको नाभेदहेतुक इत्यवगन्तव्यम्"। यथा हि सर्व चाक्षुषं प्रभारूपानुविद्धं(१) बुद्धिबोध्यं नियमेन मनुजैरुपलभ्यते न चैतावता घटादिरूपं प्रभात्मकं भवति, किन्तु प्रभोपायत्वान्नियम एवमिहाप्यात्मसाक्षिकानुभवोपायत्वादर्थस्यैकोपलम्भनियम इति। अपि च यत्रैकविज्ञानगोचरौ घटपटौ तत्रार्थभेदं विज्ञानभेदं चाध्यवस्यन्ति प्रतिपत्तारो न चैतदेकात्म्येऽवकल्प्यत इत्याह--**"अपि च घटज्ञानं पटज्ञान"मिति**। तथार्थाभेदेऽपि विज्ञानभेददर्शनान्न विज्ञानात्मकत्वमर्थस्येत्याह--**"तथा घटदर्शनं घटस्मरण"मिति**। अपि च स्वरूपमात्रपर्यवसितं ज्ञानं ज्ञानान्तरवार्तानभिज्ञमिति ययोर्भेदस्तद्वे न गृह्यते इति भेदोऽपि तद्वतो न गृहीत इति। एवं क्षणिकशून्यानात्मत्वादयोऽप्यनेकप्रमाणहेतुदृष्टान्तज्ञानभेदसाध्याः। एवं स्वमसाधारणमन्यतो व्यावृत्तं लक्षणं यस्य तदपि यस्मान्निवर्तते यतश्च व्यावर्तते तदनेकज्ञानसाध्यमेवं सामान्यलक्षणमपि विधिरूपमन्यापोहरूपं वाऽनेकज्ञानगम्यम्। (२)एवं वाच्यवाचकभावोऽनेकज्ञानसाध्यः। एवमविद्योपप्लववशेन यत् सदसद्धर्मत्वं यथा नीलमिति सद्धर्मो, नरविषाणमिवेत्यसद्धर्मः, अमूर्तमिति सदसद्धर्मः। शक्यं हि शशविषाणममूर्तं वक्तुम्, शक्यं च विज्ञानममूर्तं वक्तुम्। यथोक्तम्--

(३)अनादिवासनोद्भूतविकल्यपरिनिष्ठितः।
शब्दार्थोल्लिखितो धर्मो भावाभावोभयाश्रयः॥ इति।

एवं मोक्षप्रतिज्ञा च यो मुच्यते यतश्च मुच्यते येन मुच्यते तदनेकज्ञानसाध्या। (४)एवं विप्रतिपत्तिं प्रतिपादयितुं प्रतिज्ञेति यत्प्रतिपादयति येन प्रतिपादयति यश्च पुरुषः प्रतिपाद्यो यश्च प्रतिपादयति तदनेकज्ञानसाध्यमित्यसत्येकस्मिन्नेवार्थज्ञानप्रामाण्यान्तरे नोपपद्यते। तत्सर्वं विज्ञानस्य स्वांशालम्बनेऽनुपपन्नमित्याह--**"अपि च त्रयाणां ज्ञानयोः पूर्वोत्तरकालयोरि"ति**। अपि च भेदाश्रयः कर्मफलभावो नाभिन्ने ज्ञाने भवितुमर्हति, नहि स्वयं छिद्यते छिद्यते किन्तु दारु, नापि पाकः पच्यतेऽपि तु तण्डुलाः। तद्वदिहापि न ज्ञानं स्वांशेन ज्ञेयमात्मनि क्रियाविरोधादपि तु तदतिरिक्तोऽर्थः, पाच्या इव तण्डुलाः पाकातिरिक्ता इति। सूत्रिरचनापूर्वकमाह--**"किं चान्यद्, विज्ञानं विज्ञानमित्यप्यभ्युपगच्छतीति"**। (५)चोदयति--**"ननु विज्ञानस्य स्वरूपातिरिक्तग्राह्यत्वे"** इति। अयमर्थः--स्वरूपादतिरिक्तमर्थं चेद्विज्ञानं गृह्णाति ततस्तदप्रत्यक्षं सन्नार्थं प्रत्यक्षयितुमर्हति, नहि चक्षुरिव तन्निलीनमर्थे कंचनातिशयमाधत्ते येनार्थमप्रत्यक्षं सत्प्रत्यक्षयेदपि तु तत्प्रत्य

---

(१) विषयत्वेन सम्बद्धम्। चाक्षुषपदार्थस्यालोकसाक्षात्कारव्यतिरेकेणानुपलब्धावपि तदेवयादर्शनाद्धेतुरनैकान्तिक इति भावः।

(२) वाच्यवाचकत्वमविद्योपप्लवे, स च सदसद्धर्मेषु हेतुरिति भाष्यं व्याचक्षाणः आह एवमिति।

(३) अनादिवासनाजन्यसाविकल्पकप्रत्ययात्मकाविकल्पपरानिष्ठितो विषयीकृतो यः शब्दार्थ स भावीभूतनीलाद्याश्रयो नीलत्वादिरभावभूतनरविषाणाद्याश्रयो नरविषाणत्वादिरुभयभूतविज्ञाननरविषाणत्वाद्याश्रयोऽमूर्तत्वादिरिति त्रिविध इत्यर्थः।

(४) बन्धमोक्षादिप्रतिज्ञेतिभाष्यस्थादिपदार्थमाह एवमिति।

(५) विज्ञानस्य स्वव्यतिरिक्तार्थविषयत्वे कुतस्तस्याग्रेन ग्राह्यत्वापत्तिः? चक्षुर्वदप्रकाशमानस्याप्यर्थबोधकत्वसम्भवादतश्चोद्यानुपपत्तिमाशङ्क्याह चोदयतीति।

क्षतैवार्थप्रत्यक्षता । यथाहुः—(१)'अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यती'ति । (२)तच्चेद् ज्ञानान्तरेण प्रतीयेत तदप्रतीतं नार्थविषयं ज्ञानमपरोक्षयितुमर्हति, एवं तत्तदित्यनवस्था, तस्मादनवस्थाया विभ्यता वरं स्वात्मनि वृत्तिरास्थिता । अपि च यथा प्रदीपो न दीपान्तरमपेक्षते, एवं ज्ञानमपि न ज्ञानान्तरमपेक्षितुमर्हति समत्वादिति । तदेतत्परिहरति—**"तदुभयमप्यसत्प्रत्यक्षज्ञानग्रहणमात्र एव विज्ञानसाक्षिग्रहणाकाङ्क्षानुत्पादादनवस्थाशङ्कानुपपत्तेः"** । अयमर्थः—सत्यमप्रत्यक्षस्योपलम्भस्य नार्थदृष्टिः प्रसिध्यति न तूपलब्धारं प्रति तत्प्रत्यक्षत्वायो(३)पलम्भान्तरं प्रार्थनीयम्, अपेतु तस्मिन्निन्द्रियार्थसन्निकर्षादन्तःकरणविकारभेद उत्पन्नमात्र एव प्रमातुरर्थश्चोपलम्भश्च प्रत्यक्षौ भवतः, अर्थो हि निजस्वभावः प्रमातारं प्रति स्वप्रत्यक्षत्वायान्तःकरणविकारभेदमनुभवमपेक्षते, अनुभवस्तु जडोऽपि स्वच्छतया चैतन्यबिम्बोद्ग्रहणाय नानुभवान्तरमपेक्षते येनानवस्था भवेत्, (४)नह्यस्ति सम्भवोऽनुभव उत्पन्नश्च न च प्रमातुः प्रत्यक्षो भवति यथा नीलादिः । तस्माद्यथा छेत्ता छिदया छेद्यं वृक्षादि व्याप्नोति, न तु छिदा छिदान्तरेण, नापि छिदैव छेत्री किन्तु स्वत एव देवदत्तादिः । यथा वा पक्ता पाक्यं पाकेन व्याप्नोति न तु पाकं पाकान्तरेण, नापि पाक एव पक्ता किं तु स्वत एव देवदत्तादिः । एवं प्रमाता प्रमेयं नीलादि प्रमया व्याप्नोति न तु प्रमां प्रमान्तरेण, नापि प्रमैव प्रमात्री, किन्तु स्वत एव प्रमायाः प्रमाता व्यापकः । (५)न च प्रमातरि कूटस्थनित्यचैतन्ये प्रमापेक्षासम्भवो यतः प्रमातुः प्रमायाः प्रमान्तरापेक्षायामनवस्था भवेत् । तस्मात्सुष्ठूक्तं 'विज्ञानग्रहणमात्र एव विज्ञानसाक्षिणः प्रमातुः कूटस्थनित्यचैतन्यस्य ग्रहणाकाङ्क्षानुत्पादादि'ति । यदुक्तं 'स्वमात्मादवभास्यावभासकभावानुपपत्तेरि'ति । तत्राह—**"साक्षिप्रत्यययोश्च स्वभाववैषम्यादुपलब्ध्रुपलभ्यभावोपपत्तेः"** । मा भूज्ज्ञानयोः साम्येन ग्राह्यग्राहकभावो ज्ञातृज्ञानयोस्तु वैषम्यादुपपद्यत एव । (६)ग्राह्यत्वं च ज्ञानस्य न ग्राहकक्रियाजनितफलशालितया यथा बाह्यार्थस्य, फले फलान्तरानुपपत्तेः, यथाहुः—'न संविदर्थते फलत्वादि'ति(७), अपि

---

(१) अप्रत्यक्षेति । यद्यप्रत्यक्षं उपलम्भः स्यान्हि चक्षुष इव तस्यार्थदृष्टिरजन्या स्यात्; सा च न सिध्यति, तस्या अप्यन्यदृष्ट्यपेक्षत्वेनानवस्थानादित्यर्थः ।

(२) नन्वेवं चेत्तर्हि ज्ञानं ज्ञानान्तरप्रत्यक्षं सदर्थप्रकाशो भवतु, तत्राह तच्चेदिति ।

(३) उपलम्भप्रत्यक्षत्वाय । स्वप्रकाशसाक्षिणि अन्तःकरणप्रतिबिम्बिते सत्यन्तःकरणपरिणामस्य भास्वरस्य स्वत एव साक्षिप्रतिबिम्बाधारतया सिद्धिसम्भवान्न परिणामान्तरादपरोक्षतेति ग्रन्थार्थः ।

(४) यदि परिणामान्तरादनुभवापारोक्ष्यं तर्ह्यनुभव उदितोपि कदाचिन्न प्रकाशेत, नचैवमतो नित्यसाक्ष्यनुभवसिद्ध इत्याह न ह्यस्तीति ।

(५) ननु माभूज्ज्ञानविषयज्ञानपरिणामान्तरापेक्षयाऽनवस्था, साक्षिणस्तु साक्ष्यन्तराश्रितप्रमापेक्षयाऽनवस्था स्यादित्याशंक्य स्वप्रकाशत्वान्नैवमित्याह न चेति ।

(६) ननु साक्षिणं प्रति प्रत्ययस्योपलभ्यत्वे तद्विषय उपलम्भोऽन्यो वाच्यस्तस्य च प्राक्निरासात्पूर्वापरविरोध इति भ्रमभञ्जनायाह ग्राह्यत्वं चेति । फलेऽन्तःकरणगतज्ञानपरिणामे स्वाभाविकाकाशकल्पसाक्षिचैतन्यव्यतिरेकेण परिणामान्तरापेक्षफलान्तरानुपपत्तेरित्यर्थः ।

(७) परिणामज्ञानेन वेद्यं ज्ञायते फलत्वादित्यर्थः ।

तु प्रमातारं प्रति स्वतःसिद्धप्रकटतया (१)प्राप्तोऽप्यर्थः प्रमातारं प्रति सत्यां संविदि प्रकटः संविदपि प्रकटा(२)। यथाहुरन्ये 'नास्याः कर्मभावो(३) विद्यत इति। (४)स्यादेतत् यत्प्रकाशते तदन्येन प्रकाश्यते यथा ज्ञानार्थौ तथा च साक्षीति नास्ति प्रत्यक्षसाक्षिणोर्वैधर्म्यमित्यत आह–"स्वयंसिद्धस्य च साक्षिणोऽप्रत्याख्येयत्वात्"। तथाहि–अस्य साक्षिणः सदाऽसन्दिग्धाविपरीतस्य नित्यसाक्षात्कारताऽनागन्तुकप्रकाशत्वे घटते। तथाहि–(५) प्रमाता असन्दिग्धोऽप्यसन्दिग्धो विपर्यस्यत्यप्यविपरीतः परोक्षमर्थमुत्प्रेक्षमाणोऽप्यपरोक्षः स्मरन्नप्यानुभविकः प्राणादिमात्रस्य, न चैतदन्याधीनसम्वेदनत्वे घटते। अनवस्याप्रसङ्गश्चोक्तः। तस्मात्स्वयंसिद्धतास्यानिच्छताप्यप्रत्याख्येया प्रमाणमार्गायत्तत्वादिति। किं चोक्तेन क्रमेण(६) ज्ञानस्य स्वयमवगन्तृत्वाभावात् प्रमातुरनभ्युपगमे च **प्रदीपवद्विज्ञानमवभासकान्तरनिरपेक्षं स्वयमेव प्रथत इति ब्रुवताऽप्रमाणगम्यं विज्ञानमनवगन्तृकामित्युक्तं स्यात् शिलाघनमध्यस्थप्रदीपसहस्रप्रथनवत्**। अवगन्तुश्चित्कस्यचिदपि न प्रकाशते कृतमवगमेन स्वयंप्रकाशेनेति। विज्ञानमेवावगन्त्रिति मन्वानः शङ्कते–"बाढमेवमनुभवरूपत्वा"दिति। न फलस्य कर्तृत्वं कर्मत्वं वास्तीति प्रदीपवत् कर्त्रन्तरमीक्षितव्यम्, तथा च न सिद्धसाधनमिति। परिहरति–"नान्यस्यावगन्तुरिति"। ननु साक्षिस्थानेऽस्त्वस्मदभिमतमेव विज्ञानं तथा च नाम्नैव विप्रतिपत्तिर्व्यर्थ(७) इति शङ्कते—"साक्षिणोऽवगन्तुः स्वयंसिद्धतामुपक्षिपताऽभिप्रेयता स्वयं प्रथते विज्ञानमित्येष एवे"–ति। निराकरोति—"ने"ति। भवति हि विज्ञानस्योत्पादादयो धर्मा अभ्युपेतास्तथा चास्य फलतया नावगन्तृत्वम्, कर्तृफलभावस्यैकत्र विरोधात्, किन्तु प्रदीपादितुल्यतेत्यर्थः ॥२८॥

सू० वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥

बाधाबाधौ वैधर्म्यं, स्वप्नप्रत्ययो बाधितो जाग्रत्प्रत्ययश्चाबाधितः। त्वयापि चावश्यं जाग्रत्प्रत्ययस्याबाधितत्वमास्थेयं तेन हि स्वप्नप्रत्ययो बाधितो मिथ्येत्यवगम्यते। जाग्रत्प्रत्य-

---

(१) ननु यदि परिणामव्यतिरेकेण संवित् साक्षिणं प्रत्यपरोक्षा तदर्थोऽपि स्याद्व्यापकसाक्षिसम्बन्धस्य संविदर्थयोरविशेषादित्याशंक्याह प्राप्तोऽपीति।

(२) अयं भावः—स्वरूपानुभवः सर्वव्याप्यप्यविद्यावृतत्वान्न भासते किन्तु निर्मले इव मुकुरतले मुखं भास्वरस्वभावावशेषवदन्तःकरणे व्यज्यते इति तद्वृत्तिरपि भासुरा अनिगृहिता चेति भवति स्वभावप्रकटा, अर्थस्त्वन्तःकरणं प्रति व्यवहितो न च स्वभावत एव चैतन्याभिव्यक्तिक्षमः, सम्बन्धविशेषेऽपि स्वभावविशेषाभिव्यञ्जकाभ्यञ्जकत्वं दृष्टम्, यथा चाक्षुषी प्रभा सम्बन्धाविशेषेऽपि रूपादेव व्यञ्जयति न वाय्वादिकम्, तस्मात्परिणामाभिव्यक्तानुभवादर्थोऽनिगृहीतिरिति।

(३) परिणामक्रियाजन्यफलभागिता।

(४) आत्मनः स्वप्रकाशत्वबलादिदं सर्वं सिध्येत, तदेवासिद्धमित्यभिप्रायेणाशङ्कते स्यादेतदिति।

(५) असन्दिग्धाविपर्यस्तत्वमुदाहरति तथाहि प्रमातेत्यादिना। अत्र चात्मा स्वयंप्रकाशः शश्वदपरोक्षत्वात्, यत्रैवं तत्रैवं यथा घट इति प्रयोगो द्रष्टव्यः। शश्वदसन्दिग्धत्वाच्छश्वदपरोक्षत्वमात्मनि द्रष्टव्यम्। आत्मविषयसंविदङ्गीकारे दोषमाहानवस्थेति।

(६) न क्रिया तया व्याप्यते किन्तु कर्मेत्यनेनेत्यर्थः। अनेन विज्ञानं व्यतिरिक्तप्राह्यमित्यनुमानस्य विपक्षे बाधः प्रदर्शितः।

(७) नार्थे इति। नार्थेऽपि विप्रतिपत्तिः, तस्य स्वप्नतेऽपि मिथ्यात्वादित्यर्थः।

यस्य तु बाध्यत्वे स्वप्नप्रत्ययस्यासौ न बाधको भवेत्, नहि बाध्यमेव बाधकं भवितुमर्हति । तथा च स्वप्नप्रत्ययो मिथ्येति साध्यविकलो दृष्टान्तः स्यात्स्वप्नवदिति(१)। तस्माद्बाधाबाधाभ्यां वैधर्म्याच्च स्वप्नप्रत्ययदृष्टान्तेन जाग्रत्प्रत्ययस्य शक्यं निरालम्बनत्वमध्यवसातुम्। "निद्राग्लान"मिति करणदोषाभिधानम् । मिथ्यात्वाय वैधर्म्यान्तरमाह—"अपि च स्मृतिरेवे"ति (२)संस्कारमात्रजं हि विज्ञानं स्मृतिः । (३)प्रत्युत्पन्नेन्द्रियसम्प्रयोगजन्यशब्दसादृश्यान्यथानुपपद्यमानयोग्यद्रव्याणामुत्पत्तिलक्षणसामग्रीप्रभवं तु ज्ञानमुपलब्धिः, तदिह निद्राणस्य सामग्र्यन्तरविरहात्संस्कारः परिशिष्यते, तेन संस्कारजत्वात्स्मृतिः, सापि च निद्रादोषादिपरीताऽवर्तमानमपि पित्रादि वर्तमानतया भासयति, तेन स्मृतेरेव तावदुपलब्धेर्विशेषस्तस्याश्च स्मृतेर्वैपरीत्यमिति, अतो महदन्तरमित्यर्थः । (४)अपि च स्वतःप्रामाण्ये सिद्धे जाग्रत्प्रत्ययवानो यथार्थत्वमनुभवसिद्धं नानुमानेनान्यथयितुं शक्य(५)मनुभवविरोधेन तदनुत्पादादबाधितविषयताप्यनुमानोत्पादसामग्री, न च कारणाभावे कार्यमुत्पत्तुमर्हतीत्याशयवानाह "अपि चानुभवविरोधप्रसङ्गादि"ति ॥ २९ ॥

सू० न भावोऽनुपलब्धेः ॥ ३० ॥

(६)यथा लोकदर्शनं चान्वयव्यतिरेकावनुश्रियमाणावर्थ एवोपलब्धेर्भवतो नार्थानपेक्षायां वासनायां वासनाया अप्यर्थोपलब्ध्यधीनत्वदर्शनादित्यर्थः । अपि चाश्रयाभावादपि न लौकिकी वासनोपपद्यते । न च क्षणिकमालयविज्ञानं वासनाधारो भवितुमर्हति, द्वयोर्युगपदुत्पद्यमानयोः सव्यदक्षिणशृङ्गवदाधाराधेयभावाभावात् । प्रागुत्पन्नस्य चाधेयोत्पादसमये सतः क्षणिकत्वव्याघात इत्याशयवानाह—"अपि च वासना नामे"ति । शेषमतिरोहितार्थम् ॥ ३० ॥

सू० क्षणिकत्वाच्च ॥ ३० ॥

स्यादेतत् यदि साकारं विज्ञानं न सम्भवति बाह्यश्चायः स्थूलसूक्ष्मविकल्पेनासम्भवी ।

---

(१) बाह्यार्थापह्नवापेक्षोक्ते जाग्रत्प्रत्यया निरालम्बनाः प्रत्ययत्वात्स्वप्नप्रत्ययवदित्यनुमाने इत्यर्थः ।

(२) एवमनुमानस्य बाध्यत्वेन सोपाधिकत्वं प्रदर्श्य प्रमाणाजन्यत्वेन तदाह संस्कारेति ।

(३) उपलब्धिस्त्विति भाष्यगतमुपलब्धिपदं व्याचष्टे प्रत्युत्पन्नेति । वर्तमानवस्त्विन्द्रियसंयोगादिप्रमाणषट्कजन्यं ज्ञानमुपलब्धिरित्यर्थः ।

(४) उक्तानुमानीयप्रत्ययत्वहेतोर्बाधितत्वमप्याह अपि चेति ।

(५) ननु सामान्यतः प्राप्तमपि प्रामाण्यमनुमानेनापोद्यतामत आहानुभवेति । अबाधितविषयत्वेन ज्ञातस्यानुमानस्य प्रमाणत्वात्स्मृति प्रत्यक्षबाधे न प्रमाजनकत्वमतो बाधकानुदयाच्च प्रत्यक्षस्य प्रामाण्यापवाद इत्यर्थः ।

(६) ननु पूर्वपक्षिमतेऽर्थाभावाद्वासनानामर्थोपलब्धिभिः सह व्याप्तेरसम्भवादर्थोपलब्ध्यभावान्न वासनाया भाव इति कथं सङ्गच्छत इत्याशंक्याह यथेति । पूर्वपक्षिणापि ह्यर्थोपलब्धेः स्वप्ने वासनाजन्यत्वं लौकिकान्वयव्यतिरेकाभ्यामवगन्तव्यम्, तद्दृष्टान्तेन च जाग्रत्यनुमेयस्तथाच यो लौकिकान्वयव्यतिरेकौ तावर्थोपलब्धेः कार्यस्यार्थ एव कारणे सति भवतः नार्थानपेक्षवासनारूपकारणे, स्वप्नप्रत्ययहेतुवासनाया अपि जाग्रदर्थोपलब्ध्यधीनत्वदर्शनात्कारणकारणत्वेन तत्राप्यर्थोपलब्धेः स्थितत्वादतो वासनानामर्थोपलब्धिभिर्व्याप्तिर्विरुद्धेति हृदयम् ।

हन्तैवमर्थज्ञाने सत्त्वेन तावद्विचारं न सहेते । नाप्यसत्त्वेन, असतो भासनायोगात् । नोभयत्वेन, विरोधात् सदसतोरेकत्वानुपपत्तेः । नाप्यनुभयत्वेन, एकनिषेधस्येतरविधौनगान्तरीयकत्वात् । तस्माद्विचारासहत्वमेवास्तु तत्त्वं वस्तुनाम् । यथाहुः—

इदं वस्तु बलायातं यद्वदन्ति विपश्चितः ।
यथायथार्थाश्चिन्त्यन्ते विविच्यन्ते तथातथा ॥ इति ।

नैं क्वचिदपि पक्षे व्यवतिष्ठन्त इत्यर्थः । तदेतन्निराचिकीर्षुराह—"**शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणाय नादरः क्रियते**"(१) । लौकिकानि हि प्रमाणानि सदसत्त्वगोचराणि तैः खलु सत्सादिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं व्यवस्थाप्यते । असच्चासदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं व्यवस्थाप्यते । सदसतोश्च विचारासहत्वं व्यवस्थापयता सर्वप्रमाणविप्रतिषिद्धं व्यवस्थापितं भवति । तथा च सर्वप्रमाणविप्रतिषेधान्नेयं व्यवस्थोपपद्यते । (२) यदुच्यते — तात्त्विकं प्रामाण्यं प्रमाणानामनेन विचारेण व्युदस्यते न सांव्यवहारिकम् , तथा च भिन्नविषयत्वाच्च सर्वप्रमाणविप्रतिषेध इत्यत आह—"**नह्ययं सर्वप्रमाणप्रसिद्धो लोकस्य व्यवहारोऽयत्नतत्त्वमधिगम्य शक्यतेऽपह्नातुम्** । प्रमाणानि हि स्वगोचरे प्रवर्तमानानि **तत्त्वमिदमित्येव** प्रवर्तन्ते । अतात्त्विकत्वं तु तद्गोचरस्यान्यतो बाधकादवगन्तव्यं न पुनः सांव्यवहारिकं नः प्रामाण्यं न तु तात्त्विकमित्येव प्रवर्तन्ते । बाधकं चातात्त्विकत्वमेषां तद्गोचरविपरीततत्त्वोपदर्शनेन दर्शयेत् , यथा शुक्तिकयं न रजतं मरीचयो न तोयमेकश्चन्द्रो न चन्द्रद्वयमित्यादि, तद्वदिहापि समस्तप्रमाणगोचरविपरीततत्त्वान्तरव्यवस्थापनेनातात्त्विकत्वमेषां प्रमाणानां बाधकेन दर्शनीयं न त्वव्यवस्थापिततत्त्वान्तरेण प्रमाणानि शक्यानि बाधितुम् । (३) विचारासहत्वं वस्तूनां तत्त्वं व्यवस्थापयद्बाधकमतात्त्विकत्वं प्रमाणानां दर्शयतीति चेत् , (४)किं पुनरिदं विचारासहत्वं वस्तु यत्तत्त्वमभिमतं किं तद्वस्तु परमार्थतः सदादीनामन्यतमत्केवलं विचारं न सहते, अथ विचारासहत्वेन निस्तत्त्वमेव । (५) तत्र परमार्थतः सदादीनामन्यतमद्विचारं न सहत इति विप्रतिषिद्धम् । न सहते चेन्न सदादीनामन्यतमदन्यतमच्चेत्कथं न विचारं सहते, अथ निस्तत्त्वं चेत्कथमन्यतमत्तत्त्वमव्यवस्थाप्य शक्यमेवं वक्तुम् । (६)न च निस्तत्त्वतैव तत्त्वं भावानां, तथा सति हि तत्त्वा-

---

(१) सूत्रान्तराणि शून्यवादपक्षखण्डनाय न विरच्यन्त इत्यर्थः । नाभावो ज्ञानार्थयोः प्रमाणैरुपलब्धेरिति सूत्रं योजयन्नित्याह लौकिकानि इति ।

(२) प्रपञ्चस्यावास्तविकत्व व्यवस्थापयितुमधिष्ठानतत्त्वस्वरूपमङ्गीकार्यं पूर्वपक्षिमते च तस्याभाव प्रमाणतस्तत्त्वानुपलब्धेरिति प्रतिपादयन्न भावोऽनुपलब्धेरिति सूत्रं योजयन्नाह यदुच्यतेति ।

(३) ननु किमधिष्ठानतत्त्वबाधनेन, प्रत्यक्षादिप्रमितवस्तुगत विचारासहत्वमेव बाधकप्रमाणं गमयित्वाभिप्रायेणाशङ्कते विचारेति । (४) विकल्पद्वारा समाधत्ते किं पुनरिति ।

(५) नाद्य इत्याह तत्रेति । द्वितीयेऽपि निस्तत्त्वं सदादिपक्षनिविष्टं न वा ? नाद्यः, सदादिप्रकारतत्त्व व्यवस्थायाः पूर्वपक्ष्यनिष्टत्वादित्याह कथमन्यतमदिति ।

(६) न द्वितीय इत्याह न चेति । तत्त्वरूपत्वाभावो हि निस्तत्त्वम्, स चासन्नित्यत्वं भावान व्यवस्थापितं स्यात्तथाचासत्त्वाव्यवस्थाप्रतिज्ञाविरोध इत्यर्थः ।

भावः स्यात्, सोऽपि च विचारं न सहत इत्युक्तं भवद्भिः । (१) अपि चारोपितं निषेधनीयम्, आरोपश्च तत्त्वाधिष्ठानो दृष्टो यथा शुक्तिकादिषु रजतादेः, न चेत् किंचिदस्ति तत्त्वं कस्य कस्मिन्नारोपः । तस्मान्निष्प्रपञ्चं परमार्थसद्ब्रह्मानिर्वाच्यप्रपञ्चात्मनारोप्यते, तच्च तत्त्वं व्यवस्थाप्यातात्त्विकत्वेन सांव्यवहारिकत्वं प्रमाणानां बाधकेनोपपद्यत इति युक्तमुत्पश्यामः॥ ३१

सू० सर्वथाऽनुपपत्तेश्च ॥ ३२ ॥

विभजते—"किं बहुना उक्तेन, यथायथा ग्रन्थतोऽर्थतश्चायं बैनाशिकसमयः" इति । (१)ग्रन्थतस्तावत्पश्यनीतिष्ठनामिद्धमोषधाद्यधुरदप्रयोगः । अर्थतश्च नैरात्म्यमभ्युपेत्यालयविज्ञानं समस्तवासनाधारमभ्युपगच्छन्क्षणरमात्मानमभ्युपैति । एवं क्षणिकत्वमभ्युपेत्य "त्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषा धर्माणां धर्मता धर्मस्थितिते"ति नित्यतामुपैतीत्यादिबहूक्तेतव्यमिति ॥ ३२ ॥

सू० नैकस्मिन्नसम्भवात् ॥ ३३ ॥

निरस्तो मुक्तकच्छानां सुगतानां समयो, विवसनानां(३) समय इदानीं निरस्यते । तत्समयमाह संक्षेपविस्ताराभ्याम्—"सप्त चैषां पदार्थाः सम्मता" इति । तत्र संक्षेपमाह—"संक्षेपतस्तु द्वावेव पदार्थावि"ति । बोधात्मको जीवो जडवर्गस्त्वजीव इति यथायोगं तयोर्जीवाजीवयोरिममपरं प्रपञ्चमाचक्षते । तमाह—"पञ्चास्तिकाया नामे"ति। "सर्वेषामप्येषामवान्तरप्रभेदानि"ति । जीवास्तिकायस्त्रिधा(४)—बद्धो मुक्तो नित्यसिद्धश्चेति । पुद्गलास्तिकायः षोढा-पृथिव्यादीनि चत्वारि भूतानि स्थावरं जंगमं चेति । धर्मास्तिकायः (५)प्रवृत्त्यनुमेयोऽधर्मास्तिकायः स्थित्यनुमेयः । आकाशास्तिकायो द्वेधा—लोकाकाशोऽलोकाकाशश्च । तत्रोपर्युपरि स्थितानां लोकानामन्तवर्ती लोकाकाशस्तेषामुपरि मोक्षस्थानमलोकाकाशः । तत्र हि न लोकाः सन्ति । तदेवं जीवाजीवपदार्थौ पञ्चधा प्रपञ्चितौ । (६)आस्रवसंवरनिर्जराबन्धः पदार्थाः प्रवृत्तिलक्षणाः प्रपञ्च्यन्ते । द्विधा प्रवृत्तिः—सम्यङ्मिथ्या च । तत्र मिथ्याप्रवृत्तिरास्रवः । सम्यक्प्रवृत्ती तु संवरनिर्जरौ । (७)आस्रावयति

---

(१) अधिष्ठानतत्त्वज्ञानाभावाद्बाधासम्भवं प्रदर्श्याधिष्ठानाभावादारोपासम्भवं दर्शयन्नाहापिचेति ।

(२) यथायथेति भाष्यस्थधीप्सां व्याचष्टे ग्रन्थत इति । दर्शनं स्थानामिति वक्तव्ये पश्यनातिष्ठनेतिवैद्यानामपशब्दप्रयोगः, शितिपत्यये तिष्ठपश्यावादेशौ युष्मत्यये तु नाशित्वादेर्वं मिह लेचन इत्यस्य निष्ठान्तस्य मीढमितिरूपं भवति मिद्धमिति त्वपशब्दस्तथा षोधशब्दोपि उपवासे बौद्धैः प्रयुक्तोपि लोकाप्रयुक्तत्वादपशब्दो बोद्धव्यः ।

(३) जैनानाम् । एकरूपब्रह्मवादविरोध्यनेकान्तवादभक्तस्य बुद्धेस्थित्वात्सकृतिर्वोध्या ।

(४) अस्तीति कायन्ते शब्द्यन्ते इत्यास्तिकायाः, कैगै शब्दे इत्यस्माद्धातोर्निष्पन्नः कायशब्दोऽत्र द्रष्टव्यः। चित्र वक्ष्यः केचित्साधनैर्मुक्ताः, नित्यसिद्धश्च जैनमतेऽहंनशब्दवाच्यः ।

(५) प्रवृत्त्यनुमेय इति । प्रवृत्तिर्द्विधा सम्यङ्मिथ्या च, तत्र धर्मास्तिकायः सम्यक्प्रवृत्त्यनुमेयः, शास्त्रीयब्राह्मप्रवृत्त्या ह्यान्तरोऽपूर्वाख्यो धर्मो ऽनुमीयत इत्यर्थः । अधर्मेति । ऊर्ध्वगमनशीलो हि जीवस्तस्य देहेऽवस्थित्याऽधर्मोऽनुमीयत इत्यर्थः ।

(६) बन्धमोक्षसाधनभूते समीच्यसमीच्ये प्रवृत्ती दर्शयन्नाहास्रवेति ।

(७) आस्रवाख्यमिथ्याप्रवृत्तिस्वरूपं व्याचष्टे आस्रावयतीति । गमयतीत्यर्थः ।

पुरुषं विषयेष्वितीन्द्रियप्रवृत्तिरास्रवः । इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् स्पृशद्रूपादिज्ञानरूपेण परिणमत इति । अन्ये तु कर्माण्यास्रवमाहुः, तानि हि कर्तारमभिव्याप्य स्रवन्ति कर्तारमनुगच्छन्तीत्यास्रवः । सेयं मिथ्याप्रवृत्तिरनर्थहेतुत्वात् । संवरनिर्जरौ च सम्यक् प्रवृत्ती । तत्र शमदमादिरूपा प्रवृत्तिः संवरः । सा ह्यास्रवस्रोतसो द्वारं संवृणोतीति संवर उच्यते । निर्जरस्त्वनादिकालप्रवृत्तिकषायकलुषपुण्यापुण्यप्रहाणहेतुस्तपश्शिलारोहणादिः । स हि निःशेषं पुण्यापुण्यं सुखदुःखोपभोगेन जरयतीति निर्जरः । (१)बन्धोऽष्टविधं कर्म । तत्र घातिकर्म चतुर्विधम्, तद्यथा—ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमन्तरायमिति । तथा चत्वार्यघातिकर्माणि, तद्यथा—वेदनीयं नामिकं गोत्रिकमायुष्कं चेति । (२)तत्र सम्यग् ज्ञानं न मोक्षसाधनम्, नहि ज्ञानादस्तुसिद्धिरतिप्रसङ्गादिति विपर्ययो ज्ञानावरणीयं कर्मोच्यते । आर्हतदर्शनाभ्यासान्न मोक्ष इति ज्ञानं दर्शनावरणीयं कर्म । बहुषु विप्रतिषिद्धेषु तीर्थकारैरुपदर्शितेषु मोक्षमार्गेषु विशेषानवधारणं मोहनीयं कर्म । मोक्षमार्गप्रवृत्तानां तद्विघ्नकरं विज्ञानमन्तरायं कर्म । तानीमानि श्रेयोहन्तृत्वाद् घातिकर्माण्युच्यन्ते । अघातीनि कर्माणि तद्यथा—वेदनीयं कर्म (३)शुक्लपुद्गलविपाकहेतुः, तद्धि बन्धोऽपि न निःश्रेयसपरिपन्थि तत्त्वज्ञानविघातकत्वात् । शुक्लपुद्गलारम्भकवेदनीयकर्मानुगुणं नामिकं कर्म, तद्धि शुद्धपुद्गलस्याद्यावस्थां कललबुद्बुदादिप्रारभते । गोत्रिकमव्याकृतम् ततोऽप्यं शक्तिरूपेणावस्थितम्(४) । आयुष्कं स्वायुः कायति कथयत्युत्पादनद्वारेत्यायुष्कम्(५) । तान्येतानि शुक्लपुद्गलाद्याश्रयत्वाद अघातीनि कर्माणि । तदेतत्कर्माष्टकं पुरुषं बध्नातीति बन्धः । विगलितसमस्तक्लेशतद्वासनस्यानावरणज्ञानस्य सुखैकतानस्यात्मन उपरि देशावस्थानं मोक्ष इत्येके । अन्ये तूर्ध्वगमनशीलो हि जीवो धर्माधर्मास्तिकायेन बद्धस्तद्विमोक्षाद्यदूर्ध्वं गच्छत्येव स मोक्ष इति । त एते सप्त पदार्था जीवादयः सहाशान्तरप्रभेदैरुपन्यस्ताः । तत्र सर्वत्र चेमं सप्तभङ्गिनयन्यायमवतारयन्ति(६)—"स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः

---

(१) बन्धाख्यफलमाह बन्ध इति । यद्यपि पूर्वोक्त आस्रवोपि बन्धस्तथापि तद्धेतुत्वादयमपि बन्ध इति द्रष्टव्यम् ।

(२) ज्ञानावरणीयं कर्माख्यातुं भूमिकामाह तत्रेति । अतिप्रसङ्गात्—आशामोदकज्ञानादिभ्योऽमोदकादिसिद्धिप्रसङ्गात् ।

(३) शरीराकारेण परिणामहेतुः । शरीरद्वारा तत्त्ववेदनहेतुत्वाच्च तस्य वेदनीयत्वम् ।

(४) वक्ष्यमाणायुष्ककर्मणो देहाकारपरिणामशक्तिर्गोत्रिकं कर्मेत्यर्थः ।

(५) शुक्रशोणितव्यतिरेकजाते मिलितस्तदुभयरूपमायुष्कं कर्मेत्यर्थः ।

(६) सप्तभङ्गीन्यायप्रसारश्चैवं प्रदर्शितोऽनन्तवीर्येण—

तद्विधानविवक्षायां स्यादस्तीति मतिर्भवेत् ।
स्यान्नास्तीतिप्रयोगः स्यात्तन्निषेधे विवक्षिते ॥
क्रमेणोभयवाक्षायां प्रयोगस्तदुपायभृत् ।
युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः ॥
आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते ।
अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः ।
समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यते ॥ इति ।

स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति नास्ति चावक्तव्यश्चे"ति। (१)स्याच्छब्दः खल्वयं निपातस्तिङन्तप्रतिरूपकोऽनेकान्तद्योतो, यथाहुः—

(२)वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम्।
स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपकः॥ इति।

यदि पुनरयमनेकान्तद्योतकः स्याच्छब्दो न भवेत् स्यादस्तीतिवाक्ये स्यात्पदमनर्थकं स्यात्, तदिदमुक्तमर्थयोगित्वादिति। अनैकान्तद्योतकत्वे तु स्यादस्ति कथं चिदस्तीति स्यात्पदात्कथंचिदर्थोस्तीत्यनेनानुक्तः प्रतीयत इति नानर्थकयम्। (३)तथा च—

स्याद्वादः सर्वथैकान्तत्यागात् किंवृत्तचिद्विधेः।
सप्तभङ्गनयापेक्षो हेयादेयविशेषकृत्॥

किंवृत्ते प्रत्यये खल्वयं चिन्निपातविधिना सर्वथैकान्तत्यागात् सप्तस्वेकान्तेषु(४) यो भङ्गस्तत्र यो नयस्तदपेक्षः सन् हेयोपादेयभेदाय स्याद्वादः कल्पते। (५)तथाहि—यदि वस्त्वस्त्येवेत्येवैकान्ततस्तत् सर्वथा सर्वदा सर्वत्र सर्वात्मनाऽस्त्येवेति न तदीप्साजिहासाभ्यां क्व चित्कदाचित्कथं चित्कश्चित् प्रवर्तेत निवर्तेत वा, (६)प्राप्ताप्रापणीयत्वात्, हेयहानानुपपत्तेश्च, अनैकान्तपक्षे तु क्वचित्कदाचित्कस्यचित्कथंचित् सत्त्वे हानोपादाने प्रेक्षावतां कल्पेते इति। तमेनं सप्तभङ्गीनयं दूषयति "नैकस्मिन्नसम्भवात्"। विभजते—"नह्येकस्मिन् धर्मिणि" परमार्थसति परमार्थसतां "युगपत्सदसत्त्वादीनां धर्माणां" परस्परपरिहारस्वरूपाणां समावेशः सम्भवति। (७)एतदुक्तं भवति—सत्यं यदस्ति वस्तु तत्तत्सर्वथा सर्वदा सर्वत्र सर्वात्मना निर्वचनीयेन रूपेणास्त्येव न नास्ति, यथा प्रत्यगात्मा। यत्तु क्वचित्कथंचित्कदाचित्केनचिदात्मनाऽस्तीत्युच्यते यथा प्रपञ्चस्तद्व्यवहारतो न तु परमार्थतस्तस्य विचारासहत्वात्(८)। न च प्रत्ययमात्रं वास्तवत्वं व्यवस्थापयति, शुक्तिमरुमरीचिकादिषु रजततोयादेरपि वास्तवत्वप्रसङ्गात्। लौकिकानामबाधेन तु तद्व्यवस्थायां

---

(१) नन्वस्ति स्यादिति वर्तमानत्वावीधिवाचिनोः कथमेकार्थपर्यवसानमत आह स्याच्छब्द इति। तिङन्ततुल्योऽतो न विरुध्यतेत्यर्थः।

(२) वाक्येष्विति। स्यादस्तीत्यादिवाक्येषु स्यादित्ययं शब्दः अस्तित्वादिगम्यं प्रति विशेषणीभूतोऽनेकान्तप्रकाशकोऽर्थसम्बन्धित्वात्तिङन्तसदृशो निपात इत्यर्थः। अर्थयोगित्वमेवोपपादयन्नाह यदीति।

(३) स्यात्पदेनानेकान्ताभिधाने प्रयोजनमाह तथाचेति। किंशब्दोपरि त्थमुप्रत्यये तदुपरि च चिन्निपातेन कथंचिदस्ति कथंचिन्नास्तीतिरूपात्सर्वथैकान्तपक्षत्यागाज्जायमानः सप्तभङ्ग्यपेक्षः स्याद्वादो हेयोपादेयबुद्धिविशेषकृत् भवतीति कारिकार्थः। इममेवार्थं स्फुटीकुर्वन्नाह किंवृत्ते इति।

(४) अस्त्यादीनियमेषु।

(५) सप्तानामेषान्तानां भङ्गे हेतुं न्यायमाह तथाहीति।

(६) प्रवृत्त्यभावे निवृत्त्यभावे च पर्यायेण हेतुद्वयमाह प्राप्तेति। प्राप्तस्य सद्वस्तुनोऽप्रापणीयत्वात्, असत्त्वे त्वेकान्ते हेयमेव त्यक्तमेवाहितं सदा स्यात्तस्य च साध्यं हानमनुपपन्नमित्यर्थः।

(७) स्याद्वादस्य हेयादिविशिष्टहेतुत्वं खण्डयन्नाहैतदुक्तमिति। यदस्ति तदस्त्येवेति नियमोऽस्माभिरपि स्वीक्रियते, यस्तु कथंचिदस्ति प्रपञ्चः स विकल्पितस्तत्त्व च हेयादिविभागासिद्धिरित्यर्थः।

(८) आरम्भणाधिकरणे (अ. २ पा. सू. १४) विचारासहत्वं यदसत्त्वे वस्तुनो न धर्मौ असत्त्वदशायामपि वस्त्वनुवृत्त्यापातात्. न च स्वरूपं सर्वदाऽन्वयप्रसङ्गादित्यादिना प्रदर्शितम्।

देहात्माभिमानस्याप्यबाधेन तात्त्विकत्वे सति लोकायतमतापातेन नास्तिकत्वप्रसङ्गात्। (१)पण्डितरूपाणां तु देहात्माभिमानस्य विचारतो बाधनं प्रपञ्चस्याप्यनैकान्तस्य तुल्यमिति। अपि च सदसत्त्वयोः परस्परविरुद्धत्वेन समुच्चयाभावे विकल्पः। न च वस्तुनि विकल्पः सम्भवति। तस्मात्स्थाणुर्वा पुरुषो वेति ज्ञानवत् सप्तत्वपञ्चत्वनिर्धारणस्य फलस्य निर्धारयितुश्च प्रमातुस्तत्करणस्य प्रमाणस्य च तत्प्रमेयस्य च सप्तत्वपञ्चत्वस्य सदसत्त्वसंशये साधु समर्थितं तीर्थकरणत्वमृषभेणात्मनः। निर्धारणस्य चैकान्तसत्त्वे सर्वत्र नानेकान्तवाद इत्याह "य एते सप्त पदार्था" इति। शेषमतिरोहितार्थम् ॥ ३३ ॥

एवं चात्माऽकात्स्न्र्यम् ॥ ३४ ॥

"एवं चे"ति चेन समुच्चयं द्योतयति। शरीरपरिमाणत्वं ह्यात्मनोऽकृत्स्नत्वं परिच्छिन्नत्वम्, तथा चानित्यत्वं, ये हि परिच्छिन्नास्ते सर्वेऽनित्या यथा घटादयस्तथा चात्मेति। तदेतदाह—"यथैकस्मिन् धर्मिणी"ति। इहं चापरमकृत्स्नत्वेन सूत्रितमित्याह—"शरीरिणां चानवस्थितपरिमाणत्वादि"ति। मनुष्यकायपरिमाणो हि जीवो न हस्तिकायं कृत्स्नं व्याप्तुमर्हत्यल्पत्वादित्यात्मनः कृत्स्नशरीराव्यापित्वादकात्स्न्र्यम्, तथा च न शरीरपरिमाणत्वमिति। तथा हस्तिशरीरं परित्यज्य यदा पुत्तिकाशरीरो भवति तदा न तत्र कृत्स्नः पुत्तिकाशरीरे संमीयेतेत्यकात्स्न्र्यमात्मनः। सुगममन्यत्। चोदयति—"स्याद्येतत्" "अनन्तावयव"इति। यथा हि प्रदीपो घटमहाहर्म्योदरवर्ती संकोचविकाशवानेवं जीवोऽपि पुत्तिकाहस्तिदेहयोरित्यर्थः। तदेतद्विकल्प्य दूषयति—"तेषां पुनरनन्तानामि"ति। न तावत्प्रदीपोऽत्र निदर्शनं भवितुमर्हति, अनित्यत्वप्रसङ्गात्। विशरारवो(२) हि प्रदीपावयवाः प्रदीपश्चावयवी प्रतिक्षणमुत्पत्तिनिरीधधर्मा, तस्मादनित्यत्वात्तस्य (३) नास्थिरो जीवस्तदवयवाश्चाभ्युपेतव्याः तथा च विकल्पद्वयोक्तं दूषणमिति। यच्च जीवावयवानामानन्त्यमुदितं तदनुपपन्नतरमित्याह—"अपि च शरीरमात्रे"ति ॥३४॥

शङ्कापूर्वं सूत्रान्तरमवतारयति—"अथ पर्यायेणे"ति। तत्राप्युच्यते—

न च पर्यायाद्द्रव्यविरोधो विकारादिभ्यः ॥ ३५ ॥

कर्माष्टकमुक्तं ज्ञानावरणीयादि। (४)किं चात्मनोऽनित्यत्वाभ्युपगमे आगच्छतामपगच्छतां चावयवानामियत्ताऽनिरूपणेन चात्मज्ञानाभावाज्जापवर्ग इति भावः। "अत एवमादिदोषप्रसङ्गादि"ति। आदिग्रहणसूचितं दोषं ब्रूमः। किं चैते जीवावयवाः प्रत्येकं वा चेतयेरन् समूहो वा, तेषां प्रत्येकं चैतन्ये बहूनां चेतनानामेकाभिप्रायत्वनियमाभावात् कदाचिद्विरुद्धदिक्रियत्वेन शरीरमुन्मथ्येत, समूहचैतन्ये तु हस्तिशरीरस्य पुत्तिकाशरीरत्वे द्वि

---

(१) प्रशस्तपण्डितानाम्, प्रशंसाया रूपप्प्रत्ययः।

(२) विनश्वराः।

(३) प्रदीपदृष्टान्तस्य। एवं च दृष्टान्तेऽनित्यत्वं न च दार्ष्टान्तिके इति दृष्टान्तदार्ष्टान्तिकयो वैषम्यमित्यर्थः।

(४) आगमापाय्यवयवानामनात्मत्वं भाष्योक्तं तदा सङ्गच्छेत यदि आत्मा नित्य इति पराभ्युपगमः स्यादितरथेष्टप्रसङ्गादारब्धावयविनामनात्मत्वेनावयवानामनात्मत्वादित्यभिप्रायेणाह किञ्चेति।

अवयवशेषो जीवो न चेतयेत्, विगलितबहुसमूहितया समूहस्याभावात्। "पुत्तिकाशरीर"इति। "अथवे"ति। पूर्वसूत्रप्रसञ्जितायां जीवानित्यतायां बौद्धवत्सन्ताननित्यतामाशङ्क्येदं सूत्रम्। 'न च पर्यायादप्यविरोधो विकारादिभ्यः'। न च पर्यायात् परिमाणानवस्थानेऽपि संतानाभ्युपगमेनात्मनो नित्यत्वादिविरोधो बन्धमोक्षयोः। कुतः? परिणामादिभ्यो दोषेभ्यः। सन्तानस्य वस्तुत्वे परिणामस्ततश्चर्मवदनित्यत्वादिदोषप्रसङ्गः। अवस्तुत्वे चादिग्रहणसूचितो नैरात्म्यापत्तिदोषप्रसङ्ग इति। (१) विसिचो-विवसनाः ॥ ३५ ॥

सू० अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥३६॥

(२) एवं हि मोक्षावस्थाभावि जीवपरिमाणं नित्यं भवेत् यद्यभूत्वा न भवेदभूत्वा भाविनामनित्यत्वाद्घटादीनाम्। कथं चाभूत्वा न भवेद्यदि प्रागप्यासीत्। (३) न च परिमाणान्तरावरोधेऽपूर्वं भवितुमर्हति। तस्मादन्त्यमेव परिमाणं पूर्वमप्यासीदित्यभेदः। तथा चैकशरीरपरिमाणतैव स्याज्जोपचितापचितशरीरप्राप्तिः, शरीरपरिमाणत्वाभ्युपगमव्याघाताद्इति। अत्र (४) चोभयोः परिमाणयोर्नित्यत्वप्रसङ्गादिति योजना। (५) एकशरीरपरिमाणतैवेति च दीप्यम्। (६) द्वितीये तु व्याख्याने उभयोरवस्थयोरिति योजना। एकशरीरपरिमाणता न दीप्या, किं त्वेकपरिमाणतामात्रमणुर्महान्वेति विवेकः ॥३६॥

सू० पत्युरसामञ्जस्यात् ॥ ३७ ॥

अविशेषेणेश्वरकारणवादोऽनेन निषिध्यत इति भ्रमनिवृत्त्यर्थमाह "केवले"ति। सांख्ययोगव्यपाश्रया हिरण्यगर्भपतञ्जलिप्रभृतयः। प्रधानमुक्तं, दृक्शक्तिः पुरुषः प्रत्ययानुपश्यः। (७) स च नानाक्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः प्रधानपुरुषाभ्यामन्यः। माहेश्वराश्चत्वारः-शैवाः, पाशुपताः, कारुणिकसिद्धान्तिनः, कापालिकाश्चेति। चत्वारोऽप्यमी महेश्वरप्रणीतसिद्धान्तानुयायितया माहेश्वराः। कारणमीश्वरः। कार्यं प्राधानिकं

---

(१) सिग् वस्त्रं विगतं येभ्यस्ते।

(२) ननु देहान्तरप्रवेशान्मुक्त्यवस्थं परिमाणमन्त्यन्तस्य नित्यत्वेनाद्यमध्यमयोर्नित्यत्वानुमाने परिणामत्रयापत्त्या कथमविशेषापादनमित्याशंक्याह एवमिति।

(३) नन्वेवमन्त्यपरिमाणस्य कालत्रयेऽनुवृत्तावपि देहभेदप्राप्तिकालेष्वात्मनः परिमाणान्तराणि किं न भवेयुरत आह न चेति। परिमाणभेदे द्रव्यभेदप्रसङ्गादित्यर्थः।

(४) सूत्रे।

(५) नन्वाद्यमध्यान्तिमपरिमाणानां नित्यत्वे आपतिते परिणामत्रयवत्त्वमात्मनः स्यात् कुत एकपरिणामताऽऽपाद्यते अत आहैकशरीरेति। त्रयाणां परिणामानां सर्वशरीरेषु समत्वात्सर्वशरीरेष्वेकरूपपरिणामताऽऽत्मनः स्यादिति दीप्यं व्याख्येयमित्यर्थः।

(६) सर्वदा परिणामैक्यस्यैवापाद्यत्वात्सूत्रगतोभयशब्देन न परिणामद्वयमभिधीयते किं त्वाद्यमध्यकालौ ततश्चाद्यमध्यकालयोरुभयोः परिणामनित्यत्वादित्येवं रूपं हेतुं योजयति भाष्यकार इत्याह द्वितीये त्विति। अस्यां व्याख्यायामविशेषशब्देन न परिणामत्रयस्य सर्वशरीरेषु तुल्यत्वमापाद्यते किन्तु यदैकशरीरे परिणामतामात्रं सर्वशरीरेष्वापाद्यते तदाऽणुर्वा महान्वाऽऽत्मा सर्वदेहेषु स्यादित्येव रूपमित्याहैकशरीरेति।

(७) भाष्ये प्रधानपुरुषयोरधिष्ठातेति द्विवचनमयोगादेको जीव इति भ्रमः स्यात्तं व्युदस्यन्नाह स च चेति। समासान्तर्गतैकवचने जात्याभिप्रायकमित्यर्थः।

महदादि । योगोप्योङ्कारादिध्यानधारणादिः । विधिश्चिषवणस्नानादिर्गूढचर्यावसानो (१)दुःखान्तो मोक्षः । पशव आत्मानस्तेषां पाशो बन्धनं तद्विमोक्षो दुःखान्तः । एष तेषामभिसन्धिः—चेतनस्य खल्वधिष्ठातुः कुम्भकारादेः कुम्भादिकार्ये निमित्तकारणत्वमात्रं न तूपादानत्वमपि (२) । तस्मादिहापीश्वरोऽधिष्ठाता जगत्कारणानां निमित्तमेव, न तूपादानमप्येकस्याधिष्ठातृत्वाधिष्ठेयत्वविरोधादिति प्राप्तम् ।

एवं प्राप्ते ऽभिधीयते—'परयुरसामञ्जस्यादि'ति । इदमत्राकूतम्—ईश्वरस्य निमित्तकारणत्वमात्रमागमाद्योच्येत प्रमाणान्तराद्वा ? प्रमाणान्तरमप्यनुमानमर्थापत्तिर्वा ? न तावदागमात्, तस्य निमित्तोपादानकारणत्वप्रतिपादनपरत्वादित्यसकृदावेदितम् । तस्मादनेनास्मिन्नर्थे प्रमाणान्तरमास्थेयम् । तत्रानुमानं तावन्न सम्भवति(३) । (४)तद्धि दृष्टानुसारेण प्रवर्तते तदनुसारेण चासामञ्जस्यम् । तदाह—"हीनमध्यमे"ति । एतदुक्तं भवति—आगमादीश्वरसिद्धौ न दृष्टमनुसर्तव्यं, नहि स्वर्गापूर्वदेवतादिष्वागमादवगम्यमानेषु किञ्चिदस्ति दृष्टम्, नह्यागमो दृष्टसाधर्म्यात्प्रवर्तते, तेन श्रुतसिद्ध्यर्थमदृष्टानि दृष्टविपरीतस्वभावानि सुबहून्यपि कल्प्यमानानि न(५) लोहगन्धितामावहन्ति प्रमाणवत्त्वात् । यस्तु तत्र कथञ्चिद् दृष्टानुसारः क्रियते स सुहृद्भावमात्रेणागमानपेक्षितमनुमानं तु दृष्टसाधर्म्येण प्रवर्तमानं दृष्टविपर्यये तुषादपि विभेतितरामिति । प्राणिकर्मापेक्षत्वाददोष इति चेत् । न । कुतः? कर्मेश्वरयोर्मिथः प्रवर्त्यप्रवर्तयितृत्वे इतरेतराश्रयत्वदोषप्रसङ्गात् । अयमर्थः—यदीश्वरः करुणापराधीनो वीतरागस्ततः प्राणिनः कपूये कर्मणि न प्रवर्तयेत्तच्चोत्पन्नमपि नाधितिष्ठेत् तावन्मात्रेण प्राणिनां दुःखानुत्पादात्, नहीश्वराधीना जनाः स्वातन्त्र्येण कपूयं कर्म कर्तुमहन्ति, तदनधिष्ठितं वा कपूयं (६)कर्म फलं प्रसोतुमुत्सहते । तस्मात्स्वतन्त्रोऽपीश्वरः कर्मभिः प्रवर्त्यत इति दृष्टविपरीतं कल्पनीयम् । तथ च यमपरो गाडस्योपरि स्फोट इतरेतराश्रयः प्रसज्येत, कर्मणेश्वरः प्रवर्तनीय ईश्वरेण च कर्मेति । शङ्कते—"अनादित्वादिति चेत्" पूर्वकर्मेश्वरः सम्प्रतितने कर्मणि प्रवर्त्यते तेनेश्वरेण सम्प्रतितनं कर्म स्वकार्ये प्रवर्त्यत इति । निराकरोति । "न, वर्तमानकालवदि"ति । अथ पूर्वं कर्म कथमीश्वराप्रवर्तितमीश्वरप्रवर्तनलक्षणं कार्यं करोति, (७)तत्रापि प्रवर्तितमीश्वरेण पूर्वतनकर्मप्रवर्तितेनेत्येवमन्धपरम्परा-

---

(१) गूढचर्या—स्वगुणाप्रख्यापनेन देशेषु वासः ।

(२) अनेन ईश्वरो न द्रव्योपादानं चेतनत्वात्कुलालवदित्युपानं सूचितम् ।

(३) तदात्मानं स्वयमकुरुतेत्यादिश्रुत्या बाधादित्यर्थः । नन्वाद्यं कार्यं सकर्तृकं कार्यत्वात्कुम्भवदित्यनुमानमेवेश्वरस्यानुपादानत्वे मानं स्यादिति चेन्न । जीवादृष्टजन्यत्वेन सिद्धसाधनात् । अव्यवहितप्राक्कालवर्तिप्रयत्नजन्यत्वसाधने चाद्यकार्यस्याव्यवहितप्रयत्नजन्यत्वस्य कुम्भेऽभावेन साध्यवैकल्यात् । एवं द्व्यणुकं द्व्यणुकोपादानसाक्षात्कारवज्जन्यं कार्यत्वादित्याद्यनुमानमपि अप्रसिद्धविशेषणविशेष्यत्वाभ्यां द्व्यणुकस्य तदुपादानसाक्षात्कारस्य चाविद्या दृष्टान्ते सन्दिग्धसाध्यत्वेन चाभासमित्यवधेयम् ।

(४) यथा चेतनस्य निमित्तत्वमात्रमनुमीयते तथा रागादिकमप्यनुमेयं व्यतिरविशेषात्तथा च वाचस्पतिमतनिरवद्यत्वविशेषविरुद्धोऽयं हेतुरित्याह तद्धीति ।

(५) कलङ्कगन्धिताम् । (६) कुत्सितम् ।

(७) नन्वीश्वरेण पूर्वं कर्म तावत्प्रवर्तयितुं न शक्यते कुत्सितफलानुदयप्रसङ्गात्, एवं पूर्वकर्मेश्वराप्र-

दोषः, चक्षुष्मता ह्यन्धो नीयते नान्धान्तरेण, तथेहापि द्वावपि (१)प्रवर्त्यावितिं कः कं प्रवर्तयेदित्यर्थः । अपि च नैयायिकानामीश्वरस्य निर्दोषत्वं स्वसमयाविरुद्धमित्याह—"अपि चे"ति । (२)अस्माकं तु नायं समय इति भावः । ननु कारुण्यादपि प्रवर्तमानो जनो दृश्यते न च कारुण्यं दोष इत्यत आह-"स्वार्थप्रयुक्त एव चे"ति । कारुण्ये हि सत्यस्य दुःखं भवति तेन तत्प्रहाणाय प्रवर्तत इति कारुणिका अपि स्वार्थप्रयुक्ता एव प्रवर्तन्त इति । ननु स्वार्थप्रयुक्त एव प्रवर्ततामेवमपि को दोष इत्यत आह "स्वार्थवत्त्वादीश्वरस्ये"ति । अर्थित्वादित्यर्थः । पुरुषस्य चौदासीन्याभ्युपगमान्न वास्तवी प्रवृत्तिरिति ॥३७॥

अपरमपि दृष्टानुसारेण दूषणमाह—

संबन्धानुपपत्तेश्च ॥ ३८ ॥

दृष्टो हि सावयवानामसर्वगतानां च संयोगः । अप्राप्तिपूर्विका हि प्राप्तिः संयोगो, न सर्वगतानां संभवत्यप्राप्तेरभावान्निरवयवत्वाच्च । अव्याप्यवृत्तिता हि संयोगस्य स्वभावो, न च निरवयवेष्वव्याप्यवृत्तिता संयोगस्य सम्भवतीत्युक्तम् । तस्मादव्याप्यवृत्तितायाः संयोगस्य व्यापिकाया निवृत्तेस्तद्व्याप्यस्य संयोगस्य विनिवृत्तिरिति भावः । नापि समवायलक्षणः सम्बन्धः अयुतसिद्धानामाधाराधेयभूतानामिह प्रत्ययहेतुः संबन्ध इत्यभ्युपेयते,न च प्रधानपुरुषेश्वराणां मिथोऽस्त्याधाराधेयभाव इत्यर्थः । नापि योग्यतालक्षणः कार्यगम्यसम्बन्ध इत्याह "नाप्यन्य" इति । नहि प्रधानस्य महदहंकारादिकारणत्वमन्यापि सिद्धमिति शङ्कते—"ब्रह्मवादिन" इति । निराकरोति । "न" कुतस्तस्य मतेऽनिर्वचनीयतादात्म्यलक्षणसंबन्धोपपत्तेः । "अपिचे"ति । आगमो हि प्रवृत्तिं प्रति न दृष्टान्तमपेक्षत इत्यदृष्टपूर्वे तद्विरुद्धे च प्रवर्तितुं समर्थः, अनुमानं तु दृष्टानुसारि नैवंविधे प्रवर्तितुमर्हतीति शङ्कते-(३) "परस्यापी"ति । परिहरति-"ने"ति । (४) अस्माकं त्वीश्वरागमयोरनादित्वादीश्वरयोनित्वेप्यागमस्य न विरोध इति भावः ॥ ३८ ॥

अधिष्ठानानुपपत्तेश्च ॥ ३९ ॥

(५)यथादर्शनमनुमानं प्रवर्तते नालौकिकार्थविषयमितीहापि न प्रस्मर्तव्यम् । सुगममन्यत् ॥ ३९ ॥

वर्तितं कथमीश्वरप्रवर्तनलक्षणकार्यं करोति ? एवं सति प्रवर्तकत्वोपपादनमनुकूलं, केवलं ततः पूर्वकर्मैवालम्ब्यते तत्राह तत्रापीति । तत्रापीश्वरप्रवर्तने स्वकार्ये पूर्वं कर्म ततः पूर्वभाविकर्मप्रवर्तितेनेश्वरेण प्रवर्तितमिति वक्तव्यं तथा च सर्वानुपपत्तिसाम्यादन्धपरम्परेत्यर्थः ।

(१) कर्मेश्वरौ ।

(२) अस्माकान्विति । मायामय्यां प्रवृत्तौ सर्वसम्भवाक्षेप उचित इति भावः ।

(३) एवं श्रुतेरनुमानाच्चेश्वराद्धिं निरस्य पौरुषेयागमात्तत्सिद्धिर्निरस्यत इत्याह परस्यापीति ।

(४) अस्माकान्विति । शास्त्रयोनित्वेपीश्वरस्यानादित्वसिद्धनियतक्रमापेक्षणान्नेश्वराधीनं वेदस्य प्रामाण्यं किन्तु स्वतः, यथा देवदत्तकृतत्वेपि दीपस्य प्रकाशनशक्तिमत एव कृतत्वान्न देवदत्तापेक्षं तस्य प्रकाशकत्वं तद्वदिति भावः ।

(५) ननु नीरूपस्याधिष्ठेयत्वानुपपत्तिर्मायायामपि समानेत्यत्राह यथादर्शनमिति ।

करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥

"रूपादिहीनमि"ति । अनुद्भूतरूपामित्यर्थः । रूपादिहीनकरणाधिष्ठानं हि पुरुषस्य स्वभोगादावेव दृष्टं नान्यत्र, नहि वास्यं कुठाराद्यपरिदृष्टं व्यापारयत् कचिदुपलभ्यते, तस्मा-द्रूपादिहीनं करणं व्यापारायत ईश्वरस्य भोगादिप्रसक्तिस्तथा चानीश्वरस्वमिति भावः । कल्पान्तरमाह—"अन्यथे"ति । पूर्वमधिष्ठितिरधिष्ठानमिदानीं तु अधिष्ठानं भोगायतनं शरीरमुक्तम् । तथा भोगादिप्रसङ्गेनानीश्वरत्वं पूर्वमापादितम् . संप्रति तु शरीरित्वेन भोगा दिप्रसङ्गादनीश्वरत्वमुक्तमिति विशेषः ॥ ४० ॥

अन्तवत्त्वमसर्वज्ञता वा ॥ ४१ ॥

अपि च सर्वत्रानुमानं प्रमाणयतः (१)प्रधानपुरुषेश्वराणामपि संख्याभेदवत्त्वमन्तवत्त्वं च द्रव्यत्वात् (२)संख्यान्यत्वे सति प्रमेयत्वाद्वानुमातव्यं ततश्चान्तवत्त्वमसर्वज्ञता वा । (३)अ-स्माकं त्वागमगम्येर्थे तदधितविषयतया नानुमानं प्रभवतीति भावः । स्वरूपपरिमाणमपि यस्य यादृशमणुमहत्परममहद्वीर्घं ह्रस्वं चेति । 'अथ मा भूदेष दोष' इत्युत्तरो विकल्पो यस्यान्तो-स्ति तस्यान्तवत्त्वाग्रहणमसर्वज्ञतामापादयेत् । यस्य त्वन्त एव नास्ति तस्य तदग्रहणं नासर्व-ज्ञतामावहति नहि शशविषाणाद्यज्ञानादज्ञो भवतीति भावः । परिहरति—"तत" इति । (४)आगमानपेक्षस्यानुमानमेषामन्तत्वमवगमयतीत्युक्तम् ॥ ४१ ॥

उत्पत्त्यसंभवात् ॥ ४२ ॥

अन्यत्र(५) वेदाविसेवादाद्यत्राशे(६) विसंवादः स निरस्यते, तमंशमाह "यत्पुनरि-दमुच्यते" । "वासुदेवात्संकर्षणो जीव" इति जीवस्य कारणवत्त्वे सत्यनित्यत्व-मनित्यत्वे परलोकिनो ऽभावात्परलोकाभावः, ततश्च स्वर्गनरकापवर्गाभावापत्तेर्नास्तिक्यमित्य-र्थः । अनुपपन्ना च जीवस्योत्पत्तिरित्याह "प्रतिषेधिष्यते चे"ति ॥ ४२ ॥

न च कर्तुः करणम् ॥ ४३ ॥

यद्यप्यनेकशिल्पपर्यवदातः परशुं कृत्वा तेन पलाशं छिनत्ति, यद्यपि च (७)प्रयत्नेनेन्द्रि-यार्थात्ममनःसंनिकर्षलक्षणं ज्ञानकरणमुपादायारमार्थं विजानाति, तथापि संकर्षणो ऽकरणः कथं

---

(१) प्रधानेति । अत्र पुरुषत्वजात्यभिप्रायेण पुरुषाणामैक्याभित्वं द्रष्टव्यम् , संख्याविशेषवत्त्वं द्रव्य-त्वमन्तवत्त्वे च संख्याविशेषवत्त्वं हेतुर्द्रष्टव्यः ।

(२) एवं द्रव्याश्रितैव संख्येति मतेन संख्याविशेषवत्त्वे द्रव्यत्वं हेतूकृत्वा संख्यां विहाय सर्वत्र संख्या-नीकारपक्षेऽनुमानप्रकारमाह संख्यान्यत्वे सतीति ।

(३) ननु ब्रह्माण्यन्तवदेकत्वादेकघटवदित्यनुमानं कुतो न स्यादत आह अस्माकं त्विति ।

(४) वादिन इति शेषः ।

(५) नारायण एव परः सर्वात्माऽनेकधा व्यूह्यावस्थित इत्यंशे ।

(६) वासुदेवात्संकर्षण उत्पद्यते इत्यंशे ।

(७) भवतु क्रियाकरणमुत्पाद्यं ज्ञानकरणं तु नैवं स्यादत आह प्रयत्नेनेति । विवक्षातश्चात्र प्रयत्ना-दीनां करणत्वं बोध्यम् ।

प्रद्युम्नाख्यं मनःकरणं कुर्यात् । अकरणस्य वा करणनिर्माणसामर्थ्ये कृतं करणनिर्माणेनाकरणादेव निखिलकार्यसिद्धेरिति भावः ॥ ४३ ॥


विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥

वासुदेवा एवैते संकर्षणादयो "निर्दोषा" अविद्यादिदोषरहिताः । "निरधिष्ठानाः" निरुपादाना अत एव "निरवद्या" अनित्यत्वादिदोषरहिताः तस्मादुत्पत्त्यसंभवोनुगुणत्वाच्च दोष इत्यर्थः। अत्रोच्यते "एवमपी"ति । मा भूदभ्युपगमे न दोषः, प्रकारान्तरेण त्वयमेव दोषः । प्रश्नपूर्वं प्रकारान्तरमाह "कथं यदि तावदि"ति । न तावदेते परस्परं भिन्ना ईश्वराः परस्परव्याहतेच्छा भवितुमर्हन्ति व्याहतकामत्वे च कार्यानुत्पादात् (१) अव्याहतकामत्वे वा प्रत्येकमीश्वरत्वे एकेनैवेप्सनायाः कृतत्वादानर्थक्यमितरेषाम् । संभूय चेप्सनायां परिशुद्धो(२) न कश्चिदीश्वरः स्यात् , सिद्धान्तहानिश्च, (३)भगवानेवैको वासुदेवः परमार्थतत्वमित्यभ्युपगमात् । तस्मात्कल्पान्तरमास्थेयम् । तत्र चोत्पत्त्यसम्भवो दोष इत्याशयवान् कल्पान्तरमुपन्यस्योत्पत्त्यसंभवेनापाकरोति "अथायमभिप्राय" इति । सुगममन्यत् ॥४४

विप्रतिषेधाच्च ॥ ४५ ॥

गुणिभ्यः स्वस्वात्मभ्यो ज्ञानादीन् गुणान् भेदेनोक्त्वा पुनरभेदं ब्रूते "आत्मान एवैते भगवन्तो वासुदेवा" इति । आदिग्रहणेन प्रद्युम्नानिरुद्धयोर्मनोहंकारलक्षणतयात्मनो भेदमभिधायात्मान एवैत इति तद्विरुद्धाभेदाभिधानमपरं संगृहीतम् । वेदविप्रतिषेधो व्याख्यातः ॥ ४५ ॥

इति श्रीवाचस्पतिमिश्रविरचिते शारीरकभगवत्पादभाष्यविभागे भामत्यां
द्वितीयाध्यायस्य द्वितीयः पादः ॥



(१) तथाचेश्वरत्वव्याघात इति भावः ।

(२) निश्चितः ।

(३) अनेकेश्वरत्वेऽपसिद्धान्तमाह भगवानिति ।



प्राप्तिस्थानम्—

चौखम्बा-संस्कृत-पुस्तकालय

बनारस सिटी ।

